श्रीपद्म पुराणम्

उत्तरखण्डं

प्रथमोऽध्यायः

ॐ श्रीविष्णवे नमः

ॐ श्रीवेदव्यासाय नमः

ॐ नारायणंनमस्कृत्यनरंचैवनरोत्तमम्
देवींसरस्वतींव्यासंततोजयमुदीरयेत् १
अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया
चक्षुरुन्मीलितंयेनतस्मै श्रीगुरवेनमः २
ऋषयऊचुः -
श्रुतंपातालखंडंचत्वयाख्यातंविदांवर
नानाख्यानसमायुक्तंपरमानंद दायकम् ३
अधुना श्रोतुमिच्छामोभगवद्भक्तिवर्द्धनम्
पाद्मेयच्छेषमस्तीहतद्ब्रूहिकृपयागुरो ४
सूतउवाच-
शृणुध्वंमुनयः सर्वेयदुक्तं शंकरेणहि
पृच्छतेनारदायैवविज्ञानंपापनाशनम् ५
एकादानारदोलोकान्पर्यटन्भगवत्प्रियः
गतोऽद्रिमंदरंशंभुंप्रष्टुंकिंचिन्मनोगतम् ६
तत्रासीनमुमानाथंप्रणिपत्यशिवाज्ञया
उपविष्टः समादिष्टआसनेऽभिमुखोविभोः ७
नारदउवाच
पप्रच्छइदमेवेशंयन्मांपृच्छथसत्तमाः
भगवन्देवदेवेशपार्वतीशजगद्गुरो ८
भगवत्तत्वविज्ञानंयेनस्यात्तन्ममादिश
शिवउवाच
शृणुनारदवक्ष्यामिपुराणंवेदसंमितम् ९
यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः
प्रथमोत्तरकीर्तिः स्यात्पर्वताख्यानमेवच १०

जालंधरंतथाख्यानं श्रीशैलाख्यंततः परम्
हरिद्वारस्यव्याख्यानं विष्णुपादोद्भवांतथा ११
प्रयागतीर्थंतेवद्त्येदशाश्वमेधिकंचतत्
तुलसीमहिमाचैवशंखचक्रगदादिकम् १२
द्वारकायास्तथाख्यानंमहोत्सव विधिस्ततः
तडाकजंतथापुरायंवापीकूपप्रपादिकम् १३
गाणपत्यंततोवद्त्येवैष्णवागममेवच
जीर्णोद्धारस्यमाहात्म्यंमंदाकिनीसमागमम् १४
साभ्रमत्यास्तुमाहात्म्यंमाहात्म्यंतीरजंतथा
स्त्रीशूद्राणांतथाधर्मंतथात्याज्यैश्चधारणम् १५
उमामहेशसंवादेप्रोक्तंनामसहस्रकम्
कैलासात्तत्समानीतं नारदेनाग्रजन्मना १६
लोकानांब्राह्मणानांचद्त्रियाणांविशेषतः
स्त्रीशूद्राणांविशेषेणपठितव्यंसमाहितैः १७
इदंपवित्रंपरमंपुरायमायुष्यवर्धनम्
पठितव्यंविशेषेणविष्णोः सायुज्यमाप्नुयात् १८
विष्णोर्नामसहस्रंतत्पावनंभुविविश्रुतम्
चतुर्विंशतिमूर्तीनांस्थानकानीहसंवदेत् १९
तेषांचमातापितरावंतरंचब्रवीम्यहम्
गोत्रंवेदांश्चतेषां वै कर्माणीहतथैव च २०
स्त्रियस्तेषांप्रवद्त्यामियथाविज्ञानदर्शनात्
चतुर्विंशत्येकादशीनां द्वादशीनांप्रभावताम् २१
गोदावर्याश्चमाहात्म्यंशंखचक्रादिधारणम्
ब्राह्मणानांविशेषेणधारणंविधिपूर्वकम् २२
यमुनायाश्चमाहात्म्यंगंडिकायास्तथामुने
वेत्रवत्यास्तुमाहात्म्यंवच्म्यहंतेनसंशयः २३
गिल्लितीर्थोद्भवंपुरायंशिलाद्त्रेत्रंमहच्चयत्
तत्सर्वंसंप्रवद्त्यामिखंडेउत्तरसंज्ञके २४
अर्बुदेश्वरमाहात्म्यंतत्रतीर्थादिकंचयत्
सरस्वत्याश्चमाहात्म्यंसिद्धद्त्रेत्रादिकंचयत् २५

पद्मनाभसमुत्पत्तिंतुलस्याश्चैवधारणम्
गोपीचंदनमाहात्म्यंपट्टपूजांतथैवच २६
निरंजनस्यमाहात्म्यंतथाविज्ञानदर्शनम्
तत्रदीपप्रदानंचधूपदानंविशेषतः २७
कार्तिकस्याथमाहात्म्यंमाहात्म्यंमाघजंतथा
सर्वेषांचव्रतानांचमाहात्म्यंविधिपूर्वकम् २८
शृणुनारदवक्ष्यामिजगन्नाथाख्यमुत्तमम्
यंदृष्ट्वामुच्यतेलोकोब्रह्महत्यादिपातकात् २९
यत्रसिद्धंतथाभुक्तंपारलौकिकदायकम्
ब्राह्मणायत्र भुंजन्ति वेदशास्त्र विशारदः ३०
अन्येषांचैवलोकानांकाकथाचैवसुव्रत
पंचविंशत्यत्रनागानर्तक्योविविधास्तथा ३१
ब्रह्महत्याबालहत्यागवांहत्यातथैवच
ताः सर्वाविलयंयांतिजगन्नाथस्यदर्शनात् ३२
जगन्नाथेत्युच्चरञ्जतुर्महापापैः प्रमुच्यते
विष्णोःपूजनकंपुष्पैस्तन्माहात्म्यमपिब्रुवे ३३
पर्वतानांवर्णनंचदेशानांवर्णनंतथा
गोपूजनादिमाहात्म्यं सिद्धानांचैवपूजनम् ३४
सिक्थेदत्तेतुयत्पुरायंतत्सर्वंप्रवदाम्यहम्
कदलीगर्भदानंचवृक्षदानंततः परम् ३५
अश्वदानंहस्तिदानंजपमाहात्म्य मुत्तमम्
मंत्रदीक्षागमंचैवगुरोर्लक्षणमेवच ३६
शिष्यस्यलक्षणंप्रोक्तंयथापौराणिकाविदुः
चरणोदकमाहात्म्यंपितृश्राद्धादिकंचयत् ३७
पितृक्षयाहदानंचनीलोत्सर्गविधिस्ततः
ग्रहणंचंद्रसूर्यस्यतत्रदानंचयद्भवेत् ३८
शालग्रामस्यदानस्यमाहात्म्यंमाल्यगंधयोः
दशम्यैकादशीवेधंद्वादशीहरिवासरम् ३९
तेषांचैवतुमाहात्म्यंरुद्रनामादिकंचयत्
मथुरायाश्चमाहात्म्यंकुरुक्षेत्रादिकंतथा ४०

सेतुबंधस्यचाख्यानंश्रीरामेश्वरजंतथा
त्र्यंबकस्यचमाहात्म्यंपंचवटयाश्चयत्फलम् ४१
दंडकारगयमाहात्म्यंशृगुवाडवसत्तम
दंडकारगयमाहात्म्यंनृसिंहोत्पत्तिकारणम् ४२
गीतायाश्चैवमाहात्म्यंतथाभागवतस्यच
कालिद्याश्चैवमाहात्म्यमिन्द्रप्रस्थस्यवर्णनम् ४३
रुक्मांगदचरित्रंतुमहिमावैष्णवस्यच
वैष्णवेह्येकभुक्तेतुशृणुवाडवसत्तम ४४
ससागरांचपृथिवींदत्त्वाचैवतुयत्फलम्
तत्फलंसमवाप्नोतिभुक्तेह्येकेतुवैष्णवे ४५
सात्विकाः सत्त्वसंपन्नाराजसाः कामुकाः स्मृताः
तामसाअ्रधमाःप्रोक्तावैष्णवानांतुलन्नणम् ४६
ब्राह्मणावैष्णवायेतुवेदधर्मपरायणाः
तेषांमाहात्म्यंवन्दयामियथोक्तंचैवनारद ४७
विष्णुनिंदारतायेवैद्रव्यलोभेनसत्तम
तेषांपापंतुवन्दयामिसांप्रतंऋृषिसत्तम ४८
ज्वालामुख्यास्तथाख्यानंहिमशैलेन्नणंतथा
ब्रह्मोत्पत्तिस्तुवैयत्रतंप्रदेशंवदाम्यहम् ४९
कायस्थानांसमुत्पतिर्गयाव्याख्यानमेवच
गदाधरस्वरूपंचफल्गुवर्णनमेवच ५०
एतेषांचैवमाहात्म्यंपाद्मेदृष्टंतथाश्रुतम्
महाबोधस्वरूपंचसकल्केर्यशएवच ५१
रामगयायामाहात्म्यंतथाप्रेतशिलाभवम्
ब्रह्मणश्चतथाख्यानंशिलाख्यानंवदाम्यहम् ५२
ब्रह्मयोनेस्तथाख्यानमन्नयाख्यवटस्यच
श्राद्धेतत्रमहत्पुगयंयत्तत्सर्वंवदाम्यहम् ५३
महेश्वरकृतांभक्तिंविष्णुनाचमहात्मना
अ्रद्यापिकाश्यांजपतिमहारुद्रोह्यनामयम् ५४
माहात्म्यंचततोवन्दयेसागरस्यहिनारद
तिलतर्पणजंपुगयंयवजंपुगयमेवच ५५

तुलसीदलसंयुक्तंतर्पणंदेवजंतथा
तन्माहात्म्यंप्रवद्म्यामियथोक्तंब्रह्मणामम ५६
शंखनादस्यमाहात्म्यंपुरायंचासंख्यसंज्ञकम् ५७
रवेर्वारस्यमाहात्म्यंयोगस्यविष्णुसंज्ञिनः
वैधृतस्यचमाहात्म्यंव्यतीपातस्यवैतथा ५८
एतत्सर्वंप्रवद्म्यामियथोक्तंचैवनारद
अन्नदानं वस्त्रदानंभूमिदानंतथैवच ५९
शय्यादानंचगोदानंतथावृषभमेवच
जन्माष्टम्याश्चमाहात्म्यंमत्स्यमाहात्म्यमेवच ६०
कूर्ममाहात्म्यंतत्प्रोक्तंवाराहस्यतथैवच
माहात्म्यंचगवादीनांदानांनांप्रवदाम्यहम् ६१
प्रह्लादमुखभक्तायेयेकेचिद्भुविविश्रुताः
तन्माहात्म्यंततोवद्म्येशृणुदेवर्षिसत्तम ६२
जागरेमहिमाचैवदीपदानेकृतेचयत्
प्रहरेषुपृथक्पूजाफलंदेवर्षिसत्तम ६३
पर्शुरामस्यचाख्यानं रेणुकायावधस्तथा
ब्राह्मणानांभूमिदानंरामेणैवचयत्कृतम् ६४
रामस्याश्रमजंपुरायंवदाम्यहमशेषतः
नर्मदायास्तथाख्यानंपुरायपूजनयोस्तथा ६५
दानंवेदपुराणानामाश्रमाणांनिरूपणम्
हिररायदानपुरायंचब्रह्मांडदानमेवच ६६
पद्मपुराणदानंचखंडानांव्यक्तयस्तथा
प्रथमंसृष्टिखंडंचद्वितीयंभूमिखंडकम् ६७
स्वर्गखंडंतृतीयंचतुर्यंपातालसंज्ञकम्
उत्तरंपंचमंप्रोक्तंखंडान्यनुक्रमेणवै ६८
एतत्पद्मपुराणंतुव्यासेनतुमहात्मना
कृतंलोकहितार्थायब्राह्मणश्रेयसेतथा ६९
शूद्राणांपुरायजननंतीव्रदारिद्र्यनाशनम्
मोक्षदंसुखदंचाशुकल्याणप्रदमव्ययम्
श्रुत्वादानंतथाकुर्याद्विधिनातत्रनारद ७०

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहिता
यामुत्तरखंडेमहेशनारदसंवादेबीजसमुच्चयो नामप्रथमोऽध्यायः १

द्वितीयोऽध्यायः

महेशउवाच-
एकलक्षंपंचविंशत्सहस्रा पर्वतास्तथा
तेषांमध्येमहत्पुरयंबद्रिकाश्रममुत्तमम् १
नरनारायणोदेवोयत्रतिष्ठतिनारद
तस्यस्वरूपंतेजश्चवक्ष्यामीहचस्त्रांपतम् २
हिमपर्वतशृंगेचकृष्णाकारतयाद्विज
द्वौपुरुषौतत्रवर्तेतेनरनारायणावुभौ ३
श्वेतएकस्तुपुरुषः कृष्णोह्येकतमःपुनः
तेनमार्गेणयेयांतिहिमाचलकृतोद्यमाः ४
पिंगलश्वेतवर्णश्चजटाधारीमहाप्रभुः
कृष्णोनारायणोह्येषजगदादिर्महाप्रभुः ५
चतुर्बाहुर्महान्श्रीमान्व्यक्तोऽव्यक्तःसनातनः
उत्तरायणेमहापूजाजायतेतत्रसुव्रत ६
षरामासादिकपर्यंतंपूजानैवचजायते
हिमव्याप्तंतदाजातंयावद्वैदक्षिणंभवेत् ७
अतएतादृशोदेवोनभूतोनभविष्यति
तत्रदेवावसंतीहऋषीणांचाश्रमास्तथा ८
अग्निहोत्राणिवेदाश्चध्वनिःप्रश्रूयतेसदा
तस्यवैदर्शनंकार्यंकोटिहत्याविनाशनम् ९
अलकनंदायत्रगंगातत्रस्नानंसमाचरेत्
कृत्वास्नानंतुवैतत्रमहापापात्प्रमुच्यते १०
यत्रविश्वेश्वरोदेवस्तिष्ठत्येवनसंशयः
एकस्मिन्नवसरेब्रह्मन्सुतपस्तप्तवानहम् ११
तदानारायणोदेवोभक्तानांहिकृपाकरः
अव्ययःपुरुषःसाक्षादीश्वरोगरुडध्वजः
सुप्रसन्नोऽब्रवीन्मांवैवरंवरयसुव्रत १२

श्रीनारायणउवाच-
यद्यदीप्ससिदेवत्वंतंतंकामंददाम्यहम्
त्वंकैलासविभुःसाक्षाद्रुद्रोवैविश्वपालकः १३
रुद्रउवाच-
अलंगृह्णामिभोदेवसुप्रसन्नोजनार्दन
द्वौवरौममदीयेतांयदिदातुंत्वमिच्छसि १४
तवभक्तिःसदैवास्तुभक्तराजोभवाम्यहम्
सर्वेलोकाब्रुवंत्वेवमयंभक्तःसदैवहि १५
तवप्रसादाद्देवेशमुक्तिदाताभवाम्यहम्
येलोकामांभजिष्यंतितेषांदातानसंशयः १६
विष्णुभक्तइतिख्यातोलोकेचैवभवाम्यहम्
यस्याहंवरदातातुतस्यमुक्तिर्भवेत्प्रभो १७
जटिलोभस्मलिप्तांगोह्यहंवैतवसंनिधौ
तवचरणप्रसादेनलोकेख्यातोभवाम्यहम् १८

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायांनारदोमापतिसंवादेबदरीनारायणमाहात्म्येरुद्रप्रसादोनामद्वितीयोऽध्यायः २

तृतीयोऽध्यायः

सूतउवाच-
एकदानारदोद्रष्टुंपांडवान्दुःखकर्शितान्
ययौकाम्यवनंविप्रःसत्कृतस्तैर्यथाविधि १
अथनत्वामुनिश्रेष्ठंयुधिष्ठिरउवाचह
भगवन्कर्मणाकेनदुःखाब्धौपतितावयम् २
तमुवाचऋषिर्दुःखंत्यजत्वंपांडुनंदन
सुखदुःखसमाहारेसंसारेकःसुखीनरः ३
ईश्वरोपिहिनस्थायीपीडयतेदेहसंचयैः
नदुःखरहितः कश्चिद्देहीदुःखसहोयतः ४
शरीरंसवितुर्यस्माद्राहुस्तद्ग्रसतेबली
राहोरपिशिरश्छिन्नंशौरिणामृतभोजने ५
सोऽपिशार्ङ्गधरोदेवःक्षिप्तःसागरगह्वरे

जालंधरेणवीरेणनिहतःसोऽपिशंभुना ६
युधिष्ठिरउवाच-
कोऽसौजालंधरोवीरःकस्यपुत्रःकुतोबली
कथंजालंधरंसंख्येहतवान्वृषभध्वजः ७
एतत्सर्वंसमाचक्ष्वविस्तरेणतपोधन
राज्ञासएवमुक्तस्तुकथयामासनारदः ८
नारदउवाच-
शृणुभूपकथांदिव्यामशेषाघौघनाशिनीम्
ईशानसिंधुसून्वोश्चसंग्रामंपरमाद्भुतम् ९
एकदागिरिशंस्तोतुंप्रययौपाकशासनः
अप्सरोगणसंकीर्णोदेवैर्बहुभिरावृतः १०
गंधर्वैरावृतोदेवस्तंत्रीशिक्षासुकोविदैः
रंभातिलोत्तमारामाकर्पूराकदलीतथा ११
मदनाभारतीकामासर्वाभरणभूषिताः
नर्तक्यश्चतथाचान्याःसमाजग्मुःसुरांतिकम् १२
गंधर्वयक्षसिद्धास्तुनारदस्तुंबुरुस्तथा
किन्नरामुहुराजग्मुस्तथाकिंनरयोषितः १३
वायुश्चवरुणश्चैवकुबेरोधनदस्तथा
यमश्चाग्निर्निर्ऋतिश्चयेचान्येदेवतागणाः १४
विमानसंस्थोमघवाविमानस्थाःसुरांगनाः
स्ववाहनगतादेवाः कैलासंप्रययुर्जवात् १५
ददृशुस्तेततोदेवाःकैलासंपर्वतोत्तमम्
महीधराणांसर्वेषांपृथिव्याइवमंडनम् १६
सर्वतः सुखदंशुद्धंसिद्धिराशिमिवस्थितम्
यत्रवृक्षाः कल्पवृक्षाःपाषाणाश्चिंतितप्रदाः १७
पुन्नागैर्नागचंपैश्चतिलकैर्देवदारुभिः
अशोकैःपाटलैश्चूतैर्मंदारैः शोभितोगिरिः १८
पर्यंतकवनामोदवाहकायत्रवायवः
पंगुत्वंबहुचारेणयांतितेमलयानिलाः १९
वाप्यःस्फटिकसोपानाह्यगाधविमलोदकाः

वैडूर्यनालसंसक्तसौवर्णनिभपंकजाः २०
कुमुदानांद्युतिर्यत्रराजतेसर्वतोदिशम्
कह्लारैःशोभितावाप्यःपिनद्धाःपद्मरागवत् २१
हरिन्मणिनिबद्धाश्चगोमेदैःसर्वतोवृताः
पद्मरागशिलाबद्धानानाधातुविचित्रिताः २२
ददृशुःसुंदरतरंनाकाधिकविनिर्मितम्
कैलासंपर्वतश्रेष्ठंदृष्ट्वातेविस्मयंगताः २३
विमानादवतीर्णाश्चमघवादेवताश्चताः
द्वारपालमथागम्यनंदिनंवाक्यमब्रुवन् २४
भोभोगणवरश्रेष्ठशृणुमेवाक्यमुत्तमम्
समाज्ञापयशीघ्रंत्वंनृत्यार्थमिहमागतम् २५
ईश्वरंप्रतिदेवेशंसर्वदेवैःसमावृतम्
इंद्रस्यवचनंश्रुत्वागिरिशंनंदिरब्रवीत् २६
प्रभोऽयमागतःसर्वैर्देवराजःपुरंदरः
नृत्यार्थमथतंप्राहानयशीघ्रंशचीपतिम् २७
प्रवेशयामासतदानंदीतैःसहवासवम्
सदृष्ट्वागिरिशंदेवंतुष्टाववृषभध्वजम् २८
रंभाद्यास्तास्तदासर्वानर्त्तक्योहरसन्निधौ
मृदंगवीणावादित्रैः मुदानाट्यंप्रचक्रिरे २९
कांस्यवाद्यान्प्रगृह्यान्यावंशतालान्सकाहलान्
चक्रुस्तानृत्यसंरंभंस्वयंदेवः पुरंदरः ३०
अतीवनर्तनंचक्रेसुंदरंदेवदुर्ल्लभम्
ईश्वरस्तोषमापन्नोवासवंवाक्यमब्रवीत् ३१
प्रसन्नोऽहसुरश्रेष्ठजातस्तेव्रियतांवरः
इत्युक्तवतिदेवेशेस्वबाहुबलगर्वितः ३२
प्रत्युवाचहरंवाक्यंसंग्रामःसवृतोमया
यत्रत्वत्सदृशोयोद्धातद्युद्धंदेहिमेप्रभो ३३
इत्युक्त्वानिर्गतोजिष्णुर्लब्ध्वाशंभोर्वरंप्रभोः
तस्मिन्गतेतदाशक्रेगिरिशोवाक्यमब्रवीत् ३४
गणामेश्रूयतांवाक्यंदेवराजोऽतिगर्वितः

इत्युक्त्वाक्रोधसंयुक्तोबभूवचततोहरः ३५
आविरासीत्ततःक्रोधोमूर्त्तिमान्पुरतःस्थितः
घनान्धकारसदृशोमृडंक्रोधस्ततोऽब्रवीत् ३६
देहिमेत्वंहिसन्देशंकिंकरोमितवप्रभो
उमापतिस्तदोवाचगच्छत्वंवासवंजय ३७
स्वर्गसिंधुंसमासाद्यसागरस्यचवीर्यवान्
इत्युक्तोंतर्दधेक्रोधोगणास्तेविस्मयंययुः ३८
ईशानकल्पेजातेतुकामेनार्णवसंगमे
नाकसिंधुस्तदामत्तास्वयौवनभरोष्मणा ३९
तांदृष्ट्वासिंधुराजश्चजलकल्लोलवानभूत्
तदाबभूवराजेंद्रगंगासागरसंगमः ४०
महानदीतदाप्राप्यरेमेचात्मबलेनच
अत्रांतरेसमुद्रस्यबभूवसुभटस्ततः ४१
सूनुस्तस्यांमहानद्यांसमुद्रादभवद्बली
महार्णवतनूजेनजातमात्रेणपार्थिव ४२
रुदतोत्कंपितापृथ्वीत्रिलोकीनादिताभवत्
समाधिबद्धमुद्रांचसंतत्याजचतुर्मुखः ४३
अत्रांतरेपरित्रस्तांतांसंवीक्ष्यजगत्त्रयीम्
धातासुरेंद्रवाक्येनप्रजगाममहार्णवम् ४४
आश्चर्यमितिसंचिंत्यहंसारूढोजवाद्ययौ
ब्रह्माणमागतंवीक्ष्यसपर्याविदधेऽर्णवः
तमुवाचततोब्रह्माकिंगर्जसिवृथांबुधे ४५
समुद्रउवाच-
नाहंगर्जामिदेवेशमत्सुतोबलवान्प्रभो
शिशोर्वैकुरुरक्षांचदुर्ल्लभंतवदर्शनम् ४६
संदृश्यतांचतनयोभार्यांप्राहातिशोभनाम्
ययौसाभर्तुरादेशात्सपुत्राब्रह्मणोंतिके ४७
उत्संगदेशेचतुराननस्यविधायपुत्रंचरणौननाम
तदासमुद्रात्मजमद्भुतंतंदृष्ट्वाविधातुः किलविस्मयोऽभूत् ४८
गृहीतकूर्चस्यशिशोः करंचयदाविरिंचिर्नशशाकमोचितुम्

तदासमुद्रःप्रहसन्प्रयातः कूर्चंप्रगृह्यार्भकरंविमोचयन् ४९
तादृशंतस्यबालस्यदृष्ट्वाविक्रममात्मभूः
प्रीत्याजालंधरेत्याहनाम्नाजालंधरोऽभवत् ५०
वरंददावथोतस्यप्रणयेनप्रजापतिः
अयंजालंधरोदेवैरजेयश्चभविष्यति ५१
पातालसहितंनाकंमत्प्रसादेनभोक्ष्यति
इत्युक्त्वांतर्दधेब्रह्माहंसमारुह्यसत्वरः ५२
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायांयुधिष्ठिरनारदसंवादेउत्तर
खंडेजालंधरोत्पत्तिब्रह्मागमोनामतृतीयोऽध्यायः ३

चतुर्थोऽध्यायः

नारदउवाच–
क्रमेणवर्द्धमानोऽसौबाल्यभावेसबालकः
निपत्यमारुतोत्संगेसागरंप्रतिधावति १
आनीयचक्रेसचपंजरस्थान्क्रीडापरःकेसरिणांकिशोरान्
सिंहादिनेभादिनियुद्धमेवंयुधोपयोगीवतदीयवीर्यम् २
तस्मादाकाशमुत्पत्यखेचरान्पातयेद्भुवि
गर्जितैर्भीषयामासस्वर्गंहिसहसागरम् ३
समुद्रांतर्गतंसर्वंसत्वजातंतुपार्थिव
ग्रस्तंसिंधुसुतेनेतितद्भयाच्छन्नतांगतम् ४
दृष्ट्वानिःसत्वकंतोयंतद्भयाद्वडवानलः
निजदेशंपरित्यज्यप्रविवेशहिमालयम् ५
सबालत्वंपरित्यज्यक्रमेणार्णवनंदनः
ततोनवंवयःप्राप्यविक्रमेणाक्रमद्दिवम् ६
एकदापितरंप्राहसमुद्रंसिंधुनंदनः
मन्निवासोचितंस्थानंदेहितातातिविस्तृतम् ७
संबुद्ध्यवचनंसूनोःसजगादमहार्णवः
पुत्रदास्याम्यहंराज्यंतववाभुविदुर्ल्लभम् ८
अनंतरंदैत्यगुरुःसमुद्रंभार्गवोगतः
तमागतंविलोक्याब्धिर्विधिनासमपूजयत् ९

अथनदिपतिदत्तेप्राप्तसौंदर्यनिर्यन्मणिमहसिसतस्मिन्नासनेसन्निविष्टः
रुचिररुचिसुमेरोःसुंदरेशृंगभागेकमलजइवकांतिंकिंचिदुच्चैर्जहार १०
कृतांजलिपुटोभूत्वाव्याजहारार्णवःकविम्
दिष्ट्यातवात्रागमनंवदकिंकरवाणयहम् ११
तदादैत्यकुलाचार्यः प्राहतंसागरंकविः
किंतेनजातुजातेनमातुर्यौवनहारिणा १२
प्ररोहतिनयःस्वस्यवंशस्याग्रेध्वजोयथा
तवात्मजोविक्रमेणत्रैलोक्यंभोक्ष्यतिध्रुवम् १३
जंबूद्वीपेमहापीठंयोगिनीगणसेवितम्
आप्लावितंत्वयेदानींमुंचजालंधरालयम् १४
तत्रराज्यंप्रयच्छास्मैतनयायमहार्णव
अजयश्चाप्यवध्यश्चतत्रस्थोऽयभविष्यति १५
एवमुक्तोऽणवःप्रीत्याभार्गवेणाथलीलया
अपासर्पत्सुतप्रीत्यै जलेस्थलमदर्शयत् १६
शतयोजनविस्तीर्णमायतंचशतत्रयम्
देशंजालंधरंपुण्यंतस्यनाम्नैवविश्रुतम् १७
दैत्यवर्यंसमाहूयमयंप्रोवाचसागरः
पुरंजालंधरेपीठेकुरुजालंधरायवै १८
अंभोधिनैवमुक्तस्तुचक्रेरत्नमयंपुरम्
प्राकारगोपुरद्वारंसोपानगृहभूमिकम् १९
यत्रेंद्रनीलसंबद्धप्रासादतलसंस्थिताः
मेनिरेजलदोद्योगंतांडवस्थाः शिखंडिनः २०
यत्रप्रवालमाणिक्यभवनोत्थामरीचयः
सेव्यंतेशकुनैश्चूतरुचिरांकुरशंकया २१
यत्रकांचनहर्म्येषुत्विषोवह्निषुकातराः
विलोक्यप्रपलायंतेदावशंकाः शिखंडिनः २२
यत्रस्फटिकशालोत्थप्रभासंमिश्रितादिशः
विभांतिमंदरोद्भ्रांताःसफेनार्णवसंनिभाः २३
यत्रमोहंस्वहर्म्येषुविभातालोकसंस्थिताः
चक्रिरेललनाः पूर्णसांध्यचंद्रोपमाननाः २४

यत्रेन्द्रनीपकादंबपवनोद्यानमोदिताः
चित्तंविशंत्योनारीणांचक्रिरेमोहनज्वरम् २५
यत्रलेख्यगतंनृणांविलोक्यसुरतंजनः
संयातिद्विगुणंनूनंनिजकांतारतोद्यमः २६
यत्रवातायनोद्धूतधूपधूमस्यलेखयः
नभोबभूवतद्गंगाकालिंदीसंगमोपमम् २७
यत्रानेकगृहोद्भूतप्रभयासकलंनभः
विभातींद्रायुधाकीर्णशरन्मेघइवोन्नतः २८
यत्रानिशंभ्रमभ्रांताःसूर्यवाहाः प्रपीडिताः
विश्रामंयांतिमध्याह्नेप्रासादशिरसिस्थिताः २९
यत्रकुत्रचहर्म्येषुबिभ्रत्योमालतीस्रजः
रात्रौसंभूतनक्षत्राइवरेजुर्वरांगनाः ३०
यत्रहाटकहिंदोलशृंखलाघर्षणोद्भवः
चकारसुंदरींशब्दःस्फुटंमेरुभुवोभुवम् ३१
साकंसरिद्भिः पुत्रस्योशनसासहसागरः
तत्राभिषेकमकरोद्वादित्रैर्निजगर्जितैः ३२
याः स्कंदस्यजगादतारकजयेदेवः स्वयंभूः स्वयंस्वः
साम्राज्यमहोत्सवेऽपिचशचीकांतस्यवाचस्पतिः
ताभिश्चित्रविरिंचिवक्त्रसरसीहंसीभिराशास्महेवाणीभिर्वसुधा
विवाहसमयेमंत्रोत्सवैर्मंगलम् ३३
महापद्मसहस्रंतुसैन्यमात्मोदरोद्भवम्
जालंधरायपुत्रायददौभीमंमहोदधिः ३४
जालंधरायशुक्रोऽपिप्रीत्याविद्यांनिजांददौ
मृतसंजीवनींनाम्नामायांरुद्रविमोहिनीम् ३५
शस्त्रास्त्रविद्याअन्याश्चविधिनाअब्धिसूनवे
यदन्यत्सकलंतस्मैव्याख्यातंकविनातदा ३६
ततोजालंधरंपुत्रमभिषिच्यार्णवोययौ
स्वस्थानंदिव्यदेहेननदीभिःपरिवारितः ३७
दृष्ट्वाजालंधरोदिव्यपुरंगोपुरमंडितम्
व्यचरत्सहशुक्रेणद्विजसंघैःसुपूजितः ३८

एतस्मिन्नंतरेदैत्याःपातालस्थामहाबलाः
प्राप्ताजालंधरंसर्वेकालनेमिपुरोगमाः ३९
ततोमहाबलावीराबलंक्षीरोदसंनिभम्
तस्यशुंभासुरंदैत्यंसेनापतिमकल्पयन् ४०
बलंस्ववशगंकृत्वाकृत्वाभुविस्थिरंजलम्
जालंधरस्तदाराज्यंपितृदत्तंचकारसः ४१
अत्रांतरेऽप्सराःकाचित्स्वर्णेत्यासीत्पुरादिवि
तस्याःक्रौंचप्रसादेनवृंदानामसुताभवत् ४२
धात्राविभवसंयुक्तंसौंदर्यंयत्कृतंपृथक्
तत्तदेकगतंद्रष्टुंवृंदागात्रंविनिर्मितम् ४३
तांवृंदामतिचार्वंगींप्रमदांजनमोहिनीम्
स्वर्णाजालंधरस्यार्थेददौशुक्रायायाचते ४४
शुक्रउवाच–
कंदर्पस्यजगन्नेत्रशस्त्रेणाश्चर्यकारिणा
रूपेणानेनरंभोरुदीर्घायुः सुखिनीभव ४५
निर्मायस्वयमेवविस्मितमनाःसौंदर्यसारेण यं
स्वव्यापारपरिश्रमस्यकलशंवेधाः समारोपयत्
कंदर्पंपुरुषंस्त्रियोविदधतेयस्मिन्नदृष्टेसतिद्रष्टव्यावधि
रूपमाप्नुहिपतिंतंदीर्घनेत्रंभटम् ४६
उपयेमेविवाहेनगांधर्वेणार्णवात्मजः
वृंदांतौदंपतीजातौजनानंदकरौनृप ४७
चंचलत्वंपरित्यक्तंतयाजालंधरोऽपिहि
वृत्तेनवृद्धकार्येणचकमेनपरस्त्रियम् ४८
कदाचित्ससभासीनोदृष्ट्वाराहुंशिरोहृतम्
कस्मात्कायार्द्धशेषोऽयइतिपप्रच्छभार्गवम् ४९
सतस्यकथयामासपूर्ववृत्तां तमादितः
यथानिर्मथितोदेवैःक्षीरोदोऽमृतकारणात् ५०
तच्छ्रुत्वाविस्मितोवाक्यंप्राहजालंधरोऽसुरः
प्रसादसुमुखोराहुंकामरूपोभवाधुना ५१
इतिशुक्रस्यमंत्रेणसिंधुसूनुःप्रतापवान्

पितृव्यंसंस्मरन्वीरविग्रहंत्वकरोत्सुरैः ५२

इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेनारद
युधिष्ठिरसंवादेजालंधरोपाख्यानेवृंदाविवाहोजालंधराभिषेकोनाम
चतुर्थोऽध्यायः ४

पञ्चमोऽध्यायः

युधिष्ठिरउवाच-
कः पितृव्यः सिंधुसूनोः किंवृत्तंतस्यविग्रहे
युयुधेसकथंदैत्यस्तन्मेकथयनारद १
नारदउवाच-
शृणुत्वंनृपशार्दूलपितृव्यःक्षीरसागरः
जालंधरस्यतंदेवैःप्रमथ्यधनमाहृतम् २
श्रीचंद्रामृतनागाश्वपूर्वंतस्यसुरासुरैः
तच्छ्रुत्वाविग्रहंचक्रेदेवैर्जालंधरोऽसुरः ३
कदाचित्प्रेषयामासदूतंदुर्वारणंबली
शिक्षयित्वातुवक्तव्यंदेवेंद्रभवनंप्रति ४
अथस्यंदनमारुह्यययौदुर्वारणोदिवि
प्रवेष्टुकामोभवनंद्वारस्थैर्द्वारिनिवारितः ५
दूतउवाच-
जालंधरस्यदूतोऽहमागतःशक्रसंनिधौ
गत्वातत्रभवंतोमांविज्ञापयितुमर्हथ ६
इतितस्यवचः श्रुत्वातदैवतुशचीपतिम्
गत्वाचप्रणिपत्याहदूतोदेवागतोभुवः ७
दौवारिकोमहेंद्रेणप्रत्युक्तोदूतमानय
हस्तेगृहीत्वातंदूतंवासवांतिकमानयत् ८
दुर्वारणोदेवसभांप्रविष्टःप्रव्यलोकयत्
हरिंदेवैस्तुयस्त्रिंशत्कोटिभिः परिवेष्टितम् ९
स्वर्णसिंहासनंदिव्यंचामरानिलसेवितम्
शचीप्रेमरसोत्फुल्लनयनाब्जसहस्रकम् १०
दुर्वारणोऽथदेवेशंविलोक्यगुरुणासह

प्रणानामात्मगर्वेणप्रहसन्नयनश्रियम् ११
निर्दिष्टमासनंभेजेदूतोजालंधरस्यसः
कस्यत्वंकेनकार्येणप्राप्तःप्राहेतितंहरिः १२
दूतोजालंधरस्याहंसजगादपुरंदरम्
सराजासर्वलोकानांतस्याज्ञांशृणुमन्मुखात् १३
पितृव्योममदुग्धाब्धिस्त्वयाकस्माद्विलोडितः
मंदराद्रिविधानेनहृतंकोशंमहाधनम् १४
श्रीचंद्रामृतनागाश्वंतन्मणिंविद्रुमादिकम्
देहिसर्वंतथास्वर्गंशीघ्रंत्यजपुरंदर १५
सत्वंमद्वचनात्तूर्णंकुरुसर्वंयथोचितम्
तंक्षमापयभूपालयदिजीवितुमिच्छसि १६
अथप्रहस्यमघवाप्राहदुर्वारणंप्रति
शृणुदूतसमासेनसिंधोर्मथनकारणम् १७
पुराहिमवतः सूनुर्मैनाकोनाममेरिपुः
सकुक्षौविधृतस्तेनसागरेणजडेनच १८
दग्धंचराचरंयेनवह्निनाहयरूपिणा
सचापिविधृतस्तेनसागरेणदुरात्मना १९
धर्मद्विषांदानवानामसौवैआश्रयः प्रभुः
नित्यंदधिघृतंक्षीरंदानवेभ्यः प्रयच्छति २०
अतएवायमस्माभिःदुर्वारणविलोडितः
दंडितश्चगतश्रीकोदेवैरथपुरातनैः २१
शृणुदूतसबंधेनममविप्रेणशोषितः
कुंभोद्भवेन किंचैषदुःसंगेनैवबाध्यते २२
सोऽपियुद्धार्थमस्माभिः सर्वसैन्येनसंवृतः
आगमिष्यतिवैनाशंगमिष्यतितदैवहि २३
इतीरयित्वाविररामवृत्रहासरित्पतेरात्मजदूतमुच्चकैः
शशंसचागत्यसमुद्रसूनोर्देवेश्वरेणोक्तमशेषमादितः २४
नारदउवाच-
महेंद्रवचनं श्रुत्वानिजदूतमुखेनच
समुद्रसूनुःसंक्रुद्धःसर्वसैन्यंसमाह्वयत् २५

रसातलस्थितादैत्याः येचभूतलवासिनः
स्राययुःसबलास्तत्रजालंधरमथाज्ञया २६
प्रयाणप्रक्रमेसिंधुसूनोःसैन्यस्यगर्जितैः
स्फुटंतिनभसोराजन्पातालमखिलादिशः २७
हयनागोष्ट्रवदनाबिडालमुखभीषणाः
व्याघ्रसिंहाखुवदनाविद्युत्सदृशलोचनाः २८
सर्पकेशामहादेहाः केचित्खङ्गतनूरुहाः
स्रन्येचपरिधावंतिगर्जंतिजलदस्वनैः २९
रथगजहयपत्तिसंकुलंसमरविनोदकदंबभासुरम्
स्रब्जशतसहस्रकोटिनायकंबलमखिलंचतदारराजराजन् ३०
शतयोजनविस्तीर्णविमानंहंसकोटिभिः
युक्तंभूतिसहस्रौघंसर्ववस्तुप्रपूरितम् ३१
तद्विमानंसमारुह्यसद्योजालंधरोययौ
मध्याह्नेमंदरंप्राप्तःप्रथमेऽह्निबलैःसह ३२
खंडितंशिबिकावाहैर्दलितंभूरिकुंजरैः
द्वितीयेदिवसेमेरुंसंप्राप्तोबलसंयुतः ३३
इलावृत्तेतुशिखरेतस्थौतत्कटकंमहत्
स्रथदैत्याधिपैर्भग्नंखांडवंनंदनंवनम् ३४
शिखराणिविशीर्णानिमेरोर्दानवपुंगवैः
संतानकेषुवृक्षेषुबद्धाहिंदोलमंचकान् ३५
सिद्धांगनाभिः सहितारेमिरेदैत्यपुंगवाः
कुचकुंकुमतांबूलचंदनागरुभूषणैः ३६
केशपाशच्युतैः पुष्पैः मेरोः संपूरितानदी
सुमेरोःपूर्वदिग्भागोगजैस्तस्यविघट्टितः ३७
दक्षिणंचरथैश्चेरुरुत्तरंपश्चिमंभटैः
स्रथप्रस्थापयामासदैत्याञ्जालधरोऽसुरः ३८
महेंद्रशिखरंचान्येययुर्दुंदुभिनिःस्वनैः
राजराजपुरींभंक्त्वायमस्यवरुणस्यच ३९
स्रन्येषांलोकपालानामाययुस्तेऽमरावतीम्
स्रथोत्पाताभवन्नाकेदिव्यभौमांतरिक्षगाः ४०

रजः पपातबहुलंतमस्तोमोविजृंभते
तदापपातकुलिशंकरादिंद्रस्यनिष्प्रभम् ४१
दृष्ट्वानिमित्तानिभयावहानिनाकेमहेंद्रोगुरुमित्युवाच
किंकुर्महेकंशरणंचयामस्तंपश्ययुद्धंसमुपस्थितंच ४२
ततोवाचस्पतिर्वाक्यमुवाचत्रिदशाधिपम्
चरणौपाहिशरणंविष्णोर्वैकुंठवासिनः ४३
इत्युक्तोगुरुणादेवैःसाकंवैकुंठमंदिरम्
जगामाखंडलःशीघ्रंशरणंकैटभद्विषः ४४
शशंसवासुदेवायविजयोद्वारपालकः
जालंधरभयत्रस्ताःसर्वेदेवाःसमागताः ४५
श्रीरुवाच-
नवध्योऽसौममभ्रातादेवार्थेयुध्यतात्वया
शापितोदेवमत्प्रीत्या वधार्होनभविष्यति ४६
इतिश्रीवचनंश्रुत्वाविष्णुस्त्रैलोक्यपालकः
अथारुरोहगरुडंपक्षक्षेपावृतांबरम् ४७
वैकुंठभवनात्तूर्णंनिर्गतस्त्रिदशान्हरिः
जालंधरभयत्रस्तान्गतकांतीनथैक्षत ४८
ददृशुस्तेसुराःसर्वेहरिंसांद्रघनोपमम्
शार्ङ्गशंखगदापद्मविभूषितचतुर्भुजम् ४९
स्तोत्रंपठित्वापुरतःप्राहेंद्रःसरितांपतेः
जालंधरेणात्मजेनभग्नंदेवत्रिविष्टपम् ५०
तदिंद्रवचनंश्रुत्वाऽभयंदत्वादिवौकसाम्
विजेतुमसुरंदेवैः सहरेजेसुरांतकृत् ५१
अथानीतंमातलिनारथमारुह्यवासवः
वासुदेवस्यपुरतःप्रययौविधृताशनिः ५२
वामतस्त्रिदशाःसर्वेसव्यतश्चसमाययौ
स्वाहाप्रियोदक्षिणतःसचमेषंसमास्थितः ५३
आरुह्यैरावतंनागंजयंतः शक्रनंदनः
उच्चैः श्रवसमिंद्रश्चउभौभगवतःपुरः ५४
धातार्यमाचमित्रश्चवरुणोंशोभगस्तथा

इंद्रोविवस्वान्पूषाचपर्जन्योदशमःस्मृतः ५५
ततस्त्वष्टाततोविष्णूरेजेधन्योजघन्यजः
इत्येते द्वादशादित्याइंद्रस्यपुरतःस्थिताः ५६
वीरभद्रश्चशंभुश्चगिरिशश्चमहायशाः
अजैकपादहिर्बुध्न्यःपिनाकीचापराजितः ५७
भुवनाधीश्वरश्चैवकपालीचविशांपते
स्थाणुर्भगश्चभगवान्रुद्राएकादशस्मृताः ५८
श्वसनःस्पर्शनोवायुरनिलोमारुतस्तथा
प्राणापानौसजीवौचमरुतोऽष्टौतदग्रतः ५९
विवस्वानपितन्मध्येययौद्वादशमूर्तिभिः
धनदःशिबिकारूढःकिंनरेशोययौतदा ६०
रुद्राश्चवृषभारूढामारुतोमृगवाहनः
ययुःसैन्यस्यपुरतःत्रिशूलपरिघायुधाः ६१
गंधर्वाश्चारणायक्षाः पिशाचोरगगुह्यकाः
सर्वसैन्यस्यपुरतःसर्वशस्त्रभृतोययुः ६२
पूर्वापरौतोयराशीसमाक्रांतौचसैनिकैः
तस्मिन्ससारभूमिराट्वराहवपुषाहरिः ६३
स्वर्गादागत्यवेगेनदैत्यसैन्यजिघांसया
सुमेरोरुत्तरोभागःसुरसैन्येनसंवृतः ६४
सेनाभारोद्धृतकरस्तस्थौजालंधरस्यच
आश्रित्यदक्षिणंभागंतूर्णंकनकशृंगतः ६५
अहोरात्रेणविहितावर्षेतस्मिन्निलावृते
मेरुमंदरयोर्मध्येयुद्धभूमिःप्रतिष्ठिता ६६
तत्रात्मजयदांभूमिंकविप्रोक्तांमुदायुताः
जग्मुस्तेदानवास्तूर्णंगुरुप्रोक्तांययुःसुराः ६७
रथप्रवीरैःपरितश्चसंप्लवैर्गजैर्घनाकारमदप्रवाहिभिः
अश्वैरनंतैर्गरुडाग्रगामिभिःपदातिभिःसारणभूर्भृताबभौ ६८
ततोवादित्रनिर्घोषःसेनयोरुभयोरभूत्
कोलाहलश्चवीराणामन्योन्यमभिगर्जताम् ६९
अथदानवदेवानांसंग्रामोऽभूद्भयावहः

सर्वसैन्यस्यसंमर्दोयथात्रिभुवनक्षयः ७०
भयक्रांतामहाश्रांताश्रुतिर्विलपतीमुहुः
स्वरथाकाररहितंशरैःसंपूरितंतदा ७१
रोमांचिताबभौद्यौश्चरजोवस्त्रंविधुन्वती
रौद्रैर्विहंगमारावैस्त्रासादाक्रंदतीवहि ७२
देवेंद्रेणतदाज्ञप्तामेघाःसंवर्तकादयः
गजानुच्चैःसमारुह्यतेऽसुरान्युयुधुर्मृधे ७३
देवानामश्वारोहाश्चजातागंधर्वकिन्नराः
रथिनःसाध्यसिद्धाश्चगजिनोयक्षचारणाः ७४
पदातिनःकिंपुरुषाःपन्नगाःपवनाशनाः
रोगाणामधिपोराजन्यक्ष्माचयमनायकः ७५
तत्रदानवरोगाणांसंग्रामोऽभूत्सुदारुणः
पतितालुलुठर्भूमौदैत्याःशूलज्वरामयैः ७६
दानवैर्निहतारोगाःपेतुःसमरमूर्द्धनि
पलायांचक्रिरेकेचित्व्याधयोभूधरान्प्रति ७७
औषध्यस्तत्रसहजावैशल्यकरणीमुखाः
ताभिर्विशल्याःसैन्येषुयुयुधुर्यमकिंकराः ७८
दानवैर्निहताः सर्वेशरमुद्गरपट्टिशैः
पदातयःपत्तिगणैःखड्गैस्तीक्ष्णैः परश्वधैः ७९
कोटिशोजघ्नुरन्योन्यंरुधिरारुणविग्रहाः
अश्वचाराहयैस्तूर्णैश्चिक्षिपुर्गगने तदा ८०
संश्लिष्यजघ्नुरन्योन्यंरुधिरारुणविग्रहाः
समूहोरथिनांभीमोरथौघैश्छाद्यमेदिनीम् ८१
विव्यधुर्निशितैर्बाणैर्धनुर्मुक्तैर्महारथान्
मदक्षीणकपोलांगाःकरैर्बद्धाकरान्दृढम् ८२
गजान्प्रतिगजाःक्रुद्धाःपातयंतिमहीतले
कोपिदैत्योरथंदोर्भ्यामुत्क्षिप्योत्थायखंययौ ८३
अश्वचारान्हयान्नागान्पातयामासभूतले
स्कंधेगृहीत्वातरसाययौजालंधरंप्रति ८४
कक्षयोर्वैगजौगृह्यतृतीयंजठरोपरि

चतुर्थंमस्तकेगृह्यरणेधावतिकश्चन ८५
उत्पाट्यकोशतःखड्गंविधूयविमलांबरम्
ययौसहस्रशोदेवान्पातयित्वारणेऽसुरः ८६
काचित्पीनस्तनीतन्वीखेचरीरतिलंपटा
आगत्यगगनात्तूर्णंनिन्येदैत्यंरणांगणात् ८७
चुचुंबसातद्वदनंतीक्ष्णनाराचकीलितम्
देवसैन्यंततोबद्धवाकालनेमिर्ननर्त्तह ८८
ततोजनार्दनःक्रुद्धोनिर्ययौकालनेमिनम्
यमोदुर्वारणंवीरंस्वर्भानुश्चंद्रभास्करौ ८९
केतुंवैश्वानरोदेवोययौशुक्रंबृहस्पतिः
आश्विनौसंयतौतत्रदैत्यमंगारपर्णकम् ९०
संह्लादंशक्रपुत्रश्चनिर्ह्लादंधनदोययौ
निशुंभश्चावृतोरुद्रैःशुंभोवसुभिराहवे ९१
मेघाकारंस्थितंजंभंविश्वेदेवाःसमाययौ
वायवोवज्ररोमाणमथमृत्युर्मयंययौ ९२
नमुचिंवासवोव्यग्रंशक्तिहस्तोऽभ्यधावत
अन्यैरपिसुरैर्दैत्याःस्वस्ववीर्यसमैर्वृताः ९३

इति श्रीपद्मपुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडे
युधिष्ठिरनारदसंवादेदेवदानवयुद्धंनामपंचमोध्यायः ५

षष्ठोऽध्यायः

नारदउवाच–
एवंद्वंद्वेषुयुद्धेषुसंप्रवृत्तेष्वनेकशः
जघानाथहरिःक्रुद्धोगदयाकालनेमिनम् १
विहायमूर्च्छांसंचित्यविष्णुंबाणैर्जघानसः
ततःक्रुद्धेनहरिणासच्चितौपातितोव्यसुः २
राजन्जघानसंचिंत्यराहुंखड्गेनचंद्रमाः
राहुस्तुतंपरित्यज्यतदासूर्यमधावत ३
सहस्रांशुंरणेजित्वाराहुश्चंद्रमधावत
जघानतंचखड्गेनसमरेरजनीपतिः ४

सैंहिकेयांगकाठिन्यात्खड्गंचूर्णमभूत्तदा
जघानमुष्टिनागाढंकठिनेनविधुंतुदः ५
चंद्रमुत्थाप्यतंकंठेधृत्वावेगान्महामृधे
गिलित्वाराहुणाचंद्रोप्युद्गीर्णश्चततःपुनः ६
मृगंस्वचिह्नमुरसिनिधायविससर्जह
सउच्चैःश्रवसंगृह्यहयरत्नंविधुंतुदः ७
जालंधरांतिकंनीत्वाभक्त्यातस्मैन्यवेदयत्
दुर्वारणोरणेक्रुद्धस्तंयमंगदयाहनत् ८
निशितैर्मार्गणैर्भिन्नःशक्रपुत्रेणचाहवे
धृत्वाजयंतंसंह्रादःपरिघाघातमूर्च्छितम् ९
एरावतंसमारुह्यययौजालंधरंप्रति
हतवांश्चैवगदयानिह्रादंधनदोरणे १०
रुद्रास्त्रिशूलनिर्घातैर्निशुंभंजघ्नुरोजसा
निशुंभोबाणजालैश्चपीडयामासतानति ११
शुंभासुरोदेवगणान्पूरयामासमार्गणैः
मृत्युंमायामयमयोबद्ध्वापाशैर्निनायतम् १२
ददौजालंधरायासौपौलोम्नेसोऽपिसिंधवे
अब्धिनाचमुखेक्षिप्तोलोकोजीवतुनिर्भयः १३
बद्ध्वाचनमुचिंपाशैर्वासवोऽपिरसातलम्
निन्येविश्वस्यहंतारंअथजालंधरोययौ १४
अथेंद्रबलयोर्युद्धमभूद्राजन्सुदारुणम्
बलांगरोचिषोभांतिदिशोदशरवेरिव १५
सर्वाण्यस्त्राणिशक्रस्यशीर्णान्यंगेबलस्यच
बलीयसाबलेनेंद्रोमुद्गरेणहतोहृदि १६
ननादेंद्रस्ततोभीमंतच्छ्रुत्वासबलोहसत्
हसतस्तस्यनिश्चेरुर्मुखतोमौक्तिकानिच १७
तस्यांगस्याभिलाषेणनयुद्धमकरोत्तदा
तुष्टाववासवोऽत्यर्थंतंबलंबलसागरम् १८
वरंवृणुसुरश्रेष्ठेत्युक्तःप्राहबलंप्रति
यदितुष्टोऽसिदैत्येशस्त्वंवपुर्दातुमर्हसि १९

तदिंद्रवचनंश्रुत्वाभित्त्वाशस्त्रैर्गृहाणमाम्
इत्युवाचबलंसोऽपिकिमदेयं महात्मनाम् २०
गिरिवश्रोत्रहीनस्यलोलाक्षीवविचक्षुषः
परेषुपुष्पमालेवश्रीःकदर्यस्यनिष्फला १
महात्मानोनगृह्णंतिहिंसमानान्रिपूनपि
सपत्नीःप्रापयंत्यब्धिंसिंधवोनगनिम्नगाः २
सुजनोनयातिविकृतिंपरहितनिरतोविनाशकालेऽपि
छिन्नोऽपिचंदनतरुःसुरभयतिमुखंकुठारस्य ३
देवंपरंविनश्यतितनुरपिनश्रीर्निवेदितासत्सु
अवशिष्यतेहिमांशोः सैवकलाशिरसियाशंभोः ४
तेसाधवोभुवनमंडलमौलिभूतायेसाधुतामनुपकारिषु दर्शयंति
आत्मप्रयोजनवशात्कृतछिन्नदेहाःपूर्वापकारिषुखलोपिहितानुरक्तः ५
तथेत्युक्त्वासहस्राक्षोमुद्गरेणाहनद्बलम्
नबिभेदतदादेहःशक्रश्चिंतामवापह २०
सस्मारितोमातलिनावज्रेणांगंजघानतत्
तेनवज्रप्रहारेणबलांगंतद्व्यशीर्यत २१
बलांगस्यैकभागस्तुपपातकनकाचले
तुहिनाद्रौद्वितीयस्तुतृतीयोगोनगेऽपतत् २२
चतुर्थोदेवनद्यांचपंचमोमंदरेतथा
वज्राकरेपपातांशःषष्ठश्चविजयांगजः २३
तस्यजातिविशुद्धस्यपरिशुद्धेन कर्मणा
कायस्यावयवाः सर्वेरत्नबीजत्वमागताः २४
वज्रादस्थिकणाःकीर्णाःषट्कोणामणयोऽभवन्
अक्षिभ्यामिन्द्रनीलावैमाणिक्यंश्रुतिसंभवम् २५
क्षतजात्पद्मरागाःस्युःमेदसोमरकतास्तथा
प्रवालानिचजिह्वातोदंतामुक्तास्तथाभवन् २६
मज्जोद्भवंमरकतंगारुत्मतमभून्नसा
कांस्यंपुरीषंरजतंवीर्यं ताम्रंचमूत्रजम् २७
अंगस्योद्वर्तनाज्जातंपित्तलंब्रह्मवीतिकाः
नादाद्वैदूर्यमुत्पन्नंरत्नंचारुतरंतथा २८

नखेभ्यःकनकोत्पत्तीरुधिराच्चरसोद्भवः
मेदसः स्फटिकंजातंप्रवालंमांससंभवम् २९
बलदेहोद्भवान्यासन्रत्नानिपृथिवीतले
पुण्योपचयसंपत्त्याभोद्द्यंतेविमलैर्जनैः ३०
अत्रांतरेहतंश्रुत्वाबलंमघवतामृधे
प्रभावतीनामराज्ञीययौतच्चरणांतिकम् ३१
विललापपतिंदृष्ट्वाविकीर्णावयवंरणे
प्रभावत्यश्रुपूर्णाक्षीमुक्तकेशीघनस्तनी ३२
हानाथबलविक्रांतकांतदेहजगत्प्रिय
मांत्वंविहायकिंचात्रकैवल्यंगतवानसि ३३
जराकुष्ठादिभिर्व्याप्तंबुद्ध्वादेहंत्यजंतिन
देहिनोऽन्येपरंकांतंत्वयादेहोवृथोज्झितः ३४
तवदेहेनदिव्येनहारकंभूष्यतेप्रिय
रणोत्सुकेनभवतायावेणीग्रथितामम ३५
तामुद्ग्रथयवैधव्यदुःखार्त्तायाःस्वयंप्रिय
एवंविलपतींवीक्ष्यबलराज्ञींसमुद्रजः
दुःखितःशुक्रमित्याहबलंजीवयभार्गव ३६
शुक्रउवाच-
इच्छयामरणंप्राप्तंतंकथंजीवयाम्यहम्
तथापिमंत्रसामर्थ्याद्वाचमुच्चारयिष्यति ३७
जालंधरउवाच-
बलस्यरूपवचनंश्रोतुमिच्छामिभार्गव
जालंधरेणैवमुक्तःक्षणंध्यानपरोऽभवत् ३८
अथोदतिष्ठद्वदनात्स्वनःश्रोत्रमनोरमः
प्रभावतींप्रतिव्यक्तंवाद्यभांडादिवोत्थितः ३९
प्रभावतिस्वदेहंत्वंममांगेषुलयंनय
इतितस्यवचः श्रुत्वानदीजाताप्रभावती ४०
बलाङ्गेष्वेवलीनासासुमेरोःपूर्ववाहिनी
यस्यास्तोयेनसंजातारत्नानांकांतिरुत्तमा ४१
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहिता

यामुत्तरखंडेजालंधरोपाख्यानेबलदैत्यस्वर्गारोहणंनामषष्ठोऽध्यायः ६
सप्तमोऽध्यायः
नारदउवाच-
ततोजालधरःक्रुद्धःप्राहतंदैत्यसूदनम्
कपटेनबलंहत्वाक्वयास्यसिबलाधम १
इत्युक्त्वातंशतमखंसिंधुसूनुःप्रतापवान्
ससूताश्वध्वजरथंछादयामाससमार्गणैः २
पपातमूर्च्छितःशक्रोरथोपरिशरैःक्षतः
दृष्ट्वातंपतितंशक्रंजगर्जार्णवनंदनः ३
मूर्च्छांत्यक्त्वामुमोचेंद्रोवज्रंजालंधरंप्रति
तदाद्रिदलनंहस्तेगृहीत्वासिंधुसंभवः ४
वज्रंकक्षापुटेधृत्वारथादुत्तीर्यसत्वरम्
अभ्यधावतदैत्येंद्रोदेवेंद्रंधर्तुमाहवे ५
ततोदुद्रावमघवारथंत्यक्त्वाहरिंस्मरन्
रथमिंद्रस्यमदवानारुह्यार्णवनंदनः ६
यंतारंमातलिकृत्वाययौप्राप्तमनोरथः
रथमिंद्रस्यतरसायत्रयत्रययौबले ७
जालंधरोमहाबाहुःस्वयंचांबुधरोयथा
ततःसकोपात्पुरुषोत्तमः स्वयंखङ्गंसमुद्यम्यचनंदकंरणे ८
संप्रेरयित्वागरुडंमनोजवंजघानकोपेनचदैत्यवाहिनीम्
रथान्हयान्कुंजरपत्तिसंघान्सपातयामासबलात्सहस्रशः ९
जनार्दनःकश्यपसूनुसंवृतश्चकारसंख्येचरितंभयावहम्
केशास्थिमज्ञारुधिरौघवाहिनींपिशाचवेतालविहंगसेविताम् १०
करोरुजंघायुधशस्त्रपूरितांसुदुस्तरांव्याघ्रगजेंद्रसेविताम्
रक्तांत्रहारांगदभूषितांतांविघूर्णनेत्रोत्सवकांतिवाससम् ११
विष्णुनानिहतंसैन्यंदृष्ट्वादानवपुंगवाः
जालंधराज्ञयासर्वेरुरुधुःपरितोहरिम् १२
दैत्यास्तेतत्रबाणौघान्वर्षमाणायथांबुदाः
यथाद्विरेफाःकमलंपर्वतंजलदाइव १३
चूतंयथापक्षिगणागगनंधूपसंचयः

नदृश्योऽभूत्तदाविष्णुर्नतार्क्ष्योरणसंकटे १४
सर्वेतेरथमारूढासर्वशस्त्रैर्महासुराः
वैकुंठाधिपतिंजघ्नुर्गर्जंतोभीमनिस्वनैः १५
तान्सर्वान्भीमरूपेणदैत्यारिःकुपितस्तदा
रणेनिपातयामासवायुःपर्णचयंयथा १६
शैलरोमाततोविष्णुंदैत्यःकोपादधावत
हरेरपिशरास्तस्यशरीरेशीर्णतांगताः १७
शैलरोमाचदैत्यारिशरीरंचाहनच्छरैः
हरिःखङ्गंविनिर्धूयशिरस्तस्यजहारह १८
छिन्नेशिरसिदैत्यस्यकबंधोविक्रमन्रणे
शैलरोमाभुजाभ्यांचतार्क्ष्यंजग्राहपक्षयोः १९
शिरश्चोत्पत्यतरसाविलग्नंस्कंधयोर्दृढम्
ततस्तत्रास्ययुद्धेनहृषीकेशोऽपिविस्मितः २०
शिरःसंलग्नमालोक्यगरुडोन्यपतद्भुवि
पुनश्चोत्पत्यवेगेनशिरःस्थानंसमाश्रयत् २१
शैलरोमाततोविष्णुंजहारगरुडाद्बली
हरिर्जघ्नेतलेनाशुगतायुश्चापतद्भुवि २२
ततोजालंधरःसूतंखङ्गरोमाणमब्रवीत्
संप्रेषयरथंतत्रयत्रदेवोजनार्दनः २३
जालंधरस्यवचनात्खङ्गरोमानयद्रथम्
दृष्ट्वातंपुरतोविष्णुमुवाचार्णवनंदनः २४
निःशंकंजहिमांविष्णोनाहंत्वाहन्मिमाधव
तस्यतद्वचनंश्रुत्वाक्रोधसंरक्तलोचनः २५
नारायणःप्राणहरैःशरैरेनमपूरयत्
विष्णुनाचविभिन्नांगोऽर्णवसूनुःप्रतापवान् २६
हरिंसंपूरयामासमार्गणौघैर्निरंतरम्
नारायणःप्राणहरैःशरैरेनमपूरयत् २७
गरुडंपतितंदृष्ट्वासिंधुसूनोःशरैर्भुवि
रथंसंस्मारयामासवैकुंठस्थंजनार्दनः २८
सरथस्तस्यसंप्राप्तःसूतहीनोहयैर्वृतः

अश्वैर्युतंरथंदृष्ट्वाविस्मितोभगवान्रणे २९
संबोधयित्वागरुडंसारथ्येसमयोजयत्
सधृत्वामुकुटंमूर्ध्निकौस्तुभंहृदयेमणिम् ३०
पुरुषार्थान्हयान्कृत्वाययौजालंधरंहरिः
मेदिनींरथचक्रेणदारयंश्चसुरैःसह ३१
जघानतरसाबाणैर्दानवानांचवाहिनीम्
देवराजेनसंदिष्टोवीतिहोत्रोरणांगणे ३२
ददाहदानवानीकंसमीरणसमन्वितम्
तदाहतंभगवतादैत्यसैन्यंसुरैःसह ३३
जालंधरःस्वल्पशेषंदध्यौदृष्ट्वाबलंस्वकम्
अथाहभार्गवंराजामत्सैन्यंनिहतंसुरैः ३४
त्वयितिष्ठतिमंत्रज्ञेविख्यातोविद्ययाभवान्
किंतयाविद्ययाब्रह्मन्क्षत्रेणाथबलेनच ३५
यानरक्षतिरोगार्तान्यद्बलंशरणागतान्
जालंधरवचःश्रुत्वाभार्गवस्तमभाषत ३६
पश्यराजन्ममबलंब्राह्मणस्यरणांगणे
इत्युक्त्वावारिणास्पृष्टाहुंकारेणप्रबोधिताः ३७
उत्थापितास्तेकविनाशरौघैः प्राणहारकैः
देवाहतारणेपेतुःसमंतात्सिंधुसूनुना ३८
बाणैर्जर्जरदेहास्तेधृतप्राणानराधिप
नमृतास्त्वमरत्वाच्चबाणैर्भिन्नाश्चसत्तम ३९
ततोनारायणोदेवोबृहस्पतिमभाषत
धिग्बलंदैवतगुरोयोनजीवयसेसुरान् ४०
धिषणस्तुजगन्नाथमुवाचत्वरितंतदा
ओषधीभिरहंस्वामिन्जीवयिष्यामिनिर्जरान् ४१
इत्युक्त्वाधिषणःसोऽपिययौक्षीरार्णवस्थितम्
द्रोणमद्रिंतदागत्वासुखंगृह्यौषधीःस्वयम् ४२
गुरुस्तासांचयोगेनजीवयामासनिर्जरान्
उत्थितास्तेततोदेवाजघ्नुर्दानववाहिनीम् ४३
देवान्समुत्थितान्दृष्ट्वाबभाषेसिंधुजःकविम्

विनात्वद्विद्ययाकाव्यकथमेतेसमुत्थिताः ४४
इतिदैत्योक्तमाकर्ण्यशुक्रःप्राहार्णवात्मजम्
क्षीरसागरमध्यस्थोद्रोणोनाममहागिरिः ४५
औषध्यस्तत्रतिष्ठंतिजीवयंतिचयामृतान्
तत्रगत्वासुराचार्योगृहीत्वोषधिसंचयम् ४६
रणेविनिहतान्देवानुत्थापयतिमंत्रतः
भार्गवोक्तमथाकर्ण्यसैन्यभारंमहाबलः ४७
शुंभेनिक्षिप्यतरसाययौजालंधरोऽर्णवम्
अथप्रविष्टःक्षीराब्धौवेश्मदिव्यंमहाप्रभम् ४८
प्रविश्यतत्रक्षीराब्धेःक्रीडास्थानंददर्शसः
नोष्णोनशीतलोवायुर्नतमोयत्रदृश्यते ४९
यत्रगायंतिनृत्यंतिक्रीडंतिचवरस्त्रियः
सुपीनस्तनभाराढ्याःकृशोदर्यःसुदंतिकाः ५०
नेत्रविभ्रमविक्षेपैर्नितंबपरिवर्त्तनैः
अंगैःसंमोहनैरम्यैर्बाहुवल्लीविचालनैः ५१
पादविन्यासरणितैर्मधुरैर्वचनस्तवैः
सौगंध्यसौख्यदैर्वासैर्नेत्रभ्रमरहुंकृतैः ५२
चामरांदोललीलाभिःस्रग्भिःस्मितविलोकितैः
सेवांचक्रुर्विलासिन्यस्तत्रगत्वोदधेःसुतः ५३
क्रीडंतंतत्रदुग्धाब्धिंसंवीक्ष्यसमरोत्सुकः
अथाहप्रणिपत्यासौक्षीराब्धिंतातहंसिमाम्
द्रोणाचलौषधीर्व्याजादंबुभिःप्लावयस्वतः ५४
क्षीरसागरउवाच-
तंप्राप्तंशरणंपुत्रप्लावयाम्यूर्मिभिःकथम्
मुनींद्रास्तंनशंसंतियस्त्यजेच्छरणागतम् ५५
पितृव्यवचनंश्रुत्वासंक्रोधात्संततंगिरिम्
तलप्रहरणेनैवताडयामासदैत्यराट् ५६
ततोद्रोणगिरीराजन्भीतोजालंधराद्भृशम्
अथाजगामरूपेणप्राहजालंधरंप्रति ५७
तवाहमभवंदासोरक्षमांशरणागतम्

रसातलंमहाबाहोयास्यामितवशासनात् ५८
यावत्त्वंकुरुषेराज्यंतावत्स्थास्याम्यहंप्रभो
ओषधीनांविरावेणसिद्धानांरोदनेनच ५९
रसातलंजगामाद्रिःसिंधुसूनोःप्रपश्यतः
ततोजालंधरोवीरआजगाममहारणम् ६०
पूर्वकल्पितमारुह्यरथस्थंकेशवंययौ
रथस्थंमाधवंदृष्ट्वाजहासोच्चैर्नदीसुतः ६१
तावत्त्वंतिष्ठशकटेयावद्धन्यामरीनहम्
एवमुक्त्वाजघानाशुशरैस्तांदेववाहिनीम् ६२
बाणैर्विदारितादेवास्त्राहीत्यूचुर्बृहस्पतिम्
ततोबृहस्पतिःशीघ्रमगमत्क्षीरसागरम् ६३
अदृष्ट्वातंततोद्रोणमभूच्चिन्तापरोनृप
अथागत्यरणंतूर्णममरान्प्राहगीष्पतिः ६४
पलायध्वंसुराःसर्वेद्रोणाद्रिःक्षयमागतः
एवमुक्तवतस्तस्यगुरोश्चिच्छेदसिंधुजः ६५
यज्ञोपवीतंकेशांश्चबाणैस्तीक्ष्णैर्हसन्सुरान्
ततोदुद्राववेगेनगुरुः प्राणभयार्दितः ६६
देवाःसर्वेरणंहित्वापलायांचक्रिरेनृप
एवंविद्राव्यदेवान्वैजनार्द्दनमधावत ६७
हृषीकेशोऽपिदैत्येशमन्वधावद्रणोत्सुकः
ततोयुद्धमभूद्धोरंविष्णोर्जालंधरस्यच ६८
दुर्द्धर्षणोबाणजालैःप्लावयामासकेशवम्
तान्बाणान्खंडशःकृत्वापूरयित्वाशरैर्महान् ६९
वासुदेवोसुरंबाणैर्जालंधरमपीडयत्
जालंधरोरथंत्यक्त्वाशरपीडितविग्रहः ७०
विष्णुंविजेतुंदुद्रावसंयतिस्थमथद्रुतम्
तमायांतंरणेदृष्ट्वाहरिर्विव्याधसायकैः ७१
बाणानंगेसहद्विष्णोःप्राप्तोऽसौरथसंनिधौ
हस्तेनैकेनगरुडंद्वितीयेनरथंहरेः ७२
भ्रामयित्वांबरेशश्वत्श्वेतद्वीपेन्यपातयत्

जालंधरकरक्षिप्तोगरुडोऽपिपपातह ७३
क्रौंचद्वीपेसतत्रैवविश्राममकरोच्चिरम्
अच्युतः प्रच्युतस्तस्माद्भ्रमतोरथमंडलात् ७४
रणमागत्यदैत्येशंतिष्ठतिष्ठेत्यभाषत
दृष्ट्वातमागतंभूयःकेशवंसमरप्रियः ७५
पूरयन्मार्गणैर्भूमिंजगर्जार्णवनंदनः ७६
विव्याधदैत्यंहरिराशुशक्त्याहृदिस्फुरंत्यासततः पपात
सूतोनयत्तंसमरान्निवासंतंप्राहरेकेनकृतोस्म्यलज्ञः ७७
दैत्यारिजालंधरयोर्महत्तदाबभूवयुद्धं धरणीतलस्थयोः
प्रेम्णाश्रियस्तंनजघानदानवंस्वयंहरिस्तस्यशरैःपपात ७८
ततोनिरीक्ष्यगोविंदंपतितंधरणीतले
प्रगृह्यार्णवजोदैत्यआरुरोहनिजंरथम्
ततस्तमिंदिराप्राप्तारुदंतीविष्णुवल्लभा ७९
संस्थिताकमलातत्रपतिंकमललोचनम्
पतितंतुपतिंवीक्ष्यलक्ष्मीःप्राहार्णवात्मजम् ८०
शृणुष्ववचनंभ्रातर्जितोविष्णुर्धृतस्त्वया
भगिन्यानचवैधव्यंदातुंयुक्तंमहाबल ८१
श्रुत्वातुवचनंतस्यामुमोचजगतःपतिम्
जालंधरोमहाबाहुःस्वस्रेभक्तयाननामच ८२
ववंदेचरणौविष्णोःस्वसुःस्नेहात्तदांजसा
विष्णुर्जालंधरंप्राहतुष्टोऽस्मितवकर्मणा
वरंवरयदैत्येशकिंप्रयच्छामितेवरम् ८३
जालंधरउवाच-
यदित्वंममतुष्टोऽसिशौर्येणानेनकेशव
स्थातव्यंमत्पितुःस्थानेत्वयाकमलयासह ८४
तथेत्युक्त्वाचसंस्मृत्यगरुडंधरणीधरः
आरुह्यचजगन्नाथःक्षीराब्धिंप्रिययासह ८५
तदाप्रभृतिकृष्णस्यवासःश्वशुरमंदिरे
अब्धौवसतिदेवेशोलक्ष्म्याःप्रियचिकीर्षया ८६
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहिता-

यामुत्तरखंडेयुधिष्ठिरनारदसंवादेसप्तमोऽध्यायः ७
अष्टमोऽध्यायः
युधिष्ठिरउवाच-
देवान्विक्लाव्यसमरेविष्णुंस्थाप्यात्ममंदिरे
जालंधरेणाब्धिजेनयत्कृतंब्रूहिनारद १
नारदउवाच-
शुंभादीनांतुवीराणांदत्त्वादानंप्रसादजम्
जालंधरोजगामाथस्वर्गंप्राप्यावलोकयत् २
हिरगयवर्षेणजनान्भूषयंतंदिनेदिने
फलंतितरवोऽजस्त्रंवाजिमेधक्रतोःफलम् ३
गजवस्त्रसुवर्णानिधेनुकन्यातिलानिच
पुष्पकर्पूरतांबूलकस्तूरीकुंकुमानिच ४
येयच्छंतिमहात्मानस्तेपश्यंत्यमरावतीम्
वर्षासुगृहदानेनशिशिरेऽग्निप्रदानतः ५
वादित्राणिचसर्वाणिवादयंतिशिवालये
प्रपांकुर्वंतियेचैत्रेदध्योदनसमन्विताम् ६
यत्रहिंदोलपर्यंकंस्वयमांदोलयंतिच
सारिकाशुकहंसाश्चभ्रमद्भ्रमरकोकिलाः ७
कुर्वंतोदूतकार्याणियच्छंतेप्रियसंगमम्
रंभायत्रपुरेराममेनकाचतिलोत्तमा ८
सुषमासुंदरीयत्रघृताचीपुंजिकस्थली
सुकेशीसुमुखीरामामंजुघोषाचमालिनी ९
मृगोद्भवाचसुखदाधनदंष्ट्रातिलप्रभा
वाजिमेधफलग्राहाराजसूयफलंतियाः १०
कोटिशोयत्रनिःष्पापाःक्रीडंत्यप्सरसोनृप
एवंभूरिसुखेस्वर्गेस्थापयामाससिंधुजः ११
शुंभंप्राण समंदैत्यंनिशुंभंयुवराजके
स्वयंजालंधरेपीठेस्वर्गादागत्यसिंधुराट्
वर्षार्बुदद्वयंराज्यंचकारात्मबलेनच १२
युधिष्ठिरउवाच-

युयुधेऽसुरसंग्रामेससुरैरपराजितः १३
ततःकिमकरोद्राजासिंधुसूनुःप्रतापवान्
तन्ममाचद्दवदेवर्षेश्रोतुकामस्यविस्तरात् १४
नारदउवाच-
शृणुराजन्यथातथ्यंकृतसागरसूनुना
सदेवान्समरेजित्वाराज्यंचक्रेह्यकंटकम् १५
गंधर्वाश्चित्रसेनाद्याःसेवंतेचासुरेश्वरम्
यज्ञभागांश्चयोभुंक्तेसर्वेषामसुरेश्वरः १६
द्धीरसागरतोदेवैर्हृतंरत्नादिकंचयत्
तत्सर्वंचतथान्यच्चनिर्जित्यहृतवान्बली १७
समुद्रतनये राज्यंभुवोराजन्प्रशासति
नकश्चिन्म्रियतेमर्त्योनरकंकोऽपिनव्रजेत् १८
नकलिप्रणयादन्योनभोगादपरःद्मयः
नवंध्यादुर्भगानारीनालंकारैर्विवर्जिता १९
कुरूपादुर्गतादुष्टाऽयशस्यानचदृश्यते
नतत्रविधवानारीनकश्चिन्निर्द्धनोजनः २०
दातारःसंतिसर्वत्रनप्रतिग्राहिणःक्वचित्
पुण्याजनाःप्रयच्छंतिद्विजेभ्योह्यात्मनोधनम् २१
रूपयौवनशालिन्यःसीमंतिन्योगृहेगृहे
गोद्मीरंदधिसर्पिश्चयत्रनिर्जरसोजनाः २२
मंगलंतत्रसर्वेषांनक्वचिद्वधबंधनम्
शरेणनचहिंसास्तिनकश्चित्केनबाध्यते २३
ऋणंनदृश्यतेराजन्धनिनःसंतिसर्वतः
संतुष्टाःसर्वसस्याढ्याःप्रजाःसर्वत्रपार्थिव २४
केलीद्मुदंडप्रभवश्चदुग्धरसोऽतिसुस्वादुतरोगृहेनृणाम्
शुश्रावनारीनरयोर्हितंवचोनचापहर्ताध्वनिगच्छतांसदा २५
पतंत्यखंडानभसोयतस्ततोधाराश्चकर्मारविमिश्रसर्पिषः
संमिश्रिताःशर्करयापरिश्रुताःसमुद्रसूनोःस्मरणान्मुखेनृणाम् २६

इति श्रीपाद्मेमहापुराणेउत्तरखंडेपंचपंचाशत्सहस्र-
संहितायांयुधिष्ठिरनारदसम्वादेजालंधरसौराज्यवर्णनंनामाष्टमोऽध्यायः ८

नवमोऽध्यायः

युधिष्ठिरउवाच–
इंद्रादिभिस्तदादेवैःकिंकृतंद्विजसत्तम
जालंधरेणविजितैःस्वर्गराज्येहृतेसति १
नारदउवाच–
अथत्यक्त्वादिवंदेवाःप्रापुस्तेदुर्दशांचिरम्
नपीयूषंनैवयज्ञाःययुःस्थानंस्वयंभुवः २
ददृशुर्ब्राह्मभुवनेब्रह्माणंपरमेष्ठिनम्
प्राणायामेनयुंजानंमनःस्वंपरमात्मनि ३
तेतुष्टुवुःसुराःसर्वेवाग्भिस्तथ्याभिरादृताः
ततःप्रसन्नोभगवान्किंकरोमीतिचाब्रवीत् ४
ततोनिवेदयांचक्रुःब्रह्मणेविबुधाः पुनः
जालंधरस्यसकलंतथानिजपराभवम् ५
क्षणंध्यात्वाययौब्रह्माकैलासंत्रिदशैः सह
तस्यशैलस्यपार्श्वेतेवैचित्र्येणसमाकुलाः
स्थिताःसंतुष्टुवुर्देवाब्रह्मशक्रपुरोगमाः ६
नमोभवायशर्वायनीलग्रीवायतेनमः
नमःस्थूलायसूक्ष्मायबहुरूपायतेनमः ७
इतिसर्वमुखोभूत्वावाणीमाकर्ण्यशंकरः
प्रोवाचनंदिनंदेवानानयस्वेतिसत्वरम् ८
श्रुत्वाशंभोर्वचोदेवाआहूतानंदिनाद्रुतम्
प्रविश्यांतःपुरेदेवाददृशुर्विस्मितेक्षणाः ९
तत्रासनेसमासीनंशंकरंलोकशंकरम्
गणैःकोटिसहस्रैस्तुसेवितंभक्तिशालिभिः १०
नग्नैर्विरूपैःकुटिलैर्जटिलैर्धूलिधूसरैः
प्रणिपत्याग्रतःप्राहसहदेवैःपितामहः ११
सुखरोगोयथास्यासीच्छक्रःसोऽयवृथागतः
कृपांकुरुमहादेवशरणागतवत्सल १२
ततउच्चैर्विभोर्हास्यंश्रुत्वाब्रह्मापिनाकिनः
उवाचदेवदेवेशंपश्यावस्थांदिवौकसाम् १३

ततःसर्वेश्वरोज्ञात्वाब्रह्मणोमनसेप्सितम्
शक्रस्यमानभंगंचदेवार्थेपरमेश्वरः १४
प्रेम्णाभवान्याविज्ञप्तोनृपप्राहवचोहरः
विष्णुनानहतोयोऽरि सकथंहन्यतेमया १५
पूर्वसृष्टान्यायुधानिवज्रादीनिपितामह
तैःशस्त्रैर्नैववध्योऽसौबलीजालंधरोऽसुरः १६
हेतिभिःपूर्वसंसृष्टैःसमयापिनहन्यते
देवाःकुर्वंतुशस्त्रंहिममप्राणसहंदृढम् १७
शंभोरित्युत्तरंश्रुत्वाब्रह्मोवाचाथशंकरम्
स्वयंकुरुमहाशस्त्रंत्वंवेत्थस्वात्मनोबलम् १८
इतितस्यवचःश्रुत्वाप्रत्युवाचमहेश्वरः
ब्रह्मन्विमुंचतेजस्त्वंक्रोधयुक्तंसुरैःसह १९
ततस्तेजोमुमोचाथब्रह्माब्रह्मास्त्रसूचकः
रुद्रस्त्रिनेत्रजंतेजस्ततोनिर्मुक्तवान्स्वयम् २०
देवाश्चमुमुचुःसर्वेसक्रोधंतेजसांचयम्
अत्रांतरेस्मृतःप्राप्तोहरेणमधुसूदनः २१
किंकरोमीतितेनोक्तःशिवःप्राहजनार्दनम्
विष्णोजालंधरःकस्मान्नहतःसंगरेत्वया २२
कथंसुरान्परित्यज्यक्षीराब्धिंशयितुंगतः २३
श्रीविष्णुरुवाच-
यदितंहन्मिदेवेशश्रीःकथंममवल्लभा
तस्मात्त्वंपार्वतीकांतजहिजालंधरंरणे २४
तेजस्त्वंक्रोधजंमुंचेत्युक्तःशर्वेणकेशवः
मुमोचवैष्णवंतेजःतत्सर्वंसमवर्द्धत
तेजःप्रवृद्धंतदृष्ट्वाव्यापकंप्राहकेशवम् २५
शंकरउवाच-
एतेनतेजसाशीघ्रंममास्त्रंकर्तुमर्हथ
विश्वकर्मादयस्तच्चश्रुत्वाशंकरभाषितम् २६
निरीक्ष्यचतदाऽन्योऽन्यकिंकुर्मइतिशंकिताः
दृष्ट्वातूष्णींस्थितांस्तांश्चज्ञात्वातन्मनसिस्थितम् २७

तदाहभगवान्ब्रह्माग्रनालोक्यंहिदैवतैः
सोढुंनशक्तास्तेतेजोधर्तुंकेनचशक्यते २८
ततःप्रहस्यभगवानुत्पत्योपरितेजसः
वामांघ्रिपाष्णिनाशंभुर्ननर्तभ्रमरीचयम् २९
ततोदेवामहेंद्राद्यास्तेजसोपरिशंकरम्
नृत्यमानंतदादृष्ट्वामुदावाद्यान्यवादयन् ३०
तदाप्रभृतिनृत्येषुभ्राम्यतेभ्रमरीचयम्
ग्रथचक्रंसमुत्पन्नंशंभोर्नर्तनमर्दनात् ३१
ग्रारलक्तत्रयोपेतंग्रस्थिकोटिसमाकुलम्
शर्वांघ्रिकषणात्तस्यतेजसोनिसृताःकणाः ३२
विश्वकर्माचतेनास्त्रंविमानानिचनिर्ममे
ततस्तेनिर्जराभीत्यादृष्ट्वाचक्रंसुदर्शनम् ३३
त्राहित्राहीतिदेवेशंप्रत्यूचुस्तेसुरान्नृप
पृथ्वीकाठिन्यमादायलोहानामपितेजसाम् ३४
यद्विश्वकर्मणाकोशंकृतंभस्मीकृतंचतत्
सृष्टेनतेनचक्रेणदग्धःकालोऽपतत्क्षितौ ३५
ततस्तद्ब्रह्मणोहस्तेददौचक्रंसधूर्जटिः
चक्रार्चिर्निचयैःकूर्चंदृष्ट्वादग्धमुमापतिः ३६
हसित्वाब्रह्मणोहस्ताद्गृहीत्वासत्वरंशिवः
दधौकक्षापुटेचक्रंनिधानंनिर्धनोयथा ३७
ततोनदृश्यतेचक्रंशिवकक्षापुटेस्थितम्
महामूर्खस्य यद्दत्तंदानंतस्यफलंयथा ३८

इति श्रीपाद्मेमहापुराणेउत्तरखंडेपंचपंचाशत्सहस्त्र
संहितायांयुधिष्ठिरनारदसंवादेजालंधरोपाख्यानेसर्व
देवतेजोमयचक्रोत्पत्तिर्नामनवमोऽध्यायः ९

दशमोऽध्यायः

नारदउवाच–
ग्रत्रोत्तरेमयागत्वाकथितंसिंधुसूनवे
त्वांहंतुसर्ववीरेशप्रतिज्ञाशंभुनाकृता

श्रुत्वेत्थंमद्वचोराजंस्ततःपप्रच्छसोऽसुरः १
जालंधरउवाच-
किमस्तिशूलिनोगेहेरत्नजातंमहामुने
तन्ममाचक्ष्वसकलंनास्तियुद्धंनिरामिषम् २
नारदउवाच-
भूतिगात्रिवृषोजीर्णःफणिनोंऽगेगलेविषम्
भिक्षापात्रंकरेपुत्रौगजाननषडाननौ ३
इत्यादिविभवस्तस्ययदन्यत्तन्निबोधमे
तनयागिरिराजस्यविशालाह्युन्नतस्तनी ४
दग्धस्मरोऽपिभगवान्यस्यारूपेणमोहितः
महेशोयद्विनोदायकुरुतेनित्यकौतुकम् ५
नृत्यान्गायंश्चताञ्छंभुःस्वयंभवतिहासकः
सापार्वतीतिविख्यातासौंदर्यावधिदैवतम् ६
वृंदावरांगनाराजन्निमाश्चाप्सरसःशुभाः
नचाप्नुवंतिपार्वत्याःषोडशीमपितांकलाम् ७
इत्युक्त्वाहंमहीपालजालंधरममर्षणम्
पश्यतांसर्वदैत्यानामंतर्धानंगतःक्षणात् ८
अथसप्रेषयद्दूतंसिंधुजःसिंहिकासुतम्
क्षणेनासाद्यकैलासंदेवावासमपश्यत ९
अत्रांतरेहरिर्भीममापृच्छ्यतुतदाहरम्
जगामालक्षितस्तूर्णंक्षीराब्धिंभेदशंकया १०
ददर्शराहुर्भवनंशंकरस्यातिदीप्तिमत्
आत्मानमात्मनावीक्ष्यकिमित्याहासुविस्मितः ११
प्रवेष्टुकामोबलिभिर्द्वारिद्वास्थैर्निरोधितः
यत्नवान्सनिषिद्धोऽपितदातेप्रोद्यतायुधाः १२
तान्निवार्यगणान्नंदीव्याजहारविधुंतुदम्
कस्त्वंकस्मादिहायातःकिंकार्यंतवबर्बर
ब्रूहिकार्यंगणायावत्त्वांनहन्युर्भयावहाः १३
राहुरुवाच-
दूतोजालंधरस्याहंत्वंमांशर्वांतिकेनय

नवाच्यमंतरेद्वास्थमहाराजप्रयोजनम् १४
नंदीदूतोक्तमाकर्ण्यनीललोहितमाययौ
दंडवत्प्रणिपत्याग्रेस्थित्वाशंकरमब्रवीत् १५
सैंहिकेयोमहाराजद्वारेतिष्ठतिकार्यतः
सप्रयात्वथवायातुभवानाज्ञप्तुमर्हति १६
नंदिनोक्तमथाकर्ण्यत्वरन्निवमहेश्वरः
सुप्तामंतःपुराद्देवींप्रस्थाप्यचसखीवृताम् १७
पश्चाद्वास्थंजगादाथनंदिन्दूतंप्रवेशय
ततोहस्तेप्रगृह्यामुंदूतंनंदीमहाबलः १८
आनयामासदेवानांमध्येशंभुमदर्शयत्
तंददर्शतदाराहुर्जटिलंनीलमात्मनि १९
पंचवक्त्रंदशभुजंनागयज्ञोपवीतिनम्
देवीविरहितंमूर्ध्निचंद्रलेखाविभूषितम् २०
उच्छ्वासोच्छ्वासनिर्मुंचत्पृदाकुगणसेवितम्
सर्वदेवगणोपेतंसेवितंगणकोटिभिः २१
प्राप्तंज्ञात्वाततोदूतंशंभुरालोक्यचाग्रतः
प्राहब्रूहितदाराहुर्वक्तुंसमुपचक्रमे २२
राहुरुवाच-
देवजालंधरेणाहंप्रेषितस्तवसन्निधौ
तस्यशिववचःश्रुत्वामन्मुखेनद्रुतंकुरु २३
गिरिशत्वंतपोनिष्ठोनिर्गुणोधर्मवर्जितः
तवनास्तिपितामातावसुगोत्रादिवर्जितः २४
जालंधरोमहाबाहुर्भुंक्तेऽसौभुवनत्रयम्
तस्यैववश्यस्त्वमपितत्श्चोक्तंसमाचर २५
पुराणपुरुषःकामीवृषारूढःकथंभवान्
एवंवदतिसंप्राप्तौसुतौस्कंदविनायकौ २६
तस्मिन्कालेदेवदेवोयतवागंगमर्दनम्
चकारचकरैर्व्यस्तैर्वासुकिर्भूतलेऽपतत् २७
हेरंबवाहनस्याखोःपुच्छंग्रस्तमथाहिना
स्वपत्रंग्रस्तमालोक्यमुंचमुंचेत्युवाचह २८

अत्रांतरेस्कंदवाहंक्षुब्धंवीक्ष्यमहास्वरम्
तद्भयाद्वासुकिर्ग्रस्तमाखुपुच्छमथोद्गिरत् २९
अथारुह्यहरस्यांगंगलमावेष्ट्यसंस्थितः
तस्यनिश्वासपवनैरथजातोहुताशनः ३०
तस्योष्मणाचंद्रलेखाजटाजूटाटवीस्थिता
सार्द्रतांतुतदासायात्प्लावितंतद्वपुर्यथा ३१
तस्याह्यमृतधाराभिर्ब्रह्ममस्तकमालिका
हरमौलिकपालानामभूत्संजीवितातदा ३२
पपाठपूर्वमभ्यस्तंसर्वयोगश्रुतिक्रमम्
श्रुत्वापरस्पराधीतंविवदंतिशिरांस्यथ ३३
अहमादिरहंपूर्वमहमेवपरात्परः
अहंस्रष्टाअहंपातेत्युत्सुकानिपरस्परम् ३४
शोचंत्येतानिनोदत्तंनोभुक्तंनहुतंमया
लोभग्रस्तेनमनसानोवित्तंब्रह्मणेऽपितम् ३५
अथेश्वरजटाजूटादाविरासीद्गणोमहान्
त्र्याननस्त्रिचरणस्त्रिपुच्छःसप्तहस्तवान् ३६
सचकीर्तिमुखोनामपिंगलोजटिलोमहान्
तंदृष्ट्वासाकपालालीभयात्तस्थौमृतेवसा ३७
पुरतःप्राहसगणस्ततःकीर्तिमुखःप्रभुम्
प्रणिपत्यशिवंदेवमत्यर्थंक्षुधितःप्रभो ३८
तदोक्तःशंकरेणाहोभक्षयत्वंरणेहतान्
क्षणंविचार्यसगणःक्वाप्यदृष्ट्वारणंतदा ३९
ब्रह्माणंभक्षितुंप्राप्तःशंकरेणनिवारितः
ततःकीर्तिमुखेनाथस्वांगंसर्वंचभक्षितम् ४०
बुभुक्षितेन चात्यंतंनिषिद्धेनचसर्वतः
तत्साहसंतदादृष्ट्वाभक्तिंकीर्त्तिमुखस्यच ४१
तमुवाचेश्वरःप्रीतप्रासादेतिष्ठमेसदा
त्वच्चित्तरहितोयश्चभविष्यतिममालये ४२
सपतिष्यतिशीघ्रंहीत्युक्तःसोंऽतर्हितोऽभवत्
शंभोर्मूर्ध्नितदादेवाववृषुः पुष्पवृष्टिभिः ४३

एवमत्यद्भुतंदृष्ट्वासभायांतुत्रिशूलिनः
स्वर्भानुरपिदेवेशंपुनःप्रोवाचविस्मितः ४४
स्पृशंतित्वांकथंभावंस्वाधीनंयोगिनंबलात्
इंद्रियैःपूज्यसेत्वंहिप्राप्योऽयविषयैःकथम् ४५
ब्राह्मादिलोकपालानांपूजांगृह्णासिसर्वतः
नत्वंपश्यसिकंदेवंत्वंपूजयसिकंचन ४६
ईश्वरोऽसिकथंलोकेभिक्षाभोजीप्रतिष्ठितः
संगोपयसियोगीन्द्रगौरीरम्यांप्रयच्छमे ४७
स्कंदलंबोदराभ्यांत्वंपुत्राभ्यांसहितोऽधुना
भिक्षापात्रंगृहीत्वातुभ्रमनित्यंगृहेगृहे ४८
एवंबहुविधंतत्रराहुराहेश्वरंप्रति
भगवानपितच्छ्रुत्वानोत्तरंकिंचिदब्रवीत् ४९
अथेशंमौनिनंत्यक्त्वाराहुर्नंदिनमब्रवीत्
त्वमंत्रीह्यसिसेनानीर्विकटाननबिंबधृक् ५०
एवमाचरितभ्रष्टंत्वंशिक्षयितुमर्हसि
नोचेद्रोषेर्णेद्रइवपतिष्यतिरणेहतः ५१
इत्याकर्ण्यवचस्तस्यनंदीविज्ञाप्यचेश्वरम्
भ्रूसंज्ञयैवसतदामतमाज्ञायशूलिनः ५२
संपूज्यप्रेषयामासराहुंनंदीगणाग्रणीः
अथजालंधरंगत्वाकथयामासविस्तरात्
स्वर्भानुस्तस्यवृत्तांतंगौरीरूपंमनोहरम् ५३
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्त्रसंहितायामुत्तरखराडेयुधिष्ठरनारद-
सम्वादेजालंधरोपाख्यानेकैलासाद्राहुप्रत्यागमनंनामदशमोऽध्यायः १०

एकादशोऽध्यायः

नारद उवाच-
अथजालंधरोदूतवचःश्रुत्वाप्रतापवान्
सर्वसैन्यंसमाहूयप्रयाणमकरोत्तदा
ततस्ततः समेतानांसैन्यानांश्रूयतेध्वनिः १
सस्त्रीन्मन्दरकंदरेषुशयितानुत्थायपन्किन्नरान्

मेरोर्मंदरकंदरेप्रतिरवानुत्थापयन्वारणान्
सिहानांचततीर्व्यमुंचतपुरःपंथानमेवंविधस्त्रै
लोक्यंबधिरीचकारमहतःसैन्यस्यकोलाहलः २
ततोदुंदुभिनादोऽभूत्पीठेजालंधरनृप
तन्निनादेनशूराणांप्रियेणमहतातदा ३
कंपंतिगिरयस्तुंगांप्रासादाविचलंतिच
सप्तसागरगर्भेभ्योनिःसृतादैत्यदानवाः ४
सन्नद्धाश्चातिगर्जंतिनानावाहनसंयुताः
हेषाययौमहानादावाजिनांबाह्यतःपुरः ५
रथांगेनाथसंहृष्टाधरांसंचलतेऽथवा
चालितैर्गजयूथैश्चपृथ्वीरुद्धासकानना ६
जालंधरेरितैर्भीमैरयुतैःस्यंदनस्थितैः
अश्वार्बुदसहस्त्रेद्वेअर्बुदंदंतिनामपि ७
रराज सैन्यलक्षैकंरथिनांसपताकिनाम्
परार्द्धनवतिःकोटयःदृश्यंतेमुख्यनायकाः
निर्जगाममहासैन्यंछत्रैःसंछाद्यभास्करम् ८
आसीत्पिंजरपांडुपंकजवनंश्वेतातपत्रैःक्वचित्
मायूरातपवारणैःक्वचिदभूतदुन्नीलनीलोत्पलम्
उन्मेघंक्वचिदूर्ध्वधूलिपटलैर्यस्यप्रयाणेऽभवत्
सद्वीचिक्वचिदंबरंसरइवोत्सर्पत्पताकापटैः ९
गजवाजीमयीभूमिर्ध्वजच्छत्रमयंनभः
दिक्चक्रंचामरमयंदैत्यसैन्येप्रसर्पति १०
ततोजालंधरोदैत्यःप्रयाणायसमुत्सुकः
स्कंधेचारोपयन्शक्तिंनानारत्नविभूषिताम् ११
आजगाममहाविष्णुंप्रष्टुंसागरवासिनम्
अभिवाद्यजगादाथहरिंजालंधरस्त्विदम् १२
भोगार्थांकिंप्रयच्छामितुभ्यंभावुककथ्यताम्
श्रुत्वानारायणोवाक्यमद्विधजस्यमुदान्वितः १३
उवाचकिंकरोमीतिप्रियंसिंधुसुतेप्सितम्
इत्युक्तःसप्रहृष्टोऽथहरिंप्रोवाचसत्वरः १४

यामियोद्धुंरणेऽहत्वंसुखीतिष्ठेहसागरे
लक्ष्म्यादत्ताद्यतस्तत्रकेशवेनाथपूजितः १५
सनिर्गत्यहरेःस्थानात्समुद्रंप्रष्टुमागतः
सोऽणवंप्रणिपत्याहतातयास्यामिदूरतः १६
नीलकंठंरणेजेतुमनुज्ञांदातुमर्हसि
प्रुत्रस्यवचनंश्रुत्वाययियासोःशंकरंप्रति १७
सिंधुराजेनसोऽप्युक्तःपुत्रतंतापसंत्यज
भुंद्वराज्यंमयादत्तंतापसंत्यजदूरतः १८
अत्यद्भुतःप्रतापस्तेत्वत्तुल्योनास्तिभूमिपः
स्वर्गादाधिक्यतांनीतंत्वयावत्सधरातलम् १९
तवराज्येवसुमतीवैकुंठइवराजते
योदेवोदुर्जयोदैत्यैरानीतःसहसश्रिया २०
ममांतिकंवत्सवसशंकरंभिक्षुकंत्यज
एवमुक्तोह्यर्णवेनगिरिजांप्रतिरागवान् २१
पितृवाक्यमविज्ञायआगत्यस्वभटान्स्वकान्
सज्जीभूतंतुयुद्धायवृंदाजालंधरंजगौ २२
वृंदोवाच
नाथयुद्धंनकर्तव्यंराजेंद्रकुत्सयोगिना
मनोनिवर्त्यतांपश्यप्रवृत्तंपार्वतींप्रति २३
गौरींत्वंवांछसिकस्मात्पार्वतीकिंममाधिका
तपस्विनीनिरालंबासंसक्तास्थाणवेसदा २४
सुतानुरागिणीवंध्याततःकृत्रिमपुत्रिका
वृथास्तुतानारदेनतांत्यजस्वभजस्वमाम् २५
इतिवृंदावचःश्रुत्वाप्रत्युवाचार्णवात्मजः
अदृष्ट्वापार्वतीरूपंमच्चेतोननिवर्तते २६
वृंदेत्वयाजनपदोराजधानीप्रपाल्यताम्
स्मर्तव्योऽहसदाचंडियदिमांहंतिशंकरः २७
इतिभर्तृवचःश्रुत्वावृंदाहाससमन्विता
जगामशिबिकारूढापीठंजालंधरंतदा २८
नारदउवाच–

अथप्रतस्थेकैलासंसिंधुसूनुर्महाबलः
महापद्मसहस्राणांषष्ट्यासैन्येनसंवृतः २९
अत्रांतरेपरित्यज्यकैलासंशंकरोगतः
गणपुत्रप्रियायुक्तःकैलासंमानसोत्तरम् ३०
जालंधरस्ततःप्राप्तःकैलासंप्रथमेऽहनि
सेनाःसंस्थाप्यकैलासआलोकनकुतूहली ३१
दिव्यकेसरमंदाररजःपुंजपरिश्रिताः
शीतांबुशीकरासारैःप्रभुग्नावांतिवायवः ३२
यत्रसिद्धांगनापीनस्तनोत्तुंगतरंगिणः
मंदारमकरंदाढ्याःसुंदरावांतिवायवः ३३
यत्राशोकरुचिस्निग्धपादन्यासंचयोषिताम्
विलोक्यदानवेंद्रोभून्मनोरथसमाकुलः ३४
प्राप्नुवंतिसुराःप्रीतिंस्वबिंबालोकहर्षिताः
यत्रकिन्नरकांतानांसुरतव्यंजितप्रभाः ३५
विभांतिसर्वतस्तत्रमंदाराःशीर्णपल्लवाः
यत्रशंभुगणाक्रांतानानावेलाकुलद्रुमाः ३६
भांतिमन्मथभूपालयशसासुधृताइव
यत्रचंदनकस्तूरीगंधोन्मत्तालिसंचयाः
विभांतिदग्धकंदर्प्पनिर्वाणांगारसन्निभाः ३७
यत्रांगनानांसकलंविलोक्यसौरभ्यमत्युत्तमकांतिमित्रम्
मन्येपरिष्वक्तमनोविनोदाकस्तूरिकागाहतिकालिमानम् ३८
क्वचित्प्रवरगैरिकासमसमुल्लसत्
पंकजंलवंगदलसन्निभासनचलच्चकोरंक्वचित्
क्वचिद्गिरिसरित्तटीतरणिवत्स्फुरत्कुंडलंचलन्निचुलमंजरीविनयनम्रभृंगंक्वचित् ३९
क्वचिद्दलितकोकिलाकुलितनूत्नचूतांकुरंकुरंगकुलसेवितंप्रबलशालिमूलंक्वचित्
क्वचित्प्रवरसुंदरैःसुरवधूपदैःपावनंवनंनयतिविक्रियामिहमनोमुनीनामपि ४०
एवंगुणसमायुक्तंविलोक्यहरमंदिरम्
विचित्रंचापिकैलासंसर्वरत्नसमाश्रयम् ४१

ग्रत्यंतविस्मितोदैत्यःप्रोवाचभृगुनंदनम्
कस्मात्तंतापसंतातप्रवदंतिभवादृशाः ४२
तादृशीयस्यसाभार्यागृहमीदृङ्मनोहरम्
तत्रादृष्ट्वावदच्छंभुंहरःकुत्रगतःकवे ४३
कथंममभयाच्चेतिपृष्टःप्रोवाचभार्गवः
देवशंभुर्महाशैलमगम्यंमानसोत्तरम् ४४
ययौतत्रमहादेवोगंतुंचान्यैर्नशक्यते
इतिकाव्यवचःश्रुत्वाप्राहदैत्योमहाबलः ४५
जालंधरउवाच–
ग्रहंयास्यामिदेवेशंत्वंपुरागच्छभार्गव
इत्युक्त्वाप्रययौतत्रयत्रास्तेशंकरःस्वयम् ४६
ग्रपश्यत्तंगिरिवरंसिंधुजोमानसोत्तरम्
तस्यषष्टिसहस्राणियोजनानांसमुच्छ्रयः ४७
सशैलोमानसोराजन्दैत्यसैन्यैःसमावृतः
बहवोदैत्यराजानःशैलमारुरुहुर्द्रुतम् ४८
छत्रांधकारंपर्यासीत्वाद्यनादेनवेपथुः
सैन्यकोलाहलस्तेषांपूरयामासरोदसी ४९
नारदउवाच–
ग्रथैवमागतंदृष्ट्वादैत्यसैन्यंमहत्तदा
ग्रत्युच्चेसगिरेःशृंगेस्थाप्यगौरींसखीवृताम् ५०
भगवांश्चगणैःसर्वैःसन्नद्धैर्युद्धदुर्मदैः
त्रिंशन्महाब्जसाहस्रैःप्रमथानांवृतःशिवः ५१
उवाचनंदिनंशंभुर्गणानामधिपंत्वया
प्रहर्तव्योमहादैत्योवीरोजालंधरोरणे ५२
महाकालादिभिःशूरैर्याहित्वंपरिवारितः
तावदाजौत्वयातस्माद्योद्धव्यमतिपौरुषात् ५३
यावद्युद्धेनारिजयोममवीरभविष्यति
इतिशंभोर्वचःश्रुत्वासचसारथिमब्रवीत् ५४
काकतुंडरथंमेऽद्यसमानयमहामते
नंदिनोवचनंश्रुत्वासोपिस्यंदनमाहरत् ५५

द्वात्रिंशदश्वसंयुक्तंचक्रषोडशसंयुतम्
षष्टिध्वजसमोपेतंद्वात्रिंशद्योजनायुतम् ५६
सर्वशस्त्रैश्चसंपूर्णंप्राप्तंसांग्रामिकंरथम्
नंदिनश्चक्ररत्नार्थंपुत्रौस्कंदविनायकौ ५७
समादिष्टौशंकरेणसन्नद्धौतौस्ववाहनौ
गणैःपरिवृतोनंदीवाग्भिःसंपूज्यं चेश्वरम् ५८
नंदीरथंसमारुह्यनिर्ययौदानवान्प्रति
विराजतेतस्यमूर्ध्निछत्रंद्वादशयोजनम् ५९
यावत्सनिर्ययौनंदीतावत्तेदानवाःपुरः
शैलोपरिसमारूढादानवाघोरदर्शनाः ६०
गणानामायुधैस्तीक्ष्णैःनिहताःपतिताभुवि
हन्यमानागणैर्दैत्यास्तत्यजुर्दूरतोगिरिम् ६१
ततोधूमसमंतस्मादवरुह्यशिलोच्चयात्
जघ्नुर्दैत्यान्शितैःशस्त्रैर्गणाराजन्महाबलान् ६२
अमरैराचितंदृष्ट्वारुरुधुर्दैत्यसैनिकाः
ततःसमभवद्युद्धंगणानांदानवैःसह ६३
शरवर्षमथात्युग्रंदानवानांदिवौकसाम्
ततःसमस्तान्मातंगाञ्जघ्नुःशिखिमुखारणे ६४
रथान्हयान्पदातींश्चकाकतुंडामहाबलाः
हतानांदैत्यसंघानांसंगरेभृशमायिनाम् ६५
शिरोभिर्गगनंव्याप्तंप्रहसद्भिर्भयावहैः
मुक्तकेशारुणमुखैर्भीमदंष्ट्राविलोचनैः ६६
सिंहैःकबंधजंघोरुकटिपृष्ठनिकृंतनैः
चितासर्वत्रवसुधाकबंधैरुधिरारुणैः ६७
ततोविरावःसुमहान्बभूवदैत्येश्वराणांध्वजिनीषुधावताम्
शंभोर्गणैःपातितसैनिकानांयथार्णवानांनदतांयुगक्षये ६८
इतिश्रीपाद्मेमहापुराणेपंचाशत्सहस्रसंहितायामुत्तरखंडेनारदयुधिष्ठिर-
संवादेजालंधरोपाख्यानेदैत्यसैन्यपराजयोनामएकादशोऽध्यायः ११

द्वादशोऽध्यायः

नारदउवाच-
दैत्यसैन्यंहतंदृष्ट्वागणैर्नंदिपुरोगमैः
क्रुद्धाःशुंभादयोदैत्याःसमाजग्मुर्गणान्प्रति १
ततःशुंभोमहादैत्योनंदिनंप्रत्ययुध्यत
महाकालंनिशुंभोऽथकालोलोकेश्वररंरणे २
पुष्पदंतंशैलरोमामाल्यवंतंमहाबलः
कोलाहलोरणेराजन्प्राप्तोमायाबलेनच ३
चंडंभयानकोनामराहुःस्कंदमधावत
कूष्मांडंसर्परोमाचघर्घरोमदनंतथा ४
शुभंकेतुमुखोहंतुंययौजंभोविनायकम्
हासंपातालकेतुश्चभृंगीशंरोमकंटकः ५
युयुधुःकोटिशोरुद्रगणदैत्याःपरस्परम्
पश्यतोरुभयोस्तत्रस्वामिनोरितितेयुधि ६
दृढप्रहारिणोजघ्नुर्गणादैत्याःशरैरथ
नंदीमुमोचतान्बाणान्महासारोयथानगे ७
ततःसंपूरयामासमुखंशुंभस्यपत्रिभिः
यथापर्णचयैर्वातोमंदरस्येवकंदरम् ८
शुंभोऽथकार्मुकंत्यक्त्वारथात्तंप्रत्यधावत
उत्पाट्यचगिरिंतेनजघानहृदिनंदिनः ९
नंदिनोहृदयंभित्त्वाचूर्णयित्वारथंरणे
पपातभूमौसगिरिर्वज्रंप्राप्यगिरिंयथा १०
मूर्च्छांप्राप्यक्षणात्संज्ञांवेगवान्सपलायितः
महाकालोनिशुंभेनमुद्गरेणहतोहृदि ११
आगत्यदैत्यंगदयाजघानमुकुटोपरि
तत्प्रहारमचिंत्याथनिशुंभोऽपिमहाबलः १२
तंगृहीत्वाचरणयोर्महाकालंमहाबलः
भ्रामयित्वाकरतलाच्चिक्षेपचननादच १३
सतद्वक्त्रानिलंपीत्वाननादरुधिरारुणः
पुष्पदंतःशैलरोम्णाचाहतोमुष्टिनामुखे १४

गदयाशैलरोमाणंहत्वाभूमौन्यपातयत्
तंदृष्ट्वापतितंभूमौगिरिकेतुर्महाबलः १५
पुष्पदंतंमहाभीमंमुद्गरेणाव्यपोथयत्
पुष्पंदंतोऽथखड्गेनगिरिकेतोःशिरोऽछिनत् १६
गृहीत्वाचर्मखड्गंचगिरिकेतोरधावत
शिरस्तंप्राहकिंयासिमांत्यक्त्वासमरार्थिनम् १७
शिरोहीनेचकायेऽस्मिन्किंतुधावन्नलज्जसे
इत्युक्तेशिरसातेनकबंधेनतुपादयोः १८
विधृतःपुष्पदंतश्चकुद्धौतीक्ष्णासिनाच्छित्
निश्चक्रामासुरःकुद्धःशतशीर्षोमहाबलः १९
द्विशताद्विसमायुक्तःशतद्वयभुजाकुलः
भ्रमत्तस्यशिरोराजन्कबंधोपांतमागमत् २०
तच्छिरःप्राप्तमालोक्यपुष्पदंतोऽसिनाच्छिनत्
ततोभूकंपनोनामज्वरोदैत्योभयावहः २१
पुष्पंदंतस्तदातत्रद्वाभ्यांराजन्विमर्दितः
ज्वरेणतेनचक्लिष्टोदुःसहेनातिवेगिना २२
त्यक्त्वाशिवगणःसंख्यंकंपमानोगिरिंययौ
कोलाहलोमहाधन्वीमाल्यवंतंशरैस्त्रिभिः २३
विव्याधस्कंधयोर्भालेमाल्यवांश्चततोऽसुरम्
बाणाहतोमाल्यवताशस्त्रैर्नानाविधैःशितैः २४
कोलाहलःप्रहृतवान्दर्शयन्नात्मलाघवम्
सोऽपिहेतिव्यथांत्यक्त्वामाल्यवांश्चगणाग्रणीः २५
गिरिंगृहीत्वातेनाजौकोलाहलमथाहनत्
निश्चक्रामज्वरस्तस्माज्ज्वलनोनामभीषणः २६
त्रिशीर्षोनवहस्तश्चनवपादोऽतिपिंगलः
सज्वरोमोहयामाससमाल्यवंतंस्वतेजसा २७
माल्यवान्समरंत्यक्त्वापराक्रांतोगिरिंययौ
चंडिर्भयानकेनाजौपाशेनहृदयेहतः २८
हयोविनिर्गतस्तस्मात्द्विप्तःसोऽपिचसागरे
कार्त्तिकेयोरणेराहुंशितैर्बाणैःसमाहनत् २९

आच्छाद्यशरजालैश्चशीघ्रंशक्तिंमुमोचह
आपतंतींमहाशक्तिंज्वलंतीमिवतेजसा ३०
दृष्ट्वाराहुःखमुत्पत्यकराभ्यांजगृहेद्रुतम्
सतांशक्तिंगृहीत्वातुविनद्योच्चैः पुनः पुनः ३१
स्वर्भानुःशिरसोनोपितस्यशक्त्याजघानतम्
वक्षस्यभिहतेशक्त्यातद्देहान्निर्गतासरित् ३२
तयासंप्लावितःपुत्रोमहादेवस्यसंयुगे
कथंचित्सानदीरुद्धासमंपूरोगिरिंययौ ३३
श्रुत्वार्णवजोज्वरतःकटककदंबस्यकर्कशंविरुतम्
सुस्वरवचनविदग्धंतमपिचकोकिलापतिंनसस्मार ३४
शरैःकिरंतंदहनमसिनाबर्बरोऽवधीत्
कूष्मांडोनिहतोमूर्ध्निसर्परोम्णाथमुष्टिना ३५
पातालकेतुनाहासोमुद्गरेणसमाहतः
तस्यदेहाद्विनिष्क्रम्यहस्तीमुद्गरमाभुनक् ३६
शुंडायांमुष्टिघातेनहतःपातालकेतुना
आयुधैर्जर्जरंचक्रेभृंगीशंरोमकंटकः ३७
भृंगीशोऽपिरणाद्भीतस्त्वरन्नेवगिरिंययौ
सहसाधूम्रवर्णश्चशुभ्रःकेतुमुखेऽपतत् ३८
गणंगिलितवान्दैत्योमहाकायोमहाननः
हाहाकारोमहानासीद्गिलितेकेतुनारणे ३९
जृंभस्यनिशितैर्बाणैश्छिन्नांगोऽथविनायकः
शुंडादंडंपरशुनातस्यचिच्छेददंतिनः ४०
जृंभासुरोजघानाथशक्त्यालंबोदरोदरम्
मूषकोऽपिशरैर्भिन्नःप्रविवेशगुहामुखम् ४१
विनायकःप्रहारार्त्तोविललापाकुलोरणे
हामातस्तातहाभ्रातर्हामूषकममप्रिय ४२
गणेशक्रंदितंश्रुत्वाभगवत्यातयातदा
समेत्यकूटादन्यस्मात्पार्वत्योक्तःशिवस्तदा ४३
हेरंबोवध्यतेदैत्यैःस्कंदोऽपिविनिपातितः
शिवकिंक्रीडसेशैलेरक्षपुत्रौगणानपि ४४

सदाशूलादिशस्त्राणांधृतानामद्यवैक्षणः
अथगौर्यावचःश्रुत्वावीरभद्रंशिवोऽब्रवीत् ४५
वृषःसज्जीयतांशीघ्रमित्युक्तेसतदाकरोत्
बबंधमुकुटंतस्यशृंगयोर्भास्करप्रभम् ४६
कंठेघंटाशतंबद्धवाकर्णयोर्दर्पणौधृतौ
स्कंधेचकिंकिणीजालंचरणेनूपुरंमहत् ४७
पुच्छेचामरसाहस्रंतस्यपाशाष्टकंमुखे
कल्याणीचतदादेवीशर्वपार्श्वेव्यस्थिता ४८
पाशाष्टकेनसंयुक्तातत्रखड्गधरांबिका
न्यस्तानिसर्वशस्त्राणिसवृषःसज्जितोबभौ ४९
पार्वत्याभूषितःसोऽथनिजयाघंटमालया
कृतंचतिलकंदेव्याप्रोक्तःसत्कृतिपूर्वकम् ५०
हरस्त्वयानमोक्तव्योवृषेन्द्ररणसंकटे
आगंतव्यमरीन्जित्वाशंभुनासहसंगरे ५१
इतिश्रुत्वावचोदेव्याहरोवृषमथारुहत्
धृत्वायुधसहस्रंतुनिजालंकारभूषितः
रणंगच्छामितांप्राहपार्वतींप्रतिसादरम् ५२
ईश्वरउवाच-
त्वंतिष्ठसिस्वरूपाणिएकाकिन्यपिसस्पृहा
भामिनीदुरभिप्रायादानवाहिसमागताः ५३
तस्मात्त्वयात्मनैवात्मारक्षणीयोवरानने
इत्युक्त्वावृषभारूढोययौरुद्रोरणांगणम् ५४
त्रिंशन्महाब्जसाहस्रैःप्रमथानांवृतःशिवः
वीरभद्रोरथेनाशुसिंहयुक्तेनसत्वरः ५५
वामपार्श्वंमहेशस्यशूरोरक्षतिपार्थिव
मणिभद्रोऽश्वयुक्तेनरथेनपरवीरहा ५६
दक्षिणंधूर्जटेःपार्श्वंसंरक्षतिधनुर्द्धरः
तुंगादुत्तीर्यशैलेंद्राद्रणंप्राप्तोगणैःसह ५७
दृष्ट्वाजगर्जुस्तेदैत्यामहेशानंवृषस्थितम्
ततोमहान्निनादोऽभूद्दैत्यप्रमथसेनयोः ५८

तयोरभून्मिथोराजन्संप्रमर्दोऽथदारुणः
ततोनंदीमहाकालःकालस्कंदौमहाबलः ५९
माल्यवान्पुष्पदंतश्चवृषलीस्वर्णदंतिकः
चंडीशोमदनश्चंडःकूष्मांडोगुप्तलोमकः ६०
येयेपूर्वंरणेभग्नाःप्राप्तास्तेरणसंकटम्
शिवस्यपुरतोदैत्यायुयुधुस्तेमहाबलाः ६१
गणदानवयोधानांसंग्रामोऽभूद्भयावहः
ततोगणानांविद्राव्यसैन्यंतेचमहाबलाः ६२
रणेसंबेष्टयामासुःशरौघैःसर्वतः शिवम्
शूलैःकुंतैर्गदाभिश्चमुद्गरैःपरिघैरपि ६३
इंद्रियाणियथात्मानंविषयैःपंचपंचभिः
जघानाथरणेदैत्याञ्छंभुर्बाणैःसुदारुणैः
यथाशुमाघःपापानिहंतिस्नानेनतत्क्षणात् ६४
इतिश्रीपाद्मेमहापुराणेपंचपंचात्सहस्त्रसंहितायामुत्तरखराडेनारदयुधिष्ठिर-सम्वादे जालंधरोपाख्यानेश्रीमहादेवरणमागमनंनामद्वादशोऽध्यायः १२

त्रयोदशोऽध्यायः

नारदउवाच-
ततोजालंधरःश्रुत्वादैत्यकोलाहलंरणे
आजगामरथारूढोयत्रदेवःसदाशिवः १
सारथिंखड्गरोमाणंकोपात्सत्वरमब्रवीत्
संप्रेषयरथंशीघ्रंसहस्त्रहययोजितम् २
हन्मितंतापसंशौर्याज्जटाभस्मास्थिभूषितम्
वृषारूढस्यकाशक्तिःपंगोर्युद्धेमयासह ३
नारदउवाच-
इत्युक्त्वाखड्गरोमाणमाभाष्यचतथोद्धतः
गृहीत्वाकार्मुकंघोरंरथेनाधावतद्द्रुतम् ४
तंरुरोधतदायांतंवीरभद्रःशितैःशरैः
निरुच्छ्वासीकृतेनापिसकायेनशरैर्वृतः ५
देवैर्यद्यपितुल्योऽभूद्भूतेशस्यपरिग्रहः

तथापिकिंकपालानितुलांयांतिकलानिधेः ६
विव्याधमणिभद्रोऽपिशरैःसागरनंदनम्
पाशेनमणिभद्रंतुहत्वोवाचेश्वरंवचः ७
एहियोद्धुंमहादेवशस्त्राभ्यासोऽस्तितेयदि
त्वंमांप्रहरनत्वाहमादौहन्मिजटाधरम् ८
इतिब्रुवंतंतंगर्वाद्वीरभद्रोऽथसायकैः
पूरयामाससंक्रुद्धोयथापद्मंरविःकरैः ९
मणिभद्रोऽथगदयासैन्यंतस्यसमाहनत्
रथोपरिरथंवीरतुरगंतुरगोपरि १०
गजोपरिगजंहत्वापातयामासभूतले
रक्तपंकारुणाभूमिःसंजातादुर्गमाक्षणात् ११
शैलाद्यगणमुख्याश्चदानवाञ्जघ्नुराहवे
पतंतिदानवाःशूरागतप्राणामहीतले १२
रुंडदोर्दंडमुंडैश्चकरिपृष्ठकरोरुभिः
पतंतिदानवाःशूरापूरितावसुधानृप १३
नारदउवाच-
एवंविधंरणेदृष्ट्वाहरमत्यंतदुर्जयम्
भुवनेचतथान्यानिदृष्टवाँल्लक्षणानिसः १४
तेजोऽन्यदेवनक्षत्रशशांकसकलादिषु
उद्घाटितजगत्कोशमन्यदेवरवेर्महः १५
भग्नःपुनश्चिंतितवांस्ततोजालंधरोनृप
नदृष्टासामयागौरीयांमामाहातिनारदः १६
सांप्रतंशाश्वतेस्थानेकथंद्रक्ष्याम्युमांस्थिताम्
तांहिद्रष्टुंव्रजाम्यादौपश्चाद्योत्स्यामिशंभुना १७
चिंतयित्वेतिमनसादैत्यंप्राहार्णवात्मजः
शुंभंचंडजयेवीरममतुल्यपराक्रम १८
धृत्वामत्सदृशंरूपंसंग्रामंकर्तुमर्हसि
तवयुद्धस्यभारोऽयशिबिरस्यबलस्यच १९
अहंयास्यामितांद्रष्टुंगौरींमच्चित्तहारिणीम्
इत्युक्त्वाथददौतस्मैस्वांगादुत्तार्यमंडनम् २०

वर्मशस्त्रादिकंदत्वारथंसारथिसंयुतम्
दुर्वारणेनसहितःसैन्यंमुक्त्वोदधेःसुतः २१
अलक्षितस्ततोगत्वागुहांगुप्तांतुपार्थिव
मानसोत्तरशैलस्यहररूपंदधारसः २२
धृत्वादुर्वारणेरूपंनंदिनःसदृशंतथा
अथारुरुहतुःशैलंछद्मशंकरनंदिनौ २३
यत्रास्तिशिखरेगौरीसखिभिःसहितानृप
तमायांतंशरैर्भिन्नंस्कंधमालम्ब्यनंदिनः २४
रक्ताक्तमंबरंदृष्ट्वाभवानीविस्मिताभवत्
सख्यस्तस्याजयाद्यास्ताःजग्मुस्तंसंभ्रमान्विताः २५
शंकरस्यांतिकंगत्वापप्रच्छुस्तंसुदुःखिताः
किंजातंतवदेवेशकेनत्वंसंगरेजितः २६
सशल्यस्त्वंकथंनाथसंसारीवप्ररोदिषि
इत्युक्तःप्रददौताभ्योभूषणानिपृथक्पृथक् २७
उत्तार्यशनकैरंगात् वासुकिप्रभृतीनिच
गणेशस्कंदशिरसीच्छिन्नेकुक्षौविलोक्यच २८
हास्कंदहागणेशेतिहारुद्रेत्यंबिकारुदत्
तस्याःसख्यस्ततःसर्वारुरुदुःशोककर्शिताः २९
अत्राब्रवीज्जयांनंदीत्वमेनंपरिपालय
मणिभद्रोवीरभद्रःपुष्पदंतश्चवीर्यवान् ३०
दंभनोधूमतिमिरः कूष्मांडाद्यारणेहताः
चंडीभृंगीकिरीटिश्चमहाकालश्चशृंखली ३१
चंडीशोगुप्तनेत्रश्चकालाद्याश्चहतारणे
विनायकस्यस्कंदस्यशिरसीभ्रमतामया ३२
दृष्टेमहारणेदेविइत्युक्त्वाथपुरोक्षिपत्
तच्छ्रुत्वानंदिनोवाक्यंशिरसीगृह्यपुत्रयोः ३३
पार्वतीविललापोच्चैःपुत्रपुत्रेतिजल्पती
तारकारेकथंयुद्धेहतस्त्वंसिंधुसूनुना ३४
त्वंहित्रिवासरोदेवैःसेनापत्योऽभिषेचितः
तदात्वयाकथंवीरतारकाख्योनिपातितः ३५

नीलकंठेनकिंत्यक्तोयतस्त्वंपतितोभुवि
स्नुषामुखंनदृष्टंचमयापुत्रावभाग्यया ३६
नभोगावत्सतेभुक्तासंसारस्यापियेभवन्
तातहेरंबविघ्नेशलंबोदरगजानन ३७
रणांगणेकेनपुत्रसिद्धैःपूज्योनिपातितः
वाहनोऽसौकुतोवत्समूषकःकेनहिंसितः ३८
एवंविलपतीगौरीशिवंप्राहसुदुःखितम्
साक्षाद्रुद्रोऽसिदेवेशहरस्त्वंमाभयंकुरु ३९
वृषभःक्वगतोदेवहतोजालंधरेणवै
शरजर्जरदेहस्यकिंकरोमिप्रियंतव ४०
ततःश्रुत्वावचोदेव्यानिश्वस्योवाचशंकरः
दीर्घंविनिहतौपुत्रौवृथाशोचसिकिंप्रिये ४१
अधुनातेंगसंगेनदेविमांत्रातुमर्हसि
शंकरस्यवचःश्रुत्वाऽसमयोचितमातुरम्
प्रत्युवाचांबिकादेवंबभाषेनोचितंवचः ४२
महाविषादेपतितेभयेचकृतेसमाधौवमनेमहाज्वरे
श्राद्धेप्रयाणेगुरुवृद्धसन्निधौरतिंबुधाःशंकरवर्जयंति ४३
कथंमांदुःखदुःखार्तांपुत्रशोकेनपीडिताम्
म्लानांबाष्पपरिम्लानांसंप्रार्थयसिचातुराम् ४४
भवान्याइतिवाक्यानिश्रुत्वामायामहेश्वरः
उवाचस्वार्थमुद्दिश्यगौर्यारूपेणमोहितः ४५
पुरुषस्यार्तियुक्तस्यनयच्छंतिरतिंस्त्रियः
तथैवरौरवेघोरेपतिष्यतिनसंशयः ४६
गणशून्यःपुत्रशून्योधीशून्योऽहवरानने
सांप्रतंगृह्यशून्योऽहसर्वशून्योऽस्मिभामिनि ४७
सुजीवितंविहीनोऽहत्वांपष्टुमिहचागतः
स्वंगृहंतुप्रविश्याशुत्यजामिप्रकृतिंस्वकाम् ४८
उत्तिष्ठनंदिन्संयावस्तीर्थेभवपुरःसरः
त्वंयाहिस्वेच्छयाकांतेप्रकृतिंस्वांपरित्यज ४९
इतिमायामहेशस्यवचःश्रुत्वांबिकाततः

दीर्घंदध्योमहाश्वासंशोकेनचजडीकृता ५०
तस्यैवंपरमेक्षोभेकिंचिन्नोवाचसाक्षणम्
ययासंमोहितंसर्वंजगत्स्थावरजंगमम्
सैवसंमोहितातेननजानेदुःखमात्मनः ५१
इतिश्रीपाद्मेमहापुराणेपंचपंचाशतसहस्रसंहितायांउत्तरखराडेयुधिष्ठिरनारद-
सम्वादेजालंधरमायामहेशागमनंनामत्रयोदशोऽध्यायः १३

चतुर्दशोऽध्यायः

युधिष्ठिरउवाच-
इतिमायामहेशेनमोहितागिरिजायदा
अतः किंसमभूद्ब्रह्मन्तन्ममाख्यातुमर्हसि १
नारदउवाच-
क्षीराब्धौतुशयानस्यचुक्षोभहृदयंहरेः
अकस्मादेवराजेंद्रनयनेऽश्रुपरिप्लुते २
दृष्ट्वातन्महदुत्पातलक्षणंभगवांस्ततः
उत्थायशेषपर्यंकान्मांचवायुंविलोक्यच ३
किंकार्यमितिगोविंदस्तन्नागारिमथास्मरत्
सचाग्रेस्मृतिमात्रेणतस्थौबद्धांजलिप्रभोः ४
विनतानंदनंदृष्ट्वापुरतःप्राहकेशवः
सुपर्णतत्रगच्छत्वंयत्रयुद्धंप्रवर्तते ५
हतोजालंधरोवीरोहरोवातेनमोहितः
दृष्ट्वातंशीघ्रमागत्यकथयस्वममाखिलम् ६
जालंधरेशयोर्युद्धंद्रष्टुंशक्तस्त्वमेवहि
कोऽन्योमहाहवेतस्मिन्ज्ञात्वायातिशरीरवान् ७
कदाचिद्दुर्गमंतत्रयुद्धंशस्त्रास्त्रवृष्टिभिः
अथत्वंबाणसंचारंगत्वापिहितविग्रहः ८
संदृष्ट्वापार्वतीवृत्तिंशीघ्रमायातुमर्हसि
दैत्यमायानिरासार्थंविचिंत्यभगवांस्त्वरन् ९
गुटिकांसर्वसिद्धांचगरुडायददौहरिः
अनयानभ्रमोवीरतथेत्युक्त्वामुखेक्षिपत् १०

एवंसंप्रेरितःपत्रीहरिंकृत्वाप्रदक्षिणम्
निश्चक्रामखमाविश्यजगामाद्भुतवेगवान् ११
तत्रगत्वारणंघोरंदैत्यसंघैःसदुःसहम्
दृष्टवानखिलेनासौनकिंचिज्ज्ञातवान्किल १२
तस्मादुत्पत्यवेगेनगतोऽसौमानसोत्तरम्
शैलंतुंगतरंदुर्गमगम्यंमरुतामपि १३
विलोकयन्नददृशेगौरीस्थानंपतंगराट्
तत्रागत्यभुजंगारिर्ध्वनिंसंश्रुतवान्किल १४
गत्वासमीपेददृशेमायापशुपतिंततः
गरुडोगुटिकांक्षिप्यमुखेनभ्रममापसः १५
ज्ञात्वाबुद्धवाथदैत्योऽयमितिनायंवृषध्वजः
हाकष्टमितिचोक्त्वाचरुदन्नागत्यचार्णवम् १६
कथयामासवृत्तांतंपुरतःकैटभद्विषः
देवजालंधरेणायंहरोदेवोविडंबितः १७
उमाप्रतारितातेनपापेनछद्मरूपिणा
सुरस्त्वंयदिगोविंदसमरंप्रतियाह्यतः १८
मायायुद्धंतुदेवेशकुरुजालंधरंप्रति
तस्यराज्ञीमयादृष्टापीठेजालंधरेशुभे १९
प्रासादभूम्यांक्रीडंतीवाद्यगीतादिवर्त्तनैः
सासुंदरतरागौर्यारंभोर्वश्योःशतादपि २०
नेदानींमानुषेलोकेनपातालेषुतत्समा
भार्यातेनसमावेश्यानारीणांकाकथाहरे २१
यस्तांस्पृशतिदेहेनसकृतार्थःपुमान्भवेत्
तवश्यालकपत्नीचहरत्वंतांरमप्रियाम्
शंकरस्योपकारंचकुरुचैवात्मनः सुखम् २२
नारदउवाच–
श्रुत्वाताद्दर्यस्यवचनंतंनिर्भर्त्स्यर्रमाप्रियः
सम्यग्व्यवस्यचोपायंविससर्जद्रुतंद्विजम् २३
श्रियंपतार्य्यसंछाद्यमंचकेपीतवाससा
निर्गतोऽन्येनरूपेणयोगिमायाबलेनच २४

वृंदारिकानुरागेणमोहितोमधुसूदनः
दृष्ट्वाहरिंतुगच्छंतंप्रतिछन्नंयुधिष्ठिर २५
शेषोप्यन्यतमेनासौरूपेणागत्यकेशवम्
जगादभक्त्यात्वंतिष्ठममानुज्ञातुमर्हसि २६
किंकरोमिक्वगच्छामिब्रूहिकार्यंजनार्दन
सदातवमुखंदृष्ट्वाभोद्त्यामीतिभवेत्सुखम् २७
श्रीभगवानुवाच-
जालंधरस्त्रियंरम्यांहरिष्येहरकारणात्
पार्वत्याश्चोपकारायसंछाद्यस्वात्मनस्तनुम् २८
एहियामोवयंबंधोकांतारंदुरतिक्रमम्
वृंदाकर्षणसिद्ध्यर्थमित्युक्त्वातौवनंगतौ २९
ततोविष्णुश्चशेषश्चजटावल्कलधारिणौ
आश्रमंचक्रतुःपुरायंसर्वकामफलप्रदम् ३०
तयोःशिष्याःप्रशिष्याश्चबभूवुःकामरूपिणः
सिंहव्याघ्रवराहाश्चऋक्षवानरमर्कटाः ३१
अथतस्मिन्वनेवृंदांमंत्रेणाकर्षयद्धरिः
तस्याहृदयसंतापंचकारमधुसूदनः ३२
एतस्मिन्नंतरेराज्ञीतापमुग्रमुपागता
चामरांश्चालयामासदिव्यस्त्रीकरचालितान् ३३
प्रियस्यागमनंतन्वींचिंतयंतीमुहुर्मुहुः
चंदनागुरुलिप्तांगीमूर्च्छांयातिहिसत्वरम् ३४
तुर्ययामेविभावर्याश्चतुर्दश्यांनृपांगना
स्वप्नंददर्शभयदंवैधव्यभयसूचकम् ३५
जालंधरशिरःशुष्कंमर्दितंपांडुभस्मना
गृध्रेणकृष्टनयनंछिन्नकर्णाग्रनासिकम् ३६
मुक्तकेशीकरालास्याकृष्णवर्णारुणांबरा
चखादकालीरक्तास्याहस्तेविधृतखर्परा ३७
ईदृशंददृशेस्वप्नंतथात्मानंविडंबितम्
दैत्यक्षयगुणोपेतंसाददर्शनृपांगना ३८
ततःप्रबुद्धाऽसुरराजपत्नीगीतेनवाद्येनचमागधानाम्

गेयप्रबंधैःस्तवनैर्वचोभिर्वंशस्तवैः किंपुरुषप्रपाठितैः ३९
ततस्तान्सकलान्श्रांतान्धनं दत्वाप्रसादजम्
निवार्यविप्रानाहूयस्वप्नंदृष्टंन्यवेदयत्
तंस्वप्नंब्राह्मणाःश्रुत्वातामूचुःशास्त्रपारगाः ४०
द्विजाऊचुः -
देविदुःस्वप्नमत्युग्रमचिंत्यंभयदायकम्
देहिदानंद्विजातिभ्योह्यचिंत्यभयनाशकम् ४१
धेनुर्वासांसिरत्नानिगजांश्चाभरणानिच
ब्राह्मणाःपरिसंतुष्टाःसिषिचुस्तांनृपस्त्रियम् ४२
अभिषिक्तापिसावृंदाज्वरेणपरितप्यते
विसृज्यविप्रप्रवरान्प्रासादमगमत्तदा ४३
तत्रस्थितापिस्वपुरंददृशेदीप्तमंगला
ततःस्वकर्मणाराजन्नाकृष्टाहरिणातुसा ४४
नशशाकगृहेस्थातुंततोराज्ञीवनंययौ
रथमश्वतरीयुक्तंस्मरदूतीसखीवहम् ४५
समारुह्यक्षणात्तन्वीप्राप्तासौभाग्यकाननम्
नानावृक्षसमायुक्तंनानापक्षिगणान्वितम् ४६
पुष्पप्रस्रवणोपेतंस्वर्गनारीविभूषितम्
मंदानिलप्रवेशोऽस्तियत्रनान्यस्यकस्यचित् ४७
वनंवृंदारिकादृष्ट्वासस्मारपतिमात्मनः
कथंजालंधरंवीरंद्रक्ष्यामिप्राप्तमग्रतः ४८
सातत्रनसुखंलेभेविवेशान्यतमंवनम्
सखीरथसमायुक्ताविष्णुमायाविमोहिता ४९
ततोविलोकयामासविपिनंतरुसंकुलम्
उरुपाषाणसंरुद्धंकुरंगाक्षीभयावहम् ५०
सिंहव्याघ्रभयाकीर्णंशृगालव्यालसेवितम्
द्रुमैःस्पृशच्छिखाकाशैर्गुहासुध्वांतपूरितम् ५१
वनंविलोक्यसाभीमंचकिताचपलेक्षणा
स्मरदूतींसखींवृंदाजगादरथवाहिनीम्
रथंप्रेषयमेशीघ्रंस्मरदूतिगृहंप्रति ५२

स्मरदूतिरुवाच–
नाहंजानामिदिग्भागंनयामिक्वरथंसखि
श्रांताश्रश्व्यः प्रवर्तंतेमार्गश्चात्रनविद्यते ५३
प्रेरितोदैवकेनापिस्यंदनोयातुयत्रच
अत्रकोपिचमांसादोभक्षयिष्यतिनान्यथा ५४
इत्युक्तासाद्रुततरारथंशीघ्रमवाहयत्
सरथोवेगतःप्राप्तोयत्रसिद्धामुदान्विताः ५५
तत्रसिद्धाश्चदृश्यंतेकाननंचभयावहम्
नयत्रप्रबलोवायुर्नशब्दःपक्षिणामपि ५६
नचतेजःप्रकाशोऽस्तिनजलंप्रदिशोदिशः
तत्रप्राप्तरथस्यापिलक्षणेऽभूद्विपर्ययः ५७
अश्वतर्योनहेषंतेनचशब्दश्चनेमिजः
नचलंतिपताकास्ताघंटिकानक्वणंतिच ५८
नस्वनंतिमहाघंटाध्वजस्तंभेनिवेशिताः
विलोक्यैवंविधंप्राहतत्रवृंदासखींप्रति ५९
स्मरदूतिक्वयास्यामोव्याघ्रसिंहभयंवनम्
नगृहेनसुखंराज्येममजातंवनेसखि ६०
स्मरदूतिरुवाच–
शृणुष्वदेविपश्यत्वंपुरःशैलोऽतिदारुणः
दृष्ट्वाग्रतोनगच्छंतितुरंग्योभयविह्वलाः ६१
तस्यास्तद्वचनंश्रुत्वासंत्रस्तासानृपांगना
दृष्ट्वाहारंस्वकंठस्थंस्यंदनाच्छीघ्रमुत्थिता ६२
एतस्मिन्नंतरेप्राप्तोराक्षसोभीषणाकृतिः
त्रिपादःपंचहस्तश्चसप्तनेत्रोऽतिदारुणः ६३
पिंगलोव्याघ्रकर्णश्चसिंहस्कंधस्तथाननः
विहंगेशसमाःकेशालंबंतेरुधिरारुणाः ६४
तंदृष्ट्वापद्मकोशांगीसहसासभयाभवत्
नेत्रेकराभ्यामाच्छाद्यचकंपेकदलीवसा ६५
प्रतिहारीप्रतोदंतुत्यक्त्वाराज्ञीमभाषत
भीतांमांत्राहिदेवित्वमयंधावतिभक्षितुम् ६६

एतस्मिन्नंतरेप्राप्तोराक्षसोरथसंनिधौ
रथमुत्क्षिप्यहस्तेनभ्रामयंश्चाश्विनीयुतम् ६७
साराज्ञीपतिताभूमौमृगीव्याघ्रभयादिव
स्मरदूतीतरोर्मूलेछिन्नाशोकलतायथा ६८
ततस्ताश्चाश्विनीःसर्वाःभक्षयामासराक्षसः
तेनराज्ञीधृताहस्तेसिंहेनैणवधूरिव ६९
तामुवाचततोरक्षःप्राणैस्तेकारणंयदि
तवभर्ताहतःसंख्येहरेणेतिश्रुतंमया ७०
मामासाद्याद्यभर्तारंचिरंजीवाकुतोभया
पिबाथवारुणींस्वाद्वींमहामांससमन्विताम्
शृणवंतीतिवचोराज्ञीगतसत्वाइवाभवत् ७१

इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तर
खंडेजालंधरोपाख्यानेश्रीमन्माधवमायाकथनंनामचतुर्दशोऽध्यायः १४

पञ्चदशोऽध्यायः

नारदउवाच-
नारायणस्तदादेवोजटावल्कलधार्यथ
द्वितीयोऽनुचरस्तस्यह्यायचौफलहस्तवान् १
तौदृष्ट्वास्मरदूतीसाविललापमृगेक्षणा
तच्छ्रुत्वावचनंतस्याःप्रोचतुस्तांचतावुभौ २
भयंमागच्छकल्याणित्वामावांत्रातुमागतौ
वनेघोरेप्रविष्टासिकथंदुष्टनिषेविते ३
एवमाश्वास्यतांतन्वींराक्षसंप्राहमाधवः
मुंचेमामधमाचारमृद्वंगींचारुहासिनीम् ४
रेरेमूर्खदुराचारकिंकर्तुंत्वंव्यवस्थितः
सर्वस्वंलोकनेत्राणामाहारंकर्तुमुद्यतः ५
भवपुण्यप्रभावेयंहंस्येतांमंडनंभुवः
अद्यलोकंनिरालोकंकंदर्पदर्पवर्जितम् ६
करिष्यस्यधुनात्वंचहत्वावृंदारिकांवने
तस्मादिमांविमुंचाशुसुखप्रासाददेवताम् ७

इतिश्रुत्वाहरेर्वाक्यंराक्षसःकुपितोऽब्रवीत्
समर्थस्त्वंयदितदामोचयाद्यैवमत्करात् ८
इत्युक्तमात्रेवचनेमाधवेनक्रुधेक्षितः
पपातभस्मसाद्भूतस्त्यक्त्वावृंदांसुदूरतः ९
अथोवाचप्रमुग्धासामाययाजगदीशितुः
कस्त्वंकारुरायजलधिर्येनाहमिहरक्षिता १०
शारीरंमानसंदुःखंसतापंतपसांनिधे
त्वयामधुरयावाचाहृतंराक्षसनाशनात् ११
तवाश्रमेतपःसौम्यकरिष्यामितपोधन १२
तापस उवाच-
भरद्वाजात्मजश्चाहंदेवशर्मेतिविश्रुतः
विहायभोगानखिलान्वनंघोरमुपागतः १३
अनेनबटुनासार्धंममशिष्येणकामगाः
बहुशःसंतिचान्येऽपिमच्छिष्याःकामरूपिणः १४
त्वंचेन्ममाश्रमेस्थित्वाचिकीर्षसितपःशुभे
एहिराज्ञ्यपरंयामोवनंदूरस्थितंयतः १५
इत्युक्त्वाराजपत्नींतांययौप्राचींदिशंहरिः
वनंप्रेतपिशाचाढ्यंमंदगत्यानराधिप १६
वृंदारिकाश्रुपूर्णाक्षीतस्यपृष्ठानुगाययौ
स्मरदूतीचतत्पृष्ठेमांप्रतीक्षेतिवादिनी १७
अत्रांतरेदुराचारःकोपिपापाकृतिर्वने
जालंप्रसारयामासतद्यदाजीवपूरितम् १८
ततःसंकोचयामासतज्जालंपापनायकः
जालस्थांस्तुतदाजीवानुपाहृत्यमुमोचह १९
सचव्याधःस्त्रियौदृष्ट्वास्मरदूतीजगादताम्
देविमामत्तुमायातिकरेगृह्णातुमांसखी २०
वृंदातयोक्तंश्रुत्वैनंविकृतास्यंव्यलोकयत्
वीक्ष्यतंभयवातेननिर्धूतासिंधुजप्रिया २१
दुद्रावविकलंशुभ्रंस्मरदूत्यासमंवने
विद्रवंतीसमंसख्यातापसाश्रममागता २२

सातापसवनेतस्मिन्ददर्शात्यंतमद्भुतम्
पक्षिणःकांचनीयांगान्नानाशब्दसमाकुलान् २३
सापश्यद्धेमपद्माढ्यांवापींतुस्वर्णभूमिकाम्
क्षीरंवहंतिसरितःस्रवंतिमधुभूरुहः २४
शर्करराशयस्तत्रमोदकानांचसंचयाः
भक्ष्याणिस्वादुसर्वाणिबहून्याभरणानिच २५
बहुशस्त्राणिदिव्यानिनभसःसंपतंतिच
क्रीडंतिहरयस्तृप्ताउत्पतंतिपतंतिच २६
मठेतिसुंदरंवृंदातंददर्शतपस्विनम्
व्याघ्रचर्मासनगतंभासयंतंजगत्त्रयम् २७
तमुवाचविभोपाहिपाहिपापर्द्धिकादथ
तपसाकिंचधर्मेणमौनेनचजपेनच २८
भीतत्राणात्परंनान्यत्पुण्यमस्तितपोधन
एवमुक्तवतीभीतासालसांगीतपस्विनम् २९
तावत्प्राप्तःसदुष्टात्मासर्वजीवप्रबंधकः
वृंदादेवीभयत्रस्ताहरिकंठेसमाश्लिषत् ३०
सुखस्पर्शभुजाभ्यांसाशोकवल्लीवलिगिता
तवालिगनभावेनपुनरेवभविष्यति ३१
शिरःसर्वांगसंपन्नंत्वद्भर्तुरधिकंगुणैः
अथत्वंप्रमदेगच्छपत्यर्थेचित्रशालिकाम् ३२
साचित्रशालामित्युक्ताविवेशमुनिनातदा
दिव्यपर्यंकमारूढागृह्यकांतस्यतच्छिरः ३३
चकाराधरपानंसामीलिताक्ष्यतिलोलुपा
यावत्तावदभूद्राजन्रूपंजालंधराकृति ३४
तत्कांतसदृशाकारस्तद्वक्षस्तद्वदुन्नतिः
तद्वाक्यस्तन्मनोभावस्तदासीज्जगदीश्वरः ३५
अथसंपूर्णकायंतंप्रियंवीक्ष्यजगादसा
तवकुर्वेप्रियंस्वामिन्ब्रूहित्वंस्वरणंचमे ३६
वृंदावचनमाकर्ण्यप्राहमायासमुद्रजः
शृणुदेवियथायुद्धंवृत्तंशंभोर्मयासह ३७

प्रियेरुद्रेणरौद्रेणछिन्नंचक्रेणमेशिरः
तावत्वत्सिद्धियोगाच्चत्वद्गतेनममात्मना ३८
छिन्नंतदत्रचानीतंजीवितंतेंगसंगतः
प्रियेत्वंमद्वियोगेनबालेजातासिदुःखिता ३९
क्षंतव्यंविप्रियंमह्यंयत्त्वांत्यक्त्वारणंगतः
इत्यादिवचनैस्तेनवृंदासंस्मारितातदा ४०
तांबूलैश्चविनोदैश्चवस्त्रालंकरणैःशुभैः
अथवृंदारिकादेवीसर्वभोगसमन्विता ४१
प्रियंगाढंसमालिग्यचुचुंबरतिलोलुपा
मोक्षादप्यधिकंसौख्यंवृंदामोहनसंभवम् ४२
मेनेनारायणोदेवोलक्ष्मीप्रेमरसाधिकम्
वृंदांवियोगजंदुःखंविनोदयतिमाधवे ४३
तत्क्रीडाचारुविलसद्वापिकाराजहंसके
तद्रूपभावात्कृष्णोऽसौपद्मायांविगतस्पृहः ४४
अभूद्वृंदावनेतस्मिंस्तुलसीरूपधारिणी
वृंदांगस्वेदतोभूम्यांप्रादुर्भूतातिपावनी ४५
वृंदांगसंगजंचेदमनुभूयसुखंहरिः
दिनानिकतिचिन्मेनेशिवकार्यंजगत्पतिः ४६
एकदासुरतस्यांतेसास्वकंठेतपस्विनम्
वृंदाददर्शसंलग्नंद्विभुजंपुरुषोत्तमम् ४७
तंदृष्ट्वाप्राहसाकंठाद्विमुच्यभुजबंधनम्
कथंतापसरूपेणत्वंमांमोहितुमागतः ४८
निशम्यवचनंतस्याःसांत्वयन्प्राहतांहरिः
शृणुवृंदारिकेत्वंमांविद्धिलक्ष्मीमनोहरम् ४९
तवभर्ताहरंजेतुंगौरीमानयितुंगतः
अहंशिवःशिवश्चाहंपृथक्त्वेनव्यवस्थितौ ५०
जालंधरोहतःसंख्येभजमामधुनानघे
नारदउवाच-
इतिविष्णोर्वचःश्रुत्वाविषराणवदनाभवत्
ततोवृंदारिकारजन्कुपिताप्रत्युवाचह ५१

रणेबद्धोऽसियेनत्वंजीवन्मुक्तःपितुर्गिरा
विविधैःसत्कृतोरत्नैर्युक्तंतस्यहृतावधूः ५२
पतिर्धर्मस्ययोनित्यंपरदाररतःकथम्
ईश्वरोऽपिकृतंभुंक्तेकर्मेत्याहुर्मनीषिणः ५३
अहंमोहंयथानीतात्वयामायातपस्विना
तथातववधूंमायातपस्वीकोऽपिनेष्यति ५४
इतिशप्तस्तथाविष्णुर्जगामादृश्यतांक्षणात्
साचित्रशालापर्यंकःसचतेऽथप्लवंगमाः ५५
नष्टंसर्वंहरौयातेवनंशून्यंविलोक्यसा
वृंदाप्राहसखींप्राप्यजिह्मंतद्विष्णुनाकृतम् ५६
त्यक्तंपुरंगतंराज्यंकांतःसंदेहतांगतः
अहंवनेविदित्वैतत्क्वयामिविधिनिर्मिता ५७
मनोरथानांविषयमभून्मेप्रियदर्शनम्
प्राहनिःश्वस्यचैवोष्णंराज्ञीवृंदातिदुःखिता ५८
ममप्राप्तंहिमरणंत्वयाहिस्मरदूतिके
इत्युक्तासातयाप्राहममत्वंप्राणरूपिणी ५९
तस्यास्तथोक्तमाकर्ण्यइतिकर्त्तव्यतांततः
वनेनिश्चित्यसावृंदागत्वातत्रमहत्सरः ६०
विहायदुःखमकरोद्गात्रक्षालनमंबुना
तीरेपद्मासनंबद्ध्वाकृत्वानिर्विषयंमनः ६१
शोषयामासदेहंस्वंविष्णुसंगेनदूषितम्
तपश्चचारसात्युग्रंनिराहारासखीसमम् ६२
गंधर्वलोकतोवृंदामथागत्याप्सरोगणः
प्राहयाहीतिकल्याणिस्वर्गंमात्यजविग्रहम् ६३
गांधर्वंशस्त्रमेतत्त्रिभुवनविजयंश्रीपतिस्तोषमग्र्यं
नीतोयेनेहवृंदेत्यजसिकथमिदंतद्वपुःप्राप्तकामम्
कांतंतेविद्धिशूलिप्रवरशरहतंपुण्यलाभस्यभूषास्वर्गस्यत्वं
भवाद्यद्रुतममरवनंचंडिभद्रेभजत्वम् ६४
श्रुत्वाशास्त्रंवधूनांजलधिजदयितावाक्यमाहप्रहस्य
स्वर्गादाहृत्यमुक्तात्रिदशपतिवधूश्चातिवीरेणपत्या

ऋादौपात्रंसुखानामहममरजिताप्रेयसातद्वियुक्तानिर्दुष्टातद्य
तिष्येप्रियममृतगतंप्राप्नुयांयेनचैव ६५
इत्युक्त्वाससखीवृंदाविससर्जाप्सरोगणान्
तत्प्रीतिपाशबद्धास्तानित्यमायांतियांतिच ६६
योगाभ्यासेनवृंदाथदग्ध्वाज्ञानाग्निनागुणान्
विषयेभ्यःसमाहृत्यमनःप्रापततःपरम् ६७
दृष्ट्वावृंदारिकांतत्रमहांतश्चाप्सरोगणाः
तुष्टुवुर्नभसस्तुष्टाबवृषुःपुष्पवृष्टिभिः ६८
शुष्ककाष्ठचयंकृत्वातत्रवृंदाकलेवरम्
निधायाग्निंचप्रज्वाल्यस्मरदूतीविवेशतम् ६९
दग्धंवृंदांगरजसांबिंबंतद्गोलकात्मकम्
कृत्वातद्भस्मनःशेषंमंदाकिन्यांविचिक्षिपुः ७०
यत्रवृंदापरित्यज्यदेहंब्रह्मपथंगता
ऋासीद्वृंदावनंतत्रगोवर्द्धनसमीपतः ७१
देव्योऽथस्वर्गमेत्यत्रिदशपतिवधूसत्त्वसंपत्तिमा
हुर्देवीभ्यस्तन्निशम्यप्रमुदितमनसोनिर्जराद्याश्चसर्वे
शत्रोर्दैत्यस्यहित्वाप्रबलतरभयंभीमभेर्योनिजघ्नुःश्रुत्वातत्रासनस्थः
परिजननिवहोवापशोभांशुभस्य ७२

इति श्रीपाद्मेमहापुराणेउत्तरखंडेपंचपंचाशतसहस्रसंहितायांजालंधरोपाख्याने
वृंदायाब्रह्मपदप्राप्तिर्नामपंचदशोऽध्यायः १५

षोडशोऽध्यायः

युधिष्ठिर उवाच
कथंजालंधरोगौरींहररूपधरोमुने
दृष्ट्वाचकारकिंतत्रतन्मेकथयविस्तरात् १
नारदउवाच-
यदामायाशिवस्तत्रप्रार्थयद्गिरिजांप्रति
ततःसाचुक्षुभेराजन्किंचिन्नोवाचतंप्रति २
ऋनातुरस्यदेवस्यप्राप्तस्यतपसामया
नयुक्तमितिनिश्चित्यपार्वतीनाहतंनृप ३

सानतत्रप्रतीकारंदृष्ट्वातस्यचपश्यतः
निर्गताततउत्थायददर्शाकाशवाहिनीम् ४
गंगांवासोचितांमत्वाभवानीतपसेययौ
पुरापितपसालब्धोमयेशःसांप्रतंतथा ५
इत्यव्रजच्चिंतयतीसखीभिःसहिताततः
पुरःक्षीरनिभांराजन्पार्वतीगगनात्परम् ६
मंदाकिनींददर्शाथपतंतींमानसोत्तरे
हारमालामिवायांतींविविक्तांगगनस्रजः ७
मंदाकिन्याःपयःपूरोह्याकृष्टःस्वर्गतोयथा
श्रुतीनांपूरधारेवब्रह्मणोवदनच्युता ८
दृष्ट्वामुमोदतांगंगांस्नात्वाचालिसमन्विता
संपूज्यस्वतनुंपश्चान्निविष्टास्वर्णदीतटे ९
परस्परमथालोक्यगौरीप्राहसखींजयाम्
त्वंगच्छमद्वपुःकृत्वातत्समीपंसखीत्वरा १०
जानीहितत्वंकिंशंभुर्यदिवान्योभविष्यति
यद्यसौत्वांसमालिग्यकुरुतेचुंबनादिकम् ११
तदामायांसमास्थायजानीह्यसुरमागतम्
यदिचेत्त्वांप्रतिब्रूयान्मन्निमित्तंशुभाशुभम् १२
असंशयंपिनाकीस्यादत्रागत्यब्रवीहिमाम्
इत्यादिष्टाजयादेव्यागतागंगाधरांतिकम् १३
तामायांतींसदृष्ट्वाचभृशंमन्मथपीडितः
चकारालिगनंतस्यागौरीरूपेणभावयन् १४
ततोजालंधरःसद्योवीर्यंस्वंप्रमुमोचह
अल्पेंद्रियश्चसंजातोवेगतःकुरुनंदन १५
तयासप्रोदितोदैत्यनत्वंरुद्रोभविष्यसि
अल्पवीर्योऽधमाचारोनाहंगौरीहितत्सखी १६
इत्युक्त्वानिजमास्थायरूपंसाप्राहतंपुनः
अनेनबतपापेनहतस्त्वंहिपिनाकिना १७
इतिज्ञात्वाचसाप्राप्तातत्रगत्वाब्रवीदुमाम्
देविजालंधरोह्येषनशंभुस्तववल्लभः १८

ततोभयार्ताहरवल्लभाभूद्द्रुतंविवेशाथसरोजमध्ये
सख्योभ्रमर्यःकमलेषुजाताभयेनजालंधरजेनराजन् १९
अत्रांतरेवनगतामदृष्ट्वातांनृपांगनाम्
भीतास्तुरक्षकास्तस्याःसत्वरंरणमाययुः २०
ततःशुंभेनतेपृष्टास्तंनत्वोचुःससाध्वसाः
आत्मनःपरिहारार्थोविष्णुमित्यसुरेश्वरम् २१
श्रुत्वावृंदांहृतांत्रस्तोरुद्रात्त्यक्त्वाथसंगरम्
शुंभेनप्रेषितौचंडमुंडौजालंधरंप्रति २२
मानसोत्तरमागत्यदानवौवेगवत्तरौ
हररूपधरंदैत्यंऊचतुर्विटपान्तरे २३
किंतयानृपशार्दूलविदेशगतयाश्रिया
अरयोयांनपश्यंतिबंधुभिर्यानभुज्यते २४
जितःशुंभोहतंसैन्यंदेवरुद्रेणतेरणे
एह्येहिकुरुसंग्रामंनत्वंप्राप्नोषिपार्वतीम् २५
पंचाननस्यमहिषींकथंप्राप्नोतिजंबुकः
अंधकारःकथंराजन्प्राप्नोतिसवितुःप्रभाम् २६
तवजालंधरात्पीठाद्धृताराज्ञीमुरारिणा
इतिसंश्रूयतेवार्तातस्मात्त्वंकुरुसंगरम् २७
रणेशर्वंविजित्याशुभवसर्वेश्वरेश्वरः
अथवाशिवनाराचैःखंडितोयासितत्पदम् २८
इतिजालंधरःश्रुत्वाभाषितंचंडमुंडयोः
निःससारगिरेस्तस्मात्सक्रोधंरक्तलोचनः २९
चंडमुंडौसमाश्वास्यत्यक्त्वारूपंहरस्यच
गच्छञ्जालंधरोमार्गेदुर्वारणमुवाचह ३०
पश्यदुर्वारणेदानींतत्रयद्विष्णुनाकृतम्
मायामाश्रित्यसाराज्ञीवृंदानीतात्मनःपदम् ३१
गृहेस्थितस्यजामातुर्विश्वसेन्नैवबुद्धिमान्
नूनंतस्मैप्रदत्वाचकन्यकांविसृजेद्बुधः ३२
जामातरंगृहेनैवस्थापयेत्सर्वथानरः
धनदारादिकंसर्वंसगृह्णातिशनैःशनैः ३३

दुर्वारणउवाच-
राजन्यत्क्रियतेकर्मतत्तथैवतुभुज्यते
त्वंहर्तुमागतोगौरींहरिणातेहृतावधूः
तस्यस्पष्टंवचःश्रुत्वाक्षणंमौनीव्यचिंतयत् ३४
जालंधरउवाच-
किंप्रयामिहरंजेतुमथवाहरिमुल्बणम्
कार्यद्वयेसमुत्पन्नेयत्परंतत्प्रकथ्यताम् ३५
दुर्वारणउवाच-
यदियासिहरिंजेतुंहरःपृष्ठेहनिष्यति
हनिष्यंतिरणेशूरायातुंरुद्रोनदास्यति ३६
तस्मात्पशुपतिंजित्वाकृत्वात्वंवश्यमात्मनः
पश्चात्प्रयाहिगोविंदंयदिजानासितत्पदम् ३७
अधुनासत्वरंवीरयाहिदैत्यान्महाबलान्
रणंकुरुमहाघोरंयथास्वर्गेसुपच्यते ३८
देशकालोचितंश्रुत्वादुर्वारणवचस्तदा
ययौजालंधरोयोद्धुंसहरुद्रेणयोगिना ३९
इति श्रीपाद्मेमहापुराणेउत्तरखंडेपंचपंचाशत्सहस्रसंहिता
यांजालंधरोपाख्यानेजालंधरस्यमायारूपपरित्यागोनामषोडशोऽध्यायः १६

सप्तदशोऽध्यायः

नारदउवाच-
अथजालंधरोऽपश्यत्कबंधचयभीषणम्
रणंरुधिरमांसौघमज्जामेदोऽस्थिदुर्गमम् १
तत्रजालंधरोदैत्यःप्रियाहरणदुखितः
रणेविलोकयामासवृषस्थंपार्वतीपतिम् २
घोराहिभोगेनविभूषितांगंजटाकलापेशशिभूषणांकितम्
नेत्राग्निकीलोपरिशोभितांगंविनारणंसंप्रददर्शसिंधुजः ३
शीघ्रंस्वरथमारुह्यसमुद्रतनयस्तदा
संरुष्टःप्राहतंशुंभंतापसोनहतस्त्वया ४
प्राहजालंधरंशुंभस्तपस्तेनमहत्कृतम्

हंतुंनशक्यतेऽस्माभिर्हरःसंग्रामदुर्जयः ५
इतिशुंभोक्तमाकर्ण्यसिंधुजःक्रोधमूर्च्छितः
हरंपद्मसहस्रेणदैत्यसैन्येनसंवृतम् ६
गृहीत्वाकालकेदारंधनुर्जालंधरोययौ
बाणांस्तीक्ष्णानतिस्थूलान्लोहस्तंभान्तथाबहून् ७
मुमोचयुधिदुर्धर्षोवर्षन्मेघइवागमे
आयांतंरुरुधुःसिंधुसूनुंशंभुगणायुधि ८
ततोरुद्रेणरौद्रैश्चशरौघैस्ताडितोरुषा
रुद्रबाणैस्तदातस्यकवचंभुविपातितम् ९
विवर्मापिबभौसोऽथमेघमुक्तोयथाचलः
पुनर्जालंधरस्यांगंशंभुनाकीलितंशरैः १०
रुधिरंबहुसुस्रावजालंधरशरीरतः
तेनाशुरुधिरौघेणप्लावितासकलामही ११
ततोदेवाभयंजग्मुर्दानवाश्चचकंपिरे
त्यक्त्वातेप्रमथावीराररणभूमिंप्रदुद्रुवुः १२
नद्याइवपरामूर्त्तिःप्रसृतासर्वतोऽपिच
अथाहार्णवजोरुद्रंधनुर्धरवरोह्यसि १३
इदानींतत्करिष्यामियेनगच्छसिसंक्षयम्
इत्युक्त्वाकालकेदारंसशरंप्रतिगृह्यतत् १४
शीघ्रंसंपूरयामासशरैर्नानाविधैःशिवम्
शिवःसहस्रकोटीभिःपूरितांगोरणेबभौ १५
विहंगमैर्यथाकाशंवृक्षैरिवमहागिरिः
दैत्यमुक्तैस्तुतैर्बाणैर्दृष्ट्वाव्याप्तंमहेश्वरम् १६
वीरभद्रस्तथाकोपाज्जालंधरमधावत
अपीडयदमेयात्मासमुद्रतनयंबली १७
जालंधरोऽथसंक्रुद्धोविध्यन्बाणैः सहस्रशः
धनुःशरान्रथंछत्रंसारथिंतिलशःशरैः १८
चकारवीरभद्रस्यसिंधुसूनुःप्रतापवान्
वीरभद्रोऽथविरथोहतवान्गदयाब्धिजम् १९
तथैवगदयासोऽपितंहत्वापातयद्भुवि

गदाप्रहारपतितमालोक्यातिविमूर्च्छितम् २०
मणिभद्रोऽथसमरेजालंधरमधावत
अतिक्रुद्धंतमायांतंदृष्ट्वादैत्योमहारणे २१
शरैर्व्यस्तोपकरणंसचकारनदीसुतः
अथमूर्च्छांपरित्यज्यउत्तस्थौसिंहवन्नदन् २२
वीरभद्रस्ततःकोपान्मणिभद्रःप्रतापवान्
जघ्नतुःपर्वताभ्यांतौव्योमस्थंतटिनीसुतम् २३
तदंगेपतितौदृष्ट्वापर्वतौविनिनद्यच
जघानमुष्टिपातेनवीरभद्रोनदीसुतम् २४
मणिभद्रश्चरणयोर्धृत्वासागरनंदनम्
स्यंदनाद्भ्रामयामासतदद्भुतमिवाभवत् २५
मणिभद्रगृहीतोऽपिदैत्यराट्समहाबलः
हत्वाचरणघातेनमणिभद्रमपातयत् २६
जालंधरोमहाबाहुर्वीरभद्रंचमुष्टिना
अथागतःपरव्तोगणैर्वैनंदिकेश्वरः २७
शुंभस्तमागतंदृष्ट्वारुरोधसहसैनिकैः
द्वंद्वयुद्धैरथाजग्मुर्गणादैत्यैःपरस्परम् २८
शुंभःशिलादजंराहुर्महाकालंरणेययौ
कोलाहलंनिशुंभोऽथकेतुःकालमधावत २९
शैलोदरोगुहंजंभोमाल्यवंतंमहाबलः
महापार्श्वोययौचंडंचंडीशोरोमकंटकम् ३०
विकटास्योऽथवैभृंगिमुरुनेत्रोविनायकम्
एवंदैत्येश्वरैःसार्द्धंगणानामधिपाययुः ३१
अथशुंभायुधैर्बाणैःप्रहतश्चशिलादजः
चूर्णीचकाराद्रिशृंगैःकपितुंडोमहत्तरैः ३२
शुंभस्तेनार्दितःशक्त्याशिलादंचजघानतम्
महाकालोजघानाथतंराहुंरणमूर्द्धनि ३३
शक्त्याथतस्यहतवान्स्यंदनंसमहाद्रिणा
कोलाहलोहतःशक्त्यानिशुंभेनप्रतापवान् ३४
शक्तिंगृहीत्वाह्यहनद्रथंसारथिनासह

विरथेनाथदैत्येनभृशंक्रुद्धेनसंयुगे ३५
कोलाहलोसुरेंद्रेणसहस्त्रफणिनाहतः
तंहत्वाचातिवेगेनरथंचान्यमुपागतः ३६
फणिचक्रहतःसंख्येक्षणान्मूर्च्छांविहायच
स्वरथात्शीघ्रमुत्तीर्यगृहीत्वाखङ्गचर्मणी ३७
सर्वंचक्रेनिशुंभस्यसरथाद्यसिनापृथक्
पुनःस्वरथमारुह्यदैत्यंबाणैरताडयत् ३८
निशुंभोऽप्यतिरोषाच्चतत्पराक्रमविस्मितः
शक्त्यामहाबलस्तस्यरथंसाश्वंन्यषूदयत् ३९
कोलाहलोरणेधावन्निशुंभंविरथोबली
गतःससरथंचक्रेविरथंभुजबंधनात् ४०
केतुपुच्छंगृहीत्वाचभ्रामयामासचांबरे
कालश्चिक्षेपसोऽप्यद्रिंसचिच्छेदगिरिंजवात् ४१
तंनगंचूर्णितंदृष्ट्वाताडयामासमुष्टिना
कालश्चूर्णितसर्वांगःकेतुनाप्राद्रवद्भयात् ४२
शैलोदरस्तथास्कंदंजघानगदयोरसि
षडाननोऽपितंशक्त्याहत्वाभूमावपातयत् ४३
शक्तिप्रहारेणमृतंदानवंवीक्ष्यषणमुखः
जगर्जतत्रवैचित्र्यंयथाक्रौंचेविदारिते ४४
माल्यवानथबाणौघैर्जंभमभ्यर्दयद्रणे
जंभोऽपिसायकैस्तीक्ष्णैर्भित्त्वातंमूर्च्छितंजहौ ४५
महापार्श्वोरथंधृत्वाबाणौघैर्वाजिवर्जितम्
लीलयैवचखेनीत्वाव्यश्वंचंडमपातयत् ४६
व्यश्वंरथंविलोक्याथततश्चंडोऽग्रहीद्गजम्
आपतंतंमहापार्श्वंचंडस्तंगदयाहनत् ४७
अचिंत्यैवगदापातंसोऽसुरोभृशदारुणः
प्रहत्यमुष्टिनाचंडंपातयामासभूतले ४८
चंडीशशस्त्राभिहतोरोमकंठोमहासुरः
चंडीशंपादयोर्धृत्वारथमूर्ध्निन्यपातयत् ४९
पपातसहसाभूमौययौतंभीषणेक्षणः

उरुनेत्रेणसमरेहतोलंबोदरःशरैः ५०
दंतेनोरसितंहत्वापातयामासभूतले
ऊरुनेत्रःक्षणाच्छांतिमागत्याशुरथंक्षणात् ५१
जघानमुद्गरेणासौमूर्ध्निसिंदूरमंडिते
गणेश्वरःपट्टिशेनजघानोरसिदानवम् ५२
तन्मुखादथनिष्क्रांतोनवशीर्षोऽसुरोमहान्
अष्टादशभुजोराजन्सोऽप्यधावतशांकरिम् ५३
नवशीर्षोरुनेत्राभ्यांरणेरुद्धोविनायकः
जर्जरीकृतदेहोऽपिजग्राहपरशुंरुषा ५४
तेनचिच्छेदशस्त्राणितयोराजौगणेश्वरः
रुद्धंगणेश्वरंदृष्ट्वाताभ्यांसंख्येऽथषण्मुखः ५५
शीघ्रमागत्यसेनानीर्जघाननवशीर्षकम्
नवशीर्षंरणेहत्वाउरुनेत्रमधावत ५६
स्कंदःस्वशक्तिघातेनपातयामासतंनृप
पश्यञ्जालंधरःस्कंदंययोसैन्येनसंवृतः ५७
पुत्रप्रीत्यासुरान्हंतुंसगणःशंकरोऽपिच
ततोघोरतरंयुद्धमभूदद्भुतसैन्ययोः ५८
हरसिंधुजयोर्युद्धेगतप्राणेवरोदसी
अथजालंधरःक्रुद्धोबाणंसंधायदारुणम् ५९
सहस्रशतसंख्याकैःपत्रैःसर्वत्रभूषितम्
दैत्येंद्रस्तेनबाणेनललाटेताडयच्छिवम् ६०
ममज्जापुंखमर्यादंललाटेशंकरस्यच
भालेशशांकवच्छंभोःसरराजमहाप्रभः ६१
यथादित्योहिघर्मांतेसंध्याकालेंबुदागमे
अथरुद्रोमहाबाणंजग्राहज्वलनोपमम् ६२
यस्यवेगेतुपवनःफलेयस्याग्निभास्करौ
कालोग्रंथिषुसर्वेषुशरेदेवीधरास्थिता ६३
हरस्तेनशरेणाशुविव्याधहृदिसिंधुजम्
तेनबाणप्रहारेणरुधिरौघपरिप्लुतः ६४
पपातशरभिन्नांगोवज्राहतइवाचलः

तदादैत्याःसमाक्रंदन्जगर्जुःप्रमथास्तथा ६५
सिंधुजंमूर्छितंदृष्ट्वारुरुधुर्दानवाःशिवम्
रक्षार्थमुद्यताःकेचित्केचित्तंपरितःस्थिताः ६६
यावज्जालंधरोमूर्छांप्राप्तोवारिधिनंदनः
तावद्रुद्रेणनाराचैर्हताजालंधरीचमूः ६७
चिराज्जालंधरस्त्यक्त्वामूर्छांसैन्यंहतंनृप
दृष्ट्वाभयान्वितःसेनांविकीर्णांचतथारणे ६८
ततःकाव्यंससस्मारमनसापरमंगुरुम्
स्मृतस्तेनत्वरन्प्राप्तःकविर्जालंधरंप्रति ६९
स्वस्तिकृत्वाजगादाथभार्गवःसिंधुनंदनम्
किंकरोमिमहाराजतवकार्यंमहाबल ७०
नारदउवाच–
इतिकाव्यवचःश्रुत्वाभार्गवंबहुमानयन्
नत्वागुरुमुवाचाथराजाजालंधरस्तथा ७१
राजोवाच–
जीवयैतान्मृताञ्छक्रदैत्यान्सर्वान्समंततः
इत्युक्तःसिंधुजेनाजौसैन्यंतत्रव्यलोकयत् ७२
पंचविंशत्सहस्राणियोजनानांप्रमाणतः
दैत्यांगरथसंकीर्णमुपर्युपरिपार्थिव ७३
उच्छ्रयेपंचनवतियोजनानांमहींचिताम्
योधवाहनदेहाद्यैरविपूर्णांधरांततः ७४
मंत्रोदकेनचाभ्युक्ष्यदैत्यानुत्थापयत्कविः
यावद्रुद्रोजटाजूटंबबंधभुजगैर्दृढम् ७५
तावत्काव्येनतत्सैन्यंमंत्रेणोत्थापितंनृप
व्याघ्रान्यथाकेसरिणोगजेंद्राःशूकरान्यथा ७६
आगतान्दानवान्दृष्ट्वाचिंतयामासशंकरः
किमेतदिहसंजातंमृतान्सृजतिकुत्रचित् ७७
ददर्शचिंतयन्काव्यइतितस्मिन्रणेभवः
जीवयंतंरणेदैत्यान्धावंतंवेगवत्तरम् ७८
ततःक्रुद्धोमहादेवःशुक्रंहंतुंमनोदधे

त्रिशूलिनमनुज्ञायरहश्चोवाचतंकविः ७९
ब्राह्मणोऽहकथंहंसिसर्वविद्याविशारदम्
ब्रह्महत्यामयिहतेतवरुद्रभविष्यति ८०
इतिश्रुत्वाकवेर्वाक्यंशूलंतत्याजशंकरः
स्मृत्वातत्पूर्ववृत्तांतंयल्लग्नंब्रह्मणःशिरः ८१
ब्राह्मणोनहिहंतव्योहरन्प्राणानपिप्रियान्
अयंतुजीवयन्दैत्यान्निग्राह्यःसर्वथामया ८२
तस्मादेनंक्षिपाम्याशुस्त्रीयोनौदैत्यजीवनम्
एवमुक्तवतःशंभोस्तृतीयनयनाद्द्रुतम् ८३
कृत्याविवासाचात्युग्रामुक्तकेशीमहोदरा
स्थूललंबस्तनीयोनीदंष्ट्रालोचनभीषणा ८४
आज्ञापयेतिसतयाप्रोक्तस्तामब्रवीच्छिवः
कृत्येत्वंदानवाचार्यंस्वयोनौक्षिपदुर्मतिम् ८५
यावज्जालंधरंहन्मितावदेनंभगेवह
हतेजालंधरेदैत्येपश्चान्निस्तीर्यमोचय ८६
हरेणोक्तेतिसाकृत्याभार्गवंसमधावत
पपातभूमौतांदृष्ट्वाकविर्दैत्याःप्रदुद्रुवुः ८७
केशेष्वाकृष्यधुन्वानानग्नमालिग्यभार्गवम्
योनौदधारसाकृत्याहसंतीजयनंदन ८८
भगेक्षिप्तंगुरुंदृष्ट्वायावज्जालंधरोऽसुरः
संदधेमार्गणांस्तावत्साकृत्यादृश्यतांगता ८९

इति श्रीपाद्मेमहापुराणेपंचपंचाशतसहस्त्रसंहितायांयुधिष्ठिरनारद
सम्वादे जालंधरोपाख्याने शुक्रयोनिप्रवेशोनामसप्तदशोऽध्यायः १७

अष्टादशोऽध्यायः

श्रीनारदउवाच-
अथजालंधरःप्राहरक्षात्मानमितःशिवम्
शिवाद्यत्वांक्षिपाम्याशुयत्रास्तेमधुसूदनः १
पश्चाद्ब्रह्माणमाकृष्यपातयिष्यामिसागरे
धृतेषुयुष्मासुयदातदासर्वेश्वरोह्यहम् २

इत्युक्त्वासैन्यसंभारंन्यस्यशुंभासुरादिषु
भटैर्गुप्तंनिशुंभाद्यैश्चतुरंगमनंतकम् ३
शुंभोनिशुंभःफेंकारोफेरुंडोधूम्रलोचनः
केतुर्बिडालजंघश्चराहुर्दुर्वारणोयमः ४
कालासुरोऽथलवणोभूमिरेतोंधकासुरः
रक्तवीर्यादयश्चंडीचामुंडीदैत्यपुंगवाः ५
सर्वानिवोद्यतान्दृष्ट्वासंख्येदानवपुंगवान्
रुरुधुःसमरेराजन्वीरभद्रादयोगणाः ६
ततोयुद्धमभूद्धोरंतुमुलंलोमहर्षणम्
पतंतिप्रथमायत्रदैत्याश्चापिक्षतातुराः ७
अथशुंभादिभिर्दैत्यैःसर्वशस्त्रैर्महामृधे
हताःपेतुर्गणाश्चान्येपलायांचक्रिरेनृप ८
गणान्विजित्यसमरेरुरुधुर्दानवाःशिवम्
वर्षंतःशरधाराभिर्घनामेरुगिरिंयथा ९
ततःपिनाकमाकृष्यवृषभोपरिभैरवः
जघानबाणनिवहैर्दानवान्समरांगणे
तीक्ष्णाग्रैस्तुक्षुरप्रौघैर्दानवानहनद्बली १०
केचिन्नंदिप्रहारेणपेतुःसंग्राममूर्धनि
बाणैश्चजर्जरान्कृत्वाशुंभादीन्वृषभध्वजः ११
शेषंसैन्यंजघानाशुशस्त्रास्त्रैःसमरांगणे
गजैर्नरैर्हयैर्व्याप्तंपतितैःसमरांगणम् १२
बभूववज्रनिर्भिन्नैःपर्वतैरिवभूतलम्
अथमायामयींगौरींविदधेसिंधुनंदनः १३
सौंदर्यगुणसंपन्नांसर्वालंकारभूषिताम्
जयांमायामयींकृत्वासमुवाचाब्धिनंदनः १४
गच्छत्वंपुरतोरुद्रंविमोहयरणेद्रुतम्
इत्युक्त्वादैत्यपतिनाययौमायामयीजया १५
रणेगत्वाशिवस्याग्रेमुक्तकेशीरुरोदह
पृष्टाहरेणसाप्राहमानसोत्तरपर्वतात् १६
हृतातवप्रियादेवपार्वतीसिंधुसूनुना

श्रुत्वेतिवचनंतस्यास्तामुवाचवृषध्वजः १७
जयेत्वमेहिवृषभंत्वांहरिष्यंतिदानवाः
ततोवृषभमारुह्यजयाचालिग्यशंकरम् १८
प्राहप्रयामिपार्वत्यानजीवामिविनाहर
चंद्रंशंभुजटाविष्टंगृहीत्वावृषभाद्द्रुतम् १९
अवारोहतसामायामायाष्वक्तोरणंययौ
ततोगौरींहृतांश्रुत्वाचिंतयामासशंकरः २०
दैत्यमायापरिष्वक्तोनात्मानंबुबुधेनृप
एतस्मिन्नंतरेप्राप्तः सैन्येनमहतावृतः २१
मायामृडानींस्वरथेनिधायार्णवजःशिवम्
जालंधरजयेतद्वदासीद्वादित्रनिस्वनः २२
चचालवसुधायेनप्रतिनेदुर्महीधराः
हरस्यदर्शयामासपार्वतींसिंधुनंदनः २३
रुद्रोऽप्यरिरथस्थांतांददर्शनिजवल्लभाम्
वियोगविधुरांदीनांतन्वीमातुरलोचनाम् २४
हानाथप्रियरुद्रेतिप्रजल्पंतींपुनःपुनः
प्रौढवैरिरथेदृष्ट्वापाखंडिस्थांयथाश्रुतिम् २५
गौरींदध्यौतथास्थाणुःकथंप्राप्याप्रियामया
विललापततःशंभुर्दैत्यमायाविमोहितः २६
मोहोमेदानवैःकांतेहृतासित्वांकथंप्रिये
शोकमोहप्लुतंदृष्ट्वाशंकरंसागरात्मजः २७
जगादप्रहसन्वाक्यंकश्चित्कारुण्यवान्यथा
सर्वप्रमाणशून्योऽसिस्मरशृंगारवर्जितः २८
ईश्वरोऽपिवराकस्त्वंसंजातोंबिकयाविना
मारोदीर्हिविरूपाक्षददामितववल्लभाम् २९
रक्षितोऽसिमयारुद्रगृहीत्वापार्वतींरणात्
इत्युक्त्वागिरिशंतूर्णमुत्तार्यस्वरथादुमाम् ३०
सैन्यंसंप्रेषयामासशंकराभिमुखंकिल
हरोऽपिवृषभेणाशुतत्सैन्यंसमधावत ३१
गृहीतुंपार्वतींपाहित्राहित्राहीतिजल्पतीम्

यावद्गृह्णातितांगौरींकरेणवृषभध्वजः ३२
तावच्छुंभासुरःशीघ्रंगृहीत्वाचांबरेस्थितः
शूलंमुमोचबलवान्हंतुंशुंभासुरंहरः ३३
शुंभेनसापरित्यक्ताशूलोपरिपपातह
रुदंतीचारुसर्वांगीत्यक्ताशूलेनसंयुता ३४
पतिताशंकरस्याग्रेतथेत्युक्त्वाममारच
मायागौरींमृतांदृष्ट्वाशोकमोहपरिप्लुतः ३५
हाप्रियेतिरुदन्रुद्रःपपातभुविमूर्च्छितः
क्षणंसंज्ञामवाप्याथरणभूमावुमापतिः
शशापशुंभप्रमुखान्गौरीयुष्मान्हनिष्यति ३६
नारदउवाच-
अथशुंभादयोदैत्यारणेदेव्यानिपातिताः
महेश्वरस्यशापेनगतेमंन्वतरेनृप ३७
शपित्वातान्रुरोदाथजल्पन्निर्गत्यशंकरः
क्वगतासिप्रियेत्युक्त्वादुःखितंमांरणांगणे ३८
रतिंत्यक्त्वावियोगार्तःश्रीकंठोऽहत्वयाकृतः
वासुदेवोऽपिमांत्यक्तंनजानातित्वयाप्रिये ३९
यज्ञेदक्षस्याग्निकुंडेशिरोदेविहुतंत्वया
भूयोहिभवतीलब्धाकथंत्यजसिमांपुनः ४०
उतिष्ठोतिष्ठचार्वंगिगिरिजेमांप्रबोधय
अत्रांतरेशिवंज्ञात्वादैत्यमायाविमोहितम् ४१
देवतागणमध्यस्थोह्यंतरिक्षादुपागमत्
विलपंतमुवाचेदमदृश्यःकमलासनः ४२
ब्रह्मोवाच-
त्वंशोकमोहपितृमातृविवर्जितोऽसिदुःखंसुखंसुतकलत्ररिपुर्नचास्ति
जातोऽसिनैवजनकेनजनिष्यमाणस्त्वंमन्यसेऋृषिगणैश्चकुतोविमोहः ४३
एकोऽसिनाथबहुधाकृतविग्रहोऽसिसूर्योयथाजलधिवीचिषुदृश्यमानः
ध्यानेनयांतियमिनस्तवपादमूलंरूपंपरंदुरवबोधमवाच्यमेव ४४
नैषाप्रियातवसमानतयाविपन्नाजालंधरेणरचितांजहिदेवमायाम्
सापार्वतीकमलकोशगताहिशंभोयुद्धस्ववैरिनिवहंजहिपाहिचास्मान् ४५

श्रुत्वेतिब्रह्मणोवाक्यमवबुद्धोमहेश्वरः
ज्ञात्वातांदानवीमायांमुमोचमहतीशिलाम् ४६
तयाजघानसमरेदैत्यकोटिशतत्रयम्
ततोवृषभमारुह्यक्रोधेनमहतानृप ४७
धनुःपिनाकंयुद्धायधूर्जटिर्जगृहेशरान्
अथमायापरित्यक्तंशर्वमालोक्यसिंधुजः ४८
सुरेशमोहनंमायाजालमत्यद्भुतंनृप
अन्यदाविश्वकाराशुभृशंमायामहाबलम् ४९
जालंधरःकोटिभुजोबभूववृक्षास्त्रशस्त्रैर्युयुधेवृषांकम्
अथांतरालेपृथिवींचकारसमुद्रसूनुर्गिरिधातुमंडिताम् ५०
देवतायतनैरम्यैर्नानापुष्पसमाकुलैः
मंडितांनृपभूमिंचचकारोदधिनंदनः
नृत्यंतियत्राप्सरसोमेनकायामनोहरा ५१
विस्मृत्यशंभुस्तदपास्यकार्मुकंसद्यःप्रतस्थेवृषभोपरिस्थितः
वादित्रगीतैर्भुविमोहितोभृशंदैत्येंद्रमायामयतांडवेनसः ५२
विमोहितंवीक्ष्यवृषस्थितंहरंनित्यंसमुद्रःसहतांडवेन
गीतेनवाद्येनचनृत्यलीलयाननादरूपीतरसाविमोहितुम् ५३
जंतून्क्षिप्त्वोदधौतांश्चसहस्रंसततोत्सवः
क्वचतादेवताःसर्वाःक्वनंदिप्रमुखागणाः ५४
अपित्वंमाननीयोऽसिमोहितोदैत्यमायया
किमद्यशंभोभगवन्नुपेक्षयतेउदीर्यचक्रंजठरस्थितंच ५५
वधायचास्यैवकृतंमहेशजालंधरंसंहरतेनचाजौ
इतिकृष्णस्यवचनात्तत्स्मृत्वात्मानमीश्वरम् ५६
आरुह्यवृषभंशीघ्रमाजगाममहारणम्
तमागतंशिवंदृष्ट्वासर्वसैन्यसमावृतः ५७
रुरोधसमरेराजन्क्रुद्धोजालंधरोऽसुरः
हरस्यकुपितस्यासीत्सृष्टिसंहारकारकम् ५८
रूपंतृतीयनेत्राग्नौदानवाःशलभायथा
रुपंदृष्ट्वाभगवतोरौद्रज्वालामयंनृप ५९
शुंभादयस्तदादैत्याराहुप्रभृतयश्चये

रुद्रंनिरीक्ष्यसंत्रस्ताःपातालंविविशुर्भयात् ६०
सेनाभटाननेकांश्चहतान्दृष्ट्वामहामृधे
शुंभादीन्हतशेषांस्तान्दृष्ट्वात्मानंपलायितान् ६१
तदाजालंधरःसंख्येएकोगिरिरिवस्थितः
परमार्थंरुद्ररूपंहृष्टःसाक्षाद्विलोकयन् ६२
ततोजालंधरःप्राहमहादेवंप्रहस्यच
रूपंसंहरयेनत्वंदहसेसचराचरम् ६३
शस्त्रेणकुरुसंग्रामंत्यक्त्वायोगबलंनिजम्
इतिजालंधरवचःश्रुत्वोवाचततःशिवः ६४
वरंवरयदैत्येशप्रीतोऽस्मितवकर्मणा
ईदृक्षमपिमद्रूपंदृष्ट्वायन्निर्भयोऽधुना ६५
अपिब्रह्मांडमखिलंमद्रूपस्यास्यदानव
तेजसोवीक्षणेनालंतत्रत्वमसिनिर्भयः ६६
नारदउवाच–
इतिशंभोःप्रसादंचमत्वासंसारनिस्पृहः
जालंधरोहराद्वव्रेमुक्तिंसायुज्यतांपराम् ६७
श्रीमहादेवउवाच–
दिव्यंदेहमिदंदैत्यभोगसिद्धियुतंतव
वृंदामनोहरंरम्यमिहस्थंकालमश्नुते ६८
मुहूर्तंपरमात्मानंतमेकाकिनमव्ययम्
अबुद्ध्वात्यजसेमूर्खकथंत्वंमुक्तिमिच्छसि ६९
वृंदातवप्रियाराज्ञीहृतासायोगमायया
ब्रह्मस्वरूपंविज्ञायप्राप्तातत्परमंपदम् ७०
इदानींदुर्ल्लभासाचतत्पदंचैवदुर्ल्लभम्
स्वर्गापवर्गयोर्मध्येसंसारेवरमाप्नुहि ७१
जालंधरउवाच–
देवमुक्तपदंलभ्यंकृतकृत्येनकेनचित्
इदानींकृतकृत्योऽस्मियत्त्वांपश्येत्वयाहतः ७२
शिवउवाच–
मत्स्थानंपरमंक्षेत्रंयदित्वंगंतुमुत्सुकः

तर्हिमांकोपयस्वाशुदैत्यंहत्वादृढैःशरैः ७३
ततोऽहत्वांहनिष्यामिमत्स्थानंयास्यसेऽनघ
महेश्वरवचःश्रुत्वाप्राहजालंधरःशिवम् ७४
त्वयिसर्वजगत्पूज्येपूर्वंनप्रहराम्यहम् ७५
नारदउवाच-
एवमुक्तोजघानाशुसिंधुजंविशिखैःशिवः
तेशराःसिंधुपुत्रस्यदेहलग्नाविभांतिच ७६
यथालोहगिरिप्रांतेवेणवोवह्निदीपिताः
जालंधरोहरस्यांगंपूरयामासमार्गणैः ७७
तैः शरैः शुशुभेरुद्रोयथाखंखेचराकुलम्
जालंधरेशयोर्युद्धंतथाद्वंद्वमभून्नृप ७८
हरादन्येनहंतास्तिनसोढान्योऽणवात्मजात्
गिरिकोटिसहस्रैस्तुतदापृथ्वीपुटोद्धृतैः ७९
पूरयामाससमरेसिंधुजःपार्वतीपतिम्
ततःशूलेननिहतोरुद्रेणोरसिदानवः ८०
निःससारमुखात्तस्यज्वरोजंभोभयंकरः
सचवीरज्वरोनामसिंहवक्त्रोनराकृतिः ८१
दैत्यदेहाद्विनिष्क्रांतंदृष्ट्वासिंहमुखंज्वरम्
हुंकारमकरोद्घोरंशरभस्तत्रनिर्ययौ ८२
शिवस्यनिःसृतेनासौशरभेणनिपातितः
अजेयंशंकरंदृष्ट्वावृषभेंद्रेणसंयुतम् ८३
आययौवृषभाभ्याशेतरसासागरात्मजः
वृषंपुच्छेगृहीत्वाचभ्रामयामासचांबरे ८४
जालंधरोमहाबाहुश्चिक्षेपहिमवद्गिरौ
ततस्त्रिशूलमत्युग्रंमुमोचगिरिजापतिः ८५
तद्धस्तेनगृहीत्वाचदैत्येशःशिवसन्निधौ
रथारूढोधनुर्गृह्यकालकेदारमब्धिजः ८६
पूरयामासविशिखैःशिवमुर्वीतलेस्थितम्
उग्रःशस्त्राञ्छरान्छित्वाबाणैरथमचूर्णयत् ८७
दशयोजनविस्तीर्णंसारथ्यश्वसमन्वितम्

जालंरोऽपिविरथोऽभ्यधावन्मृधेशिवम् ८८
तयोर्युद्धमभूद्घोरमद्भुतंलोमहर्षणम्
तदृष्ट्वाऽकाडकल्पांतशंकयातत्रसुःसुराः ८९
सवास्त्रैस्तावदन्योन्यंजघ्नतुर्भीमविक्रमौ
पद्भिःपृथ्वद्यंचालयंतौकंपयंतौनभःस्वनैः ९०
अथोत्कटंबलंदृष्ट्वादानवेंद्रस्यशंकरः
शस्त्रजालंजहाराशुयोगमायाबलेनसः ९१
ततःकोटिभुजोदैत्योदंष्ट्राभीषणलोचनः
शस्त्रहीनोऽपितरसाधावमानोहरंययौ ९२
विशालकरबंधेनबबंधसमरेशिवम्
ततस्तस्यकृपाणेनचिच्छेदकरकाननम् ९३
सिंधुजेनभुजाक्रांतोरुद्रोभून्नीललोहितः
लीलयायोधयामासरणेऽसौसिंधुनंदनः ९४
छिन्नहस्तोऽपियुयुधेस्वर्भानुःशिरसायथा
नियुद्धेननदीसूनुस्तोषयामासशंकरम् ९५
परितुष्टोऽब्रवीच्छंभुर्वरंवरयदुर्लभम्
जालंधरेणसोऽप्युक्तस्त्वंमेदेह्यात्मनःपदम् ९६
ममदोःशस्त्रहीनस्यनावज्ञांकर्तुमर्हसि
शीघ्रंप्रयच्छमेसिद्धिंनोचेत्त्वांसंहराम्यहम् ९७
इत्युक्त्वासभुजोभूत्वाजघ्नेतंमुष्टिनोरसि
ततःसुदर्शनंचक्रंपुरायन्निर्मितंस्वयम् ९८
मुखादुद्गीर्यतद्धस्तेगृहीत्वातोलयद्रुषा
सूर्यकोटिसहस्राभंग्रसंतंसचराचरम् ९९
तेनचक्रेणचिच्छेदशिरोजालंधरस्यच
ततस्तच्छीर्षमुत्प्लुत्यगगनेशतयोजनम् १००
दंष्ट्राशतकरालास्यंस्वर्भूमिनयनंचयत्
व्याघ्रगत्याततोयातंसदनंब्रह्मणोनृप १०१
भूयःस्वर्गेततोदृष्ट्वामृडःशीर्षमधावत
स्रवत्तद्रुधिरंभूरिप्रकुर्वद्भैरवस्वनम् १०२
ततोदिशःप्रणष्टास्तागगनंविलयंगतम्

नतेजसांप्रकाशोऽस्तिचचालवसुधाभयात् १०३
आपतंतंजघानाशुरुद्रश्चक्रेणतच्छिरः
द्विधाभूत्वाथराजेंद्रपपातहिमवद्गिरौ १०४
ततोजालंधरस्याशुशिरसः शकलेकिल
विशतः सर्वभूतानांपश्यतांस्मवृषाकपौ १०५
तस्यकंठात्समुद्भूतादैत्याः शतसहस्रशः
तेहतास्तेनचक्रेणकपर्दिकरशालिना १०६
जालंधरकबंधंतन्ननर्तरुधिरारुणम्
पुनःपुन समुद्भूतास्तस्यकंठात्तुदानवाः १०७
पुनः पुनर्बलवताछिन्नाश्चक्रेणशंभुना
मेदसासिंधुपुत्रस्युपूरितासकलामही १०८
मेदिनीमेदसैवैषाख्यातिंप्राप्तातुपार्थिव
यत्रदैत्यवरस्यास्यशोणितंशैलतांगतम् १०९
कैलासस्योत्तरेभागेतत्राभूच्छोणितंपुरम्
अथमांसचयान्दृष्ट्वासर्वतोव्याप्यतिष्ठतः ११०
तदासस्मारदेवेशश्चतुःषष्टिगणांरणे
विज्ञानस्मरणाद्देव्यः संप्राप्ताः शंकरांतिकम् १११
कृतांजलिपुटाःप्रोचुःशिवकिंकरवामहे ११२
महादेवउवाच-
यएतेदैत्यमांसस्यराशयोगिरिसन्निभाः
भक्षयध्वंयुताःशीघ्रंदत्तानुज्ञामयातुवः ११३
ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा
वाराहीचैवमाहेंद्रीसर्वाःस्वगणशोभिताः ११४
एवंशंकरनिर्दिष्टादेव्यस्तामांससंचयान्
क्रूरेणचक्षुषालोक्यनिन्युश्चादर्शनंक्षणात् ११५
अथजालंधरवपुःक्षीणंक्रांतंतुशक्तिभिः
ताभिर्ग्रस्तेशरीरेतुतस्यदेहाद्विनिःसृता ११६
प्रभासाशंकरंप्राप्ताजगामादर्शनंक्षणात्
तत्तेजःसूर्यसंकाशंलयंप्राप्तंमहेश्वरे ११७
एवंसविलयंप्राप्तःत्रिदिशारिस्त्रिलोचनात्

वृणुध्वंचवरंसर्वाःप्रीतःप्राहमहेश्वरः ११८
तदाताःसर्वयोगिन्यःपप्रच्छुर्जगदीश्वरम्
मर्त्यलोकेषुयेलोकाभोगमोक्षवरेप्सवः ११९
पूजयिष्यंतितेनित्यंस्वगृहेयोगिनीगणम्
तत्तेषांवांछितंसर्वंसिध्यतांत्वत्प्रसादतः १२०
महादेवउवाच–
यःकश्चित्पूजयेन्नित्यंभक्तिभावसमन्वितः
युष्मद्गणंचतस्याहंवरदोऽस्मिधरातले १२१
मद्भक्तःकेशवस्यापिद्वेष्टियोयोगिनीगणम्
भैरवोऽहतदातस्यहरिष्येसुकृतंकृतम् १२२
इतिदत्तवराहृष्टायोगिन्योविभुनामृधे
अत्रांतरेभवानींतांसस्मारवृषभंहरः १२३
स्मृतमात्रापार्वतीसावृषभश्चागमत्क्षणात्
सखीगणसमायुक्तासंप्राप्ताहरवल्लभा १२४
संत्यक्त्वाभ्रामरींमूर्तिंहरस्यार्द्धंसमारुहत्
गिरिजासहितोराजन्महेशोमुमुदेततः १२५
योगिनींप्रत्युवाचेदंपिबध्वंरुधिरंनृप
जालंधरकबंधस्थंताःश्रुत्वाजहृषुर्भृशम् १२६
मांसमेदोह्यसृक्पीत्वायोगिन्योननृतुर्मुदा
ततोहरःप्रसन्नोऽभूत्तासांक्रीडनवीक्षणात् १२७
स्वयंचभैरवंरूपंकृत्वातन्मध्यगःपपौ
तीक्ष्णदंष्ट्रामहाकायास्तदासन्योगिनीगणाः १२८
ग्रसंतोऽद्यापिमांसानिकालेचापिपिबंत्यसृक्
तेनजालंधरोदैत्योनोत्तिष्ठतिरणेहतः १२९
ततस्तत्रसमाजग्मुर्ब्रह्माद्यादेवतागणाः
ऋषयोमरुतोदेवास्तुवंतिस्ममहेश्वरम् १३०
दिशःप्रसेदुःसुरभिर्ववौमरुद्दिवःप्रपेतुर्भुविपुष्पवृष्टयः
कृताभिषेकस्यचतस्यनिःस्वनान्संनादितादुंदुभयोऽपिचक्रिरे १३१
उपरिपरिमलांधैःसुस्वरंसंपतद्भिर्मधुकरनिकुरंबैरुह्यमाणाभरेण
अविरलमधुधारासारसंसिक्तभूमिःसदसिसुरविमुक्ताप्रापतत्पुष्पवृष्टिः १३२

हतेतदासिंधुसुतेहरेणनाराचघातैस्त्रिजगत्तदाबभौ
प्रसूनवृष्टिर्ननृतुस्तदांगनाजगुश्चयत्ताः सुरकिन्नराद्याः १३३
शंभुर्वैरिजयोत्थितेनयशसास्फारांगकीर्तिर्गिरिं
स्वंभेजेसुरसिद्धचारणगणैः संस्तूयमानः सदा
गौरीचापिजगामचाशुगिरितःश्वेतः
सखीसंवृतासंचक्रुस्त्वभिसेवनंसुमनसांवर्षेणदेवांगना १३४
देवोऽसौकरुणामयः सुरगणान्स्वेस्वेपदेस्थापयन्
प्रादादन्यदपिस्वकंवसुततोज्ञात्वापतिंशंकरः
किंवक्तव्यमतः परंयदिभवेदीशानुकंपापरा
कोऽयवात्रिदिवोधरातलमिदंस्यादात्मसात्सर्वतः १३५
देवाः स्वराज्यमासाद्ययथापूर्वंचकाशिरे
बुभुजुर्यज्ञभागांस्तेलोकपालत्वमाश्रिताः १३६
नारदउवाच-
इतिजालंधरस्योक्तंयथावदनुपूर्वशः
चरितंलोकवीरस्यराजन्नत्यद्भुतंतव १३७
विष्णुस्त्यजतिनाद्यापित्तीराब्धिंयद्वशोनृप
सर्वोऽपिभुंक्तेस्वंकर्मकर्मतद्विद्ध्यसंशयम् १३८
तुभ्यंदुःखनिरासायप्रोक्तमाख्यानमुत्तमम्
यावद्देहोस्तिकर्माणिसुखदुःखानिकर्मतः १३९
देहीभुंक्तेवशोराजन्त्राणंनज्ञानतःपरम्
कृष्णादीनांदेहबंधेसुखदुःखादिवर्तते १४०
तत्रेतरेषांकिंवाच्यंयेवैराग्यपराङ्मुखाः
ज्ञात्वेदृशींकर्मगतिंसर्वेभ्योबलवत्तमाम् १४१
धीरोभवप्रतीत्तस्वशुभकर्मागमंपुनः
शत्रून्जित्वातुसमयेस्वंराज्यंपुनराप्स्यसि १४२
इतिहासमिमंश्रुत्वानदुःखैपरिभूयते
धर्मार्थकाममोत्ताश्चयथावच्चात्रकीर्त्तिताः १४३
स्वर्ग्यंपापहरंपुण्यंशोकमोहविनाशनम्
ब्राह्मणोज्ञानमाप्नोतिराज्यंप्राप्नोतित्तत्रियः १४४
वैश्यश्चबह्वींसंपत्तिंश्रुत्वाशूद्रःसुखंलभेत्

योराजाभ्रष्टराज्योऽपिरतःसन्नेवसत्पथि १४५
सराज्यंपुनराप्नोतिश्रवणान्नित्यमस्यतु
आकर्ण्यैतत्सतांराजन्श्राव्यमन्यन्नरोचते १४६
कलंचकोकिलालापंरूक्षंध्वांक्षरुतंयथा
आख्यानमेतदनघंश्रुत्वासज्जनहृत्प्रियः १४७
हिरण्यतिलवस्त्राद्यैर्धेनुभूमिप्रदानतः
संतोषयेद्वाचकंतुतस्मिंस्तुष्टेफलंलभेत् १४८
देवताश्चप्रसीदेयुरर्चितेवाचकेगुरौ
अन्नदानानिदद्याच्चब्राह्मणेभ्यःप्रपूजयेत् १४९
जायतेविजयीनित्यंपुत्रपौत्रसमृद्धिमान्
जायतेविष्णुलोकेयःशृणोत्याख्यानमुत्तमम् १५०
इतिव्याजेनभोभूपतुलस्युत्पत्तिकारणम्
येशृण्वंतिनरश्रेष्ठानतेषांपातकंक्वचित् १५१
तुलसीमाहात्म्यमिदंपवित्रंपापनाशनम्
श्रुत्वातुलभतेमोक्षमुक्त्वाचैवनसंशयः १५२
स्वगृहेरोपिताचैवतुलसीपापनाशिनी
दर्शनाद्ब्रह्महत्यापिनश्यतेनात्रसंशयः १५३
कार्तिकेचैवमाघेतुतुलस्यापूजयेद्धरिम्
वैशाखेतुविशेषेणपूजनंचहरेःस्मृतम् १५४
एकेनैवप्रदक्षिणेनसकलंपापंगतंवैसदायेशूद्रा
भुविसंतिदाननिरताःकालेनशुद्धिंगताः
तेपिस्युःसुरपूजनार्हतनवःपापाच्चदूरंगताःयेवै
विष्णुजनाश्चदुर्लभतराह्यस्मिन्कलौसांप्रतम् १५५

इति श्रीपाद्मेमहापुराणेपंचपंचाशतसहस्रसंहितायांउत्तरखंडेजालंधरोपाख्याने श्रीजालंधरवधमहोत्सवोनामाष्टादशोऽध्यायः १८

एकोनविंशोऽध्यायः

युधिष्ठिरउवाच–
श्रीशैलःपर्वतोरम्यःकुत्रतिष्ठतिनारद
किंतत्रवर्त्ततेतीर्थंकस्यदेवस्यपूजनम्

कस्यांदिशिसमाख्यातोलोकेषुचवदाधुना १
नारदउवाच-
शृणुराजन्प्रवक्ष्यामिश्रीशैलंपर्वतोत्तमम्
यंश्रुत्वामुच्यतेलोकोबालहत्यादिपातकात् २
तत्पर्वतवनंरम्यंमुनिभिश्चोपसेवितम्
नानाद्रुमलताकीर्णंनानापुष्पोपशोभितम् ३
हंसकोकिलनादैश्चमयूरध्वनिनादितम्
श्रीवृक्षैश्चकपित्थैश्चशिरीषैराजवृक्षकैः ४
पारिजातकपुष्पैश्चकदंबोदुंबरैस्तथा
नानापुष्पैःसुगंधाढ्यैर्वासितंतद्वनंगिरौ ५
सर्वाभिर्ऋषिपत्नीभिःसशिष्याभिःसुसेवितम्
केचिदभ्यासयुक्ताश्चकेचिद्व्याख्यानतत्पराः ६
केचिदूर्ध्वभुजास्तत्रअंगुष्ठाग्रैःस्थिताःपरे
शिवध्यानरताःकेचित्केचिद्विष्णुपरायणाः ७
निराहाराश्चकेप्यत्रकेचित्पर्णाशनेरताः
कंदमूलफलाहाराःकेचिन्मौनव्रताःस्थिताः ८
एकपादाःस्थिताःकेचित्केचित्पद्मासनेस्थिताः
केचिच्चैवनिराहारास्तपस्तेपुःसुदुष्करम् ९
आश्रमाणिचपुण्यानिनद्यश्चविविधाःशुभाः
देवखातान्यनेकानितडागानिबहूनिच १०
पर्वतोऽयमहाराजदृश्यतेकिलसर्वतः
मल्लिकार्जुनकोराजन्यत्रतिष्ठतिनित्यशः ११
तच्चैवशिखरंरम्यंपर्वतोपरिसेवितम्
शृंगदर्शनमात्रेणमुक्तिरेवनसंशयः १२
दक्षिणांदिशमाश्रित्यवर्त्ततेपर्वतोत्तमः
अत्रगंगामहद्रम्यापातालेतिसमाश्रिता १३
तत्रचस्नानमात्रेणमहापापैःप्रमुच्यते
श्रीशैलशिखरंदृष्ट्वावाराणस्यांमृतौध्रुवम् १४
केदारेह्युदकंपीत्वापुनर्जन्मनविद्यते
तापसानांमहत्स्थानंयोगिनांचतथैवच १५

तस्मात्सर्वप्रयत्नेनदर्शनंतस्यकारयेत्
अयंविज्ञानदेवोऽसौमहापातकनाशनः १६
सिद्धपुरंचनगरंरम्यंस्वर्गसुखावहम्
नित्यमप्सरसोयत्रगायंतिचरमंतिच १७
अतःपर्वताराजोऽयदर्शनेसौख्यकारकः
तस्यतैर्दर्शनंकार्यंमुक्तिमिच्छंतियेनराः १८
इति श्रीपाद्मेमहापुराणेपंचपंचाशतसहस्रसंहितायांउत्तरखंडे
श्रीशैलोपाख्यानेएकोनविंशोऽध्यायः१९

विंशोऽध्यायः

श्रीमहादेवउवाच-
हरिद्वारंमहापुरायंशृणुदेवर्षिसत्तम
यत्रगंगावहत्येवतत्रोक्तंतीर्थमुत्तमम् १
यत्रदेवावसंतीहऋषयोमनवस्तथा
यत्रदेवःस्वयंसाक्षात्केशवोनित्यमाश्रितः २
पुरापूर्वंतुभोवत्सतीर्थंजातंमहत्तदा
यस्यदर्शनमात्रेणदूरतोयातिपातकम् ३
यत्रगंगामहारम्याजातापुरायविशेषतः
विष्णुपादोदकीजातातच्चरणस्पर्शनात्ततः ४
भगीरथेनभोविद्वन्नानीतातत्रमार्गतः
उद्धारःपूर्वजानांतुकृतस्तेनमहात्मना ५
नारदउवाच-
कोऽयदेवसमाख्यातोभगीरथमहातपाः
येनतीर्थंसमानीतंलोकानांहितकारणात् ६
गंगातीर्थंमहत्पुरायंसर्वपापप्रणाशनम्
लोकाःसर्वेवदंत्येवमेतत्तीर्थोत्तमोत्तमम् ७
गंगागंगेतियोब्रूयाद्योजनानांशतैरपि
मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति ८
कथंतेनसमानीताकिंकार्यंवदसुव्रत
महादेवउवाच-

येनगंगायथानीतागंगाद्वारेऽतिशोभने ९
तत्सर्वंसंप्रवक्ष्यामिक्रमानुक्रमयोगतः
पूर्वमासीद्धरिश्चंद्रस्त्रैलोक्येसत्यपालकः १०
रोहितस्तस्यपुत्रोऽभूदेकोविष्णुपरायणः
तस्यापिचवृकःपुत्रोधर्मिष्ठःसत्पथिस्थितः ११
तस्यपुत्रःसुबाहुश्चजातोस्मिन्वैकुलेतदा
तस्यपुत्रोगरोनामनात्यंतंधार्मिकोऽभवत् १२
कदाचित्कालयोगेनदुःखीजातोऽत्रकारणात्
राजातुतत्रदेशेनतर्जितोधर्मकारणात् १३
स्वकुटुंबंगृहीत्वातुगतोऽसौभार्गवाश्रमे
रक्षितोभार्गवेणाथकृपयातत्रवैतदा १४
तत्रपुत्रोह्यभूत्तस्यसगरोनामवैद्विज
ववृधेचाश्रमेपुण्येभार्गवेणाभिरक्षितः १५
उपवीतादिकंसर्वंक्षत्रियस्यतदाकृतम्
शस्त्राणांचतथाभ्यासोवेदानांतुतथैवच १६
आग्नेयास्त्रंततोलब्ध्वाभार्गवात्सगरोनृपः
जघानपृथिवींगत्वातालजंघान्सहैहयान् १७
सशकान् पारदांश्चैवजघानसमहातपाः
नारदउवाच-
माहात्म्यंसगरस्याथवदशंकरविस्तरात् १८
महादेवउवाच-
सूर्यवंशीमहाराजोविख्यातःसमहाबली
गरस्यव्यसनेतातहृतंराज्यमभूत्किल १९
हैहयैस्तालजंघाद्यैःशकैःसार्द्धंचनारद
यवनाः पारदाश्चैवकांबोजाः पह्लवास्तथा २०
एतेपंचगणाब्रह्मन्हैहयार्थेपराक्रमान्
हृतराज्यस्ततोराजासगरोऽथवनंययौ २१
पत्न्याचानुगतोदुःखीसवैप्राणानवासृजत्
तस्यपत्नीतुकल्याणीसगर्भाचव्रतान्विता २२
सपत्न्याभार्गवस्तस्यवृतःपूर्वंसुतेप्सया

सातुभर्तृचितांकृत्वावनेतंप्ररुरोदह २३
ऋौर्वस्तांवारयित्वाचगरपत्नींतुनारद
न्यवेदयततत्पुत्रंधर्मिष्ठंसात्विकंप्रियम् २४
निवेदितेततोबालेमरणात्सान्यवर्त्तत
ततोमासद्वयेजातेववर्द्धौर्वस्यचाश्रमे २५
जातकर्मादियोगश्चऋौर्वेणचतथाकृतः
उपवीतादिकंसर्वंजातंतत्रमहामुनेः २६
तत्रवेदादिकंसर्वंपठितंचौर्वयोगतः
ऋध्याप्यवेदशास्त्राणिततोऽस्त्रप्रत्यपादयत् २७
ऋाग्नेयंतंमहाभागऋमरैरपिदुःसहम्
सतेनासुबलेनाजौबलेनचसमन्वितः २८
हैहयान्वैजघानाशुसंक्रुद्धःस्वबलेनच
ऋाजहारचलोकेषुसचकीर्तिमवापसः २९
ततःशकाःसयवनाःकांबोजाःपल्लवास्तथा
हन्यमानास्तदातेतुवसिष्ठंशरणंययुः ३०
वसिष्ठोऽपिचतान्कृत्वासमयेनमहाद्युतिः
सगरंवारयामासतेषांदत्त्वाऽभयंनृपः ३१
सगरःस्वांप्रतिज्ञांतुगुरोर्वाक्यंनिशम्यच
धर्मैर्जघानतांश्चैषांविकृतत्वंचकारह ३२
ऋर्द्धंशकनांशिरसोमुंडंकृत्वाविसर्जयत्
यवनानांशिरःसर्वंकांबोजानांतथैवच ३३
पारदामुंडकेशाश्चपल्ल्वाःश्मश्रुरक्षकाः
एवंविजित्यसर्वान्वैकृतवान्धर्मसंग्रहम् ३४
सर्वधर्मजयीराजाविजित्येमांवसुंधराम्
ऋाशुसंस्कारयामासवाजिमेधायपार्थिवः ३५
तस्यचारयतःसोऽश्वसमुद्रेपूर्वदक्षिणे
वेलासमीपेऽपहृतोभूमिंचैवप्रवेशितः ३६
सतंदेशंतदापुत्रैःखानयामाससर्वतः
नाश्वंप्रापुस्तदातेवैखन्यमानेमहार्णवे ३७
तत्रैकमादिपुरुषंददृशुस्तेत्वरान्विताः

तमादिपुरुषंदेवंकपिलंजगतांप्रभुम् ३८
तस्यचक्षुःसमुत्पन्नवह्निनाप्रतिबुध्यतः
दग्धाःषष्टिसहस्राणिचत्वारस्तेऽवशेषिताः ३९
हृषीकेतुःसुकेतुश्चतथाधर्मरथोपरः
शूरःपंचजनश्चैवतस्यवंशकराद्विज ४०
प्रादाच्चतस्मैभगवान्हरिःपंचवरान्स्वयम्
वंशंमोक्षंसुकीर्तिंचसमुद्रंतनयंविभुः ४१
सागरत्वंचलेभेथकर्मणातेनतस्यवै
तमाश्वमेधिकंसोऽश्वसमुद्रादुपलब्धवान्
आजहाराश्वमेधानांशतंसचमहायशाः ४२

इति श्रीपाद्मेमहापुराणेपंचपंचाशतसहस्रसंहितायां
उत्तरखण्डेविंशोऽध्यायः २०

एकविंशोऽध्याय

नारदउवाच-
सगरस्यात्मजावीराःकथंजातामहाबलाः
विक्रांताःषष्टिसाहस्राविज्ञानेश्वरतद्वद १
श्रीपार्वतीपतिरुवाच-
द्वेपत्न्यौसगरस्यास्तांतपसादग्धकिल्बिषे
और्वस्ताभ्यांवरंप्रादात्तोषितोमुनिसत्तमः २
षष्टिंपुत्रसहस्राणिएकाववव्रेतरस्विनाम्
एकावंशधरंत्वेकंयथेष्टंवरशालिनी ३
तत्रैकासुषुवेतुंब्यांपुत्रान्शूरान्बहूनथ
तेतुसर्वेऽपिधात्रीभिर्वर्द्धितास्तुयथाक्रमम् ४
घृतपूर्णेषुकुंभेषुकुमाराःप्रीतिवर्द्धनाः
कपिलानांतुदुग्धानांतेषां तत्रमहात्मनाम् ५
तेनैवदुग्धयोगेनववृधुस्तेमहात्मनः
एकःपंचजनोनामपुत्रोराजाबभूवह ६
ततःपंचजनस्यासीदंशुमान्नामवीर्यवान्
दिलीपस्तनयस्तस्यपुत्रोयस्यभगीरथः ७

यस्तुगंगासरिच्छ्रेष्ठामानयामाससुव्रतः
समुद्रमानयित्वैनांदुहितृत्वमकल्पयत् ८
नारदउवाच–
कथंगंगासमानीताकिंतपस्तेनवैकृतम्
तत्सर्वंमेसमाचद्त्वसुव्रतोऽसिदयानिधे ९
महादेवउवाच–
पूर्वजानांहितार्थायगतोऽसौहैमकेगिरौ
तत्रगत्वातपस्तप्तंवर्षाणामयुतंतदा १०
आदिदेवःप्रसन्नोऽभूद्योऽसौदेवोनिरंजनः
तेनदत्ताइयंगंगाआकाशात्समुपस्थिता ११
तत्रविश्वेश्वरोदेवोयत्रतिष्ठतिनित्यशः
गंगादृष्ट्वाऽगतांतेनगृहीताजाह्नवीतदा १२
जटाजूटेचसंधार्यवर्षाणामयुतंस्थितम्
ननिःसृतातदागंगाईशस्यैवप्रभावतः १३
विचारितंतदातेनक्वगताममातृका
सध्यानेनविचार्यैवंगृहीताचेश्वरेणतु १४
ततःकैलासमगमत्सतुभगीरथोनृपः
तत्रगत्वामुनिश्रेष्ठह्यकरोदुल्बणंतपः १५
आराधितस्तदातेनदत्तवानहमापगाम्
एकंकेशंपरित्यज्यदत्तात्रिपथगातदा १६
सगृहीत्वागतोगंगांपातालेयत्रपूर्वजाः
अलकनंदातदानामगंगायाःप्रथमंस्मृतम् १७
हरिद्वारेयदायाताविष्णुपादोदकीतदा
तदेवतीर्थंप्रवरंदेवानामपिदुर्ल्लभम् १८
तत्तीर्थेचनरःस्नात्वाहरिंदृष्ट्वाविशेषतः
प्रदत्तिणंयेकुर्वंतिनचैतेदुःखभागिनः १९
ब्रह्महत्यादिपापानांराशयःसंत्यनेकशः
विलयंयांतितेसर्वेहरेर्दर्शनतःसदा २०
एकदाकेशवस्थानेहरिद्वारेह्यहंगतः
तस्मात्तीर्थप्रभावाच्चजातोऽहविष्णुरूपवान् २१

येगच्छंतिनरश्रेष्ठास्तेवैयांतिह्यनामयम्
चतुर्भुजास्तुतेलोकाःनरानार्यश्चसर्वशः २२
वैकुंठंयांतितेसर्वेहरेर्दर्शनमात्रतः
ममाप्यधिकतीर्थंतुहरिद्वारंसुशोभनम् २३
तीर्थानांप्रवरंतीर्थंचतुर्वर्गप्रदायकम्
कलौधर्मकरंपुंसांमोक्षदंचार्थदंतथा २४
यत्रगंगामहारम्यानित्यंवहतिनिर्मला
एतत्कथानकंपुण्यंहरिद्वाराख्यमुत्तमम् २५
उक्तंचशृण्वतांपुंसांफलंभवतिशाश्वतम्
अश्वमेधेकृतेयागेगोसहस्रेतथैवच २६
तत्पुण्यंलभतेविद्वान्हरेर्दर्शनमात्रतः
गोहंताब्रह्महाचैवयेचान्येपितृघातकाः २७
एवंविधानिपापानिबहून्यपिचवैद्विज
विलयंयांतिसर्वाणिहरेर्दर्शनमात्रतः २८

इति श्रीपाद्मेमहापुराणेपंचपंचाशतसहस्रसंहितायांउत्तरखण्डेउमापतिनारद संवादेहरिद्वारमाहात्म्येगंगोत्पत्तिपूर्वकंहरिद्वारमाहात्म्यंनाम एकविंशोऽध्यायः २१

द्वाविंशोऽध्यायः

महादेवउवाच-
गांगंवक्ष्यामिमाहात्म्यंयथोक्तंमुनिसत्तम
यस्यश्रवणमात्रेणअघंनश्यतितत्क्षणात् १
गंगागंगेतियोब्रूयाद्योजनानांशतैरपि
मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति २
चरणाब्जसमुद्भूतागंगानामेतिविश्रुता
पापानांस्थूलराशीनांनाशिनीचेतिनारद ३
नर्मदासरयूश्चैवतथावेत्रवतीनदी
तापीपयोष्णीचंद्राचविपाशाकर्मनाशिनीम् ४
पुष्यापूर्णातथादीपाविदीपासूर्यतेजसा
सहस्रवृषदानात्तुयत्फलंलभतेध्रुवम् ५

तत्फलंसमवाप्नोतिगंगादर्शनतःक्षणात्
इयंगंगामहापुण्याब्रह्मघ्नानांविशेषतः ६
तेषांनिरययुक्तानांगंगापापप्रहारिणी
चंद्रसूर्योपरागेचयत्फलंविद्यतेऽनघ ७
तत्फलंसमवाप्नोतिगंगादर्शनमात्रतः
यथासूर्योदयेताततमोगच्छतिदूरतः ८
तथागंगाप्रभावेनविलयंयातिपातकम्
मान्येयंसर्वदालोकेपवित्रापापनाशिनी ९
कल्याणरूपासततंविष्णुनानिर्मितापुरा
दिव्यरूपातुजननीदीनानांपावनीस्मृता १०
देवानांचयथाविष्णुस्तथागंगोत्तमानदी
येकुर्वंतिनराःस्नानंमाघमासेनिरंतरम् ११
नतेषांविद्यतेदुःखंकल्पानांचशतत्रयम्
यत्रगंगाचयमुनायत्रचैवसरस्वती
तत्रस्नात्वाचपीत्वाचमुक्तिभागीनसंशयः १२
महादेवउवाच-
त्वद्वार्ताप्रियतोब्रवीमियदहंसास्तुस्तुतिस्तेप्रभोयद्भुंजेतवतन्निवेदनमथोयद्यामि साप्रेष्यता
यच्छांतःस्वपिमित्वदंघ्रियुगलेदंडप्रणामोऽस्तुनः
स्वामिन्यच्चकरोमितेनसभवान्विश्वेश्वरःप्रीयताम् १३
दृष्टेनवंदितेनापिस्पृष्टेनचधृतेनके
नरायेनविमुच्यंतेतदेतद्यामुनंजलम् १४
तावद्भ्रमंतिभुवनेमनुजाभवोत्थदारिद्र्यरोगमरणव्यसनाभिभूताः
यावज्जलंतवमहानदिनीलनीलंपश्यंतिनोदधतिमूर्धसुसूर्यपुत्रि १५
यत्संस्मृतिःसपदिकृंततिदुष्कृतौघंपापावलद्यंजयतियोजनलक्षतोऽपि
यन्नामनामजगदुच्चरितंपुनातिदिष्टयाहिसापथिदृशोभवितात्मगंगा १६
आलोकोत्कंठितेनप्रमुदितमनसावर्त्मयस्याःप्रयातंसद्यस्मिन्कृत्यमेतामथप्रथ मकृतीज
ज्ञिवान्स्वर्गसिंधुम्
स्नानंसंध्यानिवापःसुरयजनमपिश्राद्धविप्राशनाद्यंसर्वंसंपूर्णमेतत्भवतिभगवत

ःप्रीतिदंनातिचित्रम् १७
देवीभूतपरंब्रह्मपरमानंददायिनी
अर्घंगृहाणमेगंगेपापंहरनमोस्तुते १८
साक्षाद्धर्मद्रवौघंमुररिपुचरणांभोजपीयूषसारं
दुःखस्याब्धेस्तरित्रंसुरमनुजनुतंस्वर्गसोपानमार्गम्
सर्वांहोहारिवारिप्रवरगुणगणंभासियासंवहंतीतस्यै
भागीरथिश्रीमतिमुदितमनादेविकुर्वेनमस्ते १९
स्वःसिंधोदुरिताब्धिमग्नजनतासंतारणिप्रोल्लसत्कल्लोला
मलकांतिनाशिततमस्तोमेजगत्पावनि
गंगेदेविपुनीहिदुष्कृतभयक्रांतंकृपाभाजनंमातर्मांशरणा
गतंशरणदेरक्षाथभोभीषितम् २०
हंहोमानसकंपसेकिमुसखेत्रस्तोभयान्नारकात्किंते
भीतिरितिश्रुतिर्दुरितकृत्संजायतेनारकी
माभैषीःशृणुमेगतिंयदिमयापापाचल
स्पर्द्धिनीप्राप्तातेनिरयंकथःकिमपरंकिंमेनधर्मंधनम् २१
सर्वेशादिप्रशंसामुदमनुभवनंमज्जनंयत्रचोक्तंस्वर्नार्योवीक्ष्यहृष्टा
विबुधसुरपतिःप्राप्तिसंभावनेन
नीरेश्रीजह्नुकन्येयमनियमरताःस्नांतियेतावकीने
देवत्वंतेलभंतेस्फुटमशुभकृतोप्यत्रवेदाःप्रमाणम् २२
बुद्धेसद्बुद्धिरेवंभवतुतवसखेमानसस्वस्तितेऽस्तु
आस्तांपादौपदस्थौसततमिहयुवांसाधुदृष्टीचदृष्टी
वाणिप्राणप्रियेधिप्रकटगुणवपुःप्राप्नुहिप्राणिपुष्टिंयस्मात्सर्वैर्भवद्भिः
सुखमतुलमहंप्राप्नुवंतीर्थपुण्यम् २३
श्रीजाह्नवीरविसुतापरमेष्ठिपुत्रीसिंधुत्रयाभरणतीर्थवरप्रयाग
सर्वेशमामनुगृहाणनयस्वचोर्ध्वमंतस्तमोदशविधंदलयस्वधाम्ना २४
वागीशविष्णवीशपुरंदराद्याःपापप्रणाशायविदांविदोऽपि
भजंतियत्तीरमनीलनीलंसतीर्थराजोजयतिप्रयागः २५
कलिदजासंगमवाप्ययत्रप्रत्यग्गतास्वर्गधुनीधुनोति
अध्यात्मतापत्रितयंजनस्यसतीर्थराजोजयतिप्रयागः २६
श्यामोवटःश्यामगुणोवृणोतिस्वच्छाययाश्यामलयाजनानाम्

श्यामश्रमंकृंततियत्रदृष्टःसतीर्थराजोजयतिप्रयागः २७
ब्रह्मादयोप्यात्मकृतिंविहायभजंतिपुरायात्मकभागधेयम्
यत्रोज्झितादंडधरःस्वदंडंसतीर्थराजोजयतिप्रयागः २८
यत्सेवयादेवनृदेवतादिदेवर्षयःप्रत्यहमामनंति
स्वर्गंचसर्वोत्तमभूमिराज्यंसतीर्थराजोजयतिप्रयागः २९
एनांसिहंतीतिप्रसिद्धवार्तानामप्रतापेनदृशोभवंति
यस्यत्रिलोकींप्रततापगोभिःसतीर्थराजोजयतिप्रयागः ३०
धत्तेऽभितश्चामरचारुकांतिंसितासितेयत्रसरिद्वरेराये
ग्राद्योवटश्छत्रमिवातिभातिसतीर्थराजोजयतिप्रयागः ३१
ब्राह्मीनपुत्रीत्रिपथास्त्रिवेणीसमागमेसाद्यतयागमात्रात्
यत्राप्लुतान्ब्रह्मपदंनयंतिसतीर्थराजोजयतिप्रयागः ३२
केषांचिज्जन्मकोटिर्व्रजतिसुवचसांयामियामीतियस्मिन्केषां
चित्प्रेप्सतांयंनियतमतियतेद्वर्षवृंदंवरिष्ठम्
यत्प्राप्तंभाग्यलद्यैर्भवतिभवतिनोवासवाचामवाच्यो
दिष्ट्यावेणीविशिष्टोभवतिदृगतिथिःकंप्रयागप्रयागः ३३
लोकानामद्यमाणांमखकृतिषुकलौस्वर्गकामैर्जयस्तुत्यादिस्तोत्रैर्वचोभिः
कथममरपदप्राप्तिचिंतातुराणाम्
ग्रग्निष्टोमाश्वमेधप्रमुखमखफलंसम्यगालोच्यसांगं
ब्रह्माद्यैस्तीर्थराजोऽभिमतदउपदिष्टोऽयमेवप्रयागः ३४
मयाप्रमादातुरतादिदोषतःसंध्याविधिर्नोसमुपासितोऽभूत्
चेदत्रसंध्यांचरतेप्रसादतःसंध्यास्तुपूर्णाखिलजन्मनोऽपिमे ३५
ग्रन्यत्रापिप्रगर्जन्महिमनितपसिप्रेमभिर्विप्रकृष्टैर्ध्यातः
संकीर्तितोयोऽभिमतपदविधातानिशंनिर्व्यपेद्यम्
श्रीमत्पांशुंत्रिवेणीपरिवृढमतुलंतीर्थराजंप्रयागंगो
लंकारप्रकाशंस्वयममरवरंचेतनंतंनमामि ३६
ग्रस्माभिःसुतपोन्वतप्तकिमहोएज्यंतकिंवाध्वराः
पात्रेदानमदायिकिंबहुविधंकिंवासुराश्चार्चिताः
किंसत्तीर्थमसेविकिंद्विजकुलंपूजादिभिःसत्कृतंयेनप्रापिसदा
शिवस्यशिवदासाराजधानीस्वयम् ३७
भाग्यैर्मेऽधिगताह्यनेकजनुषांसर्वाघविध्वंसिनी

सर्वाश्चर्यमयीशिवपुरीसंसारसिंधोस्तरी
लब्धंसज्जनुषःफलंकुलमलंचक्रेपवित्रीकृतः
स्वात्माचाप्यखिलंकृतंकिमपरंसर्वोपरिष्टात्स्थितम् ३८
जीवन्नरःपश्यतिभद्रलक्षमेवंवदंतीतिमृषानयस्मात्
तस्मान्मयावैवपुषेदृशेनप्राप्तापिकाशीक्षणभंगुरेण ३९
काश्यांविधातुममरैरपिदिव्यभूमौसत्तीर्थलिंगगणनार्चनतानशक्या
यानीहगुप्तविवृतानिपुरातनानिसिद्धानियोजितकरःप्रणमामितेभ्यः ४०
किंभीत्यादुरितव्रजात्किमुमुदापुण्यैरगण्यैःकृतैः
किंविद्याभ्यसनान्मदेनजडतादोषाद्विषादेनकिम्
किंगर्वेणधनोदयादधनतातापेनकिंभोजनाः
स्नात्वाश्रीमणिकर्णिकापयसिचेद्विश्वेश्वरोदृश्यते ४१
अल्पस्फीतिनिरामयापितनुताप्रव्यक्तशक्यात्मताप्रोत्साहाढ्यबलेनकेव
लमनोरागद्वितीयेनयत्
अप्राप्यापिमनोरथैरविषयास्वप्नप्रवृत्तेरपिप्राप्तासा
पिगदाधरस्यनगरीसद्योपवर्गप्रदा ४२
मन्येनात्मकृतिर्नपूर्वपुरुषप्राप्तेर्बलंचात्रयन्नापीदंस्वजन
प्रमाणमचलंकिंस्वापतापादिकम्
यादुष्प्रापगयाप्रयागयमुनाकाशीसुपर्वागमात्प्राप्तिस्तत्र
महाफलोविजयतेश्रीशारदानुग्रहः ४३
यःश्राद्धसमयेदूरात्स्मृतोऽपिपितृमुक्तिदः
तंगयायांस्थितंसाक्षान्नमामिश्रीगदाधरम् ४४
पंथानंसमतीत्यदुस्तरमिमंदूरादवीयस्तरंक्षुद्रव्याघ्रतरक्षुकंटकफणिप्रत्यार्थिभिः
संकुलम्
आगत्यप्रथमव्ययंकृपणवाग्याचेज्जनः
कर्परीश्रीमद्वारिगदाधरप्रतिदिनंत्वांद्रष्टुमुत्कंठते ४५
सर्वात्मन्निजदर्शनेनचगयाश्राद्धेनवैदेवताः
प्रीणन्विश्वमनीहवत्कथमिहौदासीन्यमालंबसे
किंतेसर्वदनिर्दयत्वमधुनाकिंवाप्रभुत्वंकलेःकिंवासत्व
निरीक्षणंनृषुचिरंकिंवास्यसेवारुचिः ४६
गदाधरमयाश्राद्धंसंचीर्णंत्वत्प्रसादतः

अनुजानीहिमांदेवगमनायगृहंप्रति ४७
चतुर्णांदेवतानांचस्तोत्रंस्वर्गार्थदायकम्
श्राद्धकालेपठेन्नित्यंस्नानकालेतुयःपठेत् ४८
सर्वतीर्थसमंस्नानंश्रवणात्पठनाज्जपात्
प्रयागस्यचगंगायायमुनायाःस्तुतेर्द्विज
श्रवणेनविनश्यंतिदोषाश्चैवतुकर्मजाः ४९
इति श्रीपाद्मेमहापुराणेपंचपंचाशतसहस्रसंहितायांउत्तरखराडे
उमापतिनारदसंवादेगंगाप्रयागयमुनास्तुतिर्नामद्वाविंशोऽध्यायः २२

त्रयोविंशोऽध्यायः

महादेवउवाच-
शृणुनारदवक्ष्यामिमाहात्म्यंतुलसीभवम्
यच्छ्रुत्वामुच्यतेपापादाजन्ममरणांतिकात् १
पत्रंपुष्पंफलंमूलंशाखात्वक्स्कंधसंज्ञितम्
तुलसीसंभवंसर्वंपावनंमृत्तिकादिकम् २
शरीरंदह्यतेयेषांतुलसीकाष्ठवह्निना
दत्वाचतुलसीकाष्ठंसर्वांगेषुमृतस्यवै ३
पश्चाद्यःकुरुतेदाहंसोऽपिपापात्प्रमुच्यते
मरणेयस्यसंप्राप्तंकीर्तनंस्मरणंहरेः ४
तुलसीदारुणादाहोनतस्यपुनरावृतिः
यद्येकंतुलसीकाष्ठंमध्येकाष्ठशतस्यहि ५
दाहकालेभवेन्मुक्तिःकोटिपापायुतस्यच
गंगांभसाभिषेकेणयांतिपुरायानिपुरायताम् ६
तुलसीकाष्ठमिश्राणियांतिदारूणिपुरायताम्
तुलसीकाष्ठसंमिश्रायावत्प्रज्वलतेचिता ७
दह्यंतितस्यपापानिकल्पकोटिकृतानिवै
दह्यमानंनरंदृष्ट्वातुलसीकाष्ठवह्निना ८
नयंतितंविष्णुदूतानचवैयमकिंकराः
जन्मकोटिसहस्रैस्तुमुक्तोयातिजनार्दनम् ९
दह्यंतेयेनरालोकेतुलसीकाष्ठवह्निना

तान्विमानस्थितान्देवाः क्षिपंतिकुसुमांजलिम् १०
नृत्यंत्यप्सरसः सर्वागीतंगायंतिगायकाः
जायंतेवीक्ष्यतंविष्णुः संतुष्टः शंभुनासह ११
गृहीत्वातंकरेशौरिर्गृहंनीत्वास्यचांगतः
मार्जयेत्सर्वपापानिपश्यतांत्रिदिवौकसाम् १२
महोत्सवंकारयित्वाजयशब्दपुरः सरम्
ज्वलतेयत्रचाज्येनतुलसीकाष्ठपावकः १३
अग्न्यगारेश्मशानेवादह्यतेपातकंनृणाम्
होमंकुर्वंति येविप्रास्तुलसीकाष्ठवह्निना
सिक्तेसिक्तेतिलेवापिअग्निष्टोमफलंलभेत् १४
योददातिहरेर्धूपंतुलसीकाष्ठसंभवम्
शतक्रतुसमंपुण्यंलभतेगोशतंफलम् १५
नैवेद्यंपच्यतेयस्तुतुलसीकाष्ठवह्निना
मेरुतुल्यंभवेद्दत्तंतदन्नंकेशवस्यहि १६
तुलसीपावकेनाथयोदीपंकुरुतेहरेः
दीपलक्षसहस्राणांपुण्यंसलभतेफलम् १७
नतेनसदृशोलोकेवैष्णवोभुविदृश्यते
यः प्रयच्छतिकृष्णस्यतुलसीकाष्ठचंदनम् १८
सजायतेकृपापात्रंविष्णोर्वाडवसत्तम १९
तुलसीदारुजातेनचंदनेनकलौहरिम्
विलिप्यभक्तितोनित्यंरमतेहरिसन्निधौ २०
तुलसीपंकलिप्तांगः कुरुतेविष्णुपूजनम्
पूजाशतदिनैकाह्नालभ्यतेगोशतंफलम् २१
विलेपार्थेतुकृष्णस्यतुलसीकाष्ठचंदनम्
मंदिरेतिष्ठतेयावत्तावत्पुण्यफलंशृणु २२
तिलप्रस्थाष्टकंदत्वायत्पुण्यंप्राप्नुयान्नरः
तत्फलंजायतेपुंसांप्रसादाच्चक्रपाणिनः २३
योददातिपितृणांतुपिंडेतुलसिसंभवम्
दलंसंजायतेतृप्तिः पत्रेपत्रेशताब्दिका २४
तुलसीमूलमृत्स्नैवस्नानंकुर्याद्विशेषतः

तेनतीर्थेकृतंस्नानंयावद्गांगेचमृत्तिका २५
तदीययातुमंजर्यापूजनंचकरोतियः
नानापुष्पैःकृतापूजायावच्चंद्रदिवाकरौ २६
यस्मिन्गृहेऽवतिष्ठेततुलसीवृक्षवाटिका
दर्शनात्स्पर्शनाच्चैवब्रह्महत्यादिपातकम्
तत्सर्वंविलयंयातिदर्शनेनैवनारद २७
महादेवउवाच–
अथान्यत्तेप्रवक्ष्यामिशृणुष्वैकाग्रमानसः
नकस्यापिचकथितंशृणुदेवर्षिसत्तम २८
यत्रयत्रगृहेग्रामेवनेवातुलसीभवेत्
तत्रतत्रजगत्स्वामीप्रीतात्माचवसेद्धरिः २९
गृहेतस्मिन्नदारिद्र्यंनायोगोबंधुसंभवः
नदुःखंनभयंरोगस्तुलसीयत्रतिष्ठति ३०
सर्वत्रतुलसीपुणयापुणयक्षेत्रेविशेषतः
संनिधौतस्यदेवस्यरोपणात्पृथिवीतले ३१
तेषांविष्णुपदंनित्यंतुलस्यारोपणेकृते
उत्पादान्दारुणान्रोगान्दुर्निमित्तान्यनेकशः
तुलस्याभ्यर्चितेभक्त्याहंतशांतिकरोहरिः ३२
तुलसीगंधमाघ्रायत्रगच्छतिमारुतः
दिशोदशचताःपूताभूतग्रामश्चतुर्विधः ३३
यस्मिन्गृहेमुनिश्रेष्ठतुलसीमूलमृत्तिका
सर्वदातत्रतिष्ठंतिदेवताश्चशिवोहरिः ३४
तुलसीवनजाछायायत्रयत्रभवेद्द्विवज
तर्पणंकुरुतेतत्रपितॄणांदत्तमक्षयम् ३५
तस्यमूलेस्थितोब्रह्मामध्येदेवोजनार्दनः
मंजर्यांवसतेरुद्रःतुलसीतेनपावनी ३६
विनायस्तुलसींकुर्यात्संध्याकालेतुमार्जनम्
तत्सर्वंराक्षसहृतंनरकंचप्रयच्छति ३७
तुलसीपत्रगलितंतोयंयःशिरसावहेत्
गंगाफलमवाप्नोतिशतधेनुफलंलभेत् ३८

शिवालयेविशेषेणरोपयेत्तुलसींयदि
बीजसंख्यावसेत्स्वर्गेप्रत्येकंयुगसंख्यया ३९
उमयातुपुरादेविशंकरार्थंहिमालये
रोपिताःशतवृक्षास्तुतुलस्याःप्रणतोऽस्म्यहम् ४०
पर्वणयवसरेयस्तुश्रावणेचाथरोपयेत्
संक्रांतिदिवसेचैवतुलसीचातिपुण्यदा ४१
तुलसींपूजयेन्नित्यंदरिद्रईश्वरोभवेत्
सर्वसिद्धिकरामूर्तिःकृष्णःकीर्तिंददातिच ४२
शालग्रामशिलायत्रतत्रसंनिहितोहरिः
तत्रस्नानंचदानंचवाराणस्यांशताधिकम् ४३
कुरुक्षेत्रंप्रयागंचनैमिषारण्यमेवच
तस्यकोटिगुणंपुण्यंशालग्रामशिलार्चनात् ४४
शालग्राममयीमुद्रासंस्थितायत्रहिक्वचित्
वाराणस्यांचयत्पुण्यंसर्वंतत्रैवतद्भवेत् ४५
ब्रह्महत्यादिकंपापंयत्किंचित्कुरुतेनरः
तत्सर्वंनाशयेदाशुशालग्रामशिलार्चनात् ४६

इति श्रीपाद्मेमहापुराणेपंचपंचाशतसहस्रसंहितायांउत्तरखण्डे
उमापतिनारदसंवादेतुलसीशालग्राममाहात्म्यंनामत्रयोविंशोऽध्यायः २३

चतुर्विंशोऽध्यायः

महादेवउवाच–
प्रयागतीर्थमाहात्म्यंप्रवक्ष्यामियथाश्रुतम्
महादानपराःपुण्यकर्माणोयत्रसंतिहि १
यत्रगंगाचयमुनायत्रचैवसरस्वती
तंदेवतीर्थप्रवरंदेवानामपिदुर्लभम् २
ईदृशंत्रिषुलोकेषुभूतंनचभविष्यति
ग्रहाणांचयथासूर्योनक्षत्राणांयथाशशी ३
तीर्थानामुत्तमंतीर्थंप्रयागाख्यमनुत्तमम्
प्रातःकालेतुभोविद्वन्प्रयागेस्नानमाचरेत् ४
महापापाद्विनिर्मुक्तःसयातिपरमंपदम्

देयंकिंचिद्यथाशक्तिदारिद्र्याभावमिच्छता ५
योनरस्तत्रगत्वावैप्रयागेस्नानमाचरेत्
धनिकोदीर्घजीवीचजायतेनात्रसंशयः ६
यत्रवटस्याक्षयस्यदर्शनंकुरुतेनरः
तेनदर्शनमात्रेणब्रह्महत्याविनश्यति ७
सचाक्षयवटःख्यातःकल्पांतेपिचदृश्यते
शेतेविष्णुर्यस्यपत्रेअतोयमव्ययःस्मृतः ८
तत्रपूजांप्रकुर्वंतिमानवाविष्णुवल्लभाः
सूत्रेणाच्छादितंकृत्वापूजांचैवतुकारयेत् ९
माधवाख्यस्तत्रदेवःसुखंतिष्ठतिनित्यशः
तस्यवैदर्शनंकार्यंमहापापैःप्रमुच्यते १०
यत्रदेवाश्चऋषयोमनुष्याश्चापिसर्वशः
स्वस्वस्थानंसमाश्रित्यतत्रतिष्ठंतिनित्यशः ११
गोघ्नोवापिचचांडालोदुष्टोवादुष्टचेतनः
बालघातीतथाऽविद्वान्म्रियतेतत्रवैतदा १२
सवैचतुर्भुजोभूत्वावैकुंठेवसतेचिरम्
प्रयागेतुनरोयस्तुमाघस्नानंकरोतिच १३
नतस्यफलसंख्यास्तिशृणुदेवर्षिसत्तम
आपोनाराइतिप्रोक्तासर्वलोकेषुशुश्रुम १४
तेननारायणःप्रोक्तःस्नातानांभुक्तिमुक्तिदः
ग्रहाणांचयथासूर्योनक्षत्राणांयथाशशी १५
मासानांहितथामाघःश्रेष्ठःसर्वेषुकर्मसु
मकरस्थेरवौमाघेप्रातःकालेतथामले १६
गोःपदेऽपिजलेस्नानंस्वर्गदंपापिनामपि
योगोऽयदुर्लभोविद्वन्त्रैलोक्येसचराचरे १७
अस्मिन्योयत्नमापन्नःस्नायादपिदिनत्रयम्
पंचवासप्तवाप्यत्रस्नानंकुर्वन्प्रयागजम् १८
चंद्रवद्वर्द्धतेसोऽपिकुलेवाडवसत्तम
चराचराश्चयेजीवास्तथैवमनुजादयः १९
प्रयागंतीर्थमाश्रित्यवैकुंठंयांतितेऽचिरात्

येवसिष्ठादयस्तत्रऋषयःसनकादयः २०
तेऽपिप्रयागजंतीर्थंसेवंतेचपुनःपुनः
यत्रविष्णुश्चरुद्रश्चयत्रेंद्रश्चतथापुनः २१
तेऽपिसर्वेवसंतीहप्रयागेतीर्थसत्तमे
दानंतत्रप्रशंसंतिनियमांश्चतथैवच २२
तत्रस्नात्वाचपीत्वाचपुनर्जन्मनविद्यते २३
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायांउत्तरखण्डे
उमापतिनारदसंवादेप्रयागमाहात्म्येचतुर्विंशोऽध्यायः २४

पञ्चविंशोऽध्यायः

नारदउवाच–
एवंतुलस्यामाहात्म्यंत्वत्प्रसादाच्छ्रुतंमया
सांप्रतंतुसमाचक्ष्वत्रिरात्रंतुलसीव्रतम् १
सदाशिवउवाच–
शृणुविप्रमहाबुद्धेव्रतमेतत्पुरातनम्
यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः २
पुरारैभ्यंतरेकल्पेराजाह्यासीत्प्रजापतिः
तस्यभार्याचविख्याताचंद्ररूपामहासती ३
सावैव्रतमिदंचक्रेसर्वकामफलप्रदम्
त्रिरात्रंतुव्रतंतस्याधर्मकामार्थमोक्षदम् ४
सफलंजीवितंतेषांयैःश्रुतंतुलसीव्रतम्
कार्तिकेशुक्लपक्षेतुनवम्यांचैवनारद ५
नियमस्थोव्रतीतिष्ठेद्भूमिशायीजितेंद्रियः
व्रतंत्रिरात्रमुद्दिश्यशुचिःसंयतमानसः ६
स्वपेन्नियमपूर्वंतुतुलसीवनसंनिधौ
ततोमध्याह्नसमयेनद्यादौविमलेजले ७
स्नानंकृत्वापितृन्देवांस्तर्पयेद्विधिपूर्वकम्
सुवर्णंकारयेद्देवंलक्ष्म्यासहजनार्दनम् ८
वित्तशाठ्यंनकर्तव्यमात्मनःश्रेयमिच्छता
वस्त्रयुग्मंततःकार्यंपीतेशुक्लेऽपिवाससी

नवग्रहाणामारंभंशांतिकंविधिपूर्वकम् ९
श्रपयित्वाचरुंतत्रवैष्णवंहोममाचरेत्
द्वादश्यांदेवदेवेशंपूजयित्वाप्रयत्नतः १०
अव्रणंशुद्धकलशंस्थापयेद्विधिपूर्वकम्
पंचरत्नसमोपेतंपल्लवैश्चोषधीयुतम् ११
तस्योपरिन्यसेत्पात्रेलक्ष्म्यासहजनार्दनम्
स्थापयेत्तुलसीमूलेमंत्रैर्वेदपुराणकैः १२
पयसाकेवलेनैवसिंचयेत्तुलसीवनम्
पंचामृतेनसंस्नाप्यदेवदेवंजगद्गुरुम् १३
योऽनतरूपोऽखिलविश्वरूपोगर्भोदकेलोकविधिंबिभर्त्ति
प्रसीदतामेषसदेवदेवोयोमाययाविश्वकृदेषदेवी १४
प्रार्थनामंत्रः आगच्छाच्युतदेवेशतेजोराशेजगत्पते
सदैवतिमिरध्वंसीपाहिमांभवसागरात् १५
आवाहनमंत्रः पंचामृतेनसुस्नानंतथागंधोदकेनच
गंगादीनांचतोयेनस्नातोऽनतःप्रसीदतु १६
स्नानमंत्रः श्रीखंडागुरुकर्पूरंकुंकुमादिविलेपनम्
भक्त्यादत्तंमयादेवलक्ष्म्यासहगृहाणवै १७
विलेपनमंत्रः
नारायणनमस्तेऽस्तुनरकार्णवतारण
त्रैलोक्याधिपतेतुभ्यंददामिवसनेशुभे १८
वस्त्रमंत्रः
दामोदरनमस्तेस्तुत्राहिमांभवसागरात्
ब्रह्मसूत्रंमयादत्तंगृहाणपुरुषोत्तम १९
उपवीतमंत्रः
पुष्पाणिचसुगंधीनिमालत्यादीनिवैप्रभो
मयादत्तानिदेवेशप्रीतितःप्रतिगृह्यताम् २०
पुष्पमंत्रः
नैवेद्यंगृह्यतांनाथभक्ष्यभोज्यैःसमन्वितम्
सर्वैरसैःसुसंपन्नंगृहाणपरमेश्वर २१
नैवेद्यमंत्रः

पूगानिनागपत्राणिकर्पूरसहितानिच
मयादत्तानिदेवेशतांबूलंप्रतिगृह्यताम् २२
तांबूलमंत्रः
धूपंदत्वागुरुंभक्तयागुग्गुलंघृतमिश्रितम्
एवंपूजाप्रकर्त्तव्याघृतेनदीपमाचरेत् २३
विविधंमुनिशार्दूलदीपंकृत्वासमाहितः
लक्ष्मीनारायणस्याग्रेतुलसीवनसन्निधौ २४
अर्घंतत्रप्रदातव्यंदेवदेवायचक्रिणे
नवम्यांनालिकेरेणपुत्रार्थमर्घमुत्तमम् २५
दशम्यांबीजपूरंतुधर्मकामार्थसिद्धये
एकादश्यांदाडिमेनदारिद्र्यंनाशयेत्सदा २६
सप्तधान्येनसंयुक्तंवंशपात्रेणनारद
फलसप्तकसंयुक्तंपत्रंपूगसमन्वितम् २७
वस्त्रेणाच्छादितंकृत्वादेवस्याग्रेनिवेदयेत्
मंत्रेणानेनविपेंद्रशृणुष्वैकाग्रमानसः २८
तुलसीसहितोदेवसदाशंखेनसंयुतम्
गृहाणार्घंमहायादत्तंदेवदेवनमोस्तुते २९
अर्घमंत्रः –
एवंसंपूज्यदेवेशंलक्ष्म्यासहजनार्दनम्
प्रार्थयेद्देवदेवेशंव्रतसंपूर्तिसिद्धये ३०
उपोषितोऽहदेवेशकामक्रोधविवर्जितः
व्रतेनानेनदेवेशत्वमेवशरणंमम ३१
गृहीतेऽस्मिन्व्रतेदेवयदपूर्णंकृतंमया
सर्वंतदस्तुसंपूर्णंत्वत्प्रसादाज्जनार्दन ३२
नमःकमलपत्राक्षनमस्तेजलशायिने
इदंव्रतंमयाचीर्णंप्रसादात्तवकेशव ३३
अज्ञानतिमिरध्वंसिन्व्रतेनानेनकेशव
प्रसादसुमुखोभूत्वाज्ञानदृष्टिप्रदोभव ३४
ततोजागरणंरात्रौगीतपुस्तकवाचनम्
नादनृत्यकलाभिज्ञैःपुण्याख्यानैःसुभोभनैः ३५

विभातायांतुशर्वर्यामुदितेविमलेरवौ
निमंत्र्यब्राह्मणान्भक्त्याश्राद्धंकुर्याच्चवैष्णवम् ३६
भोजयित्वायथाकामंपायसेनघृतेनच
तांबूलपुष्पगंधादिदक्षिणाभिःसमन्वितम् ३७
उपवीतानिवासांसिदत्वामालांचचंदनम्
दांपत्यत्रितयंभोज्यंवस्त्रभूषणकुंकुमैः ३८
वंशपात्राणिशक्त्याचविरूढैःपरिपूरयेत्
नालिकेरैश्चपक्वान्नैर्वस्त्रैश्चविविधैःफलैः ३९
सपत्नीकंगुरुंतत्रवस्त्राणिपरिधापयेत्
विभूषणानिदिव्यानिगंधमाल्यैःप्रपूजयेत् ४०
सर्वोपस्करसंयुक्तांगांदद्याच्चपयस्विनीम्
सदक्षिणांसवस्त्रांचतन्मेनिगदतःशृणु ४१
सर्वतीर्थेषुयत्पुरयंस्नातानांजायतेनृणाम्
तत्फलंसलभेत्सर्वंदेवदेवप्रसादतः ४२
भुक्त्वाचविपुलान्भोगान्सर्वकामान्मनोरमान्
वैष्णवंपदमाप्नोतिअंतेविष्णोःप्रसादतः ४३

इति श्रीपाद्मेमहापुराणेपंचपंचशत्सहस्रसंहितायांउत्तरखराडे
उमापतिनारदसंवादेतुलसीत्रिरात्रव्रतवर्णनंनामपंचविंशोऽध्यायः २५

षड्विंशोऽध्यायः

नारदउवाच-
गुणाधिकेभ्योविप्रेभ्योदातुकामोऽपिमानवः
कानिकानिचलोकेऽस्मिन्दद्यात्सर्वंतथावद १
महादेवउवाच-
लोकेतत्वंहिसंज्ञायशृणुदेवर्षिसत्तम
अन्नमेवंप्रशंसंतिसर्वमन्नेप्रतिष्ठितम् २
तस्मादन्नंविशेषेणदातुमिच्छंतिमानवाः
अन्नेनसदृशंदानंनभूतंनभविष्यति ३
अन्नेनधार्यतेविश्वंजगत्स्थावरजंगमम्
अन्नमूर्जस्करंलोकेप्राणाह्यन्नेप्रतिष्ठिताः ४

दातव्यंभक्ष्यमेवान्नंब्राह्मणायमहात्मने
कुटुंबंपीडयित्वापिआत्मनोभूतिमिच्छता ५
नारदासौविदांश्रेष्ठोयोदद्यादन्नमर्थिने
ब्राह्मणायार्तरूपायपारलौकिकमात्मनः ६
आत्मीयभूतिमन्विच्छेत्कालेद्विजमुपस्थितम्
श्रांतमध्वनिवर्त्ततंगृहस्थंगृहमागतम् ७
अन्नदःप्राप्नुतेविद्वान्सुशीलोवीतमत्सरः
क्रोधमुत्पतितंहित्वादिविचेहचयत्सुखम् ८
नाभिनिंदेच्चअतिथिंनद्रुह्याच्चकथंचन
ब्रह्मविदेऽपयेदन्नंतच्चदानंविशिष्यते ९
श्रांतायादृष्टपूर्वायअन्नमध्वनिवर्तिने
योदद्याच्चपरिक्लिष्टंसर्वधर्ममवाप्नुयात् १०
पितृदेवांस्तथाविप्रातिथींश्चमहामुने
योनरःप्रीणयेतान्नैस्तस्यपुण्यमनंतकम् ११
कृत्वापिसुमहत्पापंयोदद्यादन्नमर्थिने
ब्राह्मणायविशेषेणसतुपापैःप्रमुच्यते १२
ब्राह्मणेष्वक्षयंदानमन्नंशूद्रेमहत्फलम्
अन्नदानंचशूद्रेचब्राह्मणेचाविशिष्यते १३
नपृच्छेद्गोत्रचरणंनचस्वाध्यायमेवच
भिक्षुकोब्राह्मणोह्यत्रदद्यादन्नंप्रयातिच १४
अन्नदस्यशुभावृक्षाःसर्वकामफलान्विताः
संभवंतीहलोकेचहर्षयुक्तास्त्रिविष्टपे १५
अन्नदानेनयेलोकास्तान्शृणुष्वमहामुने
विमानानिप्रकाशंतेदिवितेषांमहात्मनाम् १६
नानासंस्थानरूपाणिनानाकामान्वितानिच
सर्वकामफलाश्चापिवृक्षाभुवनसंस्थिताः १७
हेमवाप्यःशुभाःसर्वादीर्घिकाश्चैवसर्वशः
घोषवंतिचयानानिमुक्तान्यथसहस्रशः १८
भक्ष्यभोज्यमयाःशैलावासांस्याभरणानिच
क्षीरंस्रवंत्यःसरितस्तथैवाज्यस्यपर्वताः १९

प्रासादाःशुभ्रवर्णाभाःशय्याश्चकनकोज्वलाः
तदन्नंदातुमिच्छंतितस्मादन्नप्रदोभवेत् २०
एतेलोकाःपुगयकृतामन्नदानंमहत्फलम्
तस्मादन्नंविशेषेणदातव्यंमानवैर्भुवि २१

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायांउत्तरखगडे
उमापतिनारदसंवादेअन्नदानप्रशं
सानामषड्विंशोऽध्यायः २६

सप्तविंशोऽध्यायः

महादेवउवाच-
पानीयदानंपरमंदानानामुत्तमंसदा
तस्माद्वापीश्चकूपांश्चतडागानिचकारयेत् १
अर्द्धंपापंसंहरंतिपुरुषस्यविकर्मणः
कूपाःप्रवृत्तपानीयाःसुप्रवृत्तस्यनित्यशः २
सचतारयतेवंशंयस्यखातजलाशये
गावःपिबंतिविप्राश्चसाधवश्चनराःसदा ३
निदाघकालेपानीयंयस्यतिष्ठतिनारद
दुर्गेविषमकृच्छ्रेचनकदाचिदवाप्यते ४
तडागानांचवन्द्यामिकृतानांयेगुणाःस्मृताः
त्रिषुलोकेषुसर्वत्रपूजितोयस्तडागवान् ५
अथवामित्रसदनंमित्रमैत्रीविवर्द्धनम्
कीर्तिसंजननंश्रेष्ठंतडागस्योपलक्षयेत् ६
धर्म्यस्यार्थस्यकामस्यफलमाहुर्मनीषिणः
तडागंसुकृतंदेशेक्षेत्रमध्येमहाश्रयम् ७
चतुर्विधानांभूतानांतडागस्योपलक्षयेत्
तडागानिचसर्वाणिदिशंतिश्रेयमुत्तमम् ८
देवामनुष्यागंधर्वाःपितरोनागराक्षसाः
स्थावराणिचभूतानिसंश्रयंतिजलाशयम् ९
वर्षात्रृतौतडागेतुसलिलंयत्रतिष्ठति
अग्निहोत्रफलंतस्यजायतेनात्रसंशयः १०

हेमंतेशिशिरेचैवसलिलंयस्यतिष्ठति
गोसहस्रफलंतस्यलभतेनात्रसंशयः ११
वसंतेऽपितथाग्रीष्मेसलिलंतिष्ठतेयदि
अतिरात्राश्वमेधाभ्यांफलमाहुर्मनीषिणः १२
अथैतेषांतुवृक्षाणांरोपणेचगुणाञ्छृणु
अतीतानागतौचोभौपितृवंशौमहाऋषे १३
तारयेद्वृक्षरोपीचतस्माद्वृक्षांस्तुरोपयेत्
पुत्रपौत्राभवंत्येतेपादपानात्रसंशयः १४
परलोकंगतःसोऽपिलोकानाप्नोतिचाक्षयान्
पुष्पैःसुरगणान्सर्वान्पत्रैश्चापितथापितॄन् १५
छाययाचातिथीन्सर्वान्पूजयंतिमहीरुहाः
किन्नरोरगरक्षांसिदेवगंधर्वमानवाः १६
तथाऋषिगणाश्चैवसंश्रयंतिमहीरुहान्
पुष्पिताःफलवंतश्चतर्पयंतीहमानवान् १७
इहलोकेपरेचैवपुत्रास्तेधर्मतःस्मृताः
तडागवृक्षरोपाश्चइष्टयज्ञाश्चयेद्विजाः १८
एतेस्वर्गान्नहीयंतेयेचान्येसत्यवादिनः
सत्यमेवपरंब्रह्मसत्यमेवपरंतपः १९
सत्यमेवपरोयज्ञःसत्यमेवपरंश्रुतम्
सत्यंदेवेषुजागर्तिसत्यंचपरमंपदम् २०
तपोयज्ञाश्चपुण्यंचतथादेवर्षिपूजनम्
आद्योविधिश्चविद्याचसर्वंसत्येप्रतिष्ठितम् २१
सत्यंयज्ञस्तथादानंमंत्रादेवीसरस्वती
व्रतचर्यातथासत्यमोङ्कारःसत्यमेवच २२
सत्येनवायुरभ्येतिसत्येनतपतेरविः
सत्येनचाग्निर्दहतिस्वर्गःसत्येनतिष्ठति २३
पूजनंसर्वदेवानांसर्वतीर्थावगाहनम्
सत्यंचवदतेलोकेसर्वमाप्नोत्यसंशयः २४
अश्वमेधसहस्रंचसत्यंचतुलयाधृतम्
सर्वेषांसर्वयज्ञानांसत्यमेवविशिष्यते २५

सत्येनदेवाःप्रीयंतेपितरोऋषयस्तथा
सत्यमाहुःपरंधर्मंसत्यमाहुःपरंपदम् २६
सत्यमाहुःपरंब्रह्मतस्मात्सत्यंवदामिते
मुनयःसत्यनिरताःतपस्तप्त्वासुदुष्करम् २७
सत्यधर्मरताःसिद्धास्ततःस्वर्गमितोगताः
अप्सरोगणसंघुष्टैर्विमानैःपरितोवृताः २८
वक्तव्यंचसदासत्यंनसत्याद्विद्यतेपरम्
अगाधेविपुलेसिद्धेसत्तीर्थेचशुचौहृदि २९
स्नातव्यंमनसायुक्तैःस्नानंतत्परमंस्मृतम्
आत्मार्थेवापरार्थेवापुत्रार्थेवापिमानवाः
अनृतंयेनभाषंतेतेनराःस्वर्गगामिनः ३०
वेदायज्ञास्तथामंत्राःसंतिविप्रेषुनित्यशः
नभांत्युज्झितसत्येषुतस्मात्सत्यंसमाचरेत् ३१
नारदउवाच–
तपसांमेफलंब्रूहिपुनरेवविशेषतः
सर्वेषांचैववर्णानांब्राह्मणानांतपोबलम् ३२
प्रवक्ष्यामितपोध्यानंसर्वकामार्थसाधकम्
सुदुश्चरंद्विजातीनांतन्मेनिगदतःशृणु ३३
तपोहिपरमंप्रोक्तंतपसाविंदतेफलम्
तपोरतोहियोनित्यंमोदतेसहदैवतैः ३४
तपसाप्राप्यतेस्वर्गस्तपसाप्राप्यतेयशः
तपसामोक्षमाप्नोतितपसाविंदतेमहत् ३५
ज्ञानविज्ञानसंपत्तिःसौभाग्यंरूपमेवच
तपसालभतेसर्वंमनसायद्यदिच्छति ३६
नातप्ततपसोयांतिब्रह्मलोकंकदाचन
यत्कार्यंकिंचिदास्थायपुरुषस्तप्यतेतपः ३७
तत्सर्वंसमवाप्नोतिपरत्रेहचमानवः
सुरापःपरदारीचब्रह्महागुरुतल्पगः
तपसातरतेसर्वंसर्वतश्चविमुच्यते ३८
अपिसर्वेश्वरःस्थाणुर्विष्णुश्चैवसनातनः

ब्रह्माहुताशनःशक्रोयेचान्येतपसान्विताः ३९
षडशीतिसहस्राणिमुनीनामूर्द्ध्वरेतसाम्
तपसादिविमोदंतेसमेतादैवतैःसह ४०
तपसाप्राप्यतेराज्यंशक्रःसर्वेपुरासुराः
तपसापालयन्सर्वानहन्यहनिवृत्तिदाः ४१
सूर्याचंद्रमसौदेवौसर्वलोकहितेरतौ
तपसैवप्रकाशंतेनक्षत्राणिग्रहास्तथा ४२
सर्वंचतपसाभ्येतिसर्वंचसुखमश्नुते
तपस्तपतियोऽरण्येवनमूलफलाशनः ४३
योऽधीतेश्रुतिमेवादौसमंस्यात्तपसामुने
श्रुतेरध्यापनात्पुण्यंयदाप्नोतिद्विजोत्तमः ४४
तदध्यायस्यजप्याच्चद्विगुणंफलमश्नुते
जगद्यथानिरालोकंजायतेशशिभास्करौ ४५
विनातथापुराणंहिध्येयमस्मान्महामुने
तप्यमानस्तपोज्ञानंयोधारयतिशास्त्रतः ४६
संबोधयतिलोकंचतस्मात्पूज्यतमोगुरुः
सर्वेषांचैवपात्राणांश्रेष्ठपात्रंपुराणवित् ४७
पतनात्त्रायतेयस्मात्तस्मात्पात्रमुदाहृतम्
धनंधान्यंहिरण्यंवावासांसिविविधानिच ४८
येयच्छंतिसुपात्रायतेयांतिचपरांगतिम्
गाश्चैवमहिषीर्वापिगजानश्वांश्चशोभनान् ४९
यःप्रयच्छतिमुख्यायतत्पुण्यस्यफलंशृणु
अक्षयंसर्वलोकानांसोऽश्वमेधफलंलभेत् ५०
महींददातियस्तस्मैकृष्टांफलवतींशुभाम्
सतारयतिवैवंशान्दशपूर्वान्दशापरान् ५१
विमानेनचदिव्येनविष्णुलोकंसगच्छति
नयज्ञैस्तुष्टिमायांतिदेवाःप्रोक्षणकैरपि ५२
बलिभिःपुष्पपूजाभिर्यथापुस्तकवाचनैः
विष्णोरायतनेयस्तुकारयेद्धर्मपुस्तकम् ५३
देव्याःशंभोर्गणेशस्यअर्कस्यचतथापुनः

राजसूयाश्वमेधाभ्यांफलंप्राप्नोतिमानवः ५४
इतिहासपुराणाभ्यांपुरायंपुस्तकवाचनम्
सर्वान्कामानवाप्नोतिसूर्यलोकंभिनत्तिसः ५५
सूर्यलोकंचभित्त्वासौब्रह्मलोकंसगच्छति
स्थित्वाकल्पशतान्यत्रराजाभवतिभूतले ५६
अश्वमेधसहस्रस्ययत्फलंसमुदाहृतम्
तत्फलंसमवाप्नोतिदेवाग्रेयोजयंपठेत् ५७
तस्मात्सर्वप्रयत्नेनकार्यंपुस्तकवाचनम्
इतिहासपुराणाभ्यांविष्णोरायतनेशुभम्
नान्यत्प्रीतिकरंविष्णोस्तथान्येषांदिवौकसाम् ५८

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायांउत्तरखराडे
उमापतिनारदसंवादेवृत्तप्रपासरोवरतपोऽध्ययन
धर्मव्याख्यानमाहात्म्यंनामसप्तविंशोऽध्यायः २७

अष्टाविंशोऽध्यायः

महादेवउवाच-
अत्राप्युदाहरंतीममितिहासंपुरातनम्
पुराणंपरमंपुरायंसर्वपापहरंशुभम् १
कुमारेणचलोकानांनमस्कृत्यपितामहम्
प्रोक्तंचेदंममाख्यानंदेवर्षेब्रह्मसूनुना २
सनत्कुमारउवाच-
गतोऽहधर्मराजानंद्रष्टुंसंपूजितोमुदा
श्रुतिभिःपरयाभक्त्यातेनोक्तोऽस्मिसुखासने ३
मयातत्रोपविष्टेनदृष्टंकिंचिन्महाद्भुतम्
कांचनेनविमानेनवैडूर्यकृतवेदिना ४
मणिमुक्तविचित्रेणकिंकिणीजालशोभिना
आगतंपुरुषंतत्रआसनाद्देवसत्तम ५
ससंभ्रमंसमुत्थायदृष्ट्वाधर्मःस्वयंविभुः
गृहीत्वादक्षिणेपाणौपूजितोऽर्घेणवैततः ६
शिरस्याघ्रायदेवेशःपुरःस्थाप्यततःपरम्

पूजयित्वातुतंधर्मइदंवाक्यमुवाचह ७
सुस्वागतंधर्मदर्शिन्प्रीतोऽस्मिदर्शनात्तव
समीपेममतिष्ठस्वकिंचिज्ज्ञानंवदस्वमे ८
पुनर्यास्यसितत्स्थानंयत्रब्रह्माव्यवस्थितः
इत्युक्तेचततश्चान्योविमानवरमास्थितः ९
आगतःपुरुषोदेवोयत्रतिष्ठतिधर्मराट्
सपूजितोविमानस्थःप्रश्रयावनतेनच १०
सामपूर्वंतथोक्त्वातुयथापूर्वंनरःस्वयम्
किमनेनकृतंकर्मयस्यतुष्टोभवान्भृशम् ११
अत्रमेकौतुकंजातंकृताहिस्वयमेवतु
यदस्यभवतापूजासविस्मयमनंतरम् १२
तथैवास्यकृतापूजाद्वितीयस्यनरस्यतु
मेनेऽहशुभकर्माणौविमानंवरसत्तमौ १३
यस्त्वमाभ्यांस्वयंपूजांकुरुषेधर्मकारणात्
ब्रह्माविष्णुशिवाद्यैस्तुपूज्यसेत्वंसदानिशम् १४
यस्येदृक्परमंपुण्यंकिमेतौकर्मचक्रतुः
कथ्यतांममसर्वज्ञफलंदिव्यमवापतुः १५
तच्छ्रुत्वासतुमांप्राहशृणुकर्मानयोःकृतम्
यत्कृत्वार्हमिहायातौतच्छृणुष्वमहामते १६
धर्मउवाच-
वैदिशंनामनगरंपृथिव्यामस्तिविश्रुतम्
तत्राभूत्पृथिवीपालोधरापालइतिश्रुतः १७
कस्मिन्कालेपुरादेवीशशापस्वगणंक्रुधा
मदृतेनपरानारीभर्त्तुर्यन्मेनिवेशिता १८
तस्माद्द्वादशवर्षाणिजंबुकस्त्वंभविष्यसि
इत्युक्तःसचबभ्रामजंबुकोमेदिनीतलम् १९
वेतसीवेत्रवत्योस्तुसंगमेलोकविश्रुते
शापांतोभवितापुत्रइत्युक्तंगिरिकन्यया २०
तत्रचानशनंकृत्वाक्षेत्रेप्राणांस्ततोऽत्यजत्
दिव्यरूपवपुर्भूत्वाजगामविष्णुसन्निधौ २१

तत्राश्चर्यंमहद्दृष्ट्वाधरापालोमहीपतिः
विष्णोरायतनंकृत्वाक्षेत्रेप्राणांस्ततोऽत्यजत् २२
दिव्यरूपवपुर्भूत्वास्थापयामासतंप्रभुम्
तस्मिन्पुरेनरान्सर्वासन्नियोज्यास्यवीक्षणे २३
शुभमायतनंविष्णोस्तस्मिन्ग्रामेसदाजनैः
पूर्णंतुब्राह्मणादीनांपूजयित्वाकदंबकम् २४
इतिहासपुराणज्ञंवाचकंतुविशेषतः
पूजयित्वाद्विजश्रेष्ठंविद्याश्रेष्ठंमहामतिः २५
पुस्तकंचापिसंपूज्यगंधपुष्पादिभिःक्रमात्
ततस्तमाहराजासौवाचकंविनयान्वितः २६
एतदायतनंविष्णोःकारितंचतवाग्रतः
चातुर्वर्ण्यमिदंचापिश्रोतुकामंकदंबकम् २७
तिष्ठतीहद्विजश्रेष्ठकुरुपुस्तकवाचनम्
यावत्संवत्सरंविप्रगृह्यवृत्तिंत्वनुत्तमाम् २८
स्वर्णनिष्कशतंचात्रततोदास्येतथापरम्
पूर्णेवर्षेद्विजश्रेष्ठश्रेयोऽथमहमात्मनः २९
एवंप्रवर्तितंतत्रपुण्यंपुस्तकवाचनम्
वर्षसंगतमात्रेतुतथाचमुनिसत्तम ३०
अथायुषःक्षयाच्चायंकालधर्ममुपेयिवान्
मयाचास्यविमानंहिविष्णुनाप्रेरितंदिवः ३१
इत्येषाकर्मणांव्युष्टिःपुण्यमाख्यानसंज्ञकम्
श्रुतंपाद्मंमहत्पुण्यंपवित्रंपापनाशनम् ३२
गंधपुष्पोपहारैस्तुनतुष्टिर्जायतेतथा
देवानामिहसर्वेषांपुराणश्रवणाद्यथा ३३
स्वर्णरत्नादिवस्तूनांवस्त्राणांचापिकृत्स्नशः
ग्रामाणांनगराणांचदानात्तुष्टिर्भवेन्नहि ३४
यथास्याद्धर्मश्रवणात्प्रीतिःसर्वदिवौकसाम्
इतिहासपुराणानांश्रवणेमुनिसत्तम ३५
तथास्यान्मेमहाप्रीतिःसाध्येसर्वार्थकामिके
कन्यादानेमहाप्रीतिर्ममस्यान्मुनिसत्तम ३६

नतथारोचतेसाचयथापुस्तकवाचनात्
अथकिंबहुनोक्तेननान्यत्प्रीतिकरंमम ३७
पुण्याख्यानमृतेविप्रगुह्यमेतत्प्रकीर्तितम्
यश्चायमपरोविप्रइहायातोनरोत्तमः ३८
संगत्यानुगतश्चायंधर्मश्रवणमुत्तमम्
श्रुत्वाभक्तिरभूदस्यश्रद्धयापरमात्मनः ३९
कृत्वाप्रदक्षिणंतस्यवाचकस्यमहात्मनः
एषविप्रोमुनिश्रेष्ठददौस्वर्णस्यमाषकम् ४०
नान्यद्दानंकदाचक्रेलोभाविष्टेनचेतसा
पात्रदानात्फलप्राप्तिस्त्वस्यजातानसंशयः ४१
इत्येतत्कथितंकर्मत्राभ्यांचैवमहामुने ४२
महादेवउवाच–
एतत्पुण्यस्यमाहात्म्यंयेशृण्वंतिमनीषिणः
नतेषांदुर्गतिःकश्चिज्जन्मजन्मनिजायते ४३

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायांउत्तरखण्डे
उमापतिनारदसंवादेशास्त्रव्याख्यामहिमानामा
ष्टाविंशोऽध्यायः २८

एकोनत्रिंशोऽध्यायः

महादेवउवाच–
अथान्यत्संप्रवक्ष्यामिशृणुदेवर्षिसत्तम
गोपीचंदनमाहात्म्यंयथादृष्टंश्रुतंमया १
ब्राह्मणोवाथवैश्योवाशूद्रोवाप्यथवाद्विजः
गोपीचंदनलिप्तांगोमुच्यतेब्रह्महत्यया २
तिलकंकुरुतेयस्तुगोपीचंदनसंभवम्
मद्यपानादिदोषैस्तुमुच्यतेनात्रसंशयः ३
गोपीचंदनलिप्तांगोवैष्णवोविष्णुतत्परः
सर्वदोषैःप्रमुच्येतयथागंगांभसापुनः ४
ब्रह्महामद्यपानीचस्वर्णस्तेयीतथैवच
गुरुतल्पगमोवाथशूद्रोवाप्यथवैद्विजः ५

ससद्योमुच्यतेपापादाजन्मशतकारणात्
द्वादशतिलकंप्रोक्तंसर्वेषांवैविशेषतः ६
वैष्णवानांब्राह्मणानांकर्तव्यंभूतिमिच्छताम्
दंडाकारंललाटेस्यात्पद्माकारंतुवक्षसि ७
वेणुपत्रनिभंबाहुमूलेऽन्यद्दीपकाकृति
उच्चैश्चक्राणिचत्वारिबाहुमूलेतुदक्षिणे ८
नाममुद्राद्वयंनीचैःशंखमेकंतयोरपि
मध्येततःपार्श्वयोस्तुद्वेद्वेपद्मेचधारयेत् ९
वामऽएपिचतुरःशंखान्नाममुद्रेचपूर्ववत्
चक्रमेकंगदेद्वेद्वेतयोरितिविभेदतः १०
ललाटेचगदामेकांनाममुद्रांतथाहृदि
त्रीणित्रीणिविचित्राणिमध्येशाखावुभावुभौ ११
हृदिपार्श्वेस्तनादूर्ध्वंगदापद्मानिबाहुवत्
त्रीणिचत्वारिचक्राणिकर्णमूलेद्वयोरधः १२
एकमेकंतदन्येषुतिलकेषुचधारयेत्
संप्रदायजमुद्रांतुधार्याशिष्टानुसारतः १३
यथारुच्यथवाधार्यानतत्रनियमायतः
आचांडालाद्विशुद्ध्यंतितिलकस्यैवधारणात् १४
चांडालादधिकंमन्येवैष्णवानांहिनिंदकम्
सचविष्णुसमोज्ञेयोनात्रकार्याविचारणा १५
वैष्णवोब्राह्मणोयस्तुविष्णुध्यानेषुतत्परः
नांतरस्तस्यवैज्ञेयःसवैविष्णुर्भवेदिह १६
शंखचक्रधरोविप्रोवेदाध्ययनतत्परः
सवैनारायणइतिवेदेचैवतुपठ्यते १७
तप्तचक्रधरोविप्रःपंक्तिपावनपावनः
तस्यभक्तियुतोब्रह्मन्महापापैःप्रमुच्यते १८
तुलसीपत्रमालांवातुलसीकाष्ठसंभवाम्
धृत्वावैब्राह्मणोभूयान्मुक्तिभागीनसंशयः १९
विष्णुरूपोयतोविप्रोवैष्णवःसइहस्मृतः
पंचत्वेयस्यतिलकंगोपीचंदनसंभवम् २०

विमानंससमारुह्ययातिविष्णोःपरंपदम्
कलौनारदवद्दयामितिलकंगोपिचंदनम् २१
येकुर्वंतिनरश्रेष्ठानतेषांदुर्गतिःक्वचित्
शंखंचैवतथाचक्रंदक्षिणेचापिसव्यके २२
हस्तेधृत्वाविशेषेणमहापापैःप्रमुच्यते
मद्यपानरतायेचयेचस्त्रीबालघातकाः २३
अगम्यागमकायेवैदृश्यंतेभुविवाडव
भक्तानांदर्शनादेवमुक्तिस्तेषांनसंशयः २४
संसारेतुच्छसारेस्मिन्कुतोवैवैष्णवाजनाः
अहंहिवैष्णवोजातोविष्णोर्भक्तिप्रसादतः २५
काश्यांनिवसतांह्यत्ररामरामेतिसंजपन्
तेनपुण्यादियोगेनशिवोवैनात्रसंशयः २६

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायांउत्तरखण्डे
उमापतिनारदसंवादेगोपीचंदनमाहात्म्यं
नामैकोनत्रिंशोऽध्यायः २९

त्रिंशोऽध्यायः

नारदउवाच-
ब्रह्मन्संवत्सराख्यस्यदीपस्यविधिमुत्तमम्
सर्वव्रतप्रधानस्यमाहात्म्यंप्रवदस्वमे १
येनव्रतानिसर्वाणिकृतान्येवनसंशयः
सर्वकामसमृद्धिश्चसर्वपापक्षयोभवेत् २
महादेवउवाच -
वदामितवदेवर्षेरहस्यंपापनाशनम्
यच्छ्रुत्वाब्रह्महागोघ्नोमित्रघ्नोगुरुतल्पगः ३
विश्वासघातीक्रूरात्मामुक्तिमाप्नोतिशाश्वतीम्
शतंकुलानामुद्धृत्यविष्णोर्लोकंसगच्छति ४
तदहंकथयिष्यामिदीपव्रतमनुत्तमम्
संवत्सरप्रमाणस्यविधिंमाहात्म्यमेवच ५
हेमंतेप्रथमेमासिप्राप्यह्येकादशींशुभाम्

ब्राह्मेमुहूर्त्तेचोत्थायकामक्रोधविवर्जितः ६
नदीसंगमतीर्थेषुतडागेषुसरित्सुच
स्नानंसमाचरेत्तत्रगृहेवानियतात्मवान् ७
स्नातोऽहसर्वतीर्थेतत्स्नानंदेहिमेसदा ८
स्नानमंत्रः
देवान्पितृंश्चसंतर्प्यकृतजप्योजितेंद्रियः
ततःसंपूजयेद्देवंलक्ष्मीनारायणंप्रभुम्
पंचामृतेनसंस्नाप्यततोगंधोदकेनच ९
स्नातोऽसिलक्ष्म्यासहितोदेवदेवजगत्पते
मांसमुद्धरदेवेशघोरात्संसारबंधनात् १०
ततःसंपूजयेद्देवंलक्ष्म्यासहजनार्दनम्
मंत्रैस्तुवैदिकैर्भक्त्यातथापौराणिकैरपि ११
अतोदेवेतिगंधादिपौरुषेणापिवापुनः
नमोमत्स्यायदेवायकूर्मदेवायवैनमः १२
नमोवाराहदेवायनरसिंहायवैनमः
नमोऽस्तुबुद्धदेवायकल्किनेचनमोनमः १३
नमोऽस्तुरामदेवायविष्णुदेवायतेनमः
नमःसर्वात्मनेतुभ्यंशिरइत्यभिपूजयेत्
केशवादीनिनामानितैर्वासंपूजयेद्धरिम् १४
वनस्पतिरसोदिव्यःसुरभिर्गंधवाञ्छुचिः
धूपोऽयदेवदेवेशनमस्तेप्रतिगृह्यताम् १५
धूपमंत्रः –
दीपस्तमोनाशयतिदीपःकांतिंप्रयच्छति
तस्माद्दीपप्रदानेनप्रीयतांमेजनार्दनः १६
दीपमंत्रः –
नैवेद्यमिदमन्नाद्यंदेवदेवजगत्पते
लक्ष्म्यासहगृहाणत्वंपरमामृतमुत्तमम् १७
नैवेद्यमंत्रः –
अर्घ्यंदद्यात्ततोभक्त्याएवंध्यात्वाजनार्दनम्
फलेनचैवहस्तेनशंखेनादायचोदकम् १८

जन्मांतरसहस्त्रेणयन्मयापातकंकृतम्
तत्सर्वंनाशमायातुप्रसादात्तवकेशव १९
इतिअर्घमंत्रः -
ततःकुंभंनवंशुभ्रंघृतपूर्णंसमानयेत्
लक्ष्मीनारायणस्याग्रेतैलपूर्णमथापिवा २०
तस्योपरिन्यसेत्पात्रंताम्रंमृन्मयमेवच
नवतंतुसमांवर्तिंतस्मिन्पात्रेतुनिर्वपेत् २१
ततः प्रबोधयेद्दीपंस्थाप्यकुंभंसुनिश्चलम्
पुष्पगंधादिभिःपूज्यततःसंकल्पयेच्छुचिः २२
मंत्रेणानेनदेवर्षेअसमीरेषुधामसु
कामोभूतस्यभव्यस्यसम्राडेकोविराजते २३
दीपःसंवत्सरंयावत्मयायंपरिकल्पितः
अग्निहोत्रमविच्छिन्नंप्रीयतांममकेशव २४
ततोजितेंद्रियोभूत्वाश्रुतिज्ञानपरायणः
नालपेत्पतितान्पापांस्तथापाखण्डिनोनरान् २५
रात्रौजागरणंगीतंनृत्यवाद्यादिकैस्तथा
पुण्यपाठैश्चविविधैर्धर्माख्यानैरुपोषणैः २६
ततःप्रभातसमयेकृतपूर्वाह्णिकक्रियः
ब्राह्मणान्भोजयेद्भक्त्यायथाशक्त्याप्रपूजयेत् २७
स्वयंचपारणंकृत्वाप्रणिपत्यविसर्जयेत्
एवंसंवत्सरंयावत्अहोरात्रंदृढव्रतः २८
दीपंपलसुवर्णेनतदर्द्धार्द्धेनवापुनः
वर्तिस्तुराजतीप्रोक्ताद्विपलार्द्धार्द्धिकापिवा २९
घृतपूर्णंतथाकुंभंताम्रपात्रसमन्वितम्
लक्ष्मीनारायणोदेवोयथाशक्त्याहिरण्मयः ३०
कार्योभक्तिमतापुंसामुक्तिद्वारमभीप्सता
ततोनिमंत्रयेद्विद्वान्ब्रह्मणान्साधुसत्तमान् ३१
द्वादशोत्तमपक्षेतुविप्रान्षण्मध्यमेतथा
अन्यथाकारयेत्त्रीन्वाएकंकर्मकरंद्विजम् ३२
सपत्नीकंद्विजंशांतंक्रियावंतंविशेषतः

इतिहासपुराणज्ञंधर्मज्ञंमृदुमेवच ३३
पितृभक्तंगुरुपरंदेवब्राह्मणपूजकम्
पादार्घदानविधिनावस्त्रालंकारभूषणैः ३४
संपूज्यपत्न्यासहितमेकंभक्त्याचपूर्ववत्
लक्ष्मीनारायणंदेवंदीपवर्तियुतंतथा ३५
ताम्रपात्रोपरिस्थाप्यघृतकुंभेनसंयुतम्
ब्राह्मणायततोदद्याद्ध्यात्वानारायणंपरम्
मंत्रेणानेनदेवर्षेतमहंकथयामिते ३६
अविद्यातमसाव्याप्तेसंसारेपापनाशनः
ज्ञानप्रदोमोक्षदश्चतस्माद्दत्तोमयानघ ३७
इतिदीपमंत्रः –
दक्षिणांचयथाशक्त्यादत्त्वाविप्रायभक्तितः
भोजयेद्ब्राह्मणान्पश्चाद्घृतपायसमोदकैः ३८
वस्त्रैराच्छादयेत्पश्चात्सपत्नीकंतथाद्विजम्
शय्यांसोपस्करांदद्याद्धेनुंचैवसवत्सकाम् ३९
तेभ्यस्तुदक्षिणांदद्याद्यथावित्तानुसारतः
सुहृत्स्वजनबंधूंश्चभोजयेत्पूजयेत्तथा ४०
एवंमहोत्सवंकुर्याद्दीपव्रतसमापने
ततोविसर्जयेत्पश्चात्प्रणिपत्यक्षमापयेत् ४१
एवंकृतेतुयत्पुण्यंतथासांक्रांतिकैश्चयत्
संवत्सराख्यदीपस्यतत्फलंप्राप्यतेनरैः ४२
मासव्रतैश्चयत्पुण्यंतत्पुण्यंप्राप्यतेनरैः
संवत्सरस्यदीपस्यव्रतेनचरितेनच ४३
दानव्रतैर्यथासंख्यैर्यश्चयोगव्रतैस्तथा
तत्फलंसमवाप्नोतिदीपेसांवत्सरेकृते ४४
गोभूहिरण्यदानानिगृहादीनांविशेषतः
यत्फलंलभतेविद्वान्तत्फलंदीपदोभवेत् ४५
दीपदःकांतिमाप्नोतिदीपदोधनमक्षयम्
दीपदोज्ञानमाप्नोतिदीपदःपरमंसुखम् ४६
दीपदानाच्चसौभाग्यंविद्यामत्यंतनिर्मलाम्

आरोग्यंपरमामृद्धिंलभतेनात्रसंशयः ४७
दीपदःसुभगांभार्यांसर्वलक्षणसंयुताम्
पुत्रान्पौत्रान्प्रपौत्रांश्चसंततिंचाक्षयालभेत् ४८
ब्राह्मणःपरमंज्ञानंक्षत्रियोराज्यमुत्तमम्
वैश्योधनपशून्सर्वाञ्छूद्रःसुखमवाप्नुयात् ४९
कुमारीचापिभर्तारंसर्वलक्षणसंयुतम्
प्राप्नोतिपरमायुश्चपुत्रान्पौत्रांश्चपुष्कलान् ५०
वैधव्यंनैवयुवतीकदाचिदपिपश्यति
नवियोगमवाप्नोतिदीपदानप्रभावतः ५१
नाधयोव्याधयश्चैवजायंतेदीपदानतः
भयात्प्रमुच्यतेभीतोबद्धोमुच्येतबंधनात् ५२
ब्रह्महत्यादिभिःपापैर्दीपव्रतपरायणः
मुच्यतेनात्रसंदेहोब्रह्मणोवचनंयथा ५४
चांद्रायणानिकृच्छ्राणिचरितानिनसंशयः
येनसांवत्सरोदीपोबोधितःशाश्वतोहरेः ५५
तेधन्यास्तेमहात्मानस्तैःप्राप्तंजन्मनःफलम्
यैःसंपूज्यहरिंभक्त्यादीपःसांवत्सरःकृतः ५६
येऽपिसंवर्त्तयंतीहदीपवर्तिविलोकनाः
तेयांतिपरमंस्थानंयत्सुरैरपिदुर्लभम् ५७
येनतैलंचवर्तिंचयथाशक्त्याप्रदीपके
प्रक्षेपयंतिसततंतेयांतिपरमांगतिम् ५८
गच्छंतंदीपकंशांतिंनशक्नोतिप्रबोधितुम्
कथयत्यन्यलोकानांतेऽपितत्फलभागिनः ५९
स्तोकंस्तोकंचभिक्षित्वातैलंदीपार्थमेवच
करोतिदीपकंविष्णोःपुण्यंतेनापिलभ्यते ६०
दीपंप्रज्वाल्यमानंतुयःपश्यत्यधमोनरः
कृतांजलिपुटोविष्णोर्विष्णुलोकमवाप्नुयात् ६१
दीपप्रज्वालनेबुद्धिंयोदद्यात्कुरुतेस्वयम्
सर्वपापविनिर्मुक्तोविष्णुलोकमवाप्नुयात् ६२
अत्राप्युदाहरंतीममितिहासंपुरातनम्

यस्यश्रवणमात्रेणमुच्यतेसर्वकिल्बिषैः ६३
सरस्वत्यास्तटेरम्येसिद्धाश्रमइतिश्रुतः
तत्रोवासद्विजःपूर्वंकपिलोनामवेदवित् ६४
व्रतोपवासनिरतोदरिद्रःश्रोत्रियस्तथा
भिक्षावृत्त्याचकुरुतेकुटुंबपरिपालनम् ६५
व्रतोपवासनियमैर्विष्णुमाराधयत्यसौ
विष्णुंसंपूज्यविधिवद्दीपंबोधयतेसदा ६६
समादायचतत्तैलंस्वगृहेपूज्यकेशवम्
दीपंभक्त्याचपरयाबोधयेद्धरितुष्टये ६७
एवंप्रवर्त्तमानस्यकपिलस्यमहात्मनः
मार्जारस्तीक्ष्णदंष्ट्रस्तुमूषकान्भक्षयेत्सदा ६८
तत्रागच्छतिभक्ष्यार्थंमूषकानामहर्निशम्
कृत्वाध्यानंसभक्ष्यार्थंनित्यंनारायणाग्रतः ६९
भक्षिताबहवस्तेनमूषकाद्विजवेश्मनि
येयेतैलार्थमायांतिवर्त्यपाहरणायच ७०
तांस्तांस्तुभक्षयत्येवमूषकान्ध्यानतत्परः
एवंप्रवर्तमानस्यकदाचित्कालपर्ययात् ७१
एकादश्यांसकपिलोब्राह्मणःस्वगृहेशुचिः
सोपवासःसपत्नीकःपूजयामासचाच्युतम् ७२
ततोजागरणंचक्रेस्तुतिनृत्यपरायणः
अर्द्धरात्रेतुसंप्राप्तेनिद्रयामोहितोद्विजः ७३
मार्जारश्चागतस्तत्रतीक्ष्णदंष्ट्रोलघुक्रमः
लक्षयामासनैवेद्यंगृहकोणेस्थितःसदा ७४
अद्राक्षीन्मूषिकांक्षुद्रांतैलपानार्थमागताम्
मंदतेजसिदीपेतुवर्त्यपाहरणोचिताम् ७५
समुत्पत्यपदाक्रम्यतदासाबिलमाविशत्
तस्याःपादेनवैवर्त्यादीपःसंबोधितोभृशम् ७६
तैलपात्रंचनमितंसुप्रकाशोऽभवत्तदा
ब्राह्मणोऽपिजजागारत्यक्त्वानिद्रांविमोहिनीम् ७७
मार्जारोऽपिचतांरात्रीमजाग्रच्चाखुभक्षकः

ततःप्रभातेविमलेकृत्वानित्यक्रियांद्विजः ७८
ततश्चपारणंचक्रेविप्रोबंधुजनैःसह
एवंप्रवर्त्तमानस्यकपिलस्यमहात्मनः ७९
बभूवुःपुत्रपौत्राश्चधनधान्यमनुत्तमम्
आरोग्यंपरमामृद्धिमवापमहतींश्रियम् ८०
दीपव्रतप्रभावेनकपिलोमोक्षमागतः
संभेद्यमंडलंपुण्यंसवितुःशशिनस्तथा ८१
दीपज्योतिःस्वरूपेणपरमात्मानियुक्तवान्
मूषिकापिचकालेनममारबिलमध्यतः ८२
विमानवरमासाद्यविष्णुलोकंजगामसा
मार्जारोऽपिचकालांतेमृतःस्वर्गंजगामसः ८२
विमानवरमारुह्यदेवगंधर्वसेवितम्
अप्सरोभिःपरिवृतोविद्याधरगणैर्युतः ८३
स्तूयमानोमहातेजाजयशब्दादिमंगलैः
स्तूयमानःसवैनागैर्विष्णुलोकंजगामसः ८४
कल्पकोटिसहस्राणिकल्पकोटिशतानिच
भुक्त्वाचविपुलान्भोगान्ततोराजाभवद्भुवि ८५
सुधर्मानामधर्मात्मादेवब्राह्मणपूजकः
रूपवान्सुभगश्चैवमहाबलपराक्रमः ८६
तस्यप्रियतमाभार्यासर्वलक्षणसंयुता
भर्तृभक्तातथाशीलानाम्नासारूपसुंदरी ८७
सर्वासांचैवनारीणांमध्येसासुभगाभवत्
पुत्राश्चबहवोजातास्तथादुहितरोघनाः ८८
एवंविहरतोस्तद्दंपत्योःप्रीतिपूर्वकम्
आगतःकार्त्तिकोमासोहरिनेत्रावबोधकृत् ८९
तस्मिन्दीपाःप्रबोध्यंतेनारायणपरायणैः
कृच्छ्रचांद्रायणादीनिव्रतानिनियमास्तथा ९०
क्रियंतेविष्णुभक्तैश्चसंसारभयभीरुभिः
अथप्रबोधिनींप्राप्यराजाराज्ञीमथाब्रवीत् ९१
भद्रेप्रबोधिनीपुण्याविष्णोर्नाभिसरोरुहे

करिष्याम्यद्यपूजांचसोपवासोजितेंद्रियः ९२
स्नात्वाचपुष्करेतीर्थेपुंडरीकाक्षमच्युतम्
पूजयिष्यामिदेवेशंलक्ष्म्यासहजनार्दनम् ९३
इतिसावांछितंश्रुत्वाभर्तुःप्रियहितेरता
उवाचवचनंगुह्यंभर्त्तारंचारुहासिनी ९४
रूपसुंदर्युवाच-
ममापिहृदयेकामःसमुत्पन्नोनराधिप
रूपसौंदर्यवांछाचहृदयेममवर्त्तते ९५
पुष्करंप्रथमंतीर्थंगंतुमिच्छेत्वयासह
ततोराजातयासार्द्धमागतःपुष्करंतदा ९६
हस्त्यश्वरथवृंदैश्चसमागत्यपुरोहितैः
ततःस्नात्वातथाध्यायन्तर्पयन्पितृदेवताः ९७
पूजयामासदेवेशंपुंडरीकाक्षमच्युतम्
दीपमालाकुलेतत्रसर्वतःसुमनोहरे ९८
ददर्शलिखितंतत्रमार्जारंदेवतालये
तंदृष्ट्वाप्राकृतंकर्मजन्मस्मृत्वानृपस्तदा ९९
मुखपंकजमालोक्यप्रियायाःप्रजहासच
रूपसुंदर्युवाच-
ममसन्मुखमालोक्यभर्तःकिंस्मितकारणम् १००
कथयामासहृष्टात्माप्राक्तनंकर्मणःफलम्
राजोवाच-
अहमासंपुरादेविमार्जारोब्राह्मणालये १०१
भक्षितामूषकास्तत्रमयाशतसहस्रशः
ततोनारायणस्याग्रेदीपःसंरक्षितोयतः १०२
व्याजेनापिमयादेविप्राप्तंतत्कर्मणःफलम्
विष्णुलोकमनुप्राप्यराज्यंप्राप्तंमयाधुना १०३
रूपसुंदर्युवाच-
ममापिस्मरणंजातंप्राकृतस्यचजन्मनः
मूषिकाचाहमप्यासंक्षुद्राब्राह्मणवेश्मनि १०४
कार्तिकेचप्रबोधिन्यांमंदीभूतेचदीपके

वर्त्यग्राहरणार्थायनिर्गताहंतदाबिलात् १०५
दृष्ट्वानारायणंदेवंपूजितंकुसुमैस्तथा
निद्राभिभूतंविप्रंचवर्त्तिःकृष्टामयातदा १०६
उत्थितस्त्वंयदातत्रमांगृहीतुंकृतक्षणः
दृष्ट्वात्वंचप्रणष्टाहंप्रविष्टाबिलमध्यतः १०७
विशंत्याममपादेनदीपवर्त्तिर्विजृंभिता
तैलपात्रंचनमितंतेनाहंसुखभागिनी १०८
तन्मयाराजराजेंद्रदीपंचैवप्रकाशितम्
इदानींचमयाप्राप्तंरूपलावण्यमुत्तमम् १०९
त्वंचभर्त्तातथाराज्यंपुत्राश्चैवंविधंसुखम्
दीपप्रबोधनाज्ञातंज्ञानमत्यंतदुर्ल्लभम् ११०
तस्मात्सर्वप्रयत्नेनदीपव्रतमनुत्तमम्
आवांहिपरयाभक्त्याकुर्वश्चैवविशेषतः १११
तदेतत्कर्मणःप्राप्तंफलंराज्यादिसंपदः
पूर्वजन्मस्मृतंचापिसर्वपापक्षयस्तथा ११२
तस्मात्सर्वप्रयत्नेनविधिमंत्रादिपूर्वकम्
दीपव्रतंकृतंपुंभिःपुण्यंचंद्रार्कतारकम् ११३
इतिश्रुत्वावचोराजाचक्रेदीपव्रतंतदा
प्रिययासहदेवर्षेसम्यक्श्रद्धासमन्वितः ११४
तस्मिंस्तुपुष्करेतीर्थेकृत्वादीपव्रतंतुतौ
अवापतुःपरांमुक्तिंदेवदानवदुर्ल्लभाम् ११५
एतद्दीपस्यमाहात्म्यंयेश्रृण्वंतिनराभुवि
सर्वपापविनिर्मुक्ताःप्रयांतिहरिमंदिरम् ११६
येचकुर्वंतिपुरुषाःस्त्रियोवाभक्तितत्पराः
तेसर्वेपापनिर्मुक्तायांतिब्रह्मसनातनम् ११७
दीपव्रतमिदंविद्वन्कथितंतेविमुक्तिदम्
सर्वसौख्यप्रदंधन्यंमहाव्रतमिदंतव ११७
नेत्ररोगाविनश्यंतियथापापप्रभावजाः
आधयोव्याधयःसर्वेनश्यंतेहिकृतेक्षणात् ११८
नदारिद्र्यंनशोकंचनमोहोनचविभ्रमः

गृहेलन्दमीःसमायातिजन्मजन्मनिवाडव ११९

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायांउत्तरखराडे
उमापतिनारदसंवादेदीपव्रतमाहात्म्यं
नामत्रिंशोऽध्यायः ३०

एकत्रिंशोऽध्यायः

नारदउवाच–
देवदेवजगन्नाथभक्तानामभयप्रद
व्रतंब्रूहिमहादेवकृपांकृत्वाममोपरि १
श्रीमहादेवउवाच–
सार्वभौमःपुराह्यासीद्धरिश्चंद्रोमहीपतिः
तस्यतुष्टोऽददद्ब्रह्मापुरींकामदुघांशुभाम् २
सर्वरत्नमयींदिव्यांबालार्कसदृशप्रभाम्
तत्रस्थितोमहीपालोसप्तद्वीपांवसुंधराम् ३
पालयामासधर्मेणपितापुत्रमिवौरसम्
प्रभूतधनधान्यस्तुपुत्रदौहित्रवान्नृपः ४
सपालयन्शुभंराज्यंपरंविस्मयमागतः
नतादृशमभूत्पूर्वंराज्यंकस्यहिकर्हिचित् ५
नचेदृशंनरैरन्यैर्विमानमधिरोहितम्
कस्येहकर्मणोव्युष्टिर्येनाहंसुरराडिव ६
इतिचिंतापरोभूत्वाविमानवरमास्थितः
ददर्शपार्थिववरोमेरुंशिखरिणांवरम् ७
तत्रास्तेचमाहात्मासौद्वितीयइवभास्करः
आसीनंपर्वतवरेशैलपट्टेहिरएमये ८
सनत्कुमारंब्रह्मर्षिंज्ञानयोगपरायणम्
दृष्ट्वाह्यवातरद्राजाप्रष्टुकामोऽथविस्मयम् ९
ववंदेचरणौहृष्टस्तेनापिसचनंदितः
सुखोपविष्टस्तुनृपःपप्रच्छमुनिपुंगवम् १०
भगवन्दुर्ल्लभालोकेसंपच्चेयंयथामम
कर्मणाकेनलभ्येतकश्चाहंपूर्वजन्मनि ११

तत्त्वंकथयमेसर्वमनुग्राह्योऽस्मितेयदि
सनत्कुमारउवाच-
शृणुराजन्प्रवक्ष्यामिपूर्ववृत्तस्यकारणम् १२
येनकृत्वाविशेषेणतवचानुग्रहोऽभवत्
त्वमासीःपूर्वजनुषिसुवैश्यःसत्यवाक्शुचिः १३
स्वंकर्मतेपरित्यक्तंततस्त्यक्तस्तुबांधवैः
सत्वंवृत्तिपरिक्षीणोभार्ययानुगतस्तथा १४
निर्गतःस्वजनास्त्यक्त्वापरप्रेषणलिप्सया
नचप्रेषणदोह्यासीत्कालेदुर्भिक्षपीडितः १५
ततःकदाचिद्गहनेसरश्चोत्फुल्लपंकजम्
दृष्ट्वातत्रकृतोभावोगृह्णीवःपंकजानिवै १६
एतावदुक्त्वापुष्पाणितान्यादायपदेपदे
आस्थितौनगरींपुण्यांनाम्नावाराणसींशुभाम् १७
ततोविक्रयतःकश्चिनैवगृह्णातिपंकजम्
तन्मठान्निर्गतःकश्चित्तत्रैवप्रांगणेस्थितः १८
तत्रस्थानेप्रविशताश्रुतोवादित्रनिस्वनः
कस्मिंश्चश्रूयतेह्येषवादित्रस्यचनिस्वनः १९
इति पृष्टेतदातूर्येतेनोक्तेप्रस्थितोंतरम्
काशिराजस्तुविख्याइंद्रद्युम्नस्तुपार्थिवः २०
तस्यास्तिदुहिताख्यातानाम्नाचंद्रावतीसती
उपोषितामहाभागाजयंतीमष्टमींशुभाम् २१
तत्रागतोऽसौवैश्यस्तुयत्रतिष्ठतिसाशुभा
संतुष्टचित्तःसतदाहर्षस्तत्रागतोमहान् २२
तत्रस्थानेत्वयादृष्टोदेववैतानिकोविधिः
आदित्यसहितोयत्रपूज्यतेभगवान्हरिः २३
तद्भक्त्याचत्वयापत्न्यासहपुष्पार्चनंकृतम्
शेषैस्तुप्रकरस्तत्रकृतःपुष्पमयस्तथा २४
तंदृष्ट्वाविस्मितासाहकेनेहाभ्यर्चनंकृतम्
ज्ञात्वातत्कर्मतत्सर्वंकृतंसंरक्षणंतथा २५
ततस्तुष्टातुसातुभ्यंददौवित्तंबहुस्वयम्

त्वयावित्तंनोगृहीतंभोजनायानुमंत्रितः २६
नगृहीतंभोजनंचनचवित्तंत्वयातदा
आदित्योविष्णुसंयुक्तःपूजितोऽसौयथाविधि २७
ततःप्रभातसमयेरक्षमाणस्तयासदा
विश्रंभयित्वातान्सर्वान्निर्गतोऽसियथेच्छया २८
तदेतदन्यजनुषिसुकृतंचार्जितंत्वया
पंचत्वंचत्वयाप्राप्तंस्वीयकर्मानुयोगतः २९
तेनपुरयेनमहताविमानमागमत्तदा
तत्फलंभुज्यतेभूपपूर्वजन्मकृतंचयत् ३०
हरिश्चंद्रउवाच-
केनैवचविधानेनकस्मिन्मासेचसातिथिः
कर्त्तव्यातन्ममाचक्ष्वअनुग्राह्योऽस्मितेयदि ३१
सनत्कुमारउवाच-
शृणुष्वावहितोराजन्कथ्यमानंमयातव
श्रावणस्यतुमासस्यकृष्णाष्टम्यांनराधिप ३२
रोहिणीयदिलभ्येतजयंतीनामसातिथिः
भूयोभूयोमहाराजभवेज्जन्मनिकारणम् ३३
विधानमस्यावक्ष्यामियथोक्तंब्रह्मणामम
यत्कृत्वामुक्तपापस्तुविष्णुलोकंप्रगच्छति ३४
उपोषितस्ततःकृत्वास्नानंकृष्णतिलैःसह
स्थापयेदव्रणंकुंभंपंचरत्नसमन्वितम् ३५
वज्रमौक्तिकवैडूर्यपुष्परागेंद्रनीलकम्
पंचरत्नंप्रशस्तंतुइतिकात्यायनोऽब्रवीत् ३६
तस्योपरिन्यसेत्पात्रंसौवर्णंलक्षणान्वितम्
सौवर्णांविन्यसेत्तत्रयशोदांनंदगेहिनीम् ३७
ददमानांतुपुत्रस्यस्तनंवैविस्मिताननाम्
पिबमानंस्तनंमातुरपरंपाणिनास्पृशत् ३८
आलोक्यमातरंप्रेम्णासुखयंतंमुहुर्मुहुः
सौवर्णंकारयेद्देवंयावच्छक्तिश्चविद्यते ३९
द्विनिष्कमात्रंकर्तव्यंयदिशक्तिश्चविद्यते

त्रिलोहेनैवकर्तव्यंसौवर्णेनाथवापुनः ४०
तद्वच्चरोहिणींकुर्यात्सौवर्णीराजतःशशी
अंगुष्ठमात्रस्तुशशीरोहिणीचतुरंगुला ४१
कर्णयोःकुंडलेदद्यात्कंठाभरणकंगले
एवंकृत्वातुगोविंदंमात्रासार्द्धंजगत्पतिम् ४२
क्षीरादिस्नपनंकृत्वाचंदनेनानुलेपयेत्
श्वेतवस्त्रयुगच्छत्रंपुष्पमालोपशोभितम् ४३
नैवेद्यैर्विविधैर्भक्ष्यैःफलैर्नानाविधैरपि
दीपंचकारयेत्तत्रपुष्पमंडपशोभितम् ४४
गीतंनृत्यंचवाद्यंचकारयेद्भक्तिमान्बुधैः
एवंकृत्वाविधानंतुयथाविभवसारतः
गुरुं संपूजयेत् पश्चात्पूजांतत्रसमापयेत् ४५

इति श्रीपाद्मेमहापुराणेपंचपचाशत्सहस्रसंहितायांउत्तरखण्डेउमापति-
नारदसंवादेजन्माष्टमीव्रतंनामएकत्रिंशोऽध्यायः ३१

द्वात्रिंशोऽध्यायः

महादेवउवाच-
दृष्ट्वाशतक्रतुंसिद्धंसमाप्तवरदक्षिणम्
मघवाजातसंकल्पःपर्यपृच्छद्बृहस्पतिम् १
भगवन्केनदानेनसर्वतःसुखमेधते
यदक्षयंमहार्घंचतन्मेब्रूहिमहातपः २
एवमिंद्रेणचोक्तोऽसौदेवदेवःपुरोहितः
प्रहस्यतंमहाप्राज्ञोबृहस्पतिरुवाचह ३
हिरण्यदानंगोदानंभूमिदानंचवासव
एतत्प्रयच्छमानस्तुसर्वपापैःप्रमुच्यते ४
सुवर्णंरजतंवस्त्रंमणिरत्नंचवासव
सर्वमेवभवेद्दत्तंवसुधांयःप्रयच्छति ५
फालकृष्टांमहींदत्वासबीजांसस्यमालिनीम्
यावत्सूर्यकृतालोकस्तावत्स्वर्गेमहीयते ६
यत्किंचित्कुरुतेपापंपुरुषोवृत्तिकर्षितः

अपिगोचर्ममात्रेणभूमिदानेनशुध्यति ७
दशहस्तेनदंडोऽत्रत्रिंशद्दंडानिवर्तनम्
दशतान्येवगोचर्म्मब्रह्मगोचर्मलक्षणम् ८
सवृषंगोसहस्रंतुयत्रतिष्ठत्ययंत्रितम्
बालवत्सप्रसूतानांतद्गोचर्मइतिस्मृतम् ९
विप्रायदद्याच्चगुणान्वितायतपोयुतायप्रजितेंद्रियाय
यावन्महीतिष्ठतिसागरांतातावत्फलंतस्यभवेदनंतम् १०
यथाप्सुपतितःशक्रतैलबिंदुःप्रसर्पति
एवंभूमिकृतंदानंसस्येसस्येप्रसर्पति ११
यथाबीजानिरोहंतिप्रचीर्णानिमहीतले
एवंकामान्प्ररोहंतिभूमिदानसमन्विताः १२
अन्नदाःसुखिनोनित्यंवस्त्रदोरूपवान्भवेत्
सनरःसर्वदोभूयोयोददातिवसुंधराम् १३
यथागौर्भरतेवत्संक्षीरमुत्सृज्यक्षीरिणी
एवंदत्तासहस्राक्षभूमिर्भरतिभूमिदम् १४
शंखोभद्रासनंछत्रंवराश्ववरवारणाः
भूमिदानस्यपुरायस्यफलंस्वर्गःपुरंदर १५
आदित्योवरुणोवह्निर्ब्रह्मासोमोहुताशनः
शूलपाणिश्चभगवानभिनंदंतिभूमिदम् १६
आस्फोटयंतिपितरोवर्णयंतिपितामहाः
भूमिदाताकुलेजातःसनस्त्राताभविष्यति १७
त्रीरयाहुरतिदानानिगावःपृथ्वीसरस्वती
नरकादुद्धरंत्येतेजपवापनदोहनात् १८
दुर्गतिंतारयंत्येतेविद्वद्भिर्विप्रधारणैः
प्रावृतावस्त्रदायांतिनग्नायान्तित्ववस्त्रदाः १९
तृप्तायांत्यन्नदातारःक्षुधितायांत्यनन्नदाः
कांक्षंतिपितरःसर्वेनरकाद्भयभीरवः २०
गयांयास्यतियःपुत्रःसनस्त्राताभविष्यति
एष्टव्याबहवःपुत्रायद्येकोऽपिगयांव्रजेत् २१
यजेतवाश्वमेधेननीलंवावृषमुत्सृजेत्

लोहितोयस्तुवर्णेनपुच्छाग्रेयस्तुपांडुरः २२
श्वेतःखुरविषाणाभ्यांसनीलोवृषउच्यते
नीलःपांडुरलांगूलस्तोयमुद्धरतेतुयः २३
षष्टिंवर्षसहस्राणिपितरस्तेनतर्पिताः
यच्चशृंगगतंपंकंकुलंतिष्ठतिचोद्धृतम् २४
पितरस्तस्यचाश्नंतिसोमलोकंमहाद्युतिम्
आसीद्राज्ञोदिलीपस्यनृगस्यनहुषस्यच २५
अन्येषांतुनरेंद्राणांपुनरन्योनगच्छति
बहुभिर्वसुधादत्ताराजभिःसगरादिभिः २६
यस्ययस्ययदाभूमिस्तस्यतस्यतदाफलम्
ब्रह्मघ्नोवाथस्त्रीहंताबालघ्नःपतितोऽथवा २७
गवांशतसहस्राणिहंतातत्तस्यदुःष्कृतम्
स्वदत्तांपरदत्तांवायोहरेत्तुवसुंधराम् २८
सचविष्ठाकृमिर्भूत्वापितृभिःसहपच्यते
षष्टिवर्षसहस्राणिस्वर्गेतिष्ठतिभूमिदः २९
प्रहर्ताचानुमंता च तावद्वैनरकंव्रजेत्
भूमिदाद्भूमिहर्तुश्चनापरःपुण्यपापवान् ३०
उद्धर्वाधस्तौचतिष्ठेतेयावदाभूतसंप्लवम् ३१
अग्नेरपत्यंप्रथमंसुवर्णंभूर्वैष्णवीसूर्यसुतास्तुगावः
तेषांमनंतंफलमश्नुवीतयःकांचनंगांचमहींचदद्यात् ३२
भूमिंयःप्रतिगृह्णातियश्चभूमिंप्रयच्छति
उभौतौपुण्यकर्माणौनियतौस्वर्गगामिनौ ३३
अन्यायेनहृताभूमिर्यैर्नरैरपहारिता
हरंतोहारयंतश्चहन्युस्तेसप्तमंकुलम् ३४
हरेद्धारयतेयस्तुमंदबुद्धिस्तमोवृतः
सबद्धोवारुणैःपाशैस्तिर्यग्योनिषुजायते ३५
अश्रुभिःपतितैस्तेषांदानानामवकीर्त्तनम्
ब्राह्मणस्य हृते क्षेत्रे हतंत्रिपुरुषं कुलम् ३६
वापीकूपसहस्रेणअश्वमेधशतेनच
गवांकोटिप्रदानेनभूमिहर्तानशुद्ध्यति ३७

कृतंदत्तंतपोऽधीतंयत्किंचिद्धर्मसंस्थितम्
अर्द्धांगुलस्यसीमायाहरणेनप्रणश्यति ३८
गोतीर्थंग्रामरथ्यांचश्मशानग्राममेवच
संपीडयनरकंयातियावदाभूतसंप्लवम् ३९
पंचकन्यानृतेहंतिदशहंतिगवानृते
शतमश्वानृतेहंतिसहस्रंपुरुषानृते ४०
हंतिजातानजातांश्चहिरण्यार्थेऽनृतंवदन्
सर्वंभूम्यनृतेहंतिमास्मभूम्यनृतंवद ४१
ब्रह्मस्वेनोरतिंकुर्यात्प्राणैःकंठगतैरपि
अग्निदग्धाःप्ररोहंतिब्रह्मदग्धोनरोहति ४२
अग्निदग्धाःप्ररोहंतिसूर्यदग्धास्तथैवच
राजदंडहताश्चैवब्रह्मशापहताहताः ४३
ब्रह्मस्वेनचपुष्टानिअंगानिचमुहुर्महुः
कार्यकालेविशीर्यंतेसिकताभितपोयथा ४४
ब्रह्मस्वहरणंकुर्वन्नरोयातीहरौरवम्
नविषंविषमित्याहुर्ब्रह्मस्वंविषमुच्यते ४५
विषमेकाकिनंहंतिब्रह्मस्वंपुत्रपौत्रिकम्
लोहचूर्णंचाश्मचूर्णंविषंसंजरयेन्नरः ४६
ब्रह्मस्वंत्रिषुलोकेषुकःपुमान्जरयिष्यति
ब्रह्मस्वेनतुयत्सौख्यंदेवस्वेनतुयारतिः ४७
तद्धनंकुलनाशायभवत्यात्मविनाशनम्
ब्रह्मस्वंब्रह्महत्याचदरिद्रस्यतुयद्धनम् ४८
गुरुमित्रहिरण्यंचस्वर्गस्थमपिपीडयेत्
श्रोत्रियायकुलीनायदरिद्रायचवासव ४९
संतुष्टायविनीतायसर्वस्वसहितायच
वेदाभ्यासतपोज्ञानेंद्रियसंयमशालिने ५०
ईदृशायसुरश्रेष्ठयद्दत्तंहितदक्षयम्
आमपात्रेयथान्यस्तंक्षीरंदधिघृतंमधु ५१
भिनत्तिपात्रंदौर्बल्यान्नचपात्रंविनश्यति
एवंगांचहिरण्यंचवस्त्रमन्नंमहीतिलान् ५२

अविद्वान्प्रतिगृह्णातिभस्मीभवतिकाष्ठवत्
यस्तडागंनवंकुर्यात्पुराणंवापिखानयेत् ५३
सर्वंकुलंसमुद्धृत्यस्वर्गलोकेमहीयते
वापीकूपतडागानिउद्यानप्रभवानिच ५४
पुनर्नीतानिसंस्कारंददतेमौक्तिकंफलम्
निदाघकालेपानीययस्यतिष्ठतिवासव ५५
सदुर्गंविषमंकृच्छ्रंनकदाचिदवाप्नुयात्
एकाहंतुस्थितंतोयंपृथिव्यांदेवसत्तम ५६
कुलानितारयेत्तस्यसप्तसप्तपरानपि
दीपालोकप्रदानेनवपुष्मान्सभवेन्नरः ५७
दक्षिणायाःप्रदानेनस्मृतिंमेधांचविंदति
कृत्वापिपातकंकर्मयोदद्यादनुसंधिने ५८
ब्राह्मणायविशेषेणनसपापैर्हिलिप्यते
भूमेर्गावस्तथादासःप्रसह्यप्रहृतायदा ५९
ननिवेदयतेयस्तुतमाहुर्ब्रह्मघातकम्
उपस्थितेविवाहेचयज्ञेदानेचवासव ६०
मोहाच्चरतिविघ्नंयःसमृतोजायतेकृमिः
धनंफलतिदानेनजीवितंजीवरक्षणात् ६१
रूपमैस्वर्यमारोग्यमहिंसाफलमश्नुते
फलमूलाशनात्पूजांस्वर्गःसत्येनलभ्यते ६२
प्रायोपवेशनाद्राज्यंसर्वत्रसुखमश्नुते
सुखाढ्यःशक्रदीक्षायांसुगामीचतृणाशनः ६३
रूपीत्रिषवणस्नायीवायुंपीत्वाक्रतुंलभेत्
नित्यस्नायीभवेद्दक्षःसंध्यावेदजपान्वितः ६४
अहिंस्त्रोयातिवैराज्यंनाकपृष्ठमनाशकम्
अग्निप्रवेशीनियतंब्रह्मलोकेमहीयते ६५
रसानांप्रतिसंहारेपशून्पुत्रांश्चविंदति
नाकेचिरंसवसतिउपवासीचयोभवेत् ६६
सततंभूमिशायीयःसलभेदीप्सितांगतिम्
वीरासनंवीरशयंवीरस्थानमुपासतः ६७

अक्षयास्तस्यलोकाःस्युःसर्वकामगमास्तथा
उपवासंचदीक्षांचअभिषेकंचवासव ६८
कृत्वाद्वादशवर्षाणिवीरस्थानाद्विशिष्यते
पावनंचरतेधर्मंस्वर्गलोकेमहीयते ६९
बृहस्पतिमतंपुण्यंयेपठंतिद्विजोत्तमाः
तेषांचत्वारिवर्द्धंतेआयुर्विद्यायशोबलम् ७०
नारदउवाच–
इतींद्रायबृहस्पतिप्रणीतंधर्मशास्त्रकम्
मह्यंभक्तायसंप्रोक्तंमहेशेनाखिलंनृप ७१
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायांउत्तरखगडे
उमापतिनारदसंवादेधर्मकथनेद्वात्रिंशोऽध्यायः
३२

त्रयस्त्रिंशोऽध्यायः

नारदउवाच–
शनिपीडाकथंयातितन्मेवदसुरोत्तम
त्वन्मुखाच्छ्रुयतेयद्वैतेनजंतुःप्रमुच्यते १
महादेवउवाच–
देवर्षेशृणुवृत्तांतंतेनमुच्येतबंधनात्
ग्रहाणांग्रहराजोऽयसौरिःसर्वमहेश्वरः २
अयंतुदेवोविख्यातःकालरूपीमहाग्रहः
जटिलोवज्ररोमाचदानवानांभयंकरः ३
तस्याख्यानंचलोकेऽस्मिन्प्रथितंनास्तिवैप्रभो
मयागुप्तंविशेषेणनोक्तंहिकस्यचित्कदा ४
रघुवंशेऽतिविख्यातोराजादशरथःपुरा
चक्रवर्तीमहावीरःसप्तद्वीपाधिपोऽभवत् ५
कृत्तिकांतेशनिंज्ञात्वादैवज्ञैर्ज्ञापितोहिसः
रोहिणींभेदयित्वाचशनिर्यास्यतिसांप्रतम् ६
शाकटंभेदमत्युग्रंसुरासुरभयंकरम्
द्वादशाब्दंतुदुर्भिक्षंभविष्यतिसुदारुणम् ७

एतच्छ्रुत्वाततोवाक्यंमंत्रिभिःसहपार्थिवः
मंत्रयामासकिमिदंभयंकरमुपस्थितम् ८
आकुलंचजगद्दृष्ट्वापौरजानपदादिकम्
ब्रुवंतिसर्वतोलोकाःक्षयएषसमागतः ९
देशाःसनगराग्रामाभयभीताःसमंततः
पप्रच्छप्रयतोराजावसिष्ठप्रमुखान्द्विजान् १०
संविधानंकिमत्रास्तिब्रूतमांहिद्विजोत्तमाः ११
वसिष्ठउवाच-
प्राजापत्यमृक्षमिदंतस्मिन्भिन्नेकुतःप्रजाः
अयंयोगोह्यसाध्यस्तुब्रह्मशक्रादिभिस्तथा १२
इतिसंचिंत्यमनसासाहसंपरमंमहत्
समादायधनुर्दिव्यंदिव्यायुधसमन्वितम् १३
रथमारुह्यवेगेनगतोनक्षत्रमंडलम्
सपादंयोजनंलक्षंसूर्यस्योपरिसंस्थितम् १४
रोहिणीपृष्ठमास्थायराजादशरथःपुरा
रथेतुकांचनेदिव्येमणिरत्नविभूषिते १५
हंसवर्णहयैर्युक्तेमहाकेतुसमुच्छ्रये
दीप्यमानोमहारत्नैःकिरीटमुकुटोज्ज्वलः १६
बभ्राजसतदाकाशेद्वितीयइवभास्करः
आकर्णपूर्णचापेतुसंहारास्त्रंन्ययोजयत् १७
संहारास्त्रंशनिर्दृष्ट्वासुरासुरभयंकरम्
हसित्वातद्भयात्सौरिरिदंवचनमब्रवीत् १८
शनिरुवाच -
पौरुषंतवराजेंद्रपरंरिपुभयंकरम्
देवासुरमनुष्याश्चसिद्धिविद्याधरोरगाः १९
मयाविलोकिताराजन्भस्मसाच्चभवंतिते
तुष्टोऽहतवराजेंद्रतपसापौरुषेणच
वरंब्रूहिप्रदास्यामिमनसायत्किमिच्छसि २०
दशरथउवाच-
रोहिणींभेदयित्वातुनगंतव्यंकदाचन

सरितःसागरायावत्यावच्चंद्रार्कमेदिनी २१
याचितंतुमयासौरेनान्यमिच्छामितेवरम्
एवमस्तुशनिःप्राहवरंदत्त्वातुशाश्वतम् २२
पुनरेवाब्रवीत्तुष्टोवरंवरयसुव्रत
प्रार्थयामासहृष्टात्मावरमन्यंशनेस्तदा २३
नभेत्तव्यंहिशकटंत्वयाभास्करनंदन

द्वादशाब्दंतुदुर्भिक्षंनकर्तव्यंकदाचन २४
शनिरुवाच–
द्वादशाब्दंतुदुर्भिक्षंनकदाचिद्भविष्यति
कीर्तिरेषात्वदीयाचत्रैलोक्येविचरिष्यति २५
वरद्वयंतुसंप्राप्यहृष्टरोमाचपार्थिवः
रथोपरिधनुर्मुक्त्वाभूत्वाचैवकृताञ्जलि २६
ध्यात्वासरस्वतींदेवींगणनाथंविनायकम्
राजादशरथःस्तोत्रंसौरेरिदमथाब्रवीत् २७
दशरथउवाच–
नमःकृष्णायनीलायशितिकंठनिभायच
नमःकालाग्निरूपायकृतांतायचवैनमः २८
नमोनिर्मांसदेहायदीर्घश्मश्रुजटायच
नमोविशालनेत्रायशुष्कोदरभयाकृते २९
नमःपुष्कलगात्रायस्थूलरोम्णेऽथवैनमः
नमोदीर्घायशुष्कायकालदंष्ट्रनमोस्तुते ३०
नमस्तेकोटराक्षायदुर्निरीक्ष्यायवैनमः
नमोघोरायरौद्रायभीषणायकपालिने ३१
नमस्तेसर्वभक्षायवलीमुखनमोस्तुते
सूर्यपुत्रनमस्तेस्तुभास्करेभयदायच ३२
अधोदृष्टेनमस्तेस्तुसंवर्तकनमोस्तुते
नमोमंदगतेतुभ्यंनिस्त्रिंशायनमोस्तुते ३३
तपसादग्धदेहायनित्यंयोगरतायच
नमोनित्यंक्षुधार्तायअतृप्तायचवैनमः ३४

ज्ञानचक्षुर्नमस्तेस्तुकश्यपात्मजसूनवे
तुष्टोददासिवैराज्यंरुष्टोहरसितत्क्षणात् ३५
देवासुरमनुष्याश्चसिद्धविद्याधरोरगाः
त्वयाविलोकिताःसर्वेनाशंयांतिसमूलतः ३६
प्रसादंकुरुमेदेववरार्होऽहमुपागतः
एवंस्तुतस्तदासौरिर्ग्रहराजोमहाबलः ३७
अब्रवीच्चपुनर्वाक्यंहृष्टरोमातुभास्करिः
तुष्टोऽहतवराजेंद्रस्तवेनानेनसुव्रत
वरंब्रूहिप्रदास्यामिस्वेच्छयारघुनंदन ३८
दशरथउवाच-
अद्यप्रभृतितेसौरेपीडाकार्यानकस्यचित्
देवासुरमनुष्याणांपशुपक्षिसरीसृपाम् ३९
शनिरुवाच-
गृह्णंतीतिग्रहाःसर्वेग्रहाःपीडाकराःस्मृताः
अदेयंयाचितंराजन्किंचिद्युक्तंवदाम्यहम् ४०
त्वयाप्रोक्तमिदंस्तोत्रंयःपठिष्यतिमानवः
एककालंद्विकालंवापीडामुक्तोभवेत्क्षणात् ४१
देवासुरमनुष्याणांसिद्धविद्याध्ररक्षसाम्
मृत्युंमृत्युगतोदद्यांजन्मन्यंतेचतुर्थके ४२
यःपुनःश्रद्धयायुक्तःशुचिर्भूत्वासमाहितः
शमीपत्रैःसमभ्यर्च्यप्रतिमांलोहजांमम ४३
माषौदनतिलैर्मिश्रंदद्याल्लोहंचदक्षिणाम्
कृष्णांगांवृषभंवापियोवैदद्याद्द्विजातये ४४
मद्दिनेतुविशेषेणस्तोत्रेणानेनपूजयेत्
पूजयित्वाजपेत्स्तोत्रंभूत्वाचैवकृतांजलि ४५
तस्यपीडानचैवाहंकरिष्यामिकदाचन
गोचरेजन्मलग्नेवादशास्वंतर्दशासुच ४६
रक्षामिसततंतस्यपीडांचापिग्रहस्यच
अनेनैवविधानेनपीडामुक्तंजगद्भवेत् ४७
एवंयुक्त्यामयादत्तोवरस्तेरघुनंदन

वरत्रयंतुसंप्राप्यराजादशरथस्तदा ४८
मेनेकृतार्थमात्मानंनमस्कृत्यशनैश्चरम्
शनिनाचाभ्यनुज्ञातोरथमारुह्यवेगवान् ४९
स्वस्थानंगतवान्राजाप्राप्तःश्रेयोऽभवत्तदा
यइदंप्रातरुत्थायशनिवारेस्तवंपठेत् ५०
पठ्यमानमिदंस्तोत्रंश्रद्धयायःशृणोतिच
नरःसमुच्यतेपापात्स्वर्गलोकेमहीयते ५१

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायांउत्तरखराडे-
उमापतिनारदसंवादेदशरथकृतशनिस्तोत्रंनाम
त्रयस्त्रिंशोऽध्यायः ३३

चतुस्त्रिंशोऽधयायः

नारदउवाच-
त्रिस्पृशाख्यंव्रतंब्रूहिसर्वेश्वरविशेषतः
यच्छ्रुत्वामुच्यतेलोकःकर्मबंधनतःक्षणात् १
महादेवउवाच-
सर्वपापौघशमनंमहादुःखविनाशनम्
शृणुकृष्णावतारंत्वंत्रिस्पृशाख्यंमहाव्रतम् २
कामदंसस्पृहाणांतुनिस्पृहाणांतुमोक्षदम्
त्रिस्पृशाख्यंव्रतंविप्रशृणुष्वगदतोमम ३
प्रत्यक्षमर्चितस्तेनकलिकालेचकेशवः
त्रिस्पृशाकीर्तनंनित्यंयःकरोतिमहामुने ४
नपुरश्चरणेचीर्णेसर्वपापक्षयोभवेत्
त्रिस्पृशानाममात्रेणक्षीयतेनात्रसंशयः ५
नागमैर्नपुराणाद्यैर्नमखैस्तीर्थकोटिभिः
बहुभिर्व्रतसंघैश्चपूजितैस्त्रिदशैरपि ६
मोक्षोभवतिविप्रेन्द्रत्रिस्पृशानकृतायदि
मोक्षार्थेदेवदेवेनदृष्टावैवैष्णवीतिथिः ७
द्विजानांदुर्विदंसांख्यंकलिकालेविशेषतः
अनिग्रहश्चेंद्रियाणांस्थिरत्वंमनसोनहि ८

विषयैर्विप्रयुक्तानांध्यानधारणवर्जिनाम्
कामभोगप्रसक्तानांत्रिस्पृशामोक्षदायिनी ९
मह्यंचैवपुराप्रोक्ताचतुर्वक्त्रस्यसागरे
क्षीरोदेप्रणतानांतुमत्स्यरूपेणचक्रिणा १०
त्रिस्पृशांयेकरिष्यंतिविषयैरपिसंयुताः
तेषामपिमयादत्तोमोक्षःसांख्यविवर्जिनाम् ११
कामभोगप्रसक्तानांत्रिस्पृशामोक्षदायिनी
बहुभिर्मुनिसंघैश्चकृतेयंचमहामुने १२
कार्त्तिकेशुक्लपक्षेतुत्रिस्पृशाजायतेयदि
सोमेनसोमजेनापिपापकोटिविनाशिनी १३
यस्याउपोषणकृतोहत्यायुक्तमहेशितुः
हस्ताद्ब्रह्मकपालंतुतत्क्षणात्पतितंभुवि १४
कलिकल्मषकोटयौघैर्मुक्तादेवीत्रिमार्गगा
उपदेशान्माधवस्यत्रिस्पृशासमुपोषणात् १५
हत्याष्टौबाहुवीर्यस्यपूर्वजातामहामुने
गताभृगूपदेशेनत्रिस्पृशासमुपोषणात् १६
शतायुधेनविप्रेंद्रनिहतोब्राह्मणोवने
ब्रह्महत्याविनिर्मुक्तःत्रिस्पृशासमुपोषणात् १७
जीवोपदेशाच्छक्रस्यहत्यानमुचिसंभवा
विनष्टामुनिमुख्येन्द्रत्रिस्पृशासमुपोषणात् १८
ब्रह्महत्यादिपापानित्रिस्पृशासमुपोषणात्
विलयंयातिविप्रेंद्रपापेष्वन्येषुकाकथा १९
नप्रयागेनकाश्यांतुगोमत्यांकृष्णसंनिधौ
मोक्षोभवतिविप्रेंद्रत्रिस्पृशायदिनोकृता २०
मरणाच्चप्रयागेतुगोमत्यांकृष्णसन्निधौ
स्नानमात्रेणगोमत्यांमुक्तिर्भवतिशाश्वती २१
गृहेपिजायतेमुक्तिस्त्रिस्पृशासमुपोषणात्
विषयेवर्त्तमानस्यकामभोगान्वितस्यच २२
निवृत्तविषयस्यापिमुक्तिःसांख्येनदुर्ल्लभा
तस्मात्कुरुष्वविप्रेंद्रत्रिस्पृशांमोक्षदायिनीम् २३

नारदउवाच–
कीदृशंतत्सुरश्रेष्ठत्रिस्पृशाख्यंमहाव्रतम्
मुक्तिदंयद्द्विजातीनांत्वयाप्रोक्तंममाधुना २४
महादेवउवाच–
जाह्नव्यैसापुराविप्रत्रिस्पृशामाधवेनतु
प्राचीसरस्वतीतीरेकथितात्वनुकंपया २५
जाह्नव्युवाच–
कलिकल्मषकोट्यौघैर्ब्रह्महत्यादिकैर्युताः
कलिकालेहृषीकेशस्नानंकुर्वंतिमज्जले २६
तेषांपापशतैर्दोषैर्देहोमेकलुषीकृतः
कथंयास्यतिमेदेवपातकंगरुडध्वज २७
प्राचीमाधवउवाच–
कथयामिनसंदेहोमापुत्रिरोदनंकुरु
श्यामोवटस्तुमेस्थानंप्राचीदेवीममाग्रतः २८
वहतेब्रह्मतनयादृष्ट्वाग्रेचसुरेश्वरीम्
स्नानंकुरुष्वनित्यंत्वंत्वत्रपूताभविष्यसि २९
यत्रब्रह्मसुताप्राचीतत्राहंनात्रसंशयः
तीर्थकोटिशतैर्युक्तःसुरैःसहवसाम्यहम् ३०
पवित्रंमत्प्रियंस्थानंहत्याकोटिविनाशनम्
संतुष्टेनमयादत्तंयस्मात्प्राणाधिकासिमे ३१
तीर्थकोटिसहस्राणिनित्यंतिष्ठंतिजाह्नवि
प्राचीसरस्वतीतोयेसर्वदैवममाज्ञया ३२
ब्रह्मवधात्सुरापानात्गोधवाद्वृषलीवधात्
ब्रह्मस्वहरणादेवमातापित्रोस्त्वपूजनात् ३३
चक्रियानाद्गुरुद्रोहादभक्ष्यस्यचभक्षणात्
सर्वपापस्यकरणात्प्राचीब्रह्मसुतासुते ३४
व्यपोहयतिपापानिसकृत्स्नानेनमेऽग्रतः
कुरुस्नानंसरिच्छ्रेष्ठेविपापात्वंभविष्यसि ३५
जाह्नव्युवाच–
नाहंशक्नोमिदेवेशअत्रागंतुंनित्यमेवहि

कथंनश्यंतिपापानिकथयस्वेहमाधव ३६
प्राचीमाधवउवाच-
नशक्नोषियदागंतुंनित्यमेवहिजाह्नवि
तदान्यत्संप्रवक्ष्यामियस्मान्मत्पादसंभवा ३७
सरस्वत्यधिकायाचतीर्थकोटिशताधिका
मखकोट्यधिकावापिव्रतदानाधिकाचया ३८
जपहोमाधिकायाचचतुर्वर्गफलप्रदा
सांख्ययोगाधिकायाचत्रिस्पृशाक्रियतांशुभा ३९
यस्मिन्मासेसमायातिसिताचयदिवासिता
कर्तव्यासासरिच्छ्रेष्ठेकृतेपापात्प्रमुच्यते ४०
जाह्नव्युवाच-
कीदृशीत्रिस्पृशादेवममाख्याहिसुमाधव
ईदृशोमहिमायस्यास्त्वयाप्रोक्तोममाधुना ४१
दशम्येकादशीभद्रादिनैकस्मिन्यदाभवेत्
त्रिस्पृशासाभवेद्देववान्यथावदमेप्रभो ४२
कृष्णउवाच-
आसुरीत्रिस्पृशादेवीयात्वयापरिकीर्तिता
वर्जनीयाप्रयत्नेनवृत्तिहीनोयथापतिः ४३
असुराणांतुसाप्रोक्ताआयुर्बलविनाशिनी
वर्जनीयाप्रयत्नेनयथानारीरजस्वला ४४
स्वजातिंचपरित्यज्ययागताधमजातिषु
सैवत्याज्यंविशेषेणदशमीयुक्तंहिमद्दिनम् ४५
यथारजस्वलासंगाद्दूष्यंतेज्ञानवर्जिताः
तथैवदशमीयुक्तंमद्दिनंदूषितंनृणाम् ४६
हत्यायुतशतंहंतित्रिस्पृशासमुपोषिता
एकादशीद्वादशीचरात्रिशेषेत्रयोदशी ४७
त्रिस्पृशासातुविज्ञेयादशमीसहितानहि
कृत्वापराधंमुच्येतप्रायश्चित्तेकृतेनरः ४८
दशमीवेधजंदोषंनक्षमामिसुरापगे
भुक्तंहालाहलंतेनविषस्यभक्षणंकृतम् ४९

दशमीमिश्रितंयेनकृतमेकादशीव्रतम्
इतिमत्वानकर्त्तव्यंमद्दिनंदशमीयुतम् ५०
जन्मकोटिकृतंपुरायंसंतानंयातिसंक्षयम्
पातयेत्स्वकुलंस्वर्गान्नयतेरौरवादिकम् ५१
स्वदेहंशोधयित्वातुकर्त्तव्योममवासरः
वृद्धौत्याज्याविनावेधाच्छ्रवणादिषुसंयुता ५२
जन्मपुरायंक्षयंयातिएकादश्युपवासिनाम्
संवृद्धौतुविशेषेणसंदेहेसमुपस्थिते ५३
ममाज्ञयाचकर्त्तव्याद्वादशीवल्लभामम ५४
जाह्नव्युवाच–
करिष्यऽहेजगन्नाथत्रिस्पृशांवचनात्तव
सर्वपापविनिर्मुक्ताभविष्यामितवाज्ञया ५५
श्रीकृष्णउवाच–
स्वस्थानंगच्छभद्रंतेनभीःकार्याकदाचन
तवदेविसरिच्छ्रेष्ठेनपापंसंक्रमिष्यति ५६
स्नात्वासरस्वतीतोयेयेऽचयित्वाचमाधवम्
प्रणमंतिजगन्नाथंतेयांतिपरमांगतिम् ५७
जाह्नव्युवाच–
विधानंब्रूहिमेब्रह्मन्सर्वस्वेनकरोम्यहम्
प्रसादयामिदेवेशंदामोदरमनामयम् ५८
प्राचीमाधवउवाच–
शृणुदेविप्रवक्ष्यामित्रिस्पृशायाविधानकम्
यंश्रुत्वापिसरिच्छ्रेष्ठेमुच्यतेपातकैर्नरः ५९
पलेनचपलार्धेनतदर्द्धेनापिवापगे
प्रतिमाममसौवर्णाकार्याविभवसारतः ६०
पात्रंताम्रमयंकार्यंतिलैस्तुपरिपूरितम्
सजलंतुघटंशुभ्रंपंचरत्नसमन्वितम् ६१
वेष्टितंपुष्पमालाभिःकर्पूरागुरुवासितम्
न्यसेद्दामोदरंपश्चात्स्नापयित्वाविलिप्यच ६२
परिधानंततःकार्यंवस्त्रयुग्मेनचान्वितम्

मंत्रैस्तुपूजनंकार्यंपुराणैःसमुदीरितैः
पुष्पैःकालोद्भवैःशुभ्रैस्तुलसीपत्रैश्चकोमलैः ६३
छत्रंतुविष्णवेदद्यात्पादुकाभ्यांसुसंयुतम्
निवेद्यानिमनोज्ञानिफलानिसुबहून्यपि ६४
उपवीतंतुदातव्यंसोत्तरीयंनवंदृढम्
वैणवंदापयेद्दंडंसुरूपोंसोन्नतंदृढम् ६५
दामोदरायवैपादौजानुनीमाधवायच
गुह्यंकामप्रदायेतिकटिंवामनमूर्तये ६६
पद्मनाभायनाभिंतुजठरंविश्वयोनये
हृदयंज्ञानगम्यायकंठंवैकुंठगामिने ६७
सहस्रबाहवेबाहूचक्षुषीयोगरूपिणे
संपूज्यविधिवद्भक्त्यादद्यादर्घंविधानतः ६८
शुभ्रेणनालिकेरेणशंखोपरिस्थितेनहि
सूत्रैरावेष्टितेनैवहस्तयोरुभयोरपि ६९
स्मृतोहरसिपापानियदिनित्यंजनार्दन
दुःस्वप्नंदुर्निमित्तानिमनसादुर्विचिन्विता ७०
नारकंतुभयंदेवभयदुर्गतिसंभवम्
यन्ममस्यान्महादेवएहिकंपारलौकिकम् ७१
तेनदेवेशमांरक्षगृहाणार्घंनमोस्तुते
कृपादृष्टिःसदैवास्तुदामोदरममोपरि ७२
धूपंदीपंचनैवेद्यंकुर्यान्नीराजनंततः
शीर्षोपरिसरिच्छ्रेष्ठेभ्रामयेद्वारिजंहरेः ७३
कृत्वाविधानमेतद्धिपूजयेत्स्वगुरुंततः
दद्यात्सुवर्णंवस्त्राणिसोष्णीषंचैवकंचुकम् ७४
उपानहोऽपिछत्रंचमुद्रिकांचकमंडलुम्
भोजनंचैवतांबूलंसप्तधान्यंचदक्षिणाम् ७५
गुरुंसंपूज्यदेवेशंकुर्याज्जागरणंहरेः
गीतनृत्यसमायुक्तंतथाशास्त्रसमन्वितम् ७६
निशांतेचैवदेवायदत्वाचार्घंविधानतः
स्नानादिकांक्रियांकृत्वाभुंजीयाद्बाडवैःसह ७७

शिवउवाच-
द्विजैतत्त्रिस्पृशाख्यानमद्भुतंरोमहर्षणम्
श्रुत्वातुलभतेपुरायंगंगांस्नानसमुद्भवम् ७८
अश्वमेधसहस्राणिवाजपेयशतानिच
तत्फलंसमवाप्नोतित्रिस्पृशासमुपोषणात् ७९
पितृपक्षोमातृपक्षस्तथाचैवात्मपक्षकः
तैःसर्वैःसहसंमुक्तोविष्णुलोकेमहीयते ८०
तीर्थकोटिषुयत्पुरायंक्षेत्रकोटिषुयत्फलम्
तत्फलंसमवाप्नोतित्रिस्पृशासमुपोषणात् ८१
ब्राह्मणायेऽपिकुर्वंतिक्षत्रियाःकृष्णमानसाः
वैश्यावाशूद्रजन्मानोयेतथाचान्यजातयः ८२
तेसर्वेमुक्तिमायांतिभुवंत्यक्त्वाद्विजोत्तम
मंत्राणांमंत्रराजोऽथयथास्याद्द्वादशाक्षरः ८३
व्रतानांचयथाचैषायेनवैत्रिस्पृशाकृता
ब्रह्मणाचकृतापूर्वंपश्चाद्राजर्षिभिःकृता ८४
अन्येषांकाकथावत्सत्रिस्पृशामुक्तिदायिनी
अनेनविधिनाब्रह्मंस्त्रिस्पृशासंभवंव्रतम् ८५
यःकरोतिनरोभक्त्याशृणुवक्ष्यामितत्फलम्
गंगावगाहनेब्रह्मन्वाराणस्यांतुयत्फलम् ८६
मन्वंतरसहस्रैस्तुत्रिस्पृशाकारकोहितत्
प्राचीचयमुनास्नानेवर्षैर्यत्कोटिभिःफलम् ८७
तत्फलंसमवाप्नोतित्रिस्पृशाव्रतकृन्नरः
तत्फलंतुकुरुक्षेत्रेसूर्यग्रहणकोटिभिः ८८
हेमभारशतैर्दानैस्त्रिस्पृशाकरणेनतत्
पापकोटिसहस्राणिहत्याकोटिशतानिच ८९
एकेनैवोपवासेनक्रियतेभस्मसाद्द्रुतम्
त्रिस्पृशायाव्रतंयत्तुअगतीनांगतिप्रदम् ९०
गतिमिच्छंतिविप्रर्षेमहत्पापशतानिच
स्वयंकृष्णेनकथितंपाराशर्यस्यचाग्रतः ९१
प्रकाशयतियश्चेदंलिखित्वावैष्णवंद्विजे

पापोघैर्ग्रथितस्यापितस्यमुक्तिर्भविष्यति ९२
पुण्यैरवाप्यतेविद्वन्मन्वंतरशतैरपि
त्रिस्पृशादुर्लभालोकेप्राप्यतेनैवमानवैः ९३
कलौयेत्रिस्पृशांलब्ध्वानकुर्वंतिनराधमाः
तेषांजन्मफलंचैवजीवितंविफलंभवेत् ९४
प्रेतत्वंतैःसमुत्तीर्णंविनाश्राद्धैर्विनासुतैः
कृतायैस्त्रिस्पृशाविद्वन्सकृतत्प्राप्यकलौयुगे ९५

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायांउत्तरखण्डे-
उमापतिनारदसंवादेत्रिस्पृशाख्यानंनामचतुस्त्रिंशोऽध्यायः ३४

पञ्चत्रिंशोऽधयायः

महादेवउवाच-
अतस्त्वांसंप्रवक्ष्यामिउन्मीलनीमनुत्तमाम्
यस्याःश्रवणमात्रेणजन्मसंसारबंधनात् १
पापात्मामुच्यतेपापैःस्वर्गलोकेमहीयते
देवताःपितरश्चैवतस्यागतिमवाप्नुयुः २
विद्यार्थीलभतेविद्यांसर्वकामानवाप्नुयात्
तस्याव्रतान्नसंदेहःस्वर्गलोकेमहीयते ३
स्वस्थानंतत्रवैप्राप्तःशिवलोकेमहीयते
अतस्त्वंकुरुषेराजन्वैष्णवानांतुपूजनम् ४
वैष्णवानांतुयेराजन्सेवाकुर्वंतिनित्यशः
तेषांदंडंचकुरुषेनोवातेषांनराधिपः ५
भोजनानंतरंतेषांभोजनंकुरुतेनृप
तैरेवपूजितोविष्णुर्यैर्भक्त्यातुप्रपूजितः ६
शालग्रामशिलाभूतांदत्त्वामूर्द्धनिप्रत्यहम्
त्वंधारयसिभूपालकंठेनित्यंसुभक्तितः ७
धूपशेषंतुवैविष्णोर्भक्त्याभजसिभूपते
आरार्तिकंसदाकृत्वाभक्तानांवेदयेर्नृप ८
शंखोदकंहरेर्मूर्ध्निभ्रामयित्वातुभक्तितः
नित्यंविभर्षिशिरसिशेषंयच्छसिवैष्णवान् ९

नैवेद्यंप्रत्यहंकृत्वासर्वोपस्करसंयुतम्
विष्वक्सेनायदत्वावैस्वयंभुनक्षिवाडव १०
विष्णोर्निवेदितंचान्नंवैष्णवैःसहभुज्यते
नित्यंनामसहस्रेणभक्तयास्तौषिजनार्दनम् ११
दीपार्घदानंवैविष्णोःकुरुषेगीतनर्तनम्
श्यामांकुरैःपूजयसेपूज्यंतेनृपसत्तम १२
श्यामांकुरैःसदावत्सपूजनंचातिदुर्ल्लभम्
पृथ्वीदानसमंपुरायंदूर्वयापूजनेकृते १३
अतोवैनास्तिलोकेऽस्मिन्दूर्वायाःसदृशंभुवि
तयावैपूजनंकार्यंविष्णुसायुज्यमिच्छता १४
अतस्त्वंकुरुषेनित्यंपूजनंदूर्वयासह
यवाक्षतैर्विशेषेणपूजनंकुरुषेनवा १५
पक्षेपक्षेनृपश्रेष्ठविधिवद्द्वादशीव्रतम्
यत्कृतंतुमहाराजमहापापप्रणाशनम् १६
मोक्षदंसुखदंचैवतथायुष्यप्रदंसदा
एतद्विष्णुव्रतंप्रोक्तंवैष्णवानांतुमोक्षदम् १७
गृहस्थानांतुसुखदंयतीनांमुक्तिदायकम्
सर्वरोगादिशमनंपवित्रंकायशोधनम् १८
व्रतमेतच्चकुरुषेनोवाचैवनराधिप
दशमीवेधरहितंकुरुषेजागरान्वितम् १९
तुलसीपत्रनिकरैर्नित्यंपूजयसेहरिम्
गोपीचंदनजंपत्रंभालेवानृपसत्तम २०
धारितंसर्वलोकानांपवित्रीकरणंनृप
अतस्त्वंचधारयसेगोपीचंदनसंभवम् २१
ब्रह्महाहेमहारीचमद्यपानीतथैवच
अगम्यगोमहापापीतथाह्यनृतभाषितः २२
तेसर्वेमुक्तिमायांतितिलकंधारणादृताः
बिभर्षिकंठेनित्यंत्वंधात्रीफलसमुद्भवाम् २३
मालांमुख्यायुतसमांतुलसीपत्रसंभवाम्
शालग्रामशिलायुक्तांद्वारकायांसमुद्भवाम् २४

नित्यंपूजयसेभूपभुक्तिमुक्तिफलप्रदाम्
पद्मसंज्ञंपुराणंवैपठसेपुरतोहरेः २५
चरितंदैत्यराज्यस्यप्रह्लादस्यचभूपते
वासरंवासुदेवस्यसवेधंकुर्वतोनरान् २६
निवारयसिभूपालशास्त्रंदृष्ट्वाप्रयत्नतः
सवेधंवासरंविष्णोर्यस्मिन्राष्ट्रेप्रवर्तते २७
लिप्यतेतेनपापेनराजाभवतिनारकी
वेधंचतुर्विधंत्यक्त्वासमुपोष्यहरेर्दिनम्
कुलकोटिंसमुद्धृत्यविष्णुलोकेमहीयते २८
गौतमउवाच-
शृणुभूपालवक्ष्यामिवैष्णवाख्यंमहाव्रतम्
यंश्रुत्वापापिनःसर्वेमुक्तिमायांतितत्क्षणात् २९
द्वादशीसंभवंपुण्यंमयाख्यातंनकस्यचित् ३०
वैष्णवोऽसिमहाराजभक्तोभागवतेनृणाम्
वैष्णवंतुमहागुह्यंतद्व्रतंत्वंनिशामय ३१
उन्मीलनीनामपुराभक्त्यामेमाधवेनतु
कथितासुप्रसन्नेनतांतेभूपवदाम्यहम् ३२
एकादशीअहोरात्रंप्रभातेघटिकाभवेत्
उन्मीलनीतुसाज्ञेयाविशेषेणहरिप्रिया ३३
त्रैलोक्येयानितीर्थानिपुण्यान्यायतनानिच
कोटयंशेनैवतुल्यानिमखावेदास्तपांसिच ३४
उन्मीलनीसमंकिंचित्नभूतंनभविष्यति
प्रयागोनकुरुक्षेत्रंनकाशीनचपुष्करः ३५
शैलोहिमाचलोनैवनमेरुर्गंधमादनः
शैलोननीलनिषधोनविंध्योनैवनैमिषम् ३६
गोदावरीनकावेरीचंद्रभागानवेदिका
नतापीनपयोष्णीचनक्षिप्रानैवचंदना ३७
चर्मण्वतीचसरयूश्चंद्रभागानगंडिका
गोमतीचविपाशाचशोणाख्यश्चमहानदः ३८
किमत्रबहुनोक्तेनभूयोभूयोनराधिप

उन्मीलनीसमंकिंचिन्नदेवःकेशवात्परः ३९
उन्मीलनीमनुप्राप्ययैःकृतंकेशवार्चनम्
पापचक्रसमूहस्यराशयःपतिताःक्षणात् ४०
यस्मिन्मासेमहीपालतिथिरुन्मीलनीभवेत्
तन्मासनाम्नागोविंदःपूजनीयःप्रयत्नतः ४१
जातरूपमयःकार्यमासनाम्नातुमाधवः
स्वशक्त्याविश्वरूपस्तुश्रद्धाभक्तिसमन्वितः ४२
पवित्रोदकसंयुक्तंपंचरत्नसमन्वितम्
गंधपुष्पाक्षतैर्युक्तंकुंभंस्त्रग्दामभूषितम् ४३
पात्रंचसोदकंकार्यंगोधूमैश्चापिपूरितम्
नानारत्नैश्चसंयुक्तंनानागंधैःप्रपूजितम् ४४
मल्लिकामोदसंयुक्तंजातीपुष्पैःप्रपूजितम्
श्वेताख्यैस्तंदुलैश्चैवपूरणीयःप्रयत्नतः ४५
प्रदद्याद्वस्त्रयुग्मंतुउपवीतंतुसोत्तरम्
उपानहौतुराजर्षेश्चातपत्रंशिरोपरि ४६
भोजनंजलपात्रंचसप्तधान्यंतिलैःसह
रूप्यंचैवतुकार्पासंपायसंमुद्रिकाहरेः ४७
धेनुर्वात्रतुदातव्यावत्सालंकारसंयुता
सुवर्णशृंगीरौप्यखुरीताम्रपृष्ठीतथैवच ४८
कांस्यदोहींरत्नपुच्छींदद्याद्वैगुरवेतदा
शय्यांसोपस्करांदद्यात्साधवेभक्तिपूर्वकम् ४९
धूपंदीपंतुनैवेद्यंफलपत्रंनिवेदयेत्
पूजनीयोमहाभक्त्यैर्मंत्रैरेभिस्तुकेशवः ५०
तुलसीपत्रसंयुक्तैःपुष्पैःकालोद्भवैस्तथा
मासनाम्नेवचरणौजानुनीविष्णुरूपिणे ५१
गुह्येतुगुह्यपतयेकटेवैपीतवाससे
ब्रह्ममूर्तिभृतेनाभावुदरेविश्वयोनये ५२
हृदयेज्ञानगम्यायकंठेवैकुंठमूर्तये
ऊर्द्ध्वगायललाटेतुबाहौदत्यांतकारिणे ५३
उत्तमांगेसुरेशायसर्वांगेसर्वमूर्तये

स्वनाम्नाचायुधादीनिपूजनीयानिभक्तितः ५४
अर्घदानंप्रकर्तव्यंनालिकेरादिभिःसमम्
शंखोपरिजलेकृत्वागंधपुष्पाक्षतान्वितम् ५५
सूत्रेणावेष्टितंकृत्वादद्यादर्घंविधानतः
देवदेवमहादेवश्रीकेशवजनार्दन ५६
सुब्रह्मण्यनमस्तेऽस्तुपुण्यराशिविवर्धन
शोकमोहमहापापान्मामुद्धरभवार्णवात् ५७
सुकृतंनकृतंकिंचिज्जन्मकोटिशतैरपि
तथापिमांमहास्वामिन्मामुद्धरभवार्णवात् ५८
व्रतेनानेनदेवेशयेचान्येममपूर्वजाः
वियोनिंचगताश्चान्येपापमृत्युवशंगताः ५९
येभविष्यंतियेऽतीताःप्रेतलोकान्समुद्धर
श्रांतोस्म्यहमधीनस्यभक्तिरव्यभिचारिणी ६०
दत्तमर्घंमयातुभ्यंभक्त्यागृह्णगदाधर
दत्वार्घंधूपदीपाद्यैर्नैवेद्यैर्विष्णुसंभवैः ६१
स्तोत्रैर्नीराजनैर्गीतैर्भृत्यैःसंतोषयेद्धरिम्
वस्त्रैर्दानैश्चगोदानैर्भोजनैस्तोषयेद्गुरुम् ६२
तथातथाविधातव्यंगुरुर्वैप्रीतिमाप्नुयात्
लोकानांतारणार्थायधात्रासृष्टोगुरुर्यतः ६३
अतोवैगुरुपूजाचकर्त्तव्यावैप्रयत्नतः
अहितंयोनाशयतिस्वहितंदर्शयेत्सदा ६४
सगुरुःसचविज्ञेयःसर्वधर्मार्थकोविदः
अकुर्वन्वित्तशाठ्यंतुगुरवेतंनिवेदयेत् ६५
गुरोर्निवेदितेभूपपरिपूर्णंभवेद्व्रतम्
कृत्वादिवातनंकर्मभोजनंब्राह्मणैःसह ६६
कर्त्तव्यंनृपशार्दूलदिनंनेयंकथानकैः
अनेनविधिनायस्तुकुर्यादुन्मीलनीव्रतम् ६७
कल्पकोटिसहस्राणिवसतेविष्णुसन्निधौ ६८
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे-
उमापतिनारदसंवादेउन्मीलनीव्रतंनामपंचत्रिंशोऽध्यायः ३५

षट्त्रिंशोऽध्यायः

नारदउवाच-
कीदृशीस्यान्महादेवपत्तवर्द्धनिसंज्ञका
ययावैकृतयाजंतुर्महपापात्प्रमुच्यते १
श्रीमहादेवउवाच-
अमावायदिवापूर्णासंपूर्णाजायतेतदा
भूत्वावैनाडिकाषष्ठिर्जायतेप्रतिपद्दिने
अश्वमेधायुतैस्तुल्यासाभवेत्पत्तवर्द्धिनी २
नारदउवाच-
पूजाविधिंतुपृच्छामिसांप्रतंदेवसत्तम
यत्कृतेतुमहादेवमहाफलमवाप्नुयात् ३
महादेवउवाच-
पूजाविधिंप्रवद्त्यामिसांप्रतंद्विजनंदन
पूजितेचार्चितेविष्णौफलंप्राप्नोत्यसंशयः ४
येनपूजाविधानेनतुष्टिंप्राप्नोतिमाधवः
अव्रणंजलपूर्णंचकुंभंचंदनचर्चितम् ५
पंचरत्नसमायुक्तंपुष्पमालाभिवेष्टितम्
स्थाप्यंताम्रमयंपात्रंसगोधूमंघटोपरि ६
सौवर्णंकारयेद्देवंमाससंज्ञाभिनामकम्
पंचामृतेनविधिनास्नपनंसुमनोरमम् ७
कारयेद्देवदेवेशंजगन्नाथंजगत्पतिम्
विलेपनंतुकर्त्तव्यंकुंकुमागरुचंदनैः ८
वस्त्रयुग्मंचदातव्यंछत्रोपानहसंयुतम्
पूजयेद्देवताधीशंकुंभपात्रोपरिस्थितम् ९
पद्मनाभायवैपादौजानुनीविश्वमूर्त्तये
ऊरूवैज्ञानगम्यायकटीदानप्रदायच १०
उदरंविश्वनाथायहृदयंश्रीधरायच
कंठंकौस्तुभकंठायबाहूत्तत्रांतकारिणे ११
ललाटंव्योममूर्ध्नेतुशिरोवैसर्वरूपिणे
स्वनाम्नाचैवकमलांसर्वांगींदिव्यरूपिणीम् १२

एवंविधिवत्संपूज्यततोऽघदापयेत्सुधीः
नालिकेरेणशुभ्रेणदेवदेवस्यचक्रिणः १३
अनेनैवार्घदानेनसंपूर्णंजायतेव्रतम्
संसारार्णवमग्नंमांसमुद्धरजगत्पते १४
त्वमीशःसर्वलोकानांत्वंसाक्षाच्चजगत्पतिः
गृहाणार्घंमयादत्तंपद्मनाभनमोस्तुते १५
नैवेद्यानिसुहृद्यानिषड्रसानिविशेषतः
देयानितुविशेषेणकेशवायसुभक्तितः १६
नागपत्रंसकर्पूरंदद्याद्देवस्यभक्तितः
घृतेनदीपकंकुर्यात्तिलतैलेनवापुनः १७
कृत्वासम्यग्विधानेनगुरोःपूजांप्रकारयेत्
वस्त्राणिचैवचोष्णीषंकंचुकंचप्रदापयेत् १८
दक्षिणांचयथाशक्त्यागुरुवेसंप्रदापयेत्
भोजनंचैवतांबूलंदत्त्वाचार्घंप्रदापयेत् १९
स्ववित्तस्यानुमानेनयथाशक्त्यातुनिर्द्धनैः
कार्यासम्यक्प्रयत्नेनद्वादशीपक्षवर्द्धिनी २०
ततोजागरणंकुर्याद्गीतनृत्यसमन्वितम्
पुराणपाठसहितंहास्याह्लादसमन्वितम् २१
स्तुवंतिचप्रशंसंतिजागरंचक्रपाणिनः
नित्योत्सवोभवेत्तेषांगृहेवैदशजन्मसु २२
अतोधन्यतमाचेयंकर्त्तव्यापक्षवर्द्धनी
कृत्वातुसकलंपुण्यंफलंप्राप्नोत्यसंशयम् २३
पक्षवर्द्धनीमाहात्म्यंयेशृण्वंतिमनीषिणः
तैःकृतंसत्कृतंसर्वंयावदाभूतसंप्लवम् २४
पंचाग्निसाधनेपुण्यंयच्चस्यात्तीर्थसाधने
तत्पुण्यंसमवाप्नोतिविष्णोर्जागरकारणात् २५
पक्षवर्द्धनिकापुण्यापवित्रापापनाशिनी
उपवासकृताविप्रहत्याकोटिविनाशिनी २६
वसिष्ठेनकृतापूर्वंभारद्वाजेनवैमुने
ध्रुवेणचांबरीषेणकृतेयंविष्णुवल्लभा २७

इयंकाशीसमापुरयाइयंवैद्वारकासमा
उपोषिताचभक्तेनवांछितंचददात्यसौ २८
इयंधन्याधन्यतमाहत्यायुतविनाशिनी
कर्त्तव्यातुविशेषेणवैष्णवैर्ज्ञानतत्परैः २९
ग्रहोसर्वेश्वरोदेवःसंसेव्योव्रततत्परैः
किमन्यद्बहुनोक्तेनकर्तव्यंव्रतमुत्तमम् ३०
यथाचवर्द्धतेचंद्रःसितेपद्मेविशेषतः
तथावैवर्द्धतेभक्तकारणात्पद्मवर्द्धिनी ३१
सूर्योदयेयथाध्वांतंनश्यतेतत्क्षणादपि
तथाघंनाशमाप्नोतिकरणात्पद्मवर्द्धिनी ३२
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे-
उमापतिनारदसंवादेपद्मवर्द्धनीएकादशीमाहात्म्यंनाम

षट्त्रिंशोऽध्यायः ३६

सप्तत्रिंशोऽध्यायः

महादेवउवाच-

शृणुनारदवक्ष्यामिमाहात्म्यंजागरस्यच
यच्छ्रुत्वामुक्तिमाप्नोतिमहापापीनसंशयः १
नारदउवाच-
ग्रहोविश्वेश्वरोविष्णुःपवित्रीकरणःसदा
तस्योपवासमाहात्म्यंश्रुतंहित्वन्मुखाच्छिव २
तथापिश्रोतुमिच्छामिमाहात्म्यंजागरस्यतु
कीदृक्जागरमाहात्म्यंरात्रोभक्तिस्तुकीदृशी ३
प्रहरेषुचयापूजावदविश्वेश्वरप्रभो
त्वंलोकेषुसदापूज्यस्त्वंहिदेवोजनार्दनः
त्वंहिविश्वेश्वरोदेवोयतोभक्तिर्जनार्दने ४
सर्वेषांचैवभक्तानांत्वंचश्रेष्ठउमापतिः
लोकेस्मिन्सर्वदाभक्त्यातवाख्यावर्त्ततेसदा ५
ग्रतोयेनप्रकारेणलोकानांमुक्तिरेवच
विश्वेश्वरवदत्वंतुमाहात्म्यंजागरस्यतु ६

महादेवउवाच-
एकादश्यांजनोविष्णुंरात्रौसंपूज्यभक्तितः
कुर्याज्जागरणंविष्णोःपुरतोवैष्णवैःसह ७
गीतंवाद्यंतथानृत्यंपुराणपठनंतथा
धूपंदीपंचनैवेद्यंपुष्पंगंधानुलेपनम् ८
फलमर्घंतथाश्रद्धादानमिंद्रियसंयमम्
सत्यान्वितंचविप्रेंद्रवचोयुक्तंक्रियान्वितम् ९
विनिद्रंचमुदायुक्तोयःकरोतिनरःसदा
सर्वपापविनिर्मुक्तोजायतेविष्णुवल्लभः १०
रात्रौजागरणेप्राप्तेनिद्रांकुर्वंतिवैष्णवाः
हारितंचोपवासंतैर्व्रतंवैविष्णुसंज्ञकम् ११
येकुर्वंतिनराःप्राज्ञजागरेविष्णुसंज्ञके
जागरंकृष्णभावेननस्वपंतिकदाचन १२
कृष्णस्यनाममनसावदंतिचपुनःपुनः
तेतुधन्यतमाज्ञेयाश्चस्यांरात्रौविशेषतः १३
क्षणेक्षणेतुगोदानंघट्यांचैवचतुर्गुणम्
प्रहरेकोटिगुणितंचतुर्यामेष्वसंख्यकम् १४
जागरेनिमिषार्द्धेतुकेशवाग्रेविशेषतः
तत्फलंकोटिगुणितंतस्यसंख्यानविद्यते १५
नर्त्तनंकुरुतेयस्तुकेशवाग्रेनरोत्तमः
नफलंहीयतेतस्यश्चाजन्ममरणांतिकम् १६
साश्चर्यंचैवसोत्साहंपापालापादिवर्जितम्
प्रदक्षिणसमायुक्तंनमस्कारपुरःसरम् १७
नीराजनसमायुक्तमनिर्विण्णेनचेतसा
यामेयामेमहाभागकुर्यादारार्तिकंहरेः १८
षडिंवशगुणसंयुक्तमेकादश्यांचजागरम्
यःकरोतिनरोभक्त्यानपुनर्जायतेभुवि १९
यएवंकुरुतेभक्त्यावित्तशाठ्यविवर्जितः
जागरंवासरेविष्णोर्लीयतेपरमात्मनि २०
धनवान्वित्तशाठ्येनयःकरोतिप्रजागरम्

तेनात्माहारितोनूनंकितवेनदुरात्मना २१
विष्णुजागरणेप्राप्तेउपहासंकरोतियः
षष्टिवर्षसहस्राणिविष्ठायांजायतेकृमिः २२
वेदविद्ब्राह्मणोयस्तुनर्त्तनेनविशेषतः
उपहासपरःप्राप्तःसवैचांडालउच्यते २३
निमिषंनिमिषार्द्धंवायःकरोतिप्रजागरम्
धर्मार्थकाममोक्षाणांप्राप्नोतिपदमव्ययम् २४
वेदशास्त्ररतोनित्यंनित्यंवैयज्ञयाजकः
रात्रौजागरणेप्राप्तेनिंदांकुर्वन्व्रजत्यधः २५
ममपूजांप्रकुर्वाणोविष्णुनिंदासुतत्परः
एकविंशत्कुलेनैवनरकंप्रतिपद्यते २६
ि विष्णुःशिवःशिवोविष्णुरेकमूर्तिर्द्विधास्थिताः ि
तस्मात्सर्वप्रकारेणनैवनिंदांप्रकारयेत्
दष्टाःकलिभुजंगेनस्वपंतिमधुहाहनि २७
कुर्वंतिजागरंनैवमाययातेचमोहिताः
प्राप्ताएकादशीयेषांकलौजागरणंविना २८
तेविनष्टानसंदेहोयस्माज्जीवितमध्रुवम्
उद्धृतंनेत्रयुग्मंतुदत्त्वावैवैष्णवंपदम् २९
कृतंयेनैवपश्यंतिपापिनोहरिजागरम्
अभावेवाचकस्याथगीतंनृत्यंतुकारयेत् ३०
वाचकेसतिदेवर्षेपुराणंप्रथमंपठेत्
अश्वमेधसहस्रस्यवाजपेयायुतस्यच ३१
पुरायंकोटिगुणंवत्सविष्णोर्जागरणेकृते
पितृपक्षेमातृपक्षेभार्यापक्षेतुवाडव ३२
कुलानुद्धरतेचैतान्कृत्वाजागरणंहरेः
उपोषणदिनेविद्धेजागरंपूजनंहरेः ३३
वृथादानादिकंसर्वंकृतघ्नेषुकृतंयथा
उपोषणदिनेविद्धेप्रारब्धेजागरेस्थितिम् ३४
विहायस्थानंतद्विष्णुःशापंदत्वाप्रगच्छति
अविद्धेवासरेविष्णोर्येकुर्वंतिप्रजागरम् ३५

तेषांमध्येतुतुष्टःसन्नृत्यंतुकुरुतेहरिः
यावद्दिनानिकुरुतेजागरंकेशवाग्रतः ३६
युगानितानितावंतिविष्णुलोकेमहीयते
यावद्दिनानिवसतेविनाजागरणंहरेः ३७
तावद्वर्षसहस्राणिरौरवान्ननिवर्तते
एकदश्यांशयानस्तुविनाजागरणंहरेः ३८
मूकवत्तिष्ठतेयोवैगानंपाठंनवाचरेत्
सप्तजन्मानिमूकत्वंजायतेऽजागरेहरेः ३९
योननृत्यतिमूढात्मापुरतोजागरेहरेः
पंगुत्वंतस्यजानीयात्सप्तजन्मानिवाडव ४०
यःपुनःकुरुतेगीतंनृत्यंजागरणंहरेः
ब्राह्मंपदंमदीयंचसत्यंवैतस्यवैष्णवम् ४१
यःप्रबोधयतेलोकान्विष्णोर्जागरणेरतः
वसेच्चिरंतुवैकुंठेपितृभिःसहवैष्णवः ४२
मतिंप्रयच्छतेयस्तुहरेर्जागरणंप्रति
षष्टिवर्षसहस्राणिश्वेतद्वीपेवसेन्नरः ४३
यत्किंचित्क्रियतेपापंकोटिजन्मनिमानवैः
श्रीकृष्णजागरेसर्वंरात्रौनश्यतिवाडव ४४
शालग्रामशिलाग्रेयेकुर्वंतिप्रतिजागरम्
यामेयामेफलंप्रोक्तंकोटचैंदवसमुद्भवम् ४५
संप्राप्तेवासरेविष्णोर्येनकुर्वंतिजागरम्
वृथास्यात्तत्कृतंतेषांवैष्णवानांचनिंदया ४६
कामार्थौसंपदःपुत्राःकीर्तिर्लोकाश्चशाश्वताः
यज्ञायुतैर्नलभ्यंतेद्वादशीजागरंविना ४७
मतिर्नजायतेयस्यद्वादश्यांजागरंप्रति
नहितस्याधिकारोऽस्तिपूजनेकेशवस्यहि ४८
यावत्पदानिचलतिकेशवायतनंप्रति
अश्वमेधसमानिस्युःजागरार्थंप्रगच्छतः ४९
पादयोःपतितंयावद्धरण्यांपांशुगच्छताम्
तावद्वर्षसहस्राणिजागरोवसतेदिवि ५०

तस्माद्गृहात्प्रगंतव्यंजागरेकेशवालये
कलौमलविनाशायद्वादशीद्वादशीषुच ५१
परापवादसंयुक्तंमनःप्रासादवर्जितम्
शास्त्रहीनमगांधर्वंतथादीपविवर्जितम् ५२
शक्त्योपचाररहितमुदासीनंसनिंदनम्
कलियुक्तंविशेषेणजागरंनवधामतम् ५३
सशास्त्रंजागरंयच्चनृत्यगांधर्वसंयुतम्
सवाद्यंतालासंयुक्तंसदीपंमधुभिर्युतम् ५४
उच्चारैस्तुसमायुक्तंयथोक्तैर्भक्तिभावितैः
प्रसन्नंतुष्टिजननंसंमूढंलोकरंजनम् ५५
गुणैर्द्वादशभिर्युक्तंजागरंमाधवप्रियम्
कर्त्तव्यंतत्प्रयत्नेनपक्षयोःशुक्लकृष्णयोः ५६
किंव्रतैर्बहुभिश्चीर्णैस्तीर्थवासेनतस्यकिम्
द्वादशीवासरेप्राप्तेनकुर्याज्जागरंहरेः ५७
प्रवासेनत्यजेद्यस्तुपथिस्विन्नोऽपिवाडव
जागरंवासुदेवस्यद्वादश्यांतुसमेप्रियः ५८
मद्भक्तोनहरेःकुर्याज्जागरंपापमोहितः
व्यर्थंमत्पूजनंतस्यमत्पूज्यंयोनपूजयेत् ५९
नशैवोनचसौरोऽसौनशाक्तोगणसेवकः
योभुंक्तेवासरेविष्णोर्ज्ञेयःपश्वधिकोहिसः ६०
विप्रियंचकृतंतेनदुष्टेनैवचपापिना
मद्भक्तिबलमाश्रित्ययोभुंक्तेवैहरेर्दिने ६१
सबाह्याभ्यंतरंदेहंवेष्टितंपापकोटिभिः
मुच्यंतेवासरेविष्णोर्येकुर्वंतिप्रजागरम् ६२
कूर्परंयमदूतानांदत्तंतेनयमस्यच
कृत्वाजागरणंविष्णोरविद्धंद्वादशीव्रतम् ६३
स्वर्गापिद्मामुनिश्रेष्ठमुक्तातेनैवसंशयः
वांछितंनारकंसौख्यंविद्धंकृत्वाहरेर्दिनम् ६४
निहताःपितरस्तेनदेवानांवैवधःकृतः
दत्तंराज्यंतुदैत्यानांकृत्वाविद्धंहरेर्दिनम् ६५

योनृत्यतिप्रहृष्टात्माकृत्वावैकरताडनम्
गीतंकुर्वन्मुखेनापिदर्शयन्कौतुकान्बहून् ६६
पुरतोवासुदेवस्यरात्रौजागरणेस्थितः
पठन्कृष्णचरित्राणिरंजयन्वैष्णवान्गणान् ६७
मुखेनकुरुतेवाद्यंसंप्रहृष्टतनूरुहः
दर्शयन्विविधान्भृत्यान्स्वेच्छालापान्प्रकारयन् ६८
भावैरेतैर्नरोयस्तुकुरुतेजागरेहरेः
निमिषेनिमिषेपुण्यंतीर्थकोटिफलंस्मृतम् ६९
अनुद्विग्नमनायस्तुधूपनीराजनंहरेः
कुरुतेजागरेरात्रौसप्तद्वीपाधिपोभवेत् ७०
यानिकानिचपापानिब्रह्महत्यासमानिच
कृष्णाहजागरात्तानिविलयंयांतिखंडशः ७१
एकतःक्रतवःसर्वेसमाप्तवरदक्षिणाः
एकतोदेवदेवस्यजागरःकृष्णवल्लभः ७२
तत्रकाशीपुष्करंचप्रयागंनैमिषंगया
शालग्राममहाक्षेत्रमर्बुदारण्यमेवच ७३
पौष्करंमथुरातत्रसर्वतीर्थानिचैवहि
यज्ञावेदाश्चचत्वारोव्रजंतिहरिजागरम् ७४
गंगासरस्वतीतापीयमुनाचशतद्रुका
चंद्रभागावितस्ताचनद्यःसर्वास्तुतत्रवै ७५
सरांसिचह्रदाःसर्वेसमुद्राःसर्वएवहि
एकादश्यांद्विजश्रेष्ठगच्छंतिकृष्णजागरम् ७६
स्पृहणीयाहिदेवानांयेनराःकृष्णजागरे
नृत्यंतिगीतंकुर्वंतिवीणावाद्यप्रहर्षिताः ७७
एवंजागरणंकृत्वासंपूज्यचमहाहरिम्
द्वादश्यांपारणंकृत्वास्वशक्त्यावैष्णवैःसह ७८
महादेवउवाच-
शृणुब्रह्मन्प्रवक्ष्यामिद्वादशीमाहात्म्यमुत्तमम्
द्वादशीतुसदाज्ञेयापुत्रदामोक्षदायिनी ७९
प्रातःस्नात्वाहरिंपूज्यउपवासंसमर्पयेत्

अज्ञानतिमिरांधस्यव्रतेनानेनकेशव ८०
प्रसीदसुमुखोभूत्वाज्ञानदृष्टिप्रदोभव
पारणंचततःकुर्याद्यथासंभवमग्रतः ८१
अतऊर्ध्वंयथेष्टंतुकारयेच्चयथाविधि
यदातुद्वादशीस्वल्पापारणेनभवेद्दिवज ८२
तदारात्रौतुकर्त्तव्यंपारणंमुक्तिमिच्छता
तदानरात्रिदोषःस्यान्निषिद्धंनभवेत्क्वचित् ८३
यदुक्तंनिशिनस्नायान्महानिशिनभोजयेत्
तत्पूर्वपरयामाभ्यांदिनवत्कर्मकारयेत् ८४
यदाभवतिस्वल्पातुद्वादशीपारणेदिने
उषःकालेद्वयंकुर्यात्प्रातर्मध्याह्निकंतथा ८५
द्वादशीसाधितायेननरेणभुविसर्वदा
तस्यपुरायमहंवक्तुंनसमर्थोविशेषतः ८६
साधयित्वाखिलान्कामान्प्राप्नुयुश्चमहाजनाः
अंबरीषादयःसर्वेयेभक्ताभुविविश्रुताः ८७
द्वादशींसाधयित्वातुतेगताविष्णुसद्मनि
सत्यंसत्यंपुनःसत्यंयदुक्तंतुमयातव ८८
नास्तिविष्णुसमोदेवोनतिथिर्द्वादशीसमा
अत्रदत्तंचभुक्तंचतथापूजादिकंचयत् ८९
तत्सर्वंपूर्णतांयातिपूजितेमाधवेसति
किंपुनर्बहुनोक्तेनभक्तानांवल्लभोहरिः ९०
प्रददात्यखिलान्कामान्यावदाभूतसंप्लवम्
द्वादश्यांचैवयद्दत्तंतत्सर्वंसफलंभवेत् ९१
कुरुक्षेत्रेषुयद्दत्तंनिष्फलंनैवजायते
तद्वच्चद्वादशीदत्तंभवेद्देवर्षिसत्तम ९२

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे-
उमापतिनारदसंवादेद्वादशीएकादशीजागरणमहिमानाम
सप्तत्रिंशोऽध्यायः ३७

अष्टत्रिंशोऽध्यायः

महादेवउवाच-
एकस्मिन्समयेपुत्रगतोऽहविष्णुसन्निधौ
तत्रपृष्टंमयापूर्वंमाहात्म्यंद्वादशीभवम् १
नारदउवाच
कीदृशीस्यान्महादेवमहाद्वादशिकापरा
तस्याव्रतेफलंकीदृग्वदसर्वेश्वरप्रभो २
शिवउवाच-
इयमेकादशीब्रह्मन्महापुण्यफलप्रदा
ऋक्षयोगैश्चसंयुक्ताकर्त्तव्यामुनिसत्तमैः ३
जयाचविजयाचैवजयंतीपापनाशिनी
सर्वपापहराश्चैताःकर्त्तव्याःफलकांक्षिभिः ४
एकादश्यांयदाऋक्षंशुक्लपक्षेपुनर्वसुः
नाम्नासाचजयाख्यातातिथीनामुत्तमातिथिः ५
तामुपोष्यनरःपापान्मुच्यतेनात्रसंशयः
यदाचशुक्लद्वादश्यांनक्षत्रंश्रवणंभवेत् ६
विजयासासमाख्यातातिथीनामुत्तमातिथिः
सहस्रगुणितंदानंयस्यांवैविप्रभोजनम् ७
होमस्तथोपवासश्चसहस्राधिफलप्रदः
यदाचशुक्लद्वादश्यांप्राजापत्यंहिजायते ८
जयंतीनामसाप्रोक्तासर्वपापहरातिथिः
सप्तजन्मकृतंपापंस्वल्पंवायदिवाबहु ९
प्रक्षालयतिगोविंदस्तस्यामभ्यर्चितोध्रुवम्
यदावैशुक्लद्वादश्यांपुष्यंभवतिकर्हिचित् १०
तदातुसामहापुण्याभवितापापनाशिनी
योददातितिलप्रस्थंनित्यंसंवत्सरंप्रति ११
उपवासंचयस्तस्यांकरोत्येतत्समंस्मृतम्
तस्यांजगत्पतिर्देवस्तुष्टःसर्वेश्वरोहरिः १२
प्रत्यक्षतांप्रयात्येवतत्रानंतफलंस्मृतम्
सगरेणककुत्स्थेननहुषेणचसाधितः १३

तस्यामाराधितःकृष्णोदत्तवानखिलंभुवि
वाचिकान्मानसाद्वापिकायजाच्चविशेषतः १४
सप्तजन्मकृतात्पापान्मुच्यतेनात्रसंशयः
तामेकांसमुपोष्याथपुरायनक्षत्रसंयुताम् १५
एकादशीसहस्रस्यफलंप्राप्नोतिमानवः
स्नानंदानंजपोहोमःस्वाध्यायोदेवतार्चनम् १६
यत्तस्यांक्रियतेकिंचित्तदक्षयफलंस्मृतम्
तस्मादेषाप्रकर्तव्यायत्नेनफलकांक्षिभिः १७
पंचमेनाश्वमेधेनयदिस्नातोयुधिष्ठिरः
पर्यपृच्छतधर्मात्माकृष्णंयदुकुलोद्वहम् १८
युधिष्ठिरउवाच-
उपवासस्यनक्तस्यत्वेकभुक्तस्यमेप्रभो
किंपुरायंकिंफलंतस्यब्रूहिसर्वंजनार्दन १९
श्रीभगवानुवाच-
हेमंतेचैवसंप्राप्तेमासेमार्गेचशोभने
कृष्णपक्षेचयापार्थद्वादशीतामुपोषयेत्
दशम्यांचैकभक्तश्चशुद्धचित्तोदृढव्रतः २०
नक्तंचैवतथाज्ञात्वादशम्यांनियतःसदा
दिवसस्याष्टमेभागेमंदीभूतेदिवाकरे २१
नक्तंचतद्विजानीयान्ननक्तंनिशिभोजनम्
नक्षत्रदर्शनान्नक्तंगृहस्थस्यविधीयते २२
यतेर्दिनाष्टमेभागेरात्रौतस्यनिषेधनम्
ततःप्रभातसमयेकृत्वाचनियमंव्रती २३
मध्याह्नेचतथापार्थस्नानंशुचिःसमाचरेत्
अधमंकूपकेस्नानंवाप्यांस्नानंचमध्यमम् २४
तडागेचोत्तमंस्नानंनद्यांस्नानंततःपरम्
पीडयंतेजंतवोयत्रजलमध्येव्यवस्थिते २५
तत्रस्नानेकृतेपार्थपापंपुरायंसमंभवेत्
गृहेचैवोत्तमंस्नानंजलंचैवविशोधयेत् २६
तस्मात्तुपांडवश्रेष्ठगृहेस्नानंसमाचरेत्

अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे २७
मृत्तिकेहरमेपापंयन्मयापूर्वसंचितम्
क्रोधलोभौपरित्यज्यचैकचित्तोदृढव्रतः २८
नालापेतांत्यजंचैवतथापाखंडिनोनरान्
मिथ्यावादरतांश्चैवतथाब्राह्मणनिंदकान् २९
अन्यांश्चैवदुराचारानगम्यागमनेरतान्
परद्रव्यापहारांश्चपरदाराभिगामिनः ३०
केशवंपूजयित्वातुनैवेद्यंतत्रकारयेत्
दीपंदद्याद्गृहेतत्रभक्तियुक्तेनचेतसा ३१
तद्दिनेवर्जयेत्पार्थनिद्रांचैवतुमैथुनम्
धर्मशास्त्रविनोदेनदिनंसर्वंनिवारयेत् ३२
रात्रौजागरणंकृत्वाभक्तियुक्तोनृपोत्तम
विप्रेभ्योदक्षिणांदद्यात्प्रणिपत्यक्षमापयेत् ३३
यथाकृष्णातथाशुक्लाविधिनैवंप्रकारयेत्
एकादशींद्विजःपार्थविभेदंनैवकारयेत् ३४
एवंहिकुरुते यस्तुशृणुतस्यहियत्फलम्
शंखोद्धारेनरःस्नात्वादृष्ट्वादेवंगदाधरम् ३५
एकादश्युपवासस्यकलांनार्हतिषोडशीम्
संक्रांतिषुचतुर्लक्षंयोददातिनृपोत्तम ३६
एकादश्युपवासस्यकलांनार्हतिषोडशीम्
प्रभासक्षेत्रेयत्पुण्यंग्रहणेचंद्रसूर्ययोः ३७
तत्फलंजायतेनूनमेकादश्युपवासिनः
केदारेचोदकंपीत्वापुनर्जन्मनविद्यते ३८
तथाचैकादशीपार्थगर्भवासक्षयंकरी
अश्वमेधस्ययज्ञस्यपृथिव्यांयत्फलंलभेत् ३९
तस्माच्छतगुणंपुण्यमेकादश्युपवासिनः
तपस्विनोगृहेयस्यभुंजतेचद्विजोत्तमाः ४०
तत्फलंजायतेनूनमेकादश्युपवासिनः
गोसहस्रेणयत्पुण्यंदत्वावेदांतपारगे ४१
तस्माच्छतगुणंपुण्यमेकादश्युपवासिनः

येषांदेहेत्रयोदेवाब्रह्मविष्णुमहेश्वराः ४२
वसंतितेषांतेतुल्याएकादश्युपवासिनः
तेनराःपुण्यकर्माणोयेभक्ताहरिपूजकाः ४३
एकादशीव्रतस्यापिपुण्यसंख्यानविद्यते
एतत्पुण्यंभवेत्तस्ययत्सुरैरपिदुर्ल्लभम् ४४
एतस्मादर्द्धपुण्यंतुप्राप्यतेनक्तभोजनात्
नक्तस्यार्द्धंभवेत्पुण्यमेकभक्तेनदेहिनाम् ४५
तावद्गर्जंतितीर्थानिदानानिनियमानिच
यावन्नोपोषयेज्जंतुर्वासरंविष्णुवल्लभम् ४६
तस्मात्त्वंपांडवश्रेष्ठव्रतमेतत्समाचर
पुण्यसंख्यांनजानामियत्त्वंपृच्छसिपांडव ४७
एतद्धिकथितंपार्थयद्गोप्यंव्रतमुत्तमम्
एकादशीसमंनास्तिकृत्वायज्ञसहस्रकम् ४८
युधिष्ठिरउवाच-
उत्पन्नासाकथंदेवपुण्याचैकादशीतिथिः
कथंपवित्राविश्वेऽस्मिन्कथंवैदेवताप्रिया ४९
श्रीभगवानुवाच -
पुराकृतयुगेपार्थमुरनामेतिदानवः
अत्यद्भुतोमहारौद्रःसर्वदेवभयंकरः ५०
इंद्रोऽपिनिर्जितस्तेनसर्वदेवास्तथानृप
महासुरेणतेनैवमृत्युनाचदुरात्मना ५१
स्वर्गान्निराकृतास्तेनविचरंतिमहीतले
सशंकाभयभीताश्चसर्वेगत्वामहेश्वरम् ५२
इंद्रेणकथितंसर्वमीश्वरस्यापिचाग्रतः
स्वर्गलोकपरिभ्रष्टाविचरंतिमहीतले ५३
मर्त्येषुसंस्थितादेवानशोभंतेमहेश्वर
उपायंब्रूहिमेदेवह्यमरायांतिकांगतिम् ५४
महादेवउवाच-
देवराजसुरश्रेष्ठयत्रास्तेगरुडध्वजः
शरण्यश्चजगन्नाथःपरित्रातापरायणः ५५

तत्रगच्छसुरश्रेष्ठसवोरक्षांविधास्यति
ईश्वरस्यवचःश्रुत्वादेवराजोमहामतिः ५६
त्रिदशैःसहितोयत्रगतस्तत्रयुधिष्ठिर
जलमध्येप्रसुप्तंतंदृष्ट्वादेवंगदाधरम् ५७
कृतांजलिपुटोभूत्वाइंद्रःस्तोत्रमुदीरयत् ५८
इंद्रउवाच–
ॐनमोदेवदेवेशदेवदानववंदित
दैत्यारेपुंडरीकाक्षत्राहिनोमधुसूदन ५९
सुराःसर्वेसमायाताभयभीताश्चदानवात्
शरणंत्वांजगन्नाथत्राहिमांभक्तवत्सल ६०
त्राहिनोदेवदेवेशत्राहित्राहिजनार्दन
त्राहिवैपुंडरीकाक्षदानवानांविनाशक ६१
त्वत्समीपंगताःसर्वेत्वमेवशरणंप्रभो
शरणागतानांदेवानांसहायंकुरुवैप्रभो ६२
त्वंपतिस्त्वंमतिर्देवत्वंकर्तात्वंचकारणम्
त्वंमातासर्वलोकानांत्वमेवजगतःपिता ६३
भगवन्देवदेवेशशरणागतवत्सल
शरणंतवचायाताभयभीताश्चदेवताः ६४
देवतानिर्जिताःसर्वाःस्वर्गभ्रष्टाःकृताःप्रभो
अत्युग्रेणहिदैत्येनमुरनाम्नामहौजसा
इंद्रस्यवचनंश्रुत्वाविष्णुर्वचनमब्रवीत् ६५
श्रीभगवानुवाच–
कीदृशोदानवःशक्रकिंरूपंकीदृशंबलम्
क्वस्थानंतस्यदुष्टस्यकिंवीर्यंकःपराक्रमः
किंवरंतस्यदुष्टस्यममाख्याहिमहामते ६६
इंद्रउवाच–
पूर्वंबभूवदेवेशब्रह्मवंशसमुद्भवः
तालजंघस्तुनाम्नाचअत्युग्रोऽपिमहासुरः ६७
तस्यपुत्रोहिविख्यातोमुरनामेतिदानवः
अत्युत्कटोमहावीर्योदेवतानांभयंकरः ६८

पुरीचंद्रावतीनाम्नातत्रस्थानेवसत्यसौ
निर्जितादेवताःसर्वास्वर्गात्तेनविवासिताः ६९
इंद्रोऽन्योरोपितस्तेनवातश्चैवहुताशनः
चंद्रसूर्योकृतौचान्यौवायुर्वरुणएवच ७०
सर्वमात्मकृतंतेनसत्यंसत्यंजनार्दन
देवलोकःकृतस्तेनसर्वस्थानविवर्जितः ७१
तस्यतद्वचनंश्रुत्वाकोपमानोजनार्दनः
हनिष्येदानवंदुष्टंदेवतानांभयंकरम् ७२
त्रिदशैःसहितोदेवोगतश्चंद्रावतींपुरीम्
दृष्टोदेवैस्तुदैत्येंद्रोगर्जमानःपुनःपुनः ७३
तेनसर्वेजितादेवगताश्चैवदिशोदश
हरिंनिरीक्ष्यप्रोवाचतिष्ठतिष्ठेतिदानवः ७४
भगवानब्रवीत्तंचक्रोधसंरक्तलोचनः
श्रीभगवानुवाच–
रेदानवदुराचारममबाहुंनिरीक्षय ७५
ततस्तेसम्मुखाःसर्वेविष्णुनादुष्टदानवाः
हताबाणैःपुनर्दिव्यैर्जाताश्चभयविह्वलाः ७६
चक्रंमुक्तंचकृष्णेनदैत्यसैन्येषुपांडव
तेनच्छिन्नास्तुशतशोबहवोनिधनंगताः ७७
एकोपिदानवस्तत्रयुध्यमानोमुहुर्मुहुः
नष्टाःसर्वेसुरास्तेननिर्जितोमधुसूदनः ७८
निर्जितंतेनदैत्येनबाहुयुद्धमजायत
बाहुयुद्धंकृतंतेनदिव्यंवर्षसहस्रकम् ७९
विष्णुश्चिंतांप्रपन्नश्चनष्टाःसर्वाश्चदेवताः
विष्णुश्चनिर्जितस्तेनगतोबदरिकाश्रमम् ८०
गुहासिंहावतीनामतत्रसुप्तोजनार्दनः
योजनद्वादशवतीएकद्वाराचपांडव ८१
तस्यांविष्टःप्रसुप्तश्चदानवोहंतुमुद्यतः
महायुद्धेनतेनैवश्रांतोऽसौयोगमायया ८२
दानवःपृष्ठतोलग्नोप्रविष्टःसतदागुहाम्

प्रसुप्तंतत्रमांदृष्ट्वादानवोहर्षमागतः ८३
इत्थंमांनिर्जितंमत्वाप्रविष्टंशंकयाहरिम्
निःसंदेहंहनिष्यामिदानवानांभयंकरम् ८४
निर्गताकन्यकातत्रविष्णुदेहाद्युधिष्ठिर
रूपवतीसुसौभाग्यादिव्यप्रहरणायुधा ८५
तस्यतेजोंऽशसंभूतामहाबलपराक्रमा
दृष्टासादानवेंद्रेणमुरनाम्नाधनंजय ८६
युद्धंसमाहितंतेनस्त्रियाचैवप्रयाचितम्
कन्यकायुध्यतेतत्रसर्वयुद्धविशारदा ८७
हुंकारैर्भस्मसाज्जातोमुरनामामहासुरः
निहतेदानवेतस्मिंस्तत्रदेवस्त्वबुध्यत ८८
पतितंदानवंदृष्ट्वाततोविस्मयमागतः
केनायंचहतोरौद्रोह्यत्युग्रोममशात्रवः ८९
अत्युग्रंचकृतंकर्ममकारुण्यतःकृतम्
कन्योवाच-
तेनदेवाश्चगंधर्वासयक्षोरगराक्षसाः ९०
इंद्राद्याःसकलाजित्वास्वर्गाच्चैवनिराकृताः
हरिःसुप्तोमयादृष्टोमुरःपृष्ठेसमागतः ९१
संहरिष्यतित्रैलोक्यंसुप्तेचैवजनार्दने
तस्यास्तद्वचनंश्रुत्वाविष्णुर्वचनमब्रवीत् ९२
अहंचनिर्जितोयेनकथंसोऽपित्वयाजितः
एकादश्युवाच-
त्वत्प्रसादाच्चभोस्वामिन्महादैत्योमयाहतः ९३
श्रीभगवानुवाच-
आनंदंत्रिषुलोकेषुमुनयोदेवतागताः
ब्रूहित्वंचमयाभद्रेयत्तेमनसिरोचते
ददामिचनसंदेहोयत्सुरैरपिदुर्ल्लभम् ९४
एकादश्युवाच-
यदितुष्टोऽसिमेदेवसत्यमुक्तंजनार्दन
वरमेकंतुवांच्छामिहृदयेचजगत्पते ९५

प्रार्थयामिचदेवेशईप्सितंचमयाप्रभो
यदिसत्यंजगन्नाथतिस्त्रोवाचोददासिमे ९६
श्रीभगवानुवाच-
सत्यंसत्यंमयाप्रोक्तंग्रवश्यंतवसुव्रते
तिस्त्रोवाचोमयादत्तानचावाक्यंभवेदिह ९७
एकादश्युवाच-
त्रिभुवनेषुचदेवेशचतुर्युगेषुसांप्रतम्
त्रिषुलोकेषुसर्वत्रतादृशंकुरुमेप्रभो ९८
सर्वतीर्थप्रधानंहिसर्वविघ्नविनाशिनी
सर्वसिद्धिकरीदेवीत्वत्प्रसादाद्भवाम्यहम् ९९
मामुपोष्यंतियेभक्त्यातवभक्त्याजनार्दन
सर्वसिद्धिर्भवेत्तेषांयदितुष्टोऽसिमेप्रभो १००
उपवासंचनक्तंचएकभक्तंकरोतिच
तस्यवित्तंचधर्मंचमोन्नंवैदेहिमाधव १०१
विष्णुरुवाच-
यत्त्वंवदसिकल्याणितत्सर्वंचभविष्यति
सर्वान्मनोरथान्भद्रेदास्यसित्वंचनान्यथा १०२
ममभक्ताश्चयेलोकेयेचभक्तास्तुकार्त्तिके
चतुर्युगेषुविख्यातास्त्रिषुलोकेषुवैप्रभो १०३
त्वांचशक्तिमहंमन्येएकादशीव्रतस्थिताः
ममपूजांकरिष्यंतिमोन्नगास्तेनसंशयः १०४
तृतीयाचाष्टमीचैवनवमीचचतुर्दशी
एकादशीविशेषेणतिथिरेषाहरिप्रिया
सर्वतीर्थाधिकंपुरायंसत्यंसत्यंनसंशयः १०५
इदंदत्त्वावरंतस्यैतिस्त्रोवाचोनसंशयः
हृष्टापुष्टाचसंजाताएकादशीमहाव्रता १०६
शत्रुंहंसिपरांतस्यददासिपरमांगतिम्
त्वंहंसिसर्वविघ्नानिसर्वसिद्धिवरप्रदा १०७
उभयोःपन्नयोःपार्थतुल्याएकादशीशुभा
नशुक्लानैवकृष्णाचविभेदंनैवकारयेत् १०८

विभेदोनैवकर्त्तव्यःसमस्तव्रतकारिभिः
दिवावायदिवारात्रौशृणोतिभक्तितत्परः १०९
तिथिरेकाभवेत्सर्वापक्षयोरुभयोरपि
उभयैकादशीस्वल्पाह्यंतेचैवत्रयोदशी ११०
मध्येतुद्वादशीपूर्णात्रिस्पृशासाहरिप्रिया
एकामुपोषयेत्तांवैसहस्रैकादशीफलम् १११
सहस्रगुणितंह्येवंद्वादश्यांपारणेकृते
अष्टम्येकादशीषष्ठीतृतीयाचचतुर्दशी ११२
पूर्वविद्धानकर्तव्यापरविद्धामुपोषयेत्
एकादशीह्यहोरात्रंप्रभातेघटिकाभवेत् ११३
सातिथिःपरिहर्तव्याउपोष्याद्वादशीयुता
एवंविधामयाप्रोक्तापक्षयोरुभयोरपि ११४
एकादश्यांप्रकुर्वीतह्युपवासंनसंशयः
तेयांतिवैष्णवंस्थानंयत्रास्तेगरुडध्वजः ११५
धन्यास्तेमानवालोकेविष्णुभक्तिपरायणाः
एकादश्याश्चमाहात्म्यंसर्वकालेषुयःपठेत् ११६
गोसहस्रफलंसोऽपिपुण्यंप्राप्नोतिमानवः
दिवावायदिवारात्रौयेवैशृण्वंतिभक्तितः ११७
ब्रह्महत्यादिपापेभ्योमुच्यंतेनात्रसंशयः
विष्णुधर्मसमंनास्तिगीतार्थंचनृपोत्तम
एकादशीसमंनास्तिव्रतंपापप्रणाशनम् ११८

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे-
उमामहेश्वरसंवादेएकादश्युत्पत्तिमुरवधोनामाष्टत्रिंशोऽध्यायः३८

एकोनचत्वारिंशोऽध्यायः

युधिष्ठिरउवाच-
वंदेविष्णुंविभुंसाक्षाल्लोकत्रयसुखावहम्
विश्वेशंविश्वकर्तारंपुराणंपुरुषोत्तमम् १
पृच्छामिदेवदेवेशसंशयोऽस्तिमहान्मम
लोकानांचहितार्थायपापानांक्षयहेतवे २

मार्गशीर्षेसितेपक्षेभवेदेकादशीतुया
किंनामकोविधिस्तस्याःकोदेवस्तत्रपूज्यते
एतदाचक्ष्वमेस्वामिन्विस्तरेणयथातथम् ३
श्रीकृष्णउवाच-
साधुपृष्टंत्वयाराजन्साधुतेविमलंयशः
कथयिष्यामिराजेंद्रहरिवासरमुत्तमम् ४
उत्पन्नाचासितेपक्षेद्वादशीममवल्लभा
मार्गशीर्षोत्पत्तिरितिममदेहसमुद्भवा ५
सुरासुरवधार्थायह्युत्पन्नाभरतर्षभ
कथिताचमयासावैतवाग्रेराजसत्तम ६
पूर्वाचैकादशीराजंस्त्रैलोक्येसचराचरे
मार्गशीर्षेसितेपक्षेउत्पत्तिरितिनामतः ७
अतःपरंप्रवक्ष्यामिमार्गशीर्षेसितातुया
यस्याःश्रवणमात्रेणवाजपेयफलंलभेत् ८
मोक्षानामेतिसाप्रोक्तासर्वपापहरापरा
देवंदामोदरंराजन्पूजयेच्चप्रयत्नतः ९
तुलस्यामंजरीभिश्चधूपैर्दीपैःप्रयत्नतः
पूर्वेणविधिनाचैवदशम्येकादशीतथा १०
मोक्षाचैकादशीनाम्नामहापातकनाशिनी
रात्रौजागरणंकार्यंनृत्यगीतस्तवैर्मम ११
शृणुराजन्प्रवक्ष्यामिदिव्यांपौराणिकीकथाम्
यस्याःश्रवणमात्रेणसर्वपापक्षयोभवेत् १२
अधोयोनिगतश्चैवपितरोयस्यपापतः
अस्याश्चपुण्यदानेनमोक्षंयांतिनसंशयः १३
चंपकेनगरेरम्येवैष्णवैश्चविभूषिते
वैखानसोनामनृपःपुत्रवत्पालयेत्प्रजाः १४
वसंतिबहवोविप्रावेदवेदांगपारगाः
ऋद्धिमत्यःप्रजास्तस्यराज्ञोवैखानसस्यहि १५
एवंराज्यंप्रकुर्वाणोरात्रौस्वप्नस्यमध्यतः
स्वकीयपितरोदृष्ट्वाअधोयोनिगतानृप १६

एवंदृष्ट्वाचतान्सर्वान्विस्मयाविष्टमानसः
कथयामासवृत्तांतंस्वप्नजातंद्विजान्प्रति १७
राजोवाच-
मयास्वपितरोदृष्ट्वानरकोपगताद्विजाः
तारयेतितनूजत्वमस्मान्निरयसागरात् १८
एवंब्रुवाणास्तेनूनंरोदमानामुहुर्मुहुः

मयादृष्टाद्विजश्रेष्ठाएतस्माच्चनमेसुखम् १९
एतद्राज्यंममहत्सुखदायिनविद्यते
अश्वागजास्तथासर्वेरोचंतेमेनभोद्विजाः २०
नदारानसुतामह्यंरोचंतेद्विजसत्तमाः
किंकरोमिक्वगच्छामिहृदयंमेऽवरुध्यते २१
तद्व्रतंतंतपोयोगंयेनैवममपूर्वजाः
मोक्षंप्रयांतिसद्योवैकथ्यतांचद्विजोत्तमाः २२
पुत्रेतुजीवितप्रायेबलीयसिमहात्मनि
पितास्तिनरकेघोरेतस्यपुत्रस्यकिंफलम् २३
ब्राह्मणाऊचुः -
पर्वतस्यमुनेराजन्निकटेचाश्रमोमहान्
गम्यतांराजशार्दूलभूतंभव्यंविजानतः २४
तेषांश्रुत्वाततोवाक्यंराजावैखानसोमहान्
जगामचाशुतत्रैवचाश्रमंपर्वतस्यच २५
ब्राह्मणैर्वेष्टितोराजाराजभिश्चसमन्वितः
आश्रमंविपुलंतस्यसंप्राप्तोराजसत्तमः २६
तत्रर्ग्वेदयजुर्वेदसामाध्ययनकोविदैः
वेष्टितंमुनिभिश्चैवद्वितीयंब्रह्मणोयथा २७
दृष्ट्वातंमुनिशार्दूलंराजावैखानसस्तथा
दंडवत्प्रणतिंकृत्वापस्पर्शचरणौमुनेः २८
पप्रच्छकुशलंतस्यसप्तस्वंगेष्वसौमुनिः
राज्येनिष्कंटकत्वंचराज्ञःसौख्यसमन्वितम् २९
राजोवाच -

तवप्रसादाद्भोस्वामिन्कुशलंमेऽङ्गसप्तसु
भक्तायेविष्णुविप्रेषुकथंतेषांचविघ्नता ३०
मयास्वपितरोदृष्टाःस्वप्नेचनरकेस्थिताः
कस्यपुगयस्यसामर्थ्यान्मोत्तंयांतिद्विजोत्तम ३१
अयंमेसंशयःस्वामिन्प्रष्टुंतंत्वामुपागतः
उपायःकश्चिदेवात्रकर्तव्योमुनिसत्तम ३२
एतद्वाक्यंततःश्रुत्वापर्वतोसुनिसत्तमः
ध्यानस्तिमितनेत्रोऽभूत्तपस्वीब्रह्मसंनिभः ३३
मुहूर्तमेकंध्यानस्थोभूपतिंप्रत्युवाचह
ज्ञातंहितवराजेंद्रपितॄणांपूर्वचेष्टितम् ३४
पूर्वजन्मनितातस्तेत्तत्रियोराज्यगर्वितः
सपत्न्याअृतुकालेतुराजधर्मप्रवर्तितः ३५
गतोग्रामेतुतांत्यक्त्वाकार्यार्थीनिजयोषितम्
तवपित्रातुतस्याश्चनदत्तमृतुदानकम् ३६
तेनपापप्रभावेननरकेपितृभिःसह
पतितोराजशार्दूलतवतातःसुदारुगो ३७
ततःपुनरुवाचेदंराजावैखानसोमुनिम्
केनव्रतप्रभावेनमोत्तस्तेषांभवेन्मुने ३८
मुनिरुवाच–
मार्गशीर्षेसितेपत्तेमोत्तानामेतिनामतः
सर्वैश्चेतद्व्रतंकार्यंपित्रेपुगयंप्रदीयताम् ३९
तेनपुगयप्रभावेनमोत्तस्तेषांभविष्यति
सत्यमेतन्महाभागब्रह्मणोवचनंयथा ४०
मुनेर्वाक्यंततःश्रुत्वास्वगृहंपुनरागतः
मार्गशीर्षस्तथामासःप्राप्तःकष्टेनतेनवै ४१
मुनेर्वाक्येनतत्कृत्वाव्रतंवैखानसोनृपः
अददत्पुगयमखिलैःसार्द्धंपित्रेसभूमिपः ४२
दत्तेपुगयत्तगोनैवपुष्पवृष्टिरभूद्दिवि
वैखानसस्यतातोवैपितृभिर्मोत्तमाविशत् ४३
राजानंचांतरित्तेसगिरंपुगयामुवाचह

स्वस्तिस्वस्तीतितेपुत्रप्रोच्यचैवंदिवंगतः ४४
एवंयःकुरुतेराजन्मोक्षामेकादशींशुभाम्
तस्यपापानिनश्यंतिमृतोमोक्षमवाप्नुयात् ४५
नातःपरतराकाचित्मोक्षदैकादशीभवेत्
पुण्यसंख्यांनजानामिराजन्मेप्रियकृद्व्रतम् ४६
चिंतामणिसमाह्येषानृणांमोक्षप्रदायिनी
पठनाच्छ्रवणादस्यावाजपेयफलंलभेत् ४७

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायांउत्तरखंडे-
उमापतिनारदसंवादेमार्गशीर्षशुक्लमोक्षदा
एकादशीनामैकोनचत्वारिंशोऽध्यायः ३९

चत्वारिंशोऽध्यायः

युधिष्ठिरउवाच-
पौषस्यकृष्णपक्षेतुकिंनामैकादशीभवेत्
किंनामकोविधिस्तस्याएतद्विस्तरतोवद
एतदाख्याहिभोस्वामिन्कोदेवस्तत्रपूज्यते १
श्रीकृष्णउवाच-
कथयिष्यामिराजेंद्रभवतःस्नेहबंधनात्
तुष्टिर्मेनतथाराजन्यज्ञैर्बहुलदक्षिणैः २
यथामेतुष्टिरायातिह्येकादशीव्रतेनवै
तस्मात्सर्वप्रयत्नेनकर्त्तव्योहरिवासरः ३
सत्यमेतन्नवैमिथ्याधर्मिष्ठानांविशारद
पौषस्यकृष्णपक्षेयासफलानामनामतः ४
तस्यांनारायणंदेवंपूजयेच्चयथाविधि
पूर्वेणैवविधानेनकर्त्तव्यैकादशीशुभा ५
नागानांचयथाशेषोपक्षिणांपन्नगाशनः
देवानांचयथाविष्णुर्द्विपदानांयथाद्विजः ६
व्रतानांचयथाराजन्श्रेष्ठाचैकादशीतिथिः
तेजनाश्चैवभोराजन्पूज्यावैसर्वदामम ७
हरिवासरसंलीनाःकुर्वंत्येकादशीव्रतम्

इहैवधनसंयुक्तामृतामोक्षंलभंतिते ८
सफलायांफलैराजन्पूजयेन्नामतोहरिम्
नारिकेलफलैश्चैवक्रमुकैर्बीजपूरकैः ९
जंबीरैर्दाडिमैश्चैवतथाधात्रीफलैःशुभैः
लवंगैर्बदरीभिश्चतथाम्रैश्चविशेषतः १०
पूजयेद्देवदेवेशंधूपदीपैस्तथैवच
सफलायांविशेषेणदीपदानंतुकारयेत् ११
रात्रौजागरणंचैवकर्त्तव्यंसहवैष्णवैः
यावन्निमेषोनेत्रस्यतावज्जागर्तियोनिशि १२
एकाग्रमनसोराजन्तस्यपुण्यंशृणुष्वहि
तत्समोनास्तियज्ञोवैतीर्थंवातत्समंनहि १३
सर्वव्रतानिराजेंद्रकलांनार्हंतिषोडशीम्
एवंवर्षसहस्राणितपसानैवयत्फलम् १४
तत्फलंसमवाप्नोतियःकरोतिहिजागरम्
श्रूयतांराजशार्दूलसफलायाःकथाशुभा १५
चंपावतीतिविख्यातापुरीमाहिष्मतस्यच
बभूवुस्तस्यराजर्षेःपुत्राःपंचकुमारकाः १६
तेषांमध्येतुज्येष्ठोवैमहापापरतःसदा
परदाराभिचारीचवेश्यासक्तश्चमद्यपः १७
पितुर्द्रव्यंतुतेनैवगमितंपापकर्मणा
असद्वृत्तिरतोनित्यंभूसुराणांतुनिंदकः १८
वैष्णवानांचदेवानांनित्यंनिंदांकरोतिसः
ईदृशंतुततोदृष्ट्वापुत्रंमाहिष्मतोनृपः १९
नाम्नातुलुंपकइतिराजपुत्रेषुचापठत्
राज्यान्निष्कासितस्तेनपित्राचैवतुबंधुभिः २०
सचैवंपरिवारैस्तुत्यक्तश्चपरिपंथिवत्
लुंपकोऽपितथात्यक्तश्चिंतयामासवैतदा २१
त्यक्तोऽहबांधवैःपित्राराज्यान्निष्कासितःकिल
इतिसंचिंत्यमानोऽसौमतिंपापेतदाकरोत् २२
मयागंतव्यमेवास्तुदारुणेगहनेवने

तस्माच्चैवपुरंसर्वंलुंपयिष्यामिवैपितुः २३
इत्येवंसमतिंकृत्वालुंपकोदैवयोगतः
निर्जगामपुरात्तस्माद्गतोऽसौगहनेवने २४
जीवघातरतोनित्यंस्तेयद्यूतकलानिधिः
सर्वंचनगरंतेनमुषितंपापकर्मणा २५
स्तेयाभिगामीनगरेगृहीतःसनिशाचरैः
उवाचतान्सुतोऽहवैराज्ञोमाहिष्मतस्यच २६
सतैर्मुक्तःपापकर्माचागतोविपिनंपुनः
आमिषाभिरतोनित्यंतरोर्वैफलभक्षणे २७
आश्रमस्तस्यदुष्टस्यवासुदेवस्यसंनिधौ
अश्वत्थोवर्त्ततेतत्रजीर्णश्चबहुवार्षिकः २८
देवत्वंतस्यवृक्षस्यविपिनेवर्ततेमहत्
तत्रैवनिवसंश्चैवलुंपकःपापबुद्धिमान् २९
गतेबहुतिथेकालेकस्यचित्पुण्यसंचयात्
पौषस्यकृष्णपक्षेतुदशम्यांदिवसेतथा ३०
फलानिभुक्त्वावृक्षाणांरात्रौशीतेनपीडितः
लुंपकोनामपापिष्ठोवस्त्रहीनोगतेक्षणः ३१
पीड्यमानोऽतिशीतेनहरिवृक्षसमीपतः
ननिद्रानसुखंतस्यगतप्राणइवाभवत् ३२
आछाद्यदशनैरास्यमेवंनीतानिशाखिला
भानूदयेऽपिपापिष्ठोनलेभेचेतनांतदा ३३
लुंपकोगतसंज्ञस्तुसफलायादिनेतथा
रवौमध्यंगतेचैवसंज्ञांलेभेसलुंपकः ३४
इतस्ततोविलोक्याथव्यथितश्चतदासनात्
स्खलत्पद्यांप्रचलितःखंजन्निवमुहुर्मुहुः ३५
वनमध्येगतस्तत्रक्षुत्क्षामःपीडितोऽभवत्
नशक्तिर्जीवघातेतुलुंपकस्यदुरात्मनः ३६
फलानिचतदाराजन्नाजहारसलुंपकः
यावत्समागतस्तत्रतावदस्तंगतोरविः ३७
किंभविष्यतितातेतिसविलापंचकारह

फलानितत्रभूरीणिवृत्तमूलेन्यवेशयत् ३८
इत्युवाचफलैरेभिःश्रीपतिस्तुष्यतांहरिः
इत्युक्त्वालुंपकश्चैवनिद्रांलेभेनवैनिशि ३९
रात्रौजागरणंमेनेविष्णुस्तस्यदुरात्मनः
फलैस्तुपूजनंमेनेसफलायास्तथानघ ४०
अकस्माद्व्रतमेवैतत्कृतवान्वैसलुंपकः
तेनपुरायप्रभावेनप्राप्तंराज्यमकंटकम् ४१
सूर्यस्योदयनंयावत्तावद्विष्णुर्जगामह
दिवितत्कालमुत्पन्नावागुवाचाशरीरिणी ४२
राज्यंप्राप्स्यसिपुत्रत्वंसफलायाःप्रसादतः
तथेत्युक्तेतुवचसिदिव्यरूपधरोऽभवत् ४३
मतिरासीत्ततस्तस्यपरमावैष्णवीनृप
दिव्याभरणशोभाढ्योलेभेराज्यमकंटकम् ४४
कृतंराज्यंतुतेनैवंवर्षाणिदशपंचच
मनोदास्तस्यपुत्रास्तुदाराःकृष्णप्रसादतः ४५
आशुराज्यंपरित्यज्यपुत्रेचैवसमर्प्यच
गतःकृष्णस्यसांनिध्यंयत्रगत्वानशोचति ४६
एवंयःकुरुतेराजन्सफलाव्रतमुत्तमम्
इहलोकेसुखंप्राप्यमृतोमोत्तमवाप्नुयात् ४७
धन्यास्तेमानवालोकेसफलायांचयेरताः
तेषांचसफलंजन्मनात्रकार्याविचारणा ४८
पठनाच्छ्रवणाच्चैवकरणाच्चविशांपते
राजसूयस्ययज्ञस्यफलमाप्नोतिमानवः ४९

इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्र्यांसंहितायां-
मुत्तरखंडेउमापतिनारदसंवादेपौषकृष्णासफलैकादशीनाम
चत्वारिंशोऽध्यायः ४०

एकचत्वारिंशोऽध्यायः

युधिष्ठिरउवाच-
कथितावैत्वयाकृष्णसफलैकादशीशुभा

कथयस्वप्रसादेनशुक्लपक्षस्ययाभवेत् १
किन्नामकोविधिस्तस्याःकोदेवस्तत्रपूज्यते
कस्मैतुष्टोहृषीकेशस्त्वमेवपुरुषोत्तमः २
श्रीकृष्णउवाच-
शृणुराजन्प्रवक्ष्यामिशुक्लापौषस्ययाभवेत्
कथयामिमहाराजलोकानांहितकाम्यया ३
पूर्वेणविधिनाराजन्कर्त्तव्यैषाप्रयत्नतः
पुत्रदानामनाम्नासासर्वपापहरापरा ४
नारायणोऽधिदेवोऽस्याकामदःसिद्धिदायकः
नातःपरतराकाचित्त्रैलोक्येसचराचरे ५
विद्यावंतंयशस्वंतंकरोतिचनरंहरिः
शृणुराजन्प्रवक्ष्यामिकथांपापहरांपराम् ६
भद्रावत्यांपुराह्यासीत्पुर्यांराजासुकेतुमान्
तस्यराज्ञस्तथाराज्ञीचंपकानामवर्त्तते ७
पुत्रहीनेनराज्ञाचकालेनीतोमनोरथैः
नैवात्मजंनृपोलेभेवंशकर्त्तारमेवच ८
तेनैवराज्ञाधर्मेणचिंतितंबहुकालतः
किंकरोमिक्वगच्छामिसुतप्राप्तिःकथंभवेत् ९
नराष्ट्रेनपुरेसौख्यंलेभेराजासुकेतुमान्
साध्व्यस्वकांतयासार्द्धंप्रत्यहंदुःखितोऽभवत् १०
तावुभौदंपतीनित्यंचिंताशोकपरायणौ
पितरोऽस्यजलंदत्तंकवोष्णमुपभुंजते ११
राज्ञःपश्चान्नपश्यामोयोऽस्मान्संतर्पयिष्यति
इत्येवंसंस्मरंतोऽस्यदुःखिताःपितरोऽभवन् १२
नबांधवानमित्राणिनामात्याःसुहृदस्तथा
रोचयंत्यस्यभूपस्यनगजाश्वाःपदातयः १३
नैराश्यंभूपतेस्तस्यनित्यंमनसिवर्त्तते
नरस्यपुत्रहीनस्यनास्तिवैजन्मनःफलम् १४
अपुत्रस्यगृहंशून्यंहृदयंदुःखितंसदा
पितृदेवमनुष्याणांनानृणत्वंसुतंविना १५

तस्मात्सर्वप्रयत्नेनसुतमुत्पादयेन्नरः
इहलोकेयशस्तेषांपरलोकेशुभागतिः १६
येषांतुपुरायकर्तॄणांपुत्रजन्मगृहेभवेत्
आयुरारोग्यसंपत्तिस्तेषांगेहेप्रवर्तते १७
पुत्रजन्मगृहेयेषांलोकानांपुरायकारिणाम्
पुरायंविनानचप्राप्तिर्विष्णुभक्तिंविनानृप १८
पुत्राश्चसंपदोवापिनिश्चयादितिमेमतिः
एवंविचिंत्यमानोऽसौनशर्मलभतेनृपः १९
प्रत्यूषेचिंतयद्राजानिशीथेचिंतयत्ततः
स्वयमात्मविनाशंचचिंतयामासकेतुमान् २०
आत्मघातेदुर्गतिंचचिंतयित्वातदानृपः
दृष्ट्वात्मदेहंपतितमपुत्रत्वंतथैवच २१
पुनर्विचार्यात्मबुद्ध्याआत्मनोहितकारणम्
अश्वारूढस्ततोराजाजगामगहनंवनम् २२
पुरोहितादयःसर्वेनजानंतिगतंनृपम्
गंभीरेविपिनेराजामृगपक्षिनिषेविते २३
विचचारतदाराजावनवृक्षान्विलोकयन्
वटानश्वत्थबिल्वांश्चखर्जूरान्पनसांस्तथा २४
बकुलान्सप्तपर्णांश्चतिंदुकांस्तिलकानपि
शालांस्तालांस्तमालांश्चददर्शसरलान्नृपः २५
इंगुदीककुभांश्चैवश्लेष्मातकनगांस्तथा
शल्लकान्करमर्दांश्चपाटलान्बदरानपि २६
अशोकांश्चपलाशांश्चशृगालाञ्शशकानपि
वनमार्जारमहिषान्शल्लकांश्चमरानपि २७
ददर्शभुजगान्राजावल्मीकादर्द्धनिःसृतान्
तथा वनगजान् मत्तान् कलभैःसहसंगतान् २८
यूथपांश्चचतुर्दंतान्करिणीयूथमध्यगान्
तान्दृष्ट्वाचिंतयामासआत्मनःसगजान्नृपः २९
तेषांसविचरन्मध्येराजाशोभामवापह
महदाश्चर्यसंयुक्तंददृशेविपिनंनृपः ३०

मार्गेशिवारुतान्शृरावन्नुलूकविरुतंतथा
तांस्तानृत्तमृगान्पश्यन्बभ्रामवनमध्यतः ३१
एवंददर्शगहनंनृपोमध्यगतेरवौ
त्तुत्तृड्भ्यांपीडितोराजाइतश्चेतश्चधावति ३२
नृपतिश्चिंतयामाससंशुष्कगलकंधरः
मयातुकिंकृतंकर्मप्राप्तंदुःखंयदीदृशम् ३३
मयावैतोषितादेवायज्ञैःपूजाभिरेवच
तथैवब्राह्मणादानैस्तोषितामिष्टभोजनैः ३४
प्रजाश्चैवसदाकालंपुत्रवत्पालिताभृशम्
कस्माद्दुःखंमयाप्राप्तमीदृशंदारुणंमहत् ३५
इतिचिंतापरोराजाजगामैवाग्रतोवनम्
सुकृतस्यप्रभावेनसरोदृष्टमनुत्तमम् ३६
मीनसंस्पर्शमानंचपद्मैश्चापरशोभितम्
कारंडैश्चक्रवाकैश्चराजहंसैश्चशोभितम् ३७
मकरैर्बहुभिर्मत्स्यैरन्यैर्जलचरैर्युतम्
समीपेसरसस्तस्यमुनीनामाश्रमान्बहून् ३८
ददर्शराजालत्तमीवान्शकुनैःशुभशंसिभिः
दत्तिणंप्रास्फुरन्नेत्रमथसव्येतरःकरः ३९
प्रास्फुरन्नृपतेस्तस्यकथयञ्शोभनंफलम्
तस्यतीरेमुनीन्दृष्ट्वाकुर्वाणन्नैगमंजपम् ४०
हर्षेणमहताविष्टोबभूवनृपनंदनः
अवतीर्यहयात्तस्मान्मुनीनामग्रतःस्थितः ४१
पृथक्पृथग्ववंदेऽसौमुनींस्तान्शंसितव्रतान्
कृतांजलिपुटोभूत्वादंडवच्चपुनःपुनः ४२
प्रत्यूचुस्तेऽपिमुनयःप्रसन्नानृपतेवयम्
राजोवाच-
केभवंतोऽत्रकथ्यंतांकाचाख्याभवतामपि
किमर्थंसंगतायूयंसत्यंवदतमेऽग्रतः ४३
मुनयऊचुः-
विश्वेदेवावयंराजन्स्नानार्थमिहचागताः

माघोनिकटमायातएतस्मात्पंचमेऽहनि ४४
अद्यचैकादशीराजन्पुत्रदानामनामतः
पुत्रंददात्यसौविष्णुःपुत्रदाकारिणांनृणाम् ४५
राजोवाच-
एषवैसंशयोमह्यंपुत्रस्योत्पादनेमहान्
यदितुष्टाभवंतोवैपुत्रंमेदीयतांतदा ४६
मुनिरुवाच-
अद्यैवदिवसेराजन्पुत्रदानामवर्तते
एकादशीतिविख्यातंक्रियतांव्रतमुत्तमम् ४७
अभिषेकात्ततोऽस्माकंकेशवस्यप्रसादतः
अवश्यंतवराजेंद्रपुत्रप्राप्तिर्भविष्यति ४८
इत्येवंवचनात्तेषांकृतंराज्ञाव्रतोत्तमम्
मुनीनामुपदेशेनपुत्रदायाविधानतः ४९
द्वादश्यांपारणंकृत्वामुनीन्नत्वापुनःपुनः
आजगामगृहंराजाराज्ञीगर्भमथादधौ ५०
पुत्रोजातःसूतिकालेतेजस्वीपुण्यकर्मणा
पितरंतोषयामासप्रजापालोबभूवसः ५१
तस्माद्राजन्प्रकर्त्तव्यंपुत्रदाव्रतमुत्तमम्
लोकानांतुहितार्थायतवाग्रेकथितंमया ५२
एकचित्तास्तुयेमर्त्याःकुर्वंतिपुत्रदाव्रतम्
पुत्रान्प्राप्येहलोकेतुमृतास्तेस्वर्गगामिनः
पठनाच्छ्रवणाद्राजन्नग्निष्टोमफलंलभेत् ५३

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे-
उमापतिनारदसंवादेपौषशुक्लपुत्रदैकादशीनाम
एकचत्वारिंशोऽध्यायः ४१

द्विचत्वारिंशोऽध्यायः

युधिष्ठिरउवाच-
साधुकृष्णजगन्नाथआदिदेवजगत्पते
कथयस्वप्रसादेनकृपांकुरुममोपरि १

माघस्यकृष्णपक्षेतुकावाचैकादशीभवेत्
किंनामकोविधिस्तस्याएतद्विस्तरतोवद २
श्रीभगवानुवाच-
शृणुत्वंनृपशार्दूलकृष्णमाघस्ययाभवेत्
षट्तिलानामविख्यातासर्वपापप्रणाशिनी १
षट्तिलायाःशृणुष्वत्वंकथांपापहरांशुभाम्
यांपुलस्त्योमुनिश्रेष्ठोदालभ्यंप्रतिचोक्तवान् २
दालभ्यउवाच-
मर्त्यलोकमनुप्राप्ताःपापंकुर्वंतिजंतवः
ब्रह्महत्यादिपापैश्चयुक्तायेविविधादिभिः ३
परद्रव्यापहाराश्चपरव्यसनमोहिताः
कथंनयांतिनरकंब्रह्मंस्तद्ब्रूहितत्त्वतः ४
अनायासेनभगवन्दानेनाल्पेनकेनचित्
पापंप्रशमनंयातिएतन्मेवक्तुमर्हसि ५
पुलस्त्यउवाच-
साधुसाधुमहाभागगुह्यमेतत्सुदुर्ल्लभम्
यन्नकस्यचिदाख्यातंविष्णुब्रह्मेंद्रदैवतैः ६
तदहंकथयिकष्यामित्वयापृष्टोद्विजोत्तम
माघमासेतुसंप्राप्तेशुचिस्नातोजितेंद्रियः ७
कामक्रोधाभिमानेर्ष्यालोभपैशुन्यवर्जितः
देवदेवंचसंस्मृत्यपादौप्रक्षाल्यवारिभिः ८
भूमावपतितंगृह्यगोमयंतत्रमानवः
तिलान्प्रक्षिप्यकार्पासंपिंडिकाश्चैवकारयेत् ९
अष्टोत्तरशतंचैवनात्रकार्याविचारणा
ततोमाघेचसंप्राप्तेह्याषाढर्क्षंभवेद्यदि १०
मूलंवाकृष्णपक्षस्यैकादशीनियमांस्ततः
गृह्णीयात्पुण्यकालेचविधानंतत्रमेशृणु ११
देवदेवंसमभ्यर्च्यसुस्नातःप्रयतःशुचिः
कृष्णनामानिसंकीर्त्यपुनःप्रस्खलितादिषु १२
रात्रौजागरणंकुर्यादादौहोमंचकारयेत्

अर्चयेद्देवदेवेशंद्वितीयेऽह्निपुनर्हरिम् १३
चंदनागुरुकर्पूरैर्नैवेद्यंकृसरंतथा
संस्मृत्यनाम्नाचततःकृष्णाख्येनपुनःपुनः १४
कूष्मांडैर्नारिकेरैश्चह्यथवाबीजपूरकैः
सर्वाभावेऽपिविप्रेंद्रशस्तपूगफलैर्वृतम्
अर्घंदद्याद्विधानेनपूजयित्वाजनार्दनम् १५
कृष्णकृष्णकृपालुस्त्वमगतीनांगतिर्भव
संसारार्णवमग्नानांप्रसीदपुरुषोत्तम १६
नमस्तेपुंडरीकाक्षनमस्तेविश्वभावन
सुब्रह्मरायनमस्तेऽस्तुमहापुरुषपूर्वज
गृहाणार्घ्यंमयादत्तंलक्ष्म्यासहजगत्पते १७
इत्यर्घमंत्रः
ततस्तुपूजयेद्विप्रमुदकुंभंप्रदापयेत्
छत्रोपानहवस्त्रैश्चकृष्णोमेप्रीयतामिति १८
कृष्णाधेनुःप्रदातव्यायथाशक्तिद्विजोत्तमे
तिलपात्रंद्विजश्रेष्ठदद्यात्पात्रविचक्षणः १९
स्नानेप्राशनकेशस्तास्तथाकृष्णतिलामुने
तान्प्रदद्यात्प्रयत्नेनयथाशक्तिद्विजोत्तमे
तिलप्ररोहजाःक्षेत्रेयावत्संख्यास्तिलाद्विज २०
तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते
तिलस्नायीतिलोद्वर्तीतिलहोमीतिलोदकी २१
तिलदाताचभोक्ताचषट्तिलाःपापनाशनाः
नारदउवाच–
कृष्णकृष्णमहाबाहोनमस्तेविश्वभावन २२
षट्तिलैकादशीभूतंकीदृशंफलमस्तिवै
सोपाख्यानंममब्रूहियदितुष्टोऽसियादव
श्रीकृष्णउवाच
शृणुराजन्यथावृत्तंदृष्टंतत्कथयामिते
मर्त्यलोकेपुराह्यासीद्ब्राह्मरायेकाचनारद
व्रतचर्यारतानित्यंदेवपूजारतासदा २३

मासोपवासनिरताममभक्ताचसर्वदा
कृष्णोपवाससंयुक्ताममपूजापरायणा २४
शरीरंक्लेशितंचैवउपवासैर्द्विजोत्तम
देवानांब्राह्मणानांचकुमारीणांचभक्तितः २५
गृहादिकंप्रयच्छंतीसर्वकालंमहासती
अतिकृच्छ्ररतासातुसर्वकालंतुवैद्विज २६
नदत्ताभिक्षुकेभिक्षाब्राह्मणानचतर्पिताः २७
ततःकालेनमहतामयावैचिंतितंद्विज
शुद्धमस्याःशरीरंहिव्रतैःकृच्छ्रैर्नसंशयः २८
अर्चितोवैष्णवोलोकःकायक्लेशेनवैतया
नदत्तमन्नदानंहियेनतृप्तिःपराभवेत् २९
एवंज्ञात्वाअहंब्रह्मन्मर्त्यलोकमुपागतः
कापालंरूपमास्थायभिक्षापात्रेचयाचिता ३०
कस्मात्त्वमागतोब्रह्मन्क्वयासिवदमेऽग्रतः
पुनरेवमयाप्रोक्तंदेहिभिक्षांचसुंदरि ३१
तयाकोपेनमहतामृत्पिंडस्ताम्रभाजने
क्षिप्तोयावदहंब्रह्मन्पुनःस्वर्गंगतोद्विज ३२
ततःकालेनमहतातापसीसुमहाव्रता
सदेहास्वर्गमायाताव्रतचर्याप्रभावतः ३३
मृत्पिंडिकाप्रदानेनगृहंप्राप्तंमनोरमम्
संजातंचैवविप्रर्षेधान्यराशिविवर्जितम् ३४
गृहंयावन्निरीक्षेतनकिंचित्तत्रपश्यति
तावद्गृहाद्विनिष्क्रांताममांतेचागताद्विज ३५
क्रोधेनमहताविष्टमिदंवचनमब्रवीत्
मयाव्रतैश्चकृच्छ्रैश्चउपवासैरनेकशः ३६
पूजयाराधितोदेवःसर्वलोकस्यपालकः
नतत्रदृश्यतेकिंचिद्गृहेममजनार्दन ३७
ततश्चोक्तंमयातस्यैगृहंगच्छमहाव्रते
आगमिष्यंतिसुतरांकौतूहलसमन्विताः ३८
देवपत्न्योहिद्रष्टुंत्वांविस्मयाभिसमन्विताः

द्वारंनोद्घाटयविनाषट्तिलापुरयवाचनात् ३९
एवमुक्तामयासातुगतावैमानुषीतदा
अत्रांतरेसमायातादेवपत्न्यश्चवाडव ४०
ताभिश्चकथितंतत्रत्वांद्रष्टुंहिसमागताः
द्वारमुद्घाटयस्वाद्यत्वांप्रपश्यामशोभने ४१
मानुष्युवाच-
यदिमद्दर्शनंकार्यंसत्यंवाच्यंविशेषतः
षट्तिलायाव्रतंपुरयंद्वारोद्घाटनकारणात् ४२
श्रीकृष्णउवाच-
एकापिनावदत्तत्रषट्तिलैकादशीव्रतम्
अन्ययाकथितंतत्रद्रष्टव्यामानुषीमया ४३
ततोद्वारंसमुद्घाटयदृष्टाताभिश्चमानुषी
नदेवीनचगंधर्वीनासुरीनचपन्नगी ४४
दृष्टापूर्वंतथानारीयादृशीयंद्विजर्षभ
देवीनामुपदेशेनषट्तिलायाव्रतंकृतम् ४५
मानुष्यासत्यव्रतयाभुक्तिमुक्तिफलप्रदम्
रूपकांतिसमायुक्तात्तरोनसमवापसा ४६
धनंधान्यंचवस्त्रादिसुवर्णंरौप्यमेवच
भवनंसर्वसंपन्नंषट्तिलायाःप्रभावतः ४७
रूपकांतिसमायुक्तात्तरोनसमपद्यत ४८
अतितृष्णानकर्त्तव्यावित्तशाठ्यंविवर्जयेत्
आत्मवित्तानुसारेणतिलान्वस्त्राणिदापयेत् ४९
लभतेचैवमारोग्यंनरोजन्मनिजन्मनि
नदारिद्र्यंनकष्टत्वंनचदौर्भाग्यमेवच ५०
संभवेद्वैद्विजश्रेष्ठषट्तिलासमुपोषणात्
अनेनविधिनाभूपतिलदातानसंशयः ५१
मुच्यतेपातकैःसर्वैरनायासेनमानवः
दानंचविधिवत्पात्रेसर्वपातकनाशनम्
नानर्थःकश्चिन्नायासःशरीरेनृपसत्तम ५२
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमा

पतिनारदसंवादेमाघकृष्णाषट्तिलैकादशीनामद्विचत्वारिंशोऽध्यायः४२

त्रिचत्वारिंशोऽध्यायः

युधिष्ठिरउवाच–
साधुकृष्णत्वयाप्रोक्तमादिदेवोभवान्प्रभो
स्वेदजाश्चंडजाश्चैवउद्भिज्जाश्चजरायुजाः १
तेषांकर्त्ताविकर्त्तात्वंपालकःक्षयकारकः
माघस्यकृष्णपक्षेतुषट्तिलाकथितात्वया २
शुक्लेचकाभवेद्देवकथयस्वप्रसादतः
किंनामकोविधिस्तस्याःकोदेवस्तत्रपूज्यते ३
श्रीकृष्णउवाच–
कथयिष्यामिराजेंद्रशुक्लेमाघस्ययाभवेत्
जयानामेतिविख्यातासर्वपापहरापरा ४
पवित्रापापहंत्रीचकामदामोक्षदानृणाम्
ब्रह्महत्यापहंत्रीचपिशाचत्वविनाशिनी ५
नैवतस्याव्रतेचीर्णेप्रेतत्वंजायतेनृणाम्
नातःपरतराकाचित्पापघ्नीमोक्षदायिनी ६
एतस्मात्कारणाद्राजन्कर्त्तव्यासाप्रयत्नतः
श्रूयतांराजशार्दूलकथापौराणिकीशुभा ७
पंकजेचपुराणेऽस्यामहिमाकथितोमया
एकदानाकलोकेवैइंद्रोराज्यंचकारह ८
देवास्तत्रसुखेनैवनिवसंतिमनोरमे
पीयूषपाननिरताश्चप्सरोगणसेविताः ९
नंदनंतुवनंतत्रपारिजातोपसेवितम्
रमयंतिरमंतेऽत्रश्चप्सरोभिर्दिवौकसः १०
एकदारममाणोऽसौदेवेंद्रःस्वेच्छयानृप
नर्त्तयामासवैहर्षात्पंचाशत्कोटिनायकः ११
गंधर्वास्तत्रगायंतिगंधर्वःपुष्पदंतकः
चित्रसेनस्तुतत्रैवचित्रसेनसुतातथा १२
मालिनीतिचनाम्नातुचित्रसेनस्ययोषिता

मालिन्यास्तुसमुत्पन्नापुष्पदंतीचनामतः १३
पुष्पदंतस्यपुत्रोऽसौमाल्यवान्नामनामतः
पुष्पदंत्याश्चरूपेणमाल्यवानतिमोहितः १४
तयाह्येवंकटाक्षैश्चमाल्यवांश्चवशीकृतः
लावरायंरूपसंपन्नंतस्यारूपंनिशामय १५
बाहूतस्याश्चकामेनकंठपाशौकृताविव
कर्णायतेतुनयनेरक्तांतेघूर्णितेतथा १६
कर्णौतुशोभनौतस्याःकुराडलाभ्यांनृपोत्तम
कंबुग्रीवायुतासैवदिव्याभरणभूषिता १७
पीनोन्नतौकुचौतस्यास्तौहेमकलशाविव
मध्यंक्षामंचचार्वंग्यामुष्टिग्राह्यमनुत्तमम् १८
नितंबौविस्तृतौचास्याविस्तीर्णाजघनस्थली
चरणौशोभमानौचरक्तोत्पलसमद्युती १९
ईदृश्यापुष्पवत्यासमाल्यवानतिमोहितः
शक्रस्यपरितोषायनृत्यार्थंतौसमागतौ २०
गायमानौतुतौतत्रअप्सरोगणसेवितौ
मदनाभिपरीतांगौपुष्पदंतीचमाल्यवान् २१
परस्परानुरागेणव्यामोहवशमागतौ
नशुद्धगानंगायेतांचित्तभ्रमसमन्वितौ २२
बद्धदृष्टीतथान्योन्यंकामबाणवशंगतौ
ज्ञात्वालेखर्षभस्तत्रसंगतंमानसंतयोः २३
तालक्रियामानलोपात्तथागीतविसर्जनात्
चिंतयित्वातुमघवाह्यवमानंतथात्मनः २४
कुपितश्चतयोरर्थेशापंदास्यन्निदंजगौ
धिग्धिग्वांपतितौमूढावाज्ञाभंगकृतौमम २५
युवांपिशाचौभवतांदंपतीभावधारिणौ
मर्त्यलोकमनुप्राप्तौभुंजानौकर्मणःफलम् २६
एवंमघवताशप्तावुभौदुःखितमानसौ
हिमवंतंगिरिंप्राप्ताविंद्रशापाद्विमोहितौ २७
उभौपिशाचतांप्राप्तौदारुणंदुःखमेवच

संतप्तमानसौतत्रहिमकृच्छ्रगतावुभौ २८
गंधर्वत्वमप्सरस्त्वंनजानीतोविमोहितौ
पीड्यमानौनिदाघेनदेहपातकजेनच २९
ननिशायांसुखंशांतिंलभेतेकर्मपीडितौ
परस्परंवादमानौचेरतुर्गिरिगह्वरे ३०
पीड्यमानौतुशीतेनतुषारप्रभवेनतौ
दंतघर्षंप्रकुर्वाणौरोमांचितवपुर्द्धरौ ३१
ऊचेपिशाचःसतदातांपत्नींस्वांपिशाचिकाम्
किमनल्पकृतंपापंदारुणंरोमहर्षणम् ३२
येनप्राप्तंपिशाचत्वंस्वेनदुष्कृतकर्मणा
नरकंदारुणंमत्वापिशाचत्वंचदुःखदम् ३३
तस्मात्सर्वप्रयत्नेनपातकंनसमाचरेत्
इतिचिंतापरौतत्रतावास्तांदुःखकर्षितौ ३४
दैवयोगात्तयोःप्राप्तामाघस्यैकादशीतिथिः
जयानामेतिविख्यातातिथीनामुत्तमातिथिः ३५
तस्मिन्दिनेतुसंप्राप्तेतावाहारविवर्जितौ
आसातेतत्रनृपतेजलपानविवर्जितौ ३६
नकृतोजीवघातश्चनपत्रफलभक्षणम्
अश्वत्थस्यसमीपेतौसर्वदादुःखसंयुतौ ३७
रविरस्तंगतोराजंस्तथैवस्थितयोस्तयोः
प्राप्ताचैवनिशाघोरादारुणाप्राणहारिणी ३८
वेपमानौततस्तौतुततःसुषुपतःक्षितौ
परस्परेणसंलग्नौगात्रयोर्भुजयोरपि ३९
ननिद्रानरतंतत्रनतौसौख्यमविंदताम्
एवंतौराजशार्दूलशापेनेंद्रस्यपीडितौ ४०
इत्थंतयोर्दुःखितयोर्निर्जगामनिशीथिनी
मार्तंडउदयंप्राप्तोद्वादशीदिवसागमे ४१
मयातुराजशार्दूलतयोर्मुक्तिर्धृताहृदि
जयायाःसुव्रतंचीर्णंरात्रौजागरणंकृतम् ४२
तस्माद्व्रतप्रभावाच्चयथाजातंतथाशृणु

द्वादशीदिवसेप्राप्तेतथाचीर्णेजयाव्रते ४३
विष्णोःप्रभावान्नृपतेपिशाचत्वंतयोर्गतम्
पुष्पदंतीमाल्यवतौपूर्वरूपौबभूवतुः ४४
पुरातनस्नेहयुतौपूर्वालंकारधारिणौ
विमानमधिरूढौतौगतौनाकेमनोरमे ४५
देवेंद्रस्याग्रतोगत्वाप्रणामंचक्रतुर्मुदा
तथाविधौतुतौदृष्ट्वामघवाविस्मितोऽब्रवीत् ४६
इंद्रउवाच-
वदतंकेनपुरायेनपिशाचत्वंहिवांगतौ
ममशापंचसंप्राप्तौकेनदेवेनमोचितौ ४७
माल्यवानुवाच-
वासुदेवप्रसादेनजयायास्तुव्रतेनच
पिशाचत्वंगतंस्वामिंस्तवभक्तिप्रभावतः ४८
इतिश्रुत्वातुमघवाप्रत्युवाचपुनस्तथा
पवित्रौपावनौजातौवंदनीयौममापिच ४९
हरिवासरकर्तारौविष्णुभक्तिपरायणौ
हरिवासरसँल्लीनायेचकृष्णपरायणाः ५०
अस्माकमपिमर्त्यास्तेपूज्याश्चैवनसंशयः
विहरस्वयथासौख्यंपुष्पदंत्यासुरालये ५१
कृष्णउवाच-
एतस्मात्कारणाद्राजन्कर्त्तव्योहरिवासरः
जयातुराजशार्दूलब्रह्महत्यापहारिणी ५२
सर्वदानानितेनैवसर्वयज्ञाअशेषतः
दत्तानिकारिताश्चैवजयायास्तुव्रतंकृतम् ५३
कल्पकोटिर्भवेत्तावद्वैकुंठेमोदतेध्रुवम्
पठनाच्छ्रवणाद्राजन्नग्निष्टोमफलंलभेत् ५४

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
उमापतिनारदसंवादेमाघशुक्लजयैकादशीमाहात्म्यंनाम-
त्रिचत्वारिंशोऽध्यायः ४३

चतुश्चत्वारिंशोऽध्यायः

युधिष्ठिरउवाच-
फाल्गुनस्यासितेपक्षेकिंनामैकादशीभवेत्
कथयस्वप्रसादेनवासुदेवममाग्रतः १
श्रीकृष्णउवाच-
नारदःपरिपप्रच्छब्रह्माणंकमलासनम्
फाल्गुनस्यासितेपक्षेविजयानामनामतः
तस्याःपुण्यंद्विजश्रेष्ठकथयस्वप्रसादतः २
ब्रह्मोवाच-
शृणुनारदवक्ष्यामिकथांपापहराम्पराम्
यन्नकस्यचिदाख्यातंमयैतद्विजयाव्रतम् ३
पुरातनंव्रतंह्येतत्पवित्रंपापनाशनम्
जयंददातिविजयानृपाणांवैनसंशयः ४
पुरारामोवनंयातोवर्षाण्येवचतुर्दश
न्यवसत्पंचवट्यांतुसहसीतःसलक्ष्मणः ५
तत्रैववसतस्तस्यरामस्यविजयात्मनः
रावणेनहृतालौल्याद्भार्यासीतायशस्विनी ६
तेनदुःखेनरामोऽपिमोहमभ्यागतस्तदा
भ्रमन्जटायुषमथोददर्शविगतायुषम् ७
कबंधोनिहतःपश्चाद्भ्रमतारण्यमध्यतः
सुग्रीवेणसमंतस्यसखित्वंसमपद्यत ८
वानराणामनीकानिरामार्थंसंगतानिच
ततोहनुमतादृष्टालंकोद्यानेतुजानकी ९
रामसंज्ञापनंतस्यैदत्तंकर्ममहत्कृतम्
पुनःसमेत्यरामेणसर्वंतत्रनिवेदितम् १०
अथश्रुत्वारामचंद्रोवाक्यंचैवहनूमतः
सुग्रीवानुमतेनैवप्रस्थानंसमरोचयत् ११
सौमित्रेकेनपुण्येनतीर्यतेवरुणालयः
अगाधोनितरामेषयादोभिश्चसमाकुलः
उपायंनैवपश्यामियेनासौसुतरोभवेत् १२

लक्ष्मणउवाच-
आदिदेवस्त्वमेवासिपुराणपुरुषोत्तमः
बकदाल्भ्योमुनिश्चात्रवर्ततेद्वीपमध्यतः १३
अस्मात्स्थानाद्योजनार्द्धमाश्रमस्तस्यराघव
अन्येचब्राह्मणास्तत्रबहवोरघुनंदन १४
तंपृच्छगत्वाराजेंद्रपुराणमृषिपुंगवम्
इतिवाक्यंततःश्रुत्वालक्ष्मणस्यातिशोभनम् १५
जगामराघवोद्रष्टुंबकदाल्भ्यंमहामुनिम्
प्रणनाममुनिंमूर्ध्नारामोविष्णुमिवामरः १६
ज्ञात्वामुनिस्ततोरामंपुराणंपुरुषोत्तमम्
केनापिकारणेनैवप्रविष्टोमानुषींतनुम् १७
उवाचसऋषिस्तुष्टःकुतोरामतवागमः १८
रामउवाच-
त्वत्प्रसादादहंविप्रतीरंनदनदीपतेः
आगतोऽस्मिससैन्योऽत्रलंकांजेतुंसराक्षसाम् १९
भवतश्चानुकूलत्वात्तीर्यतेऽब्धिर्यथामया
तमुपायंवदमुनेप्रसादंकुरुसांप्रतम् २०
एतस्मात्कारणादेवद्रष्टुंत्वाहमिहागतः
रामस्यवचनंश्रुत्वाबकदाल्भ्योमहामुनिः २१
उवाचसुप्रसन्नात्मारामंराजीवलोचनम्
कर्तव्यमद्यतेरामव्रतानांव्रतमुत्तमम् २२
कृतेनयेनसहसाविजयस्तेभविष्यति
लंकांजित्वाराक्षसांश्चस्वच्छांकीर्तिमवाप्स्यसि २३
एकाग्रमानसोभूत्वाव्रतमेतत्समाचर
फाल्गुनस्यासितेपक्षेविजयैकादशीभवेत् २४
तस्याव्रतेनहेरामविजयस्तेभविष्यति
निःसंशयंसमुद्रंत्वंतरिष्यसिसवानरः २५
विधिस्तुश्रूयतांराजन्व्रतस्यास्यफलप्रदः
दशम्यांदिवसेप्राप्तेकुंभमेकंतुकारयेत् २६
हैमंवाराजतंवापिताम्रंवाप्यथमृन्मयम्

स्थापयेच्छोभितंचैवजलपूर्णंसपल्लवम् २७
सप्तधान्यान्यधस्तस्ययवानुपरिविन्यसेत्
तस्योपरिन्यसेद्देवंहैमंनारायणंप्रभुम् २८
एकादशीदिनेप्राप्तेप्रातःस्नानंसमाचरेत्
निश्चलंस्थापयेत्कुंभंकंठमाल्यानुलेपनैः २९
पूगीफलैर्नालिकेरैःपूजयेच्चविशेषतः
गंधैर्धूपैश्चदीपैश्चनैवेद्यैर्विविधैरपि ३०
कुंभाग्रेतद्दिनंरामनीयतेसत्कथादिभिः
रात्रौजागरणंचैवतस्याग्रेकारयेद्बुधः ३१
प्रकाशयेद्घृतदीपमखंडव्रतहेतवे
द्वादशीदिवसेप्राप्तेमार्तंडस्योदयेसति ३२
नीत्वाकुंभंजलोद्देशेनद्याःप्रस्रवणेतथा
तडागेस्थापयित्वातंपूजयित्वायथाविधि ३३
दद्यात्सदेवंतंकुंभंब्राह्मणेवेदपारगे
कुंभेनसहराजेंद्रमहादानानिदापयेत् ३४
अनेनविधिनारामयूथपैःसहसंगतः
कुरुव्रतंप्रयत्नेनविजयस्तेभविष्यति ३५
इतिश्रुत्वाततोरामोयथोक्तमकरोत्तदा
कृतेव्रतेसविजयीबभूवरघुनंदनः ३६
प्राप्तासीताजितालंकापौलस्त्योनिहतोरणे
अनेनविधिनापुत्रयेकुर्वंतिनराव्रतम् ३७
इहलोकजयप्राप्तिःपरलोकस्तथाऽक्षयः
एतस्मात्कारणात्पुत्रकर्तव्यंविजयाव्रतम् ३८
विजयायाश्चमाहात्म्यंसर्वकिल्बिषनाशनम्
पठनाच्छ्रवणाच्चैववाजपेयफलंलभेत् ३९

इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेफाल्गुनकृष्णाविजयामाहात्म्यंनामचतुश्चत्वारिंशोऽध्यायः ४४

पञ्चचत्वारिंशोऽध्यायः

श्रीकृष्णउवाच–

माहात्म्यंविजयायाश्चश्रुतंकृष्णमहत्फलम्
फाल्गुनस्यार्जुनेपक्षेयन्नाम्नीतांवदाधुना १
श्रीकृष्णउवाच-
धर्मपुत्रमहाभागशृणुवक्ष्यामितेऽधुना
योक्तापृष्टेनमांधात्रावसिष्ठेनमहात्मना २
फाल्गुनस्यविशेषेणविशेषःकथितोनृप
आमलकीव्रतंपुरायंविष्णुलोकफलप्रदम् ३
आमलक्यास्तलेगत्वाजागरंतत्रकारयेत्
कृत्वाजागरणंरात्रौगोसहस्रफलंलभेत् ४
मांधातोवाच -
आमलकीकदाह्येषाउत्पन्नाद्विजसत्तम
एतत्सर्वंममाचक्ष्वपरंकौतूहलंहिमे ५
कस्मादियंपवित्राचकस्मात्पापप्रणाशिनी
कस्माज्जागरणंकृत्वागोसहस्रफलंलभेत् ६
वसिष्ठउवाच-
कथयामिमहाभागयथेयमभवत्क्षितौ
आमलकीमहावृक्षःसर्वपापप्रणाशनः ७
एकार्णवेपुराजातेनष्टेस्थावरजंगमे
नष्टेदेवासुरगणेप्रणष्टोरगराक्षसे ८
तत्रदेवादिदेवेशःपरमात्मासनातनः
जगामब्रह्मपरममात्मनःपदमव्ययम् ९
ततोऽस्यजाग्रतोब्रह्ममुखाच्छशिसमप्रभः
ष्ठीवनाद्बिंदुरुत्पन्नःसभूमौनिपपातह १०
तस्माद्बिंदोःसमुत्पन्नःस्वयंधात्रीनगोमहान्
शाखाप्रशाखाबहुलःफलभारेणनामितः ११
सर्वेषांचैववृक्षाणामादिरोहःप्रकीर्तितः
ब्रह्मणाथततःपश्चात्संसृष्टाश्चइमाःप्रजाः १२
देवदानवगंधर्वयक्षराक्षसपन्नगान्
असृजद्भगवान्देवोमहर्षींश्चतथामलान् १३
आजग्मुस्तत्रदेवास्तेयत्रधात्रीहरिप्रिया

तांदृष्ट्वातेमहाभागपरंविस्मयमागताः १४
नजानीमइमंवृक्षंचिंतयंतोऽभिसंस्थिताः
एवंचिंतयतांतेषांवागुवाचाशरीरिणी १५
आमलकीनगोह्येषप्रवरोवैष्णवोमतः
अस्यसंस्मरणादेवलभेद्गोदानजंफलम् १६
स्पर्शनाद्द्विगुणंपुण्यंत्रिगुणंधारणात्तथा
तस्मात्सर्वप्रयत्नेनसेव्याआमलकीसदा १७
सर्वपापहराप्रोक्तावैष्णवीपापनाशिनी
तस्यामूलेस्थितोविष्णुस्तदूर्ध्वेचपितामहः १८
स्कंधेचभगवान्रुद्रःसंस्थितःपरमेश्वरः
शाखासुमुनयःसर्वेप्रशाखासुचदेवताः १९
पर्णेषुचासतेदेवाःपुष्पेषुमरुतस्तथा
प्रजानांपतयःसर्वेफलेष्वेवव्यवस्थिताः २०
सर्वदेवमयीह्येषाधात्रीचकथितामया
तस्मात्पूज्यतमाह्येषाविष्णुभक्तिपरायणैः २१
ऋषयऊचुः –
कोभवान्नहिजानीमःकस्मात्कारणतांगतः
देवोवायदिवाचान्यःकथयस्वयथातथम् २२
वागुवाच –
यःकर्तासर्वभूतानांभुवनानांचसर्वशः
विस्मितान्विदुषःप्रेन्दयसोऽहविष्णुःसनातनः २३
तच्छ्रुत्वादेवदेवस्यभाषितंब्रह्मणःसुताः
अनादिनिधनंदेवंस्तोतुंतत्रप्रचक्रमुः २४
नमोभूतात्मभूतायआत्मनेपरमात्मने
अच्युतायनमोनित्यमनंतायनमोनमः २५
दामोदरायकवयेयज्ञेशायनमोनमः
एवंस्तुतस्तुऋषिभिस्तुतोषभगवान्हरिः २६
प्रत्युवाचमहर्षींस्तानभीष्टंकिंददामिवः
ऋषयऊचुः
यदितुष्टोऽसिभगवन्नस्माकंहितकाम्यया २७

व्रतंकिंचित्समाख्याहिस्वर्गमोक्षफलप्रदम्
धनधान्यप्रदंपुरायमात्मनस्तुष्टिकारकम् २८
अल्पायासंबहुफलंव्रतानामुत्तमंव्रतम्
कृतेनयेनदेवेशविष्णुलोकेमहीयते २९
विष्णुरुवाच-
फाल्गुनेशुक्लपक्षेतुपुष्येणद्वादशीयदि
भवेत्साचमहापुरायामहापातकनाशिनी ३०
विशेषस्तत्रकर्त्तव्यःशृणुध्वंद्विजसत्तमाः
आमलकींचसंप्राप्यजागरंतत्रकारयेत् ३१
सर्वपापविनिर्मुक्तोगोसहस्रफलंलभेत्
एतद्वःकथितंविप्राव्रतानांव्रतमुत्तमम्
अर्चयित्वाच्युतंतस्यांविष्णुलोकान्नमुच्यते ३२
ऋषयऊचुः -
व्रतस्यास्यविधिंब्रूहिपरिपूर्णंकथंभवेत्
केमंत्राःकेनमस्काराःदेवताकाप्रकीर्तिता ३३
कथंदानंकथंस्नानंकश्चपूजाविधिःस्मृतः
अर्घार्चनस्यमंत्रंतुकथयस्वयथातथम् ३४
विष्णुरुवाच-
श्रूयतांयोविधिःसम्यग्व्रतस्यास्यद्विजर्षभाः
एकादश्यांनिराहारःस्थित्वाचैवपरेऽहनि ३५
भोक्ष्येऽहपुंडरीकाक्षशरणंमेभवाच्युत
इतिकृत्वातुनियमंदंतधावनपूर्वकम् ३६
नालपेत्पतितांश्चौरांस्तथापाषंडिनोनरान्
दुर्वृत्तान्भिन्नमर्यादान्गुरुदारप्रधर्षकान् ३७
अपराह्णेततःस्नानंविधिनाकारयेद्बुधः
नद्यांतडागेकूपेवागृहेवानियतात्मवान् ३८
मृत्तिकालंभनंपूर्वंततःस्नानंचकारयेत्
अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे ३९
मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतम् ४०
इतिमृत्तिकामंत्रः -

त्वमंबुसर्वभूतानांजीवनंतनुरक्षकम्
स्वेदजोद्भिज्जजातीनांरसानांपतयेनमः ४१
स्नातोऽहसर्वतीर्थेषुह्रदप्रस्रवणेषुच
नदीषुदेवखातेषुइदंस्नानंतुमेभवेत् ४२
इतिस्नानमंत्रः
जामदग्न्यंमुनिंचैवकारयित्वाहिरण्मयम्
माषकस्यसुवर्णस्यतदर्द्धार्द्धेनवापुनः ४३
गृहमागत्यपूजायाःपूजाहोमंतुकारयेत्
ततश्चामलकींगच्छेत्सर्वोपस्करसंयुतः ४४
आमलकींततोगत्वापरिशोध्यसमंततः
स्थापयेत्सततंकुंभमव्रणंमंत्रपूर्वकम् ४५
पंचरत्नसमोपेतंदिव्यगंधाधिवासितम्
छत्रोपानद्युगोपेतंसितचंदनचर्चितम् ४६
स्रग्दामलंबितग्रीवंसर्वधूपविधूपितम्
दीपमालाकुलंकुर्यात्सर्वतःसुमनोहरम् ४७
तस्योपरिन्यसेत्पात्रंदिव्यलाजैःप्रपूरितम्
पात्रोपरिन्यसेद्देवंजामदग्न्यंमहाप्रभम् ४८
विशोकायनमःपादौजानुनीविश्वरूपिणे
उग्रायचततोऽप्यूरूकटीदामोदरायच ४९
उदरंपद्मनाभायउरःश्रीवत्सधारिणे
चक्रिणेवामबाहुंचदक्षिणंगदिनेनमः ५०
वैकुंठायनमःकंठमास्यंयज्ञमुखायवै
नासांविशोकनिधयेवासुदेवायचाक्षिणी ५१
ललाटंवामनायेतिरामायेतिभ्रुवौनमः
सर्वात्मनेतुतच्छीर्षंनमइत्यभिपूजयेत् ५२
इतिपूजामंत्रः
ततोदेवाधिदेवायअर्घंचैवप्रदापयेत्
फलेनचैवशुभ्रेणभक्तियुक्तेनचेतसा ५३
ततोजागरणंकुर्याद्भक्तियुक्तेनचेतसा
नृत्यैर्गीतैश्चवादित्रैर्द्धर्माख्यानैःस्तवैरपि ५४

वैष्णवैश्चतथाख्यानैः न्नपयेत्सर्वशर्वरीम्
प्रदन्निणांततःकुर्याद्धात्र्यावैविष्णुनामभिः ५५
अष्टाधिकंशतंचैवअष्टाविंशतिरेववा
ततःप्रभातेसमयेकृत्वानीराजनंहरेः ५६
ब्राह्मणंपूजयित्वातुसर्वंतस्मैनिवेदयेत्
जामदग्न्यघटेतत्रवस्त्रयुग्ममुपानहौ ५७
जामदग्न्यस्वरूपेणप्रीयतांममकेशवः
ततश्चामलकींस्पृष्ट्वाकृत्वाचैवप्रदन्निणाम् ५८
स्नानंकृत्वाविधानेनब्राह्मणान्भोजयेत्ततः
ततश्चस्वयमश्नीयात्कुटुंबेनसमावृतः ५९
एवंकृतेनयत्पुरयंतत्सर्वंकथयामिते
सर्वतीर्थेषुयत्पुरयंसर्वदानेषुयत्फलम् ६०
सर्वयज्ञाधिकंचैवलभतेनात्रसंशयः
एतद्वःसर्वमाख्यातंव्रतानामुत्तमंव्रतम् ६१
एतावदुक्त्वादेवेशस्तत्रैवांतरधीयत
तेचापिऋषयःसर्वेचक्रुःसर्वमशेषतः ६२
तथात्वमपिराजेन्द्रकर्तुमर्हसिसत्तम
व्रतमेतद्दुराधर्षंसर्वपापप्रमोचनम् ६३

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमापतिनारदसंवादेफाल्गुनशुक्लामलक्येकादशीनामपंचचत्वारिंशोऽध्यायः४५

षट्चत्वारिंशोऽध्यायः-

युधिष्ठिरउवाच-
फाल्गुनस्यसितेपन्नेश्रुताचामलकीतथा
चैत्रस्यकृष्णपन्नेतुकिंनामैकादशीभवेत् १
श्रीकृष्णउवाच-
शृणुराजेंद्रवन्दयामिअाख्यानंपापनाशनम्
यल्लोमशोऽब्रवीत्पृष्टोमांधात्राचक्रवर्तिना २
मांधातोवाच -
भगवन्श्रोतुमिच्छामिलोकानांहितकाम्यया

चैत्रस्यप्रथमेपक्षेकानामैकादशीभवेत्
कोविधिःकिंफलंतस्याःकथयस्वप्रसादतः ३
लोमशउवाच-
चैत्रमास्यसितेपक्षेनाम्नावैपापमोचनी
एकादशीसमाख्यातापिशाचत्वविनाशिनी ४
शृणुतस्याःप्रवक्ष्यामिकामदांसिद्धिदांनृप
कथांविचित्रांशुभदांपापघ्नींधर्मदायिनीम् ५
पुराचैत्ररथोद्देशेऽप्सरोगणसेविते
वसंतसमयेप्राप्तेषट्पदाकुलितेवने ६
गंधर्वकन्यावादित्रैरमंतिसहकिंनरैः
पाकशासनमुख्याश्चक्रीडांतेत्रिदिवौकसः ७
नापरंसुखदंकिंचिद्विनाचैत्ररथाद्वनम्
तस्मिन्वनेतुमुनयस्तपंतिबहुलंतपः ८
मेधाविनामानमृषिंतत्रस्थंब्रह्मचारिणम्
अप्सरास्तंमुनिवरंमोहनायोपचक्रमे ९
मंजुघोषेतिविख्याताभावंतस्यवितन्वती
क्रोशमात्रंस्थितातस्यभयादाश्रमसन्निधौ १०
गायंतीमधुरंसाधुपीडयंतीविपंचिकाम्
गायंतीतामथालोक्यपुष्पचंदनसेविताम् ११
कामोऽपिविजयाकांक्षीशिवभक्तान्मुनीश्वरान्
तस्याःशरीरेसंवासमकरोन्मनसःसुतः १२
कृत्वाभ्रुवौधनुष्कोटिंगुणंकृत्वाकटाक्षकम्
मार्गणौनयनेकृत्वापक्ष्मयुक्तेयथाक्रमम् १३
कुचौकृत्वापटकुटींविजयायोपचक्रमे
मंजुघोषाभवत्तस्यकामस्यैववरूथिनी १४
मेधाविनंमुनिंदृष्ट्वासापिकामेनपीडिता
यौवनोद्भिन्नदेहोऽसौमेधाव्यपिविराजते १५
सितोपवीतसहितोदृष्टःस्मरइवापरः
मेधावीवसतेचासौच्यवनस्याश्रमेशुभे १६
मंजुघोषास्थितंतत्रदृष्ट्वासामुनिपुंगवम्

मदनस्यवशंप्राप्तामंदंमंदमगायत १७
रणद्वलयसंयुक्तांशिंजन्नूपुरमेखलाम्
गायंतींतांतथाभूतांविलोक्यमुनिपुंगवः १८
मदनेनससैन्येननीतोमोहवशंबलात्
मंजुघोषासमागम्यमुनिंदृष्ट्वातथाविधम् १९
हावभावकटाक्षैस्तंमोहयामासचांगना
अधःसंस्थाप्यवीणांसासस्वजेतंमुनीश्वरम् २०
वलितेवलतावृक्षंवातवेगेनकंपितम्
सोऽपिरेमेतयासार्द्धंमेधावीमुनिपुंगवः २१
तस्मिन्नेवततोदृष्ट्वातस्यास्तंदेहमुत्तमम्
शिवतत्वंगतंतस्यकामतत्त्ववशंगतः २२
ननिशांनदिनंसोऽपिरमन्जानातिकामुकः
बहुवर्षंगतःकालोमुनेराचारलोपतः २३
मंजुघोषादेवलोकगमनायोपचक्रमे
गच्छंतीतंप्रत्युवाचरमंतंमुनिसत्तमम्
आदेशोदीयतांब्रह्मन्स्वदेशगमनायमे २४
मेधाव्युवाच-
अद्यैवत्वंसमायाताप्रदोषादौवरानने
यावत्प्रभातसंध्यास्यात्तावत्तिष्ठममांतिके
इतिश्रुत्वामुनेर्वाक्यंभयभीताबभूवसा २५
पुनर्वैरमयामासतमृषिंनृपसत्तम
मुनेःशापभयाद्भीताबहुलान्परिवत्सरान् २६
वर्षाणांपंचपंचाशन्नवमासदिनत्रयम्
सारेमेमुनिनातस्यनिशार्द्धमिवचाभवत् २७
सातंपुनरुवाचाथतस्मिन्कालेगतेमुनिम्
आदेशोदीयतांब्रह्मन्गंतव्यंस्वगृहेमया २८
मेधाव्युवाच-
प्रभातमधुनाचास्तेश्रूयतांवचनंमम
संध्यायावच्चकुर्वेऽहतावत्त्वंवैस्थिराभव २९
इतिवाक्यंमुनेःश्रुत्वाजातानंदसमाकुला

स्मितंकृत्वातुसाकिंचित्प्रत्युवाचशुचिस्मिता ३०
अप्सराउवाच-
कियत्प्रमाणाविप्रेंद्रतवसंध्यागतानघ
मयिप्रसादंकृत्वातुगतकालोविचार्यताम् ३१
इतितस्यावचःश्रुत्वाविस्मयोत्फुल्ललोचनः
गतकालस्यविप्रेंद्रःप्रमाणमकरोत्तदा ३२
समाश्चसप्तपंचाशद्गतास्तस्यतयासह
चुक्रोधसततस्तस्यैज्वालामालीबभूवह ३३
नेत्राभ्यांविस्फुलिगान्समुंचमानोऽतिकोपनः
कालरूपांतुतांदृष्ट्वातपसःक्षयकारिणीम् ३४
दुःखार्जितंक्षयंनीतंतपोदृष्ट्वातयासह
सकंपोष्ठोमुनिस्तत्रप्रत्युवाचाकुलेंद्रियः ३५
तांशशापाथमेधावीत्वंपिशाचीभवेतिच
धिक्त्वांपापेदुराचारेकुलटेपातकप्रिये ३६
तस्यशापेनसादग्धाविनयावनतास्थिता
उवाचवचनंसुभ्रूःप्रसादंवांछतीमुनिम्
प्रसादंकुरुविप्रेंद्रशापस्यानुग्रहंकुरु ३७
सतांसंगोहिभवतिवचोभिःसप्तभिःपदैः
त्वयासहममब्रह्मन्नीतावैबहुवत्सराः
एतस्मात्कारणात्स्वामिन्प्रसादंकुरुसुव्रत ३८
मुनिरुवाच-
शृणुमेवचनंभद्रेशापानुग्रहकारकम्
किंकरोमित्वयापापेक्षयंनीतंमहत्तपः ३९
चैत्रस्यकृष्णपक्षेतुभवेदेकादशीशुभा
पापमोचनिकानामसर्वपापक्षयंकरी ४०
तस्याव्रतेकृतेशुभ्रेपिशाचत्वंप्रयास्यति
इत्युक्त्वासोऽपिमेधावीजगामपितुराश्रमम् ४१
तमागतंसमालोक्यच्यवनःप्रत्युवाचतम्
किमेतद्विहितंपुत्रत्वयापुण्यंक्षयंकृतम् ४२
मेधाव्युवाच-

पातकंवैकृतंतातरमिताचाप्सरामया
प्रायश्चित्तंब्रूहितातयेनपापक्षयोभवेत् ४३
च्यवनउवाच-
चैत्रस्यचासितेपक्षेनाम्नावैपापमोचनी
अस्याव्रतेकृतेपुत्रपापराशिःक्षयंव्रजेत् ४४
इतिश्रुत्वापितुर्वाक्यंकृतंतेनव्रतोत्तमम्
गतंपापंक्षयंतस्यतपोयुक्तोबभूवसः ४५
साप्येवंमंजुघोषाचकृत्वैतद्व्रतमुत्तमम्
पिशाचत्वाद्विनिर्मुक्तापापमोचनिकाव्रतात्
दिव्यरूपधरासावैगतानाकेवराप्सराः ४६
लोमशउवाच-
पापमोचनिकांराजन्येकुर्वंतिनरोत्तमाः
तेषांपापंचयत्किंचित्तत्सर्वंचक्षयंव्रजेत् ४७
पठनाच्छ्रवणाद्राजन्गोसहस्रफलंलभेत्
ब्रह्महाहेमहारीचसुरापोगुरुतल्पगः ४८
व्रतस्यचास्यकरणात्पापमुक्ताभवंतिते
बहुपुगयप्रदंह्येतत्करणाद्व्रतमुत्तमम् ४९
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमापतिनारदसंवादेचैत्रकृष्णैकादशीपापमोचनीनामषट्चत्वारिंशोऽध्यायः ४६

सप्तचत्वारिंशोऽध्यायः

युधिष्ठिरउवाच-
वासुदेवनमस्तुभ्यंकथयस्वममाग्रतः
चैत्रस्यशुक्लपक्षेतुकिंनामैकादशीभवेत् १
श्रीकृष्णउवाच-
शृणुष्वैकमनाराजन्कथांपुगयांपुरातनीम्
वसिष्ठोयामकथयत्प्राग्दिलीपायपृच्छते २
दिलीपउवाच-
भगवञ्छ्रोतुमिच्छामिकथयस्वप्रसादतः
चैत्रमासिसितेपक्षेकिंनामैकादशीभवेत् ३

वसिष्ठउवाच-
साधुपृष्टंत्वयाराजन्कथयामितवाग्रतः
चैत्रस्यशुक्लपक्षेतुकामदानामनामतः ४
एकादशीपुण्यतमापापेंधनदवानलः
शृणुराजन्कथामेतांपापघ्नींपुण्यदायिनीम् ५
पुरानागपुरेरम्येहेमरत्नविभूषिते
पुंडरीकमुखानागानिवसंतिमहोत्कटाः ६
तस्मिन्पुरेपुंडरीकोराजाराज्यंचकारसः
गन्धर्वैःकिन्नरैश्चैवअप्सरोभिश्चसेव्यते ७
वराप्सरास्तुललितागंधर्वोललितस्तथा
उभौरागेणसंरक्तौदंपतीकामपीडितौ ८
रेमातेस्वगृहेरम्येधनधान्ययुतेतदा
ललितायाश्चहृदयेपतिर्वसतिसर्वदा ९
हृदयेतस्यललितानित्यंवसतिभामिनी
एकदापुंडरीकोऽथक्रीडतेसदसिस्थितः १०
गीतंगानंप्रकुरुतेललितोदयितांविना
पदबंधस्खलज्जिह्वोबभूवललितांस्मरन् ११
मनोभावंविदित्वास्यकर्कटोनागसत्तमः
पदबंधच्युतिंतस्यपुंडरीकेन्यवेदयत् १२
श्रुत्वाकर्कोटकवचःपुंडरीकोभुजंगराट्
क्रोधसंरक्तनयनोबभूवातिभयंकरः १३
शशापललितंतत्रगायंतंमदनातुरम्
राक्षसोभवदुर्बुद्धेक्रव्यादःपुरुषादकः १४
यतःपत्नीवशोपेतोगायमानोममाग्रतः
वचनात्तस्यराजेंद्ररक्षोरूपोबभूवसः १५
रौद्राननोविरूपाक्षोदृष्टमात्रोभयंकरः
बाहूयोजनविस्तीर्णौमुखंकंदरसन्निभम् १६
चंद्रसूर्यनिभेनेत्रेग्रीवापर्वतसंनिभा
नासारंध्रेतुविवरेअधरौयोजनायतौ १७
शरीरंतस्यराजेंद्रउत्थितंयोजनाष्टकम्

ईदृशोराक्षसोभूत्वाभुंजानःकर्मणःफलम् १८
ललितातुतथालोक्यस्वपतिंविकृताकृतिम्
चिंतयामासमनसादुःखेनमहतार्दिता १९
किंकरोमिक्वगच्छामिपतिःशापेनपीडितः
इतिसंस्मृत्यसंस्मृत्यमनसाशर्मनालभत् २०
चचारपतिनासार्द्धंललितागहनेवने
बभ्रामविपिनेदुर्गेकामरूपीसराक्षसः २१
निर्घृणःपापनिरतोविरूपःपुरुषादकः
नसुखंलभतेरात्रौनदिवापापपीडितः २२
ललितादुःखितातीवपतिंदृष्ट्वातथाविधम्
बभ्रामतेनसार्द्धंसारुदतीगहनेवने २३
दृष्ट्वाश्रमपदंरम्यंमुनिंसंशांतविग्रहम्
शीघ्रंजगामललितानमस्कृत्याग्रतःस्थिता २४
तांदृष्ट्वासमुनिःप्राहदुःखितांहिदयापरः
कात्वंकस्मादिहायातासत्यंवदममाग्रतः २५
ललितोवाच–
वीरधन्वेतिगंधर्वःसुतातस्यमहात्मनः
ललितांनाममांविद्धिपत्यर्थमिहचागताम् २६
भर्तामेपापदोषेणराक्षसोऽभून्महामुने
रौद्ररूपोदुराचारस्तंदृष्ट्वानास्तिमेसुखम् २७
सांप्रतंशाधिमांब्रह्मन्यत्कृत्यंतद्वदप्रभो
कुरुष्वतद्व्रतंभद्रेविधिपूर्वंमयोदितम् २८
ऋृषिरुवाच–
चैत्रमासस्यरंभोरुशुक्लपक्षोऽस्तिसांप्रतम्
कामदैकादशीनामपापघ्नीललितेपरा २९
कुरुष्वतद्व्रतंभद्रेविधिपूर्वंमयोदितम्
अस्यव्रतस्ययत्पुरायंतत्स्वभर्त्रेप्रदीयताम् ३०
दत्तेपुरायेक्षणात्तस्यशापदोषःप्रयास्यति
इतिश्रुत्वामुनेर्वाक्यंललिताहर्षिताभवत् ३१
उपोष्यैकादशींराजन्द्वादशीदिवसेतथा

विप्रस्यैवसमीपेतद्वासुदेवस्यचाग्रतः ३२
वाक्यमुवाचललितास्वपत्युस्तारणायवै
मयातुतद्व्रतंचीर्णंकामदायाउपोषणम् ३३
तस्यपुण्यप्रभावेनगच्छत्वस्यपिशाचता
ललितावचनादेववर्त्तमानोऽपितत्क्षणे ३४
गतपापःसललितोदिव्यदेहोबभूवह
राक्षसत्वंगतंतस्यप्राप्तागंधर्वतापुनः ३५
हेमरत्नसमाकीर्णौरेमेललितयासह
विमानवरमारूढौपूर्वरूपाधिकौचतौ ३६
दंपतीअत्यशोभेतांकामदायाःप्रभावतः
इतिज्ञात्वानृपश्रेष्ठकर्तव्यैषाप्रयत्नतः ३७
लोकानांतुहितार्थायतवाग्रेकथितामया
ब्रह्महत्यादिपापघ्नीपिशाचत्वविनाशनी ३८
नातःपरतराकाचित्त्रैलोक्येसचराचरे
पठनाच्छ्रवणाद्राजन्वाजपेयफलंलभेत् ३९

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमापति
नारदसंवादेचैत्रशुक्लाकामदानामसप्तचत्वारिंशोऽध्यायः ४७

अष्टचत्वारिंशोऽध्यायः

युधिष्ठिरउवाच-
वैशाखस्यासितेपक्षेकिंनामैकादशीभवेत्
महिमानंकथयमेवासुदेवनमोऽस्तुते १
श्रीकृष्णउवाच-
सौभाग्यदायिनीराजन्निहलोकेपरत्रच
वैशाखकृष्णपक्षेतुनाम्नाचैववरूथिनी २
वरूथिन्याव्रतेनैवसौख्यंभवतिसर्वदा
पापहानिश्चभवतिसौभाग्यप्राप्तिरेवच ३
दुर्भगायाकरोत्येनांसास्त्रीसौभाग्यमाप्नुयात्
लोकानांचैवसर्वेषांभुक्तिमुक्तिप्रदायिनी ४
सर्वपापहरानृणांगर्भवासनिकृंतनी

वरूथिन्याव्रतेनैवमांधातास्वर्गतिंगतः ५
धुंधुमारादयश्चान्येराजानोबहवस्तथा
ब्रह्मकपालनिर्मुक्तोबभूवभगवान्भवः ६
दशवर्षसहस्राणितपस्तप्यतियोनरः
कुरुक्षेत्रेरविग्रहेस्वर्णभारंददातियः
तत्तुल्यंफलमाप्नोतिवरूथिन्याव्रतंचरन् ७
श्रद्धावान्यस्तुकुरुतेवरूथिन्याव्रतंनरः
वांछितंलभतेसोऽपिइहलोकेपरत्रच ८
पवित्रापावनीह्येषामहापातकनाशिनी
भुक्तिमुक्तिप्रदाचैवकर्तॄणांनृपसत्तम ९
अश्वदानान्नृपश्रेष्ठगजदानंविशिष्यते
गजदानाद्भूमिदानंतिलदानंततोऽधिकम् १०
तस्माच्चस्वर्णदानंवैअन्नदानंततोऽधिकम्
अन्नदानात्परंदानंनभूतंनभविष्यति ११
पितृदेवमनुष्याणांतृप्तिरन्नेनजायते
तत्समंकविभिःप्रोक्तंकन्यादानंनृपोत्तम १२
धेनुदानंचतत्तुल्यमित्याहभगवान्स्वयम्
प्रोक्तेभ्यःसर्वदानेभ्योविद्यादानंविशिष्यते १३
तत्फलंसमवाप्नोतिनरःकृत्वावरूथिनीम्
कन्यावित्तेनजीवंतियेनराःपापमोहिताः १४
पुरायक्षयंतेगच्छंतिनिरयंयातनामयम्
तस्मात्सर्वप्रयत्नेननग्राह्यंकन्यकाधनम् १५
यश्चगृह्णातिलोभेनकन्यांक्रीत्वाचतद्धनम्
सोऽन्यजन्मनिराजेंद्रश्रोतुर्भवतिनिश्चितम् १६
कन्यांपुरायेनयोदद्याद्यथाशक्तिस्वलंकृताम्
तत्पुरायसंख्यांनृपतेचित्रगुप्तोनशक्नुयात् १७
तत्तुल्यंफलमाप्नोतिनरःकृत्वावरूथिनीम्
कांस्यंमांसंमसूरांश्चचणकान्कोद्रवांस्तथा १८
शाकंमधुपरान्नंचपुनर्भोजनमैथुने
वैष्णवोव्रतकर्ताचदशम्यांदशवर्जयेत् १९

द्यूतंक्रीडांचनिद्रांचतांबूलंदंतधावनम्
परापवादंपैशुन्यंस्तेयंहिंसांतथारतिम् २०
क्रोधंचैवानृतंवाक्यमेकादश्यांविवर्जयेत्
कांस्यंमांसंसुरांक्षौद्रं तैलंपतितभाषणम् २१
व्यायामंचप्रवासंचपुनर्भोजनमैथुनम्
वृषपृष्ठंमसूरान्नंद्वादश्यांपरिवर्जयेत् २२
अनेनविधिनाराजन्विहितायैर्वरूथिनी
सर्वपापक्षयंकृत्वाददात्यांतेऽक्षयांगतिम्
रात्रौजागरणंकृत्वापूजितोमधुसूदनः २३
सर्वपापविनिर्मुक्तास्तेयांतिपरमांगतिम्
तस्मात्सर्वप्रयत्नेनकर्तव्यापापभीरुभिः २४
क्षपारितनयाद्भीतोनरःकुर्याद्वरूथिनीम्
पठनाच्छ्रवणाद्राजन्गोसहस्रफलंलभेत्
सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते २५
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुमापतिनारदसंवादेवैशाखकृष्णवरूथिनीएकादशीनामअष्टचत्वारिंशोऽध्यायः ४८

एकोनपञ्चाशत्तमोऽध्यायः

युधिष्ठिरउवाच-
वैशाखशुक्लपक्षेतुकिन्नामैकादशीभवेत्
किंफलंकोविधिस्तत्रकथयस्वजनार्दन १
श्रीकृष्णउवाच-
इदमेवपुरापृष्टंरामचंद्रेणधीमता
वसिष्ठंप्रतिराजेंद्रयत्त्वंमामनुपृच्छसि २
रामउवाच-
भगवञ्छ्रोतुमिच्छामिव्रतानामुत्तमंव्रतम्
सर्वपापक्षयकरंसर्वदुःखनिकृंतनम् ३
मयादुःखानिभुक्तानिसीताविरहजानितु
ततोऽहभयभीतोऽस्मिपृच्छामित्वांमहामुने ४
वसिष्ठउवाच-

साधुपृष्टंत्वयारामतवैषानैष्ठिकीमतिः
त्वन्नामग्रहणेनैवपूतोभवतिमानवः ५
तथापिकथयिष्यामिलोकानांहितकाम्यया
पवित्रंपावनानांचव्रतानामुत्तमंव्रतम् ६
वैशाखस्यसितेपक्षेरामचैकादशीभवेत्
मोहिनीनामसाप्रोक्तासर्वपापहरापराः ७
मोहजालात्प्रमुच्यंतेपातकानांसमूहतः
अस्याव्रतप्रभावेनसत्यंसत्यंवदाम्यहम् ८
अतःकारणतोरामकर्तव्यैषाभवादृशैः
पातकानांक्षयकरीमहादुःखविनाशिनी ९
शृणुष्वैकमनारामकथांपापहरांपराम्
यस्याःश्रवणमात्रेणमहापापंप्रणश्यति १०
सरस्वत्यास्तटेरम्येपुरीभद्रावतीशुभा
द्युतिमान्नामनृपतिस्तत्रराज्यंकरोतिवै ११
चंद्रवंशोद्भवोनामधृतिमान्सत्यसंगरः
तत्रवैश्योनिवसतिधनधान्यसमृद्धिमान् १२
धनपालइतिख्यातःपुरायकर्मप्रवर्त्तकः
प्रपाकूपमठारामतडागगृहकारकः १३
विष्णुभक्तिरतःशांतस्तस्यासन्पंचपुत्रकाः
सुमनाद्युतिमांश्चैवमेधावीसुकृतस्तथा १४
पंचमोधृष्टबुद्धिश्चमहापापरतःसदा
परस्त्रीसंगनिरतोविटगोष्ठीविशारदः १५
द्यूतादिव्यसनासक्तःपरस्त्रीरतिलालसः
नचदेवार्चनेबुद्धिर्नपितॄन्नद्विजान्प्रति १६
अन्यायवर्तीदुष्टात्मापितुर्द्रव्यक्षयंकरः
अभक्ष्यभक्षकःपापीसुरापानेरतःसदा १७
वेश्याकंठेक्षिप्तबाहुर्भ्रमन्दुष्टश्चतुष्पथे
पित्रानिष्कासितोगेहात्परित्यक्तश्चबांधवैः १८
स्वदेहभूषणान्येवक्षयंनीतानितेनवै
गणिकाभिःपरित्यक्तोनिंदितश्चधनक्षयात् १९

ततश्चिंतापरोजातोवस्त्रहीनःक्षुधार्दितः
किंकरोमिक्वगच्छामिकेनोपायेनजीव्यते २०
तस्करत्वंसमारब्धंतत्रैवनगरेपितुः
गृहीतोराजपुरुषैर्मुक्तश्चपितृगौरवात् २१
पुनर्बद्धःपुनस्त्यक्तःपुनर्बद्धःससंभ्रमैः
धृष्टबुद्धिर्दुराचारोनिबध्यनिगडैर्दृढैः २२
कशाघातैस्ताडितश्चपीडितश्चपुनःपुनः
नस्थातव्यंहिमंदात्मंस्त्वयामद्देशगोचरे २३
एवमुक्त्वाततोराज्ञामोचितोदृढबंधनात्
निर्जगामभयात्तस्यगतोऽसौगहनंवनम् २४
क्षुत्तृषापीडितश्चायमितश्चेतश्चधावति
सिंहवन्निजघानासौमृगशूकरचित्रलान् २५
आमिषाहारनिरतोवनेतिष्ठतिसर्वदा
करेशरासनंकृत्वानिषंगंपृष्ठसंगतम् २६
अरण्यचारिणोहंतिपक्षिणश्चपदाचरन्
चकोरांश्चमयूरांश्चकंकतित्तिरमूषिकान् २७
एतानन्यान्हिनस्त्यंधोधृष्टबुद्धिस्तुनिर्घृणः
पूर्वजन्मकृतैःपापैर्निमग्नःपापकर्दमे २८
दुःखशोकसमाविष्टःपीड्यमानोदिवानिशम्
कौंडिन्यस्याश्रमपदंप्राप्तःपुण्यागमात्क्वचित् २९
माधवेमासिजाह्नव्याःकृतस्नानंतपोधनम्
आससादधृष्टबुद्धिःशोकभारेणपीडितः ३०
तद्वस्त्रबिंदुस्पर्शेनगतपापोहताशुभः
कौंडिन्यस्याग्रतःस्थित्वाप्रत्युवाचकृतांजलि ३१
धृष्टबुद्धिरुवाच-
भोभोब्रह्मन्द्विजश्रेष्ठदयांकृत्वाममोपरि
येनपुण्यप्रभावेनमुक्तिर्भवतितद्वद ३२
कौंडिन्यउवाच-
शृणुष्वैकमनाभूत्वायेनपापक्षयस्तव
वैशाखस्यसितेपक्षेमोहिनीनामविश्रुता ३३

एकादशीव्रतंतस्याःकुरुमद्वाक्यनोदितः
मेरुतुल्यानिपापानिक्तयंगच्छंतिदेहिनाम् ३४
बहुजन्मार्जितान्येषामोहिनीसमुपोषिता
इतिवाक्यंमुनेःश्रुत्वाधृष्टबुद्धिःप्रसन्नधीः ३५
व्रतंचकारविधिवत्कौंडिन्यस्योपदेशतः
कृतेव्रतेनृपश्रेष्ठगतपापोबभूवसः ३६
दिव्यदेहस्ततोभूत्वागरुडोपरिसंस्थितः
जगामवैष्णवंलोकंसर्वोपद्रववर्जितम् ३७
इतीदृशंरामचंद्रउत्तमंमोहिनीव्रतम्
नातःपरतरंकिंचित्त्रैलोक्येसचराचरे ३८
यज्ञादितीर्थदानानिकलांनार्हंतिषोडशीम्
पठनाच्छ्रवणाद्राजन्गोसहस्रफलंलभेत् ३९

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसहितायामुत्तरखंडेउमापति
नारदसंवादेवैशाखशुक्लेमोहन्येकादशीनामएकोनपंचाशत्तमोऽध्यायः४९

पञ्चाशत्तमोऽध्यायः

युधिष्ठिरउवाच-
ज्येष्ठस्यकृष्णपक्षेतुकिंनामैकादशीभवेत्
श्रोतुमिच्छामिमाहात्म्यंतद्वदस्वजनार्दन १
श्रीकृष्णउवाच-
साधुपृष्टंत्वयाराजन्लोकानांहितकाम्यया
बहुपुण्यप्रदाह्येषामहापातकनाशिनी २
अपरानामराजेंद्रअपरापुत्रदायिनी
लोकेप्रसिद्धितांयातिअपरांयस्तुसेवते ३
ब्रह्महत्याभिभूतोऽपिगोत्रहाभ्रूणहातथा
परापवादवादीचपरस्त्रीरसिकोऽपिच ४
अपरासेवनाद्राजन्विपाप्माभवतिध्रुवम्
कूटसाक्ष्यंकूटमानंतुलाकूटंकरोतियः ५
कूटवेदंपठेद्यस्तुकूटशास्त्रंतथैवच
ज्योतिषीगणकःकूटःकूटायुर्वैदिकोभिषक् ६

कूटसाद्व्यसमायुक्तोविज्ञेयानरकौकसः
अपरासेवनाद्राजन्पापैर्मुक्ताभवंतिते ७
क्षत्रियःक्षात्रधर्मंयस्त्यक्त्वायुद्धात्पलायते
सयातिनरकंघोरंस्वीयधर्मबहिष्कृतः ८
अपरासेवनात्सोऽपिपापंत्यक्त्वादिवंव्रजेत्
विद्यावान्यःस्वयंशिष्योगुरुनिंदांकरोतिच ९
समहापातकैर्युक्तोनिरयंयातिदारुणम्
अपरासेवनात्सोऽपिसद्गतिंप्राप्नुयान्नरः १०
महिमानमपरायाःशृणुराजन्वदाम्यहम्
मकरस्थेरवौमाघेप्रयागेयत्फलंनृणाम् ११
काश्यांयत्प्राप्यतेपुण्यमुपरागेनिमज्जनात्
गयायांपिंडदानेनपितृणांतृप्तिदोयथा १२
सिंहस्थितेदेवगुरौगौतम्यांस्नातकोनरः
कन्यागतेगुरौराजन्कृष्णावेणीनिमज्जनात् १३
यत्फलंसमवाप्नोतिकुंभकेदारदर्शनात्
बदर्याश्रमयात्रायांतत्तीर्थसेवनादपि १४
यत्फलंसमवाप्नोतिकुरुक्षेत्रेरविग्रहे
गजाश्वहेमदानेनयज्ञंकृत्वासदक्षिणम् १५
तादृशंफलमाप्नोतिअपराव्रतसेवनात्
अर्धप्रसूतांगांदत्वासुवर्णंवसुधांतथा १६
नरोयत्फलमाप्नोतिअपरायाव्रतेनतत्
पापद्रुमकुठारीयंपापेंधनदवानलः १७
पापांधकारतरणिःपापसारंगकेसरी
बुद्बुदाइवतोयेषुपुत्तिकाइवजंतुषु १८
जायंतेमरणायैवएकादश्याव्रतंविना
अपरांसमुपोष्यैवपूजयित्वात्रिविक्रमम् १९
सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते
लोकानांचहितार्थायतवाग्रेकथितंमया
पठनाच्छ्रवणाद्राजन्गोसहस्रफलंलभेत् २०
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसहितायामुत्तरखंडेउमापति

नारदसंवादेज्येष्ठकृष्णापरैकादशीनामपंचाशत्तमोऽध्यायः ५०

एकपञ्चाशत्तमोऽध्यायः

युधिष्ठिरउवाच-
अपरायाश्चमाहात्म्यंश्रुतंसर्वंजनार्दन
ज्येष्ठस्यशुक्लपक्षेतुस्याद्यातांवदमानद १
श्रीकृष्णउवाच-
एनांवक्ष्यतिधर्मात्माव्यासःसत्यवतीसुतः
सर्वशास्त्रार्थतत्त्वज्ञोवेदवेदांगपारगः २
युधिष्ठिरउवाच-
श्रुतामेमानवाधर्मावासिष्ठाश्चश्रुतामया
द्वैपायनयथावत्त्वंवैष्णवान्वक्तुमर्हसि ३
श्रीवेदव्यासउवाच -
श्रुतास्तुमानवाधर्मावैदिकाश्चश्रुतास्त्वया
कलौयुगेनशक्यंतेतेवैकर्तुंनराधिप ४
सुखोपायमल्पधनमल्पक्लेशंमहाफलम्
पुराणानांचसर्वेषांसारभूतंमहामते ५
एकादश्यांनभुंजीतपक्षयोरुभयोरपि
द्वादश्यांतुशुचिर्भूत्वापुष्पैःसंपूज्यकेशवम् ६
अन्नंभुंजीतसत्कृत्यपश्चाद्विप्रपुरःसरम्
सूतकेऽपिनभोक्तव्यंनाशौचेचजनाधिप ७
यावज्जीवंव्रतमिदंकर्त्तव्यंपुरुषर्षभ
स्वर्गतिंप्राप्तुमिच्छद्भिरत्रनैवास्तिसंशयः ८
आपपापादुराचाराःपापिष्ठाधर्मवर्जिताः
एकादश्यांनभुंजानानतेयांतियमांतिकम् ९
इतितद्वचनंश्रुत्वाकंपितोऽश्वत्थपत्रवत्
भीमसेनोमहाबाहुर्नत्वोवाचगुरुंप्रति १०
भीमसेनउवाच-
पितामहमहाबुद्धेश्रृणुमेपरमंवचः
युधिष्ठिरश्चकुंतीचतथाद्रुपदनंदिनी ११

अर्जुनोनकुलश्चैवसहदेवस्तथैवच
एकादश्यांनभुंजंतिकदाचिदपिसुव्रताः १२
तेमांब्रुवंतिवैनित्यंमाभुंक्ष्वत्वंवृकोदर
अहंतानब्रुवंतातबुभुक्षादुःसहामम १३
दानंदास्यामिविधिवत्पूजयिष्यामिकेशवम्
भीमसेनवचःश्रुत्वाव्यासोवचनमब्रवीत् १४
व्यासउवाच-
यदिस्वर्गमभीष्टंतेनरकंदुष्टमेवच
एकादश्यांनभोक्तव्यंपक्षयोरुभयोरपि १५
भीमसेनउवाच-
पितामहमहाबुद्धेकथयामितवाग्रतः
एकभक्तेनशक्नोमिउपवासेकुतःप्रभो १६
वृकोऽपिनामयोवह्निःससदाजठरेमम
अतिवेलंयदाश्नामितदासमुपशाम्यति १७
नैकंशक्नोम्यहंकर्तुमुपवासंमहामुने
येनैवप्राप्यतेस्वर्गस्तत्कर्त्तास्मियथातथम्
तदेकंवदनिश्चित्ययेनश्रेयोऽहमाप्नुयाम् १८
व्यासउवाच-
वृषस्थेमिथुनस्थेवायदाचैकादशीभवेत्
ज्येष्ठमासेप्रयत्नेनसोपोष्योदकवर्जिता १९
गंडूषाचमनंवारिवर्जयित्वोदकंबुधः
उपभुंजीतनैवेहव्रतभंगोऽन्यथाभवेत् २०
उदयादुदयंयावद्वर्जयित्वोदकंनरः
श्रूयतांसमवाप्नोतिद्वादशद्वादशीफलम् २१
ततःप्रभातेविमलेद्वादश्यांस्नानमाचरेत्
जलंसुवर्णंदत्त्वाचद्विजातिभ्योयथाविधि २२
भुंजीतकृतकृत्यस्तुब्राह्मणैःसहितोवशी
एवंकृतेचयत्पुण्यंभीमसेनशृणुष्वतत् २३
संवत्सरेतुयाश्चैवएकादश्योभवंतिहि
तासांफलमवाप्नोतिह्यत्रमेनास्तिसंशयः २४

इतिमांकेशवःप्राहशंखचक्रगदाधरः
सर्वान्परित्यज्यपुमान्मामेकंशरणंव्रजेत् २५
एकादश्यांनिराहारस्ततःपापात्प्रमुच्यते
द्रव्यशुद्धिःकलौनास्तिसंस्कारःस्मार्त्तएवच २६
वैदिकस्तुकुतश्चापिप्राप्तेदुष्टेकलौयुगे
किंनुतेबहुनोक्तेनवायुपुत्रपुनःपुनः २७
एकादश्यांनभुंजीतपक्षयोरुभयोरपि
एकादश्यांसितेपक्षेज्येष्ठेमास्युदकंविना २८
पुण्यंफलमवाप्नोतितच्छृणुष्ववृकोदर
संवत्सरेतुयाप्रोक्ताःशुक्लःकृष्णावृकोदर २९
उपोषिताहिसर्वाःस्युरेकादश्योनसंशयः
धनधान्यप्रदापुण्यापुत्रारोग्यशुभप्रदा ३०
उपोषितानरव्याघ्रइतिसत्यंब्रवीमिते
यमदूतामहाकायाःकरालाःकृष्णरूपिणः ३१
दंडपाशधरारौद्रानोपसर्पंतितंनरम्
पीतांबरधरासौम्याश्चक्रहस्तामनोजवाः ३२
अंतकालेनयंत्येतेवैष्णवान्वैष्णवीपुरीम्
तस्मात्सर्वप्रयत्नेनउपोष्योदकवर्जिता ३३
जलधेनुंतदादत्त्वासर्वपापैःप्रमुच्यते
ततस्त्वमस्यांकौंतेयसोपवासोऽचनंहरेः ३४
कुरुसर्वप्रयत्नेनसर्वपापप्रशांतये
स्वप्नेनमेऽपराधोस्तिदंतरागतयापिवा ३५
भोक्ष्येपरेऽह्निदेवेशह्यशनंवासराद्धरेः
इत्युच्चार्यततोमंत्रउपवासपरोभवेत् ३६
सर्वपापविनाशायश्रद्धादमसमन्वितः
मेरुमंदरमात्राघंस्त्रियापुंसाचयत्कृतम् ३७
सर्वंतद्भस्मतांयातिएकादश्याःप्रभावतः
नशक्नुवंतियेदातुंजलधेनुंनराधिप ३८
सकांचनःप्रदातव्योघटकोवस्त्रसंयुतः
तोयस्यनियमंयोऽस्याकुरुतेवैसपुण्यभाक् ३९

फलंकोटिसुवर्णस्ययामेयामेश्रुतंफलम्
स्नानंदानंजपंहोमंयदस्यांकुरुतेनरः ४०
तत्सर्वंचाक्षयंप्राप्तमेतत्कृष्णप्रभाषितम्
किंवापरेणधर्मेणनिर्जलैकादशींविना ४१
उपोष्यसम्यक्विधिवद्वैष्णवंपदमाप्नुयात्
सुवर्णमन्नंवासोवायदस्यांसंप्रदीयते ४२
तदस्यकुरुशार्दूलसर्वंचाप्यक्षयंभवेत्
एकादश्यांदिनेयोऽन्नंभुंक्तेपापंभुनक्तिसः ४३
इहलोकेसचांडालोमृतःप्राप्नोतिदुर्गतिम्
येचदास्यंतिदानानिद्वादश्यांसमुपोषिताः ४४
ज्येष्ठमासेसितेपक्षेप्राप्स्यंतिपरमंपदम्
ब्रह्महामद्यपःस्तेनोगुरुद्वेषीसदानृती ४५
मुच्यंतेपातकैःसर्वैर्निर्जलायैरुपोषिता
विशेषंशृणुकौंतेयनिर्जलैकादशीदिने ४६
यत्कर्त्तव्यंनरैःस्त्रीभिर्दानंश्रद्धासमन्वितैः
जलशायीचसंपूज्योदेयाधेनुस्तथाम्मयी ४७
प्रत्यक्षावानृपश्रेष्ठघृतधेनुरथापिवा
दक्षिणाभिःसुपुष्टाभिर्मिष्टान्नैश्चपृथग्विधैः ४८
तोषणीयाःप्रयत्नेनद्विजाधर्मभृतांवर
तुष्टाभवंतिवैविप्रास्तैस्तुष्टैर्मोक्षदोहरिः ४९
आत्मद्रोहःकृतस्तैर्हियैरेषानह्युपोषिता
पापात्मानोदुराचारामुष्टास्तेनात्रसंशयः ५०
कुलानांशतमागामिअतीतानांतथाशतम्
आत्मनासहतैर्नीतंवासुदेवस्यमंदिरम् ५१
शांतैर्दांतैर्दानपरैरर्चयद्भिस्तथाहरिम्
कुर्वद्भिर्जागरंरात्रौयैरेषासमुपोषिता ५२
अन्नंवस्त्रंतथागावोजलंशय्यासनंशुभम्
कमंडलुंतथाछत्रंदातव्यंनिर्जलादिने ५३
उपानहौयोददातिपात्रभूतेद्विजोत्तमे
ससौवर्णेनयानेनस्वर्गलोकेमहीयते ५४

यश्चेमांशृणुयाद्भक्त्यायश्चापिपरिकीर्तयेत्
उभौतौस्वर्गमाप्नोतिनात्रकार्याविचारणा ५५
यत्फलंसंनिहत्यायांराहुग्रस्तेदिवाकरे
कृत्वाश्राद्धंलभेन्मर्त्यस्तदस्याःश्रवणादपि ५६
नियमंचप्रकर्त्तव्यंदंतधावनपूर्वकम्
एकादश्यांनिराहारोवर्जयिष्यामिवैजलम् ५७
केशवप्रीणनार्थायअन्यदाचमनादृते
द्वादश्यांदेवदेवेशःपूजनीयस्त्रिविक्रमः ५८
गंधैर्धूपैस्तथापुष्पैर्वासोभिःप्रियदर्शनैः
पूजयित्वाविधानेनमंत्रमेतमुदीरयेत् ५९
देवदेवहृषीकेशसंसारार्णवतारक
उदकुंभप्रदानेननयमांपरमांगतिम् ६०
ज्येष्ठेमासितुवैभीमयाशुक्लैकादशीशुभा
निर्जलासमुपोष्यात्रजलकुंभान्सशर्करान् ६१
प्रदायविप्रमुख्येभ्योमोदतेविष्णुसन्निधौ
ततःकुंभाःप्रदातव्याब्राह्मणानांचभक्तितः ६२
भोजयित्वाततोबिप्रान्स्वयंभुंजीततत्परः
एवंयःकुरुतेपूर्णांद्वादशींपापनाशिनीम् ६३
सर्वपापविनिर्मुक्तोपदंगच्छत्यनामयम्
ततःप्रभृतिभीमेनकृताह्येकादशीशुभा
पांडवद्वादशीनाम्नालोकेख्याताबभूवह ६४
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितयामुत्तरखंडेउमापतिनारदसंवादेज्येष्ठशुक्लानिर्जलैकादशीनामैकपंचाशत्तमोऽध्यायः ५१

द्विपञ्चाशत्तमोऽध्यायः

युधिष्ठिरउवाच–
आषाढकृष्णपक्षेतुकिंवैएकादशीभवेत्
कथयस्वप्रसादेनवासुदेवममाग्रतः १
श्रीकृष्णउवाच–
व्रतानामुत्तमंराजन्कथयामितवाग्रतः

सर्वपापक्षयकरंसर्वमुक्तिप्रदायकम् २
आषाढस्यासितेपक्षेयोगिनीनामनामतः
एकादशीनृपश्रेष्ठमहापातकनाशिनी ३
संसारार्णवमग्नानांपोतभूतासनातनी
जगत्रयेसारभूतायोगिनीव्रतकारिणाम् ४
कथयामितवाग्रेऽहकथांपौराणिकींशुभाम्
अलकायांराजराजःशिवभक्तिपरायणः ५
तस्यासीत्पुष्पबटुकोहेममालीतिनामतः
तस्यपत्नीसुरूपाचविशालाक्षीतिनामतः ६
सतस्यांचासक्तमनाकामपाशवशंगतः
मानसात्पुष्पनिचयमानीयस्वगृहेस्थितः ७
पत्नीप्रेमरसासक्तोनकुबेरालयंगतः
कुबेरोदेवसदनेकरोतिशिवपूजनम् ८
मध्याह्नसमयेराजन्पुष्पागमसमीक्षकः
हेममालीस्वभवनेरमतेकांतयासह ९
यक्षराट्प्रत्युवाचाथकालातिक्रमकोपितः
कस्मान्नायातिभोयक्षाहेममालीदुरात्मवान्
निश्चयःक्रियतामस्यइत्युवाचपुनःपुनः १०
यक्षाऊचुः -
वनिताकामुकोगेहेरमतेस्वेच्छयानृप
तेषांवाक्यंसमाकर्ण्यकुबेरःकोपपूरितः ११
आह्वयामासतंतूर्णंबटुकंहेममालिनम्
ज्ञात्वाकालात्ययंसोऽपिभयव्याकुललोचनः १२
अस्नातएवआगत्यकुबेरस्याग्रतःस्थितः
तंदृष्ट्वाधनदःक्रुद्धःक्रोधसंरक्तलोचनः १३
प्रत्युवाचरुषाविष्टःकोपप्रस्फुरिताधरः
धनदउवाच-
आःपापदुष्टदुर्वृत्तकृतवान्देवहेलनम् १४
अष्टादशकुष्ठवृतोवियुक्तःकांतयातया
अस्मात्स्थानादपध्वस्तोगच्छस्वप्नमथाधम १५

इत्युक्तेवचनेतस्यतस्मात्स्थानात्पपातसः
महादुःखाभिभूतश्चकुष्ठैःपीडितविग्रहः १६
नसुखंदिवसेतस्यननिद्रांलभतेनिशि
छायायांपीडिततनुर्निदाघेऽत्यतपीडितः १७
शिवपूजाप्रभावेनस्मृतिस्तस्यनलुप्यते
पातकेनाभिभूतोऽपिपूर्वंकर्मस्मरत्यसौ १८
भ्रममाणस्ततोगच्छन्हिमाद्रिंपर्वतोत्तमम्
तत्रापश्यन्मुनिवरंमार्कंडेयंतपोनिधिम् १९
यस्यायुर्विद्यतेराजन्ब्रह्मणोवयसासमम्
ववंदेचरणौतस्यदूरतःपापकर्मकृत् २०
मार्कंडेयोमुनिवरोदृष्ट्वातंकंपितंतथा
परोपकरणार्थायसमाहूयेदमब्रवीत् २१
कस्मात्कुष्ठाभिभूतस्त्वंकुतोनिंद्यतरोह्यसि
इत्युक्तःसप्रत्युवाचमार्कंडेयंमहामुनिम् २२
हेममाल्युवाच-
राजराजस्यानुचरोहेममालीतिनामतः
मानसात्पद्मनिचयमानीयप्रत्यहंमुने २३
शिवपूजनवेलायांकुबेरायसमर्पये
एकस्मिन्दिवसेचैवकालश्चाविदितोमया २४
पत्नीसौख्यप्रसक्तेनशोकव्याकुलचेतसा
ततःक्रुद्धेनशप्तोऽस्मिराजराजेनवैमुने २५
कुष्ठाभिभूतःसंजातोवियुक्तःकांतयातया
अधुनातवसान्निध्यंप्राप्तोऽस्मिशुभकर्मणा २६
सतांस्वभावतश्चित्तंपरोपकरणेक्षमम्
इतिज्ञात्वामुनिश्रेष्ठमांप्रशाधिकृतागसम् २७
मार्कंडेयउवाच-
त्वयासत्यमिहप्रोक्तंनासत्यंभाषितंयतः
अतोव्रतोपदेशंतेकथयामिशुभप्रदम् २८
आषाढेकृष्णपक्षेतुयोगिनीव्रतमाचर
अस्यव्रतस्यपुण्येनकुष्ठंयास्यतिवैध्रुवम् २९

इतिवाक्यमृषेःश्रुत्वादंडवत्पतितोभुवि
उत्थापितःसमुनिनाबभूवातीवहर्षितः ३०
मार्कंडेयोपदेशेनव्रतंतेनकृतंयथा
अष्टादशेवकुष्ठानिगतानितस्यसर्वशः ३१
मुनेर्वाचाततःसम्यग्व्रतेचीर्णेऽभवत्सुखी
ईदृग्विधंनृपश्रेष्ठकथितंयोगिनीव्रतम् ३२
अष्टाशीतिसहस्राणिद्विजान्भोजयतेतुयः
तत्समंफलमाप्नोतियोगिनीव्रतकृन्नरः ३३
महापापप्रशमनंमहापुण्यफलप्रदम्
पठनाच्छ्रवणान्मर्त्यःसर्वपापैःप्रमुच्यते ३४

इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमापति
नारदसंवादेआषाढकृष्णयोगिन्येकादशीमाहात्म्यंनाम-
द्विपंचाशत्तमोऽध्यायः ५२

त्रिपञ्चाशत्तमोऽध्यायः

युधिष्ठिरउवाच-
आषाढस्यसितेपक्षेकाचएकादशीभवेत्
किंनामकोविधिस्तस्याएतद्विस्तरतोवद १
श्रीकृष्णउवाच-
कथयामिमहापुण्यांस्वर्गमोक्षप्रदायिनीम्
शयनींनामनामेतिसर्वपापहरांपराम् २
यस्याःश्रवणमात्रेणवाजपेयफलंलभेत्
सत्यंसत्यंमयाप्रोक्तंनातःपरतरंनृणाम् ३
पापिनांपापनाशायसृष्टाधात्रामहोत्तमा
अतःपरानराजेंद्रवर्त्ततेमोक्षदायिनी ४
एतस्मात्कारणाद्राजन्श्रूयतांगतिरुत्तमा
भवेन्नराणांश्रोतॄणांकथायाःश्रवणादपि ५
तेसदावैष्णवाराजन्ममभक्तिपरायणाः
आषाढेवामनश्चैवपूज्यतेपरमेश्वरः ६
वामनःपूजितोयेनकमलैःकमलेक्षणः

आषाढस्यसितेपक्षेकामिकायादिनेतथा ७
तेनार्चितंजगत्सर्वंत्रयोदेवाःसनातनाः
कृताचैकादशीयेनहरिवासरमुत्तमम् ८
युधिष्ठिरउवाच-
संशयोऽस्तिमहान्मेऽत्रश्रूयतांपुरुषोत्तम
कथंसुप्तोऽसिदेवेशकथंचबलिमाश्रितः ९
कथंचभूमौसंवेशःकिंकुर्वंतिजनाःपरे
एतद्वदमहाप्राज्ञसंशयोऽस्तिमहान्मम १०
श्रीकृष्णउवाच -
श्रूयतांराजशार्दूलकथांपापहरांपराम्
यस्याःश्रवणमात्रेणसर्वपापक्षयोभवेत् ११
बलिनामापूर्वमासीद्दैत्यस्त्रेतायुगेनृप
पूजयंश्चैवमांनित्यंमद्भक्तोमत्परायणः १२
यज्ञैस्तुविधिवद्दैत्योयजतेमांसनातनम्
भक्त्याचपरयाराजन्यज्ञकृद्व्रतकृत्तथा १३
परंविचार्यबहुधामघोनाचैवसूक्तिभिः
गुरुणादैवतैःसार्द्धंबहुधापूजितोऽप्यहम् १४
ततोवामनरूपेणअवतारेचपंचमे
अत्युग्ररूपेणतदासर्वब्रह्मांडरूपिणा १५
वाक्छलेनजितादैत्याःसत्यमाश्रित्यसंस्थितः
शुक्रस्तंवारयामासयन्नारायणइत्ययम् १६
याचितावसुधाराजन्सार्द्धत्रयपदीमया
संकल्पोदकमात्रेतुकरेतेनैवचार्पिते १७
रूपमीदृग्विधंराजंस्तदाशृणुमयाकृतम्
भूर्लोकेचरणौन्यस्यभुवर्लोकेतुजानुनी १८
स्वर्लोकेचकटिंन्यस्यमहर्लोकेतथोदरम्
जनलोकेचहृदयंतपोलोकेतुकंठकम् १९
सत्यलोकेमुखंस्थाप्यमस्तकंचतदूर्द्धवकम्
चंद्रसूर्यग्रहाश्चैवनक्षत्राणितथैवच २०
देवाःसेंद्राश्चनागाश्चयक्षगंधर्वकिन्नराः

स्तुवंतोवेदसंभूतैःसूक्तैश्चविविधैस्तथा २१
करेगृहीत्वाचबलित्रिपदैःपूरितामही
अर्द्धंचतस्यपृष्ठेचपदंन्यस्तंमयातदा २२
गतोरसातलंराजन्दानवोममपूजकः
क्षिप्तोऽधोदानवश्चैवकिमकुर्वंततःपरम् २३
विनयेनानतोसौवैसुप्रसन्नोजनार्दनः
आषाढशुक्लपक्षेतुकामिकाहरिवासरः २४
तस्यामेकाचमूर्तिर्मेबलिमाश्रित्यतिष्ठति
द्वितीयाशेषपृष्ठेवैक्षीरसागरमध्यतः २५
स्वपित्येवमहाराजयावदागामिकार्तिकी
तावद्भवेत्सुधर्मात्मासर्वधर्मोत्तमोत्तमः २६
व्रतंचकुरुतेमर्त्यःसयातिपरमांगतिम्
एतस्मात्कारणाद्राजन्कर्त्तव्याचप्रयत्नतः २७
नातःपरतराकाचित्पवित्रापापनाशिनी
यस्यांस्वपितिदेवेशःशंखचक्रगदाधरः २८
तस्यांचपूजयेद्देवंशंखचक्रगदाधरम्
रात्रौजागरणंकृत्वाभक्त्याचैवविशेषतः २९
नास्याःपुण्यस्यसंख्यानंकर्तुंशक्तश्चतुर्मुखः
एवंयःकुरुतेराजन्नेकादश्याव्रतोत्तमम् ३०
सर्वपापहरंचैवभुक्तिमुक्तिप्रदायकम्
सचलोकेममसदाश्वपचोऽपिप्रियंकरः ३१
दीपदानेनपालाशपत्रेभुक्त्वाव्रतेनच
चातुर्मास्यंनयंतीहतेनराममवल्लभाः ३२
चातुर्मास्येहरौसुप्तेभूमिशायीभवेन्नरः
श्रावणेवर्जयेच्छाकंदधिभाद्रपदेतथा ३३
दुग्धमाश्वयुजित्याज्यंकार्तिकेद्विदलंत्यजेत्
अथवाब्रह्मचर्यस्थःसयातिपरमांगतिम् ३४
एकादश्याव्रतेनैवपुमान्पापैर्विमुच्यते
कर्तव्यासर्वदाराजन्विस्मर्तव्यानकर्हिचित् ३५
शयनीबोधिनीमध्येयाकृष्णैकादशीभवेत्

सैवोपोष्यागृहस्थस्यनान्याकृष्णाकदाचन ३६
शृणुयाच्चैवयोराजन्कथांपापहरांपराम्
अश्वमेधस्ययज्ञस्यफलंप्राप्नोतिमानवः ३७
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वरसंवादेदेवशयन्येकादशीनामत्रिपंचाशत्तमोऽध्यायः ५३

चतुष्पञ्चाशत्तमोऽध्यायः

युधिष्ठिरउवाच-
श्रावणस्यसितेपक्षेकिंनामैकादशीभवेत्
तन्नःकथयगोविंदवासुदेवनमोऽस्तुते १
श्रीकृष्णउवाच-
शृणुराजन्प्रवक्ष्यामिश्राख्यानंपापनाशनम्
यत्प्रोक्तंब्रह्मणापूर्वंपृच्छतेनारदायवै २
नारदउवाच-
भगवन्श्रोतुमिच्छामित्वत्तोऽहकमलासन
श्रावणस्यासितेपक्षेकिंनामैकादशीभेत् ३
कोदेवःकोविधिस्तस्याःकिंपुण्यंकथयप्रभो
इतितस्यवचःश्रुत्वाब्रह्मावचनमब्रवीत् ४
ब्रह्मोवाच-
शृणुनारदतेवच्मिलोकानांहितकाम्यया
श्रावणैकादशीकृष्णाकामिकानामनामतः ५
अस्याःश्रवणमात्रेणवाजपेयफलंलभेत्
अस्यांयजतिदेवेशंशंखचक्रगदाधरम् ६
श्रीधराख्यंहरिंविष्णुंमाधवंमधुसूदनम्
पूजयेद्ध्यायतेयोवैतस्यपुण्यंफलंशृणु ७
नगंगायांनकाश्यांचनैमिषेनचपुष्करे
तत्फलंसमवाप्नोतियत्फलंकृष्णपूजनात् ८
गोदावर्यांगुरौसिंहेव्यतीपातेचदंडके
यत्फलंसमवाप्नोतितत्फलंकृष्णपूजनात् ९
ससागरवनोपेतांयोददातिवसुंधराम्

कामिकाव्रतकारीचह्युभौसमफलौस्मृतौ १०
प्रसूयमानांयोधेनुंदद्यात्सोपस्करांनरः
तत्फलंसमवाप्नोतिकामिकाव्रतकारकः ११
श्रावणेश्रीधरंदेवंपूजयेद्योनरोत्तमः
तेनैवपूजितादेवागंधर्वोरगपन्नगाः १२
तस्मात्सर्वप्रयत्नेनकामिकादिवसेहरिः
पूजनीयोयथाशक्तिमानुषैःपापभीरुभिः १३
येसंसारार्णवेमग्नाःपापपंकसमाकुले
तेषामुद्धरणार्थायकामिकाव्रतमुत्तमम् १४
नातःपरतराकाचित्पवित्रापापहारिणी
एवंनारदजानीहिस्वयमाहपरोहरिः १५
अध्यात्मविद्यानिरतैर्यत्फलंप्राप्यतेनरैः
ततोबहुतरंविद्धिकामिकाव्रतसेविनाम् १६
रात्रौजागरणंकृत्वाकामिकाव्रतकृन्नरः
नपश्यतियमंरौद्रंनैवगच्छतिदुर्गतिम् १७
नपश्यतिकुयोनिंचकामिकाव्रतसेवनात्
कामिकायाव्रतेचीर्णेकैवल्यंयोगिनोगताः १८
तस्मात्सर्वप्रयत्नेनकर्तव्यानियतात्मभिः
तुलसीप्रभवैःपत्रैःयोनरःपूजयेद्धरिम् १९
नलिप्यतेसपापेनपद्मपत्रमिवांभसा
सुवर्णभारमेकंतुरजतंचचतुर्गुणम् २०
तत्फलंसमवाप्नोतितुलसीदलपूजनात्
रत्नमौक्तिकवैडूर्यप्रवालादिभिरर्चितः २१
नतुष्यतितथाविष्णुस्तुलसीदलतोयथा
तुलसीमंजरीभिश्चपूजितोयेनकेशवः २२
यादृष्टानिखिलाघसंघशमनीस्पृष्टावपुःपावनी
रोगाणामभिवंदितानिरसिनीसिक्तांतकत्रासिनी
प्रत्यासत्तिविधायिनीभगवतःकृष्णस्यसंरोपिता
न्यस्तातच्चरणेविमुक्तिफलदातस्यैतुलस्यैनमः २३
दीपंददातियोमर्त्योदिवारात्रंहरेर्दिने

तस्यपुरायस्यसंख्यातुंचित्रगुप्तोनवेत्त्यलम् २४
कृष्णाग्रेदीपकोयस्यज्वलत्येकादशीदिने
पितरस्तस्यतृप्यंतिग्रमृतेनदिविस्थिताः २५
घृतेनदीपंप्रज्वाल्यतिलतैलेनवापुनः
प्रयातिसूर्यलोकंचदीपकोटिशतार्चितः २६
ग्रयंतवाग्रेकथितःकामिकामहिमामया
ग्रतोनरैःप्रकर्त्तव्यासर्वपातकहारिणी २७
ब्रह्महत्यापहरणीभ्रूणहत्याविनाशिनी
वैष्णवस्थानदात्रीचमहापुरायफलप्रदा २८
श्रुत्वामाहात्म्यमेतस्यानरःश्रद्धासमन्वितः
विष्णुलोकमवाप्नोतिसर्वपापैःप्रमुच्यते २९
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
उमामहेश्वरसंवादेश्रावणकृष्णैकादशीनामचतुष्पंचाशत्तमोऽध्यायः ५४

पञ्चपञ्चाशत्तमोऽध्यायः

युधिष्ठिरउवाच
श्रावणस्यसितेपक्षेकिंनामैकादशीभवेत्
कथयस्वप्रसादेनममाग्रेमधुसूदन १
श्रीकृष्णउवाच-
शृणुष्वावहितोराजन्कथांपापहरांपराम्
यस्याःश्रवणमात्रेणवाजपेयफलंभवेत् २
द्वापरस्ययुगस्यादौपुरामाहिष्मतीपुरे
राजामहीजिदाख्यातोराज्यंपालयतिस्वकम् ३
पुत्रहीनस्यतस्यैवनतद्राज्यंसुखप्रदम्
ग्रपुत्रस्यसुखंनास्तिइहलोकेपरत्रच ४
चिंतयास्यसुतस्यैवंकालोबहुतरोगतः
नप्राप्तश्चसुतोराज्ञासर्वसौख्यप्रदोनृणाम् ५
दृष्ट्वात्मानंप्रवयसंराजाचिंतापरोऽभवत्
तदागतःप्रजामध्येइदंवचनमब्रवीत् ६
इहजन्मनिभोलोकानमयापातकंकृतम्

अन्यायोपार्जितंवित्तंक्षिप्तंकोशेमयानहि ७
ब्रह्मस्वंदेवद्रविणंनगृहीतंमयाक्वचित्
न्यासापहारोनकृतःपरस्यबहुपापदः
पुत्रवत्पालितोलोकोधर्मेणविजितामही ८
दुष्टेषुपातितोदंडोबंधुपुत्रोपमेष्वपि
शिष्टास्तुपूजितानित्यंनद्वेष्याश्चमयाजनाः ९
इत्येवंब्रुवतोमार्गंधर्मयुक्तंद्विजोत्तमाः
कस्मान्ममगृहेपुत्रोनजातस्तद्विमृश्यताम् १०
इतिवाक्यंद्विजाःश्रुत्वासप्रजाःसपुरोहिताः
मंत्रयित्वानृपहितंजग्मुस्तेगहनंवनम् ११
इतस्ततश्चपश्यंतआश्रमानृषिसेवितान्
नृपतेर्हितमिच्छंतोददृशुर्मुनिसत्तमम् १२
तप्यमानंतपोघोरंनिरालंबंनिरामयम्
निराहारंजितात्मानंजितक्रोधंसनातनम् १३
लोमशंधर्मतत्वज्ञंसर्वशास्त्रविशारदम्
दीर्घायुषंमहात्मानंसकेशंब्रह्मसंमितम् १४
कल्पेकल्पेगतेतस्यएकंलोमविशीर्यते
अतोलोमशनामायंत्रिकालज्ञोमहामुनिः १५
तंदृष्ट्वाहर्षिताःसर्वेआजग्मुस्तस्यसन्निधिम्
यथान्यायंयथार्हंतेनमश्चक्रुर्यथोदितम् १६
विनयावनताःसर्वेऊचुस्तेचपरस्परम्
अस्मद्भाग्यवशादेवप्राप्तोऽयमुनिसत्तमः
तास्तथासप्रजावीक्ष्यउवाचऋषिसत्तमः १७
लोमशउवाच-
किमर्थमिहसंप्राप्तःकथयध्वंसकारणम्
दर्शनाद्धृष्टमनसःस्तुवंतश्चैवमांकिमु १८
असंशयंकरिष्यामिभवतांयद्धितंभवेत्
परोपकृतयेजन्ममादृशानांनसंशयः १९
जनाऊचुः -
श्रूयतामभिधास्यामोवयंस्वागमकारणम्

संशयच्छेदनार्थायतवसान्निध्यमागताः २०
पद्मयोनेःपरतरस्त्वत्तःश्रेष्ठोनविद्यते
अतःकार्यवशात्प्राप्ताःसमीपंभवतोवयम् २१
महीजिन्नामराजासौपुत्रहीनोऽस्तिसांप्रतम्
वयंतस्यप्रजाब्रह्मन्पुत्रवत्तेनपालिताः २२
तंपुत्ररहितंदृष्ट्वातस्यदुःखेनदुःखिताः
तपःकर्तुमिहायातामतिंकृत्वातुनैष्ठिकीम् २३
तस्यभाग्येनदृष्टोऽसिह्यस्माभिस्त्वंद्विजोत्तम
महतांदर्शनेनैवकार्यसिद्धिर्भवेन्नृणाम् २४
उपदेशंवदमुनेराज्ञःपुत्रोयथाभवेत्
इतितेषांवचःश्रुत्वामुहूर्त्तंध्यानमास्थितः
प्रत्युवाचमुनिर्ज्ञात्वातस्यजन्मपुरातनम् २५
लोमशउवाच-
पुराजन्मनिवैश्योऽयधनहीनोनृशंसकृत्
वाणिज्यकर्मनिरतोग्रामाद्ग्रामांतरंभ्रमन् २६
ज्येष्ठेमासिसितेपक्षेदशमीदिवसेतथा
मध्यगेद्युमणौप्राप्तेग्रामसीम्निजलाशयम् २७
कूपिकांसजलांदृष्ट्वाजलपानेमनोदधे
सद्यस्ततःसवत्साचधेनुस्तत्रसमागता २८
तृष्णातुरानिदाघार्तातस्यामंबुपपौतुसा
पिबंतींवारयित्वातामसौतोयंपपौस्वयम् २९
कर्मणातेनपापेनपुत्रहीनोनृपोभवेत्
कस्यापिजन्मनःपुण्यात्प्राप्तंराज्यमकंटकम् ३०
लोकाऊचुः -
पुण्यात्पापंक्षयंयातिपुराणेश्रूयतेमुने
पुण्योपदेशंकथययेनपापक्षयोभवेत्
यथाभवत्प्रसादेनपुत्रोभवतिभूपतेः ३१
लोमशउवाच-
श्रावणेशुक्लपक्षेतुपुत्रदानामविश्रुता
एकादशीवांच्छितदाकुरुध्वंतद्व्रतंजनाः ३२

इतिश्रुत्वानमस्कृत्यमुनिमेत्यपुरंव्रतम्
यथाविधियथान्यायंकृतंतैर्जागरान्वितम् ३३
तस्यपुरयंसुविमलंदत्तंनृपतयेजनैः
दत्तेपुरयेऽथसाराज्ञीगर्भमाधत्तशोभनम् ३४
प्राप्तोप्रसवकालेसासुषुवेपुत्रमूर्जितम्
श्रावणस्यसितेपक्षेकर्कटस्थेदिवाकरे ३५
द्वादश्यांवासुदेवायपवित्रारोपणंस्मृतम्
हेमरौप्यताम्रक्षौमैःसूत्रैःकौशेयपद्मजैः ३६
कुशैःकाशैश्चकार्पासैर्ब्राह्मरयाकर्तितैःशुभैः
स्नात्वात्रिगुणितंसूत्रंत्रिगुणीकृत्यशोधयेत् ३७
गोदोहांतरितेकालेपूर्वेद्युरधिवासनम्
ब्राह्मणेभ्योनमस्कृत्यगुरुपादौप्रणम्यच ३८
गीतमंगलनिर्घोषःकुर्याज्जागरणंततः
ब्राह्मणाःक्षत्रियावैश्याभिल्लाःशूद्रास्तथैवच ३९
स्वधर्मावस्थिताःसर्वेभक्त्याकुर्युःपवित्रकम्
ततःपवित्रंगुरवेदद्याद्वैविधिपूर्वकम् ४०
ब्राह्मणान्वैष्णवांश्चैवगंधपुष्पादिनार्चयेत्
अतोदेवेतिमंत्रेणद्विजोविष्णौनिवेदयेत् ४१
शूद्रस्तुमूलमंत्रेणयथाविष्णौतथाशिवे
वर्षेवर्षेप्रकर्त्तव्यंपवित्रारोपणंनरैः ४२
भुक्तिंमुक्तिंचइच्छद्भिःसंसारेशोकसागरे
नकरोतिविधानेनपवित्रारोपणंतुयः ४३
तस्यसांवत्सरीपूजानिष्फलावैष्णवस्यतु
श्रुत्वामाहात्म्यमेतस्यानरःपापात्प्रमुच्यते
इहपुत्रसुखंप्राप्यपरत्रस्वर्गतिंभवेत् ४४

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहिता
यामुत्तरखंडेउमापतिनारदसंवादेश्रावणशुक्लापवित्रारोपणीपुत्रदैकादशी
नामपंचपंचाशत्तमोऽध्यायः ५५

षट्पञ्चाशत्तमोऽध्यायः

युधिष्ठिरउवाच-
भाद्रस्यकृष्णपन्नेतुकिंनामैकादशीभवेत्
एतदिच्छाम्यहंश्रोतुंकथयस्वजनार्दन १
श्रीकृष्णउवाच-
शृणुष्वैकमनाराजन्कथयिष्यामिविस्तरात्
अजेतिनामतःप्रोक्तासर्वपापप्रणाशिनी २
पूजयित्वाहृषीकेशंव्रतमस्यांकरोतियः
पापानितस्यनश्यंतिव्रतस्यश्रवणादपि ३
नातःपरतराराजन्लोकद्वयहितायवै
सत्यमुक्तंमयाह्येतन्नासत्यंममभाषितम् ४
हरिश्चन्द्रइतिख्यातोबभूवनृपतिःपुरा
चक्रवर्तीसत्यसंधःसमस्तायाभुवःपतिः ५
कस्यापिकर्मणःप्राप्तौराज्यभ्रष्टोबभूवसः
विक्रीतौवनितापुत्रौसचकारात्मविक्रयम् ६
पुल्कसस्यचदासत्वंगतोराजासपुण्यकृत्
सत्यमालंब्यराजेंद्रमृतचैलापहारकः ७
सोऽभवन्नृपतिश्रेष्ठोनसत्याच्चलितस्तथा
एवंचतस्यनृपतेर्बहवोवत्सरागताः ८
ततश्चिंतापरोराजासबभूवातिदुःखितः
किंकरोमिक्वगच्छामिनिष्कृतिर्मेकथंभवेत् ९
इतिचिंतयतस्तस्यमग्नस्यवृजिनार्णवे
आजगाममुनिःकश्चिज्ज्ञात्वाराजानमातुरम् १०
परोपकारणार्थायनिर्मिताब्रह्मणाद्विजाः
सतंदृष्ट्वाद्विजवरंननामनृपसत्तमः ११
कृतांजलिपुटोभूत्वागौतमस्याग्रतःस्थितः
कथयामासवृत्तांतमात्मनोदुःखसंयुतम् १२
श्रुत्वानृपतिवाक्यानिगौतमोविस्मयान्वितः
उपदेशंनृपतयेव्रतस्यास्यददौमुनिः १३
मासिभाद्रपदेराजन्कृष्णपन्नेतिशोभना

एकादशीसमायाताअजानामेतिपुरायदा १४
अस्याःकुरुव्रतंराजन्पापस्यांतोभविष्यति
तवभाग्यवशादेषासप्तमेऽह्निसमागता १५
उपवासपरोभूत्वारात्रौजागरणंकुरु
एवमस्याव्रतेचीर्णेतवपापक्षयोध्रुवम् १६
तवपुण्यप्रभावेणचागतोऽहनृपोत्तम
इत्येवंकथयित्वाचमुनिरंतरधीयत १७
मुनिवाक्यंनृपःश्रुत्वाचकारव्रतमुत्तमम्
कृतेतस्मिन्व्रतेराज्ञःपापस्यांतोऽभवत्क्षणात् १८
श्रूयतांराजशार्दूलप्रभावोऽस्यव्रतस्यच
यद्दुःखंबहुभिर्वर्षैर्भोक्तव्यंतत्क्षयोभवेत् १९
निस्तीर्णदुःखोराजासीद्व्रतस्यास्यप्रभावतः
पत्न्यासहसमायोगंपुत्रजीवनमापसः २०
दिविदुंदुभयोनेदुःपुष्पवर्षमभूद्दिवः
एकादश्याःप्रभावेनप्राप्यराज्यमकंटकम् २१
स्वर्गंलेभेहरिश्चंद्रःसपुरःसपरिच्छदः
ईदृग्विधंव्रतंराजन्येकुर्वंतिचमानवाः २२
सर्वपापविनिर्मुक्तास्त्रिदिवंयांतितेनृप
पठनाच्छ्रवणाद्वापिअश्वमेधफलंलभेत् २३

इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमापति-
नारदसंवादेभाद्रपदकृष्णाजैकादशीनामषट्पंचाशत्तमोऽध्यायः५६

सप्तपञ्चाशत्तमोऽध्यायः

युधिष्ठिरउवाच -
नभस्यस्यसितेपक्षेकिंनामैकादशीभवेत्
कोदेवःकोविधिस्तस्यएतदाख्याहिकेशव १
श्रीकृष्णउवाच-
कथयामिमहीपालकथामाश्चर्यकारिणीम्
कथयामासयांब्रह्मानारदायमहात्मने २
नारदउवाच-

कथयस्वप्रसादेनचतुर्मुखनमोऽस्तुते
नभस्यशुक्लपक्षेतुकिंनामैकादशीभवेत्
एतदिच्छाम्यहंश्रोतुंविष्णोराराधनायवै ३
ब्रह्मोवाच–
वैष्णवोऽसिमुनिश्रेष्ठसाधुपृष्टंकिलत्वया
नातःपरतरालोकेपवित्राहरिवासरात् ४
पद्मानामेतिविख्यातानभस्यैकादशीसिता
हृषीकेशःपूज्यतेऽस्याकर्त्तव्यंव्रतमुत्तमम् ५
कथयामितवाग्रेऽहकथांपौराणिकींशुभाम्
यस्याःश्रवणमात्रेणमहापापंप्रणश्यति ६
मांधातानामराजर्षिर्विवस्वद्वंशसंभवः
बभूवचक्रवर्तीससत्यसंधःप्रतापवान् ७
धर्मतःपालयामासप्रजाःपुत्रानिवौरसान्
नतस्यराज्येदुर्भिक्षंनाधयोव्याधयस्तथा ८
निरातंकाःप्रजास्तस्यधनधान्यसमेधिताः
न्यायेनोपार्जितंवित्तंतस्यकोशेमहीपते ९
स्वस्वधर्मेप्रवर्त्तंतेसर्वेवर्णाश्रमास्तथा
कामधेनुसमाभूमिस्तस्यराज्येमहीपतेः १०
तस्यैवंकुर्वतोराज्यंबहुवर्षगणागताः
अथैकस्मिंश्चसंप्राप्तेविपाकःकर्मणःखलु ११
वर्षत्रयंतद्विषयेनववर्षबलाहकः
तेनभग्नाःप्रजास्तस्यबभूवुःक्षुधयार्दिताः १२
स्वाहास्वधावषट्कारवेदाध्ययनवर्जिताः
बभूवविषयस्तस्याभाग्येनदैवपीडितः
अथप्रजाःसमागम्यराजानमिदमब्रुवन् १३
प्रजाऊचुः –
श्रोतव्यंनृपशार्दूलप्रजानांवचनंत्वया
आपोनाराइतिप्रोक्ताःपुराणेषुमनीषिभिः १४
अयनंभगवतस्तस्मान्नारायणइतिस्मृतः
पर्जन्यरूपोभगवान्विष्णुःसर्वगतःस्थितः १५

सएवंकुरुतेवृष्टिंवृष्टेरन्नंततःप्रजाः
तदभावेनृपश्रेष्ठक्षयंगच्छंतिवैप्रजाः
तथाकुरुनृपश्रेष्ठयोगःक्षेमोयथाभवेत् १६
राजोवाच-
सत्यमुक्तंभवद्भिश्चनमिथ्याभिहितंक्वचित्
अन्नंब्रह्मयतःप्रोक्तमन्नेसर्वंप्रतिष्ठितम् १७
अन्नाद्भवंतिभूतानिजगदन्नेनवर्तते
इत्येवंश्रूयतेलोकेपुराणेबहुविस्तरे १८
नृपाणामपचारेणप्रजानांपीडनंभवेत्
नाहंपश्याम्यात्मकृतमेवंबुद्ध्याविचारयन् १९
तथापिप्रयतिष्यामिप्रजानांहितकाम्यया
इतिकृत्वामतिंराजापरिमेयपरिच्छदः २०
नमस्कृत्यविधातारंजगामगहनंवनम्
चचारमुनिमुख्यांश्चआश्रमान्तापसैःश्रितान् २१
ददर्शाथब्रह्मसुतमृषिमांगिरसंनृपः
तेजसाद्योतितदिशंद्वितीयमिवपद्मजम् २२
तंदृष्ट्वाहर्षितोराजाअवतीर्यस्ववाहनात्
नमश्चक्रेऽस्यचरणौकृतांजलिपुटोवशी २३
मुनिस्तमभिनंद्याथस्वस्तिवाचनपूर्वकम्
पप्रच्छकुशलंराज्येसप्तस्वंगेषुभूपतेः २४
निवेदयित्वाकुशलं पप्रच्छानामयंनृपः
दत्तासनोगृहीतार्घ्यउपविष्टोऽस्यसंनिधौ २५
प्रत्युवाचमुनिंराजापृष्टोह्यागमकारणम् २६
राजोवाच-
भगवन्धर्मविधिनाममपालयतोमहीम्
अनावृष्टिश्चसंवृत्तानाहंवेद्म्यत्रकारणम् २७
संशयच्छेदनायात्रआगतोऽहतवांतिके
योगक्षेमविधानेनप्रजानांकुरुनिर्वृतिम् २८
ऋषिरुवाच-
एतत्कृतयुगंराजन्युगानामुत्तमंमतम्

अत्रब्रह्मपरालोकाधर्मश्चात्रचतुष्पदः २९
अस्मिन्युगेतपोयुक्ताब्राह्मणानेतराजनाः
विषयेतवराजेंद्रवृषलोऽयतपस्यति ३०
एतस्मात्कारणाच्चैवनवर्षतिबलाहकः
कुरुतस्यवधेयत्नंयेनदोषःप्रशाम्यति ३१
राजोवाच-
नाहमेनंवधिष्यामितपस्यंतमनागसम्
धर्मोपदेशंकथयउपसर्गविनाशनम् ३२
ऋषिरुवाच-
यद्येवंतर्हिनृपतेकुरुष्वैकादशीव्रतम्
नभस्यस्यसितेपक्षेपद्मानामेतिविश्रुता ३३
तस्याव्रतप्रभावेनसुवृष्टिर्भविताध्रुवम्
सर्वसिद्धिप्रदाह्येषासर्वोपद्रवनाशिनी ३४
अस्याव्रतंकुरुनृपसप्रजःसपरिच्छदः
इतिवाक्यमृषेःश्रुत्वाराजास्वगृहमागतः ३५
भाद्रमासेसितेपक्षेपद्माव्रतमथाकरोत्
प्रजाभिःसहसर्वाभिश्चातुर्वर्ण्यसमन्वितः ३६
एवंव्रतेकृतेराजन्प्रववर्षबलाहकः
जलेनप्लाविताभूमिरभवत्सस्यशालिनी ३७
ऋषीश्वरप्रभावेनलोकाःसौख्यंप्रपेदिरे
एतस्मात्कारणादेवंकर्त्तव्यंव्रतमुत्तमम् ३८
दध्योदनयुतंतस्यांजलपूर्णघटंद्विजे
वस्त्रसंवेष्टितंदत्त्वाछत्रोपानहमेवच ३९
नमोनमस्तेगोविंदबुधश्रवणसंज्ञक
अघौघसंक्षयंकृत्वासर्वसौख्यप्रदोभव ४०
भुक्तिमुक्तिप्रदश्चैवलोकानांसुखदायकः
पठनाच्छ्रवणाद्राजन्सर्वपापैःप्रमुच्यते ४१

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
उमापतिनारदसंवादेभाद्रपदशुक्लापद्मैकादशीनाम-
सप्तपंचाशत्तमोऽध्यायः५७

अष्ट पञ्चाशत्तमोऽध्यायः

युधिष्ठिरउवाच-
कथयस्वप्रसादेनममाग्रेमधुसूदन
इषस्यकृष्णपक्षेतुकिंनामैकादशीभवेत् १
श्रीकृष्णउवाच-
आश्विनेकृष्णपक्षेतुइंदिरानामनामतः
तस्याव्रतप्रभावेनमहापापंप्रणश्यति २
अधोयोनिगतानांचपितृणांगतिदायिनी
शृणुष्वावहितोराजन्कथांपापहरांपराम् ३
यस्याःश्रवणमात्रेणवाजपेयफलंलभेत्
पुराकृतयुगेराजन्बभूवनृपनंदनः ४
इंद्रसेनइतिख्यातःपुरामाहिष्मतीपतिः
सराजापालयामासधर्मेणयशसान्वितः ५
पुत्रपौत्रसमायुक्तोधनधान्यसमन्वितः
माहिष्मत्यधिपोराजाविष्णुभक्तिपरायणः ६
जपन्गोविंदनामानिमुक्तिदानिनराधिपः
कालंनयतिविधिवदध्यात्मध्यानचिंतकः ७
एकस्मिन्दिवसेराज्ञिसुखासीनेसदोगते
अवतीर्यागमत्तत्रह्यंबरान्नारदोमुनिः ८
तमागतमभिप्रेक्ष्यप्रत्युत्थायकृतांजलि
पूजयित्वाथविधिनाचासनेसंन्यवेशयत् ९
सुखोपविष्टंसमुनिंप्रत्युवाचनृपोत्तमः
राजोवाच-
त्वत्प्रसादान्मुनिश्रेष्ठसर्वंचकुशलंमम १०
अद्यक्रतुक्रियाःसर्वाःसफलास्तवदर्शनात्
प्रसादंकुरुदेवर्षेब्रूह्यागमनकारणम् ११
नारदउवाच-
श्रूयतांनृपशार्दूलमद्वचोविस्मयप्रदम्
ब्रह्मलोकादहंप्राप्तोयमलोकंनृपोत्तम १२
शमनेनार्चितोभक्त्याउपविष्टोवरासने

धर्मशीलःसत्यवांस्तुभास्करिंसमुपासते १३
बहुपुगयप्रकर्त्ताचव्रतवैकल्यदोषतः
सभायांश्राद्धदेवस्यमयादृष्टःपितातव १४
कथितस्तेनसंदेशस्तंनिबोधजनेश्वर
इंद्रसेनइतिख्यातोराजामाहिष्मतीपतिः १५
तस्याग्रेकथयब्रह्मन्स्थितंमांयमसंनिधौ
केनापिचांतरायेणपूर्वजन्मोद्भवेनच १६
स्वर्गंप्रेषयमांपुत्रइंदिरापुगयदानतः
इत्युक्तोऽहसमायातःसमीपंतवपार्थिव १७
पितुःस्वर्गकृतेराजन्निंदिराव्रतमाचर
तेनव्रतप्रभावेनस्वर्गंयास्यतितेपिता १८
राजोवाच–
कथयस्वप्रसादेनभगवन्निंदिराव्रतम्
विधिनाकेनकर्त्तव्यंकस्मिन्पत्तेतिथौतथा १९
नारदउवाच–
शृणुराजेंद्रतेवच्मिव्रतस्यास्यविधिंशुभम्
आश्विनस्यासितेपत्तेदशमीदिवसेशुभे २०
प्रातःस्नानंप्रकुर्वीतश्रद्धायुक्तेनचेतसा
ततोमध्याह्नसमयेस्नानंकृत्वासमाहितः २१
पितॄणांप्रीतयेश्राद्धंकुर्याच्छ्रद्धासमन्वितः
एकभक्तंततःकृत्वारात्रौभूमौशयीतच
प्रभातेविमलेजातेप्राप्तेचैकादशीदिने २२
मुखप्रत्तालनंकुर्याद्दंतधावनवर्जितम्
उपवासस्यनियमंगृह्णीयाद्भक्तिभावतः २३
अद्यस्थित्वानिराहारःसर्वभोगविवर्जितः
श्वोभोच्येपुंडरीकात्तशरणंमेभवाच्युत २४
इत्येवंनियमंकृत्वामध्याह्नसमयेतथा
शालग्रामशिलाग्रेतुस्नानंकुर्याद्यथाविधि २५
पूजयित्वाहृषीकेशंधूपगंधादिभिस्तथा
रात्रौजागरणंकुर्यात्केशवस्यसमीपतः २६

ततःप्रभातसमयेप्राप्तेवैद्वादशीदिने
अर्चयित्वाहरिंभक्त्याश्राद्धंकुर्याद्यथाविधि २७
पितॄणांप्रीतयेश्राद्धंकुर्याच्छ्रद्धासमन्वितः
गोधूमचूर्णैर्यच्छ्राद्धंकृतंमेध्यकृतंभवेत् २८
यवैर्व्रीहितिलैर्माषैर्गोधूमैश्चणकैस्तथा
ब्राह्मणान्भोजयेद्राजन्दक्षिणाभिःप्रपूजितान् २९
बंधुदौहित्रपुत्राद्यैःस्वयंभुंजीतवाग्यतः
अनेनविधिनाराजन्कुरुव्रतमतंद्रितः ३०
विष्णुलोकंप्रयास्यंतिपितरस्तवभूपते
इत्युक्त्वानृपतिंराजन्मुनिरंतरधीयत ३१
यथोक्तविधिनाराजाचकारव्रतमुत्तमम्
अंतःपुरेणसहितःपुत्रभृत्यसमन्वितः ३२
कृतेव्रतेतुकौंतेयपुष्पवृष्टिरभूद्दिवः
तत्पितागरुडारूढोजगामहरिमंदिरम् ३३
इंद्रसेनोऽपिराजर्षिःकृत्वाराज्यमकंटकम्
राज्येनिवेश्यतनयंजगामत्रिदिवंस्वयम् ३४
इंदिराव्रतमाहात्म्यंतवाग्रेकथितंमया
पठनाच्छ्रवणाद्राजन्सर्वपापैःप्रमुच्यते ३५
भुक्त्वेहनिखिलान्भोगान्विष्णुलोकेवसेच्चिरम् ३६

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे उमापतिनारदसंवादेआश्विनकृष्णेंदिरैकादशीनामाष्टपंचाशत्तमोऽध्यायः ५८

एकोनिषष्टितमोऽध्यायः

युधिष्ठिरउवाच–
कथयस्वप्रसादेनममाग्रेमधुसूदन
इषस्यशुक्लपक्षेतुकिंनामैकादशीभवेत् १
श्रीकृष्णउवाच–
शृणुराजेंद्रवक्ष्यामिमाहात्म्यंपापनाशनम्
शुक्लपक्षेचाश्विनस्यभवेदेकादशीतुया २
पापांकुशेतिविख्यातासर्वपापहरापरा

पद्मनाभाभिधानंमांपूजयेत्तत्रमानवः ३
सर्वाभीष्टफलंप्राप्तौस्वर्गमोक्षप्रदंनृणाम्
तपस्तप्त्वापुनस्तीव्रंचिरंसुनियतेन्द्रियः ४
यत्फलंसमवाप्नोतितन्नत्वागरुडध्वजम्
कृत्वापिबहुशःपापंनरोमोहसमन्वितः ५
नयातिनरकंनत्वासर्वपापहरंहरिम्
पृथिव्यांयानितीर्थानिपुरायान्यायतनानिच ६
तानिसर्वारायवाप्नोतिविष्णोर्नामानुकीर्त्तनात्
देवंशार्ङ्गधरंविष्णुंयेप्रपन्नाजनार्दनम् ७
नतेषांयमलोकस्ययातनाजायतेक्वचित्
उपोष्यैकादशीमेकांप्रसंगेनापिमानवः
नयातियातनांयामींपापंकृत्वापिदारुणम् ८
वैष्णवःपुरुषोभूत्वाशिवनिंदांकरोतियः
नविंदेद्वैष्णवंलोकंसयातिनरकंध्रुवम् ९
शैवःपाशुपतोभूत्वाविष्णुनिंदांकरोतिचेत्
रौरवेपच्यतेघोरेयावदिन्द्राश्चतुर्दश १०
नेदृशंपावनंकिंचित्त्रिषुलोकेषुविद्यते
यादृशंपद्मनाभस्यव्रतंपातकनाशनम् ११
तावत्पापानिदेहेऽस्मिन्तिष्ठंतिमनुजाधिपम्
यावन्नोपवसेज्जंतुःपद्मनाभदिनंशुभम् १२
अश्वमेधसहस्राणिराजसूयशतानिच
एकादश्युपवासस्यकलांनार्हंतिषोडशीम् १३
एकादशीसमंकिंचिद्व्रतंलोकेनविद्यते
व्याजेनापिकृतायैश्चनतेयांतिहिभास्करिम् १४
स्वर्गमोक्षप्रदाह्येषाशरीरारोग्यदायिनी
कलत्रसुतदाह्येषाधनमित्रप्रदायिनी १५
नगंगानगयाराजन्नचकाशीचपुष्करम्
नचापिकौरवंक्षेत्रंपुरायंभूपहरेर्दिनात् १६
रात्रौजागरणंकृत्वासमुपोष्यहरेर्दिनम्
अनायासेनभूपालप्राप्यतेवैष्णवंपदम् १७

दशैवमातृकेपक्षेराजेंद्रदशपैतृके
प्रियायादशपक्षेतुपुरुषानुद्धरेन्नरः १८
चतुर्भुजादिव्यरूपानागारिकृतकेतनाः
स्रग्विणःपीतवस्त्राश्चप्रयांतिहरिमंदिरम् १९
बालत्वेयौवनत्वेचवृद्धत्वेचनृपोत्तम
उपोष्यैकादशींनूनंनैवप्राप्नोतिदुर्गतिम् २०
पापांकुशामुपोष्यैवआश्विनस्यसितेनरः
सर्वपापबिनिर्मुक्तोहरिलोकंसगच्छति २१
दत्त्वाहेमतिलान्भूमिंगामन्नमुदकंतथा
उपानच्छत्रवस्त्रादीन्नपश्यतियमंनरः २२
यस्यपुण्यविहीनानिदिनान्यायांतियांतिच
सलोहकारभस्त्रेवश्वसन्नपिनजीवति २३
अवंध्यंदिवसंकुर्याद्दरिद्रोऽपिनृपोत्तम
सदाचरन्यथाक्तिस्नानदानादिकाःक्रियाः २४
होमस्नानजपध्यानसत्रादिपुण्यकर्मणाम्
कर्त्तारोनैवपश्यंतिघोरांतांयमयातनाम् २५
दीर्घायुषोधनाढ्याश्चकुलीनारोगवर्जिताः
दृश्यंतेमानवालोकेपुण्यकर्त्तारईदृशाः २६
किमत्रबहुनोक्तेनयांत्यधर्मेणदुर्गतिम्
आरोहंतिदिवंधर्मैर्नात्रकार्याविचारणा २७
इतितेकथितंराजन्यत्पृष्टोऽहत्वयानघ
पापांकुशायामाहात्म्यंकिमन्यच्छ्रोतुमिच्छसि २८

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्र्यांसंहितायामुत्तरखंडेउमापति नारदसंवादेआश्विनशुक्लपापांकुशैकादशीमाहात्म्यनामैकोनषष्टितमोऽध्यायः ५९

षष्टितमोऽध्यायः

युधिष्ठिरउवाच-
कथयस्वप्रसादेनमयिस्नेहाज्जनार्दन
कार्त्तिकस्यासितेपक्षेकिंनामैकादशीभवेत् १

श्रीकृष्णउवाच-
श्रूयतांराजशार्दूलकथयामितवाग्रतः
कार्त्तिकेकृष्णपक्षेतुरमानामसुशोभना २
एकादशीसमाख्यातामहापापहरापरा
अस्याःप्रसंगतोराजन्माहात्म्यंप्रवदामिते ३
मुचुकुंदइतिख्यातोबभूवनृपतिःपुरा
देवेंद्रेणसमंतस्यमित्रत्वमभवन्नृप ४
यमेनवरुणेनैवकुबेरेणापिसर्वथा
बिभीषणेनयस्यैवसखित्वमभवन्नृप ५
विष्णुभक्तःसत्यसंधोबभूवनृपतिःपरः
तस्यैवंशासतोराजन्राज्यंनिहतकंटकम् ६
बभूवदुहितागेहेचंद्रभागासरिद्वरा
शोभनायचसादत्ताचंद्रसेनसुतायवै ७
सकदाचित्समायातःश्वशुरस्यगृहेनृप
एकादशीव्रतदिनंसमायातंसुपुरायदम् ८
समागतेव्रतदिनेचंद्रभागात्वचिंतयत्
किंभविष्यतिदेवेशममभर्त्तातिदुर्बलः ९
क्षुधांनक्षमतेसोढुंपिताचैवोग्रशासनः
पटहस्ताडचतेयस्यसंप्राप्तेदशमीदिने १०
नभोक्तव्यंनभोक्तव्यंनभोक्तव्यंहरेर्दिने
श्रुत्वापटहनिर्घोषंसोभनस्त्वब्रवीत्प्रियाम् ११
किंकर्त्तव्यंमयाकांतेदेहिशिक्षांवरानने
चंद्रभागोवाच -
मत्पितुर्वेश्मनिप्रभोभोक्तव्यंनाद्यकेनचित् १२
गजैरश्वैश्चकलभैरन्यैःपशुभिरेव च
तृणमन्नंतथावारिनभोक्तव्यंहरेर्दिने १३
मानवैश्चकुतःकांतभुज्यतेहरिवासरे
यदित्वंभोक्ष्यसेकांतततोगर्हांप्रयास्यसि १४
एवंविचार्यमनसासुदृढंमानसंकुरु
शोभनउवाच-

सत्यमेतत्प्रियेवाक्यंकरिष्येऽहमुपोषणम् १५
दैवेनविहितंयद्धितत्तथैवभविष्यति
इतिदृढांमतिंकृत्वाचकारनियमंव्रते १६
क्षुधयापीडिततनुःसबभूवातिदुःखितः
इतिचिंतयतस्तस्यआदित्योऽस्तमगाद्गिरिम् १७
वैष्णवानांनराणांसानिशाहर्षविवर्द्धनी
हरिपूजारतानांचजागरासक्तचेतसाम् १८
बभूवनृपशार्दूलशोभनस्यातिदुःखदा
रवेरुदयवेलायांशोभनःपंचतांगतः १९
दाहयामासराजातंराजयोग्यैश्चदारुभिः
चंद्रभागानात्मदेहंददाहपतिनासह २०
कृत्वौर्द्ध्वदैहिकंतस्यतस्थौजनकवेश्मनि
शोभनश्चनृपश्रेष्ठरमाव्रतप्रभावतः २१
प्राप्तोदेवपुरंरम्यंमंदराचलसानुनि
अनुत्तममनाधृष्यमसंख्येयगुणान्वितम् २२
हेमस्तंभमयैसौधैरत्नवैडूर्यमंडितैः
स्फाटिकैर्विविधाकारैर्विचित्रैरुपशोभितैः २३
सिंहासनसमारूढःसुश्वेतच्छत्रचामरः
किरीटकुंडलयुतोहारकेयूरभूषितः
स्तूयमानश्चगंधर्वैरप्सरोगणसेवितः २४
शोभनःशोभतेयत्रराजराजोपरोयथा
सोमशर्मेतिविख्यातोमुचुकुंदपुरेऽभवत् २५
तीर्थयात्राप्रसंगेनभ्रमन्विप्रोददर्शतम्
नृपजामातरंज्ञात्वातत्समीपंजगामसः २६
शोभनोऽपितदाज्ञात्वासोमशर्माणमागतम्
आसनादुत्थितःशीघ्रंनमश्चक्रेद्विजोत्तमम् २७
चकारकुशलप्रश्नंश्वशुरस्यनृपस्यच
कांतायाश्चंद्रभागायास्तथैवनगरस्यच २८
सोमशर्मोवाच–
कुशलंवर्त्ततेराजन्श्वशुरस्यगृहेतव

चंद्रभागाकुशलिनीसर्वतःकुशलंपुरे २९
स्ववृत्तंकथ्यतांराजन्नाश्चर्यंविद्यतेऽद्भुतम्
पुरंविचित्रंरुचिरंनदृष्टंकेनचित्क्वचित् ३०
एतदाचक्ष्वनृपतेकुतःप्राप्तमिदंत्वया
शोभनउवाच-
कार्तिकस्यासितेपक्षेयानामैकादशीरमा ३१
तामुपोष्यमयाप्राप्तंद्विजेंद्रपुरमध्रुवम्
ध्रुवंभवतियेनैवतत्कुरुष्वद्विजोत्तमः ३२
द्विजउवाच-
कथमध्रुवमेतद्धिकथंहिभवतिध्रुवम्
तत्त्वंकथयराजेंद्रतत्करिष्यामिनान्यथा ३३
शोभनउवाच-
मयैतद्विहितंविप्रश्रद्धाहीनंव्रतोत्तमम्
तेनाहमध्रुवंमन्येध्रुवंभवतितच्छृणु ३४
मुचुकुंदस्यदुहिताचंद्रभागासुशोभना
तस्यैकथयवृत्तांतंध्रुवमेतद्भविष्यति ३५
कृष्णउवाच-
सश्रुत्वावचनंतस्यमुचुकुंदपुरंगतः
उवाचसर्ववृत्तांतंचंद्रभागाग्रतोद्विजः ३६
सोमशर्मोवाच -
प्रत्यक्षंदयितःकांतस्तवदृष्टोमयाशुभे
इंद्रतुल्यमनाधृष्यंदृष्टंतस्यपुरंमया
अध्रुवंतेनतत्प्रोक्तंध्रुवंभवतितत्कुरु ३७
चंद्रभागोवाच-
तत्रमांनयविप्रर्षेपतिदर्शनलालसाम्
आत्मनोव्रतपुण्येनकरिष्यामिपुरंध्रुवम् ३८
आवयोर्द्विजसंयोगोयथाभवतितत्कुरु
प्राप्यतेहिमहत्पुण्यंकृत्वायोगंवियुक्तयोः ३९
इतिश्रुत्वासहतयासोमशर्माजगामह
आश्रमंवामदेवस्यमंदराचलसंनिधौ ४०

वामदेवोऽशृणोत्सर्ववृत्तांतंकथितंतयोः
अभ्यषिञ्चच्चन्द्रभागांवेदमंत्रैरथोज्ज्वलाम् ४१
ऋषिमंत्रप्रभावेनविष्णुवासरसेवनात्
दिव्यदेहाबभूवासौदिव्यांगतिमवापह ४२
पत्युःसमीपमगमत्प्रहर्षोत्फुल्ललोचना
जहर्षशोभनोऽतीवदृष्ट्वाकांतांसमागताम् ४३
समाहूयस्वकेवामेपार्श्वेतांसंन्यवेशयत्
अथोवाचप्रियंहर्षाच्चंद्रभागाप्रियंवचः ४४
शृणुकांतहितंवाक्यंयत्पुण्यंविद्यतेमयि
अष्टवर्षाधिकाजातायदाहंपितृवेश्मनि ४५
ततःप्रभृतियच्चीर्णंमयाचैकादशीव्रतम्
यथोक्तविधिसंयुक्तंश्रद्धायुक्तेनचेतसा
तेनपुण्यप्रभावेनभविष्यतिपुरंध्रुवम् ४६
सर्वकामसमृद्धंचयावदाभूतसंप्लवम्
एवंसानृपशार्दूलरमतेपतिनासह ४७
दिव्यभोगादिव्यरुपादिव्याभरणभूषिता
शोभनोऽपितयासार्द्धंरमतेदिव्यविग्रहः ४८
रमाव्रतप्रभावेनमंदराचलसानुनि
चिंतामणिसमाह्येषाकामधेनुसमाथवा ४९
रमाभिधानानृपतेतवाग्रेकथितामया
तस्यामाहात्म्यमनघश्रुतंसर्वंत्वयानृप ५०
मयातवाग्रेकथितंमाहात्म्यंपापनाशनम्
एकादशीव्रतानांचपक्षयोरुभयोरपि ५१
यथाकृष्णातथाशुक्लाविभेदंनैवकारयेत्
सेवितैकादशीनृणांभुक्तिमुक्तिप्रदायिनी ५२
धेनुःश्वेतायथाकृष्णाउभयोःसदृशंपयः
तथैवतुल्यफलदंस्मृतमेकादशीद्वयम् ५३
एकादशीव्रतानांयोमाहात्म्यंशृणुतेनरः
सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते ५४

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमापति-

नारदसंवादेकार्तिककृष्णारमैकादशीनामषष्टितमोऽध्यायः ६०

एकषष्टितमोऽध्यायः

युधिष्ठिरउवाच-
श्रुतंरमायामाहात्म्यंत्वत्तःकृष्णयथातथम्
कार्तिकेशुक्लपक्षेयातांमेकथयमानद १
श्रीकृष्णउवाच-
शृणुराजन्प्रवक्ष्यामिशुक्लेचोर्जदलेतुया
सायथानारदेप्रोक्ताब्रह्मणालोककारिणा २
नारदउवाच -
प्रबोधिन्याश्चमाहात्म्यंवदविस्तरतोमम
यस्यांजागर्तिगोविंदोधर्मकर्मप्रवर्त्तकः ३
ब्रह्मोवाच-
प्रबोधिन्याश्चमाहात्म्यंपापघ्नंपुरायवर्द्धनम्
मुक्तिप्रदंसुबुद्धीनांशृणुष्वमुनिसत्तम ४
तावद्गर्जंतितीर्थानिश्रासमुद्रसरांसिच
यावत्प्रबोधिनीविष्णोस्तिथिर्नायातिकार्तिके ५
तावद्गर्जंतिविप्रेंद्रगंगाभागीरथीक्षितौ
यावन्नायातिपापघ्नीकार्तिकेहरिबोधिनी ६
अश्वमेधसहस्राणिराजसूयशतानिच
एकेनैवोपवासेनप्रबोधिन्यालभेन्नरः ७
यद्दुर्ल्लभंयदप्राप्यंत्रैलोक्यस्यनगोचरम्
तदप्यप्रार्थितंपुत्रंददातिहरिबोधिनी ८
एश्वर्यंसंपदंप्रज्ञांराज्यंचसुखसंपदः
ददात्युपोषिताभक्त्याजनेभ्योहरिबोधिनी ९
मेरुमन्दर मात्राणिवपापान्युक्तानियानि च
एकेनैवोपवासेनदहतेपापनाशिनी १०
पूर्वजन्मसहस्रेषुयत्पापंसमुपार्जितम्
निशिजागरणंचास्यादहतेतूलराशिवत् ११
उपवासंप्रबोधिन्यांयःकरोतिस्वभावतः

विधिवन्मुनिशार्दूलयथोक्तंलभतेफलम् १२
यथोक्तंकुरुतेयस्तुविधिवत्सुकृतंनरः
स्वल्पंमुनिवरश्रेष्ठमेरुतुल्यंभवेत्फलम् १३
विधिहीनंतुयःकुर्यात्सुकृतंमेरुमात्रकम्
अणुमात्रंतदाप्नोतिफलंधर्मस्यनारद १४
येध्यायंतिमनोवृत्यायेकरिष्यंतिबोधिनीम्
वसंतिपितरोहृष्टाविष्णुलोकेचतस्यवै १५
विमुक्तानारकैर्दुःखैर्यातिविष्णोःपरंपदम्
कृत्वातुपातकंघोरंब्रह्महत्यादिकंनरः १६
कृत्वातुजागरंविष्णोर्द्धौतपापोभवेन्नरः
दुष्प्राप्यंयत्फलंविप्रअश्वमेधादिकैर्मखैः १७
प्राप्यतेतत्सुखेनैवप्रबोधिन्यास्तुजागरे
आप्लुत्यसर्वतीर्थेषुप्रदत्त्वाकांचनंमहीम् १८
तत्फलंसमवाप्नोतियत्कृत्वाजागरंहरेः
जातःसएवसुकृतीकुलंतेनैवपावितम् १९
कार्तिकेमुनिशार्दूलकृतायेनप्रबोधिनी
यथाध्रुवंनृणांमृत्युर्धनंगात्रंतथाध्रुवम् २०
इतिज्ञात्वामुनिश्रेष्ठकर्तव्यंवैष्णवंदिनम्
यानिकानिचतीर्थानित्रैलोक्येसंभवंतिच २१
तानितस्यगृहेसम्यग्यःकरोतिप्रबोधिनीम्
किंतस्यबहुभिःपुण्यैःकृतायेनप्रबोधिनी २२
पुत्रपौत्रप्रदाह्येषाकार्तिकेहरिबोधिनी
सज्ञानीचसयोगीचसतपस्वीजितेंद्रियः २३
भोगोमोक्षश्चतस्यास्तिउपास्तेहरिबोधिनीम्
विष्णोःप्रियतराह्येषाधर्मसारसहायिनी २४
यःकरोतिनरोभक्त्याभुक्तिभाक्सभवेन्नरः
प्रबोधिनीमुपोषित्वागर्भेनविशतेनरः २५
सर्वधर्मान्परित्यज्यतस्मात्कुर्वीतनारद
कर्मणामनसावाचापापंयत्समुपार्जितम् २६
तत्क्षालयतिगोविंदःप्रबोधिन्यांतुजागरे

स्नानंदानंजपःपूजांसमुद्दिश्यजनार्दनम् २७
नरोयत्कुरुतेवत्सप्रबोधिन्यांतदक्षयम्
येर्चयंतिनरास्तस्यांभक्त्यादेवंचमाधवम् २८
समुपोष्यप्रमुच्यंतेपापैस्तैःशतजन्मजैः
महाव्रतमिदंपुत्रमहापापौघनाशनम् २९
प्रबोधवासरंविष्णोर्विधिवत्समुपोषयेत्
व्रतेनानेनदेवेशंपरितोष्यजनार्दनम् ३०
विराजयन्दिशःसर्वाःप्रयातिहरिमंदिरम्
कर्तव्यैषाप्रयत्नेननरैःकांतिधनार्थिभिः ३१
बाल्येयत्संचितंपापंयौवनेवार्द्धकेतथा
शतजन्मकृतंपापंस्वल्पंवायदिवाबहु ३२
तत्क्षालयतिगोविंदश्चास्यामभ्यर्चितोनृणाम्
धनधान्यवहापुण्यासर्वपापहरापरा ३३
तामुपोष्यहरेर्भक्त्यादुर्ल्लभंनभवेत्क्वचित्
चंद्रसूर्योपरागेचयत्फलंपरिकीर्तितम् ३४
तत्सहस्रगुणंप्रोक्तंप्रबोधिन्यांप्रजागरे
स्नानंदानंजपोहोमःस्वाध्यायोऽभ्यर्चनंहरेः ३५
तत्सर्वंकोटिगुणितंप्रबोधिन्यांकृतंतुयत्
जन्मप्रभृतियत्पुण्यंनरेणोपार्जितंभवेत् ३६
वृथाभवतितत्सर्वमकृत्वाकार्तिकेव्रतम्
अकृत्वानियमंविष्णोःकार्तिकंयःक्षिपेन्नरः ३७
नजन्मार्जितपुण्यस्यफलंप्राप्नोतिनारद
तस्मात्सर्वप्रयत्नेनदेवदेवंजनार्दनम् ३८
उपसेवेतविप्रेंद्रसर्वकामफलप्रदम्
परान्नंवर्जयेद्यस्तुकार्तिकेविष्णुतत्परः ३९
परान्नवर्जनाद्वत्सचांद्रायणफलंलभेत्
नित्यंशास्त्रविनोदेनकार्तिकेमधुसूदनः ४०
सदहेत्सर्वपापानियज्ञायुतफलंलभेत्
नतथातुष्यतेयज्ञैर्नदानैर्वाजपादिभिः ४१
यथाशास्त्रकथालापैःकार्तिकेमधुसूदनः

येकुर्वंतिकथांविष्णोर्येशृरवंतिशुभान्विताः ४२
श्लोकार्द्धंश्लोकपादंवाकार्तिकेगोशतंफलम्
सर्वधर्मान्परित्यज्यकार्तिकेकेशवाग्रतः ४३
शास्त्रावधारणंकार्यंश्रोतव्यंचमहामुने
श्रेयसालोभबुद्ध्याचयःकरोतिहरेःकथाम् ४४
कार्तिकेमुनिशार्दूलकुलानांतारयेच्छतम्
नियमेननरोयस्तुशृणुतेवैष्णवींकथाम् ४५
कार्तिकेतुविशेषेणगोसहस्रफलंलभेत्
प्रबोधवासरेविष्णोःशृणुतेयोहरेःकथाम् ४६
सप्तद्वीपवतीदानेतत्फलंलभतेमुने
श्रुत्वाविष्णुकथांदिव्यांयेऽर्चयंतिकथाविदम् ४७
स्वशक्त्यामुनिशार्दूलतेषांलोकोऽक्षयःस्मृतः
गीतशास्त्रविनोदेनकार्तिकंयोनयेन्नरः ४८
नतस्यपुनरावृत्तिर्मयादृष्टाकलिप्रिय
गीतंनृत्यंचवाद्यंचभव्यांविष्णुकथांमुने ४९
यःकरोतिसपुण्यात्मात्रैलोक्योपरिसंस्थितः
बहुपुष्पैर्बहुफलैःकर्पूरागुरुकुंकुमैः ५०
हरेःपूजाविधातव्याकार्तिकेबोधवासरे
यस्मात्पुण्यमसंख्यातंप्राप्यतेमुनिसत्तम ५१
फलैर्नानाविधैर्द्रव्यैःप्रबोधिन्यांतुजागरे
शंखेतोयंसमादायअर्घोदेयोजनार्दने ५२
यत्फलंसर्वतीर्थेषुसर्वदानेषुयत्फलम्
तत्फलंकोटिगुणितंदत्त्वार्घंबोधवासरे ५३
गुरुपूजाततःकार्याभोजनाच्छादनादिभिः
दक्षिणाभिश्चदेवर्षेतुष्टयर्थंचक्रपाणिनः ५४
भागवतंशृणुतेयस्तुपुराणंचपठेन्नरः
प्रत्यक्षरंभवेत्तस्यकपिलादानजंफलम् ५५
कार्त्तिकेमुनिशार्दूलस्वशक्त्यावैष्णवंव्रतम्
यःकरोतियथोक्तंतुमुक्तिस्तस्यसुनिश्चला ५६
केतक्याएकपत्रेणपूजितोगरुडध्वजः

समाःसहस्रंसुप्रीतोभवतिमधुसूदनः ५७
अगस्तिकुसुमैर्देवंपूजयेद्योजनार्दनम्
दर्शनात्तस्यदेवर्षेनरकाग्निःप्रणश्यति ५८
मुनिपुष्पार्चितोविष्णुःकार्तिकेपुरुषोत्तमः
ददात्यभिमतान्कामान्शशिसूर्यग्रहेयथा ५९
विहायसर्वपुष्पाणिमुनिपुष्पेणकेशवम्
कार्तिकेयोऽचयेद्भक्त्यावाजिमेधफलंलभेत् ६०
तुलसीदलानिपुष्पाणियेयच्छंतिजनार्दने
कार्तिकेसकलंवत्सपापंजन्मायुतंदहेत् ६१
दृष्टास्पृष्टाथवाध्याताकीर्तितानामतस्तुता
रोपितासिंचितानित्यंपूजितातुलसीशुभा ६२
नवधातुलसीभक्तिंयेकुर्वंतिदिनेदिने
युगकोटिसहस्राणितन्वंतिसुकृतंमुने ६३
यावच्छाखाप्रशाखाभिर्बीजपुष्पदलैर्मुने
रोपितातुलसीपुंभिर्वर्द्धतेवसुधातले ६४
तेषांवंशेतुयेजातायेभविष्यंतियेगताः
आकल्पवर्षसाहस्रंतेषांवासोहरेर्गृहे ६५
यत्फलंसर्वपुष्पेषुसर्वपत्रेषुनारद
तुलसीदलेनचैकेनकार्तिकेप्राप्यतेतुतत् ६६
संप्राप्तंकार्त्तिकंदृष्ट्वानियमेनजनार्दनः
पूजनीयोमहाविष्णुःकोमलैस्तुलसीदलैः ६७
इष्ट्वाक्रतुशतैर्देवान्दत्त्वादानान्यनेकशः
तुलसीदलैस्तुतत्पुण्यंकार्तिकेकेशवार्चने ६८
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमापति
नारदसंवादेकार्त्तिकेशुक्लैकादशीमाहात्म्यंनामैकषष्टितमोऽध्यायः ६१

द्विषष्टितमोऽध्यायः

युधिष्ठिरउवाच –
भगवञ्छ्रोतुमिच्छामिव्रतानामुत्तमंव्रतम्
सर्वपापहरंविष्णोःफलदंव्रतिनांचयत् १

पुरुषोत्तममासस्यकथांब्रूहिजनार्दन
कोविधिःकिंफलंतस्यकोदेवस्तत्रपूज्यते २
अधिमासेचसंप्राप्तेव्रतंब्रूहिजनार्दन
कस्यदानस्यकिंपुण्यंकिंकर्त्तव्यंनृभिःप्रभो ३
कथंस्नानंचकिंजाप्यंकथंपूजाविधिःस्मृतः
किंभोज्यमुत्तमंचान्नंमासेऽस्मिन्पुरुषोत्तमे ४
श्रीकृष्णउवाच-
कथयिष्यामिराजेंद्रभवतःस्नेहकारणात्
पुरुषोत्तममासस्यमाहात्म्यंपापनाशनम् ५
अधिमासेतुसंप्राप्तेभवेदेकादशीतुया
कमलानामसानाम्नातिथिनामुत्तमातिथिः ६
तस्याव्रतप्रभावेनकमलाभिमुखीभवेत्
ब्राह्मेमुहूर्त्तेचोत्थायसंस्मृत्यपुरुषोत्तमम् ७
स्नात्वाचैवविधानेननियमंकारयेद्व्रती
गृहेत्वेकगुणंजाप्यंनद्यांतुद्विगुणंस्मृतम् ८
गवांगोष्ठेसहस्रोर्ध्वमग्न्यागारेशतान्वितम्
शिवक्षेत्रेषुतीर्थेषुदेवतानांचसन्निधौ ९
लक्षंतुलस्याःसांनिध्येह्यनंतंविष्णुसन्निधौ
अवंत्यामभवत्कश्चिच्छिवशर्माद्विजोत्तमः १०
तस्यात्मजास्तुपंचासन्कनिष्ठोदोषवानभूत्
तदापित्रापरित्यक्तस्त्यक्तःस्वजनबांधवैः ११
कुकर्मणःप्रभावेनगतोदूरतरंवनम्
एकदादैवयोगेनतीर्थराजंसमागतः १२
क्षुत्क्षामोदीनवदनस्त्रिवेण्यांस्नानमाचरत्
मुनीनामाश्रमांस्तत्रविचिन्वन्क्षुधयार्दितः१३
हरिमित्रमुनेस्तत्रददर्शाश्रममुत्तमम्
पुरुषोत्तममासेवैजनानांचसमागमे १४
तत्राश्रमेकथयतांकथांकल्मषनाशिनीम्
ब्राह्मणानांमुखात्तेनश्रद्धयाकमलाश्रुता १५
एकादशीपुण्यतमाभुक्तिमुक्तिप्रदायिनी

जयशर्माविधानेनश्रुत्वेमांकमलातिथिम् १६
एकादशीपुरायतमाभुक्तिमुक्तिप्रदायिनी
व्रतंकृतंचतैःसार्द्धंस्थित्वाशून्यालयेतदा १७
निशीथेसमनुप्राप्तेलक्ष्मीस्तत्रसमागता
वरंददामिभोविप्रकमलायाःप्रभावतः १८
जयशर्मोवाच -
कात्वंकस्यासिरंभोरुप्रसन्नाचकथंमम
इंद्राणीसुरनाथस्यभवानीशंकरस्यवा १९
गंधर्वीकिन्नरीवाथवधूर्वाचंद्रसूर्ययोः
त्वत्सदृक्षानदृष्टाचनश्रुताचशुभानने २०
लक्ष्मीरुवाच-
प्रसन्नासांप्रतंजातावैकुंठादहमागता
प्रेरितादेवदेवेनकमलायाःप्रभावतः २१
पुरुषोत्तममासस्ययापक्षेप्रथमेभवेत्
तस्याव्रतंत्वयाचीर्णंप्रयागेमुनिसंनिधौ २२
व्रतस्यास्यप्रभावेनवशगाहंनसंशयः
तववंशेभविष्यंतिमानवाद्विजसत्तम २३
मत्प्रसादादवाप्स्यंतिसत्यंतेव्याहृतंमया
ब्राह्मणउवाच-
प्रसन्नायदिमेपद्मेव्रतंविस्तरतोवद २४
यत्कथासुप्रवर्तंतेसाधवोयेजनाद्विजाः
लक्ष्मीरुवाच-
श्रोतृणांपरमंश्राव्यंपवित्राणामनुत्तमम् २५
दुःस्वप्ननाशनंपुरायंश्रोतव्यंयत्नतस्ततः
उत्तमःश्रद्धयायुक्तःश्लोकंश्लोकार्द्धमेववा २६
पठित्वामुच्यतेसद्योमहापातककोटिभिः
मासानांपरमोमासःपक्षिणांगरुडोयथा २७
नदीनांचयथागंगातिथिनांद्वादशीतिथिः
अद्यापिनिर्जराःसर्वेभारतेजन्मलिप्सवः २८
तमर्चयंतिविविधानारायणमनामयम्

येयजंतिसदाभक्त्यादेवंनारायणंप्रभुम् २९
तानर्चयंतिसततंब्रह्माद्यादेवतागणाः
येऽपिनामपरायेचहरिकीर्त्तनतत्पराः ३०
हरिपूजापरायेचतेकृतार्थाःकलौयुगेः
शुक्लेवायदिवाकृष्णेभवेदेकादशीद्वयम् ३१
गृहस्थानांभवेत्पूर्वायतीनामुत्तरास्मृता
एकादशीद्वादशीचरात्रिशेषेत्रयोदशी
तत्रक्रतुशतंपुण्यंत्रयोदश्यांतुपारणे ३२
एकादश्यांनिराहारःस्थित्वाहमपरेऽहनि
भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत ३३
अमुंमंत्रंसमुच्चार्यदेवदेवस्यचक्रिणः
भक्तिभावेनतुष्टात्माउपवासंसमाचरेत् ३४
कुर्याद्देवस्यपुरतोजागरंनियतोव्रती
गीतैर्वाद्यैश्चनृत्यैश्चपुराणपठनादिभिः ३५
ततःप्रातःसमुत्थायद्वादशीदिवसेव्रती
स्नात्वाविष्णुंसमभ्यर्च्यविधिवत्प्रयतेंद्रियः ३६
पंचामृतेनसंस्नाप्यएकादश्यांजनार्दनः
द्वादश्यांचपयःस्नानाद्धरेःसारूप्यमश्नुते ३७
अज्ञानतिमिरांधस्यव्रतेनानेनकेशव
प्रसीदसन्मुखोभूत्वाज्ञानदृष्टिप्रदोभव ३८
एवंविज्ञाप्यदेवेशंदेवदेवंगदाधरम्
ब्राह्मणान्भोजयेद्भक्त्यातेभ्योदद्याच्चदक्षिणाम् ३९
ततःस्वबंधुभिःसार्द्धंनारायणपरायणः
कृत्वापंचमहायज्ञान्स्वयंभुंजीतवाग्यतः ४०
एवंयःप्रयतःकुर्यात्पुण्यमेकादशीव्रतम्
सयातिविष्णुभवनंपुनरावृत्तिदुर्ल्लभम् ४१
इत्युक्त्वाकमलातस्मैवरंदत्त्वातिरोदधे
सोऽपिविप्रोधनीभूत्वापितुर्गेहंसमागतः ४२
श्रीकृष्णउवाच–
एवंयःकुरुतेराजन्कमलाव्रतमुत्तमम्

शृणुयाद्वासरेविष्णोःसर्वपापैःप्रमुच्यते ४३
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमापति-
नारदसंवादेपुरुषोत्तममासस्यकृष्णाकमलानामैकादशीनाम-

द्विषष्टिमोऽध्यायः ६२

त्रिषष्टितमोऽध्यायः
युधिष्ठिरउवाच -
श्रुतानिबहुधर्माणिव्रतानिचजगत्प्रभो
एकादशीसमंकिंजिच्छ्रुतंनैवजनार्दन १
पुनस्त्वेकादशींब्रूहिपापघ्नींपुगयदायिनीम्
यांकृत्वामनुजोलोकेप्राप्नुयात्परमंपदम् २
श्रीकृष्णउवाच-
शुक्लेवायदिवाकृष्णेयदाचैकादशीभवेत्
नत्याज्याजगतीपालमोक्षसौख्यविवर्द्धनी ३
एकादशीकलौराजन्भवबंधविमोचनी
कामदासर्वकामानांपापानांपापहाभुवि ४
रविवारेऽथमांगल्येसंक्रमेवानृपोत्तम
एकादशीसदोपोष्यापुत्रपौत्रविवर्द्धनी ५
एकादशीव्रतंक्वापिनत्याज्यंविष्णुवल्लभैः
आयुःकीर्तिप्रदंनित्यंसंतानारोग्यवित्तदम् ६
मोक्षदंरूपदंराज्यंनित्यमेकादशीव्रतम्
येकुर्वंतिमहीपालश्रद्धयापरयायुताः ७
यथोक्तविधिनालोकेतेनराविष्णुरूपिणः
जीवन्मुक्तास्तुभूपालदृश्यंतेनात्रसंशयः ८
युधिष्ठिरउवाच-
जीवन्मुक्ताःकथंकृष्णविष्णुरूपाःकथंपुनः
पापरूपाश्चदृश्यंतेपरंकौतूहलंहिमे ९
श्रीकृष्णउवाच-
येचराजन्कलौभक्त्यानिर्जलंव्रतमुत्तमम्
एकादश्याःप्रकुर्वंतिविधिदृष्टेनकर्मणा १०

नकथंविष्णुरूपास्तेजीवन्मुक्ताःकथंनहि
सर्वपापहरंपुरयंव्रतमेकादशीसमम् ११
नकिंचिद्विद्यतेराजन्सर्वकामप्रदंनृणाम्
एकाशनंदशम्यांचनंदायांनिर्जलंव्रतम् १२
पारणंचैवभद्रायांकृत्वाविष्णुसमानराः
श्रद्धावान्यस्तुकुरुतेकामदायाव्रतंशुभम् १३
वांछितंलभतेसोऽपिइहलोकेपरत्रच
पवित्रापावनीह्येषामहापातकनाशिनी १४
भुक्तिमुक्तिप्रदाचैवकर्तृणांनृपसत्तम
कामदायांविधानेनपूजयेत्पुरुषोत्तमम् १५
पुष्पधूपादिभिश्चैवनैवेद्यैर्विविधैस्तथा
कांस्यमांसमसूरांश्चचणकान्कोद्रवांस्तथा १६
शाकंमधुपरान्नंचपुनर्भोजनमैथुनम्
वैष्णवोव्रतकर्त्ताचदशम्यांदशवर्जयेत् १७
द्यूतंक्रीडांतथानिद्रांतांबूलंदंतधावनम्
परापवादंपैशून्यंस्तेयंहिंसांतथारतिम् १८
क्रोधंचवितथंवाक्यमेकादश्यांविवर्जयेत्
कांस्यंमांसंमसूरांश्चतैलंवितथभाषणम् १९
व्यायामंचप्रवासंचपुनर्भोजनमैथुनम्
वृषपृष्ठंपरान्नंचशाकंचद्वादशीदिने २०
अनेनविधिनाराजन्विहितायैश्चकामदा
रात्रौजागरणंकृत्वापूजितःपुरुषोत्तमः २१
सर्वपापविनिर्मुक्तास्तेयांतिपरमांगतिम्
पठनाच्छ्रवणाद्राजन्गोसहस्रफलंलभेत् २२

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखण्डे उमापतिनारदसंवादेपुरुषोत्तममासस्यशुक्लाकामदानामैकादशीनाम- त्रिषष्टितमोऽध्यायः ६३

चतुःषष्टितमोऽध्यायः

नारदउवाच-

चातुर्मास्यांतुनियमायेकेचिद्भुविविश्रुताः
तानहंश्रोतुमिच्छामिकथयस्वमहेश्वर १
चातुर्मास्येहरौसुप्तेकर्त्तव्यंकिंजनार्दने
षड्रसानांपरित्यागेनखकेशविधारणे
अन्यैश्चनियमैःस्वामिन्यत्फलंतद्ब्रवीहिमे २
सूतउवाच–
एतच्छ्रुत्वात्वसौदेवःप्रहस्योत्फुल्ललोचनः
प्रोवाचतंद्विजवरंनारदंतपसान्निधिम् ३
महादेवउवाच–
शृणुत्वमिहदेवर्षेकथयामिसविस्तरम्
आषाढस्यसितेपक्षेएकादश्यामुपोषितः ४
चातुर्मास्यव्रतानीहगृह्णीयाद्भक्तिपूर्वकम्
भूमिशय्यासमारूढोयोगनिद्रांगतेहरौ ५
नयेतचतुरोमासान्यावद्भवतिकार्तिकी
प्रतिष्ठानप्रवर्त्तेततथायज्ञादिकाःक्रियाः ६
विवाहव्रतसंबंधअन्यन्माङ्गल्यकर्मच
भूपयानंतथायात्राअन्याश्चविविधाःक्रियाः ७
प्रसुप्तेचजगन्नाथेअच्युतेगरुडध्वजे
व्रतक्रियांचरेद्यस्तुतस्यव्रतफलंशृणु ८
अश्वमेधसहस्रैस्तुयत्फलंप्राप्नुयान्नरः
चातुर्मास्यव्रतैश्चीर्णैस्तत्फलंसमवाप्नुयात् ९
मिथुनस्थेसहस्रांशौस्वापयेन्मधुसूदनम्
तुलाराशौगतेसूर्येपुनरुत्थापयेद्धरिम् १०
अधिमासेतुपतितेतदाचैषविधिक्रमः
स्थापयेत्प्रतिमांविष्णोःशंखचक्रगदाधरीम् ११
पीतांबरधरांसौम्यांपर्यंकेस्थापयेत्शुचौ
श्वेतवस्त्रसमाच्छन्नेसोपधानेतुनारद १२
इतिहासपुराणज्ञोविष्णुभक्तोऽथवापुनः
स्नापयित्वादधिक्षीरमधुलाजघृतस्तथा १३
समालभ्यशुभैर्गंधैर्धूपैःपुष्पैर्मनोरमैः

पूजितांकुसुमैःशुभ्रैर्मंत्रेणानेनवाडव १४
सुप्तेत्वयिजगन्नाथेजगत्सुप्तंभवेदिदम्
विबुद्धेत्वयिबुध्येतजगत्सर्वंचराचरम् १५
एवंतांप्रतिमांविष्णोःस्थापयित्वातुनारद
तस्यैवाग्रेस्वयंवाचागृह्णीयान्नियमंततः १६
स्त्रीवानरोवातद्भक्तोधर्माधर्मविभागतः
चतुरोवार्षिकान्मासान्देवस्योत्थापनावधि १७
गृह्णीयान्नियमानेतान्दंतधावनपूर्वकम्
उपवासंततःकृत्वाप्रभातेविमलेसति १८
नित्यंकर्मचरित्वातुविष्णोरग्रेजितात्मवान्
तेषांफलानिवक्ष्यामितत्कतॄणांपृथक्पृथक् १९
मधुरत्वंलभेद्विद्वान्पुरुषोगुडवर्जनात्
तथैवसंततिंदीर्घांतैलस्यवर्जनाद्यतः २०
घृतस्यवर्जनाद्विप्रसुंदरांगःप्रजायते
कटुतैलपरित्यागीशत्रुनाशमवाप्नुयात् २१
सुगंधतैलत्यागेनसौभाग्यमतुलंलभेत्
पुष्पभोगपरित्यागीस्वर्गेविद्याधरोभवेत् २२
योगाभ्यासीनरोयस्तुसब्रह्मपदमाप्नुयात्
कट्वम्लमधुरक्षारतीक्ष्णकाषायषड्रसान् २३
वर्जयेद्यस्तुवैरूप्यंदौर्गंध्यंनाप्नुयान्नरः
तांबूलवर्जनाद्भोगीरक्तकंठस्तुजायते २४
घृतत्यागाच्चलावण्यंसदास्निग्धतनुर्भवेत्
फलत्यागाच्चविपेंद्रबहुपुत्रश्चजायते २५
पलाशपत्राशनकृद्रूपवान्भोगवान्भवेत्
दीप्तिमान्दीप्तिकरणःसाक्षाद्द्रव्यपतिर्भवेत् २६
दधिदुग्धपरित्यागीगोलोकंलभतेनरः
मौनव्रतीभवेद्यस्तुतस्याज्ञाऽस्खलिताभवेत् २७
इंद्रासनमवाप्नोतिस्थालीपाकस्यवर्जनात्
एवमादिपरित्यागाद्धर्मस्थोधर्मनंदनः २८
नमोनारायणायेतिजप्त्वाशतगुणंफलम्

एकएवसवैस्वर्गेविद्याधरपतिर्भवेत् २९
पुष्करस्नानमात्रेणगंगायाःस्नानजंफलम् ३०
भूमौभुंक्तेसदायस्तुसपृथिव्यधिपोभवेत्
विष्णोश्चैवगृहेकुर्यादुपलेपनमार्जनम् ३१
कल्पस्थायीभवेद्विद्वन्वैकुंठेनात्रसंशयः
प्रदक्षिणंचयःकुर्याच्छतमष्टोत्तरंनरः ३२
हंसयुक्तविमानेनदिव्येनसहगच्छति
गीतवाद्यकरोविष्णोर्गांधर्वलोकमाप्नुयात् ३३
पंचगव्याशनोविद्वन्चांद्रायणफलंलभेत्
नित्यंशास्त्रविनोदेनलोकान्यस्तुप्रबोधयेत् ३४
सव्यासरूपीविष्णवग्रेततोविष्णुपदंलभेत्
तुलसीदलपूजांतुकृत्वाविष्णुपुरंव्रजेत् ३५
कृत्वाप्रोक्षणकंदिव्यंस्थानमप्सरसांलभेत्
शीतांबुनागृहेस्नानात्निर्मलंदेहमाप्नुयात् ३६
उष्णोदकंपरित्यज्यस्नानंवैपौष्करंलभेत्
पत्रेषुयोनरोभुंक्तेकुरुक्षेत्रफलंलभेत् ३७
भुंक्तेशिलायांयोनित्यंतस्यपुण्यंप्रयागजम्
धर्मोदयजलत्यागीनरोगैःपरिभूयते ३८
ताम्रपात्रेषुभुंजानोनैमिषंफलमाप्नुयात्
कांस्यपात्रंपरित्यज्यशेषपात्रमुपाचरेत् ३९
अलाभेसर्वपात्राणांमृन्मयंपात्रमुत्तमम्
स्वगृहीतैःकृतैर्वापिपात्रैःपालाशसंभवैः ४०
यस्तुसंवत्सरंपूर्णअग्निहोत्रमुपासते
पात्रैर्वाभोजनंविद्वान्सेवतेतत्समंस्मृतम् ४१
चांद्रायणसमंप्रोक्तंब्रह्मपात्रेषुभोजने
एकैकंभोजनंविद्वन्ब्रह्मपत्रेषुभुंजतः ४२
त्रिरात्रेणसमंप्रोक्तंमहापातकनाशनम्
एकादश्युपवासेनयत्पुण्यंपरिकीर्तितम् ४३
सर्वदानफलंचैवसर्वतीर्थफलंलभेत्
नचापिनरकंपश्येत्पद्मपत्रेषुभोजनात् ४४

ब्राह्मणोयातिवैकुंठेऽन्योजनःस्वर्गमाप्नुयात्
एषब्रह्ममहावृक्षःपापहासर्वकामदः ४५
मध्यमंवर्जितंपत्रंशूद्रजातेर्नृपोत्तम
भुंजन्नरकमाप्नोतियावदिंद्राश्चतुर्दश ४६
वर्जयेन्मध्यमंपत्रंशेषपत्रेषुभोजनम्
मध्यपत्रेचयःशूद्रोभोजनंकुरुतेद्विज ४७
कपिलांब्रह्मणेदत्त्वाशुद्धिर्भवतिनान्यथा
कपिलांदोहयेद्यस्तुशूद्रोभुंक्तेनिजेगृहे ४८
दशवर्षसहस्राणिविष्ठायांजायतेकृमिः
कृमियोनिविनिर्मुक्तःपशुयोनिमवाप्नुयात् ४९
कपिलंयोह्यनड्वाहंशूद्रोभूत्वात्रवाहयेत्
यावंतितस्यरोमाणितावद्वर्षाणिनारद ५०
कुंभीपाकेषुपच्येतसनरोनात्रसंशयः
अजाचैवगृहेतस्यशूद्रस्यचविशेषतः ५१
तस्यावैदुग्धपानेनशूद्रोयातीहरौरवम्
ब्राह्मणैःसहव्यापारोयस्यशूद्रस्यदृश्यते ५२
सविप्रोवेदबाह्यःस्याच्छूद्रःकौलिकउच्यते
व्यापारेप्रेरितोविप्रःशूद्राज्ञांचकरोतियः ५३
यावत्पदानिचलतेतावद्भवतिनारकी
उदकार्थंतुयोविप्रःशूद्रेणप्रेषितोगृहे ५४
तदुदकंमद्यतुल्यंपीत्वावैनरकंव्रजेत्
शूद्रेणसर्वदानित्यंदानंदेयंद्विजन्मने ५५
तेषांचैवतुवैभक्तिःकर्त्तव्याचविशेषतः
इहलोकेसुखंभुक्त्वापरलोकंचगच्छति ५६
पांचभौतिकमेतद्धिअनर्थकमुदाहृतम्
अतोदेयंहिगुरवेयतोऽनतफलंलभेत् ५७
अस्मिन्कलियुगेघोरेपापाचारेदुरात्मनः
निंदांकुर्वंतिविप्रेंद्रजनानांपुण्यकर्मणाम् ५८
निंदयालभतेदुःखंयावदाभूतसंप्लवम्
नानाधर्माःप्रवर्त्तंतेकलौचैवमहामते ५९

धर्मोऽयदुर्ल्लभोलोकेधर्मकामार्थमोक्षदः
भूमिशायीभवेद्यस्तुनरःकोऽपिमहीतले ६०
दशवर्षसहस्राणिनरोगैःपरिपीड्यते
बहुपुत्रोधनैर्युक्तोह्यकुष्ठीजायतेनरः ६१
नक्तभोजीनरोयस्तुतीर्थयात्राफलंलभेत्
अयाचितेनचाप्नोतिवापीकूपक्रियाफलम् ६२
वर्जयेद्यस्तुवैद्रोहंप्राणहिंसापराङ्मुखः
अहिंसापरमोधर्मइतिवेदेषुगीयते ६३
दानंदयादमइतिसर्वत्रहिश्रुतंमया
तस्मात्सर्वप्रयत्नेनकार्यंवैमहतामपि ६४
गुरवेयेप्रयच्छंतिशरीरंपुत्रपौत्रकम्
तत्रदानप्रभावेनविष्णोर्वल्लभतामियात् ६५
शूद्रेणदीक्षितोयस्तुशूद्रःशूद्रेणदीक्षितः
उभौतौपापिनौप्रोक्तौयावदाभूतसंप्लवम् ६६
हिंसामतिंयदादत्तेशूद्रोवैपापसत्तमः
एकविंशतिकुलंतेननरकंप्रतिपात्यते ६७
कलौपाखंडिनःशूद्रादृश्यंतेबहवोभुवि
तेषांसंभाषणादेवनरकोभवतिद्विज ६८
ब्रह्मज्ञानरतायेचगायत्रीजापिनोद्विज
तेषांदर्शनमात्रेणब्रह्महत्यादिनेदिने ६९
शंखचक्रधराविप्राविष्णुधर्मेषुसंमताः
वेदधर्मरतानित्यंपंक्तिपावनपावनाः ७०
चातुर्मास्यमिदंकर्मकर्त्तव्यंतैःसदानरैः
किमन्यद्बहुनोक्तेनभूयोभूयश्चवाडव ७१
तेधन्याःपृथिवीमध्येनरायेवैष्णवाभुवि
तेषांकुलंधन्यतमंजातिर्धन्यतमास्मृता ७२
मधुभक्षयतेयस्तुसुप्तेदेवेजनार्दने
महत्पापंभवेत्तस्यवर्जनेयच्छृणुष्वतत् ७३
सर्वयज्ञैश्चविविधैर्यत्फलंतदवाप्नुयात्
दाडिमंमातुलिगंचनालिकेरंचवर्जयेत् ७४

देवोवैमानिकोभूत्वाह्यंतेविष्णुपदंव्रजेत्
वित्तवान्सुभगश्चैवकुलेश्रीमतिजायते ७५
यःक्षिपेदेकभक्तेननरोमासचतुष्टयम्
यावंतिचमुहूर्तानिउदितोदितभास्करे ७६
तावद्वर्षसहस्राणिविष्णुलोकेमहीयते
व्रीहिंश्चयवगोधूमान्वर्जयेद्यस्तुमानवः ७७
अश्वमेधादिकेकृतेविधिवद्वैसदक्षिणे
यत्फलंमुनिभिःप्रोक्तंतत्फलंलभतेनरः ७८
धनधान्यसमायुक्तोबहुपुत्रश्चजायते
तुलसीतिलदर्भैश्चयेकुर्वंतिचतर्पणम् ७९
तत्फलंकोटिगुणितंचातुर्मास्येविशेषतः
यदासुप्तेहृषीकेशेकुर्याच्चैतत्त्रयान्वितम् ८०
तेऽपियुगसहस्राणिमोदंतेविष्णुसंनिधौ
पदंवापदमर्द्धंवाऋचांचार्द्धऋचांतथा ८१
विष्णवग्रेयेप्रगायंतिमुक्तास्तेवैनसंशयः
मैथुनंवर्जयेद्यस्तुसुप्तेदेवेजनार्दने ८२
एकमन्वंतरंसोऽपिविष्णुलोकेमहीयते
दधिदुग्धंतथातक्रंगुडंशाकंतथैवच ८३
वर्जनादेवभोविप्रमुक्तिभागीनसंशयः
स्नानमामलकेनैवयेकुर्वंतिचमानवाः ८४
दिनेदिनेमहत्पुण्यंप्राप्नुवंतिचतेमुने
धात्रीफलंपापहरंप्रवदंतिमनीषिणः ८५
त्रैलोक्यतारणार्थायनिर्मिताब्राह्मणापुरा
संध्यामौनंचरेद्यस्तुभुंक्तेमासचतुष्टयम् ८६
मन्वंतराणिचत्वारिवैकुंठेमोदतेपुनः
स्वयंपाकीनरोयस्तुभुंक्तेमासचतुष्टयम् ८७
दशवर्षसहस्राणिइंद्रलोकेमहीयते
चतुरोवार्षिकान्मासान्मौनंचैवसमाचरेत् ८८
सचविष्णुपुरंगच्छेद्ब्रह्मंचतदनंतरम्
मौनभोजीनरोयस्तुकदाचिन्नावसीदति ८९

मौनेनभुंजमानास्तुराक्षसास्त्रिदिवंगताः
कृमिकीटसमायुक्तंपक्वान्नमशुचीभवेत् ९०
गवांमांससमंज्ञेयमन्नंचापिद्विजोत्तम
तदन्नमशुचिज्ञेयंग्रसतेमानुषोयदि ९१
एतद्वैभोजनंप्रोक्तंराक्षसानांप्रियंसदा
तोषितोहिपुराब्रह्मातेनदत्तंमहात्मना ९२
मौनेनभोजयित्वातुस्वर्गंप्राप्तानसंशयः
संजल्पन्भुंजतेयस्तुतेनान्नमशुचीभवेत् ९३
पापंसकेवलंभुंक्तेतस्मान्मौनंसमाचरेत्
उपवाससमंभोज्यंज्ञेयंमौनेननारद ९४
पंचप्राणाहुतीर्यस्तुमौनभोजीनरोत्तमः
पंचवैपातकान्यस्यनश्यंतिनात्रसंशयः ९५
नकुर्यात्संधितंवस्त्रंपितृकर्मणिवाडव
अशुच्यंगेस्थितंचैववस्त्रंतदशुचीभवेत् ९६
कटिपृष्ठस्थितेवस्त्रेपुरीषंकुरुतेतुयः
मूत्रंवामैथुनंवापितद्वस्त्रंपरिवर्जयेत् ९७
पितृकर्मविशेषेणवर्जनीयंचवाडव
सर्वदाचमुनेप्राज्ञैर्देवार्चाचक्रपाणिनः ९८
कर्त्तव्याचविशेषेणशुचिभिर्विजितेंद्रियैः
संप्रसुप्तेहृषीकेशतृणशाककुसुंभिकाः ९९
संधितानिचवस्त्राणिवर्जितानिप्रयत्नतः
चातुर्मास्येहरौसुप्तेयस्तुएतानिवर्जयेत् १००
नरकंनतुसंगच्छेत्यावदाभूतसंप्लवम्
मद्यंमांसंनभक्षेतशाशकंसौकरंतथा १०१
चातुर्मास्येविशेषेणसुप्तेदेवेजनार्दने
सोऽपिदेवत्वमाप्नोतिअहिंसानिरतोनरः १०२
मिथ्याक्रोधंतथारौद्रयंतथापर्वसुमैथुनम्
वर्जितंयेनविप्रेंद्रसोऽश्वमेधफलंलभेत् १०३
ब्रह्मचर्येप्रजावृद्धिरायुर्वृद्धिस्तथैवच
पुष्पंपत्रंफलंशय्याअभ्यंगंचविलेपनम् १०४

वृथादुग्धानिमांसंचमद्यंचपरिवर्जयेत्
चातुर्मास्येहरौसुप्तेनियतंयद्विवर्जितम् १०५
प्रथमंतत्तुदातव्यंब्राह्मणायनसंशयः
तद्धनंचाक्षयंविद्वन्प्रदत्तंयद्द्विजातये १०६
कोटिकोटिगुणंविप्रलभतेनात्रसंशयः
येनकेनापिविप्रेंद्रनियमेनार्चितोहरिः १०७
ददातिविष्णुभवनंनात्रकार्याविचारणा
चातुर्मास्येहरौसुप्तेनियमंयोनकारयेत् १०८
सोऽपिनरकमाप्नोतितस्यजन्मवृथागतम्
यत्पुमान्कारयेन्नित्यंद्विजोक्तंविधिमुत्तमम् १०९
तथोक्तान्नियमांश्चैवसयातिपरमंपदम्
त्रिवर्गरहितंदानंदत्तंभवतिनिष्फलम् ११०
तस्मात्सर्वप्रयत्नेनदेवदेवंजनार्दनम्
तोषयेन्नियमैर्दानैर्यथाशक्त्यानरोत्तमः १११
अकृतस्नानदानंचब्राह्मणानांचपूजनम्
वृथागतंतुतत्सर्वंयावदिंद्राश्चतुर्दश ११२
नारदउवाच–
कीदृशंब्रह्मचर्यंचवदविश्वेश्वरप्रभो
येनचीर्णेनगोविंदःपरितुष्टोभवेन्नृणाम् ११३
महादेवउवाच–
स्वदारनिरतश्चैवब्रह्मचारीस्मृतोबुधैः
चांडालादधिकोविद्वन्यःस्वभार्यांपरित्यजेत् ११४
ऋतावभिगमंकृत्वाब्रह्मचर्यंविधीयते
परित्यजतियोभार्यांभक्तांदोषविवर्जिताम् ११५
पापकर्मानरोलोकेभ्रूणहत्यामवाप्नुयात्
अश्वमेधसहस्राणिवाजपेयशतानिच ११६
एकादश्युपवासस्यकलांनार्हंतिषोडशीम्
स्नानंदानंजपोहोमःस्वाध्यायंदेवतार्चनम् ११७
चातुर्मास्यकृतंयच्चसर्वंहिचाक्षयंभवेत्
एककालंद्विकालंवापुराणंशृणुतेतुयः ११८

सर्वपापविनिर्मुक्तोविष्णुलोकंसगच्छति
हरौसुप्तेविशेषेणहरेर्नामपठन्जपन् ११९
तत्फलंकोटिगुणितंलभतेद्विजसत्तम
वैष्णवोब्राह्मणोयस्तुपूजनंयःकरोतिहि १२०
सएवसर्वधर्मात्मापूज्यएवनसंशयः
चातुर्मास्यमिदंपुगयंपवित्रंपापनाशनम्
श्रुत्वातुलभतेपुगयंगंगास्नानफलंलभेत् १२१

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्त्र्यांसंहितायामुमापतिनारद-
संवादेउत्तरखंडेचातुर्मास्यमहिमानामचतुःषष्टितमोऽध्यायः ६४

पञ्चषष्टितमोऽध्यायः

नारदउवाच-
चातुर्मास्यव्रतानांचप्रब्रूह्युद्यापनंविभो
उद्यापनेकृतेसर्वंसंपूर्णंभवतिध्रुवम् १
महादेवउवाच-
व्रतंकृत्वामहाभागयदिनोद्यापनंचरेत्
यस्तुकर्त्ताकर्मणांसनसम्यक्फलभाक्भवेत् २
व्रतवैकल्यमासाद्यकुष्ठीचांधःप्रजायते
एतस्मात्कारणाच्चैवकुर्यादुद्यापनंद्विज ३
गृहीत्वानियमानेतान्पालयित्वायथाविधि
सुप्तोत्थितेजगन्नाथेगत्वाब्राह्मणसंनिधौ ४
त्तमापयेद्देवदेवंयथाविधिचविस्तरात्
तैलत्यागेघृतंदद्याद्घृतत्यागेपयःस्मृतम् ५
मौनेपिंडास्तिलादेयाःसहिरगयाद्विजातये
भोजनेभोजनंदद्यात्दध्योदनसमन्वितम् ६
अन्नंदद्याद्विशेषेणहिरगयेनसमन्वितम्
अन्नदानान्मुनिश्रेष्ठविष्णुलोकेमहीयते ७
पालाशपात्रेयोभुंक्तेनरोमासचतुष्टयम्
भाजनंघृतपूर्णंतुदद्यादुद्यापनेद्विज ८
षड्रसंभोजनंदद्याद्ब्राह्मणेनक्तभोजने

अयाचितेह्यनड्वाहंसहिरण्यंप्रदापयेत् ९
माषंत्यजन्मुनिश्रेष्ठगांचदद्यात्सवत्सकाम्
धात्रीस्नानेनरोदद्यात्स्वर्णंमाषिकमेवच १०
फलानांनियमेचैवफलानिचप्रदापयेत्
धान्यानांनियमेधान्यमथवाशालयःस्मृताः ११
तद्वद्भूशयनेशय्यांसतूलांगेंदुकान्विताम्
ब्रह्मचर्यंकृतंयेनचातुर्मास्येद्विजोत्तम १२
दंपत्योर्भोजनंदेयमुभयोर्भक्तिपूर्वकम्
सभोगंदक्षिणोपेतंसशाकंलवणंतथा १३
नित्यस्नानेनरोदद्यान्निस्नेहेसर्पिःसक्तवः
नखकेशव्रतेचैवप्रादेशंपरिकल्पयेत् १४
उपानहौप्रदातव्यौउपानहविवर्जनात्
आमिषस्यपरित्यागात्सवत्साकपिलास्मृता १५
नित्यंदीपप्रदोयस्तुसौवर्णंदीपमावहेत्
तंदीपंघृतसंयुक्तंदद्याच्चैवद्विजन्मने १६
विष्णुभक्तायविप्रायपरिपूर्णव्रतेप्सया
शाकस्यनियमेशाकंमाषेसौवर्णमाषकम् १७
मैथुनानांतुनियमेरौप्यंदद्याद्द्विवजातये
नागवल्ल्यास्तुनियमेकर्पूरंसहरिण्यकम् १८
कालेकालेद्विजश्रेष्ठयत्कृतंनियमेनतु
तत्तद्देयंविशेषेणपरलोकगतीप्सया १९
आदौस्नानादिकंकृत्वाविष्णोरग्रेप्रकाशयेत्
अनादिनिधनोदेवःशंखचक्रगदाधरः
तस्याग्रेकेनकुर्वंतियतोविष्णुस्तुपापहा २०
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमापतिनारद संवादेचातुर्मास्योद्यापनंनामपंचषष्टितमोऽध्यायः ६५

षट्षष्ठितमोऽध्यायः

नारदउवाच-
यमस्याराधनंब्रूहिमद्धितार्थंसुरोत्तम

कथंनगम्यतेदेवनरेणनरकांतरे १
श्रूयतेयमलोकेतुसदावैतरणीनदी
अनाधृष्यात्वपाराचदुस्तराबहुशोणिता २
दुस्तरासर्वभूतानांसाकथंसुतराभवेत्
भयमेतन्महादेवयमलोकंप्रतिप्रभो ३
तस्यनिर्मोचनार्थायब्रूहिकृत्यमशेषतः
भगवन्देवदेवेशकृपांकृत्वाममोपरि ४
महादेवउवाच-
द्वारवत्यांपुराविप्रस्नातोऽहलवणांभसि
ददृशेमुनिमायांतंमुद्गलंनामवाडव ५
ज्वलंतमिवचादित्यंतपसाद्योततांगकम्
मांप्रणम्यमुनिःप्राहमुद्गलोविस्मयान्वितः ६
मुद्गलउवाच-
अकस्मान्मूर्च्छितोदेवपतितोऽस्मिधरातले
प्रज्वलंतिममांगानिगृहीतोयमकिंकरैः ७
बलादाकृष्यमाणोऽहपुरुषोंगुष्ठमात्रकः
बद्धोयमभटैर्गाढंनीतोऽस्मिशमनांतिकम् ८
क्षणात्सभायांपश्यामियमंपिंगललोचनम्
कृष्णमुखंमहारौद्रंमृत्युव्याधिशतान्वितम् ९
वातपित्तश्लेष्मदोषैर्मूर्तिमद्भिस्तुसेवितम्
कायशोषज्वरातंकस्फोटिकालूतकादिभिः १०
ज्वालांगमर्दशीर्षार्तिभगंदरबलक्षयैः
कंठमालाक्षिरोगैश्चमूत्रकृच्छ्रज्वरव्रणैः ११
विमूर्च्छिकागलग्राहहृद्रोगैर्भूततस्करैः
इत्थंबहुविधैरौद्रैर्नानारूपैर्भयंकरैः १२
कपालशिरोहस्तैश्चसंग्रामेनरकेतथा
राक्षसैर्दानवैर्घोरैरुपविष्टैःपुरःस्थितैः १३
धर्माधिकारिभिश्चात्रचित्रगुप्तादिलेखकैः
व्याघ्रसिंहवराहैश्चशिखासर्पैःसुदुर्द्धरैः १४
वृश्चिकैर्दंष्ट्रिभिर्भूतैःकीटकैर्मत्कुणादिभिः

वृकचित्रादिशुनकैःकंकैर्गृध्रैश्चजंबुकैः १५
तस्करैर्भूतदारिद्रैर्मारिभिर्डाकिनीग्रहैः
मुक्तकेशैःश्वासकासैर्भ्रुकुटीकुटिलाननैः १६
बृहत्प्रतापैर्नोभीतैःशासकैःपापकर्मणाम्
यमःसभायांशुशुभेसेव्यमानःपरिग्रहैः १७
भीमाटविकजीवैश्चयथाव्यालांजनोगिरिः
ततोविश्वेश्वरःप्राहसमयःकिंकरान्प्रति १८
नामभ्रांतैर्भवद्भिश्चसमानीतःकथंमुनिः
भीमकस्यात्मजोग्रामेकौंडिन्येमुद्गलाभिधः १९
क्षीणायुःक्षत्रियःसोऽस्तिश्रानेयोमुच्यतामसौ
श्रुत्वैतत्तेगतास्तस्मादायाताःपुनरेवते २०
धर्मराजंपुनःप्राहुःसर्वेतेयमकिंकराः
तत्रास्माभिर्गतैर्देहीक्षीणायुर्नोपलक्षितः २१
यमउवाच–
किंकारणमदृश्यास्तेप्रायेणभवतांनराः
सुकृताद्द्वादशीयैस्तुख्यातावैतरणीनदी २२
उज्जयिन्यांप्रयागेवायमुनायांचयेमृताः
तिलहस्तिहिरण्यादिदत्तंयैस्तुगवाह्निकम् २३
दूताऊचुः –
तद्व्रतंकीदृशंब्रह्मन्ब्रूहिसर्वमशेषतः
किंतत्रदेवकर्त्तव्यंपुरुषैस्तवतोषदम् २४
येनकृतानरश्रेष्ठद्वादशीकृष्णपक्षजा
उपवासेचतेनैवकथंपापात्प्रमुच्यते २५
तद्व्रतंकेनविधिनाकर्त्तव्यंचयथावद
सुप्रसन्नेनवक्तव्यंदयांकृत्वादयानिधे २६
श्रीमुद्गलउवाच–
दूतानांवचनंश्रुत्वाउवाचमधुरंतदा
सर्वंवदामिभोदूतायथादृष्टंयथाश्रुतम् २७
यमउवाच–
मार्गशीर्षादिमासेतुयाइमाःकृष्णपक्षजाः

तासुपूर्वासुविधिवद्वृतावैतरणीव्रतम् २८
प्रतिमासंचकर्त्तव्यंयावद्वर्षंभवेद्ध्रुवम्
यांतुकृत्वातुभोदूतामुच्यतेनात्रसंशयः २९
उपवासस्यनियमःकर्त्तव्योविष्णुतुष्टिदः
अद्यमेदेवदेवेशउपवासोभविष्यति ३०
द्वादश्यांपूज्यगोविंदंभक्तिभावसमन्वितम्
स्वप्नेंद्रियस्यवैकल्याद्भोजनंयच्चमैथुनम् ३१
तत्सर्वंक्षममेदेवकृपांकृत्वाममोपरि
एवंवैनियमंकृत्वामध्याह्नेतीर्थमाव्रजेत् ३२
मृद्गोमयतिलान्नीत्वागंतव्यंविधिपूर्वकम्
स्नानंतत्रप्रकर्तव्यंव्रतसंपूर्णहेतवे ३३
अश्वक्रांतेतिमंत्रेणस्नानंकुर्याद्विशेषतः
अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे ३४
मृत्तिकेहरमेपापंयन्मयापूर्वसंचितम्
तयाहतेनपापेनसर्वपापैःप्रमुच्यते ३५
काश्यांचैवतुसंभूतास्तिलावैविष्णुरूपिणः
तिलस्नानेनगोविंदःसर्वपापंव्यपोहति ३६
विष्णुदेहोद्भवादेविमहापापापहारिणी
सर्वपापंहरत्वंवैसर्वेषांहिनमोऽस्तुते ३७
तुलसीपत्रकंधृत्वानामोच्चारणपूर्वकम्
स्नानंसुकृतिभिःप्रोक्तंकर्तव्यंविधिपूर्वकम् ३८
एवंस्नात्वासमुत्तीर्यपरिधायसुवाससी
तर्पयित्वापितृन्देवांस्ततोविष्णोस्तुपूजनम् ३९
संस्थाप्यचाव्रणंकुंभंपंचपल्लवसंयुतम्
पंचरत्नसमोपेतंदिव्यस्रग्गंधवासितम् ४०
जलपूर्णंसद्रव्यंचताम्रपात्रसमन्वितम्
तत्रस्थंश्रीधरंदेवंदेवदेवंतपोनिधिम् ४१
पूर्णेनविधिनाराजन्कुर्यात्पूजांगरीयसीम्
मृद्गोमयादिरचितंमंडलंकारयेच्छुभम् ४२
तंडुलैःशुक्लधौतैश्चअश्मपिष्टैश्चकारयेत्

धर्मराजःप्रकर्त्तव्योहस्ताद्यवयवान्वितः ४३
नदींवैतरणींताम्रांस्थापयित्वातदग्रतः
पूजयेच्चपृथक्सम्यक्समावाहनपूर्वकम् ४४
आवाहयामिदेवेशंयमंवैविश्वरूपिणम्
इहाभ्येहिमहाभागसान्निध्यंकुरुकेशव ४५
इदंपाद्यंश्रियःकांतसोपविष्टंहरेप्रभो
विश्वोद्यानरतोनित्यंकृपांकुरुममोपरि ४६
भूतिदायनमःपादावशोकायचजानुनी
उरूनमःशिवायेतिविश्वमूर्तेनमःकटिम् ४७
कंदर्पायनमोमेढ्रमादित्यायफलंतथा
दामोदरायजठरंवासुदेवायवैस्तनौ ४८
श्रीधरायमुखंकेशान्केशवायेतिवैनमः
पृष्ठंशार्ङ्गधरायेतिचरणौवरदायच ४९
स्वनाम्नाशंखचक्रासिगदापरशुपाणये
सर्वात्मनेनमस्तुभ्यंशिरइत्यभिधीयते ५०
मत्स्यंकूर्मंचवाराहंनारसिंहंचवामनम्
रामंरामंचकृष्णंचबुधंकल्किंनमोऽस्तुते५१
सर्वपापौघनाशार्थंपूजयामिनमोनमः
एभिश्चसर्वशोमंत्रैर्विष्णुंध्यात्वाप्रपूजयेत् ५२
धर्मराजनमस्तेऽस्तुधर्मराजनमोऽस्तुते
दक्षिणाशापतेतुभ्यंनमोमहिषवाहन ५३
चित्रगुप्तनमस्तुभ्यंविचित्रायनमोनमः
नरकार्तिप्रशांत्यर्थंकामान्यच्छममेप्सितान् ५४
यमायधर्मराजायमृत्यवेचांतकायच
वैवस्वतायकालायसर्वभूतक्षयायच ५५
वृकोदरायचित्रायचित्रगुप्तायवैनमः
नीलायचैवदध्नायनित्यंकुर्यान्नमोनमः ५६
एवंद्वादशभिःपूज्योनामभिर्धर्मराट्प्रभुः
वैतरणीसुदुःपारेपापघ्निसर्वकामदे ५७
इहाभ्येहिमहाभागेगृहाणार्घंमयाकृतम्

यमद्वारपथेघोरेख्यातावैतरणीनदी ५८
तस्यामुद्धरणार्थायजन्ममृत्युजरातिगा
यादुस्तरादुष्कृतिभिःसर्वप्राणिभयापहा ५९
यस्यांभयात्प्रमज्जंतिप्राणिनोयातनापराः
तर्तुकामस्तुतांघोरंजयादेविनमोनमः ६०
तस्यांदेवाधितिष्ठंतियासावैतरणीनदी
साचापिपूजिताभक्त्याप्रीत्यर्थंकेशवस्यच ६१
यस्यास्तटेप्रविशंतिऋषयःपितरस्तथा
साचापिसिंधुरूपेणपूजितापापहारिका ६२
तरीतुंतांप्रदास्यामिसर्वपापविमुक्तये
पुण्यार्थंसंप्रवक्ष्यामितुभ्यंवैतरणीनदीम् ६३
मयासिपूजिताभक्त्याप्रीत्यर्थंकेशवस्यच
कृष्णकृष्णजगन्नाथसंसारादुद्धरस्वमाम् ६४
नामग्रहणमात्रेणसर्वंपापंहरस्वमे
यज्ञोपवीतंपरमंकारितंनवतंतुभिः ६५
प्रतिगृह्णीष्वदेवेशप्रीतोयच्छममेप्सितम्
इदंतवचतांबूलंयथाशक्त्यासुशोभनम् ६६
प्रतिगृह्णीष्वदेवेशमामुद्धरभवार्णवात्
पंचवर्तीप्रदीपोऽयदेवेशारार्तिकंतव ६७
मोहांधकारद्युमणेभक्तियुक्तोभवार्तिहृत्
परमान्नंसुपक्वान्नंसमस्तरससंयुतम् ६८
निवेदितंमयाभक्त्याभगवन्प्रतिगृह्यताम्
द्वादशाक्षरमंत्रेणयथासंख्यजपेनच ६९
प्रीयतांमेश्रियःकांतःप्रीतोयच्छतुवांछितम्
पंचगावःसमुत्पन्नामथ्यमानेमहोदधौ ७०
तासांमध्येतुयानंदातस्यैधेन्वैनमोनमः
गांसंपूज्यविधानेनअर्घ्यंदद्यात्समाहितः ७१
सर्वकामदुघेदेविसर्वातंकनिवारिणी
आरोग्यंसंततिंदीर्घां देहिनंदिनिमेसदा ७२
पूजिताचवसिष्ठेनविश्वामित्रेणधीमता

कपिलेहरमेपापंयन्मयापूर्वसंचितम् ७३
गावोममाग्रतःसंतुगावोमेसंतुपृष्ठतः
नाकेमामुपतिष्ठंतुहेमशृंगीपयोमुचः ७४
सुरभ्यःसौरभेयाश्चसरितःसागरायथा
सर्वदेवमयेदेविसुभद्रेभक्तवत्सले ७५
एवंसंपूज्यविधिवद्दद्याद्गोषुगवाह्निकम्
सौरभेयःसर्वहिताःपवित्राःपापनाशनाः ७६
प्रतिगृह्णंतुमेग्रासंगावस्त्रैलोक्यमातरः
गंगदायैनमोभूत्यैसर्वपापप्रहाणये ७७
अनेनैवतुमंत्रेणगदांवैधारयेद्बुधः
पंनमःपद्मनाभायपद्मंवैधारयेत्सुधीः ७८
चंचक्ररूपिणेविष्णोधारणंचक्रजंस्मृतम्
शंशंखरूपिणेतुभ्यंनमोऽस्तुसुखकारिणे ७९
मंत्रेणानेनवैदूताधारणंशंखजंस्मृतम्
चतुर्णामायुधानांतुधारणंमुनिभिःस्मृतम् ८०
अग्निहोत्रंयथानित्यंवेदस्याध्ययनंतथा
ब्राह्मणस्यतथैवेदंतप्तमुद्रादिधारणम् ८१
चंदनेनसुगंधेनगोपिकाचंदनेनतु
धारणंचविशेषेणब्राह्मणैर्वेदपारगैः ८२
चांडालोऽपिभवेच्छुद्धोधारणाच्चनसंशयः
ऊर्ध्वंपुंड्रमृजुंसौम्यंसचिह्नंधारयेद्यदि ८३
सचांडालोऽपिशुद्धात्मापूज्यएवसदाद्विजैः
चांडालानांगृहेदूतास्तुलसीयत्रदृश्यते ८४
तत्रत्यातुलसीग्राह्याभक्तिभावेनचेतसा ८५

इति श्रीपाद्मेमहापुराणेउत्तरखंडेपंचपंचाशत्साहस्र्यांसंहितायामुमापतिनारद संवादेयमाराधनंनामषट्षष्टितमोऽध्यायः ६६

सप्तषष्ठितमोऽध्यायः

महेश्वरउवाच–
इतिश्रुतंधर्ममुखान्मुद्गलोद्विजसत्तमः

कथयित्वाममाग्रेवैगतोयादृच्छिकोमुने १
गोपिकाचंदनंयत्रतिष्ठतेवैद्विजोत्तम
तद्गृहंतीर्थरूपंचविष्णुनाभाषितंकिल २
शोकमोहौनतत्रास्तांनभवत्यशुभंक्वचित्
गोपिकाचंदनंयस्यतिष्ठतिद्विजसद्मनि ३
सुखिनःपूर्वजास्तेषांसंततिर्वर्द्धतेसदा
गोपिकाचंदनंयस्यवर्त्ततेऽहर्निशंगृहे ४
गोपीपुष्करजामृत्स्नापवित्राकायशोधिनी
उद्वर्त्तनाद्विनश्यंतिव्याधयोह्याधयश्चये ५
अतोदेहेधृतंपुंभिर्मुक्तिदंसर्वकामिकम्
तावद्गर्जंतितीर्थानितावत्क्षेत्राणिसर्वदा ६
गोपिकाचंदनंयावन्नदृष्टंनश्रुतंद्विज
इदंध्येयमिदंपूज्यंमलदोषविनाशनम् ७
यस्यसंस्पर्शनादेवपूतोभवतिमानवः
अंतकालेतुमर्त्यानांमुक्तिदंपावनंपरम् ८
किंवदामिद्विजश्रेष्ठमुक्तिदंगोपिचंदनम्
विष्णोस्तुतुलसीकाष्ठंतथावैमूलमृत्तिका ९
गोपिकाचंदनंचैवतथावैहरिचंदनम्
चत्वारिह्येतानिसंमील्यअंगमुद्वर्तयेत्सुधीः १०
तेनतीर्थंकृतंसर्वंजंबूद्वीपेषुसर्वदा
तिलकंकुरुतेयस्तुगोपिकाचंदनद्रवैः ११
सर्वपापविनिर्मुक्तोयातिविष्णोःपरंपदम्
पितुःश्राद्धादिकंतेनगयांगत्वातुवैकृतम् १२
येनवापुरुषेणापिविधृतंगोपिचंदनम्
मद्यपोब्रह्महाचैवगोघ्नोवाबालहातथा
मुच्यतेतत्क्षणादेवगोपीचंदनधारणात् १३
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुमापतिनारदसंवादे-
गोपीचंदनमाहात्म्येसप्तषष्टितमोऽध्यायः ६७

अष्टषष्टितमोऽध्यायः

महेश्वरउवाच-

शृणुनारदवक्ष्यामिवैष्णवानांचलक्षणम् १
यच्छ्रुत्वामुच्यतेलोकोब्रह्हत्यादिपातकात्
तेषांवैलक्षणंयादृक्स्वरूपंयादृशंभवेत् २
तादृशंमुनिशार्दूलशृणुतुत्वंवच्मिसांप्रतम्
विष्णोरयंयतोह्यासीत्तस्माद्वैष्णवउच्यते ३
सर्वेषांचैववर्णानांवैष्णवःश्रेष्ठउच्यते
येषांपुण्यतमाहारस्तेषांवंशेतुवैष्णवः ४
क्षमादयातपःसत्यंयेषांवैतिष्ठतिद्विज
तेषांदर्शनमात्रेणपापंनश्यतितूलवत् ५
हिंसाधर्माद्विनिर्मुक्तायस्यविष्णौस्थितामतिः
शंखचक्रगदापद्मंनित्यंवैधारयेत्तुयः ६
तुलसीकाष्ठजांमालांकंठेवैधारयेद्यतः
तिलकानिद्वादशधानित्यंवैधारयेद्बुधः ७
धर्माधर्मंतुजानातियःसवैष्णवउच्यते
वेदशास्त्ररतोनित्यंनित्यंवैयज्ञयाजकः ८
उत्सवांश्चचतुर्विंशत्कुर्वंतिचपुनःपुनः
तेषांकुलंधन्यतमंतेषांवैयशउच्यते ९
तेवैलोकेधन्यतमाजाताभागवतानराः
एकएवकुलेयस्यजातोभागवतोनरः १०
तत्कुलंतारितंतेनभूयोभूयश्चवाडव
अंडजाउद्भिजाश्चैवयेजरायुजयोनयः ११
तेतुसर्वेऽपिविज्ञेयाःशंखचक्रगदाधराः
येषांदर्शनमात्रेणब्रह्महाशुद्ध्यतेसदा १२
किंतुवक्ष्यामिदेवर्षेतेभ्योधन्यतमाभुवि
वैष्णवायेतुदृश्यंतेभुवनेऽस्मिन्महामुने १३
तेवैविष्णुसमाश्चैवज्ञातव्यास्तत्वकोविदैः
कलौधन्यतमालोकेश्रुतामेनात्रसंशयः १४
विष्णोःपूजाकृतातेनसर्वेषांपूजनंकृतम्

महादानंकृतंतेनपूजितायेनवैष्णवाः १५
फलंपत्रंतथाशाकमन्नंवावस्त्रमेवच
वैष्णवेभ्यःप्रयच्छंतितेधन्याभुविसर्वदा १६
अर्चितोवैष्णवोयैस्तुसर्वेषांचैवपूजनम्
कृतंयैरर्चितोविष्णुस्तेवैधन्यतमामताः १७
तेषांदर्शनमात्रेणशुद्ध्यतेपातकान्नरः
किमन्यद्बहुनोक्तेनभूयोभूयश्चवाडव १८
अतोवैदर्शनंतेषांस्पर्शनेसुखदायकम्
यथाविष्णुस्तथाचायंनांतरंवर्ततेक्वचित् १९
इतिज्ञात्वातुभोवत्ससर्वदापूजयेद्बुधः
एकएवतुयैर्विप्रोवैष्णवोभुविभोज्यते
सहस्रंभोजितंतेनद्विजानांनात्रसंशयः २०

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमापतिनारद
संवादेवैष्णवमाहात्म्यंनामअष्टषष्टितमोऽध्यायः ६८

एकोनसप्ततितमोऽध्यायः

नारदउवाच-
उपवासासमर्थानांसदैवामरसत्तम
एकायाद्वादशीपुण्यातांवदस्वममानघ १
शिवउवाच-
मासिभाद्रपदेशुक्लेद्वादशीश्रवणान्विता
सावैसर्वप्रदापुण्याह्युपवासेमहाफला २
संगमेसरितःस्नात्वाद्वादशींतामुपोषितः
अयत्नात्समवाप्नोतिद्वादशद्वादशीफलम् ३
बुधश्रवणसंयुक्तायाचवैद्वादशीभवेत्
अतीवमहतीतस्यांकृतंसर्वमथाक्षयम् ४
द्वादशीश्रवणोपेतायदाभवतिनारद
संगमेसरितांस्नात्वालभेद्गोदानजंफलम् ५
जलपूर्णंतदाकुंभंस्थापयित्वाविचक्षणः
तस्योपरिन्यसेत्पात्रंस्थापयित्वाजनार्दनम् ६

ततस्तस्याग्रतोदेयंनैवेद्यंघृतपाचितम्
सोदकांश्चनवान्कुंभान्दद्याच्छक्त्याविचक्षणः ७
एवंसंपूज्यगोविंदंजागरंतत्रकारयेत्
प्रभातेविमलेस्नात्वासंपूज्यगरुडध्वजम् ८
पुष्पधूपादिनैवेद्यैःफलैर्वस्त्रैःसुशोभनैः
पुष्पांजलिततोदद्यान्मंत्रमेनमुदीरयेत् ९
नमोनमस्तेगोविंदबुधश्रवणसंयुत
अघौघसंक्षयंकृत्वासर्वसौख्यप्रदोभव १०
अन्नंतुब्राह्मणेपूतंवेदवेदांगपारगे
पुराणज्ञेविशेषेणविधिवत्संप्रदापयेत् ११
अनेनविधिनाचैवनद्यास्तीरेनरोत्तमः
सर्वंनिर्वर्त्तयेत्सम्यगेकचित्तरतोऽपिसन् १२
अत्राप्युदाहरंतीममितिहासंपुरातनम्
महत्यरण्येयद्वृत्तंभूमिदेवशृणुष्वतत् १३
यंश्रुत्वामानवोलोकेमहादुःखात्प्रमुच्यते
देशोदासरकोनामतस्यभागेचपश्चिमे १४
तत्रविद्वन्मरुर्देशःसर्वसत्वभयंकरः
सुतप्तसिकताभूमिर्यत्रदुष्टामहोरगाः १५
अल्पच्छायाद्रुमाकीर्णामृतप्राणिसमाकुला
शमीखदिरपालाशकरीरैःपीलुभिःसह १६
तत्रभीमाद्रुमगणाःकंटकैरचितादृढैः
जग्धप्राणजनाकीर्णायत्रभूर्दृश्यतेक्वचित् १७
तथापिजीवाजीवंतिसर्वेकर्मनिबंधनात्
नोदकंनोदकाधाराविद्वंस्तत्रबलाहकाः १८
पक्षांतरगतैःकैश्चिच्छिशुभिस्तृषितैःसमम्
उत्क्रांतजीविनोविप्रदृश्यंतेनुखगोत्तमाः १९
तस्मिंस्तथाविधेदेशेकश्चिद्दैववशाद्वणिक्
निजसार्थपरिभ्रष्टःप्रविष्टोमरुजांगले २०
बभ्रामोद्भ्रांतहृदयःक्षुत्तृट्भ्यांश्रमपीडितः
क्वग्रामःक्वजलंक्वाहंयास्यामिनबुबोधह २१

अथप्रेतान्ददर्शासौक्षुत्तृषाव्याकुलेंद्रियान्
उत्कटान्खलिनोभीमान्निर्मांसान्रौद्रदर्शनान् २२
प्रेतस्कंधसमारूढमेकंविकृतदर्शनम्
ददर्शबहुभिःप्रेतैःसमंतात्परिवारितम् २३
अगच्छमानमत्युग्रंप्रेतशब्दपुरःसरम्
प्रेतोऽपिदृष्ट्वातांघोरामटवीमागतंनरम् २४
प्रेतस्कंधान्महींगत्वातस्यांतिकमुपागमत्
प्रणिपत्यवणिक्श्रेष्ठमिदंवचनमब्रवीत् २५
अस्मिन्घोरतरेदेशेप्रवेशोभवतःकथम्
तमुवाचवणिक्धीमान्सार्थभ्रष्टस्यमेवने २६
प्रवेशोदैवयोगेनपूर्वकर्मकृतेनच
तृषामेबाधतेऽत्यर्थंक्षुधाचैवभृशंतथा २७
प्राणांतिकमनुप्राप्तंवचनंभ्रमतीवमे
अत्रोपायंनपश्यामिजीवेयंयेनकेनचित् २८
इत्येवमुक्तेप्रेतस्तंवणिजंवाक्यमब्रवीत्
फुल्लांशमींसमाश्रित्यप्रतीक्षत्वंमुहूर्त्तकम् २९
कृतातिथ्योमयापश्चाद्गमिष्यसियथासुखम्
एवमुक्तस्तथाचक्रेसवणिक्तृष्णयार्दितः ३०
मध्याह्नसमयेप्राप्तेप्रेतस्तंदेशमागतः
फुल्लांसवृक्षांशीतोदांवारिधानींमनोरमाम् ३१
दध्योदनसमायुक्तांवर्द्धमानेनसंयुताम्
अवतीर्यततःस्वन्नंप्रादादतिथयेतदा ३२
सतत्राशनमात्रेणपरंतृप्तित्वमागतः
वितृष्णोविज्वरश्चैवक्षणेनसमपद्यत ३३
ततश्चप्रेताःसंप्राप्ताःसोऽस्माद्भागंक्रमाद्ददौ
दध्योदनात्सपानीयात्प्रेतास्तृप्तिंपरांगताः ३४
अतिथिंतर्पयित्वातुप्रेतलोकंचसर्वतः
ततःस्वयंसबुभुजेभुक्तशेषंयथासुखम् ३५
तस्यभुक्तवतःस्वन्नंपानीयंचक्षयंययौ
प्रेताधिपंततस्तंवैवणिग्वचनमब्रवीत् ३६

आश्चर्यमेतत्परमंवनेऽस्मिन्प्रतिभातिमे
अन्नंपानंचपरमंसंप्राप्तंचकुतस्तव ३७
स्वल्पेनैवतथान्नेनत्वमेतांस्तुबहूनपि
अतर्पयः कथंत्वेतेनिर्मांसाभिन्नकुक्षयः ३८
कथमस्यांसुघोरायामटव्यांचकृतालयाः
तदेतत्संशयंछिंधिपरंकौतूहलंमम ३९
एवमुक्तः सवणिजाप्रेतोवचनमब्रवीत्
वाणिज्यसक्तस्यपुराजन्मातीतेममानघ ४०
सकलेनगरेनास्तिममान्योहिदुरात्मकः
धनलोभान्नकस्यापिदत्ताभिक्षामयातदा ४१
सखाचैवततश्चासीद्ब्राह्मणोगुणवान्मम
श्रावणद्वादशीयोगेमासिभाद्रपदेततः ४२
सकदाचिन्मयासार्द्धंतापींनामनदींययौ
तस्याश्चसंगमः पुण्योयत्रासीच्चंद्रभागया ४३
चंद्रभागाचंद्रसुतातापीचैवार्कनंदिनी
तयोः शीतोष्णसलिलेप्रविवेशसहद्विजः ४४
श्रवणद्वादशीयोगेनराश्चसमुपोषिताः
चंद्रभागासुतोयेनवारिधानींददुर्द्विजे ४५
दध्योदनयुतांसार्द्धंसंपूर्णैर्वर्द्धमानकैः
छत्रोपानद्युगंवस्त्रंप्रतिमांचतथाहरेः ४६
प्रददौविप्रमुख्येभ्योहरस्याग्रेमहामते
वित्तसंरक्षणार्थायतस्यास्तीरेव्रतेमया ४७
सोपवासेनदत्तैकावारिधानीमनोरमा
तत्कृत्वाहंगृहंप्राप्तः ततः कालेनकेनचित् ४८
पंचत्त्वमहमासाद्यनास्तिक्यात्प्रेततांगतः
अस्यामटव्यांघोरायांयथाद्यहिकुलंतथा ४९
श्रवणद्वादशीयोगेवारिधान्यर्पितामया
सेयंमध्याह्नसमयेलभ्यतेचदिनेदिने ५०
ब्रह्मस्वरूपिणः सर्वेपापाः प्रेतत्वमागताः
परदारगताः केचित्स्वामिद्रोहरताश्चये ५१

भूतप्रेतजरूपेणतेजाताह्यत्रमानवाः
देशेमरुस्थलेत्वस्मिन्ममैतेमित्रतांगताः ५२
अक्षयोभगवान्विष्णुःपरमात्मासनातनः
दीयतेयत्समुद्दिश्यह्यक्षयंतत्प्रकीर्तनम् ५३
अक्षयेनापिचान्नेनतृप्ताएतेपुनःपुनः
प्रेतत्वभावंदौर्बल्यंनविमुंचतिकर्हिचित् ५४
पूजयित्वाहमन्नैस्त्वामतिथिंसमुपस्थितम्
प्रेतभावाद्विनिर्मुक्तोयास्यामिपरमांगतिम् ५५
मयाविहीनाःकिंत्वेतेवनेऽस्मिन्भृशदारुणे
पीडामनुभविष्यंतिदारुणांकर्मयोनिजाम् ५६
एतेषांतुमहाभागममानुग्रहकाम्यया
प्रत्येकंनामगोत्राणिगृह्णीष्वलिखितानिच ५७
अस्तिकक्षागताचैवतवसंपुटिकाशुभा
हिमवंतमथासाद्यतत्रत्वंलप्स्यसेनिधिम् ५८
गयाशीर्षंततोगत्वाश्राद्धंकुरुमहामते
इत्याज्ञाप्यसवैप्रेतोवणिजंचयथासुखम् ५९
विसर्जयामासतदासवैप्रायात्समुत्सुकः
समासाद्यगृहंतत्रपश्चात्प्रायाद्धिमालयम् ६०
ततोदृष्टंनिधिंतत्रगृहीत्वाससमागतः
षष्ठांशंप्रतिगृह्याथगयाशीर्षंततोऽभ्यगात् ६१
तत्रगत्वागयायांसश्राद्धंकृत्वामहामतिः
प्रेतानांतुयथोद्दिष्टंश्राद्धंसम्यग्विधानतः ६२
प्रत्येकंनामगोत्राणिगृहीत्वापिंडमुत्सृजत्
यस्ययस्यभवेच्छ्राद्धंसकरोतिदिनेवणिक् ६३
ससतस्यतदास्वप्नेदर्शयत्यात्मनस्तनुम्
ब्रवीतिचमहाभागप्रसादाद्भवतोऽनघ ६४
प्रेतभावंमयात्यक्तंप्राप्तोऽस्मिपरमांगतिम्
एवंकृत्वाविधानेनगयाशीर्षंमहामनाः ६५
पश्चाज्जगामस्वगृहंविष्णुंध्यायन्पुनःपुनः
मासिभाद्रपदेप्राप्तेशुक्लपक्षेतथासुधीः ६६

श्रवणद्वादशीयोगेसंगमेसरितांपुनः
जगामसमहाबुद्धिःसर्वोपस्करसंयुतः ६७
संगमेसरितांस्नात्वाद्वादशींतामुपोषितः
तत्रस्नात्वापिदत्त्वातुपूजयित्वाजनार्दनम् ६८
अनंतरंब्राह्मणस्यह्युपहारांस्तदाददौ
शास्त्रोक्तेनापिविधिनाह्येकचित्तरतोऽपिसः ६९
निवर्त्तयामासतदावणिजोबुद्धिमान्सवै
वर्षेवर्षेतुसंप्राप्तेमासिभाद्रपदेतथा ७०
श्रवणद्वादशीयोगेसंगमेसरितांपुनः
एवंवैकृतवान्सर्वंविष्णुमुद्दिश्यसत्वरम् ७१
कालेनचातिमहतापंचत्वंसमुपागतः
अवापपरमंस्थानंदुर्लभंसर्वमानवैः ७२
क्रीडतेऽद्यापिवैकुंठेविष्णुदूतैःससेवितः
एवंकुरुत्वंभोब्रह्मन्श्रवणद्वादशीव्रतम् ७३
सर्वसौभाग्यदंचैवइहलोकेपरत्रच
सुबुद्धिजननंचैवसर्वपापहरंपरम् ७४
श्रवणद्वादशीयोगेयःकुर्याद्व्रतमीदृशम्
व्रतस्यास्यप्रभावेनविष्णुलोकंचगच्छति ७५

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमापतिनारदसंवादेश्रवणद्वादशीव्रतनामैकोनसप्ततितमोऽध्यायः ६९

सप्ततितमोऽध्यायः

नारदउवाच–
देवदेवजगन्नाथभुक्तिमुक्तिप्रदायक
कथयस्वसुरश्रेष्ठयेनदुःखंनपश्यति १
महेशउवाच–
शृणुवाडववक्ष्यामित्रिरात्रंसरितःशुभम्
येनचीर्णेननरकोमानवानांनजायते २
आयुरारोग्यमतुलंसौभाग्यंसुखसंपदम्
संतानंचाक्षयंप्राप्यस्वर्गलोकेमहीयते ३

आषाढमासिसंप्राप्तेनदीपूरेणसंयुता
सततंतोयसंस्थानेपुराणेसाचविश्रुता ४
वर्षर्तौघनसंपूर्णेकर्तव्यासाव्रतेनवा
तोयोघैःपरिपूर्णासासकलैःस्यान्नदीयदा ५
व्रतंत्रिरात्रमुद्दिश्यतदाकार्यंप्रयत्नतः
कृतंप्रतिपदाछंदःदर्शनंतुदिनत्रयम् ६
यथाप्राप्तंनदीपूरंस्त्रीभिस्तीरजलस्यतु
अथवातज्जलंकुंभेकृष्णेकृत्वागृहंनयेत् ७
प्रातःस्नायीतथानद्यांगत्वाअभ्यर्चयेत्सुधीः
त्रिरात्रस्योपवासस्ययथाशक्तोभवेद्द्विज ८
अशक्तश्चैकभक्तेनकुर्याच्चैवाप्युपोषणम्
दीपंदद्यादविछिन्नंप्रातःसायंचपूजनम् ९
महानदींसमुच्चार्यनाम्नाचवरुणंतथा
जलमूलेतुसंस्थाप्यकेशवंजलशायिनम् १०
नमोदेव्यैचगंगेतिगौतमीतिनदीतिच
सिंधोचैवचकावेरिसरस्वतिनमोऽस्तुते ११
तापीपयोष्णीपूर्णेतिमहेंद्रसुखदेतिच
काश्यपीगंडकीचैवसिंधुनद्यैनमोनमः १२
वरुणायनमस्तेऽस्तुजलवासहरिप्रिय
यादोनाथरसेशानकल्याणंदेहिमेसदा १३
गृहाणार्घंमयादत्तंदेहिमेवांछितंफलम्
कूष्मांडैर्नालिकेरैश्चफलैःकालोद्भवैःशुभैः १४
नैवेद्यंघृतपक्वंतुसरितःसंप्रकल्पयेत्
नमस्तेकेशवानंतजलशायिन्नमोऽस्तुते १५
परिपालयमामीशगोविंदवरदोभव
एवंपूजाप्रकर्तव्यायथाकालंक्रमेणतु १६
प्रार्थनाचोपचारैस्तुत्रिरात्रनियमःशुचिः
पारणेनतुसंपूज्यजलपात्रंसमाचरेत् १७
फलपुष्पैस्तथाविद्वन्स्त्रीभिर्बालैर्नरैरपि
गीतवादित्रसहितैर्नदीकुंभपरिप्लुतैः १८

जलेजलेसमास्थाप्यफलपुष्पैःप्रपूजयेत्
धान्यैर्नानाविधैश्चैवजलप्रन्नेपणैरपि १९
हास्यैर्गीतैश्चनृत्यैश्चगृहमागत्ययत्नतः
सप्तधान्यैःपूरितानिवंशपात्राणिपूजयेत् २०
सप्तवापंचवात्रीणियथाशक्त्याप्रपूरयेत्
त्रिरात्रंचनदीतोयंनपिबेद्धितमुल्लसन् २१
पारणेतुहविष्यान्नंह्रतंवाह्यन्यथाभवेत्
कृतेस्नानार्चनेचैवनोपयोज्यंनदीजलम् २२
शुच्यन्नानिचभोज्यानिदापयत्त्रितयंतथा
सप्तैववंशपात्राणिसप्तवैमणिकास्तथा २३
हविष्यान्नंचभुंजीतकट्वम्लमधुवर्जितम्
माषान्नंचशिलापिष्टंयत्नेनपरिवर्जयेत् २४
एवंवर्षत्रयंकुर्याद्व्रतमेतद्द्विजोत्तम
वर्षत्रयेसमाप्यैवंतस्योद्यापनमाचरेत् २५
कृष्णांगांकृष्णवस्त्रांचतिलान्दद्याच्चनारद
दंपतीपरिदाप्यैवंसुवर्णंचापिशक्तितः २६
हैमंचवरुणंकुर्यानदीरूपेणनारद
मंडलंवारुणंचैवसर्वतोभद्रमेवच २७
कुंभंतत्रप्रतिष्ठाप्यसोपहारंप्रतिष्ठितम्
संपूज्यविधिवद्भक्त्याततोविप्रायदापयेत् २८
ब्राह्मणान्भोजयेच्छक्त्यायथावित्तानुसारतः
गुरवेर्चितशीलायसर्वशास्त्ररतायच २९
एवंकृतेतदाविद्वन्परिपूर्णंव्रतंभवेत्
सौभाग्यसुखसंपत्तिःसंततिश्चाद्मयाभवेत् ३०
नदुर्गतिमवाप्नोतिचिरंस्वर्गेमहीयते
देवपत्नीभिराचीर्णमृषिपत्नीभिरेवच ३१
नागसिद्धांगनाभिश्चव्रतमेतत्पुराकृतम्
नदीत्रिरात्रमतुलंकिमन्यच्छ्रोतुमिच्छसि
सौभाग्यंसंततिंचैवनिश्चयंप्राप्नुतेसदा ३२
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्र्यांसंहितायामुत्तरखंडेउमापतिनारद

संवादेनदीत्रिरात्रव्रतंनामसप्ततितमोऽध्यायः ७०

एकसप्ततितमोऽध्यायः

ऋषयऊचुः -
सूतजीवचिरंसाधोत्वयातिकरुणात्मना
संवादोह्यद्भुतःप्रोक्तोयश्चासीन्नारदेशयोः १
भगवन्नाममहिमानारदेनमहात्मना
कीदृक्श्रुतःसमाख्याहिश्रद्धयाशृरावतांगुरो २
सूतउवाच-
शृणुध्वंमुनयःसर्वेपुरावृत्तंवदाम्यहम्
यस्मिञ्छ्रुतेद्विजश्रेष्ठाःकृष्णेभक्तिर्विवर्द्धते ३
एकदानारदोद्रष्टुंपितरंसुसमाहितः
जगाममेरुशिखरंसिद्धचारणसेवितम् ४
तत्रदेवंसमासीनंब्रह्माणंजगतांपतिम्
नमस्कृत्याब्रवीद्विप्रानारदोमुनिसत्तमः ५
नारदउवाच-
नाम्नोऽस्ययावतीशक्तिर्वदविश्वेश्वरप्रभो
कीदृक्तुनाममहिमाअव्ययस्यमहात्मनः ६
योऽयविश्वेश्वरःसाक्षादयंनारायणोहरिः
परमात्माहृषीकेशःसर्वजीवेषुसंगतः ७
मायाविमोहिताःसर्वेभगवंतमधोक्षजम्
नैवजानंत्यसारेऽस्मिन्नरामूढाःकलौयुगे ८
ब्रह्मोवाच-
अस्मिन्कलौविशेषेणनामोच्चारणपूर्वकम्
भक्तिःकार्यायथावत्सतथात्वंश्रोतुमर्हसि ९
दृष्टंपरेषांपापानामनुक्तानांविशोधनम्
विष्णोर्जिष्णोःप्रयत्नेनस्मरणंपापनाशनम् १०
मिथ्याज्ञात्वाततःसर्वंहरेर्नामपठन्जपन्
सर्वपापविनिर्मुक्तोयातिविष्णोःपरंपदम् ११
येवदंतिनरानित्यंहरिरित्यक्षरद्वयम्

तस्योच्चारणमात्रेणविमुक्तास्तेनसंशयः १२
प्रायश्चित्तानिसर्वाणिकृष्णानुस्मरणंपरम्
प्रातर्निशितथासायंमध्याह्नादिषुसंस्मरन् १३
नारायणमवाप्नोतिसद्यःपापक्षयंनरः
विष्णुसंस्मरतादेवसमस्तक्लेशसंक्षये १४
मुक्तिंप्रयातिस्वर्गाप्तिस्तस्यविष्णोस्तुकीर्त्तनात्
वासुदेवेमनोयस्यजपहोमार्चनादिषु १५
तदक्षयंविजानीयाद्यावदिंद्राश्चतुर्दश
क्वनाकपृष्ठगमनंपुनरावृत्तिलक्षणम् १६
क्वजपोवासुदेवस्यमुक्तिबीजमनुत्तमम्
तन्मुखंपरमंतीर्थंयत्रावर्त्तंवितन्वती १७
नमोनारायणायेतिभातिप्राचीसरस्वती
तस्मादहर्निशंविष्णुस्मरणात्पुरुषोत्तमः १८
नयातिनरकंपुत्रसंक्षीणकलिकल्मषः
सत्यंसत्यंपुनःसत्यंभाषितंममसुव्रत १९
नामोच्चारणमात्रेणमहापापात्प्रमुच्यते
रामरामेतिरामेतिरामेतिचपुनर्जपन् २०
सचांडालोऽपिपूतात्माजायतेनात्रसंशयः
कुरुक्षेत्रंतथाकाशीगयावैद्वारिकातथा २१
सर्वंतीर्थंकृतंतेननामोच्चारणमात्रतः
कृष्णकृष्णेतिकृष्णेतिइतिवायोजपन्पठन् २२
इहलोकंपरित्यज्यमोदतेविष्णुसंनिधौ
नृसिंहेतिमुदाविप्रसततंप्रजपन्पठन् २३
महापापात्प्रमुच्येतकलौभागवतोनरः
ध्यायन्कृतेयजन्यज्ञैस्त्रेतायांद्वापरेऽचयन् २४
यदाप्नोतितदाप्नोतिकलौसंकीर्त्यकेशवम्
एतज्ज्ञात्वानिमग्नाश्चजगदात्मनिकेशवे २५
सर्वपापपरिक्षीणायांतिविष्णोःपरंपदम्
मत्स्यःकूर्मोवराहश्चनृसिंहोवामनस्तथा २६
रामोरामश्चकृष्णश्चबुद्धःकल्कीततःस्मृतः

एतेदशावताराश्चपृथिव्यांपरिकीर्तिताः २७
एतेषांनाममात्रेणब्रह्महाशुध्यतेसदा
प्रातःपठन्जपन्ध्यायन्विष्णोर्नामयथातथा २८
मुच्यतेनात्रसंदेहःसवैनारायणोभवेत्
सूतउवाच–
श्रुत्वावैनारदोह्येतद्विस्मयंपरमंगतः २९
उवाचपितरंतत्रकिमुक्तंदेवसत्तम
देवाःसहस्त्रशःसंतिरुद्राःसंतिसहस्त्रशः ३०
पितरःसंतिशतशःयक्षाश्चकिन्नरास्तथा
भूताःप्रेताःपिशाचाश्चयेकेचिद्देवयोनयः ३१
तेषांनाम्नाचमाहात्म्यंश्रुतंदृष्टंतथानच
श्रीविष्णोर्नाममाहात्म्यंयादृशंचश्रुतंमया ३२
यस्यवैनाममात्रेणमुच्यतेनात्रसंशयः
किंवैतीर्थकृतेदेवपृथिव्यामटनेकृते ३३
यस्यवैनाममहिमाश्रुत्वामोक्षमवाप्नुयात्
तन्मुखंतुमहत्तीर्थंतन्मुखंक्षेत्रमेवच ३४
यन्मुखेरामरामेतितन्मुखंसर्वकामिकम्
कानिवैतस्यनामानिकतिवीर्याणिसुव्रत ३५
तत्सर्वंचविशेषेणममब्रूहिपितामह
ब्रह्मोवाच–
व्यापकोऽयसदाविष्णुःपरमात्मासनातनः ३६
अनादिनिधनःश्रीमान्भूतात्माभूतभावनः
यस्मादहंहिसंजातोसोऽयविष्णुःसदावतु ३७
सोऽयकालस्यकालोवैसोऽयममतुपूर्वजः
अक्षयःपुंडरीकाक्षोमतिमानव्ययःपुमान् ३८
शेषशायीसदाविष्णुःसहस्त्रशीर्षामहत्प्रभुः
सर्वभूतमयःसाक्षाद्विश्वरूपोजनार्दनः ३९
कैटभारिरयंविष्णुर्धातादेवोजगत्पतिः
तस्याहंनामगोत्रंचनवेद्मिपुरुषर्षभ ४०
वेदवाद्यप्यहंतातनाहंज्ञाताकदाचन

अतस्त्वंगच्छदेवर्षेयत्रास्तिकिलविश्वराट् ४१
सचतत्त्वंमुनिश्रेष्ठसर्वंतेकथयिष्यति
सएवपुरुषःश्रीमान्कैलासाधिपतिःसदा ४२
सर्वेषांविष्णुभक्तानामयंश्रेष्ठःपरात्परः
पंचवक्त्रोह्युमाकांतःसर्वदुःखनिबर्हणः ४३
विश्वेश्वरोविश्वनाथःसर्वदाभक्तवत्सलः
तत्रगच्छसुरश्रेष्ठतत्सर्वंकथयिष्यति ४४
पितुर्वचनमाकर्ण्यतत्रगंतुंप्रचक्रमे
विज्ञातुंनाममाहात्म्यंकैलासभवनंप्रति ४५
यत्रविश्वेश्वरोदेवोनित्यंतिष्ठतिभूतिदः
ददर्शनारदस्तत्रदेवंतंसुरपूजितम् ४६
कैलासशिखरासीनंदेवदेवंजगद्गुरुम्
पंचवक्त्रंदशभुजंत्रिनेत्रंशूलपाणिनम् ४७
कपालिनंसखट्वांगंतीक्ष्णंशूलासिधारिणम्
पिनाकधारिणंभीमंवरदंवृषवाहनम् ४८
भस्मांगंव्यालशोभाढ्यंशशांककृतशेखरम्
नीलजीमूतसंकाशंसूर्यकोटिसमप्रभम् ४९
क्रीडंतंतत्रदेवेशंसाष्टांगंदंडवत्पुनः
तंदृष्ट्वातुमहादेवोविस्मयोत्फुल्ललोचनः ५०
वैष्णवानांपरःश्रेष्ठःप्राहवाडवसत्तमम्
कस्मादिहसमायातोवददेवर्षिसत्तम ५१
नारदउवाच–
एकस्मिन्नेवकालेतुगतोऽहब्रह्मणोंतिकम्
श्रुतंतत्रमयादेवविष्णोर्माहात्म्यमुत्तमम् ५२
ब्रह्मणाकथितंतत्रममाग्रेदेवसत्तम
नाम्नोऽस्ययावतीशक्तिःसाश्रुताब्रह्मणोमुखात् ५३
तत्रपृष्टंमयापूर्वंविष्णोर्नामसहस्रकम्
तदाहंब्रह्मणाचोक्तंनाहंजानामिनारद ५४
जानात्ययंमहारुद्रस्तत्सर्वंकथयिष्यति
महाश्चर्यंतुसंप्राप्यह्यागतस्तवसन्निधौ ५५

अस्मिन्कलियुगेघोरेऽल्पायुषश्चैवमानवाः
विधर्मेषुरतानित्यंनामनिष्ठानवैपुनः ५६
पाखंडिनस्तथाविप्राधर्मेषुविरताःसदा
संध्याहीनव्रतभ्रष्टादुष्टामलिनरूपिणः ५७
यथाविप्रास्तथाक्षत्रावैश्याश्चैवपुनःपुनः
एवंशूद्रास्तथान्येचनवैभागवतानराः ५८
शूद्राद्विजातिबाह्याश्चकलौविश्वेश्वरप्रभो
धर्माधर्मौनजानंतिहितंवाऽहितमेववा ५९
एवंज्ञात्वाह्यहंस्वामिन्नागतःसंनिधौतव
पुनश्चनाममाहात्म्यंश्रुतंवैब्रह्मणोमुखात् ६०
त्वंदेवःसर्वदेवानांत्वंनाथोममसर्वदा
त्रिपुरारिश्चविश्वात्माधातात्वंचपुनःपुनः ६१
कथयस्वप्रसादेनविष्णोर्नामसहस्रकम्
सौभाग्यजननंपुंसांपरंभक्तिकरंसदा ६२
ब्राह्मणानांब्रह्मदंचक्षत्रियाणांजयप्रदम्
वैश्यानांधनदंनित्यंशूद्राणांसुखदायकम् ६३
तदहंश्रोतुमिच्छामित्वत्सकाशान्महेश्वर
त्वंसमर्थोऽसिभक्तानांसर्वदाकेशवंप्रति ६४
कथयस्वप्रसादेनयदिगोप्यंनसुव्रत
इदंपवित्रंपरमंसर्वतीर्थमयंसदा ६५
अतोवैश्रोतुमिच्छामिवदविश्वेश्वरप्रभो
श्रुत्वानारदवाक्यानिविस्मयोत्फुल्ललोचनः ६६
रोमांचितस्ततोजातोविष्णोर्नामानिसंस्मरन्
ईश्वरउवाच-
एतद्गोप्यंपरंब्रह्मन्विष्णोर्नामसहस्रकम् ६७
एतच्छ्रुत्वानरोवत्सनलभेद्दुर्गतिंक्वचित्
कदाचिच्चगतेकालेपार्वतीमामुवाचह ६८
पार्वत्युवाच -
कैलासाधिपतेमह्यंकथयस्वयथातथम्
त्वंकिंजपसिदेवेशपरैश्वर्यसमाहितः ६९

सदात्वंभस्मलिप्तांगःकृत्तिवासाःसदाकथम्
जटाधरःकथंजातोवदविश्वेश्वरप्रभो ७०
त्वंदेवःसर्वदेवानांत्वंगुरुःसर्वकर्मणाम्
त्वंपतिर्ममविश्वेशविश्वनाथजगत्प्रभो ७१
महादेवउवाच-
इतिपृष्टंममब्रह्मन्पार्वत्याचपुनःपुनः
तदासर्वंमयाख्यातंतस्याश्चाग्रेविशेषतः ७२
शृणुनारदवक्ष्यामियदुक्तंपार्वतींप्रति
येनप्रसन्नोभगवान्मुक्तिदातानसंशयः ७३
ममायंतुपितासाक्षाद्बन्धुश्चैवतुसर्वदा
तस्याहंसर्वदाभक्तोह्ययंममपतिःसदा ७४
तदहंसंप्रवक्ष्यामिशृणुष्वगदतोमम
सूतउवाच-
एवमुक्त्वानारदायकथयामासवैद्विजाः ७५
उमायैयत्पुराप्रोक्तंविष्णोर्नामसहस्रकम्
महेशाच्चैवतत्प्राप्तंकैलासेनारदेनवै ७६
कदाचिद्दैवयोगेनकैलासात्ससमागतः
नैमिषारण्यसंज्ञंतुतीर्थंवैपरमाद्भुतम् ७७
तत्रस्थाऋषयःसर्वेदृष्ट्वातंऋषिसत्तमम्
पूजांचक्रुर्विशेषेणनारदायमहात्मने ७८
आगतंनारदंज्ञात्वाविस्मयोत्फुल्ललोचनाः
पुष्पवृष्टिंप्रचक्रुस्तेवैष्णवाद्विजसत्तमाः ७९
पाद्यमर्घ्यंततःकृत्वाकृत्वाचारार्तिकंततः
निवेद्यफलमूलानिदंडवत्पतिताभुवि ८०
ऊचुश्चकृतकृत्याःस्मदेशेह्यस्मिन्महामुने
भवतोदर्शनंजातंपवित्रंपापनाशनम् ८१
त्वत्प्रसादाच्चदेवेशपुराणानिश्रुतानिच
ब्रह्मन्केनप्रकारेणसर्वपापक्षयोभवेत् ८२
विनादानेनतपसाविनातीर्थतपोमखैः
विनादानैर्विनाध्यानैर्विनाचेंद्रियनिग्रहैः

विनाशास्त्रसमूहैश्चकथंमुक्तिरवाप्यते ८३
नारदउवाच-
कैलासशिखरासीनंदेवदेवंजगद्गुरुम्
प्रणिपत्यमहादेवंपर्यपृच्छदुमाप्रियम् ८४
पार्वत्युवाच-
भगवंस्त्वंपरोदेवःसर्वज्ञःसर्वपूजितः
सत्वमत्त्यर्च्यतेदेवैरिंद्रसूर्यादिकैरपि ८५
लभंतेऽभिमतांसिद्धिंसर्वेऽभ्यर्च्यवरप्रदम्
त्वंजन्ममृत्युरहितःस्वयंभूःसर्वशक्तिमान् ८६
सदाध्यायसिकिंस्वामिन्दिग्वासामदनांतकः
तपश्चरसिकस्मात्त्वंजटिलोभस्मधूसरः ८७
किंवाजपसिदेवेशपरंकौतूहलंहिमे
अनुग्राह्यायदातेऽस्मितत्त्वंकथयसुव्रतम् ८८
महादेवउवाच-
नेदंकस्यापिकथितंगोपनीयमिदंमम
किंतुवक्ष्यामितेभद्रेत्वंभक्तासिप्रियासिमे ८९
पुरासत्ययुगेदेविविशुद्धमतयोऽखिलाः
यजंतिविष्णुमेवैकंज्ञात्वासर्वेश्वरेश्वरम् ९०
प्रयांतिपरमामृद्धिमैहिकामुष्मिकींप्रिये
यांनप्राप्ताःसुराःसर्वेऋषयःक्लेशसंयुताः ९१
तेतांगतिंप्रपद्यंतेयेनामकृतनिश्चयाः
मन्मुखादपिसंश्रुत्यदेवाविष्णुबहिर्मुखाः ९२
वेदैःपुराणैःसिद्धांतैर्भिन्नैर्विभ्रांतचेतसः
निश्चयंनाधिगच्छंतिकिंतत्वंकिंपरंपदम् ९३
तुलापुरुषदानाद्यैरश्वमेधादिभिर्मखैः
वाराणसीप्रयागादितीर्थस्नानादिभिःप्रिये ९४
गयाश्राद्धादिभिःपित्र्यैर्वेदपाठादिभिर्जपैः
तपोभिरुग्रैर्नियमैर्यमैर्भूतदयादिभिः ९५
गुरुशुश्रूषणैःसेव्यैर्धर्मैर्वर्णाश्रमान्वितैः
ज्ञानध्यानादिभिःसम्यक्चरितैर्जन्मकोटिभिः ९६

नयांतितत्परंश्रेयोविष्णुंसर्वेश्वरेश्वरम्
सर्वभावैःसमाश्रित्यपुराणपुरुषोत्तमम् ९७
अनन्यगतयोमर्त्याभोगिनोऽपिपरंतपे
ज्ञानवैराग्यरहिताब्रह्मचर्यादिवर्जिताः ९८
सर्वधर्मोज्झिताविष्णोर्नाममात्रैकजल्पिनः
सुखेनयांगतियांतिनतांसर्वेऽपिधार्मिकाः ९९
स्मर्त्तव्यःसततंविष्णुर्विस्मर्तव्योनजातुचित्
सर्वेविधिनिषेधाःस्युरेतस्यैवविधिंकराः १००
किंतुब्रह्मादयोदेवाऋषयश्चनिरंहसः
निर्भयंविष्णुनाम्नैवयथेष्टंपदमागताः १०१
अलब्ध्वाचात्मनःपूजांसम्यगाराधितोहरिः
मयास्मादपिचश्रेष्ठंवांच्छताहंकृतात्मना १०२
ततःसाक्षाज्जगन्नाथप्रसन्नोभक्तवत्सलः
अंशांशेनात्मनैवैतान्पूजयामासकेशवः १०३
देवान्पितॄन्द्विजान्हव्यकव्याद्यैःकरुणामयः
ततःप्रभृतिपूज्यंतेत्रैलोक्येसचराचरे १०४
ब्रह्मादयःसुराःसर्वेप्रसादाच्छार्ङ्गधन्वनः
मांचोवाचयथामत्तःपूज्यःश्रेष्ठोभविष्यसि १०५
त्वामाराध्यतथाशंभोगृहीष्यामिवरंसदा
द्वापरादौयुगेभूत्वाकलयामानुषादिषु १०६
स्वागमैःकल्पितैस्त्वंचजनान्मद्विमुखान्कुरु
मांचगोपययेनस्यात्सृष्टिरेषोत्तरोत्तरा १०७
एषमोहंसृजाम्याशुयोजनान्मोहयिष्यति
त्वंचरुद्रमहाबाहोमोहशास्त्राणिकारय १०८
अतथ्यानिवितथ्यानिदर्शयस्वमहाभुज
प्रकाशंकुरुचात्मानमप्रकाशंचमांकुरु १०९
ततस्तंप्रणिपत्याहमवोचंपरमेश्वरम्
ब्रह्महत्यासहस्रस्यपापंशाम्येत्कथंचन ११०
नपुनस्त्वदविज्ञानंकल्पकोटिशतैरपि
तस्मान्मयाकृतास्पर्द्धापवित्रःस्यांकथंहरे १११

तन्मेकथयगोविंदपायश्चित्तंयदिच्छसि
ततःप्रसन्नोभगवानवोचत्तत्त्वमात्मनः ११२
येनाहमधिकस्तस्मादभवंनगनंदिनि
तमेवतपसानित्यंभजामिस्तौमिचिंतये ११३
परमोविष्णुरेवैकस्तज्ज्ञानंमुक्तिसाधनम्
शास्त्राणांनिर्णयस्त्वेषस्तदन्यन्मोहनायच ११४
दानंविनाचयामुक्तिःसाम्यंचममविष्णुना
तीर्थादिमात्रतोज्ञानंममाधिक्यंचविष्णुतः ११५
अभेदश्चास्मदादीनांमुक्तानांहरिणातथा
इत्यादिसर्वमोहायकथ्यतेसतिनान्यथा
तेनाद्वितीयमहिमोजगत्पूज्योऽस्मिपार्वति ११६
पार्वत्युवाच –
तन्मेकथयदेवेशयथाहमपिशंकर
सर्वेश्वरीनिरुपमातवस्यांसदृशीप्रभो ११७
महादेवउवाच–
साधुसाधुत्वयापृष्टंविष्णोर्भगवतःप्रिये
नाम्नांसहस्रंवद्यामिमुख्यंत्रैलोक्यमुक्तिदम् ११८
अस्यश्रीविष्णोर्नामसहस्रस्तोत्रस्यश्रीमहादेवऋषिरनुष्टुपच्छंदः
ह्लींबीजंश्रींशक्तिःक्लींकीलकंचतुर्वर्गधर्मकामार्थमोक्षार्थेजपेविनियोगः
ॐवासुदेवायविद्महेमहाहंसायधीमहि
तन्नोविष्णुःप्रचोदयात् अंगन्यासकरन्यासौविधिपूर्वंयदापठेत्
तत्फलंकोटिगुणितंभवत्येवनसंशयः ११९
श्रीवासुदेवःपरंब्रह्मइतिहृदये
मूलप्रकृतिरितिशिरः
महावराहइतिशिखा
सूर्यवंशध्वजइतिकवचम्
ब्रह्मादिकाम्यललितजगदाश्चर्यशैशवइतिनेत्रम्
यथार्थखंडिताशेषइत्यस्त्रम्
नमोनारायणायेतिन्यासंसर्वत्रकारयेत्
ओंनमोनारायणायपुरुषायमहात्मने

विशुद्धसत्वधिष्ण्यायमहाहंसायधीमहि
ॐह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः
क्लींकृष्णायविष्णवेह्रींरामायधीमहितन्नोदेवःप्रचोदयात्
क्ष्रौंनृसिंहायविद्महेश्रींश्रीकंठायधीमहितन्नोविष्णुःप्रचोदयात्
स्रोंवासुदेवायविद्महेदेवकीसुतायधीमहितन्नःकृष्णःप्रचोदयात्
ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः
क्लींकृष्णायगोविंदायगोपीजनवल्लभायस्वाहा
इतिमंत्रम् समुच्चार्यजपेद्वाविष्णुमव्ययम्
श्रीनिवासंजगन्नाथंतस्यस्तोत्रंपठेत्सुधीः १२०
ॐवासुदेवःपरंब्रह्मपरमात्मापरात्परः
परंधामपरंज्योतिःपरंतत्वंपरंपदम् १२१
परःशिवःपरोध्येयःपरंज्ञानंपरागतिः
परमार्थःपरंश्रेयःपरानंदःपरोदयः १२२
परोव्यक्तात्परंव्योमपरमर्द्धिःपरेश्वरः
निरामयोनिर्विकारोनिर्विकल्पोनिराश्रयः १२३
निरंजनोनिरातंकोनिर्लेपोनिरवग्रहः
निर्गुणोनिष्कलोऽनतोऽभयोऽचित्योऽबलोचितः १२४
अतीन्द्रियोमितोपारोऽनीशोऽनीहोऽव्ययोऽक्षयः
सर्वज्ञःसर्वगःसर्वःसर्वदःसर्वभावनः १२५
सर्वशास्तासर्वसाक्षीपूज्यःसर्वस्यसर्वथृक्
सर्वशक्तिःसर्वसारःसर्वात्मासर्वतोमुखः १२६
सर्वावासःसर्वरूपःसर्वादिःसर्वदुःखहा
सर्वार्थःसर्वतोभद्रःसर्वकारणकारणम् १२७
सर्वातिशयितःसर्वाध्यक्षःसर्वसुरेश्वरः
षडिवंशकोमहाविष्णुर्महागुह्योमहाविभुः १२८
नित्योदितोनित्ययुक्तोनित्यानंदःसनातनः
मायापतिर्योगपतिःकैवल्यपतिरात्मभूः १२९
जन्ममृत्युजरातीतःकालातीतोभवातिगः
पूर्णःसत्यःशुद्धबुद्धस्वरूपोनित्यचिन्मयः १३०
योगप्रियोयोगगम्योभवबंधैकमोचकः

पुराणपुरुषःप्रत्यक्चैतन्यःपुरुषोत्तमः १३१
वेदांतवेद्योदुर्ज्ञेयस्तपत्रयविवर्जितः
ब्रह्मविद्याश्रयोनाद्यःस्वप्रकाशःस्वयंप्रभुः १३२
सर्वोपेयउदासीनःप्रणवःसर्वतःसमः
सर्वानवद्योदुष्प्राप्यस्तुरीयस्तमसःपरः १३३
कूटस्थःसर्वसंश्लिष्टोवाङ्मनोगोचरातिगः
संकर्षणःसर्वहरःकालःसर्वभयंकरः १३४
अनुल्लंघ्यश्चित्रगतिर्महारुद्रोदुरासदः
मूलप्रकृतिरानंदःप्रद्युम्नोविश्वमोहनः १३५
महामायोविश्वबीजंपरशक्तिःसुखैकभूः
सर्वकाम्योऽनतलीलःसर्वभूतवशंकरः १३६
अनिरुद्धःसर्वजीवोहृषीकेशोमनःपतिः
निरुपाधिप्रियोहंसोक्षरःसर्वनियोजकः १३७
ब्रह्मप्राणेश्वरःसर्वभूतभृद्देहनायकः
क्षेत्रज्ञःप्रकृतिःस्वामीपुरुषोविश्वसूत्रधृक् १३८
अंतर्यामीत्रिधामांतःसाक्षीत्रिगुणईश्वरः
योगिगम्यःपद्मनाभःशेषशायीश्रियःपतिः १३९
श्रीसदोपास्यपादाब्जोनित्यश्रीःश्रीनिकेतनः
नित्यंवक्षःस्थलस्थश्रीःश्रीनिधिःश्रीधरोहरिः १४०
वश्यश्रीर्निश्चलःश्रीदोविष्णुःक्षीराब्धिमंदिरः
कौस्तुभोद्भासितोरस्कोमाधवोजगदार्तिहा १४१
श्रीवत्सवक्षानिःसीमकल्याणगुणभाजनः
पीतांबरोजगन्नाथोजगत्राताजगत्पिता १४२
जगद्बंधुर्जगत्स्त्रष्टाजगद्धाताजगन्निधिः
जगदेकस्फुरद्वीर्योऽनहंवादीजगन्मयः १४३
सर्वाश्चर्यमयःसर्वसिद्धार्थःसर्वरंजितः
सर्वामोघोद्यमोब्रह्मरुद्राद्युत्कृष्टचेतनाः १४४
शंभोःपितामहोब्रह्मपिताशक्राद्यधीश्वरः
सर्वदेवप्रियःसर्वदेवमूर्तिरनुत्तमः १४५
सर्वदेवैकशरणंसर्वदेवैकदैवतम्

यज्ञभुग्यज्ञफलदोयज्ञेशोयज्ञभावनः १४६
यज्ञत्रातायज्ञपुमान्वनमालीद्विजप्रियः
द्विजैकमानदोविप्रकुलदेवोसुरांतकः १४७
सर्वदुष्टांतकृत्सर्वसज्जनानन्यपालकः
सप्तलोकैकजठरःसप्तलोकैकमंडनः १४८
सृष्टिस्थित्यंतकृच्चक्रीशार्ङ्गधन्वागदाधरः
शंखभृन्नंदकीपद्मपाणिर्गरुडवाहनः १४९
अनिर्देश्यवपुःसर्वपूज्यस्त्रैलोक्यपावनः
अनंतकीर्तिर्निःसीमपौरुषःसर्वमंगलः १५०
सूर्यकोटिप्रतीकाशोयमकोटिदुरासदः
मयकोटिजगत्स्रष्टावायुकोटिमहाबलः १५१
कोटींदुजगदानंदीशंभुकोटिमहेश्वरः
कंदर्पकोटिलावण्योदुर्गकोट्यरिमर्दनः १५२
समुद्रकोटिगंभीरस्तीर्थकोटिसमाह्वयः
कुबेरकोटिलक्ष्मीवाञ्छक्रकोटिविलासवान् १५३
हिमवत्कोटिनिष्कंपःकोटिब्रह्मांडविग्रहः
कोट्यश्वमेधपापघ्नोयज्ञकोटिसमार्चनः १५४
सुधाकोटिस्वास्थ्यहेतुःकामधुक्कोटिकामदः
ब्रह्मविद्याकोटिरूपःशिपिविष्टःशुचिश्रवाः १५५
विश्वंभरस्तीर्थपादःपुण्यश्रवणकीर्तनः
आदिदेवोजगज्जैत्रोमुकुंदःकालनेमिहा १५६
वैकुंठोऽनतमाहात्म्योमहायोगेश्वरोत्सवः
नित्यतृप्तोलसद्भावोनिःशंकोनरकांतकः १५७
दीनानाथैकशरणंविश्वैकव्यसनापहः
जगत्कृपाक्षमोनित्यंकृपालुःसज्जनाश्रयः १५८
योगेश्वरःसदोदीर्णोवृद्धिक्षयविवर्जितः
अधोक्षजोविश्वरेताःप्रजापतिशताधिपः १५९
शक्रब्रह्मार्चितपदःशंभुब्रह्मोर्ध्वधामगः
सूर्यसोमेक्षणोविश्वभोक्तासर्वस्यपारगः १६०
जगत्सेतुर्धर्मसेतुधरोविश्वधुरंधरः

निर्ममोऽखिललोकेशोनिःसंगोऽद्भुतभोगवान् १६१
वश्यमायोवश्यविश्वोविष्वक्सेनःसुरोत्तमः
सर्वश्रेयःपतिर्दिव्यानर्घ्यभूषणभूषितः १६२
सर्वलक्षणलक्षरायःसर्वदैत्येंद्रदर्पहा
समस्तदेवसर्वस्वं सर्व दैवत नायकः १६३
समस्तदेवकवचंसर्वदेवशिरोमणिः
समस्तदेवतादुर्गःप्रपन्नाशनिपंजरः १६४
समस्तभयहन्नामाभगवान्विष्टरश्रवाः
विभुःसर्वहितोदर्कोहतारिःस्वर्गतिप्रदः १६५
सर्वदैवतजीवेशोब्राह्मणादिनियोजकः
ब्रह्मशंभुःपरार्धायुर्ब्रह्मज्येष्ठःशिशुःस्वराट् १६६
विराड्भक्तपराधीनःस्तुत्यःस्तोत्रार्थसाधकः
परार्थकर्त्ताकृत्यज्ञःस्वार्थकृत्यसदोज्झितः १६७
सदानंदःसदाभद्रःसदाशांतःसदाशिवः
सदाप्रियःसदातुष्टःसदापुष्टसदार्चितः १६८
सदापूतोपावनाग्र्योवेदगुह्योवृषाकपिः
सहस्रनामात्रियुगश्चतुर्मूर्तिश्चतुर्भुजः १६९
भूतभव्यभवन्नाथोमहापुरुषपूर्वजः
नारायणोमुंजकेशःसर्वयोगविनिःसृतः १७०
वेदसारोयज्ञसारःसामसारस्तपोनिधिः
साध्यःश्रेष्ठःपुराणर्षिःनिष्ठाशांतिःपरायणः १७१
शिवत्रिशूलविध्वंसीश्रीकंठैकवरप्रदः
नरःकृष्णोहरिर्धर्मनंदनोधर्मजीवनः १७२
आदिकर्त्तासर्वसत्यःसर्वस्त्रीरत्नदर्पहा
त्रिकालजितकंदर्प्पउर्वशीसृङ्मुनीश्वरः १७३
आद्यःकविर्हयग्रीवःसर्ववागीश्वरेश्वरः
सर्वदेवमयोब्रह्मागुरुर्वागीश्वरीपतिः १७४
अनंतविद्याप्रभवोमूलाविद्याविनाशकः
सर्वज्ञदोजगज्ञाडयनाशकोमधुसूदनः १७५
अनेकमंत्रकोटीशःशब्दब्रह्मैकपारगः

आदिविद्वान्वेदकर्त्तावेदात्माश्रुतिसागरः १७६
ब्रह्मार्थवेदहरणःसर्वविज्ञानजन्मभूः
विद्याराजोज्ञानमूर्त्तिर्ज्ञानसिंधुरखंडधीः १७७
मत्स्यदेवोमहाशृंगोजगद्बीजबहित्रदृक्
लीलाव्याप्ताखिलांभोधिश्चतुर्वेदप्रवर्त्तकः १७८
आदिकूर्मोऽखिलाधारस्तृणीकृतजगद्भरः
अमरीकृतदेवौघःपीयूषोत्पत्तिकारणम् १७९
आत्माधारोधराधारोयज्ञांगोधरणीधरः
हिरण्याक्षहरःपृथ्वीपतिःश्राद्धादिकल्पकः १८०
समस्तपितृभीतिघ्नःसमस्तपितृजीवनम्
हव्यकव्यैकभुक्हव्यकव्यैकफलदायकः १८१
रोमांतर्लीनजलधिःक्षोभिताशेषसागरः
महावराहोयज्ञघ्नध्वंसकोयज्ञिकाश्रयः १८२
श्रीनृसिंहोदिव्यसिंहःसर्वानिष्टार्थदुःखहा
एकवीरोऽद्भुतबलोयंत्रमंत्रैकभंजनः १८३
ब्रह्मादिदुःसहज्योतिर्युगांताग्न्यतिभीषणः
कोटिवज्राधिकनखोजगद्दुष्प्रेक्ष्यमूर्तिधृक् १८४
मातृचक्रप्रमथनोमहामातृगणेश्वरः
अचिंत्यामोघवीर्याढ्यःसमस्तासुरघस्मरः १८५
हिरण्यकशिपुछेदीकालःसंकर्षणीपतिः
कृतांतवाहनासह्यःसमस्तभयनाशनः १८६
सर्वविघ्नांतकःसर्वसिद्धिदःसर्वपूरकः
समस्तपातकध्वंसीसिद्धमंत्राधिकाह्वयः १८७
भैरवेशोहरार्तिघ्नःकालकोटिदुरासदः
दैत्यगर्भस्राविनामास्फुटद्ब्रह्मांडगर्जितः १८८
स्मृतमात्राखिलत्राताऽद्भुतरूपोमहाहरिः
ब्रह्मचर्यशिरःपिंडीदिक्पालोऽर्द्धांगभूषणः १८९
द्वादशार्कशिरोदामारुद्रशीर्षैकनूपुरः
योगिनीग्रस्तगिरजात्राताभैरवतर्जकः १९०
वीरचक्रेश्वरोऽत्युग्रोऽपमारिःकालशंबरः

क्रोधेश्वरोरुद्रचंडीपरिवारादिदुष्टभुक् १९१
सर्वाक्षोभ्योमृत्युमृत्युःकालमृत्युनिवर्त्तकः
असाध्यसर्वरोगघ्नःसर्वदुर्ग्रहसौम्यकृत् १९२
गणेशकोटिदर्पघ्नोदुःसहाशेषगोत्रहा
देवदानवदुर्दर्शोजगद्भयदभीषणः १९३
समस्तदुर्गतित्राताजगद्भक्षकभक्षकः
उग्रशोंबरमार्जारःकालमूषकभक्षकः
अनंतायुधदोर्दंडीनृसिंहोवीरभद्रजित् १९४
योगिनीचक्रगुह्येशःशक्रारिपशुमांसभुक्
रुद्रोनारायणोमेषरूपशंकरवाहनः १९५
मेषरूपशिवत्राताादुष्टशक्तिसहस्रभुक्
तुलसीवल्लभोवीरोवामाचारोऽखिलेष्टदः १९६
महाशिवःशिवारूढोभैरवैककपालधृक्
किल्लीचक्रेश्वरःशक्रदिव्यमोहनरूपदः १९७
गौरीसौभाग्यदोमायानिधीर्मायाभयापहः
ब्रह्मतेजोमयोब्रह्मश्रीमयश्चत्रयीमयः १९८
सुब्रह्मरयोबलिध्वंसीवामनोऽदितिदुःखहा
उपेंद्रोनृपतिर्विष्णुःकश्यपान्वयमंडनः १९९
बलिस्वराज्यदःसर्वदेवविप्रान्नदोऽच्युतः
उरुक्रमस्तीर्थपादस्त्रिपदस्थस्त्रिविक्रमः २००
व्योमपादःस्वपादांभःपवित्रितजगत्त्रयः
ब्रह्मेशाद्यभिवंद्यांघ्रिर्द्रुतधर्मांघ्रिधावनः २०१
अचिंत्याद्भुतविस्तारोविश्ववृक्षोमहाबलः
राहुमूर्धापरांगच्छिद्भृगुपत्नीशिरोहरः २०२
पापत्रस्तःसदापुरयोदैत्याशानित्यखंडनः
पूरिताखिलदेवाशोविश्वार्थैकावतारकृत् २०३
स्वमायानित्यगुप्तात्माभक्तचिन्तामणिःसदा
वरदःकार्त्तवीर्यादिराजराज्यप्रदोऽनघः २०४
विश्वश्लाघ्यामिताचारोदत्तात्रेयोमुनीश्वरः
पराशक्तिसदाश्लिष्टोयोगानंदःसदोन्मदः २०५

समस्तेंद्रारितेजोहृत्परमामृतपद्मपः
अनुसूयागर्भरत्नंभोगमोक्षसुखप्रदः २०६
जमदग्निकुलादित्योरेणुकाद्भुतशक्तिकृत्
मातृहत्यादिनिर्लेपःस्कंदजिद्विप्रराज्यदः २०७
सर्वक्षत्रांतकृद्वीरदर्पहाकार्त्तवीर्यजित्
सप्तद्वीपावतीदाताशिवार्चकयशप्रदः २०८
भीमःपरशुरामश्चशिवाचार्यैकविश्वभुक्
शिवाखिलज्ञानकोशोभीष्माचार्योऽग्निदैवतः २०९
द्रोणाचार्यगुरुर्विश्वजैत्रधन्वाकृतांतजित्
अद्वितीयतपोमूर्त्तिर्ब्रह्मचर्यैकदक्षिणः २१०
मनुःश्रेष्ठःसतांसत्र्महीयान्वृषभोविराट्
आदिराजःक्षितिपितासर्वरत्नैकदोहकृत् २११
पृथुर्जन्माद्येकदक्षोगीःश्रीःकीर्तिःस्वयंवृतः
जगद्वृत्तिप्रदश्चक्रवर्त्तिश्रेष्ठोद्वयास्त्रधृक् २१२
सनकादिमुनिप्राप्यभगवद्भक्तिवर्द्धनः
वर्णाश्रमादिधर्माणांकर्त्तावक्ताप्रवर्त्तकः २१३
सूर्यवंशध्वजोरामोराघवःसद्गुणार्णवः
काकुत्स्थोवीरराड्राजाराजधर्मधुरंधरः २१४
नित्यस्वस्थाश्रयःसर्वभद्रग्राहीशुभैकदृक्
नररत्नंरत्नगर्भोधर्माध्यक्षोमहानिधिः
सर्वश्रेष्ठाश्रयःसर्वशास्त्रार्थग्रामवीर्यवान् २१५
जगद्वशोदाशरथिःसर्वरत्नाश्रयोनृपः
समस्तधर्मसूःसर्वधर्मद्रष्टाऽखिलाघहा २१६
अतींद्रोज्ञानविज्ञानपारदश्चक्षमांबुधिः
सर्वप्रकृष्टशिष्टेष्टोहर्षशोकाद्यनाकुलः
पित्राज्ञात्यक्तसाम्राज्यःसपन्नोदयनिर्भयः २१७
गुहदेशार्पितैश्वर्यःशिवस्पर्द्धाजटाधरः
चित्रकूटाप्तरत्नाद्रिर्जगदीशोवनेचरः २१८
यथेष्टामोघसर्वास्त्रोदेवेंद्रतनयाक्षिहा
ब्रह्मेंद्रदिनतैषीकोमारीचघ्नोविराधहा २१९

ब्रह्मशापहताशेषदंडकाररायपावनः
चतुर्दशसहस्रोग्ररक्षोघ्नैकशरैकधृक् २२०
खरारिस्त्रिशिरोहंतादूषराघ्नोजनार्दनः
जटायुषोऽग्निगतिदोऽगस्त्यसर्वस्व मंत्रराट् २२१
लीलाधनुःकोटचपास्तदुंदुभ्यस्थिमहाचयः
सप्ततालव्यधाकृष्टध्वस्तपातालदानवः २२२
सुग्रीवराज्यदोहीनमनसैवाभयप्रदः
हनुमद्रुद्रमुख्येशसमस्तकपिदेहभृत् २२३
सनागदैत्यबारौकव्याकुलीकृतसागरः
सम्लेच्छकोटिबारौकशुष्कनिर्दग्धसागरः २२४
समुद्राद्भुतपूर्वैकबंधसेतुर्यशोनिधिः
असाध्यसाधकोलंकासमूलोत्कर्षदक्षिराः २२५
वरदृप्तजगच्छल्यपौलस्त्यकुलकृंतनः
रावराघ्नःप्रहस्तच्छित्कुंभकर्राभिदुग्रहा २२६
रावरौकशिरश्छेत्तानिःशंकेंद्रैकराज्यदः
स्वर्गास्वर्गत्वविच्छेदीदेवेंद्रानिंद्रताहरः २२७
रक्षोदेवत्वहृद्धर्माधर्मत्वघ्नःपुरुष्टुतः
नतिमात्रदशास्यारिर्दत्तराज्यविभीषराः २२८
सुधावृष्टिमृताशेषस्वसैन्योज्जीवनैककृत्
देवब्राह्मरानामैकधातासर्वामरार्चितः २२९
ब्रह्मसूर्येंद्ररुद्रादिवृंदार्पितसतीप्रियः
अयोध्याखिलराजन्यःसर्वभूतमनोहरः २३०
स्वामितुल्यकृपादंडोहीनोत्कृष्टैकसत्प्रियः
स्वपक्षादिन्यायदर्शीहीनार्थाधिकसाधकः २३१
व्याधव्याजानुचितकृत्तारकोखिलतुल्यकृत्
पार्वत्याधिक्यमुक्तात्माप्रियात्यक्तःस्मरारिजित् २३२
साक्षात्कुशलवच्छद्मेंद्रादितातोऽपराजितः
कोशलेंद्रोवीरबाहुःसत्यार्थत्यक्तसोदरः २३३
शरसंधाननिर्धूतधरराीमंडलोदयः
ब्रह्मादिकाम्यसांनिध्यसनाथीकृतदैवतः २३४

ब्रह्मलोकाप्तचांडालाद्यशेषप्राणिसार्थकः
स्वनीतगर्दभाश्वादिश्चिरायोध्यावनैककृत् २३५
रामद्वितीयःसौमित्रिर्लक्ष्मणःप्रहतेंद्रजित्
विष्णुभक्ताप्तरामांघ्रिपादुकाराज्यनिर्वृतः २३६
भरतोऽसह्यगंधर्वकोटिघ्नोलवणांतकः
शत्रुघ्नोवैद्यराजायुर्वेदगर्भौषधीपतिः २३७
नित्यामृतकरोधन्वंतरिर्यज्ञोजगद्धरः
सूर्यारिघ्नःसुराजीवोदक्षिणेशोद्विजप्रियः २३८
छिन्नमूर्धायदेशार्कःशेषांगस्थापितामरः
विश्वार्थाशेषकद्रास्त्रशिरच्छेदाक्षताकृतिः २३९
वाजपेयादिनामाग्निर्वेदधर्मपरायणः
श्वेतद्वीपपतिःसांख्यप्रणेतासर्वसिद्धिराट् २४०
विश्वप्रकाशितज्ञानयोगमोहतमिस्रहा
देवहूत्यात्मजःसिद्धःकपिलःकर्दमात्मजः २४१
योगस्वामीध्यानभंगसगरात्मजभस्मकृत्
धर्मोवृषेन्द्रःसुरभीपतिःशुद्धात्मभावितः २४२
शंभुस्त्रिपुरदाहैकस्थैर्थविश्वरथोद्वहः
भक्तशंभुजितोदैत्यामृतवापीसमस्तपः २४३
महाप्रलयविश्वैकद्वितीयाखिलनागराट्
शेषदेवःसहस्राक्षःसहस्रास्यशिरोभुजः २४४
फणामणिकणाकारयोजिताब्ध्यंबुदक्षितिः
कालाग्निरुद्रजनकोमुशलास्त्रोहलायुधः २४५
नीलांबरोवारुणीशोमनोवाक्कायदोषहा
असंतोषोदृष्टिमात्रपातितैकदशाननः २४६
बलिसंयमनोघोरोरौहिणेयःप्रलंबहा
मुष्टिकघ्नोद्विविदहाकालिंदीकर्षणोबलः २४७
रेवतीरमणःपूर्वभक्तिखेदाच्युताग्रजः
देवकीवसुदेवाह्वकश्यपादितिनंदनः २४८
वार्ष्णेयःसात्वतांश्रेष्ठःशौरिर्यदुकुलोद्वहः
नराकृतिःपरंब्रह्मसव्यसाचीवरप्रदः २४९

ब्रह्मादिकाम्यलालित्यजगदाश्चर्यशैशवः
पूतनाघ्नःशकटभिद्यमलार्जुनभंजनः २५०
वातासुरारिःकेशिघ्नोधेनुकारिर्गवीश्वरः
दामोदरोगोपदेवोयशोदानंददायकः २५१
कालीयमर्दनःसर्वगोपगोपीजनप्रियः
लीलागोवर्द्धनधरोगोविंदोगोकुलोत्सवः २५२
अरिष्टमथनःकामोन्मत्तगोपीविमुक्तिदः
सद्यःकुवलयापीडघातीचाणूरमर्दनः २५३
कंसारिरुग्रसेनादिराज्यव्यापारितापरः
सुधर्मांकितभूर्लोकोजरासंधबलांतकः २५४
त्यक्तभग्नजरासंधोभीमसेनयशःप्रदः
सांदीपनमृतापत्यदाताकालांतकादिजित् २५५
समस्तनारकित्रातासर्वभूपतिकोटिजित्
रुक्मिणीरमणोरुक्मिशासनोनरकांतकः २५६
समस्तसुंदरीकांतोमुरारिर्गरुडध्वजः
एकाकीजितरुद्रार्कमरुदाद्यखिलेश्वरः २५७
देवेंद्रदर्पहाकल्पद्रुमालंकृतभूतलः
बाणबाहुसहच्छिन्नंनद्यादिगणकोटिजित् २५८
लीलाजितमहादेवोमहादेवैकपूजितः
इंद्रार्थार्जुननिर्भंगजयदःपांडवैकधृक् २५९
काशिराजशिरश्छेत्तारुद्रशक्त्यैकमर्दनः
विश्वेश्वरप्रसादाद्यःकाशीराजसुतार्दनः २६०
शंभुप्रतिज्ञाविध्वंसीकाशीनिर्दग्धनायकः
काशीशगतकोटिघ्नोलोकशिक्षाद्विजार्चकः २६१
युवतीव्रतयोवश्यःपुराशिववरप्रदः
शंकरैकप्रतिष्ठाधृक्स्वांशशंकरपूजकः २६२
शिवकन्याव्रतपतिःकृष्णरूपशिवारिहा
महालक्ष्मीवपुर्गौरीत्रातावैदलवृत्रहा २६३
स्वधाममुचुकुंदैकनिष्कालयवनेष्टकृत्
यमुनापतिरानीतपरिलीनद्विजात्मजः २६४

श्रीदामरंकभक्तार्थभूम्यानीतेंद्रवैभवः
दुर्वृत्तशिशुपालैकमुक्तिदोद्वारकेश्वरः २६५
आचांडालदिकप्राप्यद्वारकानिधिकोटिकृत्
अक्रूरोद्धवमुख्यैकभक्तस्वच्छंदमुक्तिदः २६६
सबालस्त्रीजलक्रीडामृतवापीकृतार्णवः
ब्रह्मास्त्रदग्धगर्भस्थपरीक्षिज्जीवनैककृत् २६७
परिलीनद्विजसुतानेताऽजुनमदापहः
गूढमुद्राकृतिग्रस्तभीष्माद्यखिलकौरवः २६८
यथार्थखंडिताशेषदिव्यास्त्रपार्थमोहहृत्
गर्भशापछलध्वस्तयादेवोर्वीभयापहः २६९
जराव्याधारिगतिदःस्मृतिमात्राखिलेष्टदः
कामदेवोरतिपतिर्मन्मथःशंबरांतकः २७०
अनंगोजितगौरीशोरतिकांतःसदेप्सितः
पुष्पेषुर्विश्वविजयिस्मरःकामेश्वरीप्रियः २७१
उषापतिर्विश्वकेतुर्विश्वदृप्तोऽधिपूरुषः
चतुरात्माचतुर्व्यूहश्चतुर्युगविधायकः २७२
चतुर्वेदैकविश्वात्मासर्वोत्कृष्टांशकोटिशः
आश्रमात्मापुराणर्षिर्व्यासःशाखासहस्रकृत् २७३
महाभारतनिर्माताकवींद्रोबादरायणः
कृष्णद्वैपायनःसर्वपुरुषार्थैकबोधकः २७४
वेदांतकर्ताब्रह्मैकव्यंजकःपुरुवंशकृत्
बुद्धोध्यानजिताशेषदेवदेवोजगत्प्रियः २७५
निरायुधोजगज्जैत्रःश्रीधरोदुष्टमोहनः
दैत्यवेदबहिःकर्त्तावेदार्थश्रुतिगोपकः २७६
शौद्धोदनिर्दष्टदृष्टिःसुखदःसदसस्पतिः
यथायोग्याखिलकृपःसर्वशून्योऽखिलेष्टदः २७७
चतुष्कोटिपृथक्तत्वंप्रज्ञापारमितेश्वरः
पाखंडवेदमार्गेशःपाखंडश्रुतिगोपकः २७८
कल्कीविष्णुयशःपुत्रःकलिकालविलोपकः
समस्तम्लेच्छदुष्टघ्नःसर्वशिष्टद्विजातिकृत् २७९

सत्यप्रवर्त्तकोदेवद्विजदीर्घक्षुधापहः
अश्ववारादिरेवंतःपृथ्वीदुर्गतिनाशनः २८०
सद्यःक्ष्माऽनतलक्ष्मीकृन्नष्टनिःशेषधर्मवित्
अनंतस्वर्णयोगैकहेमपूर्णाखिलद्विजः २८१
असाध्यैकजगच्छास्ताविश्ववंद्योजयध्वजः
आत्मतत्वाधिपःकर्तृश्रेष्ठोविधिरुमापतिः २८२
भर्तृश्रेष्ठःप्रजेशाग्रयोमरीचिर्जनकाग्रणीः
कश्यपोदेवराजेंद्रःप्रह्लादोदैत्यराट्शशी २८३
नक्षत्रेशोरविस्तेजःश्रेष्ठःशुक्रःकवीश्वरः
महर्षिराट्भृगुर्विष्णुरादित्येशोबलिस्वराट् २८४
वायुर्वह्निःशुचिःश्रेष्ठःशंकरोरुद्रराट्गुरुः
विद्वत्तमश्चित्ररथोगंधर्वाग्रयोक्षरोत्तमः २८५
वर्णादिरग्रयस्त्रीगौरीशक्त्याग्रयाशीश्चनारदः
देवर्षिराट्पांडवाग्रयोऽजुनोवादःप्रवादराट् २८६
पवनःपवनेशानोवरुणोयादसांपतिः
गंगातीर्थोत्तमोद्यूतंछलकाग्रयंवरौषधम् २८७
अन्नंसुदर्शनोऽस्त्राग्रयंवज्रंप्रहरणोत्तमम्
उच्चैःश्रवावाजिराजएरावतइभेश्वरः २८८
अरुंधत्येकपत्नीशोह्यश्वत्थोऽशेषवृक्षराट्
अध्यात्मविद्याविद्याग्रयःप्रणवच्छंदसांवरः २८९
मेरुर्गिरिपतिर्मार्गोमासाग्रयःकालसत्तमः
दिनाद्यात्मापूर्वसिद्धःकपिलःसामवेदराट् २९०
तार्क्ष्यःखगेंद्रऋत्वग्रयोवसंतःकल्पपादपः
दातृश्रेष्ठःकामधेनुरार्तिघ्नाग्रयसुहृत्तमः २९१
चिंतामणिर्गुरुश्रेष्ठोमाताहिततमःपिता
सिंहोमृगेंद्रोनागेंद्रोवासुकिर्नृवरोनृप २९२
वर्णेशोब्राह्मणश्चेतःकरुणाग्रयंनमोनमः
इत्येतद्वासुदेवस्यविष्णोर्नामसहस्रकम् २९३
सर्वापराधशमनंपरंभक्तिविवर्द्धनम्
अक्षयंब्रह्मलोकादिसर्वस्वर्गैकसाधनम् २९४

विष्णुलोकैकसोपानंसर्वदुःखविनाशनम्
समस्तसुखदंसद्यःपरंनिर्वाणदायकम् २९५
कामक्रोधादिनिःशेषमनोमलविशोधनम्
शांतिदंपावनंनृणांमहापातकिनामपि २९६
सर्वेषांप्राणिनामाशुसर्वाभीष्टफलप्रदम्
समस्तविघ्नशमनंसर्वारिष्टविनाशनम् २९७
घोरदुःखप्रशमनंतीव्रदारिद्र्यनाशनम्
ऋणत्रयापहंगुह्यंधनधान्ययशस्करम् २९८
सर्वैश्वर्यप्रदंसर्वसिद्धिदंसर्वधर्मदम्
तीर्थयज्ञतपोदानव्रतकोटिफलप्रदम् २९९
जगज्जाड्यप्रशमनंसर्वविद्यापवर्त्तकम्
राज्यदंभ्रष्टराज्यानांरोगिणांसर्वरोगहृत् ३००
वंध्यानांसुतदंचायुःक्षीणानांजीवितप्रदम्
भूतग्रहविषध्वंसिग्रहपीडाविनाशनम् ३०१
मांगल्यंपुण्यमायुष्यंश्रवणात्पठनाज्जपात्
सकृदस्याखिलावेदाःसांगामंत्राश्चकोटिशः ३०२
पुराणशास्त्रस्मृतयःश्रुतास्युःपठितास्तथा
जप्त्वाचैकाक्षरंश्लोकंपादंवापठतिप्रिये ३०३
नित्यंसिध्यतिसर्वेष्टमचिरात्किमुताखिलम्
नानेनसदृशंसद्यःप्रत्ययंसर्वकर्मसु ३०४
इदंभद्रेत्वयागोप्यंपाठ्यंस्वार्थैकसिद्धये
नावैष्णवायदातव्यंविकल्पोपहतात्मने ३०५
भक्तिश्रद्धाविहीनायविष्णुसामान्यदर्शिने
देयंपुत्रायशिष्यायसुहृदेहितकाम्यया ३०६
मत्प्रसादादृतेनेदंग्रहीष्यंत्यल्पमेधसः
कलौसद्यःफलंकल्पग्रामंनेष्यतिनारदः ३०७
लोकानांभाग्यहीनानांयेनदुःखंविनश्यति
द्वित्रेषुवैष्णवेष्वेतदार्यावर्तेभविष्यति ३०८
नास्तिविष्णोःपरंधामनास्तिविष्णोःपरंतपः
नास्तिविष्णोःपरोधर्मोनास्तिमंत्रोह्यवैष्णवः ३०९

नास्तिविष्णोःपरंसत्यंनास्तिविष्णोःपरोमखः
नास्तिविष्णोःपरंध्यानंनास्तिविष्णोःपरागतिः ३१०
किंतस्यबहुभिर्मंत्रैःशास्त्रैर्वाबहुविस्तरैः
वाजपेयसहस्रैर्वाभक्तिर्यस्यजनार्दने ३११
सर्वतीर्थमयोविष्णुःसर्वशास्त्रमयःप्रभुः
सर्वक्रतुमयोविष्णुःसत्यंसत्यंवदाम्यहम्
आब्रह्मसारसर्वस्वंसर्वमेतन्मयोदितम् ३१२
पार्वत्युवाच–
धन्यास्म्यनुगृहीतास्मिकृतार्थास्मिगत्पते
यन्मयेदंश्रुतंस्तोत्रंत्वद्रहस्यंसुदुर्लभम् ३१३
अहोबतमहत्कष्टंसमस्तदुःखहेहरौ
विद्यमानेऽपिदेवेशेमूढाःक्लिश्यंतिसंसृतौ ३१४
यमुद्दिश्यसदानाथंमहेशोऽपिदिगंबरः
जटिलोभस्मलिप्तांगोतपस्वीवीक्ष्यतेजनैः ३१५
ततोऽधिकोऽस्तिदेवःकोलक्ष्मीकांतान्मधुद्विषः
यत्तत्त्वंचिंत्यतेनित्यंत्वयायोगेश्वरेणहि ३१६
ततःपरंकिमधिकंपदंश्रीपुरुषोत्तमात्
तमविज्ञायकंमूढाःयजंतेज्ञानमानिनः ३१७
मुषितास्मित्वयानाथचिरंयदयमीश्वरः
प्रकाशितोनमेयस्मात्त्वदाद्यादिव्यशक्तयः ३१८
अहोसर्वेश्वरोविष्णुःसर्वदेवोत्तमोत्तमः
भवदादिगुरुर्मूढैःसामान्यइववीक्ष्यते ३१९
महीयसांहिमाहात्म्यंभजमानान्भजंतिते
द्विषतोऽपिवृथापापानुपेक्ष्यंतेक्षमान्विताः ३२०
मयापिबाल्येस्वपितुःप्रजादृष्टाबुभुक्षिताः
दुःखादशक्तयापोष्टुंश्रियमाराध्यवैभृताः ३२१
तयासंनिहिताभ्यश्चप्रजाभ्योभवदादयः
विलसंतिसशक्राद्याःससुहृन्मित्रबांधवाः ३२२
तयाविनाक्वदेवत्वंक्वैश्वर्यंक्वपरिग्रहः
सर्वेभवंतिजीवंतोयातनास्वेवसंस्थिताः ३२३

तामृतेनैवधर्मोऽथकामोमोक्षोऽपिदूरतः
क्षुधितानांदुर्गतानांकुतोयोगसमाधयः ३२४
सचसंसारसारैकःसर्वलोकैकनायकः
वशगाकमलायस्यत्यक्त्वातामपिशंकरः ३२५
अनौद्धत्येनशौचेनरूपेणार्जवसंपदा
सर्वातिशयवीर्येणसंपूर्णस्यमहात्मनः ३२६
कस्तेनतुल्यतामेतिदेवदेवेनविष्णुना
यस्यांशांशावतारेणविनासर्वंविलीयते ३२७
जगदेतत्तथाप्याहुर्दोषायैतद्विमोहिताः
नास्यजन्मनवामृत्युर्नाप्राप्यंस्वार्थमेवच ३२८
कामाद्यासक्तचित्तत्वात्किंतुसर्वेश्वरप्रभो
त्वन्मयत्वात्प्रमादाद्वाशक्नोमिपठितुंनचेत् ३२९
विष्णोःसहस्रनामैतत्प्रत्यहंवृषभध्वज
नाम्नैकेनतुयेनस्यात्तत्फलंब्रूहिमेप्रभो ३३०
महादेवउवाच-
रामरामेतिरामेतिरमेरामेमनोरमे
सहस्रनामतत्तुल्यंरामनामवरानने ३३१
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमापतिनारद
संवादेविष्णोर्नामसहस्रंसंपूर्णंनामैकसप्ततितमोऽध्यायः ७१

द्विसप्ततितमोऽध्यायः

श्रीमहादेवउवाच-
ब्राह्मणावाक्षत्रियावावैश्यावागिरिकन्यके
शूद्रावाथविशेषेणपठंत्यनुदिनंयदि १
धनधान्यसमायुक्तायांतिविष्णोःपरंपदम्
श्लोकंवाश्लोकमर्द्धंवापादंपादार्द्धमेववा २
पठनान्मोक्षमाप्नोतियावदाभूतसंप्लवम्
विन्यासेनयुतंदेविविष्णोर्नामसहस्रकम् ३
येपठंतिनरश्रेष्ठास्तेयांतिपदमव्ययम्
एककालंद्विकालंवात्रिकालंवाथयःपठेत् ४

धनायुर्वर्धतेतस्ययावदिंद्राश्चतुर्दश
पुत्रान्पौत्रांस्तथालक्ष्मीसंपदंविपुलांलभेत् ५
किमन्यद्बहुनोक्तेनभूयोभूयोवरानने
विष्णोर्नामसहस्रंतुपरंनिर्वाणदायकम् ६
पूजनंप्रथमंतस्यकृतंयेननरेणतु
संपूर्णंपूजितेविष्णौतस्यपूजाचवार्षिकी ७
व्यग्रत्वंचनकर्त्तव्यंपठनेतुविशेषतः
यदिचेत्क्रियतेपाठेह्यायुर्वित्तंचनश्यति ८
यावंतिभुवितीर्थानिजंबुद्विपेषुसर्वदा
तानितीर्थानितत्रैवविष्णोर्नामसहस्रकम् ९
तत्रैवगंगायमुनाचवेणीगोदावरीतत्रसरस्वतीच
सर्वाणितीर्थानिवसंतितत्रयत्रस्थितंनामसहस्रकंतत् १०
इदंपवित्रंपरमंभक्तानांवल्लभंसदा
ध्येयंहिदासभावेनभक्तिभावेनचेतसा ११
परंसहस्रनामाख्यंयेपठंतिमनीषिणः
सर्वपापविनिर्मुक्तास्तेयांतिहरिसंनिधौ १२
अरुणोदयकालेतुयेपठंतिजपंतिच
आयुर्बलंचतेषांश्रीर्वर्द्धतेचदिनेदिने १३
रात्रौजागरणेप्राप्तेकलौभागवतोनरः
पठनान्मुक्तिमाप्नोतियावदिंद्राश्चतुर्दश १४
एकैकेनतुनाम्नावैहरौतुलसिकारणात्
पूजासाचैवविज्ञेयाकोटियज्ञफलाधिका १५
मार्गेचगच्छमानास्तुयेपठंतिद्विजातयः
नदोषामार्गजास्तेषांभवंतिकिलपार्वति १६
शृणुदेविप्रवक्ष्यामिमाहात्म्यंकेशवस्यतु
येशृण्वंतिनरश्रेष्ठास्तेपुण्याःपुण्यरूपिणः १७
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमापति
नारदसंवादेसहस्रनाममहिमानामद्विसप्ततितमोऽध्यायः ७२

त्रिसप्ततितमोऽध्यायः

महादेवउवाच-
ॐरामरक्षास्तोत्रस्यश्रीमहर्षिर्विश्वामित्रऋषिः
श्रीरामोदेवता
अनुष्टुप्छंदः
विष्णुप्रीत्यर्थेजपेविनियोगः १
अतसीपुष्पसंकाशंपीतवाससमच्युतम्
ध्यात्वावैपुंडरीकाक्षंश्रीरामंविष्णुमव्ययम् २
पातुवोहृदयंरामःश्रीकंठःकंठमेवच
नाभिंपातुमखत्राताकटिंमेविश्वरक्षकः ३
करौपातुदाशरथिःपादौमेविश्वरूपधृक्
चक्षुषीपातुवैदेवसीतापतिरनुत्तमः ४
शिखांमेपातुविश्वात्माकर्णौमेपातुकामदः
पार्श्वयोस्तुसुरत्राताकालकोटिदुरासदः ५
अनंतःसर्वदापातुशरीरंविश्वनायकः
जिह्वांमेपातुपापघ्नोलोकशिक्षाप्रवर्त्तकः ६
राघवःपातुमेदंतान्केशान्रक्षतुकेशवः
सक्थिनीपातुमेदत्तविजयोनामविश्वसृक् ७
एतांरामबलोपेतांरक्षांयावैपुमान्पठेत्
सचिरायुःसुखीविद्वान्लभतेदिव्यसंपदम् ८
रक्षांकरोतिभूतेभ्यःसदारक्षातुवैष्णवी
रामेतिरामभद्रेतिरामचंद्रेतियःस्मरेत् ९
विमुक्तःसनरःपापान्मुक्तिंप्राप्नोतिशाश्वतीम्
वसिष्ठेनइदंप्रोक्तंगुरवेविष्णुरूपिणे १०
ततोमेब्रह्मणःप्राप्तंमयोक्तंनारदंप्रति
नारदेनतुभूर्लोकेप्रापितंसुजनेष्विह ११
सुप्त्वावाथगृहवापिमार्गेगच्छंतएववा
येपठंतिनरश्रेष्ठास्तेनराःपुण्यभागिनः १२

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमापतिनारदसंवादेरामरक्षास्तोत्रंनामत्रिसप्ततितमोऽध्यायः ७३

चतुःसप्ततितमोऽध्यायः

महादेवउवाच-
शृणुदेविप्रवद्त्यामिधर्ममाहात्म्यमुत्तमम्
यच्छ्रुत्वानपुनर्जन्मजायतेभुविकर्हिचित् १
धर्मादर्थंचकामंचमोद्तंचैतत्त्रयंलभेत्
तस्माद्धर्मंसमीहेतविद्वान्यःसबुधःस्मृतः २
तपसाचैवदानेनव्रतेननियमेनच
तपसाप्राप्यतेस्वर्गःसात्विकेनतथैवच ३
इहायातोलभेद्राज्यंक्रोधलोभविवर्जितः
जन्मांतरेणमुक्तिःस्यात्पदंविंदतिवैष्णवम् ४
तपसाराजसेनेहराजसश्चैवजायते
तप्त्वातामसभावेनक्रूरकर्माहिनिष्ठुरः ५
तपस्तद्रद्तसांचोक्तंभुक्तिदंतामसात्मनाम्
यत्तप्तंसात्विकंचैवतत्तपोभवतिध्रुवम् ६
रजस्तमोभ्यांनियतंतपस्यांवनेसतांवायुभुजांसुनिर्जने
तपस्विनांचैवधनादिवांच्छतांवनेऽपिदोषाःप्रभवंतिरागिणाम् ७
गृहेऽपिपंचेंद्रियनिग्रहस्तपस्त्वकुत्सितेकर्मणियःप्रवर्त्तते
निवृत्तरागस्यतपोवनंगृहंगृहाश्रमोऽतोगदितःस्वधर्मः ८
सुदुस्तरःसत्वजितेंद्रियाणांसंहन्यतेश्रेष्ठतमःशुभाश्रमः
गृहस्तुधर्मःप्रवरोमनीषिणांब्रह्मादिभिश्चाभिहितोनगात्मजे ९
तप्त्वातपस्वीविपिनेद्तुधार्तोगृहंसमायातिसदान्नदातुः
भक्त्यासचान्नंप्रददातितस्मैतपोविभागंभजतेहितस्य १०
गृहाश्रमंज्येष्ठमिहाश्रमाणांसम्यक्चयःपालयतेमनुष्यः
इहैवभुंजन्समनुष्यभोगान्स्वर्गंप्रयातीतिनसंशयोऽत्र
गृहंसदापालयतांनराणांपापंसमायातिकथंहिदेवि ११
गृहाश्रमःपुरयतमःसर्वदातीर्थवद्गृहम्
अस्मिन्गृहाश्रमेपुरयेदानंदेयंविशेषतः १२
देवानांपूजनंयत्रअतिथीनांचभोजनम्
पथिकानांचशरणंअतोधन्यतमोमतः १३
तद्गृहंतुसमाश्रित्ययेऽचयंतिद्विजान्नराः

आयुर्लक्ष्मीस्तथापुत्रानहीयंतेकदाचन १४
शृणुसुंदरिवक्ष्यामिमहापापविशोधनम्
सर्वसंपत्करंदानंइहामुत्रफलप्रदम् १५
शुभेकालेसमायातेसमभ्यर्च्यस्वदैवतम्
नित्यंनैमित्तकंकृत्वादद्याद्दानंस्वशक्तितः १६
गृहीत्वापरद्रव्यंचद्विजदेवेभ्यएवहि
दद्यात्सनिरयंदृष्ट्वापश्चाद्यातिपरांगतिम् १७
शतानीकोयथादानात्सपुत्रश्चैवतारितः
दत्त्वान्येचद्विजेभ्यश्चसगंताधर्मतोदिवम् १८
धर्मस्थानेषुयैर्दत्तंतेषांधर्ममुदाहृतम्
शृणुदेविप्रवक्ष्यामिवित्तदानंसमासतः १९
देहशुद्धिकरंदानंनभूतंनभविष्यति
पापहीनोयेनपुमान्जायतेनात्रसंशयः २०
भोगान्भुक्त्वाततश्चायंयातिविष्णुंसनातनम्
पुरावैब्रह्मणाप्रोक्तंभार्गवायमहात्मने २१
पापयुक्तायरामायतुलावृषभमेवच
पापकर्मरतश्चैवभवबंधक्रियोनृपः २२
अभक्षभक्षणरताभ्रूणहागुरुतल्पगः
एतेप्यनृतवादीचप्रसूयंतेवियोनिषु २३
अयाज्ययाजनंकृत्वायाचयित्वातुनिंदितान्
सदाकोपसमायुक्ताःसाधूनांपीडनेरताः २४
विश्वासोपहताश्चैषामसुभिर्धर्मनिंदकाः
पापैरेभिःसमायुक्ताज्ञात्वात्मानंगतायुषम् २५
इतिज्ञात्वातुतैर्देविदानंदेयंविशेषतः
बहवोधर्मकर्त्तारोवैष्णवाभुविविश्रुताः २६

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमापति-
नारदसंवादेदानधर्मोनामचतुःसप्ततितमोऽध्यायः ७४

पञ्चसप्ततितमोऽध्यायः-

महादेवउवाच-

गंडिकायास्तुमाहात्म्यंवद्त्येदेविविधानतः
यथागंगातथासाचकथितानगनंदिनि १
शालग्रामशिलायत्रजायतेबहुधातथा
माहात्म्यंचैवतस्याश्चकथितंमुनिसत्तमैः २
ग्रंडजाउद्भिजायत्रस्वेदजाश्चजरायुजाः
यस्यादर्शनमात्रेणपुरायरूपास्तुपार्वति ३
उत्तरेसातुसंभूतागंडिकातुमहानदी
संस्मृतासंस्मृतानूनंपापंहंत्यगनंदिनि ४
यत्रनारायणोदेवोनित्यंतिष्ठतिभूतिदः
शंखचक्रधरास्तस्यसमीपेनिवसंतिये ५
तेमृत्युंसमनुप्राप्यदिव्यरूपाश्चतुर्भुजाः
ऋषयस्तत्रतिष्ठंतिदेवाश्चैवंविशेषतः ६
रुद्रानागास्तथायद्दानात्रकार्याविचारणा
तस्याःसमीपेह्येकोऽयस्थलोवैविष्णुरूपधृक् ७
स्थलेऽस्मिन्वर्ततेमूर्तिर्बहुरूपातिमुक्तिदा
चतुर्विंशतिभूतानांजातयःसंतितत्रवै ८
एकावैमत्स्यरूपाचकृष्णरूपातिमुक्तिदा
ग्रन्याचयाबुधैःप्रोक्तास्थलेवैविष्णुसंज्ञके ९
कल्किनाम्नीतथापुरायाकपिलायामयोदिता
ग्रन्यास्तुविविधाकारादृश्यंतेबहुधाग्रपि १०
तिष्ठंतिमूर्त्तयःसर्वानानारूपाह्यनेकशः
सागंगामहतीपुरायाधर्मकामार्थमुक्तिदा ११
यस्यांभूमौहृषीकेशोनियमेनसमन्वितः
वर्त्ततेऽद्यापितत्रैवमयासहनसंशयः १२
भ्रूणहत्याबालहत्यागोहत्याचविशेषतः
यस्याःस्पर्शनमात्रेणमुच्यतेसर्वकिल्बिषात् १३
ब्राह्मणाःद्दत्रियावैश्याःशूद्राश्चैवान्यजातयः
सर्वेतेवैविमुच्यंतेदर्शनाद्गंडिकांबुनः १४
इयंवेणीसमापुरायापापिनांतुविशेषतः
मुच्यतेब्रह्महायत्रइतरेषांतुकाकथा १५

सर्वदासर्वकालेतुअहंगच्छामिपार्वति
तीर्थानांतीर्थराजोऽयब्रह्मणाभाषितःकिल १६
तत्रस्नानंचदानंचमुनिभिःपरिकल्पितम्
आषाढेपुण्यकालेतुतत्रगच्छामिसुंदरि १७
मासैकविधिनाचैवस्नानंतत्रकरोम्यहम्
तारकंतत्रविशदंजपामितुनिरंतरम् १८
अतोऽहवैष्णवोजातोविष्णुक्षेत्रेयतोगतः
विष्णुनानिर्मितंपूर्वंक्षेत्रंतत्तुमहत्तरम् १९
वैष्णवानांचगतिदंपावनंपरमंस्मृतम्
भवेऽस्मिन्मानुषेजन्मदुर्लभंदेविसर्वदा २०
दुर्लभंगण्डकातीर्थंविष्णुक्षेत्रंतुदुर्लभम्
अतोह्याषाढमासेतुगंतव्यंद्विजसत्तमैः २१
तत्रगत्वाविशेषेणशंखचक्रादिधारणम्
कर्त्तव्यंतुद्विजश्रेष्ठैःपवित्रंपरमंस्मृतम् २२
शंखतीर्थंतुवामेवैदक्षिणेचक्रचिह्नितम्
द्विजानांमुक्तिदंप्रोक्तंधारितव्यंप्रयत्नतः २३
ब्राह्मणैश्चविशेषेणशंखचक्रादिधारणं
धृतेसतिमहादेविवैष्णवास्तेहिमानवाः २४
नगण्डकासमंतीर्थंनव्रतंद्वादशीसमम्
नदेवःकेशवादन्योभूयोभूयोवरानने २५
गंडिकायास्तुमाहात्म्यंयेशृण्वंतिनरोत्तमाः
इहलोकेसुखंभुक्त्वाविष्णुलोकेहियांतिते २६

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमापति
नारदसंवादेगंडिकातीर्थमाहात्म्यंनामपंचसप्ततितमोऽध्यायः ७५

षट्सप्ततितमोऽध्यायः

महादेवउवाच-
शृणुसुंदरिवक्ष्यामिस्तोत्रंचाभ्युदयंततः
यच्छ्रुत्वामुच्यतेपापीब्रह्महानात्रसंशयः १
धातावैनारदंप्राहतदहंतुब्रवीमिते

तमुवाचततोदेवःस्वयंभूरमितद्युतिः २
प्रगृह्यरुचिरंबाहुंस्मारयेच्चौर्ध्वदेहिकम्
भगवान्नारायणःश्रीमान्देवश्चक्रायुधोहरिः ३
शार्ङ्गधारीहृषीकेशःपुराणपुरुषोत्तमः
अजितःखड्गभृज्जिष्णुःकृष्णश्चैवसनातनः ४
एकशृंगोवराहस्त्वंभूतभव्यभवात्मकः
अक्षरंब्रह्मसत्यंतुआदौचांतेचराघवः ५
लोकानांतुपरोधर्मोविष्वक्सेनश्चतुर्भुजः
सेनानीरक्षणस्त्वंचवैकुंठस्त्वंजगत्प्रभुः ६
प्रभवश्चाव्ययस्त्वंचउपेंद्रोमधुसूदनः
पृश्निगर्भोधृतार्चिस्त्वंपद्मनाभोरणांतकृत् ७
शरण्यंशरणंचत्वामाहुःसेन्द्रामहर्षयः
ऋक्सामश्रेष्ठोवेदात्माशतजिह्वोमहर्षयः ८
त्वंयज्ञस्त्वंवषट्कारस्त्वमोंकारःपरंतपः
शतधन्वावसुःपूर्ववसूनांत्वंप्रजापतिः ९
त्रयाणामपिलोकानांआदिकर्तास्वयंप्रभुः
रुद्राणामष्टमोरुद्रःसाध्यानामपिपंचमः १०
आश्विनौचापिकर्णौतेसूर्यचंद्रौचचक्षुषी
अंतेचादौचमध्येचदृश्यसेत्वंपरंतपः ११
प्रभवोनिधनंचास्यनविदुःकोभवानिति
दृश्यसेसर्वलोकेषुगोषुचब्रह्मणेषुच १२
दिक्षुसर्वासुगगनेपर्वतेषुगुहासुच
सहस्रनयनःश्रीमाञ्छतशीर्षःसहस्रपात् १३
त्वंधारयसिभूतानिवसुधांचसपर्वताम्
अंतःपृथिव्यांसलिलेसर्वसत्वमहोरगः १४
त्रींल्लोकान्धारयन्नास्तेदेवगंधर्वदानवान्
अहंतेहृदयंरामजिह्वादेवीसरस्वती १५
देवारोमाणिगात्रेषुनिर्मितास्तेस्वमायया
निमिषस्तेस्मृतारात्रिरुन्मेषोदिवसस्तथा १६
संस्कारस्तेभवेद्देहोनतदस्तिविनात्वया

जगत्सर्वंशरीरेतत्स्थैर्यंचवसुधातलम् १७
अग्निःकोपःप्रसादस्तेशेषःश्रीमांश्चलक्ष्मणः
त्वयालोकास्त्रयःक्रांताःपुराणैर्विक्रमैस्त्रिभिः १८
त्वयेंद्रश्चकृतोराजाबलिर्बद्धोमहासुरः
लोकान्संहृत्यकालस्त्वंनिवेश्यात्मनिकेवलम् १९
करोष्येकार्णवंघोरंदृश्यादृश्येचनान्यथा
त्वयासिंहवपुःकृत्वापरमंदिव्यमुत्तमम् २०
भयदःसर्वभूतानांहिरण्यकशिपुर्हतः
त्वमश्ववदनोभूत्वापातालतलमाश्रितः २१
संहृतंपरमंहव्यंरहस्यंवैपुनःपुनः
यत्परंश्रूयतेज्योतिर्यत्परंश्रूयतेपरः २२
यत्परंपरतश्चैवपरमात्मेतिकथ्यते
परोमंत्रःपरंतेजस्तमेवहिनिगद्यसे २३
हव्यंकव्यंपवित्रंचप्राप्तिःस्वर्गापवर्गयोः
स्थित्युत्पत्तिविनाशांस्तेत्वामाहुःप्रकृतेःपरम् २४
यज्ञश्चयजमानश्चहोताचाध्वर्युरेवच
भोक्तायज्ञफलानांचत्वंवैवेदैश्चगीयसे २५
सीतालक्ष्मीर्भवान्विष्णुर्देवःकृष्णःप्रजापतिः
वधार्थंरावणस्यत्वंप्रविष्टोमानुषींतनुम् २६
तदिदंचत्वयाकार्यंकृतंधर्मभृतांवर
निहतोरावणोरामप्रहृष्टादेवताःकृताः २७
अमोघंदेववीर्यंतेनतेमोघःपराक्रमः
अमोघदर्शनंरामनचमोघस्तवस्तवः २८
अमोघास्तेभविष्यंतिभक्तिमंतोनराभुवि
येचत्वांदेवसंभक्ताःपुराणंपुरुषोत्तमम् २९
इममार्षस्तवंपुण्यमितिहासंपुरातनम्
येनराःकीर्तयिष्यंतिनास्तितेषांपराभवः ३०
कथमिहहिपराभवंव्रजेयुःपुरुषवराःपुरुषोत्तमेहिभक्ताः
नहिजगतिचतुर्भुजप्रियाणांत्रिदशइहास्तिवरप्रदोविशिष्टः ३१
स्तोत्राणांप्रवरंस्तोत्रंराघवस्यमहात्मनः

त्रिकालेयःपठेन्नित्यंमहापातकवानपि ३२
संध्याकालेद्विजश्रेष्ठैःश्राद्धकालेविशेषतः
पठनीयंप्रयत्नेनभक्तिभावेनचेतसा ३३
इदंगोप्यंहिपरमंनाख्येयंकर्हिचित्क्वचित्
पठनान्मुक्तिमाप्नोतिसात्त्वतःसभवेद्ध्रुवम् ३४
प्रथमंपिंडपूजांतेब्राह्मणैर्द्विजसत्तमैः
पठितव्यमिदंस्तोत्रंश्राद्धमक्षयमाप्नुयात् ३५
इदंपवित्रंपरमंजनानांमुक्तिदायकम्
लिखित्वावैगृहेयस्तुधारयेत्सुसमाधिना ३६
ग्रायुःश्रीश्चबलंतस्यवृद्धिंयातिदिनेदिने
लिखित्वाब्राह्मणेदद्याद्धीमान्योवैकदाचन ३७
विमुक्ताःपूर्वजास्तस्ययांतिविष्णोःपरंपदम्
चतुर्णांचैववेदानांपाठेचैवतुयत्फलम् ३८
समवाप्नोतिजापेननरःस्तोत्रंपठन्जपन्
धृत्वावैशंखचक्रादिब्राह्मणैर्वेदतत्परैः ३९
श्राद्धकालेमहादेविग्रक्षयंतद्भवेद्ध्रुवम्
कंठेपद्माक्षमालांचशंखचक्रादिधारणम् ४०
ततःश्राद्धंप्रकुर्वीतइदंस्तोत्रंपठन्जपन्
विधिनाभक्तिभावेनपूर्णंभवतिनान्यथा ४१
ग्रतोभक्तिमतापुंसापठनीयंप्रयत्नतः
पठनात्सर्वमाप्नोतिसनरःसुखमेधते ४२

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वर-
संवादेग्राभ्युदयिकमूर्ध्वदैहिकस्तोत्रंनामषट्सप्ततितमोऽध्यायः ७६

सप्तसप्ततितमोऽध्यायः

महादेवउवाच-
पप्रच्छाहंजगन्नाथंव्रतानामुत्तमंव्रतम्
पुत्रपौत्रविवृद्ध्यर्थंसुखसौभाग्यदायकम् १
तवाग्रेसंप्रवक्ष्यामिशृणुसुंदरिसांप्रतम्
इदंकथानकंदिव्यमृषीणांव्रतमुत्तमम् २

रजस्वलातुयानारीसहसापापरूपिणी
कृतेनचव्रतेनैवमहापापैःप्रमुच्यते
पितृणामक्षयंदेयंधर्मकामार्थसाधनम् ३
श्रीविष्णुरुवाच-
पूर्वमासीन्महाबाहुर्ब्राह्मणोवेदपारगः
सदाध्ययनशीलस्तुदेवशर्माइतिद्विजः ४
अग्निहोत्रक्रियायुक्तः षट्कर्मनिरतःसदा
सर्ववर्णेषुसंपूज्यःसपुत्रपशुबांधवः ५
तस्यब्राह्मणमुख्यस्यभग्नाचगृहवाहिनी
प्राप्तेभाद्रपदेमासेशुक्लपक्षेतुपंचमी ६
पितुःक्षयाहंकुरुतेयतात्माचजितेंद्रियः
रात्रौनिमंत्रयेद्विप्रान्सुखसौभाग्यदायकान् ७
प्रभातेविमलेप्राप्तेभांडान्यन्यानिकारयेत्
पाकंसर्वेषुपात्रेषुसकारयतिजायया ८
अष्टादशरसोपेतंपितृणांप्रीतिदायकम्
आकारणंततोदत्त्वाविप्राणांचपृथक्पृथक् ९
सर्वेविप्रास्तुसंप्राप्तामध्याह्नेवेदपाठकाः
अर्घपाद्यादिविधिवत्कृतवान्द्विजसत्तमः १०
रजसादूषितःश्राद्धेप्रक्षाल्यविधिवत्तदा
गृहमध्येगताःसर्वेआसनेतेनिरूपिताः ११
प्रदत्तंभोजनंतेनमिष्टान्नेनविशेषतः
विधिनाचकृतंश्राद्धंपिंडदानप्रपूर्वकम् १२
तांबूलंदक्षिणांचैववस्त्राणिविविधानिच
सर्वंददौद्विजेभ्योवैपितृध्यानपरायणः १३
विप्राविसर्जिताःसर्वेआशीर्वादपरायणाः
गोत्रिणांबांधवानांचअन्येषांचबुभुक्षताम् १४
दत्तमन्नंतदातेनभोजनेविधिपूर्वकम्
निशायांतुकुटीद्वारेउपविष्टोयदातदा १५
ब्राह्मण्यावारिसंगृह्यपादप्रक्षालनंकृतम्
तदाशुनीबलीवर्दौपरस्परमभाषताम् १६

शृणुकांतवचोमह्यंयादृक्कृतवतीवधूः
तादृशंसंप्रवक्ष्यामिनान्यथाप्रब्रवीम्यहम् १७
कदाचिद्दैवयोगेनगताहंपुत्रसद्मनि
तत्रस्थितंपयःपातुंवध्वादृष्टंनतत्पुनः १८
पीतंपयस्तुसर्पेणतद्दृष्टंतुमयापुनः
पश्चात्पीतंमयासम्यक्दृष्टंवध्वातदापुनः १९
तेनसंपर्कदोषेणकटिर्भग्नाचमेसदा
तेनदुःखेनभोस्वामिन्जाताहंदुःखभागिनी
भग्नाकटिश्चसंजाताह्याहारोनैवरोचते २०
बलीवर्द्दउवाच-
शृणुत्वंशुनिवक्ष्यामिममदुःखस्यकारणम्
अस्मिन्वैदिवसेप्राप्तेब्राह्मणानांतुभोजनम् २१
कारितंममपुत्रेणममचिंतातुनोकृता
नोदकंनतृणंचैवनदत्तंकेनचित्क्वचित् २२
अनाहारोह्यहंपापीबद्धोऽस्मिन्पापभावितः
पूर्वपापविशेषेणजातंशुनिनसंशयः २३
तद्वाक्यंतुतदादेविश्रुतंपुत्रेणधीमता
ममायंतुपितासाक्षाज्जातोममगृहेपशुः २४
इयंतुजननीसाक्षान्ममचैवनसंशयः
दैवयोगाच्छुनीजाताकिंकरोमिसुनिश्चयम् २५
एवंविचार्यासौविप्रोनैवनिद्रामवापसः
रात्रौचिंतापरोभूत्वास्मरन्विश्वेश्वरंपरम् २६
नानाधर्मपरोऽहचममैवंचकथंशुभम्
विचारयित्वाचततोरात्रौसुप्तस्तदापुनः २७
प्रभातेविमलेप्राप्तेऋृषीणांपुरतोगतः
तेषांमध्येवसिष्ठेनतस्यसुस्वागतंकृतम् २८
ब्रूहित्वंब्राह्मणश्रेष्ठतवागमनकारणम्
इतिपृष्टस्तदाविप्रःप्रणाममकरोत्तदा २९
अद्यमेसफलंजन्मअद्यमेसफलाक्रिया
अद्यमेपितरस्तृप्तादुर्लभात्तवदर्शनात् ३०

यथोक्तंचकृतंश्राद्धंद्विजाश्चैवसुभोजिताः
कुटुंबिनांतुसर्वेषांभोजनंकारितंतथा ३१
भोजनानंतरंप्राप्ताशुनीतत्रउवाचह
अस्माकंतुगृहेह्येकोबलीवर्दस्तुवर्त्तते ३२
तंपतिंप्रतिवाक्यंयद्द्विवजमत्तःशृणुष्वतत्
गृहेस्थितंदुग्धभांडमहिनादूषितंमया ३३
दृष्टंमेमहतीचिंतातदाजातानसंशयः
अनेनपयसाचैवपक्वमन्नंयदाभवेत् ३४
तदात्रसर्वेविप्राश्चम्रियंतेभोजनात्ततः
एवंविचार्यतत्स्वामिन्दुग्धंपीतंतदामया ३५
तदादृष्टंतुवध्वावैतयामेताडनंकृतम्
चरामितेनसंभग्नाकिंकरोमिसुदुःखिता ३६
तस्यादुःखंतुसंस्मृत्यवृषःप्राहशुनींप्रति
शृणुशुनिप्रवक्ष्यामिममदुःखस्यकारणम् ३७
अस्याहंतुपितासाक्षात्पूर्वजन्मनिवैशुनि
अद्यवैभोजिताविप्रादत्तमन्नंतुभूरिशः ३८
नतृणंनोदकंचैवममाग्रेसंनिवेदितम्
तेनदुःखेनमेदुःखंजातंबहुतरंतदा ३९
एतत्कथानकंश्रुत्वारात्रौनिद्रामवापन
ममचिंतातुतत्रैवजातावैऋषिसत्तम ४०
वेदाध्ययनशीलोऽहकुशलोवेदकर्मणि
अनयोश्चमहद्दुःखंकिंकरोमीतिचिंतयन्
आगतस्त्वत्समीपेतुममकष्टंनिवारय ४१
ऋषिरुवाच-
उग्रजन्मन्शृणुष्वत्वंपूर्वजन्मनियत्कृतम्
अयंवैतुद्विजश्रेष्ठोकुंडनेनगरेशुभे ४२
मासेभाद्रपदेचैवपंचमीयासमागता
तद्व्रतंतेननाज्ञातंपितुःश्राद्धादिकारणात् ४३
स्त्रीधर्मेणतुसंप्राप्ताक्षयहेतुतदानघ
तयाचैवकृतंसर्वंब्राह्मणानांचभोजनम् ४४

नज्ञातंचकृतंतेनपापिष्ठेनदुरात्मना
प्रथमेऽहनिचांडालीद्वितीयेब्रह्मघातिनी ४५
तृतीयेरजकीप्रोक्ताचतुर्थेऽहनिशुध्यति
तेनपापेनसाजाताशुनीस्वगृहचारिणी
बलीवर्दस्त्वयंजातःकर्मणानेनसुव्रत ४६
उग्रजन्मोवाच-
व्रतंदानंतथायज्ञंतीर्थंवाममसुव्रत
ब्रूहियेनविशेषेणमुक्तिःपित्रोर्भवेन्मम ४७
ऋषिरुवाच-
मासेभाद्रपदेशुक्लेजायतेऋषिपंचमी
रजसाविकृतंपापंनश्यतेकरणाद्यतः ४८
पुत्रपौत्रप्रदात्रीचपितृणांमुक्तिदायिनी
नद्याकूपेतडागेवाब्राह्मणस्यगृहेतथा ४९
गोमयंमंडलंकुर्यात्कुंभंतत्रैवविन्यसेत्
तस्योपरिन्यसेत्पात्रमृषिधान्येनपूरितम् ५०
यज्ञोपवीतसूत्रंचसहिरण्यंफलंतथा
स्थाप्याश्चऋषयःसप्तसुखसौभाग्यदायकाः ५१
आवाहयित्वातेसर्वेपूजनीयाव्रतस्थितैः
नैवेद्यमृषिधान्यंचऋषिधान्यंतुभोजनम् ५२
एकभक्तेनकर्तव्यमृषीणामर्चनंतदा
पूजयेत्परयाभक्त्यामंत्रेणविधिपूर्वकम् ५३
निर्वापंसघृतंदेयंदक्षिणासंयुतंतदा
देयंविप्रायविधिवदृषीणांप्रीयतांप्रति ५४
कथांश्रुत्वाविधानेनकृत्वाचैवप्रदक्षिणाम्
धूपंदीपंचनैवेद्यमर्घ्यंदद्यात्पृथक्पृथक् ५५
ऋषयःसंतुमेनित्यंव्रतसंपूर्णकारिणः
पूजांगृह्णंतुमद्दत्तांऋषिभ्योऽस्तुनमोनमः ५६
पुलस्त्यःपुलहश्चैवक्रतुःप्राचेतसस्तथा
वसिष्ठमरिचात्रेयाअर्घंगृह्णंतुवोनमः ५७
एवंपूजाप्रकर्त्तव्याधूपैर्दीपैर्मनोरमैः

पितॄणांजायतेमुक्तिःकृतस्यास्यप्रभावतः ५८
पूर्वकर्मविपाकेनरजसादोषभावतः
कृतंह्येवंतुभोवत्समुक्तिस्तस्यनसंशयः ५९
तद्व्रतंचकृतंतेनमुक्त्यार्थंपितृहेतवे
तेगतामुक्तिमार्गेणआशीर्वादपरायणाः ६०
ऋषिपंचमीव्रतंपुण्यंविप्रायपरिकीर्तितम्
येकुर्वंतिनरश्रेष्ठास्तेज्ञेयाःपुण्यभागिनः ६१
येकुर्वंतिनरश्रेष्ठऋषिव्रतमनुत्तमम्
भुक्त्वात्रभोगान्विपुलान्यांतिविष्णोःपदंतुते ६२
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमापतिनारद संवादेऋषिपंचमीव्रतंनामसप्तसप्ततितमोऽध्यायः ७७

अष्टसप्ततितमोऽध्यायः-

महादेवउवाच-
अथातःसंप्रवक्ष्यामिअपामार्जनमुत्तमम्
पुलस्त्येनयथोक्तंतुदालभ्यायमहात्मने १
सर्वेषांरोगदोषाणांनाशनंमंगलप्रदम्
तत्तेऽहतुप्रवक्ष्यामिशृणुत्वंनगनंदिनि २
श्रीदालभ्यउवाच-
भगवन्प्राणिनःसर्वेविषरोगाद्युपद्रवैः
कुष्ठग्रहाभिभूताश्चसर्वकाले ह्युपद्रुताः ३
आभिचारिककृत्याद्याबहुरोगाश्चदारुणाः
नभवंतिमुनिश्रेष्ठतन्मेत्वंवक्तुमर्हसि ४
पुलस्त्यउवाच-
व्रतोपवासनियमैर्विष्णुर्वैतोषितस्तुयैः
तेनरानैवरोगार्त्ताजायंतेमुनिसत्तम ५
यैर्नकृतंव्रतंपुण्यंनदानंनतपस्तदा
नतीर्थंदेवपूजाचनान्नंदत्तंतुभूरिशः ६
तेवैलोकास्तदाज्ञेयारोगदोषैःप्रपीडिताः
आरोग्यंपरमामृद्धिंमनसायद्यदिच्छति ७

तत्तदाप्नोत्यसंदिग्धंविष्णोःसेवीविशेषतः
नाधिंप्राप्नोतिनव्याधिंनविषग्रहबंधनम् ८
कृत्यास्पर्शभयंनापितोषितेमधुसूदने
समस्तदोषनाशश्चसर्वदाचशुभाग्रहाः ९
देवानामप्यधृष्योऽसौतोषितेचजनार्दने
यःसर्वेषुचभूतेषुयथात्मनितथापरे १०
उपवासादिनातेनतोषितोमधुसूदनः
तोषितेतत्रजायंतेनराःपूर्णमनोरथाः ११
अरोगाःसुखिनोभोगभोक्तारोमुनिसत्तम
तेषांचशत्रवोनैवनचरोगाभिचारिकम् १२
ग्रहरोगादिकंचैवपापकार्यंनजायते
अव्याहतानिकृष्णस्यचक्रादीन्यायुधानिवै
रक्षंतिसकलापद्भ्योयेनविष्णुरुपासितः १३
श्रीदालभ्यउवाच-
अनाराधितगोविंदायेनरादुःखभागिनः
तेषांदुःखाभिभूतानांयत्कर्त्तव्यंदयालुभिः १४
पश्यद्भिःसर्वभूतस्थंवासुदेवंसनातनम्
समदृष्टिभिरप्यत्रतन्मेब्रूहिविशेषतः १५
श्रीपुलस्त्यउवाच-
तद्वक्ष्यामिमुनिश्रेष्ठसमाहितमनाःशृणु
रोगदोषाशुभहरंविज्वरादिविनाशनम् १६
शिखायांश्रीधरंन्यस्यशिखाधःश्रीकरंतथा
हृषीकेशंतुकेशेषुमूर्ध्निनारायणंपरम् १७
ऊर्ध्वश्रोत्रेन्यसेद्विष्णुंललाटेजलशायिनम्
विभुंवैभ्रूयुगेन्यस्यभ्रूमध्येहरिमेवच १८
नरसिंहंनासिकाग्रेकर्णयोरर्णवेशयम्
चक्षुषोःपुंडरीकाक्षंतदधोभूधरंन्यसेत् १९
कपोलयोःकल्किनाथंवामनंकर्णमूलयोः
शंखिनंशंखयोर्न्यस्यगोविंदंवदनेतथा २०
मुकुंदंदंतपंक्तौतुजिह्वायांवाक्पतिंतथा

रामंहनौतुविन्यस्यकंठेवैकुंठमेवच २१
बलघ्नंबाहुमूलाधश्चांसयोःकंसघातिनम्
अजंभुजद्वयेन्यस्यशार्ङ्गपाणिंकरद्वये २२
संकर्षणंकरांगुष्ठेगोपमंगुलिपंक्तिषु
वक्षस्यधोक्षजंन्यस्यश्रीवत्संतस्यमध्यतः २३
स्तनयोस्त्वनिरुद्धंचदामोदरमथोदरे
पद्मनाभंतथानाभौनाभ्यधश्चापिकेशवम् २४
मेढ्रेधराधरंदेवंगुदेचैवगदाग्रजम्
पीतांबरधरंकट्यामूरुयुग्मेमधोर्द्विषम् २५
मुरद्विषंपिंडकयोर्जानुयुग्मेजनार्दनम्
फणीशंगुल्फयोर्न्यस्यक्रमयोश्चत्रिविक्रमम् २६
पादांगुष्ठेश्रीपतिंचपादाधोधरणीधरम्
रोमकूपेषुसर्वेषुविष्वक्सेनंन्यसेद्बुधः २७
मत्स्यंमांसेतुविन्यस्यकूर्ममेदसिविन्यसेत्
वाराहंतुवसामध्येसर्वास्थिषुतथाच्युतम् २८
द्विजप्रियंतुमज्जायांशुक्रेश्वेतपतिंतथा
सर्वांगेयज्ञपुरुषंपरमात्मानमात्मनि २९
एवंन्यासविधिंकृत्वासाक्षान्नारायणोभवेत्
यावन्नव्याहरेत्किंचित्तावद्विष्णुमयःस्थितः ३०
गृहीत्वातुसमूलाग्रान्कुशान्शुद्धान्समाहितः
मार्जयेत्सर्वगात्राणिकुशाग्रैरिहशांतिकृत् ३१
विष्णुभक्तोविशेषेणरोगग्रहविषार्दिते
विषार्त्तानांरोगिणांचकुर्याच्छांतिमिमांशुभाम् ३२
जायतेतेनभोविप्रसर्वरोगप्रणाशनम्
ॐनमःश्रीपरमार्थायपुरुषायमहात्मने ३३
अरूपबहुरूपायव्यापिनेपरमात्मने
वाराहंनारसिंहंचवामनंचसुखप्रदम् ३४
ध्यात्वाकृत्वानमोविष्णोर्नामान्यंगेषुविन्यसेत्
निष्कल्मषायशुद्धायव्याधिपापहरायवै ३५
गोविंदपद्मनाभायवासुदेवायभूभृते

नमस्कृत्वाप्रवद्यामियत्तत्सिध्यतुमेवचः ३६
त्रिविक्रमायरामायवैकुंठायनरायच
श्रीवाराहनृसिंहायवामनायमहात्मने ३७
हयग्रीवायशुभ्रायहृषीकेशहराशुभम्
परोपतापमहितंप्रमुक्तंचाभिचारिकम् ३८
गरस्पर्शमहारोगप्रयोगंजरयाजर
नमोऽस्तुवासुदेवायनमःकृष्णायखड्गिने ३९
नमःपुष्करनेत्रायकेशवायादिचक्रिणे
नमःकिंजल्कवर्णाग्र्यपीतनिर्मलवाससे ४०
महादेववपुष्कंधधृतचक्रायचक्रिणे
दंष्ट्रोद्धृतक्षितितलत्रिमूर्तिपतयेनमः ४१
महायज्ञवराहायश्रीवल्लभनमोस्तुते
तप्तहाटककेशांतज्वलत्पावकलोचनः ४२
वज्राधिकनखस्पर्शदिव्यसिंहनमोऽस्तुते
कश्यपायातिह्स्वायऋग्यजुःसामलक्षण ४३
तुभ्यंवामनरूपायक्रमतेगांनमोनमः
वाराहाशेषदुःखानिसर्वपापफलानिच ४४
मर्दमर्दमहादंष्ट्रमर्दमर्दचतत्फलम्
नृसिंहकुलिशस्पर्शदंतप्रांतनखोज्वल ४५
भंजभंजनिनादेनदुःखान्यस्यार्त्तिनाशन
ऋग्यजुःसामभिर्वाग्भिःकामरूपधरादिधृक् ४६
प्रशमंसर्वदुःखानिनयत्वस्यजनार्दनः
एकाहिकंद्व्याहिकंचतथात्रिदिवसज्वरम् ४७
चातुर्थिकंतथात्युग्रंतथावैसततज्वरम्
दोषोत्थंसन्निपातोत्थंतथैवागंतुकज्वरम् ४८
शमंनयतुगोविंदोभित्वाछित्वास्यवेदनाम्
नेत्रदुःखंशिरोदुःखंदुःखंतूदरसंभवम् ४९
अनुच्छ्वासंमहाश्वासंपरितापंसवेपथुम्
गुदघ्राणांघ्रिरोगांश्चकुष्ठरोगंतथाक्षयम् ५०
कामलादींस्तथारोगान्प्रमेहादींश्चदारुणान्

येवातप्रभवारोगालूताविस्फोटकादयः ५१
तेसर्वेविलयंयांतुवासुदेवापमार्जिताः
विलयंयांतितेसर्वेविष्णोरुच्चारणेनवा ५२
क्षयंगच्छंतुचाशेषास्तेचक्राभिहताहरेः
अच्युतानंतगोविंदनामोच्चारणभेषजात् ५३
नश्यंतिसकलारोगाःसत्यंसत्यंवदाम्यहम्
स्थावरंजंगमंयच्चकृत्रिमंचापियद्विषम् ५४
दंतोद्भवंनखोद्भूतमाकाशप्रभवंचयत्
भूतादिप्रभवंयच्चविषमत्यंतदुःसहम् ५५
शमंनयतुतत्सर्वंकीर्तितोऽस्यजनार्दनः
ग्रहान्प्रेतग्रहांश्चैवतथान्याञ्छाकिनीग्रहान् ५६
मुखमंडलिकान्क्रूरान्रेवतींवृद्धिरेवतीम्
वृद्धिकाख्यान्ग्रहांश्चोग्रांस्तथामातृग्रहानपि ५७
बालस्यविष्णोश्चरितंहंतुबालग्रहानपि
वृद्धानांयेग्रहाःकेचिद्बालानांचापियेग्रहाः ५८
नृसिंहदर्शनादेवनश्यंतेतत्क्षणादपि
दंष्ट्राकरालवदनोनृसिंहोदैत्यभीषणः ५९
तंदृष्ट्वातेग्रहाःसर्वेदूरंयांतिविशेषतः
श्रीनृसिंहमहासिंहज्वालामालोज्ज्वलानन ६०
ग्रहानशेषान्सर्वेशनुदस्वास्यविलोचन
येरोगायेमहोत्पातायेद्विषोयेमहाग्रहाः ६१
यानिचक्रूरभूतानिग्रहपीडाश्चदारुणाः
शस्त्रक्षतेषुयेरोगाज्वालगर्दभिकादयः ६२
विस्फोटकादयोयेचग्रहागात्रेषुसंस्थिताः
त्रैलोक्यरक्षाकर्त्तस्त्वंदुष्टदानववारण ६३
सुदर्शनमहातेजश्छिंधिछिंधिमहाज्वरम्
छिंधिवातंचलूतांचछिंधिघोरंमहाविषम् ६४
उद्दंडामरशूलंचविषज्वालासगर्दभम्
ॐहांहांहूंहूंप्रधारेणकुठारेणहनद्विषः ६५
ॐनमोभगवतेसुदर्शनायदुःखदारणविग्रह

यानिचान्यानिदुष्टानिप्राणिपीडाकराणिवै ६६
तानिसर्वाणिसर्वात्मापरमात्माजनार्दनः
किंचिद्रूपंसमास्थायवासुदेवनमोस्तुते ६७
क्षिप्त्वासुदर्शनंचक्रंज्वालमालाविभीषणम्
सर्वदुष्टोपशमनंकुरुदेववराच्युत ६८
सुदर्शनमहाचक्रगोविंदस्यवरायुध
तीक्ष्णधारमहावेगसूर्यकोटिसमद्युते ६९
सुदर्शनमहाज्वालछिंधिछिंधिमहारव
सर्वदुःखानिरक्षांसिपापानिचविभीषण ७०
दुरितंहनचारोग्यंकुरुत्वंभोसुदर्शन
प्राच्यांचैवप्रतीच्यांचदक्षिणोत्तरतस्तथा ७१
रक्षांकरोतुविश्वात्मानरसिंहःस्वगर्जितैः
भूम्यांतरिक्षेचतथापृष्ठतःपार्श्वतोऽग्रतः
रक्षांकरोतुभगवान्बहुरूपीजनार्दनः ७२
यथाविष्णुमयंसर्वंसदेवासुरमानुषम्
तेनसत्येनसकलंदुःखमस्यप्रणश्यतु ७३
यथायोगेश्वरोविष्णुःसर्वदेवेषुगीयते
तेनसत्येनसकलंदुःखमस्यप्रणश्यतु ७४
परमात्मायथाविष्णुर्वेदांगेषुचगीयते
तेनसत्येनविश्वात्मासुखदोऽस्त्वस्यकेशवः ७५
शांतिरस्तुशिवंचास्तुप्रणाशंयातुचासुखम्
वासुदेवशरीरोत्थैःकुशैःसंमार्जितंमया ७६
अपामार्जितगोविंदनमोनारायणस्तथा
तथापिसर्वदुःखानांप्रशमोवचनाद्धरेः ७७
शांताःसमस्तदोषास्तेग्रहाःसर्वेविषाणिच
भूतानिचप्रशाम्यंतिसंस्मृतेमधुसूदने ७८
एतेकुशाविष्णुशरीरसंभवाजनार्दनोऽहस्वयमेवचाग्रतः
हतंमयादुःखमशेषमस्यवैस्वस्थोभवत्वेषवचोयथाहरेः ७९
शांतिरस्तुशिवंचास्तुप्रणश्यतुसुखंचयत्
यदस्यदुरितंकिंचित्क्षिप्तंतल्लवणांभसि ८०

स्वास्थ्यमस्यसदैवास्तुहृषीकेशस्यकीर्तनात्
यद्यतोऽत्रागतंपापंतत्तुतत्रप्रगच्छतु ८१
एतद्रोगेषुपीडासुजंतूनांहितमिच्छुभिः
विष्णुभक्तैश्चकर्त्तव्यमपामार्जनकंपरम् ८२
अनेनसर्वदुःखानिविलयंयांत्यशेषतः
सर्वपापविशुध्यर्थंविष्णोश्चैवापमार्जनम् ८३
आर्द्रंशुष्कंलघुस्थूलंब्रह्महत्यादिकंतुयत्
तत्सर्वंनश्यतेतूर्णंतमोवद्रविदर्शनात् ८४
नश्यंतिरोगादोषाश्चसिंहात्क्षुद्रमृगायथा
ग्रहभूतपिशाचादिश्रवणादेवनश्यतु ८५
द्रव्यार्थंलोभपरमैर्नकर्त्तव्यंकदाचन
कृतेपामार्जनेकिंचिन्नग्राह्यंहितकाम्यया ८६
निरपेक्षैःप्रकर्तव्यमादिमध्यांतबोधकैः
विष्णुभक्तैःसदाशांतैरन्यथासिद्धिदंभवेत् ८७
अतुलेयंनृणांसिद्धिरियंरक्षापरानृणाम्
भेषजंपरमंह्येतद्विष्णोर्यदपमार्जनम् ८८
उक्तंहिब्रह्मणापूर्वंपुलस्त्यायसुतायवै
एतत्पुलस्त्यमुनिदालभ्यायोतंस्वयम् ८९
सर्वभूतहितार्थायदालभ्येनप्रकाशितम्
त्रैलोक्येतदिदंविष्णोःसमाप्तंचापमार्जनम् ९०
तवाग्रेकथितंदेवियतोभक्तासिमेसदा
श्रुत्वातुसर्वंभक्त्याचरोगान्दोषान्व्यपोहति ९१

इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमापतिनारद संवादेअपामार्जनस्तोत्रंनामअष्टसप्ततितमोऽध्यायः ७८

एकोनाशीतितमोऽध्यायः-

महादेवउवाच-
अपामार्जनकंदिव्यंपरमाद्भुतमेवच
पठितव्यंविशेषेणपुत्रकामार्थसिद्धये १
एतत्स्तोत्रंपठेत्प्राज्ञःसर्वकामार्थसिद्धये

एककालंद्विकालंवायेपठंतिद्विजातयः २
आयुश्चश्रीर्बलंतस्यवर्द्धयंतिदिनेदिने
ब्राह्मणोलभतेविद्यांक्षत्रियोराज्यमेववा ३
वैश्योधनसमृद्धिंचशूद्रोभक्तिंचविंदति
अन्यैश्चलभतेभक्तिंपठनाच्छ्रवणाज्जपात् ४
सामवेदफलंतस्यजायतेनगनन्दिनि
अखिलंपापसंघातंतत्क्षणादेवनश्यति ५
इतिज्ञात्वातुभोदेविपठितव्यंसमाहितैः
पुत्राश्चैवतथालक्ष्मीःसंपूर्णाभवतिध्रुवम् ६
लिखित्वाभूर्जपत्रेतुयोधारयतिवैष्णवः
इहलोकेसुखंभुक्त्वायातिविष्णोःपरंपदम् ७
पठित्वाश्लोकमेकंतुतुलसींयःसमर्पयेत्
सर्वंतीर्थंकृतंतेनतुलस्याःपूजनेकृते ८
एतत्स्तोत्रंतुपरमंवैष्णवंमुक्तिदायकम्
पृथ्वीदानसमंपाठाद्विष्णुलोकंतुगच्छति ९
जपेत्स्तोत्रंविशेषेणविष्णुलोकस्यवांछया
बालानांजीवनार्थायपठितव्यंसमाहितैः १०
रोगग्रहाभिभूतानांबालानांशांतिकारकम्
भूतग्रहविषंचैवपठनादेवनश्यति ११
कंठेतुलसिजांमालांधृत्वाविप्रोहियःपठेत्
सचवैवैष्णवोज्ञेयोविष्णुलोकंसगच्छति १२
कंठेमालाधृतायेनशंखचक्रादिचिह्नितः
वैष्णवःप्रोच्यतेविप्रःस्तोत्रंचैतत्पठन्सदा १३
इहलोकंपरित्यज्यविष्णुलोकंसगच्छति
मोहमायापरित्यक्तोदंभतृष्णाविवर्जितः १४
एतत्स्तोत्रंपठेद्दिव्यंपरंनिर्वाणमाप्नुयात्
तेधन्याःसंतिभूर्लोकेयेविप्रावैष्णवाःस्मृताः १५
स्वात्मावैतारितस्तैस्तुसकुलंनात्रसंशयः
तेवैधन्यतमालोकेनारायणपरायणाः
तैर्भक्तिश्चसदाकार्यातिवैभागवतानराः १६

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुमापतिनारद
संवादेऽपामार्जनमहिमानामैकोनाशीतितमोऽध्यायः ७९

अशीतितमोऽध्यायः

श्रीपार्वत्युवाच-
अहोविष्णोश्चमाहात्म्यंवदविश्वेश्वरप्रभोः
यन्माहात्म्यंपुनःश्रुत्वानभवेजायतेक्वचित् १
महादेवउवाच-
शृणुसुन्दरिवक्ष्यामिविष्णोर्माहात्म्यमुत्तमम्
श्रुत्वातुलभतेपुण्यंह्यंतेमोक्षमवाप्नुयात् २
देवव्रतंमहाप्राज्ञंध्यानयोगपरायणम्
आश्रयंसर्वशास्त्राणांयतेंद्रियमकल्मषम् ३
अप्रधृष्यंमहाभागंदेवैरपिसवासवैः
सत्यसंधंजितक्रोधंसमत्वेपरिनिष्ठितम् ४
नारायणेजगन्नाथेशरण्येभक्तवत्सले
परांनिष्ठामनुप्राप्तंवाङ्मनःकायकर्मभिः ५
गुणनामाश्रयंशांतंभीष्मंकुरुपितामहम्
प्रणम्यशिरसाभूमौपप्रच्छेदंयुधिष्ठिरः ६
युधिष्ठिरउवाच-
केचिदाहुःपरंधर्मंकेचिदाहुःपरंधनम्
केचिद्दानंप्रशंसंतिसमुदायंतथापरे ७
सांख्यंकेचित्प्रशंसंतियोगमन्येतथापरम्
केचिज्ज्ञानंप्रशंसंतिकेचिदाहुःपरंश्रुतम्
सम्यक्ध्यानंपरंकेचित्केचिद्वैराग्यमुत्तमम् ८
अग्निष्टोमादिकंकर्मतथाकेचित्परंविदुः
आत्मज्ञानंपरंकेचित्समलोष्टाश्मकांचनाः ९
यमांश्चनियमांश्चैवकेचिद्वैराग्यमुत्तमम्
कारुण्यंचपरेकेचिदहिंसांचतपस्विनः १०
शौचंकेचित्परंप्राहुःकेचिद्देवार्चनंनराः
व्यामोहंचात्रगच्छंतिव्यामुग्धाःपापकर्मभिः ११

यदेतेषुपरंकृत्यमनुष्ठेयंमहात्मभिः
वक्तुमर्हसिधर्मज्ञसर्वशास्त्रभृतांवर १२
महादेवउवाच-
भूर्लोकेयाकथाजाताभैष्मीयौधिष्ठिरीसति
तामहंसंप्रवक्ष्यामिलोकानांचहितायवै
एतान्प्रश्नांस्तदाश्रुत्वाप्राहभीष्मोयुधिष्ठिरम् १३
भीष्मउवाच-
श्रूयतामिदमत्यंतंगूढंसंसारमोचनम्
श्रोतव्यंयत्त्वयासम्यग्ज्ञातव्यंधर्मनंदन १४
अत्रैवोदाहरंतीमंपुण्यंचैवपुरातनम्
पुंडरीकस्यसंवादंमहर्षेर्नारदस्यच १५
ब्राह्मणःश्रुतिसंपन्नःपुंडरीकोमहामतिः
आश्रमेप्रथमेतिष्ठन्गुरूणांवशगःसदा १६
जितेंद्रियोजितक्रोधःसंध्योपासनतत्परः
वेदवेदांगनिपुणःशास्त्रेषुचविचक्षणः १७
समिद्भिःसाधुहव्येनसायंप्रातर्हुतानलः
ध्यात्वाजगत्पतिंविष्णुंसम्यगाराधयद्विभुम् १८
तपःस्वाध्यायनिरतःसाक्षाद्ब्रह्मसुतोयथा
उदकेंधनपुष्पाद्यैरसकृत्पूजयन्गुरुम् १९
मातापित्रोश्चशुश्रूषुर्भिक्षाहारीविमत्सरः
ब्रह्मविद्यामधीयानःप्राणायामपरायणः २०
तस्यसर्वात्मभूतस्यसंसारेनिस्पृहस्यच
महात्मनोबुद्धिरासीत्संसारार्णवतारिणी २१
मातरंपितरंचैवभ्रातॄनथसुहृज्जनान्
मित्राणिमातुलांश्चैवसखीन्संबंधिबांधवान् २२
धनधान्यसमृद्धंचग्रहंवाशक्रसंनिभम्
क्षेत्राणिसुमहार्हाणिसर्वसस्योद्भवानिच २३
परित्यज्यमहासत्वस्तृणानीवमहासुखी
विचचारमहींरम्यांशाकमूलफलाशनः २४
गंगांचयमुनांचैवगोमतीमथगंडिकाम्

शतद्रुंचपयोष्णींचसरयूंचसरस्वतीम् २५
प्रयागंनर्मदांचैवशोणंचैवमहानदम्
प्रभासंविंध्यतीर्थानिहिमवत्प्रभवानिच २६
आश्रमेषुचयानिस्युर्नैमिषेपुष्करादिषु
कुरुक्षेत्रेचयानिस्युस्तथागोवर्द्धनादिषु २७
अन्यानिसुमहातेजास्तीर्थानिसुसमाहितः
विचचारमहायोगीयथाकालेयथाविधि २८
कदाचिदात्मवान्धीरःशालग्रामंतपोधनः
पुंडरीकोमहाभागःपूर्वकर्मवशानुगः २९
संसेव्यमानंमुनिभिस्तत्वविद्भिस्तपोधनैः
मुनीनामास्पदंरम्यंपुराणेष्वपिविश्रुतम् ३०
भूषितंचैवचक्राद्यैश्चक्रांकितशिलातलम्
रम्यंविविक्तविस्तीर्णंसदाविष्णुप्रसादकम् ३१
किंचचक्रांकितास्तत्रप्राणिनःपुण्यदर्शनाः
विचिरंतियथाकामंपुण्य तीर्थप्रदर्शिनः ३२
तस्मिन्क्षेत्रेमहापुण्येशालिग्रामेमहामतिः
स्नात्वादेवहृदेतीर्थेसरस्वत्यांचसुव्रतः ३३
जातिस्मर्यांचक्रकुंडेचक्रनद्याश्रितेषु च
तथान्यान्यपितीर्थानितस्मिन्नेवचचारसः ३४
ततःक्षेत्रप्रभावेनतीर्थानांचैवतेजसा
मनःप्रसादमभजत्तस्मिन्नेवमहामनाः ३५
सोऽपितीर्थविशुद्धात्मापुंडरीकस्तपोधनः
तत्रैववसतिंचक्रेध्यानयोगपरायणः ३६
तत्रैवसिद्धिमाकांक्षन्नाराध्यगरुडध्वजम्
शास्त्रोक्तेनविधानेनभक्त्यापरमयापुनः ३७
उवासचिरमेकाकीनिर्द्वंद्वःसजितेंद्रियः
शाकमूलफलाहारःसंतुष्टःसमदर्शनः ३८
यमैश्चनियमैश्चैवतथैवासनबंधनैः
प्राणायामैश्चतीर्थैश्चप्रत्याहारैश्चसंततैः ३९
धारणाभिस्तथाध्यानैःसमाधिभिरतंद्रितः

योगाभ्यासंसदासम्यक्चक्रेविगतकिल्बिषः ४०
वैदिकैश्चांगिकैश्चैवतथापौराणिकैरपि
आराधयतिसर्वेशंततःशुद्धिमवापसः ४१
रागद्वेषविनिर्मुक्तःस्वधर्मइवरूपवान्
आराधयामासदेवंतद्गतेनांतरात्मना ४२
तुतोषभगवान्विष्णुःपुंडरीकायतेक्षणः
भगवान्नारदमितिप्रसन्नोऽस्म्यस्यधीमतः ४३
ततःकदाचित्तंदेशंनारदःपरमार्थवित्
जगामसुमहातेजाःसाक्षादादित्यसन्निभः ४४
तंद्रष्टुकामोभगवान्पुंडरीकंतपोनिधिम्
विष्णुभक्तिपरीतात्मावैष्णवानांहितेरतः ४५
सदृष्ट्वानारदंप्राप्तंतेजोमंडलमंडितम्
महामतिर्महोदारःसर्ववेदैकभाजनम् ४६
प्रांजलिप्रणतोभूत्वाप्रहृष्टेनांतरात्मना
अर्घंदत्त्वाविधानेनप्रणाममकरोत्पुनः ४७
कोऽयमत्यद्भुताकारस्तेजस्वीहृद्यवेषधृक्
आतोद्यहस्तःसुमुखोजयमंडलमंडितः ४८
विवस्वानथवावह्निरिंद्रोवरुणएववा
इतिसंचिंतयन्स्थित्वाजगादपरमद्युतिम् ४९
पुंडरीकउवाच-
कोभवानिहसंप्राप्तःकुतोवापरमद्युतिः
त्वद्दर्शनंहिभगवन्प्रायेणभुविदुर्लभम् ५०
नैवदृष्टःपुमान्वापिमयातवसमःप्रभो
वक्तुमर्हस्यशेषेणयत्प्रदिष्टंमयानघ ५१
नारदउवाच-
नारदोऽहमनुप्राप्तस्त्वद्दर्शनकुतूहलात्
प्रभावंभगवद्भक्तंत्वादृशंसततंद्विज ५२
स्मृतःसंतोषितोवापिपूजितोवाद्विजोत्तमः
पुनातिभगवद्भक्तश्चांडालोऽपियदृच्छया ५३
दासोऽहवासुदेवस्यदेवदेवस्यशार्ङ्गिणः

शंखचक्रगदापाणेस्त्रैलोक्यस्यैकचक्षुषः ५४
इत्युक्तोनारदेनासौभक्तिपर्याकुलात्मना
प्रोवाचमधुरंविप्रंतद्दर्शनसुविस्मितः ५५
पुंडरीकउवाच-
धन्योऽहदेहिनांमध्येसुपूज्योऽहसुरैरपि
कृतार्थाःपितरोमेऽद्यसंप्राप्तंजन्मनःफलम् ५६
अनुगृह्णीष्वदेवर्षेत्वद्भक्तस्यविशेषतः
तंकरिष्याम्यहंविद्वन्भ्राम्यमाणःस्वकर्मभिः ५७
कर्तव्यंपरमंगुह्यंउपदेष्टुंत्वमर्हसि
त्वंगतिःसर्वभूतानांवैष्णवानांविशेषतः ५८
नारदउवाच-
अनेकानीहशास्त्राणिकर्माणिचतथाद्विज
धर्मवर्गंबहुविधंतथैवभुविमानसम् ५९
वैलक्षण्यंचजगतस्तस्मादेवद्विजोत्तम
अन्यथासर्वसत्वानांसुखंवादुःखमेवच ६०
विज्ञानमात्रंक्षणिकंनिरात्मकमिदंजगत्
इतिकैश्चित्परिज्ञातंबाह्यार्थनिरपेक्षकम् ६१
अव्यक्ताज्ञायतेनित्यंनित्यान्नित्यमिदंजगत्
इत्येवंप्राहुरपरेतत्रैवलयमेतिच ६२
आत्मनोबहवःप्रोक्तानित्याःसर्वगतास्तथा
अन्येमतिमतांश्रेष्ठास्तत्वालोकनतत्पराः ६३
यावच्छरीरमात्मानंप्रतिपन्नास्तथापरे
हस्तिकीटादिदेहेऽपिमहांतमंडमेवच ६४
यथाऽद्यजगतोवृत्तिस्तथाकालांतरेष्वपि
प्रवाहोनित्यमेवैषकःकर्त्तेतिचकेचन ६५
यद्यत्प्रत्यक्षविषयंतत्तदत्रनविद्यते
कुतःस्वर्गादयःसंतीत्यन्येविजितमानसाः ६६
निरीश्वरमिदंप्राहुःसेश्वरंचतथापरे
अत्यंतभिन्नमतयःपरमार्थपराङ्मुखाः ६७
एवंमन्येऽपिकुहकायथामतियथाश्रुतम्

वदंतिविविधैर्भेदैःस्वयुक्तिस्थितिकारकाः ६८
तर्केष्ववहितोभूत्वाकथयामितपोधन
परमार्थमिमंपुरयंघोरंसंसारनाशनम् ६९
तन्मूलमनुजानंतिततोदेवादयोनराः
प्रमाणेनोपलभ्यंतेनप्रमाणंविमोहितैः ७०
अनागतमतीतंचविप्रकृष्टमतीवयत्
नगृहीतंयथाशक्त्यावर्त्तमानार्थनिष्ठितम् ७१
आगमोमुनिभिःप्रोक्तोपूर्वरूपक्रमागतः
प्रमाणंसतुविज्ञेयःपरमार्थप्रसाधकः ७२
यदभ्यासबलाज्ज्ञानंरागद्वेषमलापहम्
उत्पद्यतेद्विजश्रेष्ठसोऽयमागमसंज्ञकः ७३
फलंकर्मचयत्तत्वंविज्ञानंदर्शनंविभुम्
जात्यादिकल्पनाहीनंद्वितीयागमलक्षणम् ७४
आत्मसंवेदनंनित्यंसनातनमतींद्रियम्
चिन्मात्रममृतंज्ञेयमनंतमजमव्ययम् ७५
व्यक्ताव्यक्तस्वरूपेणव्यक्तस्थितमनंजनम्
व्याप्ताविष्णुरितिख्यातंख्यातभिन्नमवस्थितम् ७६
योगिध्येयमविज्ञेयंपरमार्थपराङ्मुखैः
लक्ष्यतेबुद्धिभिर्भिन्नमभिभिन्नंनचात्मनि ७७
शृणुष्वावहितस्तातकथयामितवानघ
यत्प्रोक्तंब्रह्मणापूर्वंपृच्छतोममसुव्रत ७८
कदाचिद्ब्रह्मलोकस्थंब्रह्माणंचपितामहम्
प्रणिपत्ययथान्यायमपृच्छमजमव्ययम् ७९
किमुज्ञानंपरंप्रोक्तंकश्चयोगःपरोमतः
एतन्मेतत्त्वतोब्रह्मन्समाचक्ष्वपितामह ८०
ब्रह्मोवाच-
शृणुष्वावहितस्तातज्ञानयोगमनुत्तमम्
अल्पग्रंथंप्रभूतार्थमदुःखोपासनक्रियम् ८१
यःपरंपरयाप्रोक्तःपुरुषःपंचविंशकः
सएवसर्वभूतात्मातेनइत्यभिधीयते ८२

नारायणोजगद्धामपरमात्मासनातनः
जगतःसृष्टिसंहारपरिपालनतत्परः ८३
त्रयाणामात्मनांचैकोदेवदेवःसनातनः
आराध्यःसर्वदाब्रह्मन्तेपश्यंतिजगत्पतिम् ८४
यथाजगदवस्थानंयथाकालांतरेपुनः
भूतंभव्यंभविष्यंचविप्रकृष्टंतथैवच ८५
स्थूलंसूक्ष्मंतथाचान्यत्पश्यंतिज्ञानचक्षुषा
तच्चित्तास्तद्गतप्राणानारायणपरायणाः ८६
अन्यथामंदबुद्धीनांप्रतिभातिदुरात्मनाम्
कुतर्कज्ञानदुष्टानांविभक्तेंद्रियवादिनाम् ८७
नारदउवाच-
श्रूयतामन्यदपिवैकथ्यमानंमयानघ
ब्रह्मणैवपुराप्रोक्तंजगतःकारणात्मना ८८
देवानामिंद्रमुख्यानामृषीणांचैवसुव्रत
हितानिकथयामासपृच्छतांकमलासनः ८९
ब्रह्मोवाच-
नारायणपरोधर्मस्तथालोकाश्चशाश्वताः
नारायणपरायज्ञाःशास्त्राणिविविधानिच ९०
वेदाःसांगास्तथाचान्येविष्णुर्विश्वेश्वरोहरिः
पृथिव्यादीनिविबुधाःपंचभूतानिसोऽव्ययः ९१
सर्वंविष्णुमयंज्ञेयंविबुधैःसकलंजगत्
तथापिमानुषाःपापनजानंतिविमोहिताः ९२
तस्यैवमाययाव्याप्तंचराचरमिदंजगत्
तन्मनास्तद्गतप्राणोजानातिपरमार्थवित् ९३
ईश्वरःसर्वभूतानांविष्णुस्त्रैलोक्यपालकः
तस्मिन्नेतज्जगत्सर्वंतिष्ठतिप्रभवत्यपि ९४
जगत्संहरतेरुद्रःपालनेविष्णुरुच्यते
उत्पत्तौचाहमेवात्रतथान्येलोकपालकाः ९५
सर्वाधारोनिराधारःसकलोनिष्कलस्तथा
अणुर्महांस्तथाप्यन्यत्तस्माच्चपरतःपरः ९६

तमेवशरणंयातसर्वसंहारकर्मगम्
सपिताजनितास्माकंकीर्तितोमधुसूदनः ९७
एवमुक्ताःसुराःसर्वेब्रह्मणापद्मयोनिना
प्रणेमुःसर्वलोकेशंदेवंविष्णुंजनार्दनम् ९८
तस्मात्त्वमपिविप्रर्षेनारायणपरोभव
तदन्यःकोमहोदारःप्रार्थितंदातुर्महति ९९
पितरंमातरंचैवतमेवपुरुषोत्तमम्
परिगृह्णीष्वलोकेशंदेवदेवंजगत्पतिम् १००
अग्निकार्येणवैतेनतपसाध्ययनेनवै
तोषयेद्देवदेवेशंगुरुंनित्यमतंद्रितः १०१
स्वर्गेक्षयंतथाभोगमनुष्ठेयंतथैवच
परिगृह्णीष्वविप्रर्षेतमेवपुरुषोत्तमम् १०२
किंतेनमंत्रैर्बहुभिःकिंतेनबहुभिर्व्रतैः
ॐनमोनारायणायेतिमंत्रःसर्वार्थसाधकः १०३
चीरवासाजटीविप्रदंडीमुंडितएववा
विभूषितोवाविप्रेंद्रनलिगंधर्मकारणम् १०४
येनृशंसादुरात्मानःपापाचारपराःसदा
तेपियांतिपरंस्थानंनारायणपरायणाः १०५
लिप्यंतेनचपापौघैर्वैष्णवंवीतकिल्बिषाः १०६
पुनंतिसकलंलोकंअहिंसाजितमानसाः १०७
क्षत्रबंधुरितिख्यातोराजाप्राणिविहिंसकः
प्राप्तवान्परमंधामवैष्णवंकेशवालयात् १०८
अंबरीषोमहासत्वोराजापरमतत्ववित्
हृषीकेशंसमाराध्यवैष्णवंपदमाप्तवान् १०९
अन्येब्रह्मर्षयःशांताबहवःसंशितव्रताः
ध्यात्वाचपरमात्मानंसंसिद्धिंपरमांगताः ११०
प्रह्लादःपरमाह्लादःपुरानारायणंहरिम्
सेवितोऽभ्यर्चितोध्यातस्तेनैवपरिरक्षितः १११
भरतोनामतेजस्वीराजापरमधार्मिकः
उपास्यैनंचिरंकालंपरांमुक्तिमवाप्तवान् ११२

ब्रह्मचारीगृहस्थोवावानप्रस्थोऽथभिक्षुकः
केशवाराधनंहित्वानैवयांतिपरांगतिम् ११३
जन्मांतरसहस्रेषुयस्यस्यान्मतिरीदृशी
दासोऽहविष्णुभक्तानामितिसर्वार्थसाधकः ११४
सयातिविष्णुसालोक्यंपुरुषोनात्रसंशयः
किंपुनस्तद्गतप्राणाःपुरुषाःसंशितव्रताः ११५
अनन्यमानसैर्नित्यंध्यातव्यस्तत्वचिंतकैः
नारायणोजगद्व्यापीपरमात्मासनातनः ११६
भीष्मउवाच-
इत्येवमुक्त्वादेवर्षिस्तत्रैवांतरधीयत
परोपकारनिरतोनारदःपरमार्थवित् ११७
पुंडरीकोऽपिधर्मात्मानारायणपरायणः
ॐनमोनारायणायेतिमंत्रमष्टाक्षरंजपन् ११८
प्रसीदममविश्वात्मन्नितिवाचंवदन्सदा
हृत्पुंडरीकेगोविंदंप्रतिष्ठाप्यामृतात्मकम् ११९
तपस्वीविमलेसौम्येशालग्रामेतपोधनः
उवासचिरमेकाकीनिर्द्वंद्वोनिष्परिग्रहः १२०
स्वप्नेऽपिकेशवान्नान्यत्पश्यतीतिमहामतिः
निद्रापिनैवतस्यासीत्पुरुषार्थविरोधिनी १२१
तपसाब्रह्मचर्येणशौचेनचविशेषतः
जन्मजन्मांतरारूढेसंस्कारेचयथातथा १२२
प्रसादाद्देवदेवस्यसर्वलोकस्यसाक्षिणः
अवापपरमांसिद्धिंवैष्णवींवीतकिल्बिषः १२३
शंखचक्रगदापाणिंपीतवाससमच्युतम्
श्यामलंपुंडरीकाक्षंसददर्शसदाकृतिम् १२४
सिंहाव्याघ्रास्तथाचान्येमृगाःप्राणिविहिंसकाः
विरोधंसहजंहित्वासमेतास्तस्यसंनिधौ १२५
विचरंतियथाकामंप्रसन्नेंद्रियवृत्तयः
परस्परहितंरम्यंसंप्राप्तंपांडुनंदन १२६
तथाप्रसन्नंसलिलंसरसांसरितामपि

ऋतवःसुप्रन्नाश्चविमलेंद्रियसंयुताः १२७
मारुताश्चसुखस्पर्शावृक्षाःपुष्पफलान्विताः
आनुकूल्यंययुःसर्वेपदार्थास्तस्यधीमतः १२८
प्रसन्नमभवत्तस्मैप्रसन्नंसचराचरम्
प्रसन्नेदेवदेवेशेगोविंदेभक्तवत्सले १२९
ततःकदाचिद्भगवान्पुंडरीकस्यधीमतः
आविरासीज्जगन्नाथःपुंडरीकायतेक्षणः १३०
शंखचक्रगदापाणिःपीतवासाःसमुज्ज्वलः
पुंडरीकविशालाक्षश्चंद्रबिंबनिभाननः १३१
किंकिणीकुंडलीहारीकेयूरीकटिसूत्रवान्
श्रीवत्सांकःपीतवासाःकौस्तुभेनविभूषितः १३२
वनमालापरीतांगःस्फुरन्मुकुटकुंडलः
स्फुरताब्रह्मसूत्रेणमुक्तादामविलंबिना १३३
विराजमानोदेवेशश्चामरव्यजनादिभिः
देवैःसिद्धैःसदेवेंद्रैर्गंधर्वैर्मुनिभिर्वरैः १३४
यक्षैर्नागवरैश्चैवसेव्यमानोऽप्सरोगणैः
तंदृष्ट्वादेवदेवेशंपुंडरीकोऽनघःस्वयम् १३५
ततोबुद्ध्यामहात्मानंतुष्टावचजनार्दनम्
प्रांजलिप्रणतोभूत्वाप्रहृष्टेनांतरात्मना १३६
पुंडरीकउवाच-
नमोऽस्तुविष्णवेतुभ्यंसर्वलोकैकचक्षुषे
निरंजनायनित्यायनिर्गुणायमहात्मने १३७
त्वमीशःसर्वभूतानांतथैवचनिरीश्वरः
तथाभयार्तिनाशायगोविंदोगरुडध्वजः १३८
अनुग्रहेणभूतानांअनेकाकारधारिणे
त्वयिसर्वमिदंप्राहुस्त्वन्मयंचैवकेवलम् १३९
त्वमस्माज्जगतोभिन्नोनिर्मितंचजगत्त्वया
नमोस्तुनाभिप्रसवनलिनायनमोनमः १४०
नमःसमस्तवेदांतविश्रुतात्मविभूतये
त्वमेवसर्वदेवेशकारणंकैटभार्दन १४१

प्रसीदहृदयावासशंखचक्रगदाधर
नमःसमस्तभूतानामादिभूतायभूभृते १४२
अनेकरूपरूपायविष्णवेप्रभविष्णवे
यस्यब्रह्मादयोदेवानविदंतिसुरेश्वराः १४३
महिमानंतपोमेयंतस्मैतुभ्यंनमाम्यहम्
वाचामगोचरोयस्यमहिमातवनाप्यते १४४
जात्यादिभिरसंस्पृष्टःसदाध्येयोऽसितत्त्वतः
तथाविभेदरूपेणभक्तानामनुकंपया १४५
मत्स्यकूर्मादिरूपेणदृश्यसेपुरुषोत्तम
भीष्मउवाच-
पुंडरीकोजगन्नाथंसंस्तुवन्पुरुषोत्तमम् १४६
तमेवालोकयद्धीरचिरप्रार्थितदर्शनम्
तमाहभगवान्विष्णुःपद्मनाभस्त्रिविक्रमः १४७
पुंडरीकंमहाभागंतथागंभीरयागिरा १४८
श्रीभगवानुवाच-
प्रीतोऽस्मिवत्सभद्रंतेपुंडरीकमहामते
वरंवृष्णीष्वदास्यामियत्तेमनसिवर्त्तते १४९
एतच्छ्रुत्वातुवचनंदेवदेवस्यभाषितम्
एवंविज्ञापयामासपुंडरीकोमहामतिः १५०
पुंडरीकउवाच-
क्वाहमत्यंतदुर्बुद्धिःक्वभवंतोहितैषिणः
यद्धितंममदेवेशतदाज्ञापयमाधव १५१
एवमुक्तःसभगवान्सुप्रीतश्चततोऽब्रवीत्
पुंडरीकंमहाभागंकृतांजलिमुपस्थितम् १५२
आगच्छकुशलंतेऽस्तुमयैवसहसुव्रत
उपकारीचनित्यात्मामयात्वंसर्वदासह १५३
भीष्मउवाच-
एवमुक्तवतिप्रीत्याश्रीधरेभक्तवत्सले
दिविदुंदुभयोनेदुःपुष्पवर्षंपपातह १५४
ब्रह्मादयस्तथादेवाःसाधुसाध्वितिचाब्रुवन्

जगुःसिद्धाश्चगंधर्वाःकिन्नराश्चविशेषतः १५५
तत्रैवतमुपादायदेवदेवोजगत्पतिः
जगामगरुडारूढःसर्वलोकनमस्कृतः १५६
तस्मात्त्वमपिराजेंद्रविष्णुभक्तिसमन्वितः
तच्चित्तस्तद्गतप्राणस्तद्भक्तानांहितेरतः १५७
अर्चयित्वायथायोग्यंभजस्वपुरुषोत्तमम्
शृणुष्वतत्कथांपुण्यांसर्वपापप्रणाशिनीम् १५८
येनोपायेनराजेंद्रविष्णुभक्तिसमन्वितः
प्रीतोभवतिविश्वात्मातत्कुरुष्वसुविस्तरम् १५९
अश्वमेधशतैरिष्ट्वावाजपेयशतैरपि
प्राप्नुवंतिनरानैवनारायणपराङ्मुखाः १६०
सकृदुच्चरितंयेनहरिरित्यक्षरद्वयम्
बद्धःपरिकरस्तेनमोक्षायगमनंप्रति १६१
लाभस्तेषांजयस्तेषांकुतस्तेषांपराजयः
येषामिंदीवरश्यामोहृदयस्थोजनार्दनः १६२
यइदंशृणुयान्नित्यंपठेद्वापिसमाहितः
सर्वपापविनिर्मुक्तोविष्णुलोकंसगच्छति १६३
ईश्वरउवाच–
एतद्वैनाममाहात्म्यंश्रुत्वावैनगनंदिनि
धर्मार्थकाममोक्षास्तुभवंतिचनसंशयः १६४
शुक्लेकुलेऽवतीर्णोयोब्राह्मणोवेदतत्परः
वैष्णवोविष्णुरूपोऽसौनान्योविप्रस्तुकर्हिचित् १६५
मुखेनामोच्चरन्विष्णोर्हृदयेध्यानतत्परः
शंखचक्रधरोविद्वन्मालांतुलसिजांदधत् १६६
जीवन्मुक्तःसविज्ञेयोभुक्त्वाभोगांस्त्वनेकशः
एकविंशतिकुलैःसार्द्धंविष्णुलोकेसमोदते १६७
पुंडरीकोयथाशक्त्यामुक्तोह्यत्रनसंशयः
भक्तिभावेनगोविंदस्तुष्टिंप्राप्नोतिशाश्वतीम् १६८
कलौवैहरिगीतंतुस्वगृहेवाविशेषतः
सामगानसमंप्रोक्तंदेवार्चनसमाधिषु १६९

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्र्यांसंहियांउत्तरखंडे उमामहेश्वरसंवादेविष्णुमहिमानामाशीतितमोऽध्यायः ८०

एकाशीतितमोऽध्यायः

पार्वत्युवाच-
गंगायाश्चैवमाहात्म्यंपुनर्वदमहामते
यच्छ्रुत्वामुनयःसर्वेवीतरागाःपुनः पुनः १
माहात्म्यंकीदृशंचैवतस्याःसर्वेश्वरप्रभो
उत्पत्तिश्चश्रुतापूर्वंमहिमानश्रुतोमया
त्वमाद्यःसर्वभूतानांत्वंदेवश्चसनातनः २
महादेवउवाच-
बृहस्पतिसमंबुद्ध्याशक्रतुल्यपराक्रमम्
शरतल्पगतंभीष्मंऋषयोद्रष्टुमाययुः ३
अत्रिर्वसिष्ठश्चभृगुःपुलस्त्यःपुलहाक्रतुः
अंगिरागौतमोऽगस्त्यःसुमतिस्त्वापुरात्मवान् ४
विश्वामित्रःस्थूलशिराःसर्वज्ञःप्रमथाधिपः
रैभ्योबृहस्पतिर्व्यासःपावनःकश्यपोध्रुवः ५
दुर्वासाजमदग्निश्चमार्कंडेयोऽथगालवः
उशनाथभरद्वाजःक्रतुरास्तीकएवच ६
स्थूलाक्षःसर्वलोकाक्षःकण्वोमेधातिथिःकुशः
नारदःपर्वतश्चैवसुधन्वाच्यवनोद्विजः ७
मतिभूर्भुवनोधौम्यःशतानंदोकृतव्रणः
जामदग्न्योऽथरामश्चऋचीकश्चैवमादयः ८
तान्प्रणम्ययथान्यायंधर्मपुत्रःसहानुजः
पूजयामासविधिवज्जगत्पूज्यांस्तुतेजसः ९
तेपूजितामहात्मानःसुखासीनास्तपोधनाः
भीष्माश्रिताःकथाश्चक्रुर्दिव्यधर्माश्रितास्तथा १०
कथांतेतुततस्तेषांऋषीणांभावितात्मनाम्
प्रणम्यशिरसाभीष्मंपप्रच्छेदंयुधिष्ठिरः ११
युधिष्ठिरउवाच-

केदेशास्तुमहापुरायाःकेशैलाःकेऽपिचाश्रमाः
सेव्याधर्मार्थिभिर्नित्यंतन्मेब्रूहिपितामह १२
भीष्मउवाच-
अत्रैवोदाहरंतीममितिहासंनरोत्तम
शिलोंछवृत्तेःसंवादंसिद्धस्यचयुधिष्ठिर १३
कश्चित्सिद्धःपरिक्रम्यसमस्तांपृथिवीमिमाम्
उंछवृत्तेःशिबेराजन्गृहंप्राप्तोमहात्मनः १४
आत्मविद्यासुतत्वज्ञःसर्वदासजितेंद्रियः
रागद्वेषपरित्यक्तःकुशलीज्ञानकर्मसु १५
वैष्णवेषुसदाश्रेष्ठोविष्णुधर्मपरायणः
अनिंदकोवैष्णवानांसदाधर्मपरायणः १६
योगाभ्यासरतोनित्यंशंखचक्रविधारकः
त्रिकालपूजातत्वज्ञःश्रीकंठेऽनुरतःसदा १७
वेदविद्यासुविदुषोधर्माधर्मविचारकः
वेदपाठव्रतोनित्यंनित्यंचातिथिपूजकः १८
सतीर्थमतियुक्तस्तुशिलोंछेषुस्थितःसदा
चतुर्वेदेषुयद्ध्यानंगीतंयद्यत्स्वयंभुवा १९
तत्सर्वंसचजानातिद्विजोविष्णुस्वरूपधृक्
नानाधर्मार्थविशदोह्यव्ययेष्टमतिःसदा २०
एकस्मिन्नेवकालेतुगतोऽसौवैशिबेर्गृहम्
तंदृष्ट्वाविधिवच्चैवकृत्वातिथ्यंमहामनाः २१
शिबिःसंपृच्छयामासदेशानांहितकारणम् २२
उंछवृत्तिरुवाच-
केदेशाःकेजनपदाःकेशैलाःकेऽपिचाश्रमाः
पुरायाद्विजवरप्रीत्यामह्यंनिर्देष्टुमर्हसि २३
सिद्धउवाच-
तेदेशास्तेजनपदास्तेशैलास्तेऽपिचाश्रमाः
पुरायास्त्रिपथगायेषांमध्येनित्यंसरिद्वरा २४
तपसाब्रह्मचर्येणयज्ञैस्त्यागेनवापुनः
गतिंतांनलभेज्जंतुर्गंगांसंसेव्ययांलभेत् २५

स्नातानांतत्रपयसिगांगेयेनियतात्मनाम्
तुष्टिर्भवतियापुंसांनसाक्रतुशतैरपि २६
अपहृत्यतमस्तीव्रंयथाभात्युदयेरविः
तथापहृत्यपाप्मानंभातिगंगाजलाप्लुतः २७
अग्निंप्राप्ययथाविप्रतूलराशिर्विनश्यति
तथागंगावगाहश्चसर्वंपापंव्यपोहति २८
यस्तुसूर्यांशुसंतप्तंगांगेयंसलिलंपिबेत्
सगोनीहारनिर्मुक्तःपावकाद्धिविशिष्यते २९
चांद्रायणसहस्रंतुपादेनैकेनयःपुमान्
संप्लुतश्चापिगंगायांयोनरःसविशिष्यते ३०
लंबेदधःशिरायस्तुवर्षाणामयुतंनरः
मासमेकंतुगंगांभःसेवतेयोनरोत्तमः ३१
ब्रह्महत्याविनिर्मुक्तोयातिविष्णोरनामयम्
इयंवेणीसमापुण्यापवित्रापापनाशिनी ३२
यस्याःस्मरणमात्रेणबालहामुच्यतेक्षणात्
सप्रयागस्तीर्थराजोवैष्णवानांहिदुर्ल्लभः ३३
स्नात्वायत्रनरश्रेष्ठवैकुंठेसत्वरंव्रजेत्
प्रियाप्रियेनजानातिधर्माधर्मौनविंदति ३४
स्नात्वाचैवतुगंगायांमहापापात्प्रमुच्यते ३५
गंगागंगेतियोब्रूयाद्योजनानांशतैरपि
मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति ३६
ब्रह्महाचैवगोघ्नोवासुरापीबालघातकः
मुच्यतेसर्वपापेभ्योदिवंयातिचसत्वरम् ३७
दर्शनंमाधवस्याथवरस्यदर्शनंतथा
वेण्यांस्नानंप्रकुर्वाणोवैकुंठंप्रतिगच्छति ३८
उदितेचयथासूर्येविलयंयातिवैतमः
तथैवतस्यांपापानिनश्यंतिस्नानमात्रतः ३९
गंगाद्वारेकुशावर्तेगल्लिकेनीलपर्वते
स्नात्वाकनखलेतीर्थेपुनर्जन्मनविद्यते ४०
एवंज्ञात्वानरश्रेष्ठोगंगास्नायीपुनःपुनः

स्नानमात्रेणभोराजन्मुच्यतेकिल्बिषादतः ४१
देवानांप्रवरोविष्णुर्यज्ञानांचाश्वमेधकः
अश्वत्थःसर्ववृक्षाणांनदीभागीरथीसदा ४२
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
उमापतिनारदसंवादेगंगामाहात्म्यंनामैकाशीतितमोऽध्यायः ८१

द्व्यशीतितमोऽध्यायः

पार्वत्युवाच-
वैष्णवानांलक्षणंचकीदृशंप्रतिपादितम्
महिमाकीदृशश्चैववदविश्वेश्वरप्रभो १
महादेवउवाच -
विष्णोरयंयतःप्रोक्तोह्यतोवैवैष्णवोमतः
सर्वस्यादिस्तुविज्ञेयोब्रह्मारूपधरस्ततः २
यतःसकाशात्संजाताब्राह्मणावेदपारगाः
तेवैष्णवास्तुविज्ञेयानैवान्येतुकदाचन ३
शौचसत्यक्षांतियुक्तोरागद्वेषविवर्जितः
वेदविद्याविचारज्ञोयःसवैष्णवउच्यते ४
अग्निहोत्ररतोनित्यंनित्यंचातिथिपूजकः
पितृभक्तोमातृभक्तःसवैवैष्णवउच्यते ५
दयाधर्मेणसंयुक्तस्तथापापपराङ्मुखः
शंखचक्रांकितोयोवैसवैवैष्णवउच्यते ६
कंठेमालाधरोयस्तुमुखेरामंसदोच्चरेत्
गानंकुर्यात्सदाभक्त्यासनरोवैष्णवःस्मृतः ७
पुराणेषुरतानित्यंयज्ञेषुचरताःसदा
तेनरावैष्णवाज्ञेयाःसर्वधर्मेषुसंमताः ८
तेषांनिंदांप्रकुर्वंतियेनराःपापकारिणः
तेमृतास्तुकुयोनिंवैगच्छंतिचपुनःपुनः ९
गोपालनाम्नींमूर्तिंचयेऽचयंतिद्विजाःसदा
धातुमात्रमयींकृत्वाचतुर्हस्तांसुशोभिताम् १०
पूजांकुर्वंतियेविप्रास्तेज्ञेयाःपुण्यभाजिनः

कृत्वापाषाणजांमूर्तिंकृष्णाख्यांरूपसुंदरीम् ११
पूजांकुर्वंतियेविप्रास्तेज्ञेयाःपुण्यमूर्त्तयः
शालग्रामशिलायत्रयत्रद्वारवतीशिला १२
उभयोःसंगमोयत्रमुक्तिस्तत्रनसंशयः
मूर्तिंमंत्रेणसंस्थाप्यपूजनंक्रियतेयदि १३
तदर्चनंकोटिगुणंधर्मकामार्थमोक्षदम्
नवधातत्रवैभक्तिःकर्तव्याचजनार्दने
अतःपाषाणजामूर्तिस्तथाधातुमयीत्वया १४
तस्यांभक्तैःप्रकर्त्तव्यंध्यानंपूजनमेवच
राजोपचारकींपूजांमूर्तौतत्रप्रकल्पयेत् १५
सर्वात्मानंस्मरेन्नित्यंभगवंतमधोक्षजम्
दीनानाथैकशरणंलोकानांवृत्तिकारणम् १६
मूर्त्तौतत्रस्मरेन्नित्यंमहापातकनाशनम्
गोपालोऽयतथाकृष्णोरामोऽयमितिचब्रुवन् १७
पूजांकरोतियःसम्यक्सवैभागवतोनरः
गोकुलेतुयथारूपंधृतंवैकेशवेनतु १८
तादृग्रूपंप्रकर्त्तव्यंवैष्णवैर्नरसत्तमैः
आत्मसंतोषणार्थायस्वरूपंकारयेद्बुधः १९
यतोभक्तिस्तुबहुलाजायतेनात्रसंशयः
शंखचक्रगदादीनिविष्णोश्चैवायुधानिच २०
तस्यांमूर्तौविशेषेणकर्त्तव्यानिप्रमाणतः
चतुर्भुजांद्विनेत्रांचशंखचक्रगदाधराम् २१
पीतवासःपरीधानांशोभमानांगरीयसीम्
वनमालांदधानांतांलसद्वैडूर्यकुंडलाम् २२
मुकुटेमणिसंयुक्तांकौस्तुभोद्भासितांसदा
सौवर्णीचाथरौप्यांवाताम्रजांचाथपैत्तलीम् २३
कारयेत्परयाभक्त्यावैष्णवैर्द्विजसत्तमैः
आगमोक्तैर्वेदमंत्रैःप्रतिष्ठाप्यविशेषतः २४
पश्चाद्वैअर्चनंकार्यंयथाशास्त्रानुसारतः
षोडशोपचारैर्मंत्रैःपूजनंविधिपूर्वकम् २५

पूजितेतुजगन्नाथेसर्वेदेवाश्चपूजिताः
अतोयेनप्रकारेणपूजनीयोमहाप्रभुः २६
अनादिनिधनोदेवःशंखचक्रगदाधरः
सर्वंददातिसर्वेशोवैष्णवान्पुरायरूपिणः २७
यथाविष्णुस्तथाशर्वोनांतरंवर्त्ततेक्वचित्
एवंज्ञात्वातुभोदेविह्युभयोर्मूर्तिकल्पनम् २८
शिवपूजांप्रकुर्वाणोविष्णुनिंदासुतत्परः
रौरवेषुनरकेषुवसतेनात्रसंशयः २९
अहंविष्णुरहंरुद्रोह्यहंब्रह्मापितामहः
सर्वभूतेषुसततंसंवसामिपुनःपुनः ३०
पार्वत्युवाच-
केदासावैष्णवाःकेतुकेभक्ताभुविकीर्तिताः
तेषांवैलक्षणंब्रूहियथार्थंवैमहेश्वर ३१
महादेवउवाच-
शूद्राभवंतिवैदासावैष्णवानारदादयः
प्रह्लादश्चांबरीषाद्याभक्तास्तेनगनंदिनि ३२
ब्रह्मक्रियारतोनित्यंवेदवेदांगपाठकः
शंखचक्रांकितोयस्तुसवैवैष्णवउच्यते ३३
द्विजसेवारतोनित्यंनित्यंविष्णुप्रपूजकः
शृणोतिबहुधाचैवपुराणंवेदसंमितम् ३४
सशूद्रोहरिदासस्तुइत्युक्तोनगनंदिनि
पंचवर्षत्वमाश्रित्यकृताभक्तिरनेकधा ३५
सवैभक्तइतिप्रोक्तःसर्वसाधुषुसंमतः
ध्रुवादयस्तेविज्ञेयाअंबरीषादयश्चये ३६
भक्ताश्चमुनिभिःप्रोक्ताःसर्वकालेषुभामिनि
कलौधन्यतमाःशूद्राविष्णुध्यानपरायणाः ३७
इहलोकेसुखंभुक्त्वायांतिविष्णोःसनातनम्
शंखचक्रांकितोयस्तुविष्णुभक्तिप्रकारकः ३८
चतुर्विधमहोत्साहकर्त्ताचैवविशेषतः
सशूद्रोविष्णुदासस्तुयथादृष्टंयथाश्रुतम् ३९

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्र्यांसंहितायामुत्तरखंडेउमा
महेश्वरसंवादेदासवैष्णवानांमहिमानामद्व्यशीतितमोऽध्यायः ८२

त्र्यशीतितमोऽध्यायः

पार्वत्युवाच-
सर्वेषांचैवमासानांविधिंब्रूहिमहेश्वर
महोत्सवःप्रकर्त्तव्यःकोविधिस्तत्रसंमतः १
कोदेवःपूजनंकस्यमहिमाकीदृशोभवेत्
कस्यांतिथौप्रकर्त्तव्यंतन्मेवदसुरेश्वर २
मासंप्रतिकिमुक्तंचवैष्णवान्पुण्यकर्मणः
धन्याहंकृतकृत्याहंसुभगाहंधरातले
विष्णोःकथांशृणोमीतिदर्शनात्स्पर्शनात्तव ३
शिवउवाच-
उत्सवानांविधिंब्रूमोमासंप्रतितवानघे
यानाकर्ण्यपुनर्देविगीतवादित्रहर्षिता ४
तत्रादौचसितेपक्षेचैत्रमासेसुशोभने
एकादश्यांविशेषेणदोलारूढंप्रपूजयेत् ५
कुर्याद्भक्त्यासदादेविउत्सवंविधिपूर्वकम्
दोलारूढंप्रपश्यंतिकृष्णंकलिमलापहम् ६
अपराधसहस्रैस्तुमुक्तास्तेनगनंदिनि
तावत्तिष्ठंतिपापानिकोटिजन्मकृतान्यपि ७
यावन्नांदोलयेद्देवंविश्वेशंविश्वनायकम्
कलौवैयेप्रपश्यंतिदोलारूढंजनार्दनम् ८
गोघ्नादिकाःप्रमुच्यंतेकाकथाइतरेष्वपि
दोलोत्सवेप्रहृष्टास्तुरुद्रेणसहिताःसुराः ९
कुर्वंतिप्रांगणेनृत्यंगीतवाद्यंचहर्षिताः
ऋषयोगणगंधर्वारंभाद्यप्सरसांगणाः १०
वासुकिप्रमुखानागास्तथादेवाःसुरेश्वराः
दोलायांचसमायांतिविष्णुदर्शनलालसाः ११
दोलायात्रानिमित्तंतुदोलाह्वेमधुमाधवे

भूतानिसंतिभूपृष्ठेयेकेचिद्देवयोनयः १२
समायांतिमहादेविकृष्णेदोलास्थितेध्रुवम्
विष्णुंदोलास्थितंदृष्ट्वात्रैलोक्यस्योत्सवोभवेत् १३
तस्मात्कार्यशतंत्यक्त्वादोलाह्नेउत्सवंकुरु
प्रह्लादस्तुसमायातिविष्णुर्दोलाधिरोहणम् १४
कुरुतेचमहादेविवरदंतमनुस्मरन्
दोलास्थितस्यकृष्णस्ययेकुर्वंतिप्रजागरम् १५
सर्वपुगयफलप्राप्तिर्निमेषैकेनजायते
दोलायांसंस्थितंविष्णुंपश्यंतिमधुमाधवे १६
क्रीडंतिविष्णुनासार्द्धंदेवदेवेनवंदिताः
दक्षिणाभिमुखंदेवंदोलारूढंसुरेश्वरि १७
सकृद्दृष्ट्वातुगोविंदंमुच्यतेब्रह्महत्यया
ॐदोलारूढायविद्महेमाधवायचधीमहि
तन्नोदेवःप्रचोदयात् १८
इदंगायत्र्यापूजनम्
माधवायगोविंदायश्रीकंठायनमोनमः
पूजनंमंत्रपूर्वंचकर्तव्यंविधिपूर्वकम् १९
गुरवेदक्षिणांदद्याद्यथाशक्त्यासमाहितः
गायन्विष्णोःसदाभक्त्यापरिपूर्णंततोभवेत् २०
किमन्यद्बहुनोक्तेनभूयोभूयोवरानने
दोलायांसंस्थितोविष्णुःसर्वपापापहारकः २१
पूजितोयैर्नरैःसम्यक्सदासर्वंददातिच
यत्रदेवाःसगंधर्वाःकिन्नराऋषयस्तथा २२
आयांतिबहुधातत्रदोलारूढेनसंशयः २३
ॐनमोभगवतेवासुदेवायेतिमंत्रेणपूजनंतत्रकारयेत्
षोडशोपचारैःपूजाचकर्तव्याविधिपूर्वकम्
धर्मार्थमुख्यायेकामास्तेसर्वेप्राप्नुयुर्ध्रुवम् २४
अंगन्यासंकरन्यासंन्यासंशारीरकंचयत्
तत्सर्वंतुप्रकर्त्तव्यंमंत्रेणानेनसुव्रत २५
आगमोक्तेनमंत्रेणकर्त्तव्योहिमहोत्सवः

श्रीलक्ष्म्यासहितंदेवंदोलायांचप्रकल्पयेत् २६
देवाग्रेवैष्णवाःस्थाप्यानारदाद्याःसुरर्षयः
विष्वक्सेनादिकाभक्तास्थाप्यास्तेह्यग्रतःसदा २७
पंचवादित्रनिर्घोषैःकुर्यादारार्तिकंबुधः
यामेयामेतथादेविपूजनीयःप्रयत्नतः २८
नालिकेरैस्तथाशुभ्रैःकदलैर्वातथापुनः
अर्घंदद्यात्ततोदेविपूजनीयःप्रयत्नतः २९
देवदेवजगन्नाथशंखचक्रगदाधर
अर्घंगृहाणमेदेवकृपांकुरुममोपरि ३०
तच्छेषंवैष्णवानांतुदद्यात्प्राच्छादिकंपुनः
वादनंनर्त्तनंतत्रकर्त्तव्यंवैष्णवैर्नरैः ३१
आंदोलनंततःसर्वैःकर्त्तव्यंचविशेषतः
पृथिव्यांयानितीर्थानिक्षेत्राणिचसुरेश्वरि ३२
सर्वान्येतानिवैतत्रद्रष्टुमायांतितद्दिने
एवंज्ञात्वासदादेविकर्त्तव्यःसोत्सवोमहान् ३३
ब्राह्मणाःक्षत्रियावैश्याःशूद्रायाश्चान्यजातयः
शंखचक्रगदाधाराज्ञातव्यानगनंदिनि ३४

इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वर-संवादे दोलामहोत्सवोनामत्र्यशीतितमोऽध्यायः ८३

चतुरशीतितमोऽध्यायः-

महादेवउवाच-
अस्मिन्वैचैत्रमासेतुकार्योदमनकोत्सवः
द्वादश्यांतुतथासम्यग्विधिःकार्योविशेषतः १
वैष्णवैःश्रद्धयापुण्योजनतानंदवर्द्धनः
देवानंदसमुद्भूतादिव्यादमनमंजरी २
निवेद्यावैष्णवैर्भक्तैःसर्वपूजाफलेप्सुभिः
चैत्रेतुशुक्लपक्षेतुद्वादश्यांनगनंदिनि ३
कारयेत्परयाभक्त्यामहोत्सवमनास्तथा
तत्रादौचस्वयंगत्वाआरामंप्रतिचानघे ४

गुर्वाज्ञयाप्रकर्त्तव्यंपूजनंरतिनासह
कामदेवनमस्तेऽस्तुविश्वमोहनकारक ५
विष्णोरर्थेविचेष्यामिकृपांकुरुममोपरि
गीतवादित्रनिर्घोषैरानेतव्योगृहंप्रति ६
एकादश्यांसुरश्रेष्ठिह्यधिवासनपूर्वकम्
कर्त्तव्यंपूजनंतत्ररात्रौभक्त्यातुवैष्णवैः ७
कर्त्तव्यमग्रतस्तस्यसर्वतोभद्रमंडलम्
स्थापयित्वातुदेवेशंरतिनासहतत्रवै ८
स्राच्छाद्यश्वेतवस्त्रेणदमनंस्थापयेद्बुधः
तत्रवैपूजनंकार्यंवैष्णवैर्द्विजसत्तमैः ९
क्लींकामदेवायनमोह्रींरत्यैचतथानमः
एंद्र्यादिदिशिसंस्थाप्यकंदर्प्पंपूजयेद्बुधः १०
गंधंपुष्पंतथाधूपंदीपमारार्तिकंतथा
रात्रौभक्त्याप्रकर्त्तव्यंविधिनात्रसुरेश्वरि ११
मदनायनमइतिप्राच्याम्
मन्मथायनमइतिस्राग्न्येय्याम्
कंदर्पायनमइतियाम्ये
स्रनंगायनमइतिरक्षोदिशि
भस्मशरीरायनमःइतिवारुरयाम्
स्मरायनमइतिवायव्याम्
ईश्वरायनमःइतिकौबेर्याम्
पुष्पबाणायनमः
इतिईशान्याम्
चतुर्दिक्षुचसर्वासुपूजनंतत्रकारयेत्
पूजितेकेशवेचात्रसर्वेदेवाःसुपूजिताः १२
स्रक्षतगंधधूपदीपैर्नैवेद्यैस्तांबूलैश्चदमनकंपूजयित्वातु
तत्पुरुषायविद्महेकामदेवायधीमहि
तन्नोऽनगःप्रचोदयात्
इतिवैकामगायत्र्यास्रष्टोत्तरशतवारंतंदमनकंस्रभिमंत्र्यनमस्कुर्यात्
नमोस्तुपुष्पबाणायजगदाह्लादकारिणे

मन्मथायजगन्नेत्रेरतिप्रीतिकरायच १३
देवदेवनमस्तेऽस्तुश्रीविश्वेशनमोस्तुते
रतिपतेनमस्तेस्तुनमस्तेविश्वमंडन १४
नमस्तेस्तुजगन्नाथसर्वबीजनमोस्तुते
एतैर्नानाविधैर्मंत्रैरागमोक्तैर्विशेषतः १५
पूजनीयःप्रयत्नेनलक्ष्म्यासहजनार्दनः
ततोनिवेद्यतत्कर्मजागरंकारयेद्बुधः १६
देवदेवजगन्नाथवांच्छितार्थप्रदायक
हृत्स्थान्पूरयमेविष्णोकामान्कामेश्वरीप्रिय १७
इत्येतैर्बहुभिर्मंत्रैःपूजनीयःप्रयत्नतः
श्रीनिवासोजगन्नाथोभक्तानांशमभीप्सकः १८
ततोदमनकमुष्टिंगृहीत्वातत्रमूलमंत्रेण
श्रीश्रीविष्णवादिदेवेभ्योदमनकंनिवेदयेत्
ततोगंधादिभिर्महतीपूजागीतवाद्यनृत्यैश्चमहोत्सवःकार्यः
देवाग्रेस्थापितःकलशोदकंदेवस्यपादयोर्निक्षिप्यजलक्रीडातस्मिन्दिनेकर्त्तव्य
।
ततःस्वगुरुंवस्त्रालंकारद्रविणैःश्रद्धयाप्रपूजयेत्
ततःस्वयंवैष्णवैर्बंधुभिःसहअश्नीयात् १९
महादेवउवाच–
ततोदमनकमंजर्यायोवैविष्णुंप्रपूजयेत्
पूजितेवैजगन्नाथेह्यहंवैपूजितःसदा २०
ब्रह्महाहेमहारीचमद्यपोमांसभक्षकः
मुच्यतेपातकाद्देविदृष्ट्वादमनकोत्सवम् २१
एवंदमनकोदेविपूजितोयैःसुवैष्णवैः
सर्वंतीर्थंकृतं तैस्तुमंजर्यापूजनंकृतम् २२
वेदाध्ययनंकृतंतेनशास्त्राध्ययनमेवच
अग्निहोत्रंकृतंतेनमंजर्यापूजितोहरिः २३
तत्कुलंतुमहज्ज्ञेयंब्राह्मंवाचाथक्षात्रियम्
शौद्रंवैश्यंचयच्चान्यद्धन्यंधन्यतरंस्मृतम् २४
यस्मिन्कुलेऽवतीर्याथोत्सवोदमनकःकृतः

सचधन्यस्तुधन्योवैयेनविष्णुःप्रपूजितः २५
दमनकेनतुतथासंप्राप्तेमधुमाधवे
संपूज्यगोसहस्रस्यदेविसंलभतेफलम् २६
मल्लिकाकुसुमैर्देवंवसंतेगरुडध्वजम्
योऽर्चयेत्परयाभक्त्यामुक्तिभागीभवेत्तुसः २७
मरुकोदमनकश्चैवसद्यस्तुष्टिकरोहरेः
अतःपूजाप्रकर्त्तव्यावैष्णवैर्नरसत्तमैः २८
गोसहस्रंकृतंतेनकन्यादानंतथैवच
पृथ्वीदानंकृतंतेनविष्णोर्वैपूजनेकृते २९
एकामेकांगृहीत्वातुमंजरींदमनस्यतु
यःपूजयतिदेवेशंसंप्राप्तेमधुमाधवे ३०
पुगयसंख्यांनजानेवैतस्याहंनगनंदिनि
सवैचतुर्भुजोभूत्वाइहलोकेपरत्रच
धर्मानर्थांश्चकामांश्चप्रभुंक्तेवैष्णवंपदम् ३१

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
दमनकमहोत्सवोनामचतुरशीतितमोऽध्यायः ८४

पञ्चाशीतितमोऽध्यायः

महादेवउवाच-
वैशाख्यांपूर्णमास्यांवैजलस्थंजगदीश्वरम्
पूजयेद्वैष्णवोभक्त्याकृतोत्साहोमुदान्वितः १
गीतंवाद्यंतथानृत्यंकृत्वापुगयंमहोत्सवम्
एकादश्यांसुरश्रेष्ठंपश्येद्वाथप्रहर्षितः २
गीतंगायन्हरेर्भक्त्याकर्त्तव्यःसोत्सवःशुभः
शयनंकुरुदेवेशजलेऽस्मिन्वैसुरेश्वर ३
त्वयिसुप्तेजगत्सुप्तंभवत्येवनसंशयः
घनागमेप्रकुर्वंतिजलस्थवैजनार्दनम् ४
येनरास्तुसुरश्रेष्ठेनदाहोनरकेभवेत्
स्वर्णपात्रेतथारौप्येताम्रेवाचसुरेश्वरि ५
मृन्मयेवाथकर्त्तव्यंशयनंविष्णुसंज्ञकम्

तत्रतोयंचसंस्थाप्यशीतलंगंधवासितम् ६
तस्मिंस्तोयेततोविष्णोःस्थापनंकारयेद्बुधः
गोपालनाम्नीमूर्त्तिश्चरामनाम्नीतथापिवा ७
शालग्रामशिलावापिस्थापनीयाविशेषतः
प्रतिमांवामहाभागतस्यपुरायमनंतकम् ८
यावद्धराधरालोकायावच्चंद्रदिवाकरौ
तावत्तस्यकुलेकश्चिन्नभवेद्देविनारकी ९
तस्माज्ज्येष्ठेमहादेवितोयस्थंपूजयेद्धरिम्
वीततापोनरस्तिष्ठेद्यावदाभूतसंप्लवम् १०
सुशीतलेतथातोयेतुलसीदलवासितम्
शुचिशुक्रगतेकालेपूजयेद्धरणीधरम् ११
शुचिशुक्रगतेकालेयेऽर्चयिष्यंतिकेशवम्
जलस्थंविविधैःपुष्पैर्मुच्यंतेयमपीडनात् १२
जलप्रेष्ठोयतोविष्णुर्जलशायीजलप्रियः
तस्माद्ग्रीष्मेविशेषेणजलस्थंपूजयेद्धरिम् १३
नीरमध्येस्थितंकृत्वाशालग्रामसमुद्भवम्
येनार्चितोमहाभक्त्यासभवेत्कुलपावनः १४
कर्कराशिगतेसूर्येमिथुनस्थेविशेषतः
येनार्चितोहरिर्भक्त्याजलमध्येतुसुंदरि १५
द्वादश्यांतुविशेषेणजलस्थजलशायिनः
येनार्चनंकृतंतेनकोटियज्ञशतंकृतम् १६
निक्षिप्यजलपात्रेतुमासेमाधवसंज्ञके
माधवंयेऽर्चयिष्यंतिदेवास्तेतुनराभुवि १७
पात्रेगंधोदकंकृत्वायःक्षिपेद्गरुडध्वजम्
द्वादश्यांपूजयेद्रात्रौमुक्तिभागीभवेत्तुसः १८
अश्रद्दधानःपापात्मानास्तिकोऽच्छिन्नसंशयः
हेतुनिष्ठश्चपंचैतेनपूजाफलभागिनः १९
तथामहादेविप्रभुंजलस्थंजगदीश्वरम्
पूजयेद्योनरोनित्यंमहापापैःप्रमुच्यते २०
ॐह्रीह्रींरामायनमः

इतिमंत्रेणदेवेशिपूजनंतत्रवैस्मृतम्
ॐक्लींकृष्णायगोविंदायगोपीजनवल्लभायनमः
इतिमंत्रेणगिरिजेउदकंचाभिमंत्रयेत्
देवदेवमहाभागश्रीवत्सकृतलांछन २१
महादेवनमस्तेऽस्तुनमस्तेविश्वभावन
अर्घंगृहाणभोदेवमुक्तिंमेदेहिसर्वदा २२
नानाविधैःसुपुष्पैश्चपूजयेद्गरुडासनम्
सर्वबाधाविनिर्मुक्तोविष्णोःसायुज्यतामियात् २३
रात्रौजागरणंतत्रद्वादश्यांसुसमाहितः
भक्तिपूर्वंभजेद्देवंविष्णुमव्ययमक्षयम् २४
एवंवैशाखसंबंधीभक्तिभावेनतत्परैः
उत्सवोविष्णुसंज्ञस्तुकर्त्तव्योभक्तिमिच्छुभिः २५
आगमोक्तेनमंत्रेणविधिंतत्रप्रकारयेत्
कृतेसतिमहादेविकोटियज्ञसमंफलम् २६
रागद्वेषविनिर्मुक्तोमहामोहनिवर्त्तकः
इहलोकेसुखंभुक्त्वायातिविष्णोःसनातनम् २७
ब्राह्मणोभक्तिभावेनयःकरोत्युत्सवंभुवि
सर्वपापविनिर्मुक्तोवैकुंठंगच्छतेध्रुवम् २८
वेदाध्ययनहीनोऽपिशास्त्राध्ययनवर्जितः
हरिभक्तिंतुसंप्राप्यलभतेवैष्णवंपदम् २९
आत्मारामःसदामुक्तोविजितात्माभवेत्तुसः
सवैविष्णुपदंयातियावच्चंद्रदिवाकरौ ३०

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वरसंवादेशयनमहोत्सवोनामपञ्चाशीतितमोऽध्यायः ८५

षडशीतितमोऽध्यायः–

महादेवउवाच–
श्रावणेमासिसंप्राप्तेपवित्रारोपणोविधिः
यस्मिन्कृतेतुदेवेशिदिव्यभक्तिःप्रजायते १
पवित्रारोपणंविष्णोःकर्तव्यंश्रद्धयाबुधैः

संपूर्णाजायतेतस्यपूजापार्वतिवार्षिकी २
पवित्रारोपणेविष्णोर्जायतेसुखमात्मनः
संपूजितेसदाविष्णौनानासुखमवाप्नुयात् ३
सूत्रंवाससमानीयब्राह्मण्याकर्तितंतथा
स्वेनैवकर्तितंसूत्रंतेनैवचप्रकारयेत् ४
सच्छूद्र्याकर्तितंसूत्रंतद्ग्राह्यंवातथैवच
अन्यथाविक्रयेणापिग्राह्यंचापियथातथम् ५
क्षौमेनैवप्रकर्तव्यःपवित्रारोपणोविधिः
रूप्येणवातथाकार्यंपवित्रंविष्णुदैवतम् ६
सौवर्णेनापिदेवेशिकर्तव्यंविधिपूर्वकम्
अभावेसर्वधातूनांग्राह्यंसूत्रंतथाबुधैः ७
कृत्वातुत्रिवृतंसूत्रंप्रक्षाल्यमुदकेनतु
लिंगेलिंगप्रमाणंचप्रतिमायांयथाविधिः ८
पादौवैजानुपर्यंतंतथानाभिसमंस्मृतम्
ज्येष्ठंमध्यंकनिष्ठंचपवित्रंकारयेद्बुधः ९
संवत्सरदिनैस्तद्वत्तदर्द्धार्द्धेनसंख्यया
सूत्रेणैवप्रकर्त्तव्यंग्रंथिनाष्टोत्तरंशतम् १०
तदर्द्धसंख्यकेनापियुक्तंवातत्रपार्वति
लिंगेवैलिंगसंज्ञंतुगंगानागैश्चसंयुतम् ११
प्रतिमायांतथादेविपवित्रंवनमालकम्
यथाशोभातथाकार्यंयेनविष्णुःप्रसीदति १२
एकंवैसुपवित्रंतुगंधाख्यंकारयेत्सदा
तंतुनायञ्चसंयुक्तंकर्त्तव्यंवैष्णवैर्नरैः १३
देवानांचतथाप्रोक्तंपवित्रंविष्णुदैवतम्
अंबरीषाद्याभक्ताश्चअन्येऽपिचध्रुवादयः १४
पवित्राणिततःपश्चाद्दातव्यानीहपार्वति
प्रतिपद्धनदस्योक्तापवित्रारोपणेतिथिः १५
लक्ष्म्यादेव्याद्वितीयातुतिथीनामुत्तमातिथिः
तृतीयातुतवप्रोक्ताचतुर्थीगणपस्यच १६
पंचमीचंद्रमसश्चैवषष्ठीवैकार्त्तिकस्यच

सप्तमीचरवेःप्रोक्तादुर्गायाश्चाष्टमीस्मृता १७
नवमीचैवमातृणांयमस्यदशमीतथा
एकादशीतुसर्वेषांद्वादशीमाधवस्यच १८
त्रयोदशीतुकामस्यशर्वस्योक्ताचतुर्दशी
तद्वत्पंचदशीख्याताधातुर्वैह्यर्चनेपुनः १९
एतावैतिथयःप्रोक्ताःपवित्रारोपणोचिताः
कनिष्ठेद्वादशप्रोक्तामध्यमेद्विगुणास्मृताः २०
त्रिगुणाश्चोत्तमेचैवग्रंथयश्चपवित्रके
कर्पूरकेसराभ्यांवाचंदनेनहरिद्रया २१
रंजयित्वातुतत्सर्वंस्थाप्यंनवकरंडके
देवस्ययजनंयत्रस्थाप्यानिदेववत्तदा २२
आदौदेवार्चनंकृत्वावासनंसपवित्रकम्
अधिवासितेपवित्रेतुततोवैपूजनंस्मृतम् २३
पवित्रेषुचयद्देवास्तेषांनिकटमाचरेत्
ब्रह्माविष्णुस्तथारुद्रस्त्रयोवैसूत्रदेवताः २४
क्रियाचपौरुषीवीराचतुर्थीचापराजिता
जयाचविजयाचैवमुक्तिदाचसदाशिवा २५
मनोन्मनीतुनवमीदशमीसर्वतोमुखी
ग्रंथीनांदेवताश्चैवसूत्रेषुविनिवेशयेत् २६
आवाहनमुद्रयावैशास्त्रोक्तविधिनाततः
आवाह्यतत्रताःसम्यक्संनिधीकरणंस्मृतम् २७
संनिधीकरणमुद्रयासंनिधीकरणम्
रक्ष्यामुद्रयासंरक्ष्यधेनुमुद्रयाअमृतीकृत्य
आनीयदेवस्याग्रेकलशोदकंगृहीत्वा
आगमोक्तेनमंत्रेणप्रोक्षणंविधायक्लींकृष्णायइतिमंत्रेणप्रोक्षणंगंधधूपदीप
नैवेद्यादिकंदत्त्वातांबूलादिकंदत्त्वाषोडशोपचारादिनापवित्रदेवता
अभ्यर्च्यगंधपवित्रंधूपितंकृत्वादेवाभिमुखःसन्
नमस्कारमुद्रयादेवंअभिमंत्रयीत
आमंत्रितोमहादेवसार्द्धंदेव्यागणादिभिः
मंत्रैर्वालोकपालैश्चसहितःपरिवारकैः २८

आगच्छभगवन्विष्णोविधिसंपूर्णहेतवे
प्रातस्त्वत्पूजनंकुर्मःसान्निध्यंनियतंकुरु २९
तद्गंधंचपवित्रंचदेवस्यराघवस्यच
श्रीविष्णोश्चरणेतत्निक्षिप्यप्रातः
स्वक्रियांविधायपुरयाहस्वस्तिवाचनजयजयशब्दैर्घंटादिवादित्र
निर्घोषतूर्यादिशब्दैःपवित्रैःपूजांकुर्यात्
ततःप्रथमंज्येष्ठंततोमध्यमंकनिष्ठंच
एभिःसर्वैर्यथाक्रमेणपूजांकुर्यात्
ॐवासुदेवायविद्महेविष्णुदेवाधीयमहि
तन्नोदेवःप्रचोदयात्
इतिपवित्रदानंअथवास्वमंत्रैः
ततोवैमहतींपूजांविष्णोःकुर्यात्प्रसादिनीम्
ययावैकृतयादेविविष्णुरात्माप्रसीदति ३०
समंताद्दीपमालाचकत्तव्याचविधानतः
चतुर्विधंतथाचान्नं नैवेद्यंकारयेद्बुधः ३१
पवित्राणिततोदद्यात्पूजितानितुशोभने
भक्त्याचैवविशेषेणश्रीगुरुंपूजयेत्ततः ३२
वस्त्रालंकारविधिनापूजनीयोगुरुर्महान्
पूजयित्वागुरुंतत्रपवित्रंधारयेत्ततः ३३
अथयेवैष्णवाःसंतितेभ्यस्तांबूलादिकंदत्त्वापूर्णाहुतिमग्नयेदत्त्वाश्रीनिवासायश्र
ीकृष्णा
यकर्मनिवेदयेत्
मंत्रहीनंक्रियाहीनंभक्तिहीनंतुकेशव
यत्पूजितोमयासम्यक्संपूर्णंयातुमेध्रुवम् ३४
ततउद्वास्यइष्टबंधुभिस्तथावैष्णवैर्विप्रैर्वासहितःसन्मृष्टमन्नंस्वयंभुंजीत
एतत्पूजनकंदिव्यंयेशृणवंतिद्विजोत्तमाः
सर्वपापविनिर्मुक्तायांतिविष्णोःपरंपदम् ३५
यावत्तपतिवैचंद्रोयावत्तपतिवैरविः
पवित्रारोपकस्तद्वत्तप्यतेनात्रसंशयः ३६
पृथिव्यांयानिदानानिनियमाश्चतथापुनः

सर्वेवैपूर्णतांयांतिपवित्रारोपणेकृते ३७
उत्सवानांचराजायंपवित्रारोपणोविधिः
ब्रह्महाशुध्यतेतत्रनात्रकार्याविचारणा ३८
सत्यंसत्यंपुनःसत्यंयदुक्तंनगनंदिनि
पवित्रारोपणेपुरायंदर्शनेतुतथास्मृतम् ३९
शूद्रैर्वाथमहाभागेपवित्रारोपणोविधिः
कृतोयैर्भक्तिभावेनतेवैधन्यतमाःस्मृताः ४०
धन्योऽहकृतकृत्योऽहसौभाग्योधरणीतले
मयातुयाकृताभक्तिर्वैष्णवीमुक्तिदायिनी ४१
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायांउत्तरखंडेउमामहेश्वर
संवादेपवित्रारोपणंनामषडशीतितमोऽध्यायः ८६

सप्ताशीतितमोऽध्यायः-

महेश्वरउवाच-
चैत्रेतुचंपकेनैवजातीपुष्पेणवापुनः
पूजनीयःप्रयत्नेनकेशवःक्लेशनाशनः १
दमनकैर्मरुकैश्चैवबिल्वपुष्पैरथापिवा
पूजयेज्जगतामीशंविष्णुंसर्वेश्वरेश्वरम् २
शतपत्रैस्तथादिव्यैरक्तैर्वासुसमाहितः
पूजयंतिनराविष्णुंचैत्रमासेसुरेश्वरि ३
वैशाखेतुसदादेविह्यर्चनीयोमहत्प्रभुः
केतकीपत्रमादायवृषस्थेचदिवाकरे ४
येनार्चितोहरिर्भक्त्याप्रीतोमन्वंतरंशतम्
ज्येष्ठेमासेतुसंप्राप्तेनानापुष्पैःप्रपूजयेत् ५
पूजितेदेवदेवेशेसर्वेदेवाःसुपूजिताः
कृत्वापापसहस्राणिमहापापशतानिच ६
तेपियास्यंतिभोदेवियत्रविष्णुःश्रियासह
आषाढेमासिसंप्राप्तेपूजांकुर्याद्विशेषतः ७
करवीरैरक्तपुष्पैस्तथाब्जैर्वासदानराः
पूजांकुर्वंतियेविष्णोस्तेज्ञेयाःपुरायभागिनः ८

जातरूपनिभैर्विष्णुंकदंबकुसुमैस्तथा
येऽचयिष्यंतिगोविंदंनतेषांसौरिजंभयम् ९
घनागमेघनश्यामःकदंबकुसुमार्चितः
ददातिवांछितान्कामान्यावदिंद्राश्चतुर्दश १०
यथापद्मालयांप्राप्यप्रीतोभवतिमाधवः
कदंबकुसुमंलब्ध्वाप्रीतोभवतिलोककृत् ११
तुलसीकृष्णतुलसीवंजुलैर्वासुरेश्वरि
सर्वदापूजितोविष्णुःकष्टंहरतिनित्यशः १२
श्रावणेमासिसंप्राप्तेयेऽचयंतिजनार्दनम्
अतसीपुष्पमादायतथादूर्वादलेनतु १३
नानापुष्पैर्विशेषेणपूजनीयःप्रयत्नतः
ददातिविपुलान्कामान्यावदाभूतसंप्लवम् १४
भाद्रमासेतुसंप्राप्तेशृणुत्वंनगनंदिनि
चंपकैर्वाश्वेतपुष्पैरक्तसिंदूरकैस्तथा १५
कह्लारैर्वामहादेविसर्वकामफलंलभेत्
आश्विनेवैशुभेमासेकर्त्तव्यंविष्णुपूजनम् १६
यूथिकानवजातीभिस्तथानानाविधैःशुभैः
पूजनीयःप्रयत्नेनभक्तिपूर्वंसदाजनैः १७
पद्मान्येवसमानीययेऽचयंतिजनार्दनम्
धर्मार्थकाममोक्षांस्तेलभंतेमानवाभुवि १८
कार्तिकेमासिसंप्राप्तेपूजनीयोमहेश्वरः
यावंतिऋतुपुष्पाणिदेयानिमाधवस्यच १९
तिलानितिलपुष्पाणितैर्वाह्यर्चनकंचरेत्
पूजितेसतिदेवेशिअनंतफलमश्नुते २०
बकुलपुष्पैःपुन्नागैश्चंपकैर्वाजनार्दनम्
कार्तिकेपूजयिष्यंतितेदेवानहिमानवाः २१
मार्गशीर्षेप्रयत्नेनपूजनीयःसदाप्रभुः
नानापुष्पैःसनैवेद्यैर्धूपैर्नीराजनैस्तथा २२
मार्गशीर्षेविशेषेणदिव्यैः पुष्पैः प्रपूजयेत्
पौषमासेमहादेविस्वर्चनंशुभदंस्मृतम् २३

नानातुलसिपत्रैश्चमृगनाभिजलैस्तथा
माघमासेतुसंप्राप्तेनानापुष्पैःप्रपूजयेत् २४
पूजितेदेवदेवेशेवांछितंलभतेध्रुवम्
कर्पूरजातथापूजानानानैवेद्यमोदकैः २५
फाल्गुनेचैवसंप्राप्तेह्यर्चनंमाधवस्यच
कृत्वावासंतिकींपूजांपुष्पारायादायसर्वशः २६
नवीनैर्वाथदेवेशिसर्वैर्वापूजयेत्ततः
पूजितेतुजगन्नाथेवैकुंठपदमव्ययम्
प्राप्नोतिपुरुषोनित्यंश्रीविष्णोश्चप्रसादतः २७

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेउमा
महेश्वरसंवादेमासिकपुष्पोनामसप्ताशीतितमोऽध्यायः ८७

अष्टाशीतितमोऽध्यायः-

सूतउवाच-
अतःपरंकार्तिकमाहात्म्यंप्रस्तूयते
सूत उवाच-
एकदाद्वारकामागादृषिःकृष्णदिदृक्षया
पुष्पारायादायदिव्यानिकल्पवृक्षोत्थितानिच १
नारदंस्वागतेनासौकृष्णःसत्कारमाचरत्
इदमर्घ्यमिदंपाद्यमित्युवाचासनंददत् २
नारदस्तानिपुष्पाणिकृष्णायोपाजहारच
कृष्णःषोडशसाहस्रस्त्रीभ्यस्तानिव्यभज्यत ३
विस्मृत्यसत्यभामांतुसर्वाभ्यस्तान्यदात्प्रभुः
सत्यभामाततःक्रुद्धाक्रोधागारंसमाविशत् ४
समाज्ञायततःकृष्णस्तत्रगत्वासमाहितः
सत्यभामांमानयित्वागरुडंमनसास्मरन् ५
स्मृतमात्रस्तुगरुडस्तदागत्याग्रतःस्थितः
आरुह्यवेगात्पत्रंतमित्युवाचप्रियांप्रभुः ६
सत्येत्वंमाकृथाःक्रोधंत्वत्कृतेदेवतैःसह
विरुध्यदेवराजानंरोपयिष्येतवांगणे ७

कल्पद्रुमंमहाभागेऽपराधंमेक्षमांकुरु
इतिकृत्वाप्रतिज्ञांतुकृष्णः ससत्यभामया ८
देवलोकमगात्तूर्णंयत्रदेवः सवृत्रहा
याचितः कल्पवृक्षार्थमुत्तरंदत्तवान्प्रभुम् ९
नायंदेवद्रुमोभूम्यांप्राप्तुंयोग्यस्त्वयाप्रभो
तदाक्रुद्धोमहाबाहुर्वृक्षमुत्पाटयमूलतः १०
वाहमारोपयामासवेगेनबलवत्तरः
तदावज्रधरोवेगाद्वज्रमुद्यम्यवीर्यवान् ११
गरुडंताडयामासकल्पवृक्षंत्यजेरिति
तदापत्ररथः पत्रंकुलिशस्यापिगौरवात् १२
एकंविसर्जयामासत्वरयाप्रजगामच
तेनवज्रप्रहारेणत्रयोभूवपतत्रिणः १३
मयूरोनकुलश्चाषः कृष्णोद्वारावतीमगात्
आगत्यसत्यभामायागृहेचैनमरोपयत्
तदैवनारदोऽभ्यागात्सत्ययामानितोबहु १४
सत्यभामोवाच-
ईदृशः कल्पवृक्षोऽयपतिरेतादृशः प्रभुः
भवेभवेकथंप्राप्यस्तदाख्यातुभवान्मम १५
इतिपृष्टस्तदाप्राहनारदोमुनिसत्तमः
प्राप्यतेसत्यभामेऽयतुलापुरुषदानतः १६
सत्यभामातदाकृष्णंकल्पवृक्षसमन्वितम्
नारदायैवसाप्रादात्तोलयित्वाविधानतः
सर्वोपस्करमाकृष्यनारदस्त्रिदिवंययौ १७
सूतउवाच-
श्रियः पतिमथामंत्र्यगतेदेवर्षिसत्तमे
हर्षोत्फुल्लाननासत्यावासुदेवमथाब्रवीत् १८
सत्यभामोवाच-
धन्यास्मिकृतकृत्यास्मिसफलंजीवितंचमे
मज्जन्मनिनिदानेचधन्यौतौपितरौमम १९
यौमां त्रैलोकसुभगांजनयामासतुर्ध्रुवम्

षोडशस्त्रीसहस्त्राणांवल्लभाहंयतस्तव २०
यस्मान्मयादिपुरुषःकल्पवृक्षसमन्वितः
यथोक्तविधिनासम्यङ्नारदायसमर्पितः २१
यद्वार्तामपिजानंतिभूमिसंस्थानजंतवः
सोऽयकल्पद्रुमोगेहेममतिष्ठतिसांप्रतम् २२
त्रैलोक्याधिपतेश्चाहंश्रीपतेरतिवल्लभा
अतोऽहप्रष्टुमिच्छामिकिंचित्त्वांमधुसूदन २३
यदित्वंमत्प्रियकरःकथयस्वात्रविस्तरात्
श्रुत्वातच्चपुनश्चाहंकरोमिहितमात्मनः २४
यथाकल्पंत्वयादेववियुक्तास्यांनकर्हिचित्
सूतउवाच–
इतिप्रियावचःश्रुत्वास्मेरास्योऽयगदाग्रजः २५
सत्याकरेकरंकृत्वागमत्कल्पतरोस्तलम्
निषिद्ध्यानुचरंलोकंसविलासंप्रियान्वितः २६
प्रहस्यसत्यामामंत्र्यप्रोवाचजगतांपतिः
तत्प्रीतिपरितोषार्थंलसत्पुलकितांगजः २७
कृष्णउवाच–
नमेत्वत्तःप्रियतमाकाचिदन्यानितंबिनी
षोडशस्त्रीसहस्त्राणांप्रियेप्राणसमाह्यसि २८
त्वदर्थंदेवराजेनविरोधोदैवतैःसह
त्वयायत्प्रार्थितंकांतेशृणुयच्चमहद्भवेत् २९
अदेयमथवाकार्यमकथ्यमपियत्पुनः
त्वत्कृतंतुकथंप्रश्नंकथयामिनतुप्रिये
पृच्छस्वसर्वंकथयेयत्तेमनसिवर्तते ३०
सत्योवाच–
दानंव्रतंतपोवापिकिंतुपूर्वंमयाकृतम्
येनाहंमर्त्यजामर्त्यैभवानीवाऽभवंकिल ३१
तवांगार्द्धहरानित्यंगरुडोपरिगामिनी
इंद्रादिदेवतावासमगमंचत्वयासह ३२
अतस्त्वांप्रष्टुमिच्छामिकिंकृतंतुमयाशुभम्

जन्मांतरेचकिंशीलाकाचाहंकस्यकन्यका ३३
श्रीकृष्णउवाच-
शृणुष्वैकमनाःकांतेयत्त्वंवैपूर्वजन्मनि
पुण्यंव्रतंकृतवतीतत्सर्वंकथयामिते ३४
आसीत्कृतयुगस्यांतेमायापुर्यांद्विजोत्तमः
आत्रेयोदेवशर्मेतिवेदवेदांगपारगः ३५
आतिथेयोऽग्निशुश्रूषुःसौरव्रतपरायणः
सूर्यमाराधयन्नित्यंसाक्षात्सूर्य्यइवापरः ३६
तस्यातिवयसश्चासीन्नाम्नागुणवतीसुता
अपुत्रःसस्वशिष्यायचंद्रनाम्नेददौसुताम् ३७
तमेवपुत्रवन्मेनेसचतंपितृवद्वशी
तौकदाचिद्वनंयातौकुशेध्महरणार्थिनौ ३८
हिमाद्रिपादजवनेचेरतुस्तौयतस्ततः
तौततोराक्षसंघोरमायांतंसमपश्यताम् ३९
भयविह्वलसर्वांगावसमर्थौपलायितुम्
निहतौरक्षसातेनकृतांतसमरूपिणा ४०
तौतुक्षेत्रप्रभावेणधर्मशीलतयापुनः
वैकुंठभवनंनीतौमद्गणैर्मत्समीपगैः ४१
यावज्जीवंतुयत्ताभ्यांसूर्यपूजादिकंकृतम्
तेनवैकर्मणाताभ्यांसुप्रीतोऽहकिलाभवम् ४२
शैवाःसौराश्चगाणेशावैष्णवाःशक्तिपूजकाः
मामेवप्राप्नुवंतीहवर्षाभःसागरंयथा ४३
एकोऽहपंचधाजातःक्रीडयन्नामभिःकिल
देवदत्तोयथाकश्चित्पुत्राद्याह्वाननामभिः ४४
ततश्चतौमद्भवनाधिवासिनौविमानयानौरविवर्चसावुभौ
मत्तुल्यरूपौममसन्निधानगौदिव्यांगनाचंदनभोगभोगिनौ ४५

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायां
श्रीकृष्णसत्यभामासंवादेअष्टाशीतितमोऽध्यायः ८८

एकोननवतितमोऽध्यायः

श्रीकृष्णउवाच-
ततोगुणवतीश्रुत्वारत्तसानिहतावुभौ
पितृभर्तजदुःखार्त्ताकरुणंपर्यदेवयत् १
गुणवत्युवाच-
हानाथहापितस्त्यक्त्वागच्छतंक्वमयाविना
बालाहंकिंकरोम्यद्यह्यनाथाभवताविना २
कोनुमामास्थितांगेहेभोजनाच्छादनादिभिः
अकिंचित्कुशलांस्नेहात्पालयिष्यतिदुःखिताम् ३
हतभाग्यागतसुखाहतेशाहतजीविता
शरणंकंव्रजाम्यद्यत्वन्नाथाबतबालिशा ४
श्रीकृष्णउवाच-
एवंबहुविलप्याथकुररीवभृशातुरा
पपातभूमौविकलारंभावातहतायथा ५
चिरादाश्वस्यसाभूमौविलप्यकरुणंबहु
निमग्नादुःखजलधौशोकार्त्तासमवर्त्तत ६
साग्रहोपस्करान्सर्वान्विक्रीयशुभकर्मकृत्
तयोश्चक्रेयथाशक्तिपारलौकिकसत्क्रियाम् ७
तस्मिन्नेवपुरेवासंचक्रेप्रभृतिजीवितम्
विष्णुभक्तिपराशांतासत्यशौचाजितेंद्रिया ८
व्रतद्वयंतयासम्यगाजन्ममरणात्कृतम्
एकादशीव्रतंसम्यक्सेवनंकार्त्तिकस्यच ९
एतद्व्रतद्वयंकांतेममातीवप्रियंकरम्
भुक्तिमुक्तिकरंसम्यक्पुत्रसंपत्तिकारकम् १०
कार्तिकेमासियेनित्यंतुलासंस्थेदिवाकरे
प्रातःस्नास्यंतितेमुक्तामहापातकिनोऽपिच ११
संमार्जनंगृहेविष्णोःस्वस्तिकादिनिवेदनम्
विष्णुपूजांप्रकुर्वंतिजीवन्मुक्ताश्चतेनराः १२
स्नानंजागरणंदीपंतुलसीवनसेवनम्
कार्त्तिकेयेप्रकुर्वंतितेनराविष्णुमूर्त्तयः १३

इत्थंदिनत्रयमपिकार्तिकेयेप्रकुर्वते
देवानामपितेवंद्याःकिंयैराजन्मतःकृतम् १४
इत्थंगुणवतीसम्यक्प्रत्यब्दंप्रतिनीयते
नित्यंविष्णोःपरिकरेभक्तातत्परमानसा १५
कदाचिज्ज्वरसासाथकृशांगीज्वरपीडिता
स्नातुंगंगांगताकांतेकथंचिच्छनकैस्तथा १६
यावज्जलांतरगताकंपिताशीतपीडिता
तावत्साविह्वलापश्यद्विमानंप्राप्तमंबरात् १७
शंखचक्रगदापद्महस्तैरासन्नमंबरात्
विष्णुरूपधरैःसम्यग्वैनतेयध्वजांकितैः १८
आरोहयन्विमानंतमप्सरोगणसेवितम्
चामरैर्वीज्यमानांतांवैकुंठमनयन्गणाः १९
अथसातद्विमानस्थाज्वलदग्निशिखोपमा
कार्त्तिकव्रतपुण्येनमत्सान्निध्यगताभवत् २०
अथब्रह्मादिदेवानांयथाप्रार्थनयाभुवम्
आगच्छतागणाःसर्वेयातास्तेऽपिमयासह २१
एतेपियादवाःसर्वेमद्गणाएवभामिनि
पितातेदेवशर्माभूत्सत्राजिदधिपोह्ययम् २२
यश्चंद्रशर्मासोऽक्रूरस्त्वंसागुणवतीशुभे
कार्त्तिकव्रतपुण्येनबहुमत्प्रीतिवर्द्धनी २३
ममद्वारेत्वयापूर्वंतुलसीवाटिकाकृता
तस्मादयंकल्पवृक्षस्तवांगणतःशुभे २४
कार्तिकेदीपमानंचयत्त्वयातुकृतंपुरा
त्वद्देहगेहसंस्थेयंतस्माल्लक्ष्मीस्थिराभवत् २५
यच्चव्रतादिकंसर्वंविष्णवेभर्तृरूपिणे
निवेदितवतीतस्मान्ममभार्यात्वमागता २६
आजन्ममरणात्पूर्वंकार्त्तिकेयद्व्रतंकृतम्
कदाचिदपितेनैवमद्वियोगंनपश्यसि २७
एवंयेकार्त्तिकेमासिनराव्रतपरायणाः
मत्सान्निध्यंगतास्तेऽपिप्रीतिदात्वंयथामम २८

यज्ञदानव्रततपःकारिणोमानवाःखलु
कार्त्तिकव्रतपुरयस्यनाप्नुवंतिकलामपि २६
इत्थंनिशम्यभुवनाधिपतेस्तदानींप्राक्पुरयजन्मभववैभवजातहर्षा
विश्वेश्वरंत्रिभुवनैकनिदानभूतंकृष्णंप्रणम्यवचनंनिजगादसत्या ३०
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायांकार्त्तिकमाहात्म्येश्रीकृष्ण
सत्यभामासंवादेसत्यापूर्वजन्मवर्णनंनामैकोननवतितमोऽध्यायः ८६

नवतितमोऽध्यायः

सत्योवाच–
सर्वेऽपिकालावयवास्तवकालस्वरूपिणः
समानास्तुकथंनाथमासानांकार्तिकोवरः १
एकादशीतिथीनांचमासानांकार्त्तिकःप्रियः
कथंतेदेवदेवेशकारणंकिंचकथ्यताम् २
श्रीकृष्णउवाच–
साधुपृष्टंत्वयासत्येशृणुष्वैकाग्रमानसा
पृथोर्वैन्यस्यसंवादंदेवर्षेर्नारदस्यच ३
एवमेवपुरापृष्टोनारदःपृथुनाप्रिये
उवाचकार्त्तिकाधिक्येकारणंसर्वविन्मुनिः ४
नारदउवाच–
शंखनामाभवत्पूर्वमसुरःसागरात्मजः
त्रिलोकीमथनेशक्तोमहाबलपराक्रमः ५
जित्वादेवान्निराकृत्यस्वर्गलोकान्महासुरः
इंद्रादिलोकपालानामधिकारांस्तथाहरत् ६
तद्भयादथतेदेवाःसुवर्णाद्रिगुहांगताः
न्यवसन्बहुवर्षाणिसावरोधाःसवासवाः ७
सुवर्णाद्रिगुहादुर्गसंस्थितास्त्रिदशायदा
तद्वश्यानबभूवुस्तेतदादैत्योव्यचारयत् ८
हृताधिकारास्त्रिदशामयायद्यपिनिर्जिताः
भवंतिबलयुक्तास्तेकरणीयंममात्रकिम् ९
अद्यज्ञातंमयादेवावेदमंत्रबलान्विताः

तान्हरिष्येततः सर्वेबलहीनाभवंतिहि १०
इतिमत्वाततोदैत्योविष्णुमालक्ष्यनिद्रितम्
सत्यलोकाज्जहाराशुवेदानांचगणंप्रभुः ११
नीतास्तुतेनतेवेदास्तद्भयात्तेनिराक्रमन्
तोयेनिविविशुस्तेऽत्रयज्ञमंत्रसमन्विताः १२
तान्मार्गमाणः शंखोऽपिसमुद्रांतर्गतोभ्रमन्
नददर्शततोदैत्यःक्वचिदेकत्रसंस्थितान् १३
अथब्रह्मासुरैःसार्द्धंविष्णुंशरणमन्वयात्
पूजोपकरणंगृह्यवैकुंठभवनंगतः १४
तत्रतस्यप्रबोधायगीतवाद्यादिकाःक्रियाः
चक्रुर्देवागंधपुष्पधूपदीपान्मुहुर्मुहुः १५
अथप्रबुद्धोभगवांस्तद्भक्तिपरितोषितः
ददृशेतैःसुरैस्तत्रसहस्रार्कसमद्युतिः १६
उपचारैःषोडशभिःसंपूज्यत्रिदशास्तदा
दंडवत्पतिताभूमौतानुवाचाथकेशवः १७
विष्णुरुवाच-
वरदोऽहसुरगणागीतवाद्यादिमंगलैः
मनोऽभिलषितान्कामान्सर्वानिवददामिवः १८
इषस्यशुक्लैकादश्यायावदुद्बोधिनीभवेत्
निशातुर्यांशशेषेणगीतवाद्यादिमंगलैः १९
कुर्वंतिमनुजानित्यंभवद्भिर्यद्यथाकृतम्
तेमत्प्रियकरानित्यंमत्सांनिध्यंव्रजंतिहि २०
पाद्यार्घाचमनीयाद्यैर्भवद्भिर्यद्यथाकृतम्
तदद्भुतगुणंयस्माज्जातंवःसुखकारणम् २१
वेदाःशंखहृताःसर्वेतिष्ठंत्युदकसंस्थिताः
तानानयाम्यहंदेवाहत्वासागरनंदनम् २२
अद्यप्रभृतिवेदास्तुमंत्रबीजमखान्विताः
प्रत्यब्दंकार्तिकेमासिविश्रमंत्वप्सुसर्वदा २३
अद्यप्रभृत्यहमपिभवामिजलमध्यगः
भवंतोऽपिमयासार्द्धमायांतुसमुनीश्वराः २४

कालेऽस्मिन्नेवकुर्वंतिप्रातःस्नानंद्विजोत्तमाः
तेसर्वयज्ञावभृथैः सुस्नाताःस्युर्नसंशयः २५
येकार्तिकेव्रतंसम्यङ्नित्यंकुर्वंतिमानवाः
तेदेहांतेत्वयाशक्रप्राप्यामद्भवनंसदा २६
विघ्नेभ्योरक्षणंतेषांययाकार्यंममाज्ञया
देयात्वयाचवरुणपुत्रपौत्रादिसंततिः २७
धनवृद्धिर्धनाध्यक्षत्वयाकार्याममाज्ञया
ममरूपधराःसाक्षाज्जीवन्मुक्ताश्चतेनराः २८
आजन्ममरणाद्यैश्चकृतमेतद्व्रतोत्तमम्
यथोक्तविधिनासम्यक्तेमान्याभवतामपि २९
एकादश्यांयतश्चाहंभवद्भिःप्रतिबोधितः
अतश्चैषातिथिर्मान्यासदैवप्रीतिदामम ३०
व्रतद्वयंसम्यगिदंनरैःकृतंकृष्णस्यसान्निध्यदमस्तिनान्यत्
दानानितीर्थानितपांसियज्ञाःस्वर्लोकदानेनसदासुरोत्तमाः ३१
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायांकार्तिकमाहात्म्ये
श्रीकृष्णसत्यभामासंवादेशंखासुरवधउद्यमोनामनवतितमोऽध्यायः ९०

एकनवतितमोऽध्यायः

नारदउवाच–
इत्युक्त्वाभगवान्विष्णुःशफरीतुल्यरूपधृक्
सपपातांजलौविंध्येनिवासेकश्यपस्यच १
सतंकमंडलौक्षिप्रंकृपयाक्षिप्तवान्मुनिः
तावत्सनममौतत्रततःकूपेन्यवेशयत् २
तत्रापिनममौतावत्कासारेप्राक्षिपत्सताम्
एवंससागरेक्षिप्तस्तत्रसोऽप्यन्ववर्द्धत ३
ततोऽवधीत्सतंशंखंविष्णुर्वैमत्स्यरूपधृक्
अथतंस्वकरेधृत्वाबदरीवनमागतः ४
तत्राहूयऋषीन्सर्वानिदमाज्ञापयद्विभुः
श्रीकृष्णउवाच–
जलांतरेविशीर्णांस्तुयूयंवेदान्प्रमार्जथ ५

आनयध्वंचत्वरिताःसरहस्यंजलांतरात्
तावत्प्रयागेतिष्ठामिदेवतागणसंयुतः ६
नारदउवाच-
ततस्तैःसर्वमुनिभिस्तपोबलसमन्वितैः
उद्धारिताःषडंगास्तेवेदायज्ञसमन्विताः ७
तेषुयावन्मितंयेनलब्धंतावन्मितस्यहि
ससएवऋषिर्जातस्तदाप्रभृतिपार्थिव ८
अथसर्वेऽपिसंगम्यप्रयागंमुनयोययुः
विष्णवेसविधात्रेतेलब्धान्वेदान्यवेदयन् ९
लब्ध्वावेदान्सयज्ञांस्तुब्रह्माहर्षसमन्वितः
अयजच्चाश्वमेधेनदेवर्षिगणसंवृतः १०
यज्ञातेदेवदेवेशसिद्धपन्नगगुह्यकाः
निपत्यदंडवद्भूमौविज्ञप्तिंतत्रचक्रिरे ११
देवाऊचुः
देवदेवजगन्नाथविज्ञप्तिंशृणुनःप्रभो
हर्षकालोऽयमस्माकंतस्मात्त्वंवरदोभव १२
स्थानेऽस्मिन्नृषयोवेदान्नष्टान्प्रापुःपुनःस्वयम्
यज्ञभागान्वयंप्राप्तास्त्वत्प्रसादाद्रमापते १३
स्थानमेतदपिश्रेष्ठंपृथिव्यांपुण्यवर्द्धनम्
भुक्तिमुक्तिप्रदंचास्तुप्रसादाद्भवतःसदा १४
कालोऽप्ययंमहापुण्योब्रह्मघ्नादिविशुद्धिकृत्
दत्ताक्षयकरश्चास्तुबरमेतद्वदस्वनः १५
श्रीविष्णुरुवाच
ममाप्येतन्मतंदेवायद्भवद्भिरुदाहृतम्
तत्तथास्तुलभत्वेतद्ब्रह्मक्षेत्रमितिप्रथाम् १६
सूर्यवंशोद्भवोराजागंगामत्रानयिष्यति
सासूर्यकन्ययाचात्रकालिंद्यासंगमिष्यति १७
यूयंचसर्वेब्रह्माद्यानिवसध्वंमयासह
तीर्थराजेऽतिविख्यातंतीर्थमेतद्भविष्यति १८
दानंतपोव्रतंहोमोजपपूजादिकाःक्रियाः

अनंतफलदाःसंतुमत्सांनिध्यप्रदाःसदा १९
ब्रह्महत्यादिपापानिबहुजन्मकृतान्यपि
दर्शनादस्यतीर्थस्यविनाशंयांतुतत्क्षणात् २०
देहत्यागंतथाधीराःकुर्वंतिममसन्निधौ
मत्तनुंप्रविशंत्येवपुनर्जन्मनिनोनराः २१
पितॄन्निर्दिश्ययेश्राद्धंकुर्वंत्यत्रसमागताः
तेषांपितृगणाःसर्वेयांतुतेमत्सलोकताम् २२
कालोऽप्येषमहापुण्यफलदोऽस्तुसदानृणाम्
सूर्य्येमकरगेप्रातःस्नायिनांपापनाशनम् २३
मकरस्थरवौमाघेप्रातःस्नानंप्रकुर्वताम्
दर्शनादेवपापानियांतिसूर्याद्यथातमः २४
सलोकत्वंसरूपत्वंसमीपत्वंत्रयंक्रमात्
नृणांददाम्यहंस्नानान्माघेमकरगेरवौ २५
यूयंमुनीश्वराःसर्वेशृणुध्वंवरदोऽस्मिवः
बदरीवनमध्येऽहसदातिष्ठामिसर्वगः २६
अन्यत्रदशभिर्वर्षैस्तपसावाप्यतेफलम्
तदत्रदिवसैकेनभवद्भिःप्राप्यतेसदा २७
स्थानस्यदर्शनंतस्ययेकुर्वंतिनरोत्तमाः
जीवन्मुक्तास्तदातेषुपापं नैवावतिष्ठते २८
सूतउवाच-
एवंदेवान्देवदेवस्तदुक्त्वातत्रैवांतर्द्धानमागात्सवेधाः
देवाःसर्वेऽप्यशकैस्तत्रतस्थुश्चांतर्द्धानंप्रापुरिंद्रादयस्ते २९
इमांचगाथांशृणुयान्नरोत्तमोयःश्रावयेद्वापिविशुद्धचित्तः
सतीर्थराजंबदरीवनंयत्कृत्वाफलंमांसमवाप्नुयाच्च ३०

इतिश्रीपाद्मेमहापुराणेउत्तरखंडेपंचपंचाशत्सहस्रसंहितायांकार्तिकमाहात्म्ये श्रीकृष्णसत्यभामासंवादेशंखासुरवधोवेदागमेप्रयागमाहात्म्यंनामैकनवति-
तमोऽध्यायः ९१

द्विनवतितमोऽध्यायः

पृथुरुवाच-

महाफलंत्वयाप्रोक्तंमुनेकार्त्तिकमाघयोः
तयोःस्नानविधिंसम्यङ्नियमानपिनारद
उद्यापनविधिंचैवंयथावद्वक्तुमर्हसि १
नारदउवाच-
त्वंविष्णोरंशसंजातोनाज्ञातंविद्यतेतव
तथापिवदतःसम्यङ्माहात्म्यंशृणुवेनज २
आश्विनस्यतुमासस्ययाशुक्लैकादशीभवेत्
कार्तिकव्रतनियमंतस्यांकुर्यादतंद्रितः ३
रात्र्यांतुर्यांशशेषायांमुदोतिष्ठत्सदाव्रती
नैर्ऋत्यांसंव्रजेद्वासाद्बहिःसोदकभाजनः ४
दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः
अंतर्धायतृणंभूमौशिरःप्रावृत्यवाससा ५
वक्त्रंनियम्ययत्नेनष्ठीवनश्वासवर्जितः
कुर्यान्मूत्रपुरीषेचरात्रौचेद्दक्षिणामुखः ६
गृहीतशिश्नश्चोत्थायगृहीत्वाशुचिमृत्तिकाम्
गंधलेपक्षयकरंशौचंकुर्यादतंद्रितः ७
एकालिंगेगुदेपंचतथावामकरेदश
उभयोःसप्तदातव्यास्तथातिस्रस्तुपादयोः ८
एतद्दिवत्रिगुणंप्रोक्तंब्रह्मचारिवनस्थयोः
यतेश्चतुर्गुणंरात्रौतदर्द्धंशौचमाचरेत् ९
तदर्द्धमपिमार्गस्थःस्त्रीशूद्राणांतदर्द्धकम्
शौचकर्मविहीनस्यसकलानिष्फलाःक्रियाः १०
मुखशुद्धिविहीनस्यनोमंत्राःफलदाःस्मृताः
दंतजिह्वाविशुद्धिंचततःकुर्यात्प्रयत्नतः ११
आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच
ब्रह्मप्रज्ञांचमेधांचत्वन्नोदेहिवनस्पते १२
इतिमंत्रंसमुच्चार्यद्वादशांगुलकंसदा
समिधाक्षीरवृक्षास्यक्षयाहोपोषणंविना १३
प्रतिपद्दर्शनवमीषष्ठीश्चार्कदिनंविना
चंद्रसूर्योपरागेचनकुर्याद्दंतधावनम् १४

कंटकीवृक्षकार्पासनिर्गुंडीब्रह्मवृक्षजम्
बिल्वैरंडविगंधाढ्यंवर्जयेद्दंतधावनम् १५
ततोविष्णोःशिवस्यापिगृहंगच्छेत्प्रसन्नधीः
गंधपुष्पसुतांबूलान्गृहीत्वाभक्तितत्परः १६
तत्रदेवस्यपाद्यार्घाद्युपचारान्पृथक्पृथक्
कृत्वास्तुत्वापुनर्नत्वाकुर्याद्गीतादिमंगलम् १७
तालवेणुमृदंगादिध्वनियुक्तान्सनृत्तकान्
पुष्पैर्गंधैःसतांबूलैर्गायनानपिचार्चयेत् १८
देवालयेगानपरायतस्तेविष्णुमूर्त्तयः
तपांसियज्ञदानानिकृतानिचजगद्गुरोः १९
तुष्टिदानिकलौनित्यंभक्त्यादेवस्यसत्पतेः
क्वत्वंवससिदेवेशमयापृष्टस्तुपार्थिव २०
विष्णुरेवंतदाप्राहमद्भक्तिपरितोषितः
नाहंवसामिवैकुंठेयोगिनांहृदयेनच २१
मद्भक्तायत्रगायंतितत्रतिष्ठामिनारद
सत्पुराणकथांश्रुत्वामद्भक्तानांचगायनम् २२
नेच्छंतियेनरामूढामद्द्वेष्यास्तेभवंतिहि
तेषांपूजादिकंगंधपुष्पादिक्रियतेनरैः२३
तेनप्रीतिंतथायामिनतथामत्प्रपूजनात्
शिरीषोन्मत्तगिरिजामल्लिकाशाल्मलीभवैः २४
अर्कजैःकर्णिकारैश्चविष्णुर्नार्च्यस्तथाक्षतैः
जपाकुंदशिरीषैश्चयूथिकामालतीभवैः २५
केतकीभवपुष्पैश्चनैवार्च्यःशंकरस्तथा
गणेशंतुलसीपत्रैर्दुर्गांनैवचदूर्वया २६
मुनिपुष्पैस्तथासूर्यंलक्ष्मीकामोनचार्चयेत्
सुगंधीनिप्रशस्तानिपूजायांसर्वदैवतु २७
एवंपूजाविधिंकृत्वादेवदेवंक्षमापयेत्
मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर २८
यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे
ततःप्रदक्षिणंकृत्वादंडवत्प्रणिपत्यच २९

पुनः क्षमापयेद्देवंगायनाद्यंक्षमापयेत्
विष्णोःशिवस्यापिचपूजनादिकंकुर्वंतिसम्यङ्निशिकार्तिकेये
निर्धूतपापाःसहपूर्वजैस्तेप्रयांतिविष्णोर्भवनंमनुष्याः ३०
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्तिकमाहात्म्ये
श्रीकृष्णसत्यभामासंवादेनियमवर्णनंनामद्विनवतितमोऽध्यायः ९२

त्रिनवतितमोऽध्यायः

नारदउवाच-
नाडीद्वयावशिष्टायांरात्रौगच्छेज्जलाशयम्
तिलगंधाक्षतैःपुष्पैर्दीपाद्यैःसहितःशुचिः १
मानुषेदेवखातेचनद्यांनद्योश्चसंगमे
क्रमाद्दशगुणंस्नानंतीर्थेऽनतफलंस्मृतम् २
विष्णुंस्मृत्वाततःकुर्यात्संकल्पंसवनस्यतु
तीर्थादिदेवतादिभ्यःक्रमादर्घादिदापयेत् ३
ॐनमःकमलनाभायनमस्तेजलशायिने
नमस्तेऽस्तुहृषीकेशगृहाणार्घंनमोऽस्तुते ४
वैकुंठेचप्रयागेचतथाबदरिकाश्रमे
यतोविष्णुर्विचक्रमेत्रेधासनिदधेपदम् ५
अतोदेवामामवंतुयतोविष्णुर्विचक्रमे
तैरेवसहितैःसर्वैर्मुनिदेवसमन्वितैः ६
कार्तिकेऽहकरिष्यामिप्रातःस्नानंसुरोत्तम
प्रीत्यर्थंदेवदेवेशदामोदरमयासह ७
ध्यात्वाहंत्वांचदेवेशजलेऽस्मिन्स्नातुमुद्यतः
तवप्रसादात्पापंमेदामोदरविनश्यतु ८
नित्यनैमित्तिकेकृष्णेकार्तिकेपापनाशने
गृहाणार्घ्यंमयादत्तंराधयासहितोहरे ९
व्रतिनाकार्तिकेमासिस्नातस्यविधिवन्मम
गृहाणार्घ्यंमयादत्तंराधयासहितोहरे १०
स्मृत्वाभागीरथींविष्णुंशिवंसूर्यंजलेविशेत्
नाभिमात्रेजलेतिष्ठन्व्रतीस्नायाद्यथाविधि ११

तिलामलकचूर्णेनगृहीस्नानंसमाचरेत्
वनस्थानांयतीनांचतुलसीमूलमृत्तिका १२
सप्तमीदर्शनवमीद्वितीयादशमीषुच
त्रयोदश्यांचनस्नायाद्धात्रीफलतिलैःसह १३
आदौकुर्यान्मलस्नानंमंत्रस्नानंततःपरम्
स्त्रीशूद्राणांनवेदोक्तैर्मंत्रैस्तेषांपुराणजैः १४
स्नानमन्त्राः
त्रिधाभूद्देवकार्याययःपुराभक्तिभावतः
सविष्णुःसर्वपापघ्नःपुनातुकृपयात्रमाम् १५
विष्णोराज्ञामनुप्राप्यकार्तिकव्रतकारणात्
रक्षंतुदेवास्तेसर्वेमांपुनंतुसदैवते १६
वेदमंत्राःसबीजास्तुसरहस्याःसवीर्यकाः
कश्यपाद्याश्चमुनयोमांपुनंतुसदैवते १७
गंगाद्याःसरितःसर्वास्तीर्थानिजलदानदाः
ससप्तसागराःसर्वेमांपुनंतुजलाशयाः १८
पतिव्रतास्त्वदित्याद्यायक्षाःसिद्धाःसपन्नगाः
ओषध्यःपर्वताश्चाशुमांपुनंतुत्रिलोकजाः १९
एभिःस्नात्वाव्रतीमंत्रैर्हस्तन्यस्तपवित्रकः
देवर्षीन्मानवपितृंस्तर्पयेच्चयथाविधि २०
यावंतःकार्तिकेमासिवर्ततेपितृतर्पणे
तिलास्तत्संख्यकाब्दानिपितरःस्वर्गवासिनः २१
ततोजलाद्विनिष्क्रम्यशुचिवस्त्रावृतोव्रती
प्रातःकालोदितंकर्मसमाप्यार्चेद्धरिंपुनः २२
तीर्थादिदेवान्संस्मृत्यपुनरर्चांप्रदापयेत्
गंधपुष्पफलैर्युक्तोभक्तितत्परमानसः २३
अर्घमंत्रः
व्रतिनःकार्तिकेमासिस्नातस्यविधिवन्मम
गृहाणार्घ्यंमयादत्तंदनुजेंद्रनिषूदन २४
ततश्चब्राह्मणान्भक्त्याभोजयेद्वेदपारगान्
गंधपुष्पैःसतांबूलैःप्रणमेच्चपुनःपुनः २५

तीर्थानिदक्षिणेपादेवेदाश्चमुखमाश्रिताः
सर्वांगेसंस्थितादेवाःपूजिताःस्युर्द्विजार्चनात् २६
अव्यक्तरूपिणोविष्णोःस्वरूपंब्राह्मणाभुवि
नावमान्यानोविरोध्याःकदाचिच्छुभमिच्छता २७
तांवैहरिप्रियांदेवितुलसीमर्चयेद्व्रती
प्रदक्षिणनमस्कारान्कुर्यादेकाग्रमानसः २८
देवैस्त्वंनिर्मितापूर्वमर्चितासिमुनीश्वरैः
नमोनमस्तेतुलसिपापंहरहरिप्रिये २९
ततोविष्णुकथांश्रुत्वापौराणींस्निग्धमानसः
तंब्राह्मणंमुनिंविप्रंपूजयेद्भक्तिमान्व्रती ३०
एवंपूर्णविधिंसम्यक्पूर्वोक्तंभक्तिमान्नरः
करोतियःसलभतेनारायणसलोकताम् ३१
रोगापहंपापविनाशकृत्परंसद्बुद्धिदंपुत्रधनादिसाधनम्
मुक्तेर्निदानंनहिकार्तिकव्रताद्विष्णुप्रियादन्यतमंहिभूतले ३२
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्तिकमाहात्म्ये
श्रीकृष्णसत्यभामासंवादेस्नानविधिवर्णनोनामत्रिनवतितमोऽध्यायः ९३

चतुर्नवतितमोऽध्यायः

नारदउवाच-
कार्तिकव्रतिनांपुंसांनियमायेप्रकीर्तिताः
ताञ्छृणुष्वमयाराजन्कथ्यमानान्समंततः १
सर्वामिषाणिमांसानिक्षौद्रंसौवीरकंतथा
राजमाषादिकंचापिनैवाद्यात्कार्तिकव्रती २
द्विदलंतिलतैलंचतथान्नमश्रुदूषितम्
भावदुष्टंशब्ददुष्टंवर्जयेत्कार्तिकव्रती ३
परान्नंचपरद्रोहंपरदारागमंतथा
तीर्थेप्रतिगृहंनापिगृह्णीयात्कार्तिकव्रती ४
देवदेवद्विजानांचगुरोश्चव्रतिनस्तथा
स्त्रीराजमहतांनिंदांवर्जयेत्कार्तिकेव्रती ५
प्राण्यंगमामिषंचूर्णंफलेजंबीरमामिषम्

धान्येमसूरिकाप्रोक्ताचान्नंपर्युषितंतथा ६
अजागोमहिषीक्षीरादन्यदुग्धादिचामिषम्
द्विजक्रीतारसाःसर्वेलवणंभूमिजंतथा ७
ताम्रपात्रस्थितंगव्यंजलंपल्वलसंस्थितम्
आत्मार्थंपाचितंचान्नमामिषंतत्स्मृतंबुधैः ८
ब्रह्मचर्यमधःसुप्तिःपत्रावल्यांचभोजनम्
चतुर्थकालेभुंजीतकुर्यादेवंसदाव्रती ९
नरकस्यचतुर्दश्यां तैलाभ्यंगंचकारयेत्
अन्यत्रकार्तिकस्नायितैलाभ्यंगंनकारयेत् १०
पलांडुंलशुनंशिग्रुछत्राकंगृंजनंतथा
नालिकांमूलकंहिंगुंवर्जयेत्कार्तिकव्रती ११
अलाबुंचापिवृंताकंकूष्मांडंबृहतीफलम्
श्लेष्मातकंकपित्थंचवर्जयेद्वैष्णवव्रती १२
रजस्वलांत्यजम्लेच्छपतितव्रात्यकैःसह
द्विजातिवेदबाह्यैश्चनवदेत्कार्तिकव्रती १३
श्वभिर्दृष्टंचकाकैश्चसूतकान्नंचवर्जयेत्
द्विःपाचितंचदग्धान्नंवर्जयेत्कार्तिकव्रती १४
तिलाभ्यंगंतथाशय्यांपरान्नंकांस्यभोजनम्
कार्तिकेवर्जयेद्यस्तुपरिपूर्णव्रतीभवेत् ा
एतानिवर्जयेन्नित्यंव्रतीसर्वव्रतेष्वपि
कृच्छ्राद्यंचापिकुर्वीतस्वशक्त्याविष्णुतुष्टये १५
क्रमात्कूष्मांडवृंताकंबृहतीमूलकंतथा
श्रीफलंचकलिगंचफलंधात्रीभवंतथा १६
नारिकेरंमहालाबुंपटोलंबदरीफलम्
चर्मवैकतकंचापिबिसंवैकट्फलंतथा १७
शाकान्येतानिवर्ज्यानिक्रमात्प्रतिपदादिषु
धात्रीफलंरवौतद्वद्वर्जयेत्सर्वदागृही १८
एभ्योऽपिवर्जयेत्किंचिद्यद्विष्णुप्रीतयेनरः
तत्पुनर्ब्राह्मणेदत्त्वाभक्षयेत्सर्वदैवहि १९
एवमेवहिमाघेऽपिकुर्याद्वैनियमान्व्रती

हरिजागरणंतत्रविधिप्रोक्तंचकारयेत् २०
यथोक्तकारिणंदृष्ट्वाकार्तिकव्रतिनंनरम्
यमदूताःपलायंतेगजाःसिंहार्दितायथा २१
वरंविष्णुव्रतंह्येतदथयज्ञशताधिकम्
यज्ञकृत्प्राप्नुयात्स्वर्गंवैकुंठंकार्तिकव्रती २२
भुक्तिमुक्तिप्रदानीहयानिक्षेत्राणिभूतले
वसंतितानितद्देहेकार्तिक्रव्रतकारिणः २३
दुःस्वप्नंदुष्कृतंकिंचिन्मनोवाक्कायकर्मजम्
कार्त्तिकव्रतिनंदृष्ट्वाविलयंयांतितत्क्षणात् २४
कार्त्तिकव्रतिनःपुंसोविष्णुवाक्यप्रणोदिताः
रक्षांकुर्वंतिशक्राद्याराज्ञोवैकिंकरायथा २५
विष्णुव्रतकरानित्यंयत्रतिष्ठंतिपूजिताः
ग्रहभूतपिशाचाद्यानैवतिष्ठंतितत्रवै २६
कार्त्तिकव्रतिनःपुण्यंयथोक्तव्रतकारिणः
नसमर्थोभवेद्वक्तुंब्रह्मापीहचतुर्मुखः २७
विष्णुप्रियंसकलकल्मषनाशनंचसर्वत्रपुत्रधनधान्यसमृद्धिकारि
ऊर्जेव्रतंसनियमंकुरुतेमनुष्यःकिंतस्यतीर्थपरिशीलनसेवयाच २८
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्त्तिकमाहात्म्ये
श्रीकृष्णसत्यभामासंवादेनियमवर्णनोनामचतुर्नवतितमोऽध्यायः ९४

पञ्चनवतितमोऽध्यायः

नारदउवाच
अथोर्जव्रतिनःसम्यगुद्यापनविधिंनृप
तच्छृणुष्वमयाख्यातंकिंविधानंसमासतः १
ऊर्ज्जशुक्लचतुर्दश्यांकुर्यादुद्यापनंव्रती
व्रतसंपूर्णतार्थायविष्णुप्रीत्यर्थमेवच २
तुलस्याउपरिष्टात्तुकुर्यान्मंडपिकांशुभाम्
सुतोरणांचतुर्द्वारांपुष्पचामरशोभिताम् ३
द्वारेषुद्वारपालांश्चपूजयेन्मृन्मयान्पृथक्
पुण्यशीलंसुशीलंचजयंविजयमेवच ४

तुलसीमूलदेशेचसर्वतोभद्रमालिखेत्
चतुर्भिर्वर्णकैःसम्यक्शोभाढ्यंसमलंकृतम् ५
तस्योपरिष्टात्सपिधानंपंचरत्नसमन्वितम्
महाफलेनसंयुक्तंकुंभंतत्रनिधायच ६
पूजयेत्तत्रदेवेशंशंखचक्रगदाधरम्
कौशेयपीतवसनंयुक्तंजलधिकन्यया ७
इंद्रादिलोकपालांश्चपूजयेन्मंडलेव्रती
द्वादश्यांप्रतिबुद्धःसत्रयोदश्यांयतःसुरैः ८
दृष्टोऽर्चितश्चतुर्दश्यांतस्मात्पूज्यस्तथाधिकम्
तस्यामुपवसेद्भक्त्याशांतःप्रयतमानसः ९
पूजयेद्देवदेवेशंसौवर्णंगुर्वनुज्ञया
उपचारैःषोडशभिर्नानाभक्ष्यसमन्वितैः १०
रात्रौजागरणंकुर्याद्गीतवाद्यादिमंगलैः
गीतंकुर्वंतियेभक्त्याजागरेचक्रपाणिनः ११
जन्मांतरशतोद्भूतैस्तेमुक्ताःपापसंचयैः
जागरेवासरेविष्णोर्गीतंनृत्यंचकुर्वताम् १२
गोसहस्रंचददतांतत्फलंसमुदाहृतम्
गीतनृत्यादिकंकुर्वन्दर्शयेत्कौतुकानिच १३
पुरतोवासुदेवस्यरात्रौयोहरिजागरे
पठन्विष्णुचरित्राणियोरंजयतिवैष्णवान् १४
मुखेनकुरुतेवाद्यंस्वेच्छालापांश्चदर्शयन्
भावैरेतैर्नरोयस्तुकुरुतेहरिजागरम् १५
दिनेदिनेतस्यपुण्यंतीर्थकोटिसमंस्मृतम्
ततस्तुपौर्णिमास्यांवैसपत्नीकान्द्विजोत्तमान् १६
त्रिंशन्मितानथैकान्वास्वशक्त्यावानिमंत्रयेत्
वरान्दत्त्वायतोविष्णुर्मत्स्यरूपीअभूत्तदा १७
तस्यांदत्तंहुतंजप्तंतदक्षयफलंस्मृतम्
अतस्तान्भोजयेद्विप्रान्पायसान्नादिनाव्रती १८
अतोदेवाइतिद्वाभ्यांजुहुयात्तिलपायसम्
प्रीत्यर्थंदेवदेवस्यदेवानांचपृथक्पृथक् १९

दक्षिणांचयथाशक्तिप्रदद्यात्प्रणमेच्चतान्
पुनर्देवंसमभ्यर्च्यदेवांश्चतुलसींतथा २०
ततोगांकपिलांतत्रपूजयेद्विधिवद्व्रती
गुरुंव्रतोपदेष्टारंवस्त्रालंकरणादिभिः २१
सपत्नीकंसमभ्यर्च्यगांचतस्मैप्रदापयेत्
युष्मत्प्रसादाद्देवेशःप्रसन्नोमेभवेत्तदा २२
व्रतादस्माच्चयत्पापंसप्तजन्मकृतंमया
तत्सर्वंनाशमायातुस्थिरामेचास्तुसंततिः २३
मनोरथाश्चसफलाःसंतुनित्यंममार्चनात्
देहांतेवैष्णवंस्थानंप्राप्नुयामतिदुर्लभम् २४
इतिक्षमाप्यतान्विप्रान्प्रसाद्यचविसर्जयेत्
तामर्चांगुरवेदद्याद्रत्नयुक्तांतदाव्रती २५
तदासुहृद्गुरुयुतःस्वयंभुंजतिभक्तिमान्
कार्त्तिकेवाथतपसिविधिरेवंविधःस्मृतः २६
एवंयःकुरुतेसम्यक्कार्तिकस्यव्रतंनरः
विपाप्मासविनिर्मुक्तोविष्णुसान्निध्यगोभवेत् २७
सर्वव्रतैःसर्वतीर्थैःसर्वदानैश्चयत्फलम्
तत्कोटिगुणितंज्ञेयंसम्यगस्यविधानतः २८
तेधन्यास्तेमहापुण्यास्तेषांसर्वफलोदयः
विष्णुभक्तिरतायेस्युःकार्तिकेव्रतकारिणः २९
देहस्थितानिपापानिवितर्कंयांतितद्भयात्
क्वयास्यामोवदंत्येवंयद्ययंव्रतकृन्नरः ३०
इत्यूर्जव्रतनियमान्शृणोतिभक्त्यायेचैतत्कथयंतिचैववैष्णवाग्रे
तेसम्यग्व्रतकरणात्फलंलभेरन्तत्सर्वंकलुषविनाशनंलभंते ३१
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्तिकमाहात्म्ये
श्रीकृष्णसत्यभामासंवादेउद्यापनवर्णनोनामपंचनवतितमोऽध्यायः ९५

षण्णवतितमोऽध्यायः

पृथुरुवाच-
यत्त्वयाकथितंब्रह्मन्व्रतमूर्जस्यविस्तरात्

तत्रयातुलसीमूलेविष्णोःपूजात्वयोदिता १
तेनाहंप्रष्टुमिच्छामिमाहात्म्यंतुलसीभवम्
कथंसातिप्रियाविष्णोर्देवदेवस्यशार्ङ्गिणः २
कथमेषासमुत्पन्नाकस्मिंस्थानेचनारद
एतद्ब्रूहिसमासेनसर्वज्ञोऽसिमतोहिमे ३
नारदउवाच-
पुरारुद्रेणदैत्येंद्रेसिंधुसूनौनिपातिते
प्रणम्यशिरसारुद्रंदेवाब्रह्मादयोऽब्रुवन्
शृणुराजन्प्रवक्ष्यामिमाहात्म्यंतुलसीभवम् ४
सेतिहासंपुरावृत्तंतत्सर्वंकथयामिते
पुराशक्रःशिवंद्रष्टुमगात्कैलासपर्वतम्
सर्वदेवैःपरिवृतस्त्वप्सरोगणसेवितः ५
यावद्गतःशिवगृहंतावत्तत्राशुदृष्टवान्
पुरुषंभीमकर्माणंदंष्ट्रानयनभीषणम् ६
सपृष्टस्तेनकस्त्वंभोक्वगतोजगदीश्वरः
एवंपुनःपुनःपृष्टःसयदानोचिवान्नृप ७
ततःक्रुद्धोवज्रपाणिस्तन्निर्भर्त्स्यवचोऽब्रवीत्
रेमयापृच्छमानोऽपिनोत्तरंदत्तवानसि ८
अतस्त्वांहन्मिवज्रेणकस्तेत्रातास्तिदुर्मते
इत्युदीर्यततोवज्रीवज्रेणाचाहनद्दृढम् ९
तेनास्यकंठेनीलत्वमगाद्वज्रंचभस्मतां
ततोरुद्रप्रजज्वालतेजसाप्रदहन्निव १०
दृष्ट्वाबृहस्पतिस्तूर्णंकृतांजलिपुटोऽभवत्
इंद्रश्चदंडवद्भूमौकृत्वास्तोतुंप्रचक्रमे ११
बृहस्पतिरुवाच-
नमोदेवाधिदेवायत्र्यंबकायकपर्दिने
त्रिपुरघ्नायशर्वायनमोंधकनिषूदिने १२
विरूपायातिरूपायबहुरूपायशंभवे
यज्ञविध्वंसकर्त्रेचयज्ञानांफलदायिने १३
कालांतकायकालायकालभोगधरायच

नमोब्रह्मशिरोहंत्रेब्राह्मणायनमोनमः १४
नारदउवाच–
एवंस्तुतस्तदाशंभुःद्विजर्षभंजगादह
संहरन्नयनज्वालंत्रिलोकीदहनक्षमाम् १५
वरंवरयभोब्रह्मन्प्रीतःस्तुत्यानयातव
इंद्रस्यजीवदानेनजीवतित्वंप्रथांव्रज १६
बृहस्पतिरुवाच–
यदितुष्टोऽसिदेवत्वंयाहींद्रंशरणागतम्
अग्निरेषशमंयातुभालनेत्रसमुद्भवः १७
ईश्वरउवाच–
पुनःप्रवेशमायातिभालनेत्रेकथंत्वयम्
एनंत्यक्ष्याम्यहंदूरेयथेंद्रं नैवपीडयेत् १८
नारदउवाच–
इत्युक्त्वातंकरेधृत्वाप्राक्षिपल्लवणांभसि
सोऽपतत्सिंधुगंगायाःसागरस्यचसंगमे १९
तदासबालरूपत्वमगात्तत्ररुरोदच
रुदतस्तस्यशब्देनप्राकंपद्धरणीमुहुः २०
स्वर्गश्चसत्यलोकश्चतत्स्वनाद्बधिरीकृतौ
श्रुत्वाब्रह्माययौतत्रकिमेतदितिविस्मितः २१
तावत्समुद्रस्योत्संगेतंबालंसददर्शह
दृष्ट्वाब्राह्मणमायांतंसमुद्रोऽपिकृतांजलि २२
प्रणम्यशिरसाबालंतस्योत्संगेन्यवेशयेत्
ततोब्रह्माब्रवीद्वाक्यंकस्यायंशिशुरद्भुतः २३
निशम्येतिवचोधातुर्वाक्यंतुसागरोऽब्रवीत्
ब्रह्माउवाच–
सरित्पतेकुतोलब्धोबालोह्येषमहाबलः २४
यस्यनादेनसंत्रस्तादेवासुरमहोरगाः
समुद्रउवाच–
भोब्रह्मन्सिधुगंगायांजातोऽयममपुत्रकः २५
जातकर्मादिसंस्कारान्कुरुष्वास्यजगद्गुरो

नारदउवाच-
इत्थंवदतिपाथोधौसबालःसागरात्मजः २६
ब्रह्माणमग्रहीत्कूर्चेविधुन्वंतंमुहुर्मुहुः
धुन्वतस्तस्यकूर्चंतुनेत्राभ्यामागमज्जलम्
कथंचिन्मुक्तकूर्चोऽथब्रह्माप्रोवाचसागरम् २७
ब्रह्मोवाच-
नेत्राभ्यांविधृतंयस्मादनेनैतज्जलंमम
तस्माज्जलंधरइतिख्यातोनाम्नाभवत्यसौ २८
अधुनैवैषतरुणःसर्वशस्त्रास्त्रपारगः
अवध्यःसर्वभूतानांविनारुद्रंभविष्यति २९
यातियत्रसमुद्भूतस्तत्रेदानींगमिष्यति ३०
नारदउवाच-
इत्युक्त्वाशुक्रमाहूयराज्येतंचाभ्यषेचयत्
आमंत्र्यसरितांनाथंब्रह्मांतर्द्धानमन्वगात् ३१
अथतद्दर्शनोत्फुल्लनयनः सागरस्तदा
कालनेमिसुतांवृंदांतद्भार्यार्थमयाचत ३२
तेकालनेमिप्रमुखास्ततोऽसुरास्तस्मैसुतांतांप्रददुःप्रहर्षिताः
सचापितान्प्राप्यसुहृद्वरान्वशीशशासगांशुक्रसहायवान्बली ३३
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्तिकमाहात्म्ये श्रीकृष्णसत्यभामासंवादेजालंधरोत्पत्तिवर्णनंनामषराणवतितमोऽध्यायः ९६

सप्तनवतितमोऽध्यायः

नारदउवाच-
येदेवैर्निर्जिताःपूर्वंदैत्याःपातालसंस्थिताः १
तेहिभूमंडलंजातानिर्भयास्तमुपासितुम्
कदाचिच्छिन्नशिरसंराहुंदृष्ट्वासदैत्यराट्
पप्रच्छभार्गवंविप्रंकेनेदंविहितंप्रभो २
भार्गवस्तस्यशिरसश्छेदंराहोःशशंसह
अमृतार्थंसमुद्रस्यमथनंदेवकारितम् ३
रत्नापहरणंचैवदैत्यानांचपराभवम्

तच्छ्रुत्वाक्रोधरक्ताक्षःस्वपितुर्मथनंतदा ४
सदूतंप्रेषयामासघस्मरंशक्रसंनिधौ
दूतस्त्रिविष्टपंगत्वासुधर्मांप्राप्यसत्वरम् ५
गर्वादखर्वमौलिस्तुदेवेंद्रंवाक्यमब्रवीत्
दूतउवाच-
जलंधरोऽब्धितनयःसर्वदैत्यजनेश्वरः ६
दूतोऽहप्रेषितस्तेनसयदाहश्रृणुष्वतत्
कस्मात्त्वयाममपितामथितःसागरोऽद्रिणा ७
नीतानिसर्वरत्नानितानिशीघ्रंप्रयच्छमे
इतिदूतवचःश्रुत्वाविस्मितस्त्रिदशाधिपः
उवाचघस्मरंघोरंभयरोषसमन्वितः ८
ईश्वरउवाच-
शृणुदूतमयापूर्वंमथितःसागरोयथा
अद्रयोमद्भयाद्भीताःस्वकुक्षिस्थास्तथाकृताः ९
अन्येऽपिमद्द्विषस्तेनरक्षितादितिजास्तथा
तस्मात्तद्रत्नजातंतुमयाप्यपहृतंकिल १०
शंखोऽप्येवंपुरादेवानद्विषत्सागरात्मजः
ममानुजेननिहतःप्रविष्टःसागरोदरम् ११
तद्गच्छकथयस्वास्यसर्वंमथनकारणम् १२
नारदउवाच-
इत्थंविसर्जितोदूतस्तदेंद्रेणागमद्गृहम्
तदिंद्रवचनं दैत्यराजायाकथयत्तदा १३
तन्निशम्यतदादैत्योरोषात्प्रस्फुरिताधरः
उद्योगमकरोत्तूर्णंसर्वदेवजिगीषया १४
तदोद्योगेसुरेंद्रस्यदिग्भ्यःपातालतस्तथा
दितिजाःप्रत्यपद्यंतशतशःकोटिशस्तथा १५
अथशुंभनिशुंभाद्यैर्बलाधिपतिकोटिभिः
गत्वात्रिविष्टपं दैत्योयुद्धायाधिष्ठितोऽभवत् १६
निर्ययुस्त्वमरावत्यादेवायुद्धायदंशिताः
पुरमावृत्यतिष्ठंतिदृष्ट्वादैत्यबलंमहत् १७

ततःसमभवद्युद्धंदेवदानवसेनयोः
मुशलैःपरिघैर्बाणैर्गदापरशुशक्तिभिः १८
तेऽन्योन्यंसमधावेतांजघ्नतुश्चपरस्परम्
च्चणेनाभवतांसेनेरुधिरौघपरिप्लुते १९
पतितैःपात्यमानैश्चगजाश्वरथपत्तिभिः
व्यराजतरणेभूमिःसंध्याभ्रपटलैरिव २०
तत्रयुद्धेहतान्दैत्यान्भार्गवस्तूदतिष्ठयत्
विद्ययाऽमृतजीविन्यामंत्रितैस्तोयबिंदुभिः २१
देवास्तत्रतथायुद्धेजीवयेदंगिरस्सुतः
दिव्यौषधीःसमानीयद्रोणदेश्याःपुनःपुनः २२
दृष्ट्वादेवांस्तथायुद्धेपुनरेवसमुत्थितान्
जलंधरःक्रोधवशोभार्गवंवाक्यमब्रवीत् २३
जलंधरउवाच-
मयादेवाहतायुद्धेउत्तिष्ठंतिकथंपुनः
तवसंजीवनीविद्यानैवान्यत्रेतिविश्रुतम् २४
भृगुरुवाच-
दिव्यौषधीःसमानीयद्रोणाद्रेरंगिराःसुरान्
जीवयत्येषवैशीघ्रंद्रोणाद्रिंसमपाहर २५
नारदउवाच-
इत्युक्तःसतुदैत्येंद्रोनीत्वाद्रोणाचलंतदा
प्राक्षिपत्सागरेतूर्णंपुनरागान्महाहवम् २६
अथदेवान्हतान्दृष्ट्वाद्रोणाद्रिमगमद्गुरुः
तावत्तत्रगिरींद्रंतंनददर्शसुरार्चितः २७
ज्ञात्वादैत्यहृतंद्रोणंविषण्णोभयविह्वलः
आगत्यदूराद्व्याजह्रेश्वासाकुलितविग्रहः २८
पलायध्वंपलायध्वंनायंजेतुंहिशक्यते
रुद्रांशसंभवोह्येषस्मरध्वंशक्रचेष्टितम् २९
श्रुत्वातद्वचनंदेवाभयविह्वलितास्तदा
दैत्यैस्तैर्वध्यमानास्तेपलायंतदिशोदश ३०
देवान्विदारितान्दृष्ट्वादैत्यःसागरनंदनः

शंखभेरीजयरवैःप्रविवेशामरावतीम् ३१
प्रविष्टेनगरंदैत्येदेवाःशक्रपुरोगमाः
सुवर्णाद्रिगुहांप्राप्यन्यवसन्दैत्यतापिताः ३२
ततश्चसर्वेष्वसुराधिकारेष्विंद्रादिकानांविनिवेशयत्तदा
शुंभादिकान्दैत्यवरान्पृथक्पृथक्स्वयंसुवर्णाद्रिगुहामगात्पुनः ३३
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडे
कार्तिकमाहात्म्येअमरावतीविजयोनामसप्तनवतितमोऽध्यायः ९७

अष्टनवतितमोऽध्यायः

नारदउवाच-
पुनर्दैत्यंसमायांतंदृष्ट्वादेवाःसवासवाः
भयप्रकंपिताःसर्वेविष्णुंस्तोतुंप्रचक्रमुः १
देवाऊचुः
नमोमत्स्यकूर्मादिनानास्वरूपैःसदाभक्तकार्योद्यतायार्तिहंत्रे
विधात्रादिसर्गस्थितिध्वंसकर्त्रेगदाशंखपद्मारिहस्तायतेऽस्तु २
रमावल्लभायासुराणांनिहंत्रेभुजंगादिनाथायपीतांबराय
मखादिक्रियापाककर्त्रेविकर्त्रेशरण्यायतस्मैनताःस्मोनताःस्मः ३
नमोदैत्यसंतापितामर्त्यदुःखाचलध्वंसदंभोलयेविष्णवेते
भुजंगेशतल्पेशयायार्कचंद्रद्विनेत्रायतस्मैनतास्मोनताःस्मः ४
नारदउवाच-
संकष्टनाशनंस्तोत्रंनित्यंयस्तुपठेन्नरः
सकदाचिन्नसंकष्टैपीडयतेकृपयाहरेः ५
इतिदेवाःस्तुतिंयावत्कुर्वंतिदनुजद्विषः
तावत्सुराणामापत्तिर्विज्ञाताविष्णुनातदा ६
सहसोत्थायदैत्यारिःकृपयाखिन्नमानसः
आरुह्यगरुडंवेगाल्लक्ष्मींवचनमब्रवीत् ७
विष्णुरुवाच-
जलंधरेणतेभ्रात्रादेवानांकदनंकृतम्
तैराहूतोगमिष्यामियुद्धायाद्यत्वरान्वितः ८
लक्ष्मीरुवाच-

अहंतेवल्लभानाथभक्ताचयदिसर्वदा
तत्कथंतेममभ्रातायुद्धेवध्यःकृपानिधे ९
श्रीभगवानुवाच–
रुद्रांशसंभवत्वाच्चब्रह्मणोवचनादपि
प्रीत्याचतवनैवायंममवध्योजलंधरः १०
नारदउवाच–
इत्युक्त्वागरुडारूढःशंखचक्रगदासिभृत्
विष्णुर्वेगाद्ययौयोद्धुंयत्रदेवाःस्तुवंतिते ११
अथारुणानुजात्युग्रपक्षवातप्रपीडिताः
वात्याविवर्तितादैत्याबभ्रमुःखेयथाघनाः १२
ततोजलंधरोदृष्ट्वादैत्यान्वात्याप्रपीडितान्
नोवाचवचनंक्रोधात्ततोविष्णुंसमभ्ययात् १३
ततःसमभवद्युद्धंविष्णुदैत्येंद्रयोर्महत्
आकाशंकुर्वतोर्बाणैरंतेनिरवकाशवत् १४
विष्णुर्दैत्यस्यबाणौघैर्ध्वजंच्छत्रंधनुर्हयान्
चिच्छेदतंचहृदयेबाणेनैकेनताडयन् १५
ततोदैत्यंसमुत्पत्यगदापाणिस्त्वरान्वितः
आगत्यगरुडंमूर्ध्निपातयामासभूतले १६
विष्णुर्गदांचखड्गेनचिच्छेदप्रहसन्निव
तावत्ससुहृदेविष्णुंजघानदृढमुष्टिना १७
ततस्तौबाहुयुद्धेनयुयुधातेमहाबलौ
बाहुभिर्मुष्टिभिश्चैवजानुभिर्नादयन्महीम् १८
एवंसुरुचिरंयुद्धंकृत्वाविष्णुःप्रतापवान्
उवाचदैत्यराजानंमेघगंभीरयागिरा १९
विष्णुरुवाच–
वरंवरयदैत्येंद्रप्रीतोऽस्मितवविक्रमात्
अदेयमपितेददिमयत्तेमनसिवर्तते २०
जलंधरउवाच–
यदिभावुकतुष्टोऽसिवरमेतंददस्वमे
मद्भगिन्यासहतयामद्गृहेसगणोवस २१

नारदउवाच-
तथेत्युक्त्वासभगवान्सर्वदेवगणैःसह
जलंधरंनामपुरमगमद्रमयासह २२
जलंधरश्चदेवानामधिकारेषुदानवान्
स्थापयित्वासहर्षःसन्पुनरागान्महीतले २३
देवगंधर्वसिद्धेषुयत्किंचिद्रत्नसंज्ञितम्
तदात्मवशगंकृत्वातिष्ठत्सागरनंदनः २४
पातालभवनेदैत्यंनिशुंभंचमहाबलम्
स्थापयित्वासशेषादीननयद्भूतलंबली २५
देवगंधर्वसिद्धौघान्यक्षरासमानुषान्
स्वपुरेनागरान्कृत्वाशशासभुवनत्रयम् २६
एवंजलंधरःकृत्वादेवांश्चवशवर्त्तिनः
धर्मेणपालयामासप्रजाःपुत्रानिवौरसान् २७
नकश्चित्व्याधितोनैवदुःखितोनकृशस्तथा
नदीनोदृश्यतेतस्मिन्धर्माद्राज्यंप्रशासति २८
एवंमहींशासतिदानवेंद्रेधर्मेणसम्यक्चयदृच्छयाहम्
कदाचिदागामथतस्यलक्ष्मींविलोकितुंश्रीरमणंचसेवितुम् २९
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्त्तिकमाहात्म्ये
श्रीकृष्णसत्यभामासंवादेजलंधरप्रवेशोनामअष्टनवतितमोऽध्यायः ९८

नवनवतितमोऽध्यायः

नारदउवाच-
समांसंपूज्यविधिवद्दानवेंद्रोऽतिभक्तितः
संप्रहस्यतदावाक्यंजगादनृपसत्तम १
जलंधरउवाच-
कुतस्त्वागम्यतेब्रह्मन्किंचदृष्टंत्वयाक्वचित्
यदर्थमिहचायातस्तदाज्ञापयमांमुने २
नारदउवाच-
गतःकैलासशिखरं दैत्येंद्राहंयदृच्छया
तत्रोमयासहासीनंदृष्टवानस्मिशंकरम् ३

योजनायुतविस्तीर्णेकल्पद्रुममहावने
कामधेनुशताकीर्णेचिंतामणिसुदीपिते ४
तंदृष्ट्वामहदाश्चर्यंवितर्कोमेऽभवत्तदा
क्वापीदृशीभवेदृद्धिस्त्रिलोक्यांवानवेति च ५
तावत्तवापिदैत्येंद्रसमृद्धिःसम्भृतामया
तद्विलोकनकामोऽहत्वत्सान्निध्यमिहागतः ६
त्वत्समृद्धिमिमांपश्यन्स्त्रीरत्नरहितांध्रुवम्
तर्कयामिशिवादन्यत्त्रिलोक्यांनसमृद्धिमान् ७
अप्सरोनागकन्याश्चयद्यपित्वद्वशेस्थिताः
तथापितानपार्वत्यारूपेणसदृशाध्रुवम् ८
यस्यालावरायजलधौनिमग्नश्चतुराननः
स्वधैर्यममुचत्पूर्वंतयाकान्योपमीयते ९
वीतरागोऽपिहियथामदनारिःस्वलीलया
विश्वतंत्रोऽपितपसासचात्मवशगःकृतः १०
सौंदर्यगहनेभ्रामन्शबरीरूपयापुरा
यस्याःपुनःपुनःपश्यन्रूपंधाताविसर्जने ११
ससर्जाप्सरसस्तास्तास्तत्समैकापिनाभवत्
अतःस्त्रीरत्नसंभोक्तुःसमृद्धिस्तस्यसावरा १२
तथानतवदैत्येंद्रसर्वरत्नाधिपस्यच
एवमुक्त्वातमामंत्र्यगतेमयिसदैत्यराट् १३
तद्रूपश्रवणादासीदनंगज्वरपीडितः
अथसंप्रेषयामासदूतंचसिंहिकासुतम् १४
त्र्यंबकायतदाकिंचिद्विष्णुमायाविमोहितः
कैलासमगमद्राहुःसर्वशुक्लेंदुवर्चसम् १५
कात्स्र्न्येनकृष्णपक्षेंदुवर्चसंस्वांगजेनतु
निवेदितस्तदादेशान्नंदिनाचप्रवेशितः
त्र्यंबकाभ्रूलतासंज्ञाप्रेरितोवाक्यमब्रवीत् १६
राहुरुवाच—
देवपन्नगसेव्यस्यत्रैलोक्याधिपतेःप्रभोः
सर्वरत्नेश्वरस्यत्वमाज्ञांशृणुवृषध्वज १७

श्मशानवासिनोनित्यंमुंडमालाधरस्यच
दिगंबरस्यतेभार्याकथं हैमवतीशुभा १८
अहंरत्नाधिनाथोऽस्मिसाचस्त्रीरत्नसंज्ञका
तस्मान्ममैवसायोग्यानैवभिक्षाशिनस्तव १९
नारदउवाच-
वदत्येवंतदाराहौभ्रूमध्याच्छूलपाणिनः
अभवत्पुरुषोरौद्रस्तीव्राशनिसमस्वनः २०
सिंहास्यःप्रचलज्जिह्वःसज्वलन्नयनोमहान्
ऊर्ध्वकेशःशुष्कतनुर्नृसिंहइवचापरः २१
सतंखादितुमारेभेदृष्ट्वाराहुर्भयातुरः
अधावदतिवेगेनबहिःसचदधारतम् २२
सचराहुर्महाबाहुर्मेघगंभीरयागिरा
उवाचदेवदेवेशंपाहिमांशरणागतम् २३
ब्राह्मणंमांमहादेवखादितुंसमुपागतः
एतस्माद्रक्षदेवेशशरणागतवत्सल २४
महादेवोवचःश्रुत्वाब्राह्मणस्यतदाब्रवीत्
नैवासौवध्यतामेतिदूतोऽयपरवान्यतः २५
मुंचेतिपुरुषःश्रुत्वाराहुंतत्याजसोंबरे
राहुंत्यक्त्वासपुरुषोमहादेवंव्यजिज्ञपत् २६
पुरुषउवाच-
क्षुधामांबाधतेस्वामिन्क्षुत्क्षामश्चास्मिसर्वथा
किंभक्ष्यंममदेवेशतदाज्ञापयमांप्रभो २७
ईश्वरउवाच-
संभक्षयात्मनःशीघ्रंमांसंत्वंहस्तपादयोः २८
नारदउवाच-
सशिवेनैवमाज्ञप्तश्चखादपुरुषःस्वयम्
हस्तपादोद्भवंमांसंशिरःशेषोयदाभवत् २९
दृष्ट्वाशिरोऽवशेषंतुसुप्रसन्नःसदाशिवः
पुरुषंभीमकर्माणंतमुवाचसविस्मयः ३०
ईश्वरउवाच-

त्वंकीर्तिमुखसंज्ञोहिभवमद्द्वारगःसदा
त्वदर्चां नैवकुर्वंतिनैवतेमत्प्रियंकराः ३१
नारदउवाच–
तदाप्रभृतिदेवस्यद्वारेकीर्तिमुखःस्थितः
नार्चयंतीहयेपूर्वंतेषामर्चावृथाभवेत् ३२
राहुर्विमुक्तोयस्तेनसोऽपतद्बर्बरस्थले
अतःसबर्बरोद्भूतइतिभूमौपृथांगतः ३३
ततश्चराहुःपुनरेवजातमात्मानमस्मिन्निति मन्यमानः
समेत्यसर्वंकथयांबभूवजलंधरायेशविचेष्टितंतत् ३४

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्तिकामाहात्म्ये
श्रीकृष्णसत्यभामासंवादेदूतसंवादोजालंधरोपाख्यानंनामनवनवतितमो–
ऽध्यायः ९९

शततमोऽध्यायः

नारदउवाच–
जालंधरस्तुतच्छ्रुत्वाकोपाकुलितविग्रहः
निर्जगामाशुदैत्यानांकोटिभिःपरिवारितः १
गतस्तस्याग्रतःशुक्रोराहुर्दृष्टिस्थितोऽभवत्
मुकुटश्चापतद्भूमौवेगात्प्रस्खलितस्तदा २
दैत्यसैन्यवृतैस्तत्रविमानानांशतैस्तदा
व्यराजतनभःपूर्णंप्रावृषीवबलाहकैः ३
तस्योद्योगंतदादृष्ट्वादेवाःशक्रपुरोगमाः
अलक्षितत्वराजग्मुःशूलिनंतेव्यजिज्ञपन् ४
देवाऊचुः
नजानासिकथंस्वामिन्देवाविज्ञापयंतिभो
तदस्मद्रक्षणार्थायजहिसागरनंदनम् ५
नारदउवाच–
इतिदेववचःश्रुत्वाप्रहस्यवृषभध्वजः
महाविष्णुंसमाहूयवचनंचेदमब्रवीत् ६
ईश्वरउवाच–

जालंधरःकथंविष्णोनहतःसंगरेत्वया
तद्भयाच्चापयातोऽसित्यक्त्वावैकुंठमात्मनः ७
भगवानुवाच-
तवांशसंभवत्वाच्चभ्रातृत्वाच्चतथाश्रियः
नमयानिहतःसंख्येत्वमेनंजहिदानवम् ८
ईश्वरउवाच-
नायमेभिर्महातेजाःशस्त्रास्त्रैर्वध्यतेमया
देवैःसर्वैःस्वतेजोंशःशस्त्रार्थेदीयतांमम ९
नारदउवाच-
अथविष्णुमुखादेवाःस्वतेजांसिददुस्तदा
तान्येकत्वंगतानीशोदृष्ट्वातेजोमहांस्तदा १०
तेनाकरोन्महादेवःसहसाशस्त्रमुत्तमम्
चक्रंसुदर्शनंनामज्वालामालातिभीषणम् ११
तेजःशेषेणचतदावज्रंचकृतवान्हरः
तावज्जलंधरोदृष्टःकैलासतलभूमिषु १२
हस्त्यश्वरथपत्तीनांकोटीभिःपरिवारितः
तंदृष्ट्वाहर्षिताःसर्वेदेवाजग्मुर्यथागतम् १३
गणाश्चसमनह्यंतयुद्धायातित्वरान्विताः
नंदीभवक्त्रसेनानीमुखाःसर्वेशिवाज्ञया १४
अवतेरुर्गणाःसर्वेकैलासाद्युद्धदुर्मदाः
ततःसमभवद्युद्धंकैलासोपत्यकाभुवि १५
प्रमथाधिपदैत्यानांघोरंशस्त्रास्त्रसंकुलम्
भेरीमृदंगशंखौघनिस्वनैर्वीरहर्षणैः १६
गजाश्वरथशब्दैश्चनादिताभूर्व्यकंपत
शक्तितोमरबाणौघैर्मुशलप्रासपट्टिशैः १७
व्यराजतनभःपूर्णमुल्काभिरिवसंवृतम्
निहतैरथनागाश्वैःसर्वाभूमिर्व्यराजत १८
वज्राहताश्चलशिरःशकलैरिवसंवृता
प्रमथाहतदैत्यौघैर्दैत्याहतगणैस्तथा १९
वसासृङ्मांसपंकाद्यैर्भूरगम्याभवत्तदा

प्रमथाहतदैत्यौघान्भार्गवःसमजीवयत् २०
युद्धेपुनःपुनश्चैवमृतसंजीवनीबलात्
तंदृष्ट्वाव्याकुलीभूत्वागणाःसर्वेभयार्दिताः २१
शशंसुर्देवदेवेशंतत्सर्वंशुक्रचेष्टितम्
अथरुद्रमुखात्कृत्याबभूवातीवभीषणा २२
तालजंघोदरीवक्रास्तनापीडितभूरुहा
सायुद्धभूमिमासाद्यभत्तयंतीमहासुरान् २३
भार्गवंस्वकरेधृत्वाजगामांतर्हिताभवत्
विधृतंभार्गवंदृष्ट्वादैत्यसैन्यगणास्तदा २४
प्रम्लानवदनादर्पान्निजघ्नुर्युद्धदुर्मदाः
अथाभज्यतदैत्यानांसेनागणभयार्दिता २५
वायुवेगहतायद्वत्प्रकीर्णतृणसंहतिः
भग्नांगतभयात्सेनांदृष्ट्वाहर्षंगणाययुः २६
निशुंभशुंभसेनान्यौकालनेमिश्चवीर्यवान्
त्रयस्तेवारयामासुर्गणसेनांमहाबलाः २७
मुंचतःशरवर्षाणिप्रावृषीवबलाहकाः
ततोदैत्यशरौघास्तेशलभानामिवव्रजाः २८
रुरुधुःखंदिशःसर्वागणसेनामकंपयन्
गणाःशरशतैर्भिन्नारुधिरासारवर्षिणः २९
वसंतेकिंशुकाभासानप्राज्ञायतकिंचन
पतिताःपात्यमानाश्चछिन्नाभिन्नास्तदागणाः ३०
त्यक्त्वासंग्रामभूमिंतेसर्वेऽपिविमुखाभवन् ३१
ततःप्रभग्नंस्वबलंविलोक्यगजास्यनंदीश्वरकार्तिकेयाः
चिरान्वितादैत्यवरान्प्रसह्यनिवारयामासुरमर्षणास्ते ३२
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्तिकमाहात्म्ये
श्रीकृष्णसत्यभामासंवादेदैत्यसेनावधोनामशततमोऽध्यायः १००

एकाधिकशततमोऽध्यायः

नारदउवाच–
तेगणाधिपतीन्दृष्ट्वानंदीभमुखषरामुखान्

अमर्षादभ्यधावंतद्वंद्वयुद्धायदानवाः १
नंदिनंकालनेमिश्चशुंभोलंबोदरंतथा
निशुंभःषरामुखंवेगादभ्यधावतदंशितः २
निशुंभःकार्तिकेयस्यमयूरंपंचभिःशरैः
हृदिविव्याधवेगेनमूर्छितःसपपातच ३
ततःशक्तिधरःशक्तिंयावज्जग्राहरोषितः
तावन्निशुंभोवेगेनस्वशक्त्यातमपातयत् ४
ततोनंदीश्वरोबाणैःकालनेमिमविध्यत
सप्तभिश्चहयान्केतूंस्त्रिभिःसारथिमच्छिनत् ५
कालनेमिस्तुसंक्रुद्धोधनुश्चिच्छेदनंदिनः
तदपास्यसशूलेनतंवक्षस्यहनद्दृढम् ६
सशूलभिन्नहृदयोहताश्वोहतसारथिः
अद्रेःशिखरमामुच्यशैलाद्रिंसोऽप्यपातयत् ७
अथशुंभोगणेशश्चरथमूषकवाहनौ
युध्यमानौशरव्रातैःपरस्परमविध्यताम् ८
अथशुंभंगणाध्यक्षोहृदिविव्याधपत्रिणा
सारथिंपंचभिर्बाणैःपातयामासभूतले ९
ततःशुंभोऽतिक्रुद्धोऽपिबाणषष्ट्यागणाधिपम्
मूषकंचत्रिभिर्विद्ध्वाननादजलदस्वनः १०
मूषकःशरभिन्नांगश्चचालकृतवेदनः
लंबोदरःसमुत्तीर्यपदातिरभवन्नृप ११
ततोलंबोदरःशुंभंहत्वापरशुनाहृदि
अपातयत्तदाभूमौमूषकंचारुहत्पुनः १२
कालनेमिर्निशुंभश्चउभौलंबोदरंशरैः
युगपज्जघ्नतुःकोपात्तोत्रेणेवमहाद्विपम् १३
तंपीड्यमानमालोक्यवीरभद्रोमहाबलः
अभ्यधावतवेगेनभूतकोटियुतस्तदा १४
कूष्मांडाभैरवाश्चापिवेतालायोगिनीगणाः
पिशाचायोगिनीसंघागणाश्चापितमन्वयुः १५
ततःकिलकिलाशब्दैःसिंहनादैःसघुर्घुरैः

विनादिताडमरुकैःपृथिवीसमकंपत १६
ततोभूतानिधावंतिभद्मयंतिस्मदानवान्
उत्पतंतिपतंतिस्मननृतुश्चरणांगणे १७
नंदीचकार्तिकेयश्चसमायातौत्वरान्वितौ
निजघ्नतूरणेदैत्यान्निरंतरशरव्रजैः १८
छिन्नभिन्नाहतैर्दैत्यैःपातितैर्भर्त्सितैस्तथा
व्याकुलासाभवत्सेनाविषराणवदनातदा १९
प्रविध्वस्तांततःसेनांदृष्ट्वासागरनंदनः
रथेनातिपताकेनगणानभिययौबली २०
हस्त्यश्वरथसंह्लादःशंखभेरीरवस्तदा
अभवत्सिंहनादश्चसेनयोरुभयोस्तदा २१
जालंधरशरव्रातैर्नीहारपटलैरिव
द्यावापृथिव्योराच्छन्नमंतरंसमपद्यत २२
गणेशंपंचभिर्विध्वाशैलाद्रिमपिपंचभिः
वीरभद्रंचविंशत्याननादजलदस्वनः २३
कार्तिकेयस्ततोदैत्यंशक्त्याविव्याधसत्वरः
व्याघूर्णःशक्तिनिर्भिन्नःकिंचिद्व्याकुलमानसः २४
ततःक्रोधपरीताद्मःकार्तिकेयंजलंधरः
गदयाताडयामाससचभूमितलेऽपतत् २५
तथैवनंदिनंवेगादपातयतभूतले
ततोगणेश्वरःक्रुद्धोगदांपरशुनाच्छिनत् २६
वीरभद्रस्त्रिभिर्बाणैर्हृदिविव्याधदानवम्
सप्तभिश्चहयान्केतून्धनुश्छन्नंचचिच्छिदे २७
ततोऽतिक्रुद्धोदैत्येंद्रःशक्तिमुद्यम्यदारुणाम्
गणेशंपातयामासरथमन्यंसमारुहत् २८
अभ्ययादथवेगेनवीरभद्रंरुषान्वितः
ततस्तौसूर्यसंकाशौयुयुधातेपरस्परम् २९
वीरभद्रस्तस्यहयांस्तथाबाणैरपातयत्
धनुश्चिच्छेददैत्येंद्रोयुयुधेपरिघायुधः ३०
सवीरभद्रंत्वरयाभिगम्यजघानदैत्यःपरिघेनमूर्ध्नि

सचापिदैत्यः प्रविभिन्नमूर्द्धापपातभूमौरुधिरंसमुद्गिरन् ३१
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्त्तिकमाहात्म्ये श्रीकृष्णसत्यभामासंवादेदैत्यसेनापराभवोनामएकाधिकशततमोऽध्यायः १०१

द्व्यधिक शततमोऽध्यायः

नारदउवाच-
पतितंवीरभद्रंतुदृष्ट्वारुद्रगणाभयात्
आगतास्तेरणंहित्वाक्रोशमानामहेश्वरम् १
अथकोलाहलंश्रुत्वागणानांचंद्रशेखरः २
अभ्ययाद्वृषमारूढः संग्रामंप्रहसन्निव
रुद्रमायांतमालोक्यसिंहनादैर्गणाः पुनः ३
निवृत्ताः संगरेदैत्यान्निजघ्नुः शरवृष्टिभिः
दैत्याश्चभीषणंरुद्रंदृष्ट्वासर्वेविदुद्रुवुः ४
कार्त्तिकव्रतिनंदृष्ट्वापातकानीवतद्भयात्
अथजालंधरोदैत्यान्विद्रुतान्प्रेक्ष्यसंगरे ५
रोषादधावच्चंडीशंमुंचन्बाणान्सहस्रशः
शुंभोनिशुंभोऽश्वमुखः कालनेमिर्बलाहकः ६
खड्गरोमाप्रचंडश्चघस्मरश्चशिवंययुः
बाणांधकारसंच्छन्नंदृष्ट्वागणबलंशिवः ७
तद्बाणजालंविच्छिद्यस्वबाणैरावृणोन्नभः
दैत्यांश्चबाणवात्याभिः पीडितानकरोत्तदा ८
प्रचंडजालबाणौघैरपातयतभूतले
खड्गरोम्णः शिरः कोपात्तथापरशुनाच्छिनत् ९
बलाहकस्यचशिरः खट्वागेनाकरोद्द्विधा
बद्ध्वाचघस्मरं दैत्यंपाशेनाभ्यहनाद्भुवि १०
वृषभेणहताः केचित्केचिद्बाणैर्निराकृताः
नशेकुरसुराः स्थातुंगजाः सिंहार्दितायथा ११
ततः कोपपरीतात्मावेगाद्रुद्रंजलंधरः
आह्वयामाससमरेतीव्राशनिसमस्वनः १२
जलंधरउवाच-

युध्यस्वाद्यमयासार्द्धंकिमेभिर्निहितैस्तव
यच्चकिंचिद्बलंतेऽस्तितद्दर्शयजटाधर १३
नारदउवाच
इत्युक्त्वाबाणसप्तत्याजघानवृषभध्वजम्
तानप्राप्तान्शितैर्बाणैश्चिच्छेदप्रहसन्निव १४
ततोहयान्ध्वजंछत्रंधनुश्चिच्छेदसप्तभिः
सच्छिन्नधन्वाविरथोगदामादायवीर्यवान् १५
अभ्यधावच्छिवस्तावद्गदाबाणैर्द्विधाकरोत्
तथापिमुष्टिमुद्यम्यययौरुद्रजिघांसया १६
तावच्छिवेनबाणौघैःक्रोशमात्रमपाकृतः
ततोजालंधरोदैत्योमत्वारुद्रंबलाधिकम् १७
ससर्जमायांगांधर्वीमद्भुतांरुद्रमोहिनीम्
ततोजगुश्चननृतुर्गंधर्वाप्सरसांगणाः १८
तालवेणुमृदंगांश्चवादयंतःपरस्परम्
तंदृष्ट्वामहदाश्चर्यंरुद्रोनादविमोहितः १९
पतितान्यपिशस्त्राणिकरेभ्योनविवेदसः
एकाग्रभूतमालोक्यरुद्रं दैत्योजलंधरः २०
कामार्त्तःसजगामाशुयत्रगौरीस्थिताभवत्
युद्धेशुंभनिशुंभाख्यौस्थापयित्वामहाबलौ २१
दशदोर्दंडपंचास्यस्त्रिनेत्रश्चजटाधरः
महावृषभमारूढःसबभूवजलंधरः २२
अथरुद्रंसमायांतमालोक्यभववल्लभा
अभ्याययौसखीमध्यात्तद्दर्शनपथेऽभवत् २३
यावद्ददर्शचार्वंगींपार्वतींदनुजेश्वरः
तावत्सवीर्यंमुमुचेजडांगश्चाभवत्तदा २४
अथज्ञात्वातदागौरीदानवंभयविह्वला
जगामांतर्हितातावत्सातदोत्तरमानसम् २५
तामदृष्ट्वातदादैत्यःक्षणाद्विद्युल्लतामिव
जवेनायात्पुनर्युद्धंयत्रदेवोवृषध्वजः २६
पार्वत्यपिमहाविष्णुंसस्मारमनसातदा

तावद्ददर्शतंदेवीसोपविष्टंसमीपगम् २७
पार्वत्युवाच
विष्णोजलंधरोदैत्यःकृतवान्परमाद्भुतम्
तत्किंनविदितंतेऽस्तिचेष्टितंतस्यदुर्मतेः २८
श्रीभगवानुवाच-
तेनैवदर्शितःपंथावयमप्यन्वयामहे
नान्यथासभवेद्वध्यः पातिव्रत्यात्सुरक्षितः २९
नारदउवाच-
जगामविष्णुरित्युक्त्वापुनर्जालंधरंपुरम्
अथरुद्रश्चगंधर्वानुगतःसंगरेस्थितः ३०
अंतर्द्धानगतांमायांदृष्ट्वातुबुबुधेतदा
ततःशिवोविस्मितमानसःपुनर्जगामयुद्धायजलंधरंरुषा ३१
सचापिदैत्यःपुनरागतंशिवंदृष्ट्वाशरौघैःसमवाकिरद्रणे ३२
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्त्तिकमाहात्म्ये
श्रीकृष्णसत्यभामासंवादेदैत्यकपटवर्णनोनामद्व्यधिकशततमोऽध्यायः १०२

त्र्यधिकशततमोऽध्यायः-

नारदउवाच-
विष्णुर्जालंधरंगत्वातद्दैत्यपुटभेदनम्
पातिव्रत्यस्यभंगायवृंदायाश्चाकरोन्मतिम् १
अथवृंदारकादेवीस्वप्नमध्येददर्शह
भर्त्तारंमहिषारूढं तैलाभ्यक्तंदिगंबरम् २
कृष्णप्रसूनभूषाढ्यंक्रव्यादगणसेवितम्
दक्षिणाशांगतंमुंडंतमसाव्यावृतंतदा ३
स्वपुरंसागरेमग्नंसहसैवात्मनासह
ततःप्रबुद्धासाबालास्वस्वप्नंप्रविचिन्वती ४
ददर्शोदितमादित्यंसच्छिद्रंनिश्चलंमुहुः
तदनिष्टमितिज्ञात्वारुदतीभयविह्वला ५
कुत्रचिन्नालभच्छर्मगोपुराट्टालभूमिषु
ततःसखीद्वययुतानगरोद्यानमागमत् ६

तत्रापिसागताबालानालभत्कुत्रचित्सुखम्
वनाद्वनांतरंयातानैववेदात्मनस्तदा ७
ततोभ्रमंतेसाबालाददर्शातिविभीषणौ
राक्षसौसिंहवदनौदंष्ट्रानयनभीषणौ ८
तौदृष्ट्वाविह्वलातीवपलायनपरातदा
ददर्शतापसंशांतंसशिष्यंमौनमास्थितम् ९
ततस्तत्कंठअ्रासज्यनिजांबाहुलतांभयात्
मुनेमांरक्षशरणमागतामित्यभाषत १०
मुनिस्तांविह्वलांदृष्ट्वाराक्षसानुगतांतदा
हुंकारेणैवतौघोरौचकारविमुखौरुषा ११
यद्धुंकारभयत्रस्तौदृष्ट्वातौगगनंगतौ
प्रणम्यदंडवद्भूमौवृंदावचनमब्रवीत् १२
वृंदोवाच
रक्षिताहंत्वयाघोराद्भयात्तस्मात्कृपानिधे
किंचिद्विज्ञप्तुमिच्छामिकृपयातन्निशामय १३
जलंधरोहिमेभर्त्तारुद्रंयोद्धुंगतःप्रभो
सतत्रास्तिकथंयुद्धेतन्मेकथयसुव्रत १४
नारदउवाच-
मुनिस्तद्वाक्यमाकर्ण्यकृपयोर्ध्वमवैक्षत
तावत्कपीशावायातौतंप्रणम्याग्रतःस्थितौ १५
ततस्तद्भ्रूलतासंज्ञानियुक्तौगगनंगतौ
गत्वाक्षणार्द्धादागत्यवानरावग्रतःस्थितौ १६
शिरःकबंधहस्तौतौदृष्ट्वाब्धितनयस्यसा
पपातमूर्छिताभूमौभर्तृव्यसनदुःखिता १७
कमंडलुजलैःसिक्तामुनिनाश्वासितातदा
स्वभर्तृभालेसाभालंकृत्वाखिन्नारुरोदह १८
वृंदोवाच-
यःपुरासुखसंवादैर्विनोदयसिमांविभो
सकथंनवदस्यद्यवल्लभांमामनागसम् १९
येनदेवाःसगंधर्वानिर्जिताहरिणासह

सकथंतापसेनत्वं त्रैलोक्यविजयीहतः २०
नारदउवाच-
रुदित्वेतितदावृंदातंमुनिंवाक्यमब्रवीत्
वृंदोवाच
कृपानिधेमुनिश्रेष्ठजीवनंमेऽस्यसुप्रियम् २१
त्वमेवास्यपुनःशक्तोजीवनायमतोमम
अथतद्वाक्यमाकर्ण्यप्रहस्यमुनिरब्रवीत् २२
मुनिरुवाच
नायंजीवयितुंशक्योरुद्रेणनिहतोयुधि
तथापित्वत्कृपाविष्टएवंसंजीवयाम्यहम् २३
नारदउवाच
इत्युक्त्वांतर्दधेयावत्तावत्सागरनंदनः
वृंदामालिंग्यतद्वक्त्रंचुचुंबेप्रीतमानसः २४
अथवृंदापिभर्त्तारंदृष्ट्वाहर्षितमानसा
रेमेतद्वनमध्यस्थातद्युक्ताबहुवासरम् २५
कदाचित्सुरतस्यांतेदृष्ट्वाविष्णुंतमेवहि
निर्भर्त्स्यक्रोधसंयुक्तावृंदावचनमब्रवीत् २६
वृंदोवाच
धिक्तवेदंहरेशीलंपरदाराभिगामिनः
ज्ञातोऽसित्वंमयासम्यङ्मायाप्रत्यक्षतापसः २७
यौत्वयामाययाद्वास्थौस्वकीयौदर्शितौमम
तावेवराक्षसौभूत्वाभार्यांतवहरिष्यथ २८
त्वंचापिभार्यादुःखार्तोवनेकपिसहायवान्
भ्रमसर्वेश्वरेणायंयस्तेशिष्यत्वमागतः २९
इत्युक्त्वासातदावृंदाप्राविशद्धव्यवाहनम्
विष्णुनावार्यमाणापितस्मिन्नासक्तमानसा ३०
ततोहरिस्तामनुसंस्मरन्मुहुर्वृंदाचिताभस्मरजोवगुंठितः
तत्रैवतस्थौमुनिसिद्धसंघैः प्रबोध्यमानोपिययौनशांतिम् ३१
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्तिकमाहात्म्ये
श्रीकृष्णसत्यभामासंवादेवृंदाचिताग्निप्रवेशोनामत्र्यधिकशततमोऽध्यायः

१०३

चतुरधिकशततमोऽध्यायः-

नारदउवाच-
ततोजलंधरोदृष्ट्वारुद्रमद्भुतविक्रमम्
चकारमाययागौरींत्र्यबकंमोहयंस्तदा १
रथोपरिगतांदृष्ट्वारुदंतींचतदाशिवः
शुंभनिशुंभदैत्यैश्चवध्यमानांददर्शसः २
गौरींतथाविधांदृष्ट्वाशिवोऽप्युद्विग्नमानसः
अवाङ्मुखःस्थितस्तूष्णींविस्मृत्यस्वपराक्रमम् ३
ततोजलंधरोवेगात्त्रिभिर्विव्याधसायकैः
आपुंखमग्नैस्तंरुद्रंशिरस्युरसिचोदरे ४
ततोजज्ञेसतांमायांविष्णुनासंप्रबोधितः
रौद्ररूपधरोजातोज्वालामालातिभीषणः ५
तस्यातीवमहारौद्रंरूपंदृष्ट्वामहासुराः
नशेकुःप्रमुखेस्थातुंभेजिरेचदिशोदश ६
ततःशापंददौदेवस्तयोःशुंभनिशुंभयोः
ममयुद्धादपक्रांतौगौर्यावध्यौभविष्यथः ७
पुनर्जलंधरोवेगाद्ववर्षनिशितैःशरैः
बाणांधकारसंच्छन्नंयथाभूमितलंमहत् ८
यावद्रुद्रःप्रचिच्छेदतस्यबाणांस्त्वरान्वितः
तावत्सपरिघेणाशुजघानवृषभंबली ९
वृषस्तेनप्रहारेणपरावृत्तोरणांगणात्
रुद्रेणाकृष्यमाणोऽपिनतस्थौरणभूमिषु १०
ततःपरमसंक्रुद्धोरुद्रोरौद्रवपुर्द्धरः
चक्रंसुदर्शनंवेगाच्चिक्षेपादित्यवर्चसम् ११
प्रदहद्रोदसीवेगात्तदासाद्यजलंधरम्
जहारतच्छिरःकायान्महदायतलोचनम् १२
रथात्कायःपपातोर्व्यांनादयन्वसुधातलम्
तेजश्चनिर्गतंदेहात्तद्रुद्रेलयमागमत् १३

दृष्ट्वादेहोद्भवंतेजस्तद्गौरीशेलयंगतम्
अथचेंद्रादयोदेवाहर्षादुत्फुल्ललोचनाः १४
प्रणम्यशिरसारुद्रंशशंसुर्विष्णुचेष्टितम्
देवाऊचुः
महादेवत्वयादेवारक्षिताःशत्रुजाद्भयात् १५
किंचिदन्यत्समुद्भूतंतत्रकिंकरवामहै
वृंदालावण्यसंभ्रांतोविष्णुस्तिष्ठतिमोहितः १६
ईश्वरउवाच
गच्छध्वंशरणंदेवाविष्णोर्मोहापनुत्तये
शरण्यांमोहिनींमायांसावःकार्यंकरिष्यति १७
नारदउवाच
इत्युक्त्वांतर्दधेदेवःसहभूतगणैस्तथा
देवाश्चतुष्टुवुर्मूलप्रकृतिंभक्तवत्सलाम् १८
देवाऊचुः
यदुद्भवाःसत्वरजस्तमोगुणाःसर्गस्थितिध्वंसनिदानकारणम्
यदिच्छयाविश्वमिदंभवाभवौतनोतिशुद्धांप्रकृतिंनताःस्मताम् १९
येहित्रयोविंशतिभेदिसंज्ञिताजगत्यशेषेसमधिष्ठितापुरा
यद्रूपकर्माणिजडास्त्रयोऽपितेदेवाविदुर्नप्रकृतिंनताःस्मताम् २०
यद्भक्तियुक्ताःपुरुषास्तुनित्यंदारिद्र्यव्यामोहपराभवादिकम्
नप्राप्नुवंत्येवहिभक्तवत्सलांसदैवविष्णोःप्रकृतिंनताःस्मताम् २१
नारदउवाच
स्तोत्रमेतत्त्रिसंध्यंयःपठेदेकाग्रमानसः
दारिद्रमोहदुःखानिनकदाचित्स्पृशंतितम् २२
इतिस्तुवंतस्तेदेवास्तेजोमंडलमास्थिताम्
ददृशुर्गगनेतत्रज्वालाव्याप्तदिगंतराम् २३
तन्मध्याद्भारतींसर्वेददृशुर्व्योमचारिणीम्
अहमेवत्रिधाभिन्नातिष्ठामित्रिविधैर्गुणैः २४
गौरीलक्ष्मीस्वराचेतिरजःसत्त्वतमोगुणैः
तत्रगच्छततंकार्यंविधास्यंतिचवःसुराः २५
नारदउवाच-

शृरवतामितिदेवानामंतर्द्धानमगान्महः
देवानांविस्मयोत्फुल्लनेत्राणांतत्तदानृप २६
ततःसर्वेऽपितेदेवागत्वातद्वाक्यनोदिताः
गौरींलक्ष्मींस्वरांचैवप्रणेमुर्भक्तितत्पराः २७
ततस्तास्तान्सुरान्दृष्ट्वाप्रणतान्भक्तवत्सलाः
बीजानिप्रददुस्तेभ्योवाक्यान्यूचुश्चभूमिप २८
देव्यऊचुः
इमानिक्षेत्रबीजानिविष्णुर्यत्रावतिष्ठति
निर्वपध्वंततःकार्यंभवतांसिद्धिमेष्यति २९
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्तिकमाहात्म्ये श्रीकृष्णसत्यभामासंवादेजालंधरवधोनामचतुरधिकशततमोऽध्यायः १०४

पञ्चाधिशततमोऽध्यायः

नारदउवाच
क्षिप्तेभ्यस्तत्रबीजेभ्योवनस्पत्यस्त्रयोभवन्
धात्रीचमालतीचैवतुलसीचनृपोत्तम १
धात्र्युद्भवास्मृताधात्रीमाभवामालतीस्मृता
गौरीभवाचतुलसीतमःसत्त्वरजोगुणाः २
स्त्रीरूपिरयौवनस्पत्यौदृष्ट्वाविष्णुस्तदानृप
उत्तस्थौसंभ्रमाद्वृंदारूपातिशयमोहितः ३
ददर्शतास्तदामोहात्कामासक्तेनचेतसा
तंचापितुलसीधात्र्यौरागेणैवावलोकताम् ४
यच्चलक्ष्म्यापुराबीजंमाययैवसमर्पितम्
तस्मात्तदुद्भवानारीतस्मिन्नीर्ष्यायुताभवत् ५
अतःसाबर्बरीत्याख्यामाधवस्यातिगर्हिता
धात्रीतुलस्यैतद्रागात्तस्यप्रीतिप्रदेसदा ६
ततोविस्मृतदुःखोऽसौविष्णुस्ताभ्यांसहैवतु
वैकुंठमगमद्धृष्टःसर्वदेवनमस्कृतः ७
कार्तिकोद्यापनेविष्णोस्तस्मात्पूजाविधीयते
तुलसीमूलदेशेतुप्रीतिदासायतःस्मृता ८

तुलसीकाननंराजन्गृहेयस्यावतिष्ठते
तद्गृहंतीर्थरूपंतुनायांतियमकिंकराः ९
सर्वपापहरंपुण्यंकामदंतुलसीवनम्
रोपयंतिनरश्रेष्ठानतेपश्यंतिभास्करिम् १०
दर्शनंनर्मदायास्तुगंगास्नानंतथैवच
तुलसीवनसंसर्गःसममेतत्त्रयंस्मृतम् ११
रोपणात्पालनात्सेकाद्दर्शनात्स्पर्शनान्नृणाम्
तुलसीदहतेपापंवाङ्मनःकायसंचितम् १२
तुलसीमंजरीभिर्यःकुर्याद्धरिहरार्चनम्
नसगर्भगृहंयातिमुक्तिभागीनसंशयः १३
पुष्करादीनितीर्थानिगंगाद्याःसरितस्तथा
वासुदेवादयोदेवास्तिष्ठंतितुलसीदले १४
तुलसीमंजरीयुक्तोयदिप्राणान्विमुंचति
विष्णोःसायुज्यमाप्नोतिसत्यंसत्यंनृपोत्तम १५
तुलसीमृत्तिकालिप्तोयस्तुप्राणान्विमुचंति
यमोऽपिनेक्षितुंशक्तोयुक्तंपापशतैरपि १६
तुलसीकाष्ठजंयस्तुचंदनंधारयेन्नरः
तद्देहंनस्पृशेत्पापंक्रियमाणमपीहयत् १७
तुलसीविपिनच्छायायत्रयत्रभवेन्नृप
तत्रश्राद्धंप्रकर्त्तव्यंपितॄणांदत्तमक्षयम् १८
धात्रीछायासुयःकुर्यात्पिंडदानंनृपोत्तम
तृप्तिंचयांतिपितरस्तस्ययेनरकेस्थिताः १९
मूर्ध्निपाणौमुखेचैवदेहेचनृपसत्तम
धत्तेधात्रीफलंयस्तुसविज्ञेयोहरिःस्वयम् २०
धात्रीफलंचतुलसीमृत्तिकाद्वारकोद्भवा
यस्यदेहेस्थितानित्यंसजीवन्मुक्तउच्यते २१
धात्रीफलविमिश्रैस्तुतुलसीदलमिश्रितैः
जलैःस्नातिनरस्तस्यगंगास्नानफलंस्मृतम् २२
देवार्चनंनरःकुर्याद्धात्रीपत्रैःफलैरपि
सुवर्णपुष्पैर्विविधैरर्चनस्याप्नुयात्फलम् २३

तीर्थानिमुनयोदेवायज्ञाःसर्वेऽपिकार्तिके
नित्यंधात्रींसमाश्रित्यतिष्ठंत्यर्केतुलाश्रिते २४
द्वादश्यांतुलसीपत्रंधात्रीपत्रंतुकार्तिके
लुनातिसनरोगच्छेन्निरयानतिगर्हितान् २५
धात्रीछायांसमाश्रित्यकार्तिकेऽन्नभुनक्तियः
अन्नसंसर्गजंपापमावर्षंतस्यनश्यति २६
धात्रीमूलेतुयोविष्णुंकार्तिकेऽचयतेनरः
विष्णुक्षेत्रेषुसर्वेषुपूजितस्तेनसर्वदा २७
धात्रीतुलस्योर्माहात्म्यमपिदेवश्चतुर्मुखः
नसमर्थोभवेद्वक्तुंयथादेवस्यशार्ङ्गिणः २८
धात्रीतुलस्युद्भवकारणंचशृणोतियःश्रावयतेचभक्त्या
विधूतपाप्मासहपूर्वजैश्चस्वर्गंव्रजत्यग्र्यविमानसंस्थः २९
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्तिकमाहात्म्येश्री कृष्णसत्यभामासंवादेधात्रीतुलस्योर्माहात्म्यंनामपंचाधिकशततमोऽध्यायः१०५

षडधिकशततमोऽध्यायः

पृथरुवाच
सेतिहासमिमंब्रह्मन्माहात्म्यंकथितंत्वया
अत्याश्चर्यकरंसम्यक्तुलस्यास्तुश्रुतंमहत् १
यदूर्जव्रतिनःपुंसःफलंमहदुदाहृतम्
तत्पुनर्ब्रूहिमाहात्म्यंकेनचीर्णमिदंकथम् २
नारदउवाच
आसीत्सह्याद्रिविषयेकरवीरपुरेपुरा
ब्राह्मणोधर्मवित्कश्चिद्धर्मदत्तोऽतिविश्रुतः ३
विष्णुव्रतकरःशश्वद्विष्णुपूजारतःसदा
द्वादशाक्षरविद्यायांजपनिष्ठोऽतिथिप्रियः ४
कदाचित्कार्तिकेमासिहरिजागरणायसः
रात्र्यातुर्यांशशेषायांजगामहरिमंदिरम् ५
हरिपूजोपकरणान्प्रगृह्यव्रजतातदा

तेनदृष्टासमायातारात्तसीभीमनिःस्वना ६
वक्रदंष्ट्राननाजिह्वानिमग्नारक्तलोचना
दिगंबराशुष्कमांसालंबोष्ठीघर्घरस्वना ७
तांदृष्ट्वाभयवित्रस्तःकंपितावयवस्तदा
पूजोपकरणैर्वेगात्पयोभिश्चाहनद्भयात् ८
संस्मृत्यचहरेर्नामतुलसीयुतवारिणा
साहतापातकंतस्मात्तस्याःसर्वमगात्तयम् ९
अथसंस्मृत्यसापूर्वजन्मकर्मविपाकजम्
स्वांदशामब्रवीत्सर्वांदंडवत्तंप्रणम्यसा १०
कलहोवाच
पूर्वकर्मविपाकेनदशामेतांगताह्यहम्
तत्कथंतुपुनर्विप्रयाम्युत्तमगतिंशुभाम् ११
नारदउवाच
तांदृष्ट्वाप्रणतामग्रेवदमानांस्वकर्मतत्
अतीवविस्मितोविप्रस्तदावचनमब्रवीत् १२
धर्मदत्तउवाच
केनकर्मविपाकेनत्वंदशामीदृशींगता
कुतस्त्वंकाचकिंशीलातत्सर्वंकथयस्वमे १३
कलहोवाच
सौराष्ट्रनगरेब्रह्मन्भित्तुनामाभवद्द्विजः
तस्याऽहगृहिणीपूर्वंकलहाख्यातिनिष्ठुरा १४
नकदाचिन्मयाभर्तुर्वचसापिशुभंकृतम्
नार्पितंतस्यमिष्टान्नंभर्तुर्वचनभंगया १५
कलहप्रिययानित्यंभयोद्विग्नस्तदाद्विजः
परिणेतुंतदाऽन्यासमतिंचक्रेपतिर्मम १६
ततोगरंसमादायप्राणास्त्यक्तामयाद्विज
अथबध्वाबध्यमानांमांविनिन्युर्यमानुगाः १७
यमश्चमांतदादृष्ट्वाचित्रगुप्तमपृच्छत
यमउवाच
अनयाकिंकृतंकर्मचित्रगुप्तविलोकय १८

प्राप्नोत्वेषाकर्मफलंशुभंवाशुभमेवच
चित्रगुप्तस्ततोवाक्यंभर्त्सयन्समुवाचह १९
चित्रगुप्तउवाच
अनयातुशुभंकर्मकृतंकिंचिन्नविद्यते
मिष्टान्नंभुक्तमनयानभर्तरितदर्पितम् २०
अतश्चवल्गुलीयोन्यांस्वविष्टादावतिष्ठतु
भर्तुर्द्वेषकरीत्वेषानित्यंकलहकारिणी २१
विष्टादाशूकरीयोन्यांततस्तिष्ठत्वियंहरे
पाकभांडेसदाभुक्तंनित्यंचैवानयायतः २२
तस्माद्दोषाद्बिडालीतुस्वजातापत्यभक्षिणी
भर्तारमनयोद्दिश्यह्यात्मघातःकृतोयतः २३
तस्मात्प्रेतपिशाचेषुतिष्ठत्वेषातिनिंदिता
ततश्चैवमरुंदेशंप्रापितव्याभटैःसह २४
तत्रप्रेतशरीराख्याचिरंतिष्ठत्वियंततः
इत्थंयोनित्रयंत्वेषाभुनक्त्वाशुभकारिणी २५
कलहोवाच–
साहंपंचशताब्दानिप्रेतदेहेस्थिताकिल
क्षुतृड्भ्यांपीडितानित्यंदुःखितास्वेनकर्मणा २६
ततःक्षुत्पीडितानित्यंशरीरंवणिजस्त्वहम्
आयातादक्षिणंदेशंकृष्णावेरायास्तुसंगमे २७
तत्तीरसंश्रितायावत्तावत्तस्यशरीरतः
शिवविष्णुगणैर्दूरमपाकृष्टाबलादहम् २८
ततःक्षुत्क्षामयादृष्टोभ्रमंत्यात्वंमयाद्विज
प्रक्षिप्ततुलसीवारिसंसर्गगतपापया २९
तत्कृपांकुरुविप्रेंद्रकथंमुक्तिमियाम्यहम्
योनित्रयादतिभयादस्माच्चप्रेतदेहतः ३०
इत्थंनिशम्यकलहावचनंद्विजश्चतत्कर्मपाकभवविस्मयदुःखयुक्तः
तद्ग्लानिदर्शनकृपाचलचित्तवृत्तिर्ध्यात्वाचिरंसवचनंनिजगाददुःखात् ३१
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्तिक
माहात्म्येकलहोपाख्यानंनामषडधिकशततमोऽध्यायः १०६

सप्ताधिकशततमोऽध्यायः

धर्मदत्तउवाच
विलयंयांतिपापानितीर्थदानव्रतादिभिः
प्रेतदेहस्थितायास्तेतेषुनैवाधिकारिता १
त्वद्ग्लानिदर्शनादस्मात्खिन्नंचमममानसम्
नैवनिर्वृतिमायातित्वामनुद्धृत्यदुःखिताम् २
पातकंचतवात्युग्रंयोनित्रयविपाकदम्
नैवान्यैःक्षीयतेपुण्यैःप्रेतत्वंचातिगर्हितम् ३
तस्मादाजन्मजनितंयन्मयाकार्तिकव्रतम्
तत्पुण्यस्यार्द्धभागेनसद्गतिंत्वमवाप्नुहि ४
कार्तिकव्रतपुण्येननसाम्यंयांतिसर्वथा
यज्ञदानानितीर्थानिव्रतान्यपियतोध्रुवम् ५
नारदउवाच
इत्युक्त्वाधर्मदत्तोऽसौयावत्तामभ्यषेचयत्
तुलसीमिश्रतोयेनश्रावयन्द्वादशाक्षरम् ६
तावत्प्रेतत्वनिर्मुक्ताज्वलदग्निशिखोपमा
दिव्यवपुर्धराजातालावण्याद्भासितादिशः ७
ततःसादंडवद्भूमौप्रणनामाथतंद्विजम्
उवाचचतदावाक्यंहर्षगद्गदभाषिणी ८
कलहोवाच
त्वत्प्रसादाद्द्विजश्रेष्ठविमुक्तानिरयादहम्
पापाब्धौमज्ञमानायास्त्वंनोभूतोऽसिमेध्रुवम् ९
नारदउवाच
इत्थंसावदतीविप्रंददर्शायातमंबरात्
विमानंभास्वरंयुक्तंविष्णुरूपधरैर्गणैः १०
अथसातद्विमानाग्रचद्वास्थाभ्यामधिरोहिता
पुण्यशीलसुशीलाभ्यामप्सरोगणसेवितम् ११
तद्विमानंतदापश्यद्धर्मदत्तःसविस्मयः
पपातदंडवद्भूमौदृष्ट्वातौपुण्यरूपिणौ १२
पुण्यशीलसुशीलौतमुत्थाप्यप्रणतंद्विजम्

अभ्यनंदयतांवाक्यमूचतुर्द्धर्मशालिनौ १३
गणाऊचतुः
साधुसाधुद्विजश्रेष्ठयस्त्वंविष्णुरतःसदा
दीनानुकंपीधर्मज्ञोविष्णुव्रतपरायणः १४
आजन्मसच्छुभंह्येतद्यत्त्वयाकार्त्तिकव्रतम्
कृतंतस्यार्द्धदानेनयदस्याःपूर्वसंचितम् १५
जन्मांतरशतोद्भूतंपापंतद्विलयंगतम्
हरिजागरणाद्यैश्चविमानमिदमागमत् १६
वैकुराठभवनंविष्णोःसान्निध्यंचस्वरूपता
तेधन्याःकृतकृत्यास्तेतेषांचसफलोभवः १७
यैर्भक्त्याराधितोविष्णुर्धर्मदत्तत्वयायथा
सम्यगाराधितोविष्णुःकिंनयच्छतिदेहिनाम् १८
औत्तानचरणिर्येनध्रुवत्वेस्थापितःपुरा
यन्नामस्मरणादेवदेहिनोयांतिसद्गतिम् १९
ग्राहगृहीतोनागेंद्रोयन्नामस्मरणात्पुरा
विमुक्तःसन्निधिंप्राप्तोजातोयोजयसंज्ञकः २०
अतस्त्वयार्चितोविष्णुःस्वसान्निध्यंप्रदास्यति
बहून्यब्दसहस्राणिभार्याद्वययुतस्यते २१
ततःपुरायक्षयेजातेयदायास्यसिभूतले
सूर्यवंशोद्भवोराजाविख्यातस्त्वंभविष्यसि २२
नाम्नादशरथस्तत्रभार्याद्वययुतःपुनः
तृतीयंयानयाचापियातेपुरायार्द्धभागिनी २३
तत्रापितवसान्निध्यंविष्णुर्यास्यतिभूतले
आत्मानंतवपुत्रत्वेप्रकल्प्यामरकार्यकृत् २४
तवाजन्मव्रतादस्माद्विष्णुसंतुष्टिकारकात्
नयज्ञानचदानानिनतीर्थान्यधिकानिते २५
धन्योऽसिविप्रप्रयतस्त्वयैतद्व्रतंकृतंतुष्टिकरंजगद्गुरोः
यदर्धभागाच्चफलान्मुरारेःप्रणीयतेस्माभिरियंसलोकताम् २६

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
कार्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेकलहोपाख्यानोनाम

सप्ताधिकशततमोऽध्यायः १०७

अष्टाधिकशततमोऽध्यायः

नारदउवाच
इत्थंतद्वचनंश्रुत्वाधर्मदत्तःसविस्मयः
प्रणम्यदंडवद्भूमौवाक्यमेतदुवाचह १
धर्मदत्तउवाच
आराधयंतिसर्वेऽपिविष्णुंभक्तार्त्तिनाशिनम्
यज्ञैर्दानैर्व्रतैस्तीर्थैस्तपोभिश्चयथाविधि २
विष्णुप्रीतिकरंतेषांविष्णुसान्निध्यकारकम्
यत्कृत्वातानिचीर्णानिसर्वाण्यपिभवंतिहि ३
गणावूचतुः
साधुपृष्टंत्वयाविप्रशृणुष्वैकाग्रमानसः
सेतिहासांकथांविप्रकथ्यमानांपुराभवाम् ४
कांतिपुर्यांपुराचोलचक्रवर्त्तीनृपोऽभवत्
यस्यनाम्नाचतेदेशाश्चोलाख्याअभवन्किल ५
यस्मिन्शासतिभूचक्रंदरिद्रोनैवदुःखितः
पापबुद्धिःसरुग्वापिनैवकश्चिदभून्नरः ६
यस्याप्यत्यंतयज्ञस्यताम्रपर्णीतटावुभौ
सुवर्णयूपैःशोभाढ्यावास्तांचैत्ररथोपमौ ७
सकदाचिदगाद्राजाह्यनंतशयनंद्विज
यत्रासौजगतांनाथोयोगनिद्रामुपासते ८
तत्रश्रीरमणंदेवंसंपूज्यविधिवन्नृपः
मणिमुक्ताफलैर्दिव्यैःस्वर्णपुष्पैश्चशोभनैः ९
प्रणम्यदंडवद्यावदुपविष्टःसतत्रवै
तावद्ब्राह्मणमायांतमपश्यद्देवसन्निधौ १०
देवार्चनार्थमायांतंतुलस्युदकपाणिनम्
स्वपुरीवासिनंतत्रविष्णुदासावयंद्विजम् ११
तत्राभ्येत्यसविप्रर्षिर्देवदेवमपूजयत्
विष्णुसूक्तेनसंस्नाप्यतुलसीमंजरीदलैः १२

तुलसीपूजयातस्यरत्नपूजांतथाकृताम्
आच्छादितांसमालोक्यराजाक्रुद्धोऽब्रवीद्वचः १३
राजोवाच
माणिक्यस्वर्णपूजात्रशोभाढ्यायामयाकृता
ऋविष्णुदासकथंसेयमाच्छन्नातुलसीदलैः १४
विष्णुभक्तिंनजानासिवराकोऽसिमतोमम
यस्त्विमामतिशोभाढ्यांपूजामाच्छादयस्यहो १५
इतितद्वचनंश्रुत्वासक्रोधःसद्विजोत्तमः
राज्ञोगौरवमुल्लंघ्यजगादवचनंतदा १६
विष्णुदासउवाच
राजन्मुक्तिंनजानासिगर्वितोऽसिनृपश्रिया
किंस्विद्विष्णुव्रतंपूर्वंत्वयाचीर्णंवदस्वतत् १७
गणावूचतुः
तद्ब्राह्मणवचःश्रुत्वाप्रहस्यसनृपोत्तमः
विष्णुदासंतदागर्वादुवाचवचनंद्विज १८
इत्थंचेत्कथ्यसेविप्रविष्णुभक्त्यातिगर्वितः
भक्तिस्तेकियतीविष्णोर्दरिद्रस्याधनस्यच १९
यज्ञदानादिकंचैवविष्णुतुष्टिकरंकृतम्
नापिदेवालयंपूर्वंत्वयाविप्रक्वचित्कृतम् २०
ईदृशस्यापितेगर्वएषतिष्ठतिभक्तितः
तच्छृणवंतुवचोमेऽद्यसर्वेप्येतेद्विजोत्तमाः २१
साक्षात्कारमहंविष्णोरेषवादोगमिष्यति
यथातुसर्वेऽपिततोभक्तिंज्ञास्यथचावयोः २२
गणावूचतुः
इत्युक्त्वासनृपोगच्छन्निजंराजगृहंद्विजः
आरेभेवैष्णवंसत्रंकृत्वाचार्यंतुमुद्गलम् २३
ऋषिसंघसमाजुष्टंबभूवबहुदक्षिणम्
यद्वद्ब्रह्मकृतंपूर्वंगयाक्षेत्रेसमृद्धिमत् २४
विष्णुदासोऽपितत्रैवतस्थौदेवालयेव्रती
पंचैतान्नियमान्कृत्वाविष्णुतुष्टिकरान्सदा २५

माघोर्जयोर्व्रतंसम्यक्तुलसीवनपालनम्
एकादशीव्रतंजाप्यंद्वादशाक्षरविद्यया २६
उपचारैःषोडशभिर्गीतनृत्यादिमंगलैः
नित्यंविष्णोस्तथापूजांव्रतान्येतानिसोऽकरोत् २७
नित्यंसंस्मरणंविष्णोर्गच्छन्भुंजन्स्वपन्नपि
सर्वभूतस्थितंविष्णुमपश्यत्समदर्शनः २८
माघकार्तिकयोर्नित्यंविशेषनियमानपि
अकरोद्विष्णुतुष्ट्यर्थंसोद्यापनविधिंतथा २९
एवंसमाराधयतोःश्रियःपतिंतयोस्तुचोलेश्वरविष्णुदासयोः
अगादनेहाबहुतद्व्रतस्थयोस्तन्निष्ठकर्मेन्द्रियकर्मणोस्तयोः ३०

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
कार्तिकमाहात्म्ये श्रीकृष्णसत्यभामासंवादे कलहोपाख्याने
अष्टाधिकशततमोऽध्यायः १०८

नवाधिकशततमोऽध्यायः

गणावूचतुः
कदाचिद्विष्णुदासोऽथकृत्वानित्यविधिंद्विजः
पाककर्माकरोद्यावदहरत्कोप्यलक्षितः १
तमदृष्ट्वाप्यसौपाकंपुनर्नैवाकरोत्तदा
सायंकालार्चनस्यासौव्रतभंगभयाद्द्विजः २
द्वितीयेऽह्निततःपाकंकृत्वायावत्सविष्णवे
उपहारार्पणंकर्तुंतावत्कोप्यहरत्पुनः ३
एवंसप्तदिनंतस्यपाकंकोप्यहरद्द्विज
जातःसविस्मयःसोऽथमनस्येवव्यचारयत् ४
अहोनित्यंसमभ्येत्यकःपाकंहरतेमम
क्षेत्रसंन्यासिनांस्थानमत्याज्यंसर्वथामया ५
पुनःपाकंविधायात्रभुज्यतेयदिचेन्मया
सायंकालार्चनंचैतत्परित्याज्यंकथंमया ६
किंचित्पाकंविधायैतद्गोप्तव्यंतुमयानहि
अनिर्वेद्यहरौसर्वंवैष्णवैर्नैवभुज्यते ७

उपोषितोऽहचकथंतिष्ठाम्यत्रव्रतस्थितः
अद्यसंरक्षणंसम्यक्पाकस्यात्रकरोम्यहम् ८
इतिपाकंविधायासौतत्रैवालक्षितःस्थितः
तावद्ददर्शचांडालंपाकान्नहरणेस्थितम् ९
क्षुत्क्षामंदीनवदनमस्थिचर्मावशेषितम्
तमालोक्यद्विजाग्र्योभूत्कृपयापन्नमानसः १०
विलोक्यान्नहरंविप्रस्तिष्ठतिष्ठेत्यभाषत
कथमत्तिभवान्रूक्षंघृतमेतद्गृहाणभोः ११
इत्थंब्रुवंतंविप्राग्र्यंआयांतंचविलोक्यसः
वेगादधावत्तद्भीत्यामूर्च्छितश्चपपातह १२
भीतंतंमूर्च्छितंदृष्ट्वाचांडालंसद्विजोत्तमः
वेगादभ्येत्यकृपयास्ववस्त्रां तैरवीजयत् १३
अथोत्थितंतमेवासौविष्णुदासोव्यलोकयत्
साक्षान्नारायणंदेवंशंखचक्रगदाधरम् १४
पीतांबरंचतुर्बाहुंश्रीवत्सांकंकिरीटिनम्
अतसीपुष्पसंकाशंकौस्तुभोरःस्थलंविभुम् १५
तंदृष्ट्वासात्विकैर्भावैरावृतोद्विजसत्तमः
स्तोतुंचापिनमस्कर्तुंतदानालंबभूवसः १६
अथशक्रादयोदेवास्तत्रैवाभ्याययुस्तदा
गंधर्वाप्सरसश्चापिजगुश्चननृतुर्मुदा १७
विमानशतसंकीर्णंदेवर्षिगणसंकुलम्
गीतवादित्रनिर्घोषंस्थानंतदभवत्तदा १८
ततोविष्णुःसमालिग्य स्वभक्तं सात्विकं तथा
सायुज्यमात्मनोदत्त्वानयद्वैकुंठमंदिरम् १९
विमानवरसंस्थानमास्थितंविष्णुसन्निधौ
दीक्षितश्चोलनृपतिर्विष्णुदासंददर्शह २०
वैकुंठभवनंयांतंविष्णुदासंविलोक्यसः
स्वगुरुंमुद्गलंवेगादाह्वयेत्थंवचोऽब्रवीत् २१
चोलउवाच
यत्स्पर्धयामयाचैतद्यज्ञदानादिकंकृतम्

सविष्णुरूपधृग्विप्रोयातिवैकुंठमंदिरम् २२
दीक्षितेनमयासम्यक्सत्रेऽस्मिन्विष्णवेत्वया
हुतमग्नौकृताविप्रादानाद्यैःपूर्णमानसाः २३
नैवाद्यापिसमेदेवःप्रसन्नोजायतेध्रुवम्
भक्त्यैवतस्यविप्रस्यसाक्षात्कारंददौहरिः २४
तस्माद्दानैश्चयज्ञैश्चनैवविष्णुःप्रसीदति
भक्तिरेवपरंतस्यनिदानंदर्शनेविभोः २५
गणावूचतुः
इत्युक्त्वाभागिनेयंस्वमभिषिच्यनृपासने
आबाल्याद्दीक्षितोयज्ञेसापुत्रत्वमगाद्यतः २६
तस्मादद्यापितद्देशेसदाराज्यांशभागिनः
स्वस्त्रेयाएवजायंतेतत्कृताचारवर्तिनः २७
यज्ञवाटंततोऽभ्येत्यवह्निकुंडाग्रतःस्थितः
त्रिरुच्चैर्व्याजहाराशुविष्णुंसंबोधयंस्तदा २८
विष्णोभक्तिंस्थिरांदेहिमनोवाक्कायकर्मभिः
इत्युक्त्वासोऽपतद्वह्नौसर्वेषामेवपश्यताम् २९
मुद्गलस्तुतदाक्रोधाच्छिखामुत्पाटयत्स्वकाम्
ततस्त्वद्यापितद्गोत्रेमुद्गलाविशिखाभवन् ३०
तावदाविरभूद्विष्णुःकुंडाग्नौभक्तवत्सलः
तमालिंग्यविमानाग्र्यंसमारोहयदच्युतः ३१
तमालिंग्यात्मसारूप्यंदत्त्वावैकुंठमंदिरम्
तेनैवसहदेवेशोजगामत्रिदशैर्वृतः ३२
नारदउवाच
योविष्णुदासःसतुपुण्यशीलोयश्चोलभूपःससुशीलनामा
एतावुभौतत्समरूपभाजौद्वाःस्थौकृतौतेनरमाप्रियेण ३३
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्र्यांसंहितायांकार्तिकमाहात्म्ये
श्रीकृष्णसत्यभामासंवादेकलहोपाख्यानंनामनवाधिकशततमोऽध्यायः १०९

दशाधिकशततमोऽध्यायः

धर्मदत्तउवाच

जयश्चविजयश्चैवविष्णोर्द्वास्थौमयाश्रुतौ
किंतुताभ्यांपुराचीर्णंयस्मात्तद्रूपधारिणौ १
गणावूचतुः
तृणबिंदोस्तुकन्यायांदेवहूत्यांपुराद्विज
कर्दमस्यतुदृष्टयैवपुत्रौद्वौसंबभूवतुः २
ज्येष्ठोजयःकनिष्ठोऽभूद्विजयश्चेतिनामतः
अन्यस्यामभवत्पश्चात्कपिलोयोगधर्मवित् ३
जयश्चविजयश्चैवविष्णुभक्तिरतौसदा
संनियम्येंद्रियग्रामंधर्मशीलौबभूवतुः ४
नित्यमष्टाक्षरीजाप्यौविष्णुव्रतकरावुभौ
साक्षात्कारंददौविष्णुस्तयोर्नित्यार्चनेसदा ५
मरुत्तेनकदाचित्तावाहूतौयज्ञकर्मणि
जग्मतुर्यज्ञकुशलौदेवर्षिगणसेवितौ ६
जयस्तत्राभवद्ब्रह्मायाजकोविजयोऽभवत्
ततोयज्ञविधिंकृत्स्नंपरिपूर्णंचचक्रतुः ७
मरुतोऽवभृथस्नातस्ताभ्यांवित्तंददौबहु
तत्समादायतौवित्तंजग्मतुःस्वाश्रमंप्रति ८
यजनायतदाविष्णोस्तुष्टयर्थंतौतदामुने
तद्धनंविभजंतोवैपस्पर्द्धातेपरस्परम् ९
जयोऽब्रवीत्समोभागःक्रियतामितितत्रसः
विजयश्चाब्रवीत्तत्रयल्लब्धंयेनतस्यतत् १०
ततोजयोऽशपत्क्रोधाद्विजयंक्षुब्धमानसः
गृहीत्वानददास्येतत्तस्माद्ग्राहोभवेतितम् ११
विजयस्तस्यतंशापंश्रुत्वासोऽप्यशपच्चतम्
मदभ्रांतोशपद्यस्मात्तस्मान्मातंगतांव्रज १२
तौतथाचरव्यतुर्विष्णुंदृष्ट्वानित्यार्चनेविभुम्
शापयोस्तुनिवृत्तिंतौययाचातेरमापतिम् १३
भक्तावावांकथंदेवग्राहमांतगयोनिगौ
भविष्यावःकृपासिंधोतच्छापोविनिवर्त्यताम् १४
श्रीभगवानुवाच

मद्भक्तयोर्वचोऽसत्यंनकदाचिद्भविष्यति
मयापिनान्यथाकर्तुंशक्यतेतत्कदाचन १५
प्रह्लादवचनात्स्तंभऽप्याविर्भूतोह्यहंपुरा
तथांबरीषवाक्येनजातोमार्गेस्वयंकिल १६
तस्माद्ध्रुवमिमौशापावनुभूयस्वयंकृतौ
लभेतांमत्पदंनित्यमित्युक्त्वांतर्दधेहरिः १७
गणावूचतुः
ततस्तौग्राहमातंगाबभूतांगंडकीतटे
जातिस्मरौचतद्योन्यामपिविष्णुव्रतेस्थितौ १८
कदाचित्सगजःस्नातुंकार्तिकेगंडकींगतः
तावज्जग्राहचग्राहःसंस्मरञ्छापकारणम् १९
ग्राहगृहीतोऽसौनागःसंस्मारश्रीपतिंतदा
तावदाविरभूद्विष्णुःशंखचक्रगदाधरः २०
तृतस्तौग्राहमातंगौचक्रंक्षिप्त्वासमुद्धृतौ
दत्त्वाचनिजसारूप्यंवैकुंठमनयद्विभुः २१
तदाप्रभृतितत्स्थानंहरिक्षेत्रमितिश्रुतम्
चक्रसंघर्षणाद्यस्मिन्पाषाणोऽपिहिलांछितः २२
ताविमौविश्रुतौलोकेजयश्चविजयश्चह
नित्यंविष्णुप्रियौद्वाःस्थौपृष्टौयौहित्वयाद्विज २३
अतस्त्वमपिधर्मज्ञनित्यंविष्णुव्रतेस्थितः
त्यक्तमात्सर्यदंभोहिभवस्वसमदर्शनः २४
तुलामकरमेषेषुप्रातःस्नायीसदाभव
एकादशीव्रतेतिष्ठतुलसीवनपालकः २५
ब्राह्मणानपिगाश्चापिवैष्णवांश्चसदाभज
मसूराश्चारनालाश्चवृंताकानपिखादमा २६
एवंत्वमपिदेहांतेतद्विष्णोःपरमंपदम्
प्राप्नोषिधर्मदत्तत्वंतद्भक्त्यैवयथावयम् २७
तवाजन्मव्रतात्तस्माद्विष्णुसंतुष्टिकारकात्
नयज्ञानचदानानिनतीर्थान्यधिकानिवै २८
धन्योऽसिविप्राग्र्ययतस्त्वयैतद्व्रतंकृतंतुष्टिकरंजगद्गुरोः

यत्पुरायभागाप्तफलंमुरारेःप्रणीयतेस्माभिरियंसलोकताम् २९
नारदउवाच
इत्थंतौधर्मदत्तंतमुपदिश्यविमानगौ
तयाकलहयासार्द्धंवैकुंठभवनंगतौ ३०
धर्मदत्तोप्यसौजातप्रत्ययस्तद्व्रतेस्थितः
देहांतेतद्विभोःस्थानंभार्याभ्यामन्वितोऽभ्यगात् ३१
इतिहासमिमंपुराभवंशृणुतेयश्चपुमान्यथाविधि
हरिसंनिधिकारिणींमतिंलभतेऽसौकृपयाजगद्गुरोः ३२

इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तर
खराडेकार्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेकलहो
पाख्यानेगणपूर्वपुरायवर्णनोनामदशाधिशततमोऽध्यायः११०

एकादशाधिकशततमोऽध्यायः

पृथुरुवाच
कृष्णावेरायातटाद्यस्मात्शिवविष्णुगणैःपुरा
वणिक्शरीरात्कलहानिर्मिताकथितात्वया १
प्रभावोऽयतयोर्नद्योःकिंवाक्षेत्रस्यतस्यवा
तन्मेकथयधर्मज्ञविस्मयोऽत्रमहान्मम २
नारदउवाच
कृष्णाकृष्णतनुःसाक्षाद्वेरायादेवोमहेश्वरः
तत्संगमप्रभावंतुनालंवक्तुंचतुर्मुखः ३
तथापितत्समुत्पत्तिंकीर्तयिष्यामितच्छृणु
चाक्षुषस्यांतरेपूर्वंमनोर्देवःपितामहः ४
सह्याद्रिशिखरेरम्येयजनायोद्यतोऽभवत्
सकृत्वायज्ञसंभारान्सर्वदेवगणैर्वृतः ५
युक्तोहरिहराभ्यांचतद्गिरेःशिखरंययौ
भृग्वादयोमुनिगणामुहूर्तेब्रह्मदैवते ६
तस्यदीक्षाविधानायसमाजंतत्रचक्रिरे
अथज्येष्ठांस्वरांपत्नींविष्णुराह्वयतद्द्विजैः ७
साशनैराययौतावद्भृगुर्विष्णुमुवाचह

भृगुरुवाच
विष्णोस्वरात्वयाहूताश्रायातिनहिसत्वरा ८
मुहूर्त्तातिक्रमश्चायंकार्योदीक्षाविधिःकथम्
विष्णुरुवाच
नायातिचेत्स्वराशीघ्रंगायत्र्यत्रविधीयताम् ९
एषापिनभवत्यस्यभार्याकिंपुरायकर्मणि
नारदउवाच
एवमेवहिरुद्रोऽपिविष्णोर्वाक्यममोदत १०
तच्छ्रुत्वासभृगुर्वाक्यंगायत्रींब्रह्मणस्तदा
निवेश्यदक्षिणेभागेदीक्षाविधिमथाकरोत् ११
यावद्दीक्षाविधिंतस्यविधेश्चक्रुर्विधानतः
तावदभ्याययौतत्रस्वरायज्ञस्थलेनृप १२
ततस्तांदीक्षितांदृष्ट्वागायत्रींब्रह्मणासह
सपत्नीर्षापराक्रोधात्स्वरावचनमब्रवीत् १३
स्वरोवाच
अपूज्यायत्रपूज्यन्तेपूज्यानांचव्यतिक्रमः
त्रीणितत्रभविष्यंतिदुर्भिक्षंमरणंभयम् १४
ममासनेकनिष्ठेयंभवद्भिःसन्निवेशिता
तस्मात्सर्वेजडीभूतानानारूपाभविष्यथ १५
इदंचदक्षिणेभागेह्युपविष्टामदासने
तस्माल्लोकैःसदाऽदृश्यातनुर्वहतुनिम्नगा १६
नारदउवाच
ततस्तच्छापमाकर्ण्यगायत्रीकंपितातदा
समुत्थायाशपद्देवैर्वार्यमाणापितांस्वराम् १७
तवभर्त्तायथाब्रह्मामामाप्येषतथाखलु
वृथाशपस्त्वंयस्मान्मांभवत्वमपिनिम्नगा १८
नारदउवाच
ततोहाहाकृताःसर्वेशिवविष्णुमुखाःसुराः
तदालोकत्रयंह्येतद्विनाशंयास्यतिध्रुवम् १९
देवाऊचुः

देविसर्वेवयंशप्ताब्रह्माद्यायत्त्वयाधुना
यदिसर्वेजडीभूताभविष्यामोऽत्रनिम्नगाः २०
तदालोकत्रयंह्येतद्विनाशंयास्यतिध्रुवम्
अविवेकःकृतस्तस्माच्छापोऽयविनिवर्त्यताम् २१
स्वरोवाच
नार्चितोहिगणाध्यक्षोयज्ञादौयत्सुरोत्तमाः
तस्माद्विघ्नंसमुत्पन्नंमत्क्रोधजमिदंखलु २२
नापिमद्वचनंह्येतदसत्यंजायतेखलु
तस्मात्स्वांशैर्जडीभूतायूयंभवतनिम्नगाः २३
आवामपिसपत्न्यौचस्वांशाभ्यामपिनिम्नगे
भविष्यावोऽत्रवैदेवाःपश्चिमाभिमुखावहे २४
नारदउवाच
इतितद्वचनंश्रुत्वाब्रह्मविष्णुमहेश्वराः
जडीभूताभवन्नद्यःस्वांशैरेवतदानृप २५
तत्रविष्णुरभूत्कृष्णावेण्यादेवोमहेश्वरः
ब्रह्माककुद्मिनीगंगापृथगेवाभवत्तदा २६
देवास्वानपितानंशान्जडीकृत्वाव्यिचक्षणाः
सह्याद्रिशिखरेभ्यस्ताःपृथगासन्सुनिम्नगाः २७
देवांशैःपूर्ववाहिन्योबभूवुःसरितांवराः
गायत्रीचस्वराचैवपश्चिमाभिमुखेतदा २८
योगेनाभवतांनद्यौसावित्रीतिप्रथांगते
ब्रह्मणास्थापितौतत्रयज्ञेहरिहरावुभौ २९
महाबलातिबलिनौनाम्नादेवौबभूवतुः
तयोर्नद्योस्तुमाहात्म्यंनाहंवक्तुंक्षमोनृप
ययुर्ब्रह्मादयोदेवाःस्वांशैस्तिष्ठंतिचापगाः ३०
कृष्णोद्भवंपापहरंपरंयःशृणोतियःश्रावयतेचभक्त्या
स्यात्तस्यपुण्यासकलाक्रियापितद्दर्शनस्नानसमुद्भवंफलम् ३१
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्तिकमाहात्म्ये
सत्य भामासंवादेकृष्णावेण्यामाहात्म्यवर्णनोनाम
एकादशाधिकशततमोऽध्यायः १११

द्वादशाधिकशततमोऽध्यायः

श्रीकृष्णउवाच
इतितद्वचनंश्रुत्वापृथुर्विस्मितमानसः
संपूज्यनारदंभक्त्याविससर्जतदाप्रिये १
तस्माद्व्रतत्रयंह्येतन्ममातीवप्रियंकरम्
माघकार्तिकयोस्तद्वत्तथैवैकादशीव्रतम् २
वनस्पतीनांतुलसीमासानांकार्तिकःप्रियः
एकादशीतिथीनांचक्षेत्राणांद्वारकामम ३
एतेषांसेवनंयस्तुकरोतिचजितेंद्रियः
समेवल्लभतांयातिनतथायजनादिभिः ४
पापेभ्योनभयंतेनकर्त्तव्यंनियमादपि
एतेषांसेवनंकांतेकुर्वतामत्प्रसादतः ५
सत्यभामोवाच
विस्मापनीयंतन्नाथयत्त्वयाकथितंमम
परदत्तेनपुण्येनकलहामुक्तिमागता ६
इत्थंप्रभावोमासोऽयकार्त्तिकस्तेप्रियंकरः
स्वामिद्रोहादिपापानिस्नानदानैर्गतानियत् ७
दत्तंचलभतेपुण्यंयत्परेणकृतंविभो
अदत्तंकेनमार्गेणलभतेचापिमानवः ८
श्रीकृष्णउवाच
अदत्तान्यपिपुण्यानिपापानिचयथानरैः
प्राप्यंतेकर्मणायेनतद्यथावन्निशामय ९
देशग्रामकुलानिस्युर्भागभांजिकृतादिषु
कलौतुकेवलंकर्त्ताफलभुक्पुण्यपापयोः १०
अकृतेऽपिहिसंसर्गेव्यवस्थेयमुदाहृता
संसर्गात्पुण्यपापानियथायांतिनिबोधतत् ११
एकत्रमैथुनाद्यानादेकपात्रस्थभोजनात्
फलार्द्धंप्राप्नुयान्मर्त्योयथावत्पुण्यपापयोः १२
अध्यापनाद्याजनाद्वाप्येकपंक्त्यशनादपि
तुर्यांशंपुण्यपापानांनित्यंप्राप्नोतिमानवः १३

एकासनादेकयानान्निःश्वासस्यांगसंगतः
षडंशंफलभागीस्यान्नयतंपुरायपापयोः १४
स्पर्शनाद्भाषणाद्वापिपरस्यस्तवनादपि
दशांशंपुरायपापानांनित्यंप्राप्नोतिमानवः १५
दर्शनश्रवणाभ्यांचमनोध्यानात्तथैवच
परस्यपुरायपापानांशतांशंप्राप्नुयान्नरः १६
परस्यनिंदां पैशुन्यंधिक्कारंचकरोतियः
तत्कृतंपातकंप्राप्यस्वपुरायंप्रददातिसः १७
कुर्वतःपुरायकर्माणिसेवांयःकुरुतेनरः
पत्नीभृतकशिष्येभ्योयदन्यःकोऽपिमानवः १८
तस्यसेवानुरूपेणद्रव्यंकिंचिन्नदीयते
सोऽपिसेवानुरूपेणतत्पुरायफलभाग्भवेत्
एकपंक्त्यश्नतांयस्तुलंघयेत्परिवेषणम् १९
तस्यपापषडंशंतुलभेद्वैपरिवेषकः
स्नानसंध्यादिकंकुर्वन्यःस्पृशेद्वाप्रभाषते २०
सपुरायकर्मषष्ठांशंदद्यात्तस्मैसुनिश्चितम्
धर्मोद्देशेनयोद्रव्यमपरंयाचतेनरः २१
तत्पुरायकर्मजंतस्यधनदस्त्वाप्नुयात्फलम्
अपहृत्यपरद्रव्यंपुरायकर्मकरोतियः २२
कर्मकृत्पापभाक्तत्रधनिनस्तद्भवंफलम्
नापनुद्यऋणंयस्तुपरस्यम्रियतेनरः २३
धनीतत्पुरायमाधत्तेस्वधनस्यानुरूपतः
बुद्धिदस्त्वनुमंताचयश्चोपकरणप्रदः २४
बलकृच्चापिषष्ठांशंप्राप्नुयात्पुरायपापयोः
प्रजाभ्यःपुरायपापानांराजाषष्ठांशमुद्धरेत् २५
शिष्याद्गुरुःस्त्रियोभर्त्तापितापुत्रात्तथैवच
स्वपतेरपिपुरायस्ययोषिदर्द्धमवाप्नुयात् २६
चित्तस्यानुव्रताशश्वद्वर्ततेतुष्टिकारिणी
परहस्तेनदानादिकुर्वतःपुरायकर्मणि २७
विनाभृतकपुत्राभ्यांकर्त्ताषष्ठांशमुद्धरेत्

वृत्तिदोवृत्तिसंभोक्तुःपुण्यमष्टांशमुद्धरेत् २८
आत्मनोवापरस्यापियदिसेवांनकारयेत् २९
श्रीकृष्णउवाच
इत्थंह्यदत्तान्यपिपुण्यपापान्यायांतिनित्यंपरसंचितानि
शृणुष्वचेमंइतिहासमग्र्यंपुराभवंपुण्यमतिप्रदंच ३०
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
कार्त्तिकमाहात्म्ये श्रीकृष्णसत्यभामासंवादेपुण्यपापांशकथनंनाम
द्वादशाधिकशततमोऽध्यायः ११२

त्रयोदशाधिकशततमोऽध्यायः

श्रीकृष्णउवाच
पुरावंतीपुरेवासीविप्रआसीद्धनेश्वरः
ब्रह्मकर्मपरिभ्रष्टःपापनिष्ठःसुदुर्मतिः १
रसकंबलचर्मादिविक्रयानृतवर्त्तनः
स्तेयवेश्यासुरापानद्यूतसंसक्तमानसः २
देशाद्देशांतरंगच्छन्क्रयविक्रयकारणात्
माहिष्मतींपुरींयातःकदाचित्सधनेश्वरः ३
महिषेणकृतापूर्वंतस्मान्माहिष्मतीभवत्
यस्यांवप्रतटाभातिनर्मदापापनाशिनी ४
कार्तिकव्रतिनस्तत्रनानाग्रामागतान्नरान्
सदृष्ट्वाविक्रयंकुर्वन्मासमेकमुवासह ५
सनित्यंनर्मदातीरेभ्रमन्विक्रयकारणात्
ददर्शब्राह्मणान्स्नातान्जपदेवार्चनेरतान् ६
कांश्चित्पुराणंपठतःकांश्चित्तच्छ्रवणेरतान्
नृत्यगायनवादित्रविष्णुस्तवनतत्परान् ७
विष्णुमुद्रांकितान्कांश्चिन्मालातुलसिधारिणः
ददर्शकौतुकाविष्टस्तत्रतत्रधनेश्वरः ८
नित्यंपरिभ्रमंस्तत्रदर्शनस्पर्शभाषणात्
वैष्णवानांतथाविष्णोर्नामश्रावादिसोऽलभत् ९
एवंमासंस्थितःसोऽथकार्तिकोद्यापनेविधौ

क्रियमारोददर्शासौभक्तैर्जागरणंहरेः १०
पौर्णमास्यांततोऽपश्यद्विविधंपूजनादिकम्
दक्षिणाभोजनाद्यंचदीपदानंव्रतस्थितैः ११
ततोऽकास्तमयेचैवंदीपोत्सवविधिंतदा
क्रियमाणंददर्शासौप्रीत्यर्थंत्रिपुरद्विषः १२
त्रिपुराणांकृतोदाहोयतस्तस्यांशिवेनतु
अतस्तुक्रियतेतस्यांतिथौभक्तैर्महोत्सवः
ममरुद्रस्ययःकश्चिदंतरंपरिकल्पयेत् १३
तस्यपुरायक्रियाःसर्वानिष्फलाःस्युर्नसंशयः
तत्रनृत्यादिकंपश्यन्बभ्रामसधनेश्वरः
तावत्कृष्णाहिनादष्टोविकलःसपपातह
जनास्तंपतितंवीक्ष्यपरिवव्रुःकृपान्विताः १४
तुलसीमिश्रितैस्तोयैस्तन्मुखंसिषिचुस्तदा
अथदेहेपरित्यक्तेतंबद्ध्वायमकिंकराः १५
बाध्यमानंकशाघातैर्निन्युःसंयमिनींरुषा
चित्रगुप्तस्तुतंदृष्ट्वानिर्भर्त्स्यावेदयत्तदा १६
यमायतेनबाल्यात्तुकर्मयद्दुष्कृतंकृतम्
चित्रगुप्तउवाच
नैवास्यदृश्यतेकिंचिदाबाल्यात्सुकृतंक्वचित् १७
दुष्कृतंशक्यतेवक्तुंशतवर्षैर्नभास्करे
पापमूर्तिरयंदुष्टःकेवलंदृश्यतेविभो १८
तस्मादाकल्पमर्यादंनिरयेपरिपाच्यताम्
श्रीकृष्णउवाच
निशम्येत्थंवचःक्रोधाद्यमःप्राहस्वकिंकरान् १९
दर्शयन्नात्मनोरूपंकालाग्निसदृशप्रभम्
यमउवाच
भोप्रेतापनयस्वैनंबध्यमानंस्वमुद्गरैः २०
कुंभीपाकेक्षिपस्वाशुतैलक्वथनशब्दिते
यावत्क्षिप्तस्तुतत्रासौतावच्छीतलतांययौ २१
कुंभीपाकोयथावह्निःप्रह्लादक्षेपणात्पुरा

तदृष्ट्वामहदादश्चर्यं प्रेतपोविस्मयान्वितः २२
वेगादागत्यतत्सर्वंयमायाकथयत्तदा
यमस्तुकौतुकंश्रुत्वाप्रेतपेननिवेदितम् २३
आःकिमेतदितिप्रोच्यसम्यगेतद्विचारयत्
तावदभ्यागतस्तत्रनारदःप्रहसंस्त्वरन् २४
यमेनपूजितःसम्यक्तंदृष्ट्वावाक्यमब्रवीत्
नारदउवाच
नैवायंनिरयान्भोक्तुंह्यमःसवितृनंदन २५
यस्मादेतस्यसंजातंकर्मयन्निरयापहम्
यःपुण्यकर्मणांकुर्याद्दर्शनस्पर्शभाषणम् २६
तत्षडंशमवाप्नोतिपुण्यस्यनियतंनरः
असंख्यातैस्तुसंसर्गैःकृतवानेषयद्धरेः २७
कार्तिकव्रतिभिर्मासंतस्मात्पुण्यांशभागयम्
परिचर्याकरस्तेषांसंपूर्णव्रतपुण्यभाक् २८
अतोऽस्योर्जव्रतोद्भूतपुण्यसंख्यानविद्यते
कार्त्तिकव्रतिनांपुंसांपातकानिमहांत्यपि २९
नाशयत्येवसर्वाणिविष्णुःसद्भक्तवत्सलः
अंतेतन्नामभिस्तोयैस्तुलसीमिश्रितैस्त्वयम् ३०
वैष्णवानुग्रहीयस्मान्नरकेनैवपच्यते
तस्मान्निहतपापोऽयसद्गतिंयातुमर्हति ३१
आर्द्रैःशुष्कैर्यथापापैर्निरयेभोगसंनिधिः
प्राप्यतेसुकृतैस्तद्वत्स्वर्गभोगस्यसंनिधिः ३२
तस्मादकामपुण्योहियह्मयोनिस्थितस्त्वसौ
विलोक्यनरकान्सर्वान्पापभोगमवाप्नुयात् ३३
श्रीकृष्णउवाच
इत्युक्त्वागतवतिनारदेऽथसौरिस्तद्वाक्यश्रवणविबुद्धतत्सुकर्मा
विप्रंतंपुनरनयत्स्वकिंकरेणतान्सर्वान्निरयगणान्प्रदर्शयिष्यन् ३४
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्रसंहितायामुत्तरखंडेकार्तिकमाहात्म्ये श्रीकृष्णसत्यभामासंवादेधनेश्वरोपाख्यानेत्रयोदशाधिकशततमोऽध्यायः ११३

चतुर्दशाधिक शततमोऽध्यायः

श्रीकृष्णवाच
ततोधनेश्वरंनीत्वानिरयान्प्रेतपोऽब्रवीत्
प्रदर्शयिष्यंस्तान्सर्वान्यमस्यानुचरस्तदा १
प्रेतपउवाच
पश्येमान्निरयान्घोरान्धनेश्वरमहाभयान्
येषुपापकरानित्यंपच्यंतेयमकिंकरैः २
तप्तवालुकनामायंनिरयोघोरदर्शनः
यस्मिन्नेतेदग्धदेहाःक्रंदंतेपापकारिणः ३
अतिथीन्वैश्वदेवान्तेक्षुत्क्षामानागतान्गृहे
येनार्चंतिनरास्तेहिपच्यंतेस्वेनकर्मणा ४
गुर्वग्निब्राह्मणान्देवांस्तथामूर्द्धाभिषिक्तकान्
ताडयंतिपदायेवैतेनिर्दग्धांघ्रयस्त्विमे ५
षड्भेदस्त्वेषनिरयोनानापापैःप्रपद्यते
तथैवचांधतामिस्रोद्वितीयोनिरयोमहान् ६
पश्यसूचीमुखैर्देहोभिद्यतेपापकर्मणा
क्रिमिभिर्घोरवक्त्रैश्चतत्संपर्कागमैर्द्विज ७
असावपिस्थितःषोढाश्वकाकमृगपक्षिभिः
परमर्मभिदोमर्त्याःपच्यंतेतेषुपापिनः ८
तृतीयःक्रकचोह्येषनिरयोघोरदर्शनः
यत्रेमेक्रकचैर्मर्त्याःपाटयंतेपापकारिणः ९
असिपत्रवनाद्यैस्तुषट्प्रकारोव्यवस्थितः
पत्नीपुत्रादिभिर्येवैवियोगंकारयंतिहि १०
इष्टैरन्यैरपिपरान्पच्यंतेतइमेनराः
असिपत्रैश्छिद्यमानाछेदभीत्यापलायिताः ११
पच्यंतेपापिनःपश्यक्रंदमानाइतस्ततः
अर्गलाख्योमहाघोरश्चतुर्थोनिरयोह्ययम् १२
पश्यनानाविधैःपाशैराबध्ययमकिंकरैः
मुद्गराद्यैर्वध्यमानाःक्रंदंतेतेचपापिनः १३
सज्जनान्ब्राह्मणाद्यांश्चविरुंधंतीहयेनराः

कंठग्रहाद्यैस्तेपापाःपच्यंतेयमकिंकरैः १४
असावपिहिषड्भेदोवधभेदादिभिःस्थितः
कूटशाल्मलिनामानंनिरयंपश्यपंचमम् १५
यत्रांगारनिभाएतेशाल्मल्याद्याःस्थिताद्विज
यत्रषोढाविपच्यंतेयातनाभिरिमेनराः १६
परदारापरद्रव्यपरद्रोहरताःसदा
रक्तपूयमिमंपश्यषष्ठंनिरयमद्भुतम् १७
अधोमुखाविपच्यंतेयत्रपापकृतोनराः
अभक्ष्यभक्षकानिंदापैशुन्यादिरताइमे १८
भज्यमानावध्यमानाःक्रंदंतेभैरवान्स्वरान्
षट्प्रकारैर्विगंधाढ्यैरसावपिचसंस्थितः १९
कुंभीपाकःसप्तमोऽयनिरयोघोरदर्शनः
षोढास्तैलादिभिर्द्रव्यैर्धनेश्वरविलोकय २०
महापातकिनोयत्रक्वथ्यंतेयमकिंकरैः
बहून्यब्दसहस्राणिसोन्मज्जननिमज्जनैः २१
चत्वारिंशन्मितानेतान्द्य्वधिकान्पश्यरौरवान्
अकामात्पातकंशुष्कंकामादार्द्रमुदाहृतम् २२
आर्द्रशुष्कादिभिःपापैर्द्विप्रकारानवस्थितान्
चतुरशीतिसंख्याकैःपृथग्भेदैरवस्थितान् २३
यत्प्रकीर्णमपांक्तेयंमलिनीकरणंतथा
ज्ञातिभ्रंशकरंतद्वदुपपातकसंज्ञकम् २४
अतिपापंमहापापंसप्तधापातकंस्मृतम्
एभिःसप्तसुपच्यंतेनिरयेषुयथाक्रमम् २५
कार्तिकव्रतिभिर्यस्मात्संसर्गोह्यभवत्तव
तत्पुण्योपचयादेतेनिर्हृतानिरयाःखलु २६
श्रीकृष्णउवाच
दर्शयित्वेतिनिरयान्प्रेतपस्तमथाहरत्
धनेश्वरंयक्षलोकंपश्चादासीत्सतत्रहि २७
धनदस्यानुगःसोऽयधनयक्षेतिसस्मृतः
यदाख्यायाकरोत्तीर्थमयोध्यायांतुगाधिजः २८

एवंप्रभावःखलुकार्तिकोऽयमुक्तिप्रदोमुक्तिकरश्चयस्मात्
प्रयात्यनेकार्जितपातकोऽपिव्रतस्थसंदर्शनतोऽपिमुक्तिम् २९
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्तिक
माहात्म्येधनेश्वरोपाख्यानेचतुर्दशाधिकशततमोऽध्यायः ११४

पञ्चदशाधिकशततमोऽध्यायः

सूतउवाच
इत्युक्त्वावासुदेवोऽसौसत्यभामामतिप्रियाम्
सायंसंध्यादिकंकर्तुंजगामजननीगृहम् १
एवंप्रभावःप्रोक्तोयंकार्तिकःपापनाशनः
विष्णुप्रियकरोनित्यंभुक्तिमुक्तिप्रदःसदा २
हरिजागरणंप्रातःस्नानंतुलसिसेवनम्
उद्यापनंदीपदानंव्रतान्येतानिकार्तिके ३
पंचकैर्व्रतकैरेभिःसंपूर्णंकार्तिकव्रतम्
फलंप्राप्नोतितत्प्रोक्तंभुक्तिमुक्तिफलप्रदम् ४
ऋषयऊचुः
विष्णोःप्रियोऽतिफलदःप्रोक्तोऽयरोमहर्षणे
कार्तिकस्यविधिःसम्यक्पावनःपापनाशनः ५
अवश्यमेवकर्त्तव्यःप्राप्यदुःखनिवारणः
मोक्षार्थिभिर्नरःसम्यग्भोगकामैरथापिवा ६
एवंस्थितेयथाकश्चिद्व्रतस्थःसंकटेस्थितः
दुर्गारगयस्थितोवापिव्याधिभिःपरिपीडितः
कथंतेनप्रकर्तव्यंकार्तिकव्रतकंशुभम् ७
सूतउवाच
यस्मादत्यंतफलदंकर्तव्यंतुयथानरैः
तत्सर्वंकथयिष्येऽहश्रृणुध्वंमुनिपुंगवाः ८
विष्णोःशिवस्यवाकुर्यादालयेहरिजागरम्
शिवविष्णुग्रहाभावेसर्वदेवालयेष्वपि ९
दुर्गारगयस्थितोयश्चयदिवायद्गतोभवेत्
कुर्यात्तदाश्वत्थमूलेतुलसीनांवनेष्वपि १०

विष्णुनामप्रधानानांगायनाद्विष्णुसन्निधौ
गोसहस्रप्रदानस्यफलंप्राप्नोतिमानवः ११
वाद्यकृत्पुरुषश्चापिवाजपेयफलंलभेत्
सर्वतीर्थावगाहोत्थंनर्तकःफलमाप्नुयात् १२
सर्वमेतल्लभेत्पुण्यंतेषांतुद्रव्यदःपुमान्
प्रशंसादर्शनाभ्यांहितत्षडंशमवाप्नुयात् १३
आपद्गतोयदाप्यंभोनलभेत्स्नपनायसः
व्याधितोवापुनःकुर्याद्विष्णोर्नामापमार्जनम् १४
उद्यापनविधिंकर्तुंनशक्तोयोव्रतेस्थितः
ब्राह्मणान्भोजयेच्छक्त्याव्रतसंपूर्णहेतवे १५
यस्मादत्यंतफलदोनत्याज्यःसर्वदानरैः
अव्यक्तरूपिणोविष्णोःस्वरूपंब्राह्मणाभुवि १६
तत्संतुष्ट्यासुसंतुष्टःसर्वदास्यांनसंशयः
अशक्तोदीपदानेतुपरदीपंप्रबोधयेत् १७
तेषांवारक्षणंकुर्याद्वातादिभ्यःप्रयत्नतः
अभावेतुलसीनांतुपूजयेद्वैष्णवंद्विजम् १८
यस्मात्संनिहीतोविष्णुःस्वभक्तेष्वेवसर्वदा
सर्वाभावेव्रतीकुर्याद्ब्राह्मणानांगवामपि १९
सेवांवाश्वत्थवटयोर्व्रतसंपूर्णहेतवे २०
ऋषयऊचुः
कथंत्वयाश्वत्थवटौगोब्राह्मणसमौकृतौ
सर्वेभ्योऽपितरुभ्यस्तौकस्मात्पूज्यतरौकृतौ २१
सूतउवाच
अश्वत्थरूपीभगवान्विष्णुरेवनसंशयः
रुद्ररूपीवटस्तद्वत्पालाशोब्रह्मरूपधृक् २२
दर्शनंपूजनंसेवातेषांपापहरास्मृता
दुःखापद्व्याधिदुष्टानांविनाशकरणीध्रुवम् २३
ऋषयऊचुः
कथंवृक्षत्वमापन्नाब्रह्मविष्णुमहेश्वराः
एतत्कथयसर्वज्ञसंशयोऽत्रमहान्हिनः २४

सूतउवाच
पार्वतीशिवयोर्देवैःसुरतंकुर्वतोःकिल
अग्निर्ब्राह्मणरूपेणप्रेषितोविघ्नकृत्पुरा २५
ततःसापार्वतीक्रुद्धाशशापत्रिदिवौकसः
रतोत्सवसुखभ्रंशात्कंपमानारुषातदा २६
पार्वत्युवाच
कृमिकीटादयोप्येतेजानंतिसुरतंसुखम्
तद्विघ्नकरणाद्देवाह्युद्भिज्जत्वमवाप्स्यथ २७
सूतउवाच
एवंसापार्वतीदेवानशपत्क्रुद्धमानसा
तस्माद्वृक्षत्वमापन्नाःसर्वेदेवगणाःकिल २८
तस्मादिमौविष्णुमहेश्वरावुभौबभूवतुर्बोधिवटौमुनीश्वराः
बोधिस्त्वगादार्किदिनेस्पृशत्वमस्पृश्यतामर्कजविष्टियोगात् २९
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्त्तिक
माहात्म्येअश्वत्थवटप्रशंसनंनामपंचदशाधिकशततमोऽध्यायः ११५

षोडशाधिकशततमोऽध्यायः

ऋषयऊचुः
अस्पृश्यत्वेकथंजातःसूतबोधितरुस्त्वयम्
स्पृश्यत्वंचकथंप्राप्तस्तथाचशनिवासरे
एतद्विस्तरतःसर्ववक्तुमर्हतिनोभवान् १
सूतउवाच
समुद्रमथनाद्यानिरत्नान्यापुःसुरेश्वराः
श्रियंचकौस्तुभंतेषांविष्णवेप्रददुःसुराः २
यावदंगीचकारासौलक्ष्मींभार्यार्थमात्मनः
तावद्विज्ञापयामासलक्ष्मीस्तंचक्रपाणिनम् ३
लक्ष्मीरुवाच
असंस्कृत्यकथंज्येष्ठांत्वंकनिष्ठांप्रणीयसे
तस्मान्ममाग्रजामेतामलक्ष्मींमधुसूदन ४
विवाह्यनयमांपश्चादेषधर्मःसनातनः ५

सूतउवाच
इति तद्वचनंश्रुत्वासविष्णुर्लोकभावनः
उद्दालकायमुनयेसुदीर्घतपसेतदा ६
आत्मवाक्यानुरोधेनतामलक्ष्मींददौकिल
स्थूलास्यांशुभ्रदशनांराजतींबिभ्रतींतनुम् ७
विततांरक्तनयनांरूक्षपिंगशिरोरुहाम्
समुनिर्विष्णुवाक्यात्तामंगीकृत्यस्वमाश्रमम् ८
वेदध्वनिसमायुक्तमानयामासधर्मवित्
होमधूमसुगंधाढ्यंविद्याघोषविनादितम् ९
आश्रमंतंसमालोक्यव्यथितासाब्रवीदिदम्
ज्येष्ठोवाच
नहिवासोऽनुरूपोऽयवेदध्वनियुतोमम
नात्रागमिष्येभोब्रह्मन्नयस्वान्यत्रमाचिरम् १०
उद्दालकउवाच
कथंनायासिकिंवात्रवर्त्ततेसंमतंतव
तवयोग्याचवसतिःकाभवेच्चवदस्वतत् ११
ज्येष्ठोवाच
वेदध्वनिर्भवेद्यस्मिन्नतिथीनांचपूजनम्
यज्ञदानादिकंवापिनैवतत्रवसाम्यहम् १२
परस्परानुरागेणदांपत्यंयत्रवर्तते
पितृदेवार्चनंयत्रनैवतत्रसाम्यहम् १३
दुरोदररतायत्रपरद्रव्यापहारिणः
परदाररताश्चापितत्रस्थानेरतिर्मम १४
गोवधोमद्यपानंचयत्रसंजायतेनिशम्
ब्रह्महत्यादिपापानितस्मिन्स्थानेरतिर्मम
वृद्धसज्जनविप्राणांयत्रस्यादपमाननम्
निष्ठुरंभाषणंयत्रतत्रनित्यंवसाम्यहम् १५
सूतउवाच
इतितद्वचनंश्रुत्वाविषण्णवदनोऽभवत्
उद्दालकमुनिर्विष्णोर्वाक्यंस्मृत्वानचोचिवान् १६

सोऽगच्छद्यत्रतत्रास्यपूजामालोक्यसाब्रवीत्
नायामीतिततःसोऽपिभ्रमादत्यातुरोऽभवत्
उद्दालकस्ततोवाक्यंतामलक्ष्मीमुवाचह १७
उद्दालकउवाच
अश्वत्थवृक्षमूलेऽस्मिन्नलक्ष्मिस्थीयतांक्षणम्
आवासस्थानमालोक्ययावदायाम्यहंपुनः १८
सूतउवाच
इतितत्रससंस्थाप्यजगामोद्दालकस्तदा
प्रतीक्षंतीचिरंतत्रयदातन्नदर्शसा १९
तदारुरोदकरुणंभर्तृत्यागेनदुःखिता
तत्रस्थांरुदतीलक्ष्मींवैकुंठभुवनेऽशृणोत् २०
तदाविज्ञापयामासविष्णुमुद्विग्नमानसा २१
लक्ष्मीरुवाच
स्वामिन्मद्भगिनीज्येष्ठाभर्तृत्यागेनदुःखिता
तामाश्वासयितुंयाहिकृपालोयद्यहंप्रिया २२
सूतउवाच
लक्ष्म्यासहततोविष्णुस्तत्रागच्छत्कृपान्वितः
आश्वासयदलक्ष्मींतामिदंवचनमब्रवीत् २३
श्रीविष्णुरुवाच
अश्वत्थवृक्षमासाद्यसदाऽलक्ष्मिस्थिराभव
ममांशसंभवोह्येषआवासस्तेमयाकृतः २४
प्रत्यहंयेऽचयिष्यंतित्वांज्येष्ठांगृहधर्मिणः
तेष्वियंश्रीःकनिष्ठातेभगिनीनिश्चलास्तुवै २५
सूतउवाच
इत्यूर्जस्यचमाहात्म्यंयेशृरावंतिपठंतिच
तेषांविष्णुपुरेवासोभवेदाभूतसंप्लवम् २६
रोगापहंपातकनाशकृत्परंसुबुद्धिदंपुत्रधनादिसाधनम्
मुक्तेर्निदानंनहिकार्तिकाद्वैविष्णुप्रियादन्यदिहास्तिभूतले २७
विष्णुप्रियंसकलकल्मषनाशनंचसत्पुत्रपौत्रधनधान्यसमृद्धिकारि
ऊर्जव्रतंसनियमंकुरुतेमनुष्यःकिंतस्यतीर्थपरिशीलनसेवयाच २८

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्तिकमाहात्म्ये श्रीकृष्णसत्यभामासंवादेश्रलद्दम्युपाख्यानंनामषोडशाधिकशततमोऽध्यायः११६

सप्तदशाधिकशततमोऽध्यायः

सूतउवाच
इतिसर्वंसमाकर्ण्यसत्राजितसुतातदा
हरेर्वाक्यंमहाभागासत्यावचनमब्रवीत् १
सत्योवाच
कार्तिकस्यचमाहात्म्यंनश्रुतंविस्तरात्प्रभो
सर्वेषामेवमासानांकार्तिकःप्रवरःकथम् २
श्रीकृष्णउवाच
साधुपृष्टंत्वयासत्येकार्तिकव्रतमादरात्
शौनकायपुराप्रोक्तंसूतेनसुमहात्मना ३
सूतउवाच
श्रूयतांतत्प्रवद्दयामिएतत्प्रश्नोत्तरंशुभम्
ईश्वरेणपुराप्रोक्तंपृच्छतेषरामुखायवै ४
कार्तिकेयउवाच
बहूनिपद्मनाभस्यरहस्यानिश्रुतानिच
यथाहिप्रोच्यमानानिवैष्णवेनत्वयाप्रभो ५
संसारसागरेप्राप्तादुःखोरुलहरीवृते
तेषामुत्तारणार्थायकथयस्वप्रयत्नतः ६
कार्तिकस्यविधिश्चैवस्नानस्यवदतांवर
येनदुःखांबुधिंतातसंतरिष्यंतिमानवाः ७
फलंवैष्णवधर्मस्यकथयस्वसुविस्तरम्
येनधर्मप्रभावेनपदंगच्छतिवैष्णवम् ८
दीपदानस्यमाहात्म्यंमुनिपुष्पस्यसुव्रत
गोपीचंदनमाहात्म्यंतुलस्यास्तुतथाविभो ९
मालतीपुष्पमाहात्म्यंवारिजानांतथावद
धात्रीफलानांमाहात्म्यंतथादमनकस्यच १०

केतकीपुष्पमाहात्म्यं नैवेद्यस्यपरंतप
तीर्थोदकस्यमाहात्म्यंमाघस्नानफलंविभो ११
फलंब्रूहिसुरश्रेष्ठब्रह्मपत्रेषुभोजनात्
नीराजनफलंस्थाणोपरदीपप्रवेधनात् १२
पुष्करक्षेत्रमाहात्म्यंशूकरस्यतथाविभो
शालग्रामस्यमाहात्म्यंस्वस्तिकस्यविधानकम् १३
दानानांचफलंब्रूहिपरान्नस्यचवर्जनात्
मासोपवासस्यफलंखट्वायामोक्षणाद्विभो १४
दीपावल्याश्चमाहात्म्यंप्रबोधिन्याश्चसुव्रत
पंचभीष्मस्यमाहात्म्यंकथयस्वसुविस्तरात् १५
ईश्वरउवाच
साधुपृष्टंत्वयावत्सलोकोद्धरणहेतवे
कथयामिनसंदेहस्त्वत्समोनास्तिवैष्णवः १६
सत्पुत्रेणत्वयावत्सतारितोऽहनसंशयः
निश्चलाकेशवेभक्तिस्त्वयितिष्ठतिसर्वदा १७
नरेभ्योवैष्णवंधर्मंयोददातिद्विजोत्तमः
ससागरमहीदानेतत्पुण्यंलभतेहिसः १८
कार्तिकस्यचमासस्यकोटचंशेनापिनार्हति
एकतःसर्वतीर्थानिसर्वदानानिचैकतः १९
एकतोगोप्रदानानिसर्वेयज्ञाःसदक्षिणाः
एकतःपुष्करेवासंकुरुक्षेत्रेहिमालये २०
एकतोमथुरातीर्थेवाराणस्यांचशूकरे
एकतःकार्तिकोवत्ससर्वदाकेशवप्रियः २१
सूतउवाच
इत्युक्त्वामुनिशार्दूलपुनर्वाक्यंजगौहरः
कार्तिकस्नानमाहात्म्यंकथयिष्येसुविस्तरात् २२
ईश्वरउवाच
ब्राह्मंकृतयुगंप्रोक्तंत्रेतातुक्षत्रियंस्वयम्
द्वापरंवैश्यमित्याहुःशूद्रंकलियुगंस्मृतम् २३
कलौवत्समनुष्याणांशैथिल्यंस्नानकर्मणि

तथापिकथयिष्यामिस्नानंकार्तिकमाघयोः २४
यस्यहस्तौचपादौनवाङ्मनश्चसुसंयतम्
विद्यातपश्चकीर्तिश्चसतीर्थफलभाङ्नरः २५
अश्रद्दधानःपापात्मानास्तिकश्छिन्नमानसः
हेतुवादीचपंचैतेनतीर्थफलभागिनः २६
प्रातरुत्थाययोविप्रस्तीर्थस्नायीसदाभवेत्
सर्वपापविनिर्मुक्तःपरंब्रह्माधिगच्छति २७
स्नानंचतुर्विधंप्रोक्तंस्नानविद्भिःषडानन
वायव्यंवारुणंदिव्यंब्राह्मंचेतितथास्मृतम् २८
वायव्यंगोरजःस्नानंवारुणंसागरादिषु
ब्राह्म्यब्राह्मणमंत्रोक्तंदिव्यंमेघांबुभास्करम् २९
स्नानानांचैवसर्वेषांविशिष्टंतत्रवारुणम्
ब्राह्मणःक्षत्रियोवैश्योमंत्रवत्स्नानमाचरेत् ३०
तूष्णीमेवहिशूद्रस्यस्त्रीणांचैवषडानन
बालाचतरुणीवृद्धानरनारीनपुंसकाः ३१
पापैःसर्वैःप्रमुच्यंतेस्नानात्कार्तिकमाघयोः
स्नातावैकार्तिकेलोकाःप्राप्नुवंतीप्सितंफलम् ३२

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्तिकमाहात्म्येश्रीशिवषडाननसंवादेसप्तदशाधिकशततमोऽध्यायः ११७

अष्टादशाधिकशततमोऽधयायः

सूतउवाच
पुनःप्रोवाचभगवान्महादेवोवृषध्वजः
श्रोतारमुपसंगम्यभक्तियुक्तंषडाननम् १
ईश्वरउवाच
कार्तिकोवैष्णवोमासःसर्वमासेषुचोत्तमः
अस्मिन्मासेत्रयस्त्रिंशद्देवाःसंनिहिताःकलौ २
ऊर्जेमासिमहाभागौभोजनानिद्विजातये
तिलधेनुंहिरण्यंचरजतंभूमिवाससी ३
गोप्रदानानिदास्यंतिसर्वभावेनसुव्रत

सर्वेषामेवदानानांकन्यादानंविशिष्यते ४
ब्राह्मणायात्रयेकन्यांदास्यंतिविधिवन्नराः
वैकुंठेवसतिस्तेषांयावदिंद्राश्चतुर्दश ५
रोमकालेतुसंप्राप्तेसोमोभुंक्तेतुकन्यकाम्
ऋतुकालेतुगंधर्वावह्निस्तुकुचदर्शने ६
तावद्विवाहयेत्कन्यांयावन्नर्तुमतीभवेत्
विवाहस्त्वष्टवर्षायाःकन्यायाःशस्यतेबुधैः ७
दातव्याश्रोत्रियायैवब्राह्मणायतपस्विने
साक्षादधीतवेदायविधिनाब्रह्मचारिणे ८
कन्यावरप्रमाणायाएषएवविधिःस्मृतः
यावंतिचैवरोमाणिकन्यायाश्चतनौसुत ९
तावद्वर्षसहस्राणिरुद्रलोकेमहीयते
सहस्रमेवधेनूनांशतंचानुडुहांसमम् १०
दशानुडुत्समंयानंदशयानसमोहयः
हयदानसहस्रेभ्योगजदानंविशिष्यते ११
गजदानसहस्राणांस्वर्णदानंचतत्समम्
स्वर्णभारसहस्राणांविद्यादानंचतत्समम् १२
विद्यादानात्कोटिगुणंभूमिदानंविशिष्यते
भूमिदानसहस्रेभ्योगोप्रदानंविशिष्यते १३
गोप्रदानसहस्रेभ्योह्यन्नदानंविशिष्यते
अन्नाधारमिदंसर्वंजगत्स्थावरजंगमम् १४
तस्माद्देयंप्रयत्नेनकार्तिकेशिखिवाहन
त्रीणितुल्यप्रदानानित्रीणितुल्यफलानिच १५
कार्तिकेयउवाच
अन्यानपिमहादेवधर्मान्मेवक्तुमर्हसि
यान्कृत्वासर्वपापानिप्रक्षाल्यत्रिदशोभवेत् १६
सूतउवाच
इतिपृष्टस्तदाशंभुःपुनर्वक्तुंप्रचक्रमे
यावत्किंबहुधास्तुत्वात्तच्छृणुध्वंतपोधनाः १७
ईश्वरउवाच

परान्नंवर्जयेद्यस्तुकार्तिकेनियमेकृते
परान्नवर्जनादेवलभेच्चांद्रायणंफलम् १८
तंप्राप्तंकार्तिकंदृष्ट्वापरान्नंयस्तुवर्जयेत्
दिनेदिनेतुकृच्छ्रस्यफलंप्राप्नोतिमानवः १९
कार्तिकेवर्जयेत्तैलंकार्तिकेवर्जयेन्मधु
कार्तिकेवर्जयेत्कांस्यंसंघान्नंचविशेषतः २०
राक्षसींयोनिमाप्नोतिसकृन्मांसस्यभक्षणात्
षष्टिवर्षसहस्राणिविष्ठायांपरिपच्यते २१
तन्मुक्तोजायतेपापोविष्ठाशीग्रामसूकरः
प्रवृत्तानांतुभक्षाणांकार्तिकेनियमेकृते २२
अवश्यंविष्णुरूपत्वंप्राप्यतेमोक्षदंपदम्
नकार्तिकसमोमासोनदैवंकेशवात्परम् २३
नवेदसदृशंशास्त्रंनतीर्थंगंगयासमम्
नसत्यंनसमंवृत्तंनकृतेनसमंयुगम् २४
नतृप्तीरसनातुल्यानदानसदृशंसुखम्
नधर्मसदृशंमित्रंनज्योतिश्चक्षुषासमम् २५
अव्रतेनक्षिपेद्यस्तुमासंदामोदरप्रियम्
कर्मभ्रष्टःसविज्ञेयोहीनयोनिषुजायते २६
कार्तिकःप्रवरोमासोवैष्णवानांसदाप्रियः
समुद्रगानदीपुण्यादुर्लभास्नानशालिनाम् २७
कुलशीलवतीकन्यादुर्लभादंपतीनृणाम्
दुर्लभाजननीलोकेपिताचैवविशेषतः २८
दुर्लभंसाधुसन्मानंदुर्लभोधार्मिकःसुतः
दुर्लभोद्वारिकावासोदुर्लभंकृष्णदर्शनम् २९
दुर्लभंगोमतीस्नानंदुर्लभंकार्तिकव्रतम्
ब्राह्मणेभ्योमहींदत्त्वाग्रहणेचंद्रसूर्ययोः ३०
यत्फलंलभतेवत्सतत्फलंभूमिशायिनः
भोजनंद्विजदंपत्योःपूजयेच्चविलेपनैः ३१
कंबलानिचरत्नानिवासांसिविविधानिच
तूलिकाश्चप्रदातव्याःप्रच्छादनपटैःसह ३२

उपानहावातपत्रंकार्तिकेदेहिपावके
यःकरोतिनरोनित्यंकार्तिकेपत्रभोजनम् ३३
नदुर्गतिमवाप्नोतियावदिंद्राश्चतुर्दश
सर्वकामफलंतस्यसर्वतीर्थफलंलभेत् ३४
नचापिनरकंपश्येद्ब्रह्मपत्रेषुभोजनात्
ब्रह्माएषस्मृतःसाक्षात्पालाशःसर्वकामदः ३५
मध्यमंवर्जयेत्पत्रंकार्तिकेशिखिवाहन
ब्रह्माविष्णुश्चरुद्रश्चत्रयोदेवास्त्रिपत्रके ३६
एश्वरंवर्जयेत्पत्रब्रह्माविष्णुरनुत्तमः
सर्वपुगयमवाप्नोतिशेषपत्रेषुभोजनात् ३७
भोजनान्मध्यपत्रेतुकपिलापयसस्तथा
प्राशनान्मुनिशार्दूलनरोनरकमाप्नुयात् ३८
अज्ञानाद्भुंजतेयस्तुशूद्रोवाकपिलापयः
कपिलांब्राह्मणेदत्त्वाशुद्धोभवतिकार्तिके ३९
तिलदानंनदीस्नानंसर्वदासाधुदर्शनम्
भोजनंब्रह्मपत्रेषुकार्तिकेमुक्तिदायकम् ४०
मौनीपालाशभोजीचजलस्नायीसदाक्षमी
कार्तिकेक्षितिशायीचहन्यात्पापंयुगार्जितम् ४१
जागरंकार्तिकेमासियःकरोत्यरुणोदये
दामोदराग्रेसेनानीर्गोसहस्रफलंलभेत् ४२
पितृपक्षेऽन्नदानेनज्येष्ठाषाढेचवारिणा
कार्तिकेतत्फलंपुंसांपरदीपप्रबोधनात् ४३
बोधनात्परदीपस्यवैष्णवानांचसेवनात्
कार्तिकेफलमाप्नोतिराजसूयाश्वमेधयोः ४४
नदीस्नानंकथाविष्णोर्वैष्णवानांचदर्शनम्
नभवेत्कार्तिकेयस्यहरेत्पुगयंदशाब्दिकम् ४५
पुष्करंयःस्मरेत्प्राज्ञःकर्मणामनसागिरा
कार्तिकेमुनिशार्दूललक्षकोटिगुणंभवेत् ४६
प्रयागोमाघमासेतुपुष्करंकार्तिकेतथा
अवंतीमाधवेमासिहन्यात्पापंयुगार्जितम् ४७

धन्यास्तेमानवालोकेकलिकालेविशेषतः
कुर्वंतिस्कंदनित्यंयेसर्वथाहरिसेवनम् ४८
किंदत्तैर्बहुभिःपिंडैर्गयाश्राद्धादिभिर्मुने
तारितास्तेनपितरोनरकाच्चनसंशयः ४९
क्षीरादिस्नपनंविष्णोःक्रियतेपितृकारणात्
कल्पकोटिंदिवंप्राप्यवसंतित्रिदशैःसह ५०
कार्तिकेनार्चितोयैस्तुकृष्णस्तुकमलेक्षणः
जन्मकोटिषुविप्रेंद्रनतेषांकमलागृहे ५१
दष्टामुष्टाविनष्टास्तेपतिताःकलिकंदरे
यैर्नार्चितोहरिर्भक्त्याकमलैरसितैःसितैः ५२
पद्मेनैकेनदेवेशंयोऽचयेत्कमलापतिम्
वर्षायुतसहस्रस्यपापस्यकुरुतेक्षयम् ५३
अपराधसहस्राणितथासप्तशतानिच
पद्मेनैकेनदेवेशःक्षमेतप्रणतोऽचितः ५४
तुलसीपत्रलक्षेणकार्तिकेयोऽचयेद्धरिम्
पत्रेपत्रेमुनिश्रेष्ठमौक्तिकंलभतेफलम् ५५
तुलसीगंधमिश्रंतुयत्किंचित्क्रियतेसुत
कल्पकोटिसहस्राणिप्रीतोभवतिकेशवः ५६
मुखेशिरसिदेहेतुकृष्णोत्तीर्णांतुयोबहेत्
तुलसींषरामुखप्रीत्यानतस्यस्पृशतेकलि ५७
कृष्णोत्तीर्णैस्तुनिर्माल्यैर्योगात्रंपरिमार्जयेत्
सर्वरोगैस्तथापापैर्मुक्तोभवतिषरामुख ५८
विष्णोरंगारशेषेणयस्यांगंस्पृशतेसुत
दुरितानिविनश्यंतिव्याधयोयांतिसंक्षयम् ५९
शंखोदकंहरेर्भक्तिर्निर्माल्यंपादयोर्जलम्
चंदनंधूपशेषंतुब्रह्महत्यापहारकम् ६०
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्तिकमाहात्म्ये श्रीशिवकार्तिकेयसंवादेप्रश्नोत्तरोनामअष्टादशाधिकशततमोऽध्यायः ११८

एकोनविंशत्यधिक शततमोऽध्यायः

ईश्वरउवाच
माघस्नानस्यमाहात्म्यंशृणुभागवतोत्तम
त्वत्समोनास्तिलोकेऽस्मिन्विष्णुभक्तोमहामते १
चक्रतीर्थेहरिंदृष्ट्वामथुरायांचकेशवम्
यत्फलंलभतेमर्त्योमाघस्नानेनतत्फलम् २
जितेंद्रियःशांतमनाःसदाचारेणसंयुतः
स्नानंकरोतियोमाघेसंसारीनभवेत्पुनः ३
श्रीकृष्णउवाच
शूकरस्यचमाहात्म्यंकथयिष्येतवाग्रतः
यस्यविज्ञानमात्रेणसान्निध्यंममसर्वदा ४
सूतउवाच
इत्युक्त्वाभगवान्कृष्णःसत्यायैबहुधाजगौ
तदहंसंप्रवक्ष्यामितच्छृणुध्वंतपोधनाः ५
श्रीकृष्णउवाच
पंचयोजनविस्तीर्णेशूकरेहरिमंदिरे
यस्मिन्वसतियोजीवोगर्दभोऽपिचतुर्भुजः ६
त्रीणिहस्तसहस्राणित्रीणिहस्तशतानिच
त्रयोहस्ताशूकरस्यपरिमाणंविधीयते ७
षष्टिवर्षसहस्राणियोऽन्यत्रकुरुतेतपः
तत्फलंलभतेदेविप्रहरार्द्धेनशूकरे ८
सन्निहत्यांकुरुक्षेत्रेराहुग्रस्तेदिवाकरे
तुलापुरुषदानेनतत्फलंपरिकीर्त्तितम् ९
काश्यांदशगुणंप्रोक्तंवेरायांशतगुणंभवेत्
सहस्रगुणितंप्रोक्तंगंगासागरसंगमे १०
अनंतंचैवविज्ञेयंशूकरेहरिमंदिरे
अन्यत्रददतेलक्षंसंविधानेनकार्तिक ११
इहैवैकेनदत्तेनशूकरेतत्समंभवेत्
शूकरेचतथावेरायांगंगासागरसंगमे १२
सकृदेवनरःस्नात्वाब्रह्महत्यांव्यपोहति

अलर्केणपुराप्राप्तासप्तद्वीपावसुंधरा
शूकरक्षेत्रमाहात्म्यंश्रुत्वाचैवषडानन १३
मार्गशीर्षस्यद्वादश्यांशुक्लायांव्रजपुत्रक
कार्त्तिकेयउवाच
भगवन्श्रोतुमिच्छामिव्रतानामुत्तमंव्रतम्
विधिंमासोपवासस्यफलंचास्ययथोचितम् १४
यथाविधिनरैःकार्याव्रतचर्यायथाभवेत्
आरभ्यतेयथापूर्वंसमाप्यंहियथाविधि १५
यावत्संख्यंतुकर्त्तव्यंतत्प्रब्रूहिमहेश्वर
व्रतमेतत्सुखश्रीदंविस्तरेणममानघ १६
श्रीरुद्रउवाच
पावकेसाधुसर्वं तेयत्पृष्टंप्रब्रुवेऽनघ
भक्त्यामतिमतांश्रेष्ठशृणुष्वगदतोमम १७
सुराणांचयथाविष्णुस्तपतांचयथारविः
मेरुःशिखरिणांयद्वद्वैनतेयश्चपक्षिणाम् १८
तीर्थानांतुयथागंगाप्रजानांतुयथावणिक्
श्रेष्ठंसर्वव्रतानांतुतद्वन्मासोपवासनम् १९
सर्वव्रतेषुयत्पुण्यंसर्वतीर्थेषुचैवहि
सर्वदानोद्भवंचैवलभेन्मासोपवासकृत् २०
अग्निष्टोमादिभिर्यज्ञैर्विविधैर्भूरिदक्षिणैः
नतत्पुण्यमवाप्नोतियन्मासपरिलंघनात् २१
तेनजप्तंहुतंदत्तंतपस्तप्तंकृतंस्वधा
यःकरोतिविधानेननरोमासमुपोषणम् २२
उद्दिश्यवैष्णवंयज्ञमामभ्यर्च्यजनार्दनम्
गुरोराज्ञांततोलब्ध्वाकुर्यान्मासोपवासनम् २३
वैष्णवानियथोक्तानिकृत्वासर्वव्रतानितु
द्वादश्यादीनिपुण्यानिततोमासमुपावसेत् २४
अतिकृच्छ्रंचपाराकंकृत्वाचांद्रायणंततः
मासोपवासंकुर्वीतगुरोर्विप्राज्ञयाततः २५
आश्विनस्यामलेपक्षेएकादश्यामुपोषितः

व्रतमेनंतुगृह्णीयाद्यावत्रिंशद्दिनानितु २६
वासुदेवंसमभ्यर्च्यकार्तिकंसकलंनरः
मासंचोपवसेद्यस्तुसमुक्तिफलभाग्भवेत् २७
अच्युतस्यालयेभक्त्यात्रिकालंकुमुदैःशुभैः
मालतींदीवरैर्बुध्नैःकमलैश्चसुगंधिभिः २८
कुसुमोशीरकर्पूरैर्विलिप्यवरचंदनैः
नैवेद्यापूपदीपाद्यैरर्चयेच्चजनार्दनम् २९
मनसाकर्मणावाचापूजयेद्गरुडध्वजम्
कुर्वन्नरःस्त्रीविधवाबृहद्भक्तिर्जितेंद्रियः ३०
नाम्नामेवतथालापंविष्णोःकुर्यादहर्निशम्
भक्त्याविष्णोःस्तुतिर्वाच्यामिथ्यालापविवर्जिता ३१
सर्वसत्वदयायुक्तःशांतवृत्तिरहिंसकः
सुप्तोबाह्यासनस्थोवावासुदेवंप्रकीर्तयेत् ३२
स्मृत्यालोकनगंधादिस्वादनंपरिकीर्त्तनम्
अन्नस्यवर्जयेद्वासंग्रासानांसंप्रमोक्षणम् ३३
गात्राभ्यंगंशिरोभ्यंगंतांबूलंसविलेपनम्
व्रतस्थोवर्जयेत्सर्वंयच्चान्यच्चनिराकृतम् ३४
नव्रतस्थःस्पृशेत्किंचिद्विकर्मस्थंनचालयेत्
देवतायतनेतिष्ठन्नगृहस्थश्चरेत्ध्रुवम् ३५
कृत्वामासोपवासंतुयथोक्तविधिनानरः
नारीवाविधवासाध्वीवासुदेवंसमर्चयेत् ३६
अन्यूनाधिकमेवंतुव्रतंत्रिंशद्दिनैरिदम्
कृत्वामासोपवासंतुसंयतात्माजितेंद्रियः ३७
ततोऽचयेदेवपुरायंद्वादश्यांगरुडध्वजम्
पूजयेत्पुष्पमालाभिर्गंधधूपविलेपनैः ३८
वस्त्रालंकारवाद्यैश्चतोषयेदच्युतंनरः
संस्नापयेद्धरिंभक्त्यातीर्थचंदनवारिभिः ३९
चंदनेनानुलिप्तांगंधूपपुष्पैरलंकृतम्
वस्त्रदानादिभिश्चैवभोजयित्वाद्विजोत्तमान् ४०
दद्याच्चदक्षिणांतेभ्यःप्रणिपत्यक्षमापयेत्

एवंमासोपवासाद्धिकृत्वाभ्यर्च्यजनार्दनम् ४१
भोजयित्वाद्विजांश्चैवविष्णुलोकेमहीयते
एवंमासोपवासांतेकृत्वाविप्रान्त्रयोदश ४२
निर्यापयेत्ततस्तान्वैविधिनायेनतच्छृणु
कारयेद्वैष्णवंयज्ञमेकादश्यामुपोषितः ४३
पूजयित्वातुदेवेशमाचार्यानुज्ञयाहरिम्
अर्चयित्वायथाशक्त्याह्यभिवाद्यगुरुंतथा ४४
ततोनुभोजयेद्विप्रान्नमस्कारपुरःसरम्
विशुद्धकुलचारित्रविष्णुपूजनतत्परान् ४५
पूजयित्वातथासर्वान्भोजयित्वात्रयोदश
तांबूलवस्त्रयुग्मानिभोजनाच्छादनानिच ४६
योगपट्टानिसूत्राणिब्रह्मसूत्राणिचैवहि
दद्याच्चैवद्विजाग्र्येभ्यःपूजयित्वाप्रणम्यच ४७
ततोनुपूजयेच्छक्त्याशय्यांस्तरणसंस्कृताम्
साच्छादनांशुभांश्रेष्ठांसोपसोपधानामलंकृताम् ४८
कारयित्वात्मनोमूर्तिंकांचनींतुस्वशक्तितः
न्यसेत्तस्यांतुशय्यायामर्चयित्वास्त्रगादिभिः ४९
आसनंपादुकांछत्रंवस्त्रयुग्ममुपानहौ
पवित्राणिचपुष्पाणिशयायामुपकल्पयेत् ५०
एवंशय्यांतुसंकल्पप्रणिपत्यचतान्द्विजान्
प्रार्थयेच्चानुमोदार्थंविष्णुलोकंव्रजाम्यहम् ५१
ततोव्रजेन्नरश्रेष्ठोविष्णोःस्थानमनामयम्
मंडपस्थांस्तुतान्विप्रानितिवाच्यंमुहुर्मुहुः ५२
मंत्रहीनंक्रियाहीनंसर्वहीनंद्विजोत्तमाः
सर्वंसंपूर्णतांयातुभवद्वाक्यप्रसादतः
विधिर्मासोपवासस्ययथावत्परिकीर्तितः ५३

इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेमासोपवासकथनंनामैकोनविंशत्यधिकशततमोऽध्यायः११९

विंशत्यधिकशततमोऽधयायः

सूतउवाच
इतिवाक्यंसमाकरार्यपुनःपप्रच्छपावकिः
शालग्रामार्चनंभूयस्तच्छृणुध्वंतपोधनाः १
कार्तिकेयउवाच
भगवन्योगिनांश्रेष्ठसर्वेधर्माःश्रुतामया
शालग्रामार्चनंब्रूहिविस्तरेणममप्रभो २
ईश्वरउवाच
साधुसाधुमहाप्राज्ञयन्मांहिपरिपृच्छसि
तदहंसंप्रवद्म्यामिश्रूयतांममवत्सल ३
शालग्रामशिलायांतुत्रैलोक्यंसचराचरम्
महाशयमहासेननित्यंतिष्ठतिसंहितम् ४
दृष्टंप्रणमितयेनस्नापितंपूजितंतथा
यज्ञकोटिगुणंपुरायंगवांकोटिफलंलभेत् ५
छिन्नस्तेनतथावत्सगर्भवासःसुदारुणः
पीतंयेनसदाविष्णोःशालग्रामशिलाजलम् ६
कामासक्तोऽपियोनित्यंभक्तिभावविवर्जितः
शालग्रामशिलापुत्रपूजयित्वाच्युतोभवेत् ७
शालग्रामशिलाबिंबंहत्वाकोटिविनाशनम्
स्मृतंसंकीर्तितंध्यातंपूजितंचनमस्कृतम् ८
शालग्रामशिलांदृष्ट्वायांतिपापान्यनेकशः
सिंहंदृष्ट्वायथायांतिवनेमृगगणाभयात् ९
नमस्कारंतुमनुजःशालग्रामशिलार्चने
भक्त्यावायदिवाऽभक्त्याकृत्वामुक्तिमवाप्नुयात् १०
वैवस्वतभयंनास्तितथामरणजन्मनोः
यःकरोतिनरोनित्यंशालग्रामशिलार्चनम् ११
गंधपाद्यार्घनैवेद्यैर्दी पैर्धूपैर्विलेपनैः
गीतैर्वाद्यैस्तथास्तोत्रैःशालग्रामशिलार्चनम् १२
कुरुतेमानवोयस्तुकलौभक्तिपरायणः
कल्पकोटिसहस्राणिरमतेविष्णुसद्मनि १३

शालग्रामनमस्कारोभावेनापिनरैःकृतः
मानुषत्वंकथंतेषांमद्भक्तायेनराभुवि १४
मद्भक्तास्तीव्रपापिष्ठामत्प्रभुंननमंतिये
वासुदेवंनतेज्ञेयामद्भक्ताःपापमोहिताः १५
मद्भक्तोऽपिचयोभूत्वाभुंक्तेत्वेकादशीदिने
सयातिह्यंधतामिस्रेनिरयंममघातकः १६
मल्लिंगस्पर्शनंकार्यंनान्याशुद्धिर्विधीयते
यातिथिर्दयिताविष्णोःसातिथिर्ममवल्लभा १७
यस्तांनोपवसेन्मर्त्यःसपापीश्वपचाधिकः
शालग्रामशिलायांतुसदापुत्रवसाम्यहम् १८
दंत्तदेवेनतुष्टेनस्वस्थानंममभक्तितः
पद्मकोटिसहस्रैस्तुपूजितेमयियत्फलम् १९
तत्फलंकोटिगुणितंशालग्रामशिलार्चनात्
पूजितोऽहनतैर्मर्त्यैर्नमितोऽहनतैर्न रैः २०
नकृतंमर्त्यलोकेयैःशालग्रामशिलार्चनम्
शालग्रामशिलाग्रेतुयःकरोतिममार्चनम् २१
तेनार्चितोऽहसेनानीर्युगानामेकविंशतिम्
किमर्चि तैर्लिंगशतैर्विष्णुभक्तिविवर्जि तैः २२
शालग्रामशिलाबिंबंनार्चितंयदिपुत्रक
अनर्हंममनैवेद्यंपत्रंपुष्पंफलंजलम् २३
शालग्रामशिलाग्रेतुसर्वंयातिपवित्रताम्
भुक्त्वान्यदेवनैवेद्यंद्विजश्चांद्रायणंचरेत् २४
भुक्त्वाकेशवनैवेद्यंयज्ञकोटिफलंलभेत्
पादोदकेनदेवस्यहत्याकोटिसमन्विताः २५
शुद्ध्यंतिनात्रसंदेहस्तथाशंखोदकेनहि
योहिमाहेश्वरोभूत्वावैष्णवंचनपूजयेत् २६
द्वेष्टाचयातिनरकंयावदिंद्राश्चतुर्दश
ज्येष्ठाश्रमीगृहेयस्यमुहूर्त्तमपिविश्रमेत् २७
पितामहायुगान्यष्टौभवत्यमृतभोजिनः
संसारेदुःखकांतारेनिमज्ज्यंतेनराधमाः २८

वर्षकोटिसहस्राणिकृष्णाराधनवर्जिताः
स्नेहादभ्यर्चि तैर्लिंगैःशालग्रामसमुद्भवैः २९
मुक्तिंप्रयांतिमनुजायोगसांख्येनवर्जिताः
मल्लिंगकोटिभिर्दृष्टैर्यत्फलंपूजितैःस्तुतैः ३०
शालग्रामशिलायांतुएकस्यामिहतद्भवेत्
द्वादशैवशिलायोवैशालग्रामसमुद्भवाः ३१
अर्चयेद्वैष्णवोनित्यंतस्यपुरायंनबोधमे
कोटिलिगसहस्रैस्तुपूजितैर्जाह्नवीतटे ३२
काशीवासेयुगान्यष्टौदिनेनैकेनतद्भवेत्
किंपुनर्बहुनायस्तुपुजयेद्वैष्णवोनरः ३३
नाहंब्रह्मादयोदेवाःसंख्यांकर्तुंसमीहते
तस्माद्भक्त्याचमद्भक्तैःप्रीत्यर्थंममपुत्रक ३४
कर्त्तव्यंममतद्भक्त्याशालग्रामशिलार्च्चनम्
शालग्रामशिलारूपीयत्रतिष्ठतिकेशवः ३५
तत्रदेवासुरायक्षाभुवनानिचतुर्दश ३६
सुराणांकीर्तनैःसर्वैःकोटिभिश्चफलंलभेत्
तत्फलंकीर्त्तनादेवकेशवेसुकृतंकलौ ३७
शालग्रामशिलाग्रेतुसकृत्पिंडेनतर्पिताः
वसंतिपितरस्तस्यनसंख्यातत्रविद्यते ३८
येपिवंतिनराभक्त्याशालग्रामशिलाजलम्
पंचगव्यसहस्रैस्तुप्राशितैःकिंप्रयोजनम् ३९
प्रायश्चित्तेसमुत्पन्नेकिंदानैःकिमुपोषणैः
चांद्रायणैःसुचीर्णैश्चपीत्वापादोदकंहरेः ४०
यःकरोतितडागेतुप्रतिमांजलशायिनीम्
कोटिभिश्चापिकिंकार्यमन्यदेवैश्चपूजितैः ४१
विष्णुमुख्यास्तुवैदेवास्तत्रजल्पंतिवैसह
प्रमाणमस्तिसर्वस्यसुकृतस्यहिपुत्रक ४२
फलप्रमाणं नैवास्तिशालग्रामशिलार्चन
योददातिशिलांविष्णोःशालग्रामसमुद्भवाम् ४३
विप्रायविष्णुभक्तायतेनेष्टंक्रतुभिःशतैः

गृहेऽपिवसतस्तस्यगंगास्नानंदिनेदिने ४४
सस्नातःसर्वतीर्थेषुसर्वयज्ञेषुदीक्षितः
शालग्रामशिलातोयैरभिषेकंसमाचरेत् ४५
स्वर्गेमर्त्येचपातालेपाषाणाःसंतिवैगुह
शालग्रामशिलाग्राव्णानास्तिनास्तिसमापुनः ४६
मानुषेदुर्ल्लभेलोकेसफलंतस्यजीवितम्
तिलप्रस्थशतंभक्त्यायोददातिदिनेदिने ४७
तत्फलंसमवाप्नोतिशालग्रामशिलार्चनात्
पत्रंपुष्पंफलंतोयंमूलंदूर्वादलंतथा ४८
जायतेमेरुणातुल्यंशालग्रामेसमर्पितम्
विधिहीनोऽपियःकश्चित्क्रियामंत्रविवर्जितः ४९
चक्रांकभुजश्राप्नोतिसम्यक्शास्त्रोदितंफलम्
यत्तुपूर्वंमयादृष्टंकेशवेक्लेशनाशनम् ५०
तत्सर्वंकथयिष्यामितवस्नेहेनपुत्रक
क्वत्वंवससिहेविष्णोकिमाधारःकिमाश्रयः ५१
कथंवाप्रीयसेदेवतत्सर्वंकथयस्वमे
श्रीकृष्णउवाच
निवसामिसदाशंभोशालग्रामोद्भवेऽश्मनि ५२
तत्रैवरथचक्रांकेयानिनामानिमेशृणु
द्वारदेशेसमेचक्रेदृश्येतेनांतरंयदि
वासुदेवःसविज्ञेयःशुक्लश्चैवातिशोभनः ५३
प्रद्युम्नःसूर्यवक्त्रस्तुनीलदीप्तिस्तथैवच
सुषिरंच्छिद्रबहुलंदीर्घाकारंतुतद्भवेत् ५४
अनिरुद्धस्तुपीताभोवर्त्तुलश्चातिशोभनः
रेखात्रयांकितोद्वारिदृष्टपद्मेनचिह्नवत् ५५
श्यामोनारायणोदेवोनाभिचक्रेतथोन्नते
दीर्घ रेषासमोपेतोदक्षिणेसुषिरान्वितः ५६
ऊर्ध्वंमुखंचजानीयात्सुंदरंहरिरूपिणम्
कामदंमोक्षदंचैवअर्थदंचविशेषतः ५७
परमेष्ठीचशुक्लाभःपद्मचक्रसमन्वितः

बिंबाकृतिस्तथापृष्ठेसुषिरंचातिपुष्कलम् ५८
कृष्णवर्णस्तथाविष्णुर्मूलेचक्रेसुशोभने
द्वारोपरितथारेखालक्ष्यतेमध्यदेशतः ५९
कपिलोनरसिंहश्चपृथुचक्रःसुशोभितः
ब्रह्मचर्येणपूज्योसावन्यथाविघ्नदोभवेत् ६०
वाराहःशक्तिलिगस्तुचक्रेचविषमेस्मृते
इंद्रनीलनिभःस्थूलस्त्रिरेखोनाभितःशुभः ६१
दीर्घाकांचनवर्णायाबिंदुत्रयविभूषिता
मत्स्याख्यासाशिलाज्ञेयाभुक्तिमुक्तिफलप्रदा ६२
कूर्मस्तथोन्नतःपृष्ठेवर्तुलश्चक्रपूरितः
हरितंवर्णमाधत्तेकौस्तुभेनतुचिह्नितः ६३
हयग्रीवोहयाकारोरेखापंचकभूषितः
बहुबिंदुसमाकीर्णःपृष्ठेनीलंचरूपकम् ६४
वैकुंठमविभिन्नांगंचक्रमेकंतथाध्वजम्
द्वारोपरितथारेखागुंजाकारासुशोभना ६५
श्रीधरस्तुतथादेवश्चिह्नितोवनमालया
कदंबकुसुमाकारोरेखापंचकभूषितः ६६
वर्तुलश्चापिह्रस्वश्चवामनःपरिकीर्तितः
अतसीकुसुमप्रख्योबिंदुनापरिशोभितः ६७
सुदर्शनस्ततोदेवःश्यामवर्णोमहाद्युतिः
वामपार्श्वेगदाचक्रेरेखाचैवतुदक्षिणे ६८
दामोदरस्तथास्थूलोमध्येचक्रंप्रतिष्ठितम्
दूर्वाभंद्वारसंकीर्णंपीतरेखंतथैवच ६९
नानावर्णोह्यनंतस्तुनानाभोगेनचिह्नितः
अनेकमूर्तिकोभिन्नःसर्वकामफलप्रदः ७०
विदिक्षुदिक्षुसर्वासुयस्योर्ध्वंदृश्यतेमुखम्
पुरुषोत्तमःसविज्ञेयोभुक्तिमुक्तिफलप्रदः ७१
दृश्यतेशिखरेलिगंशालग्रामशिलोद्भवम्
यस्ययोगेश्वरोदेवोब्रह्महत्यांव्यपोहति ७२
आरक्तःपद्मनाभस्तुपंकजंवक्त्रसंयुतम्

तस्याभ्यर्चनतोनित्यंद्ररिद्रस्त्वीश्वरोभवेत् ७३
चक्रांकितंहिरएयांगंरश्मिजालंविनिर्दिशेत्
सुवर्णरेखाबहुलंस्फाटिकद्युतिशोभितम् ७४
अतिस्निग्धासिद्धिकरीकृष्णाकीर्तिंददातिच
पांडुरापापदहनीपितापुत्रफलप्रदा ७५
नीलाप्रयच्छतीलक्ष्मींरक्तारोगप्रदायिनी
रूक्षाउद्वेगजननीवक्रादारिद्र्यभागिनी ७६
एकंसुदर्शनंज्ञेयंलक्ष्मीनारायणंद्वयम्
तृतीयंचाच्युतंविद्याच्चतुर्थंतुजनार्दनम् ७७
पंचमंवासुदेवंचषष्ठंप्रद्युम्नमेवच
संकर्षणंसप्तमंचअष्टमंपुरुषोत्तमम् ७८
नवमंचनवव्यूहंदशमंतुतदात्मकम्
एकादशंचानिरुद्धंद्वादशंद्वादशात्मकम् ७९
अतऊर्ध्वंतुचक्राणिदृश्यंतेऽनतसंज्ञके
खंडितेत्रुटितेभग्नेसालग्रामेनदोषभाक् ८०
इष्टाचयस्ययामूर्तिःसतांयत्नेनपूजयेत्
स्कंधेकृत्वातुयोऽध्वानंवहतेशैलनायकम् ८१
तस्यवश्यंभवेत्सर्वं त्रैलोक्यंसचराचरम्
शालग्रामशिलायत्रतत्रसंनिहितोहरिः ८२
तत्रदानंजपःस्नानंवाराणस्याःशताधिकम्
कुरुक्षेत्रेप्रयागेचनैमिषेपुष्करेतथा ८३
तत्रकोटिगुणंपुण्यंवाराणस्यांमहाफलम्
ब्रह्महत्यादिकंपापंयत्किंचित्कुरुतेनरः ८४
तत्सर्वंनिर्दहत्याशुशालग्रामशिलार्चनम्
शालग्रामोद्भवोदेवोयत्रद्वारावतीभवः ८५
उभयोःसंगमोयत्रमुक्तिस्तत्रनसंशयः
ब्रह्मचारिगृहस्थैश्चवानप्रस्थैश्चभिक्षुभिः ८६
भोक्तव्यंविष्णुनैवेद्यंनात्रकार्याविचारणा
तत्पूजनेनमंत्राश्चनजपोनचभावना ८७
नस्तुतिर्नापिचाचारःशालग्रामशिलार्चने

शालग्रामशिलाग्रेतुकृत्वास्वस्तिकमादरात् ८८
कार्तिकेतुविशेषेणपुनात्यासप्तमंकुलम्
अणुमात्रंतुयःकुर्यान्मंडलंकेशवाग्रतः ८९
मृदाधातुविकारैश्चकल्पकोटिंदिवंवसेत्
यस्तुसंवत्सरंपूर्णमग्निहोत्रमुपासते ९०
कार्तिकेस्वस्तिकंकृत्वासममेतन्नसंशयः
अगम्यागमनेचैवह्यभक्षस्यतुभक्षणे ९१
तत्पापंनाशमायातिमंडयित्वाहरेर्गृहम्
मंडलंकुरुतेनित्यंयानारीकेशवाग्रतः
सप्तजन्मानिवैधव्यंनप्राप्नोतिकदाचन ९२

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्तिकमाहात्म्ये
श्रीकृष्णसत्यभामासंवादेशालिग्राममाहात्म्यंनाम
विंशत्यधिकशततमोऽध्यायः १२०

एकविशंत्यधिकशततमोऽध्यायः

ईश्वरउवाच
धात्रीच्छायांसमाश्रित्यकुर्यात्पिंडंतुयोगुह
मुक्तिंप्रयांतिपितरःप्रसादान्माधवस्यतु १
मूर्ध्निपाणौमुखेचैवदेहेचैवतुयोनरः
धत्तेधात्रीफलंवत्सधात्रीफलविभूषितः २
धात्रीफलकृताहारोनरोनारायणोभवेत्
यःकश्चिद्वैष्णवोलोकेधत्तेधात्रीफलंगुह ३
प्रियोभवतिदेवानांमनुष्याणांचकाकथा
नजह्यात्तुलसीमालांधात्रीमालांविशेषतः ४
यावत्तिष्ठतिकंठस्थाधात्रीमालानरस्यहि
तावत्तस्यशरीरेतुप्रतिष्ठतिचकेशवः ५
धात्रींफलंतुतुलसीमृत्तिकाद्वारकोद्भवा
सफलंजीवितंतस्यत्रितयंयस्यवेश्मनि ६
यावद्दिनानिवहतेधात्रीमालांकलौनरः
तावद्युगसहस्राणिवैकुंठेवसतिर्भवेत् ७

मालायुग्मंवहेद्यस्तुधात्रीतुलसिसंभवम्
वहतेकंठदेशेतुकल्पकोटिंदिवंवसेत् ८
संनियम्येंद्रियग्रामंशालग्रामशिलार्चनम्
यःकुर्यान्मानवोभक्त्यापुष्पेपुष्पेऽश्वमेधजम् ९
सुराणांचयथाविष्णुःपुष्पाणांतुलसीतथा
तुलस्यानुदिनंदेवंयोऽचयेद्गरुडध्वजम् १०
जन्मदुःखजरारोगैर्मुक्तोऽसौमुक्तिमाप्नुयात्
तुलसीमालयाविष्णुःपूजितोयेनकार्तिके ११
यमाद्वरकृतांमालांस्फुटंशौरिःप्रमार्जति
श्रीचंदनंसकर्पूरमगुरुंचसकुंकुमम् १२
केतकीदीपदानंचसर्वदाकेशवप्रियम्
कार्तिकेकेतकीपुष्पंदत्तंयेनकलौयुगे १३
दीपदानंमहासेनकुलानांतारयेच्छतम्
सरोरुहाणितुलसीकेतकीमुनिपुष्पकम् १४
कार्तिकेचदिनान्येवदीपदानंतुपंचमम्
केतकीमालयायेनकार्तिकेपुष्पमंडपम् १५
केशवस्यकृतंवत्सवसतिर्दिवितस्यच
केतकीपुष्पकेनैवपूजितोगरुडध्वजः १६
समाःसहस्रंसुप्रीतोजायतेमधुसूदनः
अर्चयित्वाहृषीकेशंकुसुमैःकेतकीभवैः १७
पुण्यंतद्भवनंयातिकेशवस्यशिवंगुह
दमनकेनापिदेवेशंसंप्राप्तेमधुमाधवे १८
समभ्यर्च्यमुनिश्रेष्ठअर्चनाल्लभतेफलम्
अगस्तिकुसुमैर्देवंयोऽचयेतजनार्दनम् १९
दर्शनात्तस्यभोविप्रनरकाग्निःप्रणश्यति
नतत्करोतिविप्रर्षेतपसातोषितोहरिः २०
यत्करोतिमहासेनमुनिपुष्पैरलंकृतः
विहायसर्वपुष्पाणिमुनिपुष्पेणकेशवम् २१
कार्तिकेयोऽचयेद्भक्त्यावाजिमेधफलंलभेत्
मुनिपुष्पकृतांमालांयोददातिजनार्दने २२

देवेंद्रोऽपिमुनिश्रेष्ठकुरुतेतस्यसत्कथाम्
गवामयुतदानेनयत्फलंप्राप्यतेगुह २३
मुनिपुष्पेणचैकेनकार्तिकेलभतेफलम्
कौस्तुभेनयथाप्रीतोयथाचवनमालया २४
तुलसीदलेनसंप्रीतःकार्तिकेचतथाहरिः
सूतउवाच
प्रश्रयावनतंदृष्ट्वाकुमारंभक्तितत्परम् २५
पुनःप्रोवाचभगवान्महादेवोवृषध्वजः
ईश्वरउवाच
शृणुदीपस्यमाहात्म्यंकार्तिकेशिखिवाहन २६
पितरश्चैववांच्छंतिसदापितृगणैर्वृताः
भविष्यतिकुलेऽस्माकंपितृभक्तःसुपुत्रकः २७
कार्तिकेदीपदानेनयस्तोषयतिकेशवम्
घृतेनदीपकोयस्यतिलतैलेनवापुनः २८
ज्वलतेयस्यसेनानीरश्वमेधेनतस्यकिम्
तेनेष्टंक्रतुभिःसर्वैःकृतंतीर्थावगाहनम् २९
दीपदानंकृतंयेनकार्तिकेकेशवाग्रतः
कृष्णापक्षेविशेषेणपुत्रपंचदिनानिच ३०
पुरयानितेषुयोदत्तेदीपंसोऽक्षयमाप्नुयात्
एकादश्यांपरैर्दत्तंदीपंप्रज्वाल्यमूषिका ३१
मानुष्यंदुर्ल्लभंप्राप्यपरांगतिमवापसा
लुब्धकोऽपिचतुर्दश्यांपूजयित्वामहेश्वरम् ३२
निर्भक्षःपरमंप्राप्यविष्णुलोकंजगामसः
श्वपाकस्याश्रयाद्वैश्यादीपंकृत्वापरैःकृतम् ३३
शुद्धालीलावतीभूत्वाजगामस्वर्गमक्षयम्
गोपःकश्चिदमावस्यांपूजांदृष्ट्वातुशार्ङ्गिणः ३४
मुहुर्मुहुर्जयेत्युक्त्वाराजराजेश्वरोऽभवत्
तस्माद्दीपाःप्रदातव्यारात्रावस्तमतेरवौ ३५
गृहेषुसर्वगोष्ठेषुसर्वेष्वायतनेषुच
देवालयेषुदेवानांश्मशानेषुसरस्सुच ३६

घृतादिनाशुभार्थाययावत्पंचदिनानिच
पापिनःपितरोयेचलुप्तपिंडोदकक्रियाः
तेपियांतिपरांमुक्तिंदीपदानस्यपुरायतः ३७
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकार्त्तिकमाहात्म्ये दीपगंधधात्रीमाहात्म्यवर्णनोनामएकविंशत्यधिकशततमोऽध्यायः १२१

द्वाविंशत्यधिकशततमोऽध्यायः

कार्तिकेयउवाच
दीपावलिफलंनाथविशेषाद्ब्रूहिसांप्रतम्
किमर्थंक्रियतेसातुतस्याःकादेवताभवेत् १
किंचतत्रभवेद्देयंकिंनदेयंवदप्रभो
प्रहर्षःकोऽत्रनिर्दिष्टःक्रीडाकात्रप्रकीर्तिता २
सूतउवाच
इतिस्कंदवचःश्रुत्वाभगवान्कामशोषणः
साधूक्त्वाकार्तिकंविप्राःप्रहसन्निदमब्रवीत् ३
श्रीशिवउवाच
कार्तिकस्यासितेपक्षेत्रयोदश्यांतुपावके
यमदीपंबहिर्दद्यादपमृत्युर्विनश्यति ४
मृत्युनापाशहस्तेनकालेनभार्ययासह
त्रयोदशीदीपदानात्सूर्यजःप्रीयतामिति ५
कार्तिकेकृष्णपक्षेचचतुर्दश्यांविधूदये
अवश्यमेवकर्त्तव्यंस्नानंचपापभीरुभिः ६
पूर्वविद्धाचतुर्दश्याकार्तिकस्यसितेतरे
पक्षेप्रत्यूषसमयेस्नानंकुर्यादतंद्रितः ७
तैलेलक्ष्मीर्जलेगंगादीपावल्यांचतुर्दशीम्
प्राप्तःस्नानंहियःकुर्याद्यमलोकंनपश्यति ८
अपामार्गस्तथातुंबीप्रपुन्नाटंचवाह्वलम्
भ्रामयेत्स्नानमध्येतुनरकस्यक्षयायवै ९
सीतालोष्टसमायुक्तसकंटकदलान्वित
हरपापमपामार्गभ्राम्यमाणःपुनःपुनः १०

अपामार्गंप्रपुन्नाटंभ्रामयेच्छिरसोपरि
ततश्चतर्पणंकार्यंयमराजस्यनामभिः ११
यमायधर्मराजायमृत्यवेचांतकायच
वैवस्तायकालायसर्वभूतक्षयायच १२
औदुंबरायदध्नायनीलायपरमेष्ठिने
वृकोदरायचित्रायचित्रगुप्तायवैनमः १३
नरकायप्रदातव्योदीपःसंपूज्यदेवताः
ततःप्रदोषसमयेदीपान्दद्यान्मनोहरान् १४
ब्रह्मविष्णुशिवादीनांभवनेषुविशेषतः
कूटागारेषुचैत्येषुसभासुचनदीषुच १५
प्राकारोद्यानवापीषुप्रतोलीनिष्कुटेषुच
मंदुरासुविविक्तासुहस्तिशालासुचैवहि १६
एवंप्रभातसमयेह्यमावास्यांतुपावकं
स्नात्वादेवान्पितॄन्भक्त्यासंपूज्याथप्रणम्यच १७
कृत्वातुपार्वणंश्राद्धंदधिक्षीरघृतादिभिः
भोज्यैर्नानाविधैर्विप्रान्भोजयित्वाक्षमापयेत् १८
ततोपराह्णसमयेपोषयेन्नागरान्प्रिय
तेषांगोष्ठींचमानंचकृत्वासंभाषणंनृपः १९
वक्तॄणांवत्सरंयावत्प्रीतिरुत्पद्यतेगुह
अप्रबुद्धेहरौपूर्वंस्त्रीभिर्लक्ष्मीःप्रबोधयेत् २०
प्रबोधसमयेलक्ष्मींबोधयित्वातुसुस्त्रिया
पुमान्वैवत्सरंयावल्लक्ष्मीस्तं नैवमुंचति २१
अभयंप्राप्यविप्रेभ्योविष्णुभीतासुरद्विषः
सुप्तंक्षीरोदधौज्ञात्वालक्ष्मींपद्माश्रितांतथा २२
त्वंज्योतिःश्रीरविश्चंद्रोविद्युत्सौवर्णतारकः
सर्वेषांज्योतिषांज्योतिर्दीपज्योतिःस्थितातुया २३
यालक्ष्मीर्दिवसेपुण्येदीपावल्यांचभूतले
गवांगोष्ठेतुकार्तिक्यांसालक्ष्मीर्वरदामम २४
शंकरश्चभवानीचक्रीडयाद्यूतमास्थितौ
भवान्याभ्यर्चितालक्ष्मीर्धेनुरूपेणसंस्थिता २५

गौर्याजित्वापुराशंभुर्नग्नोद्यूतेविसर्जितः
अतोऽयशंकरोदुःखीगौरीनित्यंसुखेस्थिता २६
प्रथमंविजयोयस्यतस्यसंवत्सरंसुखम्
एवंगतेनिशीथेतुजनेनिद्रार्धलोचने २७
तावन्नगरनारीभिस्तूर्यडिंडिमवादनैः
निष्कास्यतेप्रहृष्टाभिरलक्ष्मीश्चगृहांगणात् २८
पराजयेविरुद्धंस्यात्प्रतिपद्युदितेरवौ
प्रातर्गोवर्द्धनःपूज्योद्यूतंरात्रौसमाचरेत् २९
भूषणीयास्तथागावोवर्ज्यावहनदोहनात्
गोवर्द्धनधराधारगोकुलत्राणकारक ३०
विष्णुबाहुकृतोच्छ्रायगवांकोटिप्रदोभव
यालक्ष्मीर्लोकपालानांधेनुरूपेणसंस्थिता ३१
घृतंवहतियज्ञार्थेममपापंव्यपोहतु
अग्रतःसंतुमेगावोगावोमेसंतुपृष्ठतः
गावोमेहृदयेसंतुगवांमध्येवसाम्यहम् ३२
इतिगोवर्द्धनपूजा
सद्भावेनैवसंतोष्यदेवान्सत्पुरुषान्नरान्
इतरेषामन्नपानैर्वाक्यदानेनपंडितान् ३३
वस्त्रैस्तांबूलदीपैश्चपुष्पकर्पूरकुंकुमैः
भक्ष्यैरुच्चावचैर्भोज्यैरंतःपुरनिवासिनः ३४
ग्रामर्षभंचदानैश्चसामंतान्नृपतिर्धनैः
पदातिजनसंघांश्चग्रैवेयैःकटकैःशुभैः ३५
स्वानमात्यांश्चतान्राजातोषयेत्स्वजनान्पृथक्
यथार्थंतोषयित्वातुततोमल्लान्नटांस्तथा ३६
वृषभांश्चमहोक्षांश्चयुद्ध्यमानान्परैःसह
राजान्यांश्चापियोधांश्चपदातीन्ससमलंकृतान् ३७
मंचारूढःस्वयंपश्येन्नटनर्तकचारणान्
योधयेद्वासयेच्चैवगोमहिष्यादिकंचयत् ३८
वत्सानाकर्षयेद्गोभिरुक्तिप्रत्युक्तिवादनात्
ततोपराह्णसमयेपूर्वस्यांदिशिपावके ३९

मार्गपालद्यंप्रबध्नीयाद्दुर्गस्तंभेऽथपादपे
कुशकाशमयींदिव्यांलंबकैर्बहुभिर्गुह ४०
वीक्षयित्वागजानश्वान्मार्गपाल्यास्तलेनयेत्
गावैर्वृषांश्चमहिषान्महिषीर्घंटिकोत्कटाः ४१
कृतहोमैर्द्विजेंद्रैस्तुबध्नीयान्मार्गपालिकाम्
नमस्कारंततःकुर्यान्मंत्रेणानेनसुव्रतः ४२
मार्गपालिनमस्तुभ्यंसर्वलोकसुखप्रदे
मार्गपालीतलेस्कंदयांतिगावोमहावृषाः ४३
राजानोराजपुत्राश्चब्राह्मणाश्चविशेषतः
मार्गपालद्यंसमुल्लंघ्यनिरुजःसुखिनोहिते ४४
कृत्वैतत्सर्वमेवेहरात्रौदैत्यपतेर्बलेः
पूजांकुर्यात्ततःसाक्षाद्भूमौमंडलकेकृते ४५
बलिमालिख्यदैत्येंद्रंवर्णकैःपंचरंगकैः
सर्वाभरणसंपूर्णंविंध्यावलिसमन्वितम् ४६
कूष्मांडमयजंभोरुमधुदानवसंवृतम्
संपूर्णहृष्टवदनंकिरीटोत्कटकुंडलम् ४७
द्विभुजंदैत्यराजानंकारयित्वास्वकेपुनः
गृहस्यमध्येशालायांविशालायांततोऽर्चयेत् ४८
मातृभ्रातृजनैःसार्द्धंसंतुष्टोबंधुभिःसह
कमलैःकुमुदैःपुष्पैःकल्हारैरक्तकोत्पलैः ४९
गंधपुष्पान्ननैवेद्यैःसक्षीरैर्गुडपायसैः
मद्यमांससुरालेह्यचोष्यभक्ष्योपहारकैः ५०
मंत्रेणानेनराजेंद्रःसमंत्रीसपुरोहितः
पूजांकरिष्यतेयोवैसौख्यंस्यात्तस्यवत्सरम् ५१
बलिराजनमस्तुभ्यंविरोचनसुतप्रभो
भविष्येंद्रसुरारातेपूजेयंप्रतिगृह्यताम् ५२
एवंपूजाविधिंकृत्वारात्रौजागरणंततः
कारयेद्वैक्षणंरात्रौनटनर्तकगायकैः ५३
लोकैश्चापिगृहस्यांतेसपर्यांशुक्लतंडुलैः
संस्थाप्यबलिराजानंफलैःपुष्पैश्चपूजयेत् ५४

बलिमुद्दिश्यवैतत्रकार्यंसर्वंचपावके
यानियान्यक्षयान्याहुऋृषयस्तत्वदर्शिनः ५५
यदत्रदीयतेदानंस्वल्पंवायदिवाबहु
तदक्षयंभवेत्सर्वंविष्णोःप्रीतिकरंशुभम् ५६
रात्रौयेनकरिष्यंतितवपूजांबलेर्नराः
तेषामश्रोत्रियंधर्मंसर्वंत्वामुपतिष्ठतु ५७
विष्णुनाचस्वयंवत्सतुष्टेनबलयेपुनः
उपकारकरंदत्तमसुराणांमहोत्सवम् ५८
तदाप्रभृतिसेनानेप्रवृत्ताकौमुदीसदा
सर्वोपद्रवविद्रावासर्वविघ्नविनाशिनी ५९
लोकशोकहराकाम्याधनपुष्टिसुखावहा
कुशब्देनमहीज्ञेयामुदहर्षेततोद्वयम् ६०
धातुत्वेनिगमैश्चैवतेनैषाकौमुदीस्मृता
कौमोदंतेजनायस्मान्नानाभावैःपरस्परम् ६१
हृष्टतुष्टाःसुखापन्नास्तेनैषाकौमुदीस्मृता
कुमुदानिबलेर्यस्यांदीयंतेतेनषण्मुख ६२
अर्घार्थंपार्थिवैःपुत्रतेनैषाकौमुदीस्मृता
एकमेवमहोरात्रंवर्षेवर्षेचकार्तिके ६३
दत्तंदानवराजस्यआदर्शमिवभूतल
यःकरोतिनृपोराज्येतस्यव्याधिभयंकुतः ६४
सुभिक्षंक्षेममारोग्यंतस्यसंपदनुत्तमा
नीरुजश्चजनाःसर्वेसर्वोपद्रववर्जिताः ६५
कौमुदीक्रियतेतस्माद्भावंकर्तुंमहीतले
योयादृशेनभावेनतिष्ठत्यस्यांचषण्मुख ६६
हर्षदुःखादिभावेनतस्यवर्षंप्रयातिहि
रुदितेरोदतेवर्षंहृष्टेवर्षंप्रहर्षितम् ६७
भुक्तेभोक्ताभवेद्वर्षंस्वस्थेस्वस्थंभविष्यति
तस्मात्प्रहृष्टैःकर्त्तव्याकौमुदीचशुभैर्नरैः ६८
वैष्णवीदानवीचेयंतिथिःप्रोक्ताचकार्तिके ६९
दीपोत्सवंजनितसर्वजनप्रसादंकुर्वंतियेशुभतयाबलिराजपूजाम्

दानोपभोगसुखबुद्धिमतांकुलानांहर्षंप्रयातिसकलंप्रभुदंचवर्षम् ७०
स्कंदैतास्तिथयोनूनंद्वितीयाद्याश्चविश्रुताः
मासैश्चतुर्भिश्चततःप्रावृट्कालेशुभावहाः ७१
प्रथमाश्रावणेमासितथाभाद्रपदेपरा
तृतीयाश्वयुजेमासिचतुर्थीकार्तिकेभवेत् ७२
कलुषाश्रावणेमासितथाभाद्रोपदेमला
आश्विनेप्रेतसंचाराकार्तिकेयाम्यकामता ७३
गुहउवाच
कस्मात्साकलुषाप्रोक्ताकस्मात्सानिर्मलामता
कस्मात्साप्रेतसंचाराकस्माद्याम्याप्रकीर्तिता ७४
सूतउवाच
इतिस्कंदवचःश्रुत्वाभगवान्भूतभावनः
उवाचवचनंश्लक्ष्णंप्रहसन्वृषभध्वजः ७५
महेशउवाच
पुरावृत्रवधेवृत्तेप्राप्तेराज्येपुरंदरे
ब्रह्महत्यापनोदार्थमश्वमेधःप्रवर्तितः ७६
क्रोधादिंद्रेणवज्रेणब्रह्महत्यानिषूदिता
षड्विधासाक्षितौक्षिप्तावृक्षतोयमहीतले ७७
नार्यांभ्रूणहणिवह्नौसंविभज्ययथाक्रमम्
तत्पापश्रवणात्पूर्वंद्वितीयायादिनेनच ७८
नारीवृक्षनदीभूमिवह्निभ्रूणहनस्तथा
कलुषीभवनंजातोह्यतोर्थंकलुषास्मृता ७९
मधुकैटभयोरक्तेपुरामग्नानुमेदिनी
अष्टांगुलापवित्रासानारीणांतुरजोमलम् ८०
नद्यःप्रावृगमलासर्वावह्निरूर्ध्वंमषीमलः
निर्यासमलिनावृक्षाःसंगाद्भ्रूणहनोमलाः ८१
कलुषानिचरंत्यस्यांतेनैषाकलुषामता
देवर्षिपितृधर्माणांनिंदकानास्तिकाःशठाः ८२
तेषांसावाङ्मलात्पूताद्वितीयातेननिर्मला
अनध्यायेषुशास्त्राणिपाठयंतिपठंतिच ८३

सांख्यकास्तार्किकाःश्रौतास्तेषांशब्दापशब्दजात्
मलात्पूताद्वितीयायांततोर्थेनिर्मलाचसा ८४
कृष्णस्यजन्मनावत्सत्रैलोक्यंपावितंभवेत्
नभस्येतेविनिर्दिष्टानिर्मलासातिथिर्बुधैः ८५
अग्निष्वात्ताबर्हिषदआज्यपाःसोमपास्तथा
पितॄन्पितामहान्प्रेतसंचारात्प्रेतसंचरा ८६
प्रेतास्तुपितरःप्रोक्तास्तेषांतस्यांतुसंचरः
पुत्रपौत्रैस्तुदौहित्रैःस्वधामं त्रैस्तुपूजिताः ८७
श्राद्धदानमखैस्तृप्तायांत्यतःप्रेतसंचरा
महालयेतुप्रेतानांसंचारोभुविदृश्यते ८८
तेनैषाप्रेतसंचाराकीर्तिताशिखिवाहन
यमस्यक्रियतेपूजायतोऽस्यापावकेनरैः ८९
तेनैषायाम्यकाप्रोक्तासत्यंसत्यंमयोदितम्
एतत्कार्तिकमाहात्म्यंयेशृण्वंतिनरोत्तमाः ९०
कार्तिकस्नानजंपुण्यंतेषांभवतिनिश्चितम् ९१
कार्तिकेचद्वितीयायांपूर्वाह्णेयममर्चयेत्
भानुजायांनरःस्नात्वायमलोकंनपश्यति ९२
कार्तिकेशुक्लपक्षेतुद्वितीयायांतुशौनक
यमोयमुनयापूर्वंभोजितःस्वगृहेऽर्चितः ९३
द्वितीयायांमहोत्सर्गोनारकीयाश्चतर्पिताः
पापेभ्योविप्रयुक्तास्तेमुक्ताःसर्वनिबंधनात् ९४
आशंसिताश्चसंतुष्टाःस्थिताःसर्वेयदृच्छया
तेषांमहोत्सवोवृत्तोयमराष्ट्रसुखावहः ९५
अतोयमद्वितीयेयंत्रिषुलोकेषुविश्रुता
तस्मान्निजगृहेविप्रनभोक्तव्यंततोबुधैः ९६
स्नेहेनभगिनीहस्ताद्भोक्तव्यंपुष्टिवर्द्धनं
दानानिचप्रदेयानिभगिनीभ्योविधानतः ९७
स्वर्णालंकारवस्त्राणिपूजासत्कारसंयुतम्
भोक्तव्यंसहजायाश्चभगिन्याहस्ततःपरम् ९८
सर्वासुभगिनीहस्ताद्भोक्तव्यंबलवर्द्धनम्

ऊर्जेशुक्लद्वितीयायांपूजितस्तर्पितोयमः ९९
महिषासनमारूढोदंडमुद्गरभृत्प्रभुः
वेष्टितःकिंकरैर्हृष्टैस्तस्मैयाम्यात्मनेनमः १००
यैर्भगिन्यःसुवासिन्योवस्त्रदानादितोषिताः
नतेषांवत्सरंयावत्कलहोनरिपोर्भयम् १०१
धन्यंयशस्यमायुष्यंधर्मकामार्थसाधनम्
व्यारव्यातंसकलंपुत्रसरहस्यंमयानघ १०२
यस्यांतिथौयमुनयायमराजदेवःसंभोजितःप्रतितिथौस्वसृसौहृदेन
तस्मात्स्वसुःकरतलादिहयोभुनक्तिप्राप्नोतिवित्तशुभसंपदमुत्तमांसः १०३
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्ससहस्रसंहितायामुत्तरखंडेकार्तिकमाहात्म्ये
द्वाविंशत्यधिकशततमोऽध्यायः १२२

त्रयोविंशत्यधिकशततमोऽध्यायः

कार्तिकेयउवाच
भगवञ्छ्रोतुमिच्छामिव्रतानामुत्तमंव्रतम्
विधिंमासोपवासस्यफलंचास्ययथोदितम् १
यथाविधिनरैःकार्याव्रतचर्यायथाभवेत्
आरभ्यतेयथापूर्वंसमाप्यंहियथाविधि २
यावत्संख्यंतुकर्तव्यंतत्प्रब्रूहिमहेश्वर
व्रतमेतत्सुरश्रेष्ठविस्तरेणममानघ ३
श्रीरुद्रउवाच
साधुपावकिसर्वं तेयत्पृष्टंप्रब्रुवेऽनघ
भक्त्यामतिमतांश्रेष्ठशृणुष्वगदतोमम ४
सुराणांचयथाविष्णुस्तपतांचयथारविः
मेरुःशिखरिणांयद्वद्वैनतेयश्चपक्षिणाम् ५
तीर्थानांतुयथागंगाप्रजानांतुयथावणिक्
श्रेष्ठंसर्वव्रतानांतुतद्वन्मासोपवासनम् ६
सर्वव्रतेषुयत्पुरायंसर्वतीर्थेषुचैवहि
सर्वदानोद्भवंचैवलभेन्मासोपवासकृत् ७
अग्निष्टोमादिभिर्यज्ञैर्विविधैर्भूरिदक्षिणैः

नतत्पुण्यमवाप्नोतियन्मासपरिलंघनात् ८
तेनजप्तंहुतंदत्तंतपस्तप्तंकृतास्वधा
यःकरोतिविधानेननरोमासमुपोषणम् ९
उद्दिश्यवैष्णवंयज्ञंसमभ्यर्च्यजनार्दनम्
गुरोराज्ञांततोलब्ध्वाकुर्यान्मासोपवासनम् १०
वैष्णवानियथोक्तानिकृत्वासर्वव्रतानितु
द्वादश्यादीनिपुण्यानिततोमासमुपावसेत् ११
अतिकृच्छ्रंचपाराकंकृत्वाचांद्रायणंततः
मासोपवासंकुर्वीतज्ञात्वादेहबलाबलम् १२
वानप्रस्थोयतिर्वापिनारीवाविधवामुने
मासोपवासंकुर्वीतगुरोर्विप्राज्ञयाततः १३
आश्विनस्यामलेपक्षेएकादश्यामुपोषितः
व्रतमेतत्तुगृह्णीयाद्यावत्त्रिंशद्दिनानितु १४
वासुदेवंसमभ्यर्च्यकार्तिकंसकलंनरः
मासंचोपवसेद्यस्तुसमुक्तिफलभाग्भवेत् १५
अच्युतस्यालयेभक्त्यात्रिकालंकुमुदैःशुभैः
मालतींदीवरैःपद्मैःकमलैस्तुसुगंधिभिः १६
कुंकुमोशीरकर्पूरैर्विलिप्यवरचंदनैः
नैवेद्यधूपदीपाद्यैरर्चयेच्चजनार्दनम् १७
मनसाकर्मणावाचापूजयेद्गरुडध्वजम्
कुर्वन्नरस्त्रीविधवाबृहद्भक्तिर्जितेंद्रियः १८
नाम्नामेवतथालापंविष्णोःकुर्यादहर्निशम्
भक्त्याविष्णोस्तुतिर्वाच्यामिथ्यालापविवर्जिता १९
सर्वसत्वदयायुक्तःशांतवृत्तिरहिंसकः
सुप्तोबाह्यासनस्थोवावासुदेवंप्रकीर्तयेत् २०
स्मृत्वालोकनगंधादिस्वादितंपरिकीर्तितम्
अन्नस्यवर्जयेद्गासंग्रासानांसम्प्रमोक्षणम् २१
गात्राभ्यंगंशिरोभ्यंगंतांबूलंसविलेपनम्
व्रतस्थोवर्जयेत्सर्वंयच्चान्यच्चनिराकृतम् २२
नव्रतस्थःस्पृशेत्किंचिद्विकर्मस्थंनचालयेत्

देवतायतनेतिष्ठन्गृहस्थश्चाचरेद्व्रतम् २३
कृत्वामासोपवासंतुयथोक्तविधिनानरः
नारीवाविधवासाध्वीवासुदेवंसमर्चयेत् २४
अन्यूनाधिकमेवंतुव्रतंत्रिंशद्दिनैरिति
कृत्वामासोपवासंतुसंयतात्माजितेंद्रियः २५
ततोऽचयेदेवपुरायंद्वादश्यांगरुडध्वजम्
पूजयेत्पुष्पमालाभिर्गंधधूपविलेपनैः २६
वस्त्रालंकारवाद्यैश्चतोषयेदच्युतंनरः
संस्नापयेद्धरिंभक्त्यातीर्थचंदनवारिभिः २७
चंदनेनानुलिप्तांगंधूपपुष्पैरलंकृतम्
वस्त्रदानादिभिश्चैवभोजयित्वाद्विजोत्तमान् २८
दद्याच्चदक्षिणांतेभ्यःप्रणिपत्यक्षमापयेत्
विप्रान्क्षमापयित्वातुविसृज्याभ्यर्च्यपूज्यच २९
एवंवित्तानुसारेणभक्तियुक्तेनशक्तितः
एवंमासोपवासान्हिकृत्वाभ्यर्चजनार्दनम् ३०
भोजयित्वाद्विजांश्चैवविष्णुलोकेमहीयते
एवंमासोपवासांतेवृत्वाविप्रांस्त्रयोदश ३१
निर्यापयेत्ततस्तान्वैविधिनायेनतच्छृणु
कारयेद्वैष्णवंयज्ञमेकादश्यामुपोषितः ३२
पूजयित्वातुदेवेशमाचार्यानुज्ञयाहरिम्
अर्चयित्वायथाशक्त्याह्यभिवाद्यगुरुंतथा ३३
ततोनुभोजयेद्विप्रान्नमस्कारपुरःसरम्
विशुद्धकुलचारित्रान्विष्णुपूजनतत्परान् ३४
पूजयित्वातथासर्वान्भोजयित्वात्रयोदश
तांबूलवस्त्रयुग्मानिभोजनाच्छादनानिच ३५
योगपट्टानिसूत्राणिब्रह्मसूत्राणिचैवहि
दत्त्वाचैवद्विजाग्र्येभ्यःपूजयित्वाप्रणम्यच ३६
ततोनुपूजयेद्भक्त्याशय्यास्तरणसंस्कृताम्
साच्छादनांशुभांश्रेष्ठांसोपधानामलंकृताम् ३७
कारयित्वात्मनोमूर्तिकांचनींतुस्वशक्तितः

न्यसेत्तस्यांतुशय्यायामर्चयित्वास्त्रगादिभिः ३८
श्रासनंपादुकाछत्रंवस्त्रयुग्ममुपानहौ
पवित्राणिचपुष्पाणिशय्यायामुपकल्पयेत् ३९
एवंशय्यांतुसंकल्प्यप्रणिपत्यचतान्द्विजान्
प्रार्थयेच्चानुमोदार्थंविष्णुलोकंव्रजाम्यहम् ४०
ततोव्रजेन्नरःप्रेष्ठंविष्णोःस्थानमनामयम्
मंडपस्थांस्तुतान्विप्रानितिवाच्यंमुहुर्मुहुः ४१
मंत्रहीनंभक्तिहीनंक्रियाहीनंद्विजोत्तमाः
सर्वसंपूर्णतांयातुभवद्वाक्यप्रसादतः
विधिर्मासोपवासस्ययथावत्परिकीर्तितः ४२
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेश्रीकृष्णसत्यभामा
संवादेमासोपवासकथनंनामत्रयोविंशत्यधिकशततमोऽध्यायः १२३

चतुर्विंशत्यधिकशततमोऽध्यायः

ईश्वरउवाच
प्रबोधिन्याश्चमाहात्म्यंपापघ्नंपुण्यवर्द्धनम्
मुक्तिदंतत्वबुद्धीनांशृणुष्वसुरसत्तम १
तावद्गर्जतिसेनानिगंगाभागीरथीद्विजौ
यावन्नायातिपापघ्नीकार्तिकेहरिबोधिनी २
तावद्गच्छंतितीर्थानिश्रासमुद्रसरांसिच
यावत्प्रबोधिनीविष्णोस्तिथिर्नायातिकार्तिके ३
श्रश्वमेधसहस्राणिराजसूयशतानिच
एकेनैवोपवासेनप्रबोधिन्यांयथाऽभवत् ४
दुर्लभंचैवदुष्प्राप्यं त्रैलोक्येसचराचरे
तदपिप्रार्थितंविप्रददातिप्रतिबोधिनी ५
एश्वर्यंसंसृतिंज्ञानंराज्यंचसुखसंपदम्
ददात्युपोषिताविप्रहेलयाहरिबोधिनी ६
मेरुमंदरतुल्यानिपापान्युपार्जितानिच
एकेनैवोपवासेनदहतेहरिबोधिनी ७
उपवासंप्रबोधिन्यांयःकरोतिस्वभावतः

विधिनानरशार्दूलयथोक्तंलभतेफलम् ८
पूर्वजन्मसहस्रेषुपापंयत्समुपार्जितम्
जागरेणप्रबोधिन्यांदह्यतेतूलराशिवत् ९
शृणुषरामुखवक्ष्यामिजागरस्यचलक्षणम्
यस्यविज्ञानमात्रेणदुर्लभोनजनार्दनः १०
गीतंवाद्यंचनृत्यंचपुराणपठनंतथा
धूपंदीपंचनैवेद्यंपुष्पंगंधानुलेपनम् ११
फलमर्घ्यंचश्रद्धाचदानमिंद्रियसंयमम्
सत्यान्वितंविनिद्रंचमुदायुक्तंक्रियान्वितम् १२
साश्चर्यंचैवसोत्साहमालस्यादिविवर्जितम्
प्रदक्षिणादिसंयुक्तंनमस्कारपुरःसरम् १३
नीराजनसमायुक्तमनिर्विण्णेनचेतसा
यामेयामेमहाभागकुर्वन्नीराजनंहरेः १४
एतैर्गुणैःसमायुक्तंकुर्याज्जागरणंविभोः
एकाग्रमानसोयस्तुनपुनर्जायतेभुवि १५
यएवंकुरुतेभक्त्यावित्तशाठ्यविवर्जितैः
जागरंवासरेविष्णोर्नीयतेपरमांगतिम् १६
पुरुषसूक्तेनयोनित्यंकार्तिकेऽर्चयेद्धरिम्
वर्षकोटिसहस्राणिपूजितस्तेनकेशवः १७
यथोक्तेनविधानेनपंचरात्रोदितेनवै
कार्तिकेत्वर्चयेन्नित्यंमुक्तिभागीभवेन्नरः १८
नमोनारायणायेतिकार्तिकेयोऽचयेद्धरिम्
समुक्तोनारकैर्दुःखैःपदंगच्छत्यनामयम् १९
हरेर्नामसहस्रंचगजराजस्यमोक्षणम्
कार्तिकेपठतेयस्तुपुनर्जन्मनविंदति २०
युगकोटिसहस्राणिमन्वंतरशतानिच
द्वादश्यांकार्तिकेमासिजागरीवसतेदिवि २१
कुलेतस्यचसंजाताःशतशोऽथसहस्रशः
प्राप्नुवंतिपदंविष्णोस्तस्मात्कुर्वीतजागरम् २२
कार्तिकेपश्चिमेयामेस्तवंगानंकरोतियः

श्वेतद्वीपेतुवसतेपितृभिःसहभामिनि २३
नैवेद्यदानंहरयेकार्तिकेदिनसंक्षये
युगानिवसतेस्वर्गेतावंतिमुनिसत्तमाः २४
अक्षयंमुनिशार्दूलमालतीकमलार्चनम्
अर्चयेद्देवदेवेशंसयातिपरमंपदम् २५
कार्तिकेशुक्लपक्षेतुकृत्वाह्येकादशींनरः
प्रातर्दत्त्वाशुभान्कुंभान्सयातिममंदिरम् २६
कार्त्तिकेयउवाच
भगवन्नुच्यतांपुण्यंव्रतानांपरमंव्रतम्
कर्तव्यंकार्तिकेमासिभवताभीष्मपंचकम् २७
विधानंतस्यचफलंतथैवसुरसत्तम
कथयस्वप्रसादान्मेमुनीनांचपितामह २८
ईश्वरउवाच
प्रवक्ष्यामिमहापुण्यंव्रतंविधिमतांवरः
भीष्मेणैतद्यतःप्राप्तंव्रतंपंचदिनात्मकम् २९
सकाशाद्वासुदेवस्यतेनोक्तंभीष्मपंचकम्
व्रतस्यास्यगुणान्वक्तुंकःशक्तःकेशवादृते ३०
कार्त्तिकेशुक्लपक्षेतुशृणुधर्मंपुरातनम्
वसिष्ठभृगुगर्गाद्यैश्चीर्णंकृतयुगादिषु ३१
अंबरीषेणभोगाद्यैश्चीर्णं त्रेतायुगादिषु
ब्राह्मणैर्ब्रह्मचर्येणजपहोमक्रियादिभिः ३२
क्षत्रियैश्चतथावैश्यैःसत्यशौचपरायणैः
दुष्करंसत्यहीनानामशक्यंबालचेतसाम् ३३
दुष्करंभीष्ममित्याहुर्नशक्यंप्राकृतैर्नरैः
यस्तत्करोतिविप्रेंद्रतेनसर्वंकृतंभवेत् ३४
व्रतंचैतन्महापुण्यंमहापातकनाशनम्
अतोनरैःप्रयत्नेनकर्त्तव्यंभीष्मपंचकम् ३५
कार्तिकस्यामलेपक्षेस्नात्वासम्यग्विधानतः
एकादश्यांतुगृह्णीयाद्व्रतंपंचदिनात्मकम् ३६
प्रातःस्नात्वाविशेषेणमध्याह्नेचतथाव्रती

नद्यांनिर्झरगर्तेवासमालभ्यचगोमयम् ३७
यवव्रीहितिलैःसम्यक्पितॄन्संतर्पयेत्क्रमात्
स्नात्वामौनंनरःकृत्वाधौतवासादृढव्रतः ३८
भीष्मायोदकदानंचअर्घ्यंचैवप्रयत्नतः
पूजाभीष्मस्यकर्त्तव्यादानंदद्यात्प्रयत्नतः ३९
पंचरत्नंविशेषेणदत्त्वाविप्राययत्नतः
वासुदेवोऽपिसंपूज्योलक्ष्मीयुक्तःसदाप्रभुः ४०
पंचकेपूजयित्वातुकोटिकल्पानितुष्यति
यत्किंचित्क्रियतेसर्वंपंचधातुप्रकल्पयेत् ४१
संवत्सरव्रतानांचलभतेसकलंफलम्
कृत्वातूदकदानंतुतथार्घ्यस्यचदापनम् ४२
मंत्रेणानेनयःकुर्यान्मुक्तिभागीभवेन्नरः ४३
वैयाघ्रपादगोत्रायसांकृतेप्रवरायच
अपुत्रायददाम्येतदुदकंभीष्मवर्मणे ४४
वसूनामवतारायशंतनोरात्मजायच
अर्घ्यंददामिभीष्मायआजन्मब्रह्मचारिणे ४५
इतिअर्घ्यमंत्रः
अनेनविधिनायस्तुपंचकंतुसमापयेत्
अश्वमेधसमंपुरायंप्राप्नोत्यत्रनसंशयः ४६
पंचाहमपिकर्तव्यंनियमंचप्रयत्नतः
नियमेनविनापुत्रनभाव्यंव्रतकर्मणा ४७
उत्तरायणहीनायभीष्मायप्रददौहरिः
उत्तरायणहीनोऽपिशुद्धिंलग्नंविनाशुभाः ४८
ततःसंपूजयेद्देवंसर्वपापहरंहरिम्
अनंतरंप्रयत्नेनकर्तव्यंभीष्मपंचकम् ४९
स्नापयेतजलैर्भक्त्यामधुक्षीरघृतेनच
तथैवपंचगव्येनगंधचंदनवारिणा ५०
चंदनेनसुगंधेनकुंकुमेनाथकेशवम्
कर्पूरोशीरमिश्रेणलेपयेद्गरुडध्वजम् ५१
अर्चयेद्रुचिरैःपुष्पैर्गंधधूपसमन्वितैः

गुग्गुलुंघृतंसंयुक्तंदहेत्कृष्णायभक्तिमान् ५२
दीपकंतुदिवारात्रौदद्यात्पंचदिनादिषु
नैवेद्यंदेवदेवस्यपरमान्नंनिवेदयेत् ५३
एवमभ्यर्चयेद्देवंसंस्मृत्यचप्रणम्यच
ॐनमोवासुदेवायजपेदष्टोत्तरंशतम् ५४
जुहुयाच्चघृताभ्यक्तैस्तिलव्रीहियवादिभिः
षडक्षरेणमंत्रेणस्वाहाकारान्वितेनच ५५
उपास्यपश्चिमांसंध्याप्रणम्यगरुडध्वजम्
जपित्वापूर्ववन्मंत्रंक्षितिशायीभवेद्व्रती ५६
सर्वमेतद्विधानंतुकार्यंपंचदिनानितु
विशेषोऽत्रव्रतेह्यस्मिन्यदन्यूनंश्रृणुष्वतत् ५७
प्रथमेऽह्निहरेःपादौपूजयेत्कमलैर्व्रती
द्वितीयेबिल्वपत्रेणजानुदेशंसमर्चयेत् ५८
ततोनुपूजयेच्छीर्षंमालत्याचक्रपाणिनः
कार्तिक्यांदेवदेवस्यभक्त्यातद्गतमानसः ५९
अर्चित्वातंहृषीकेशमेकादश्यांसमासतः
निष्प्राश्यगोमयंसम्यगेकादश्यामुपावसेत् ६०
गोमूत्रंमंत्रवद्भूमौद्वादश्यांप्राशयेद्व्रती
क्षीरंचैवत्रयोदश्यांचतुर्दश्यांतथादधि ६१
संप्राश्यकायशुद्ध्यर्थंलंघयित्वाचतुर्दिनम्
पंचमेदिवसेस्नात्वाविधिवत्पूज्यकेशवम् ६२
भोजयेद्ब्राह्मणान्भक्त्यातेभ्योदद्याच्चदक्षिणाम्
पापबुद्धिंपरित्यज्यब्रह्मचर्येणधीमता ६३
मद्यंमांसंपरित्यज्यमैथुनंपापकारिणम्
शाकाहारेणमुन्यन्नैःकृष्णार्चनपरोनरः ६४
ततोनक्तंसमाश्नीयात्पंचगव्यपुरःसरम्
एवंसम्यक्समाप्तस्ययथोक्तंफलमाप्नुयात् ६५
मद्यपोयत्पिबेन्मद्यंजन्मनोमरणांतिकम्
एतद्भीष्मव्रतंकृत्वाप्राप्नोतिपरमंपदम् ६६
स्त्रीभिर्ब्राह्मणवाक्येनकर्तव्यंधर्मवर्द्धनम्

विधवाभिश्चकर्तव्यंमोक्षसौख्याभिवृद्धये ६७
सर्वकामसमृद्ध्यर्थंपुरायार्थमपिपावके
नित्यस्नानेतथादानेयेकार्तिकमुपासते ६८
वैश्वदेवश्चकर्तव्योविष्णुध्यानपरायरौः
आरोग्यपुत्रदोवत्समहापातकनाशनः ६९
तीर्थेषुकार्तिकंकुर्यात्सर्वयत्नेनषरामुख
संवत्सरव्रतानांतुसमाप्तिःकार्तिकेमता ७०
पापस्यप्रतिमाकार्यारौद्रवस्त्रातिभीषरा
खड्गहस्ताविनिष्क्रांतालोहदंष्ट्राकरालिनी ७१
तिलप्रस्थोपरिस्थाप्याकृष्णवस्त्राभिवेष्टिता
रक्तपुष्पकृतापीडाज्वलत्कांचनकुंडला ७२
संपूज्यपरयाभक्त्याधर्मराजस्यनामभिः
इममुच्चारयेन्मंत्रंगृहीतकुसुमांजलि ७३
यदन्यजन्मनिकृतमिहजन्मनिवापुनः
पापंप्रशममायातुतवपादप्रसादतः ७४
एवंसंपूज्यविधिवत्प्रतिमांतांचकांचनीम्
कृत्वापूजांयथाशक्त्याविप्राणांवेदवादिनाम् ७५
प्रीतयेदेवदेवस्यकृष्णस्याक्लिष्टकर्मणः
ब्राह्मणायप्रदातव्यंधर्मोमेप्रीयतामिति ७६
वाचकायप्रदातव्यायथाशक्त्याचदक्षिणा
दद्याद्धिररायंगाश्चैवकृष्णोमेप्रीयतामिति ७७
कृतकृत्यस्थितोभूत्वाविरक्तःसंयतोभवेत्
अन्येषामपिदातव्यंस्वशक्त्यादानमुत्तमम् ७८
शांतचित्तोनिरपराधःपरंपदमवाप्नुयात्
नीलोत्पलदलश्यामश्चतुर्दंष्ट्रश्चतुर्भुजः ७९
अष्टपादैकनयनःशंकुकर्णःखरस्वनः
जडीद्विजिह्वस्ताम्राक्षोमृगराजतनुच्छदः ८०
चिंतनीयोमहादेवोयस्यरूपंनविद्यते
इंदभीष्मेराकथितंशरतल्पगतेनमे ८१
तदेतत्तेमयाख्यातंदुष्करंभीष्मपंचकं

धन्यंपुरायंपापहरंयुधिष्ठिरमहाव्रतम्
यत्कृत्वाब्रह्महागोघ्नःसर्वपापैःप्रमुच्यते ८२
यद्भीष्मपंचकमितिप्रथितंपृथिव्यामेकादशीप्रभृतिपंचदशीनिरुद्धम्
उक्तंनभोजनपरस्यतदानिषेधस्तस्मिन्व्रतेशुभफलंप्रददातिविष्णुः ८३
सूतउवाच
एतत्सर्वाधिकंपुरायंदुर्लभंभुवनेकृतम्
इदंगुह्यंमयाख्यातंशास्त्रसारसमुच्चयम् ८४
सुराणांगोपितंसर्वमतिगुह्यंचमोक्षदम्
श्रुत्वाचैकपदेदेविअगम्यागमनेरताः ८५
कन्याविक्रीस्वसाविक्रीह्युभयंतुविमोचयेत्
मोक्षदंचइदंशास्त्रंप्रकाशंनेतरेजने ८६
श्रुत्वाचैकपदेयस्तुमोक्षंगच्छतिमानवः
गोपनीयंप्रयत्नेनयेचापित्यागिनोनराः ८७
नतेषांकथ्यतेपुरायंसत्यंसत्यंचषरामुख
इत्येतत्सर्वमाख्यातंकार्तिकस्यतुयत्फलम् ८८
श्रीविष्णुरुवाच
कथितंदेवदेवेनपुत्रायहितकाम्यया
पितुस्तद्वाक्यमाकरार्यषरामुखोहर्षनिर्भरः ८९
ऊचुःप्रांजलयःसर्वेतंदेवंजगदायुषम्
कृतकृत्यावयंजाताःश्रुत्वाकार्तिकजंफलम् ९०
अपरंनास्तिश्रोतव्यंप्राप्तंमेजन्मनःफलम्
माहात्म्यमेतदाकरार्यपूजयेद्यस्तुपाठकम् ९१
गोभूहिररायवस्त्रैश्चविष्णुतुल्योयतोहिसः
वाचकेपूजितेयस्माद्विष्णुर्भवतिपूजितः ९२
तथातंपूजयेन्नित्यंयदीच्छेत्सफलंशुभम्
धर्मशास्त्रंपुराणंचवेदविद्यादिकंचयत् ९३
पुस्तकंवाचकायैवदातव्यंधर्ममिच्छता
पुराणविद्यादातारोह्यनंतफलभोजिनः ९४
यःपठेतइदंभक्त्याश्रुत्वाचैवावधारयेत्
मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति ९५

धनंधान्यंयशःपुत्रानायुरारोग्यमेवच
माहात्म्यश्रवणादेवलभ्यतेचनसंशयः ९६
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्त्रसंहितायामुत्तरखंडेकार्तिकमाहात्म्ये
श्रीकृष्णसत्यभामासंवादेचतुर्विंशत्यधिकशततमोध्यायः १२४

पञ्चविंशत्यधिकशततमोऽध्यायः

ऋृषयऊचुः
सूतसूतमहाभागत्वयालोकहितैषिणा
कथितंकार्तिकाख्यानंभुक्तिमुक्तिप्रदायकम् १
अधुनामाघमाहात्म्यंवदनोलोमहर्षणे
श्रुतेनयेनलोकानांसंशयःक्षीयतेमहान् २
पुराकेनमहाभागलोकेऽस्मिन्संप्रकाशितम्
माघस्नानस्यमाहात्म्यंसेतिहासंतदादिश ३
सूतउवाच
साधुसाधुमुनिश्रेष्ठायूयंकृष्णपरायणः
यत्पृच्छथमुदायुक्ताभक्त्याकृष्णकथामुहुः ४
कथयिष्यामिमाघस्यमाहात्म्यंपुगयवर्धनम्
पापघ्नंशृगवतांपुंसांस्नातानांचारुणोदये ५
एकदापार्वतीविप्राःशंकरंलोकशंकरम्
पप्रच्छविनयोपेतास्पृष्ट्वातच्चरणांबुजम् ६
पार्वत्युवाच
देवदेवमहादेवभक्तानामभयप्रद
प्रसीदनाथविश्वेशयत्पृच्छेतद्वदाधुना ७
श्रुतानानाविधाधर्मास्त्वत्तःपूर्वंमयाविभो
अधुनाश्रोतुमिच्छामिमाहात्म्यंमाघजंवद ८
तत्तुकेनपुराचीर्णंकोविधिःकाचदेवता
तत्सर्वंविस्तराद्ब्रूहियतस्त्वंभक्तवत्सलः ९
महेशउवाच
अध्वराऽवभृथस्नातऋृषिभिःकृतमंगलः
पूजितोनागरैःसर्वैःस्वपुरान्निर्गतोबहिः १०

दिलीपोभूभृतांश्रेष्ठोमृगयारसिकोनृपः
कौतूहलसमाविष्टश्राखेटव्यूहसंवृतः ११
उपानद्गूढपादस्तुनीलोष्णीषउरच्छदी
बद्धगोधांगुलित्राणोधनुष्पाणिःसरीसृपः १२
बद्धन्नुद्रासिधानुष्कैस्तथाभूतैश्चपत्तिभिः
गांधारेषुसुरम्येषुवनेषुविपुलेषुच १३
उल्लंघितमहास्रोतायुवापंचास्यविक्रमः
मुदाक्रीडतितैःसार्द्धंकुंजेषुमृगयन्मृगान् १४
हन्यतांहन्यतामेषमृगोवैषपलायते
इतिजल्पन्स्वभृत्येषुस्वयमुत्पत्त्यहंतिच १५
इतस्ततःपुनर्यातिक्वचित्पश्यन्वनस्थलीम्
विटपोड्डीनसंत्रस्तलीनकेकिकुलाकुलाम् १६
हरिणीगणवित्रस्तांधावच्छावकदिङ्मुखाम्
क्वचित्फेरवफेत्कारताराराववविभीषणाम् १७
खड्गयूथैःक्वचिल्लन्मींदधानामिवदंतिनाम्
क्वचित्कोटरसंदष्टोलूकनादविनादिनीम् १८
मृगारिपदमुद्राभिर्मुद्रितांचक्वचित्क्वचित्
शार्दूलनखनिर्भिन्नरोहिद्रक्तारुणांक्वचित् १९
पीवरस्तनभारार्तसुस्निग्धमहिषीगणैः
श्रवरोधाजिरन्नोणींसूचयंतीमनःक्वचित् २०
क्वचिद्वृन्नघनच्छन्नांवन्यपुष्पसुगंधिनीम्
क्वचिल्लतागृहद्वारांभृंगशब्दसुशोभनाम् २१
श्रर्धनिःसृतनिर्मोकनागभीमबृहद्बिलाम्
बिलेषुलीनाजगरैर्भीमांनिर्मोकसर्पिणीम् २२
क्वचिद्दावानलज्वालांशिलाज्योतिःसुशोभनाम्
फूत्कारशब्दसंपूर्णांमृगव्याघ्रसमाकुलाम् २३
प्रविमुंचञ्छुनांयूथंशशकेषुक्वचित्क्वचित्
पल्वलेषुचविश्रम्यपुनर्यातिवनान्तरम् २४
एवंव्रजतिराजेन्द्रेव्याधवर्गेचवल्गति
कुर्वन्कोलाहलंतत्रसारंगोनिर्गतोवनात् २५

स्फालवेगक्रमाक्रांतदुर्गमार्गमहीतलः
कदाचिद्गगनारूढःकदाचिद्भूमिगोचरः २६
वक्रस्त्रोतोऽतिगंभीरंकराटकद्रुमसंकुलम्
प्रविष्टोविषमाररायंराजाऽसौतत्पदानुगः २७
दूराद्दूरतरंगत्वादेशाद्देशंचनिर्जनम्
मृगादर्शनसंरम्भसंशुष्कगलकन्धरः २८
ताम्रतालुमुखःस्विन्नःश्रांतपत्तिःस्खलद्ध्वनिः
अतीत्यदीर्घमार्गान्सतृषार्तोमध्यगेरवौ २९
ददर्शाग्रेतुकासारंस्पर्धयंतमपांपतिम्
घनपादपतीरस्थंसुतीर्थंविमलंशुभम् ३०
विशालंविकचांभोजंमधुमत्तमधुव्रतम्
पद्मिनीपत्रपालाशच्छन्नंमरकतैरिव ३१
स्वच्छंदमुच्छलन्मत्स्यंस्वच्छंसाधुमनोयथा
चलज्जलचरैर्मिश्रंवीचिराजिविराजितम् ३२
अंतर्ग्राहगणक्रूरंखलानामिवमानसम्
क्वचिच्छैवालदुर्गम्यंकृपणस्यैवमंदिरम्
नानाविहङ्गसर्वार्तिंशमयंतंदिवानिशम् ३३
दातारमिवसर्वस्वैरापन्नार्तिप्रणाशनम्
तर्पयंतंनिजांभोभिःश्वापदान्स्वपितॄनिव ३४
हरंतंसर्वसंतापंहिमांशुरिवचाह्निकम्
तंदृष्ट्वाभूद्गतग्लानिश्चातकोजलदंयथा ३५
तत्रपीतजलोराजाकृतमाध्याह्निकक्रियः
भुक्त्वाखेटकमांसानिसहायैःसहितोनृपः ३६
उवाससरसस्तीरेसुरम्यांकथयन्कथाम्
ततःशरासनेबाणंकृत्वारात्रौस्थितस्तरौ ३७
व्याधाःसंधानमास्थायरुरुधुःककुभांपथः
एवंस्थितेषुवीरेषुवनेविस्तार्यवागुराम् ३८
निशार्धेनिर्गतंयूथंसूकराणांतटेतटे
चरित्वासरसीकंदान्पपातव्याधसंकुले ३९
राज्ञाविद्धाश्चतेक्रोडाव्याधैश्चबहवोहताः

क्षणेनैववराहास्तेविद्धाःपेतुर्महीतले ४०
तान्दृष्ट्वातुमुलंनादंव्याधाश्चक्रुःसुदर्पिताः
धावंतःप्रमुदायुक्तामिलितायत्रभूपतिः ४१
तानादायभटैर्भूयोनिःसृतःसरसीतटात्
स्वपुरंगंतुकामोऽसौदृष्टवान्पथितापसम् ४२
ब्राह्मणंवृद्धहारीतंशंखचक्रसुशोभितम्
नियमैर्दुष्करैरुग्रैःपरिक्षीणकलेवरम् ४३
अस्थिशेषंमहद्दांतंविस्फुरत्कर्कशत्वचम्
दधानंहारिणंचर्मवसानंमृदुवल्कलम् ४४
कुर्वाणं नैगमंजाप्यंनखलोमजटाधरम्
तंवनाश्रमिणंदृष्ट्वामार्गंदत्त्वाससंभ्रमः ४५
प्रणम्यशिरसाराजाकृतपद्मांजलिस्थितः
अथचैनमलंकारैर्द्विजोनिश्चित्यभूमिपम् ४६
उवाचश्रेयसेहेतोःपरोपकृतिवांछया
किमर्थंगम्यतेराजन्कालेपुण्यतमेशुभे ४७
माघमासेविहायैवप्रातःस्नानंसरोवरे
प्रत्युवाचततोराजानाहंजानेद्विजोत्तम ४८
माघस्नानफलंकीदृक्तन्मेकथयविस्तरात्
इतिभूपवचःश्रुत्वाप्राहवैखानसोमुनिः ४९
भगवान्द्युमणिःशीघ्रमभ्युदेतितमोपहा
स्नानकालोऽयमस्माकंनकथाऽवसरोनृप ५०
स्नात्वागच्छवसिष्ठंतंपृच्छस्वस्वकुलप्रभुम्
इत्युक्त्वातापसोमौनीप्रातःस्नानायनिर्गतः ५१
प्रत्यावृत्यदिलीपोऽपितत्रस्नात्वायथाविधि
पुनःस्वनगरींवीरोगतोऽसौहर्षपूरितः ५२
अन्तःपुरेनिवेद्याथवानप्रस्थकथांपुनः
श्वेताश्वरथमारुह्यसुश्वेतच्छत्रचामरः ५३
सालंकारःसुवासाश्चसंवृत्तोमंत्रिभिःसह
जयशब्दान्पुनःशृण्वन्स्तुतोमागधबंदिभिः ५४
वसिष्ठस्याश्रमंयातऋषिवाक्यमनुस्मरन्

तत्रैवनत्वाब्रह्मर्षिंविनयाचारपूर्वकम् ५५
दत्तासनोगृहीतार्घ्यश्राशीर्भिःसमलंकृतः
सानंदंमुनिनापृष्टःकुशलंभूपतिर्यदा ५६
तदाब्रवीद्वचोराजाहर्षयन्मुनिमानसम्
सोऽपिवैखानसेनोक्तंपप्रच्छमधुराकृतिः ५७
दिलीपउवाच
भगवंस्त्वत्प्रसादेनश्रुताविस्तरतोमया
श्राचारोदंडनीतिश्चराजधर्माश्चयेपरे ५८
चतुर्णामपिवर्णानामाश्रमाणांचयाःक्रियाः
दानानितद्विधानानियज्ञाश्चविधयस्तथा ५९
व्रतानितत्प्रदिष्टानिविष्णोराराधनंतथा
श्रधुनाश्रोतुमिच्छामिमाघस्नानेचयत्फलम्
विधेयंयद्विधानेनतन्मेब्रह्मन्मुनेवद ६०
वसिष्ठउवाच
सम्यगुक्तंपरंश्रेयोलोकत्रयहितावहम्
निर्मलीकरणंतेनमुनिनावनवासिना ६१
कटाक्षैःकामिनीनांतेप्रत्यासन्नमखंडिताः
कामयंतेमृगार्केतेस्रोतसिस्नातुमेवच ६२
विनावह्निंविनायज्ञमिष्टापूर्तंविनाप्रिये
वांच्छंतिसद्गतिंस्नातुंप्रातर्माघेबहिर्जले ६३
गोभूहिरगयमाणिक्यस्वर्णधेन्वादिकानिये
श्रदत्त्वेच्छंतिचैकार्णेमाघंस्नातानराधिप ६४
त्रिःसप्ताहव्रतैःकृच्छ्रैःपराकैश्चनिजांतनुम्
श्रशोष्येच्छंतियेस्वर्गंतपसिस्नांतुतेसदा ६५
हरेःपूजाचवैशाखेतपःपूजाचकार्तिके
तपोहोमस्तथादानंत्रयंमाघेविशिष्यते ६६
सानुबंधोऽतिपर्यासोधराधीशोभवेद्ध्रुवम्
कैवल्योत्पादकाबुद्धिययावानभवेत्पुनः ६७
पदध्यावरिवस्यासाविहितादिव्यलोचनैः
तदनन्नंतपोदानंमाघेमासिनृपोत्तम ६८

सकामोवाप्रजायेवाहरयेतद्विनापिवा
कायशुद्धिव्रतीभूत्वाचतुर्द्धास्नानजंफलम् ६९
निरन्नाश्रदितिःसस्नौमाघेद्वादशवत्सरे
पुत्रांश्चद्वादशादित्यान्लभेत्रैलोक्यदीपकान् ७०
सुभगारोहिणीमाघादानशीलात्वरुंधती
शचीचरूपसंपन्नाप्रासादेसप्तभूमिके ७१
विमलीकृतशोभाढ्योनर्तकीललिताजिरे
द्वीपवर्णसमुच्छिन्नेरूपवत्स्त्रीजनाकुले ७२
गीतवादित्रनिर्घोषेमंगलाचारशोभिते
वेदध्वनिपवित्रेचविद्वद्विप्रैरलंकृते ७३
सुरार्चनरतेरम्येसदातिथिनिषेविते
मुदितांस्तेवसंतीहयैःस्नानंमकरेरवौ ७४
यैर्दत्तंबहुमाघेचमुरारिश्चार्चितःस्तुतः
इष्टवस्तुपरित्यागान्नियमस्यतुपालनात् ७५
धर्मसूतिःसदामाघःपापमूलंनिकृंतति
काममूलःफलद्वारानिष्कामोज्ञानदःसदा ७६
येलोकाज्ञानशीलानांयेलोकाविपिनौकसाम्
येलोकाविष्णुभक्तानांतेमाघस्नायिनांसदा ७७
देवलोकान्निवर्तंतेपुण्यैरन्यैःपरंतप
कदाचिन्ननिवर्तं तेमाघस्नानरतानराः ७८
माघेस्नात्वातुयोधेनुंदद्यान्मर्त्यःपयस्विनीम्
तस्यायावंतिरोमाणिसर्वांगेचनृपोत्तम ७९
तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते
माघस्नानंप्रकुर्वाणोयोदद्यात्सगुडांस्तिलान् ८०
पातकंतस्यप्रक्षाल्यनिर्मलोभातिवैनरः
सर्वेषांधान्यराशीनांतिलाःपापप्रणाशनाः ८१
तस्मान्माघेप्रयत्नेनतिलादेयानृपोत्तम
माघस्नानंप्रकुर्वाणोदद्याद्ब्राह्मणभोजनम् ८२
पितॄन्संतर्प्यशुद्धात्मायातिविष्णोःपरंपदम्
तस्मात्सर्वप्रयत्नेनमाघोदानेननीयते ८३

अदानंनक्षिपेन्माघंसर्वदानृपसत्तम
वित्तानुसारंज्ञात्वावैमाघेदानंसदाददेत् ८४
माघस्नानंतुयःकुर्यादुपानहकमंडलून्
ददातिब्राह्मणेभ्यश्चसस्वर्गेतिष्ठतिध्रुवम् ८५
माघस्नानमयंराजन्कुर्वाणस्तपउत्तमम्
दानंविनाक्षिपेन्नैवदानात्स्वर्गमवाप्यते ८६
दानेनप्राप्यतेस्वर्गोदानेनप्राप्यतेसुखम्
दानेनहीयतेपापंमहापातकजंनृप ८७
अदानंनतपोभातिह्यसूर्यंगगनंयथा
असंततिकुलंयद्वादाचारेणविनागृहम् ८८
नातःपरतरंकिंचित्पवित्रंपापनाशनम्
विद्याधरायसंगीतंभृगुणामणिपर्वते ८९
राजोवाच
ब्रह्मन्कदाभृगुर्विप्रोनिजगादमहीधरे
तस्मैधर्मोपदेशंचकथ्यतांमेकुतूहलात् ९०
वसिष्ठउवाच
द्वादशाब्दंपुराराजन्नववर्षबलाहकः
तेनोद्विग्नाःप्रजाःक्षीणागताःसर्वादिशोदश ९१
खिलीभूतेतदामध्येहिमवद्विंध्ययोर्नृप
स्वाहास्वधावषट्कारवेदाध्ययनवर्जिते ९२
सोपप्लवेतदालोकेलुप्तधर्मेचनिष्प्रभे
फलमूलान्नपानीयशून्येवैभूमिमंडले ९३
विंध्यपादतरुच्छन्नरम्यरेवातटाश्रमात्
सहशिष्यैश्चनिर्गम्यहिमाद्रिंसगतोभृगुः ९४
तत्रतिष्ठतिकैलासगिरेःपश्चिमतोगिरिः
मणिकूटइतिख्यातोहेमरत्नशिलोच्चयः ९५
अधोऽधस्फटिकश्वेतोमध्येनीलशिलोगिरिः
भूतिभिःसर्वतःशुक्लोनीलकंठइवाबभौ ९६
सर्वत्रासौनीलशिलोहेमरेखांतरांतरः
स्फुरद्विद्युल्लतःकृष्णोजीमूतइवराजते ९७

मूर्ध्निनीलशिलःशैलअधःकांचनमेखलः
नारायणइवाभातिपरिवीतइवांबरः ९८
अमेखलासुनीलाभोमध्येमध्येसितोपलः
सतारकमिवव्योमशुशुभेसमहीधरः ९९
लब्ध्वात्मनस्तनुंशुभ्रांदीप्तदिव्यौषधीधरः
बहुद्योतकरोभातिद्वितीयइवचंद्रमाः १००
अधित्यकासुसंगीतैःकिन्नरीणांसकीचकैः
रंभापत्रपताकाभिःशोभतेससदाऽचलः १०१
हरितोपलवैदूर्यपद्मरागशिताश्मनाम्
रुग्रश्मिमंडलैःसोऽगइंद्रचापैरिवावृतः १०२
सर्वधातुमयैर्हैमैर्नानारत्नैःप्रशोभितः
सोऽग्निज्वालैरिवात्युच्चैःशृगैःसर्वत्रवेष्टितः १०३
तस्यागत्यनितंबेषुसतृणासुशिलासुच
विद्याधर्यःप्रदेवंतेस्वपतीन्कामविक्लवाः १०४
निरुद्धांतर्मरुन्मार्गाजितक्लेशाविरागिणः
ध्यायंत्यहर्निशंब्रह्मरम्यसानुगुहासुच १०५
साक्षसूत्रकराःसिद्धाअर्धोन्मीलितलोचनाः
आराधयंतिभूतेशंसुंदरीषुदरीषुच १०६
मंदारकुसुमामोदसुरभीकृतदिङ्मुखः
एषनिर्झरिणीवारिझंकारमुखरःसदा १०७
उपत्यकासुखेलद्भिर्वनस्थैःकलभैर्गजैः
कस्तूरीमृगयूथैश्चचारुचित्रमृगैस्तथा १०८
विलसच्चामरीवृंदैर्विचित्रैःश्वापदैस्तथा
नदत्पारावतैश्चैवचकोरैश्चापिकोकिलैः १०९
राजहंसमयूरैश्चसदारम्यःसपर्वतः
सेव्यमानःसदादेवैर्गुह्यकैरप्सरोगणैः ११०
राजोवाच-
वह्वाश्चर्यमयःशैलःसर्वसिद्धिसमाश्रयः
भगवन्कियदुच्छ्रायःकियदायामविस्तरः १११
ऋषिरुवाच

षट्त्रिंशद्योजनोच्छ्रायोमस्तकेदशयोजनः
आयामविस्तराभ्यांसमूलेषोडशयोजनः ११२
हरिचंदनमंदारचूतराजिविराजितः
देवदारुद्रुमाकीर्णःसरलार्जुनशोभितः ११३
कालागरुलवंगैश्चनिकुंजैश्चलतागृहैः
विराजतेगिरिश्रेष्ठःसदापुष्पफलप्रदः ११४
तंदृष्ट्वापर्वतंरम्यंतदादुर्भिक्षपीडितः
भृगुश्चकारतत्रैववसतिंहृष्टमानसः ११५
तस्मिन्मनोहरेशैलेकंदरेषुवनेषुचा
चिरकालंतपस्तेपेतपःसुनिरतोभृगुः
एवंतिष्ठतिराजेंद्रद्विजेस्वाश्रमवासिनि ११६
अवतीर्यागतौशैलाद्द्वौविद्याधरदंपती
समागम्यमुनिंनत्वास्थितौतावतिदुःखितौ ११७
तथाविधौचतौदृष्ट्वामंजुवाक्यंद्विजोऽब्रवीत्
वदविद्याधरप्रीत्यायुवांकिमतिदुःखितौ ११८
श्रुत्वातस्यमुनेर्वाक्यंप्राहविद्याधरोद्विजम्
श्रूयतांतापसश्रेष्ठममदुःखस्यकारणम् ११९
सुकृतस्यफलंप्राप्यप्राप्तोऽस्मित्रिदशालयम्
लब्ध्वाऽपिदेवतादेहंमुखंव्याघ्रस्यमेऽभवत् १२०
नजानेकर्मणःकस्यविपाकोऽयमुपस्थितः
इतिसंस्मृत्यसंस्मृत्यनलेभेशर्ममेमनः १२१
अन्यच्चश्रूयतांविप्रयेनमेह्याकुलंमनः
जायेयंममकल्याणीमधुवाणीसुरूपिणी १२२
नृत्यगीतकलाभिज्ञासर्वसद्गुणशालिनी
यस्मिन्कालेकुमारीयंतदाचाऽमलयानया १२३
विपंचींपरिवादिन्यातंत्रीभिःसप्तभिर्भृशम्
वीणावादरसाभिज्ञस्तोषितनारदोमुनिः १२४
मुग्धभावेपिगायंत्यात्वनयारक्तकंठया
विचित्रस्वरनादज्ञोदेवराजोऽपितोषितः १२५
अस्याःकौतुकभिन्नांग्यावादयंत्याविपंचिकाम्

नानावक्रगतिस्निग्धंश्रुत्वातंपंचमध्वनिम् १२६
तुतोषोद्भिन्नरोमांचोधुन्वन्मौलिमहेश्वरः
शीलौदार्यगुणग्रामरूपयौवनसंपदा १२७
नानयासदृशीनाकेकाचिदस्तिनितंविनी
क्वेयंदेवमुखीरामाक्वाहंव्याघ्रमुखःपुमान् १२८
इतिब्रह्मन्सदाचिंत्यदह्यामिहृदिसर्वदा
इतिविद्याधरप्रोक्तंश्रुत्वाचेद्त्वाकुनंदनः १२९
त्रिकालज्ञोभृगुःप्राहप्रहसन्दिव्यलोचनः
शृणुविद्याधरश्रेष्ठविचित्रंकर्मणांफलम् १३०
प्राप्यप्राज्ञानमुह्यंतिमुह्यंत्यिज्ञानचेतसः
मक्षिकापदमात्रंतुयथाहिविषमंविषम् १३१
क्रियात्वविहिताल्पापिविपाकेदारुणातथा
उपोष्यैकादशींमाघेतैलाभ्यंगःकृतस्त्वया १३२
द्वादश्यांप्राग्भवेदेहेतेनव्याघ्रमुखोभवान्
उपोष्यैकादशींपुण्यांद्वादश्यां तैलसेवनात् १३३
कुरूपंप्राप्तवान्देहंपुराह्येवंपुरूरवाः
दृष्ट्वात्मनःकुकायंसतेनदुःखेनदुःखितः १३४
गिरिराजंसमागम्यदेवतासरसस्तटे
स्थित्वाचपरमप्रीत्याशुचिःस्नातःकुशासने १३५
नवनीलघनश्यामंनलिनायतलोचनम्
शंखचक्रगदापद्मधरंपीतांवरावृतम् १३६
कौस्तुभेनविराजंतंवनमालाधरंहरिम्
चिंतयन्हृदयेराजानिग्रहीताखिलेंद्रियः १३७
मासत्रयंनिराहारस्तपस्तेपेसुदारुणम्
अल्पेनतपसातुष्टःसप्तजन्मकृतार्चनः १३८
संस्मरंस्तस्यभूपस्यतदाप्रादुरभूत्स्वयम्
माघस्यशुक्लपक्षेतुद्वादश्यांमकरेरवौ १३९
शंखाद्भिरभिषिच्याशुमुदातंचक्रवर्तिनम्
वासुदेवोददौतस्मैस्मारयंस्तैलचेष्टितम् १४०
अतीवसुंदरंरूपंकमनीयंमनोहरम्

येनतंचकमेदेवीउर्वशीदेवनायिका १४१
इत्थंलब्धवरोराजाकृतकृत्यःपुरंगतः
इतिकर्मगतिंज्ञात्वाकिंविद्याधरखिद्यते १४२
भवान्परिजिहीर्षुश्चेद्दानवस्यविरूपताम्
शीघ्रंमद्वचनादेवप्राचीनाघविनाशनम् १४३
माघमासेकुरुस्नानंमणिकूटनदीजले
मुनिसिद्धसुरैर्जुष्टेकथयिष्यामितद्विधिम् १४४
तवभाग्यवशान्माघोनिकटःपंचमेऽहनि
पौषस्यैकादशींशुक्लामारभ्यस्थंडिलेशयः १४५
मासमेकंनिराहारस्त्रिकालंस्नानमाचर
त्रिकालमर्चयन्विष्णुंत्यक्तभोगोजितेंद्रियः १४६
माघस्यैकादशीशुक्लायावद्विद्याधरोत्तम
ततोनिर्दग्धपापंत्वांद्वादश्यांपुरायवासरे १४७
अभिषिच्यशिवैस्तोयैर्मंत्रपूतैरहंसुर
कामवक्त्रोपमंवक्त्रंकरिष्यामितवानघ १४८
देवतावदनोभूत्वात्वंविद्याधरसत्तम
अनयावरवर्णिन्यासार्द्धंक्रीडयथासुखम् १४९
ज्ञातमाघप्रभावस्त्वंमाघस्नानंसदाकुरु
यथामनोरथावाप्तिर्जायतेतवसर्वदा १५०
इत्युक्तंभृगुणातस्मैसर्वज्ञेनमहात्मना
विद्याधरायराजेंद्रपुनर्गाथाउदाहृता १५१
माघस्नानैर्विपन्नाशमाघस्नानैरघक्षयः
सर्वयज्ञाधिकोमाघःसर्वदानफलप्रदः १५२
माघोगर्जतियज्ञेभ्योमाघोयोगाच्चगर्जति
तीव्राच्चतपसोमाघोभोविद्याधरगर्जति १५३
पुष्करेचकुरुक्षेत्रेब्रह्मावर्तेपृथूदके
अविमुक्तेप्रयागेचगंगासागरसंगमे १५४
यत्फलंदशभिर्वर्षैःप्राप्यतेनियमैर्नरैः
तत्फलंप्राप्यतेमाघेत्र्यहस्नानान्नसंशयः १५५
स्वर्गलोकेचिरंरागोयेषांमनसिवर्तते

यत्रक्वापिजलेतैस्तुस्नातव्यंमकरेरवौ १५६
आयुरारोग्यसंपत्तिरूपसौभाग्यतागुणाः
येषांमनोरथस्तैस्तुनत्याज्यंमाघमज्जनम् १५७
येचबिभ्यंतिनरकाद्येदरिद्राच्चसंचितात्
सर्वथातैःप्रयत्नेनमाघेकार्यंनिमज्जनम् १५८
दारिद्र्यपापदौर्भाग्यपंकप्रक्षालनायच
माघस्नानान्नचान्योऽस्तिउपायोराजसत्तम १५९
श्रद्धाहीनानिकर्माणितथात्यल्पफलानिवै
फलंददातिसंपूर्णंमाघस्नानंयथातथा १६०
अकामोवासकामोवायत्रक्वापिबहिर्जले
इहामुत्रचदुःखानिमाघस्नायीनविंदति १६१
पक्षद्वयेयथाचंद्रोवर्द्धतेक्षीयतेतथा
पातकंक्षीयतेमाघेपुण्यराशिश्चवर्धते १६२
यथाचखन्याजायंतेरत्नानिविविधानिच
स्नानात्पुण्यानिजायंतेनराणांमाघतस्तथा १६३
कामधेनुर्यथाकामंचिंतामणिस्तुचिंतितम्
माघस्नानंददातीहतद्वत्सर्वान्मनोरथान् १६४
कृतेतपःपरंज्ञानंत्रेतायांयजनंतथा
द्वापरेतुकलौज्ञानंमाघःसर्वयुगेषुच १६५
सर्वेषामेववर्णानामाश्रमाणांचभूपते
माघस्नानंतुधर्मस्यधाराभिरभिवर्षति १६६
वसिष्ठउवाच
इतिवाक्यंभृगोःश्रुत्वातस्मिन्नेवाश्रमेसुरः
सहैवभृगुणामाघेगिरौनिर्झरिणीतटे १६७
यथोक्तविधिनास्नानमकरोद्भार्ययासह
भृगोरनुग्रहात्सोऽथसंप्राप्यमनसेप्सितम् १६८
देवतावदनोभूत्वामुमुदेमणिपर्वते
आजगामभृगुर्विंध्यंतमनुग्राह्यहर्षितः १६९
मणिमयगिरिराजेस्नानमात्रेणमाघेमदनवदनरूपस्तत्रविद्याधरोऽभूत्
क्षपितनियमदेहोविंध्यपादावतीर्णोभृगुरपिसहशिष्यैराजगामाथरेवाम् १७०

अखिलभुवनसारंमाघमाहात्म्यमेतद्द्विजवरभृगुणोक्तंभूपविद्याधराय
विविधफलविचित्रंयःशृणोतीहनित्यंरुचिरसकलकामान्देववत्प्राप्नुयात्सः
१७१

इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेमाघमाहात्म्ये
वसिष्ठदिलीपसंवादेपंचविंशत्यधिकशततमोऽध्यायः १२५

षड्विंशत्यधिकशततमोऽध्यायः

वसिष्ठउवाच
अधुनामाघमाहात्म्यंप्रवक्ष्यामिनृपोत्तम
पृच्छतेकार्तवीर्यायदत्तात्रेयेणभाषितम् १
दत्तात्रेयंहरिंसाक्षाद्वसंतंसह्यपर्वते
पप्रच्छतंद्विजंगत्वाराजामाहिष्मतीपतिः २
सहस्रार्जुनउवाच
भगवन्योगिनांश्रेष्ठसर्वेधर्माःश्रुतामया
माघस्नानफलंब्रूहिकृपयाममसुव्रत ३
दत्तात्रेयउवाच
श्रूयतांनृपशार्दूलएतत्प्रश्नोत्तरंशुभम्
ब्रह्मणोक्तंपुराह्येतन्नारदायमहात्मने ४
तत्सर्वंकथयिष्यामिमाघस्नानफलंमहत्
यथादेशंयथातीर्थंयथाविधियथाक्रियम् ५
अस्मिन्वैभारतेवर्षेकर्मभूमौविशेषतः
अमाघस्नायिनांनृणांनिष्फलंजन्मकीर्तितम् ६
असूर्यंगगनंयद्वदचन्द्रमुडुमंडलम्
तद्वन्नाभातिसत्कर्ममाघस्नानंविनानृप ७
व्रतैर्दानैस्तपोभिश्चनतथाप्रीयतेहरिः
माघमज्जनमात्रेणयथाप्रीणातिकेशवः ८
नसमंविद्यतेकिंचित्तेजःसौरेणतेजसा
तद्वत्स्नानेनमाघस्यनसमाःक्रतुजाःक्रियाः ९
प्रीतयेवासुदेवस्यसर्वपापापनुत्तये
माघस्नानंप्रकुर्वीतस्वर्गलाभायमानवः १०

किंरक्षितेनदेहेनसुपुष्टेनबलीयसा
अध्रुवेणाप्यशुचिनामाघस्नानंविनाभवेत् ११
अस्थिस्तंभंस्नायुबद्धंमांसक्षतजलेपनम्
चर्मावनद्धंदुर्गंधंपात्रंमूत्रपुरीषयोः १२
जराशोकविपद्व्याप्तंरोगमंदिरमातुरम्
रजस्वलमनित्यंचसर्वदोषसमाश्रयम् १३
परोपतापितापार्तंपरद्रोहिपरंविषम्
लोलुपंपिशुनंक्रूरंकृतघ्नंक्षणिकंतथा १४
दुष्पूरंदुर्धरंदुष्टंदोषत्रयसमन्वितम्
अशुचिस्राविसच्छिद्रंतापत्रयविमोहितम् १५
निसर्गतोऽधर्मरतंतृष्णाशतसमाकुलम्
कामक्रोधमहालोभनरकद्वारसंस्थितम् १६
क्रिमिविड्भस्मभवतिपरिणामेशुनांहविः
ईदृक्शरीरंव्यर्थंहिमाघस्नानविवर्जितम् १७
बुद्बुदाइवतोयेषुपूतिकाइवजंतुषु
जायंतेमरणायैवमाघस्नानविवर्जिताः १८
अवैष्णवोहतोविप्रोहतंश्राद्धमयोगिच
अब्रह्मण्यंहतंक्षेत्रमनाचारंहतंकुलम् १९
सदंभश्चहतोधर्मःक्रोधेनैवहतंतपः
अदृढंचहतंज्ञानंप्रमादेनहतंश्रुतम् २०
गुर्वभक्ताहतानारीब्रह्मचारीतयाहतः
अदीप्तेऽग्नौहतोहोमोहताभुंक्तिरसाक्षिका २१
उपजीव्याहताकन्यास्वार्थेपाकक्रियाहता
शूद्रभिक्षोहतोयागःकृपणस्यहतंधनम् २२
अनभ्यासाहताविद्याहतोराजाविरोधकृत्
जीवनार्थंहतंतीर्थंजीवनार्थंहतंव्रतम् २३
असत्याचहतावाणीतथापैशुन्यवादिनी
संदिग्धश्चहतोमंत्रोव्यग्रचित्तोहतोजपः २४
हतमश्रोत्रियेदानंहतोलोकश्चनास्तिकः
अश्रद्धयाहतंसर्वंकृतंयत्पारलौकिकम् २५

इहलोकोहतोनृणांदरिद्राणांयथानृप
मनुष्याणांतथाजन्ममाघस्नानंविनाहतम् २६
मकरस्थेरवौयोहिनस्नात्यनुदितेरवौ
कथंपापैःप्रमुच्येतकथंसत्रिदिवंव्रजेत् २७
ब्रह्महाहेमहारीचसुरापोगुरुतल्पगः
माघस्नायीविपापःस्यात्तत्संसर्गीचपंचमः २८
माघमासेरटंत्यापःकिंचिदभ्युदितेरवौ
ब्रह्मघ्नंवासुरापंवाकंपतंतंपुनीमहे २९
उपपापानिसर्वाणिपातकानिमहांत्यपि
भस्मीभवंतिसर्वाणिमाघस्नानोद्यतंनरम् ३०
कंपंतिसर्वपापानिमाघस्नानसमागमे
नाशकालोऽयमस्माकंयदिस्नास्यतिवारिणि ३१
एवंक्रोशंतिपापानिदृष्ट्वास्नानोद्यतंनरम्
पावकाइवदीप्यंतेमाघस्नानैर्नरोत्तमाः ३२
विमुक्ताःसर्वपापेभ्योमेघेभ्यइवचंद्रमाः
आर्द्रंशुष्कंलघुस्थूलंवाङ्मनःकर्मभिःकृतम् ३३
माघस्नानंदहेत्पापंपावकःसमिधोयथा
प्रामादिकंचयत्पापंज्ञानाज्ञानकृतंचयत् ३४
स्नानमात्रेणतन्नश्येन्मकरस्थेदिवाकरे
निष्पापास्त्रिदिवंयांतिपापिष्ठायांतिशुद्धताम् ३५
संदेहोनात्रकर्तव्योमाघस्नानेननराधिप
सर्वेऽधिकारिणोमाघेविष्णुभक्तौयथानृप ३६
सर्वेषांस्वर्गदोमाघःसर्वेषांपापनाशनः
एषएवपरोमंत्रोह्येतदेवपरंतपः ३७
प्रायश्चित्तंपरंचैतन्माघस्नानमनुत्तमम्
नृणांजन्मांतराभ्यासान्माघस्नानेमतिर्भवेत् ३८
अध्यात्मज्ञानकौशल्यंजन्माभ्यासाद्यथानृप
संसारकर्दमालेपप्रक्षालनविशारदम् ३९
पावनंपावनानांचमाघस्नानपरंनृप
स्नांतिमाघेनयेराजन्सर्वकामफलप्रदे ४०

कथंतेभुंजतेभोगांश्चंद्रसूर्यग्रहोपमान्
शृणुराजन्महाश्चर्यंमाघस्नानप्रभावजम् ४१
कुब्जिकानामकल्याणीब्राह्मणीभृगुवंशजा
बालवैधव्यदुःखार्तातपस्तेपेसुदुस्तरम् ४२
विंध्यपादेमहाक्षेत्रेरेवाकपिलसंगमे
तत्रसाव्रतिनीभूत्वानारायणपरायणा ४३
सदाचारवतीनित्यंनित्यंसंगविवर्जिता
जितेंद्रियाजितक्रोधासत्यवागल्पभाषिणी ४४
सुशीलादानशीलाचदेहशोषणशालिनी
पितृदेवद्विजेभ्यश्चदत्वाहुत्त्वातथानले ४५
षष्ठेकालेचसाभुङ्क्तेह्युंच्छवृत्तिःसदानृप
कृच्छ्रातिकृच्छ्रपाराकतप्तकृच्छ्रादिभिर्व्रतैः ४६
पुण्यान्नयतिसामासान्नर्मदायाश्चरोधसि
एवंतयातपस्विन्यावल्कलिन्यासुशीलया ४७
सुमहासत्त्वशालिन्याधृतिसंतोषयुक्तया
षष्टिर्माघास्तयास्नातारेवाकपिलसंगमे ४८
ततःसातपसाक्षीणातस्मिंस्तीर्थेमृतानृप
माघस्नानजपुण्येनतेनसावैष्णवेपुरे ४९
उवासप्रमुदायुक्ताचतुर्युगसहस्रकम्
सुंदोपसुंदनाशायपश्चात्पद्मभवात्पुनः ५०
तिलोत्तमेतिनाम्नासाब्रह्मलोकेऽवतारिता
तेनपुण्यस्यशेषेणरूपस्यैकायनंययौ ५१
अयोनिजाबलारत्नंदेवानामपिमोहिनी
लावण्यह्रदनीतन्वीसाभूदप्सरसांवरा ५२
निपुणस्यविधेःस्रष्टुर्नूनमाश्चर्यकारिणी
तामुत्पाद्यविधातावैतुष्टोऽनुज्ञांतदाददौ ५३
एणशावाक्षिगच्छत्वंदैत्यनाशायसत्वरम्
ततःसाब्रह्मणोलोकाद्वीणामादायभामिनी ५४
गतापुष्करमार्गेणयत्रतौदेववैरिणौ
तत्रस्नात्वातुरेवायाःपवित्रेनिर्मलेजले ५५

परिधायांबरंरक्तंबंधूककुसुमप्रभम्
रणद्वलयिनीचारुसिंजन्मेखलनूपुरा ५६
लोलमुक्तावलीकंठीचलत्कुंडलशोभना
माधवीकुसुमापीडाकंकेलीविटपेस्थिता ५७
गायंतीसुस्वरंसापिपीडयंतीतुवल्लकीम्
मूर्च्छयंतीस्वरषट्कंसुस्निग्धंकोमलंकलम् ५८
ऋृइत्थंतिलोत्तमाबालातिष्ठंत्यशोककानने
दृष्ट्वादैत्यभटैरिंदोःकलेवसुखदाहृदि ५९
तांदृष्ट्वाविस्मितैराजन्सानंदैःसैनिकैर्भृशम्
त्वरमाणैरदृष्टैवगत्वासुंदोपसुंदयोः ६०
कथितासंभ्रमेणैव वर्णयित्वापुनःपुनः
हेदैत्यौनविजानीमोदेवीवादानवीनुकिम् ६१
नागांगनाथवायक्षीस्त्रीरत्नंसर्वथातुसा
युवांरत्नभुजौलोकेरत्नभूताहिसाबला ६२
वर्ततेनातिदूरेडग्रेऋशोकेशोकहारिणी
गत्वातांपश्यतंशीघ्रमन्मथस्यापिमोहिनीम् ६३
इतिसेनापतीनांतौश्रुत्वावाचंमनोहराम्
चषकंसीधुनस्त्यक्त्वाविहायजलसेचनम् ६४
उत्तमस्त्रीसहस्राणित्यक्त्वातस्माज्ञलाशयात्
शतभारायसींक्रूरांकालदंडोपमांगदाम् ६५
भिन्नाभिन्नांगृहीत्वातुजवेनाभिप्लुतंगतौ
यत्रशृंगारसज्ञासाहंतुंचंडीवसंस्थिता ६६
राजन्संधुक्षयंतीवदैत्ययोर्मन्मथानलम्
स्थित्वातस्याःपुरोजाल्मौतद्रूपेणविमोहितौ ६७
विशेषान्मधुनामत्तावूचतुस्तौपरस्परम्
भ्रातर्विरमभार्येयंममास्तुवरवर्णिनी ६८
त्वमेवार्यत्यजैतांमेभार्यांतुमदिरेक्षणाम्
इत्याग्रहेणसंरब्धौमातंगाविवसोन्मदौ ६९
ऋन्योन्यंकालनिर्दिष्टौगदयाजघ्नतुस्तदा
परस्परप्रहारेणगतासूपतितौभुवि ७०

तौमृतौसैनिकैर्दृष्ट्वाकृतःकोलाहलोमहान्
कालरात्रिसमाकेयंहाकिमेतदुपस्थितम् ७१
एवंवदत्सुसैन्येषुदैत्यौसुंदोपसुंदकौ
पातयित्वागिरेःशृंगेह्लादिनीवत्तिलोत्तमा ७२
प्रस्थितागगनंशीघ्रंद्योतयंतीदिशोदश
देवकार्यंततःकृत्वाग्रागताब्रह्मणःपुरः ७३
ततस्तुष्टेनदेवेनविधिनासानुमोदिता
स्थानंसूर्यरथेदत्तंतवचंद्राननेमया ७४
भुंद्वभोगाननेकांस्त्वंयावत्सूर्योंबरेस्थितः
इत्थंसाब्राह्मणीराजन्भूत्वाचाप्सरसांवरा ७५
भुंक्तेद्यापिरवेर्लोकेमाघस्नानफलंमहत्
तस्मात्प्रयत्नतोराजन्श्रद्दधानैःसदानरैः ७६
स्नातव्यंमकरादित्येवांच्छद्भिःपरमांगतिम्
नानवाप्तोऽत्रतस्यास्तिपुरुषार्थोहिकश्चन ७७
नाक्षीणंपातकंकंचिन्माघेमज्ञतियोनरः
तुलयंतिनतेनात्रयज्ञाःसर्वेसदक्षिणाः ७८
माघस्नानेनराजेंद्रतीर्थेचैवविशेषतः
नचान्यत्स्वर्गदंकर्मनचान्यत्पापनाशनम् ७९
नचान्यन्मोक्षदंयस्मान्माघस्नानसमंभुवि ८०

इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडे माघमाहात्म्येवसिष्ठदिलीपसंवादेमाघस्नानप्रशंसायांसुंदोपसुंददैत्यवधोनाम षड्विंशत्यधिकशततमोध्यायः १२६

सप्तविंशत्यधिक शततमोऽध्यायः

कार्तवीर्यउवाच
हेतुनाकेनविप्रर्षेमाघस्नानेमहाद्भुतः
प्रभावोवर्ण्यतेनूनंतन्मेकथयसुव्रत १
गतपापोयदेकेनद्वितीयेनदिवंगतः
वैश्योऽसौमाघपुण्येनब्रूहिमेतत्कुतूहलम् २
दत्तात्रेयउवाच

निसर्गात्सलिलंमेध्यंनिर्मलंशुचिपांडुरम्
मलहंपुरुषव्याघ्रद्रावकंदाहनाशनम्
तारकंसर्वभूतानांपोषणंजीवनंचयत् ३
आपोनारायणोदेवःसर्ववेदेषुपठ्यते
ग्रहाणांचयथासूर्योनक्षत्राणांयथाशशी
मासानांचतथामाघःश्रेष्ठःसर्वेषुकर्मसु ४
मकरस्थेरवौमाघेप्रातःकालेतथाऽमले
गोष्पदेऽपिजलेस्नानंस्वर्गदंपापिनामपि ५
योगोऽयदुर्लभोराजंस्त्रैलोक्येसचराचरे
अस्मिन्योगेत्वशक्तोऽपिस्नायाद्यदिदिनत्रयम् ६
दद्यात्किंचिदशक्तोऽपिदरिद्राभाववांच्छया
त्रिस्नानेनापिमाघस्यधनिनोदीर्घजीविनः ७
पंचवासप्तवाहानिचंद्रवद्वर्धतेफलम्
संप्राप्तेमकरादित्येपुण्येपुण्यप्रदेनृणाम् ८
सत्कार्यास्तिथयःसर्वास्नानदानादिकर्मसु
कर्तारंदापयंतीहह्यक्षयंशाश्वतंपदम् ९
तस्मान्माघेबहिःस्नायादात्मनोहितकाम्यया
अथातःसंप्रवक्ष्यामिमाघस्नानविधिंपरम् १०
कर्तव्योनियमःकश्चिद्व्रतरूपीनरोत्तमैः
फलातिशयहेतोर्वैकिंचिद्भोज्यंत्यजेद्बुधः ११
भूमौशयीतहोतव्यमाज्यंतिलविमिश्रितम्
त्रिकालंचार्चयेद्विष्णुंवासुदेवंसनातनम् १२
दातव्योदीपकोऽखडोदेवमुद्दिश्यमाधवम्
इंधनंकंबलंवस्त्रमुपानत्कुंकुमंघृतम् १३
तैलंकार्पासकोष्ठंचतूलद्यंतूलवटींपटीम्
अन्नंचैवयथाशक्तिदेयंमाघेनराधिप १४
सुवर्णंरत्तिकामात्रंदद्याद्वेदविदेतथा
तद्दानमक्षयंराजन्समुद्रइवसर्वदा १५
परस्याग्निंनसेवेतत्यजेच्चैवप्रतिग्रहम्
माघांतेभोजयेद्विप्रान्यथाशक्तिनराधिप १६

देयाचदक्षिणातेभ्यश्चात्मनःश्रेयइच्छता
एकादशीविधानेनमाघस्योद्यापनंतथा १७
कर्तव्यंश्रद्दधानेनह्यक्षय्यस्वर्गवांछया
अनंतपुण्यावाप्त्यर्थंविष्णुसंप्रीतिहेतवे १८
मकरस्थेरवौमाघेगोविंदाच्युतमाधव
स्नानेनानेनभोदेवयथोक्तफलदोभव १९
इतिमंत्रंसमुच्चार्यस्नायान्मौनीसमाहितः
वासुदेवंहरिंकृष्णंमाधवंचस्मरेत्पुनः २०
गृहेऽपिसजलंकुंभंवायुनानिशिपीडितम्
तत्स्नानंतीर्थसदृशंसर्वकामफलप्रदम् २१
तत्रव्रतेनदातव्यंसान्नंचोपस्करान्वितम्
तत्स्नानस्यप्रभावेणनरोननिरयंव्रजेत् २२
तप्तेनवारिणास्नानंयद्गृहेक्रियतेनरैः
षडब्दफलदंतद्धिमकरस्थेदिवाकरे २३
बहिःस्नानंतुवाप्यादौद्वादशाब्दफलंस्मृतम्
तडागेद्विगुणंराजन्नद्यांचैवचतुर्गुणम् २४
शतधादेवखातेषुशतधातुमहानदे
शतंचतुर्गुणंराजन्महानद्याश्चसंगमे २५
सहस्रगुणितंसर्वंतत्फलंमकरेरवौ
गंगायांस्नानमात्रेणलभतेमानवोनृप २६
गंगायांयेऽवगाहंतिमाघमासेनृपोत्तम
चतुर्युगसहस्रंतुनपतंतिसुरालयात् २७
दिनेदिनेसहस्रंतुसुवर्णानांविशांपते
तेनदत्तंतुगंगायांयोमाघेस्नातिमानवः२८
शतेनगुणितंमाघेसहस्रंराजसत्तम
निर्दिष्टमृषिभिःस्नानंगंगायामुनसंगमे २९
पापौघभूरिभारस्यदाहार्थेचप्रजापतिः
प्रयागंविदधेभूपप्रजानांचहितेस्थितः ३०
शृणुस्थानमिदंसम्यक्सितासितजलंकिल
पापरूपपशूनांचब्रह्मणाविहितंपुरा ३१

सितासितजलेमज्जेदपिपापशतान्वितः
मकरस्थेरवौमाघेनैवगर्भेषुमज्जति ३२
सूनारतोऽपियोमर्त्यःप्रयागेस्नानमाचरेत्
माघेमासिनरव्याघ्रसयातिपरमंपदम् ३३
सितासितातुयाधारासरस्वत्याविगर्भिता
तन्मार्गंविष्णुलोकस्यसृष्टिकर्तासससर्जवै ३४
दुस्तरावैष्णवीमायादेवैरपिसुदुर्जया
प्रयागेदह्यतेसातुमाघेमासिनराधिप ३५
तेजोमयेषुलोकेषुभुक्त्वाभोगाननेकशः
पश्चाच्चक्रिणिलीयंतेप्रयागेमाघमज्जनात् ३६
उपस्पृशतियोमाघेमकरार्केसितासिते
नतत्पुरयंचसंख्यातुंचित्रगुप्तोऽपिवेत्यलम् ३७
सन्निमज्जतियोमाघेमकरस्थसितासिते
तस्यपुरयस्यमाहात्म्यंवक्तुंब्रह्मापिनक्षमः ३८
संवत्सरशतंसाग्रंनिराहारस्ययत्फलम्
प्रयागेमाघमासेतुत्र्यहस्नानस्यतत्फलम् ३९
स्वर्णभारसहस्रेणकुरुक्षेत्ररविग्रहे
यत्फलंलभतेमाघेवेरयाःस्नानाद्दिनेदिने ४०
राजसूयसहस्रस्यराजन्नविकलंफलम्
सितासितेतुमाघेचस्नानानांभवतिध्रुवम् ४१
पृथिव्यांयानितीर्थानिपुर्यःसप्तचयाःपुनः
वेरयांस्नातुंसमायांतिमाघेमासिनृपोत्तम ४२
सर्वतीर्थानिकृष्णानिपापिनांसंगदोषतः
भवंतिशुक्लवर्णानिप्रयागेमाघमज्जनात् ४३
आकल्पसंचितंपापंजन्मभिर्यन्नरैर्नृप
तद्भवेद्भस्मसान्माघेस्नातानांचसितासिते ४४
वाङ्मनःकायजंपापंनरस्यविलयंव्रजेत्
प्रयागेमाघमासेतुत्र्यहस्नातस्यनिश्चितम् ४५
प्रयागेमाघमासेयस्त्र्यहंस्नातिचमानवः
पापंत्यक्त्वादिवंयातिजीर्णांत्वचमिवोरगः ४६

कुरुक्षेत्रसमागंगायत्रकुत्रावगाहिता
तस्माद्दशगुणापुण्यायत्रविंध्येनसंगता ४७
तस्माच्छतगुणागंगाकाश्यामुत्तरवाहिनी
काश्याःशतगुणाःप्रोक्तागंगायामुनसंगमे ४८
सासहस्रगुणातासांभवेत्पश्चिमवाहिनी
याराजन्दर्शनादेवब्रह्महत्यापहारिणी ४९
यापश्चाद्वाहिनीगंगाकालिंद्यासहसंगता
हंतिकोटिकृतंपापंसामाघेनृपदुर्लभा ५०
यत्कथ्यतेऽमृतंराजन्सावेणीभुविकीर्तिता
तस्यांमाघेमुहूर्तंतुदेवानामपिदुर्लभम् ५१
ब्रह्माविष्णुर्महादेवोरुद्रादित्यमरुद्गणाः
गंधर्वालोकपालाश्चयक्षकिन्नरपन्नगाः ५२
अणिमादिगुणैःसिद्धायेचान्येतत्त्ववादिनः
ब्रह्माणीपार्वतीलक्ष्मीःशचीमेनादितिर्दितिः ५३
सर्वास्तादेवपत्न्यश्चतथानागांगनानृप
घृताचीमेनकारंभाउर्वशीचतिलोत्तमा ५४
गणाह्यप्सरसांसर्वेपितॄणांचगणास्तथा
स्नातुमायांतितेसर्वेमाघेवेण्यांनराधिप ५५
कृतेयुगेस्वरूपेणकलौप्रच्छन्नरूपिणः
प्रयागेमाघमासेतुत्र्यहस्नानस्ययत्फलम् ५६
नाश्वमेधसहस्रेणतत्फलंलभतेभुवि
त्र्यहस्नानफलंमाघेपुराकांचनमालिनी ५७
राक्षसायददौभूपतेनमुक्तःसपापकृत्
कार्तवीर्यउवाच
भगवन्राक्षसःकोऽसौसाकाकांचनमालिनी ५८
कथंदत्तवतीधर्मंकथंवातस्यसद्गतिः
एतत्कथययोगींद्रअत्रिसंतानभास्कर
यदित्वंमन्यसेश्राव्यंपरंकौतूहलंहिमे ५९
दत्तात्रेयउवाच
शृणुराजन्विचित्रंत्वमितिहासंपुरातनम्

यस्यस्मरणमात्रेणवाजपेयफलंलभेत् ६०
अप्सरारूपसंपन्नानाम्नाकांचनमालिनी
प्रयागेमाघमासेसास्नात्वायातिहरालयम् ६१
निकुंजेगिरिराजस्यतिष्ठतागिरिरूपिणा
दृष्टागगनमारूढातेनवृद्धेनरक्षसा ६२
तेजस्विनीसुहेमाभासुश्रोणीदीर्घलोचना
चंद्राननासुकेशीचपीनोन्नतपयोधरा ६३
तांदृष्ट्वारूपसंपन्नामुवाचराक्षसस्तदा
कात्वंकमलपत्राक्षिकुतआगम्यतेत्वया ६४
आर्द्रंचवसनंकस्मात्सार्द्रातिकबरीकुतः
कुत्रआगम्यतेभीरुकुतस्तेखेचरीगतिः ६५
केनपुण्येनवाभद्रेतवतेजोमयंवपुः
अतीवरूपसंपन्नंसंभूतंचमनोहरम् ६६
त्वद्वस्त्रबिंदुपातेनममपूर्ध्निसुलोचने
क्षणेनह्यगमच्छांतिंक्रूरंमेमानसंसदा ६७
नीरस्यमहिमाकोऽयमेतद्व्याख्यातुमर्हसि
त्वंमेशीलवतीभासिनाकृतिर्निर्गुणाभवेत् ६८
अप्सरा उवाच
श्रूयतामप्सराश्चाहंभोरक्षःकामरूपिणी
प्रयागतश्चागताऽहनाम्नाकांचनमालिनी ६९
आर्द्रःपरिकरोमेऽतसुस्नाताऽहसितासिते
गंतव्यंतुमयारक्षःकैलासेतुनगोत्तमे ७०
तत्रास्तेपार्वतीनाथःसुरासुरसुपूजितः
वेणीवारिप्रभावेणरक्षस्तेक्रूरतागता ७१
जाताहंयेनपुण्येनगंधर्वस्यसुमेधसः
कन्यकादिव्यरूपातुतत्सर्वंकथयामिते ७२
कलिगाधिपतेराज्ञस्त्वहमासीच्चवेश्यका
रूपलावण्यसंपन्नासौभाग्यमदगर्विता ७३
अन्यासांयुवतीनांचतत्पुरेऽहशिरोमणिः
तज्जन्मनिमयारक्षोभुक्त्वाभोगान्यथेच्छया ७४

मोहितंतत्पूरंसर्वंमयायौवनसंपदा
रत्नानिचविचित्राणिभूषणानिधनानिच ७५
वासांसिचित्ररूपाणिकर्पूरागुरुचंदनम्
एतच्चोपार्जितंसर्वंमयामोहनरूपया ७६
नाहंजानामिहेम्नोंतंस्वनिवासेनिशाचर
संसेवंतेयुवानोमेचरणौकामपीडिताः ७७
मयातेवंचिताःसर्वेसर्वस्वेनतुमायया
अन्योन्यस्पर्धाभावेनमृताःकेचित्तुकामिनः ७८
इत्थंतन्नगरेरम्येसकलेमेगतिस्तदा
प्राप्तेतुवार्द्धकेकालेशुशोचहृदयंमम
नदत्तंनहुतंजप्तंनव्रतंचरितंमया ७९
नाराधितोमयादेवश्चतुर्वर्गफलप्रदः
नमयापूजितादेवीदुर्गादुर्गतिनाशिनी
सर्वपापहरोविष्णुर्नस्मृतोभोगलुब्धया ८०
नचसंतर्पिताविप्रानकृतंप्राणिनांहितम्
अणुमात्रमिदंपुण्यंनकृतंचप्रमादतः ८१
पातकंतुकृतंभद्रतेनमेदह्यतेमनः
बहुधैवंविलप्याहंब्राह्मणंशरणंगता ८२
ब्रह्मण्यंवेदविद्वांसंतस्यराज्ञःपुरोहितम्
सहिपृष्टोमयारक्षःकथंमेनिष्कृतिर्भवेत् ८३
पापस्यास्यद्विजश्रेष्ठकथंयास्यामिसद्गतिम्
स्वेनैवकर्मणातप्तांवराकींदीनमानसाम् ८४
पापपंकनिमग्नांत्वंमामुद्धरकचग्रहैः
मयिकारुण्यंजंवारिवर्षहर्षदृशाद्विज ८५
सज्जनेसाधवःसर्वेसाधुःसाधुरसज्जने
इत्यसौमद्वचःश्रुत्वाचकारानुग्रहंमयि ८६
द्विजउवाच
निषिद्धाचरणंजानेसर्वं तेऽहवरानने
कुरुमेसत्वरंवाक्यंयाहिक्षेत्रंप्रजापते ८७
तत्रगत्वाकुरुस्नानंतेनपापक्षयस्तव

सर्वंमनोगतंभद्रेत्वदीयंशोचितंमया ८८
नाहमन्यत्प्रपश्यामियत्तेपापप्रणाशनम्
प्रायश्चित्तंपरंतीर्थेस्नानंचऋषिभिःस्मृतम् ८९
किंतुतीर्थेत्यजेद्भीरुमनसाप्यशुभंकृतम्
प्रयागस्नानशुद्धात्वंस्वर्गंयास्यसिनिश्चितम् ९०
प्रयागस्नानमात्रेणनृणांस्वर्गोनसंशयः
अन्यदेशकृतंपापंतत्क्षणादेवभामिनि ९१
प्रयागेविलयंयातिपापंतीर्थकृतंविना
शृणुभीरुपुराशक्रोगौतमस्यमुनेर्वधूम् ९२
दृष्ट्वाकामवशंप्राप्तस्तांगतोगुप्तकामुकः
उग्रेणतेनपापेनतदैवजनितंफलम् ९३
ऋषिस्त्रीगंतुरिंद्रस्यतस्याश्चपुरतस्तदा
कुत्सितंगर्हितंजातमितिलज्जाकरंवपुः ९४
तद्भर्तुःशापमाहात्म्यात्सहस्रभगचिह्नितम्
अधोमुखस्ततोभूत्वादेवराजोविनिर्गतः ९५
निनिंदस्वकृतंकर्मसोऽभिभूतःसलज्जितः
मेरोःशिरसितोयाढ्येशतयोजनविस्तृते ९६
तत्रगत्वाप्रविष्टस्तुहेमांभोरुहकोरके
तत्रस्थोगर्हयन्नित्यमात्मानंमन्मथंतथा ९७
धिक्तांकामात्मतांलोकेसद्यःपातकदायिनीम्
ययाहिनरकंयातिसर्वलोकविगर्हितः ९८
आयुःकीर्तिर्यशोधर्मधैर्यध्वंसकरीतथा
धिङ्मन्मथंदुराचारमापदांनियतंपदम् ९९
देहस्थंदुर्दमंशत्रुसंतुष्टंसदावशम्
इत्थंवादिनिप्रच्छन्नेवासवेपद्मसद्मनि १००
आखंडलंविनाभीरुदेवलोकोनशोभते
ततोदेवाःसगंधर्वालोकपालाःसकिन्नराः १०१
शच्यासहसमागम्यपप्रच्छुस्तेबृहस्पतिम्
भगवन्बलभिद्देवं नैवजानीमहेवयम् १०२
क्वतिष्ठतिगतःकुत्रकुत्रवामृगयामहे

ननाकःशोभतेतेनविनादेवगणैःसह १०३
सुपुत्रेणविनायद्वत्कुलंश्रीमगृदुणान्वितम्
उपायश्चिंत्यतांसद्यःस्वर्लोकेयेनशोभते १०४
सनाथःसुश्रियायुक्तोनविलंबोऽत्रयुज्यते
इतितेषांवचःश्रुत्वागुरुर्वचनमब्रवीत् १०५
जानेऽहस्वापराधेनलज्जयायत्रतिष्ठति
रभसालब्धकार्यस्यभुंक्तेसमघवाफलम् १०६
नृणांनीतिपरित्यागाद्विपाकाःस्युर्भयंकराः
अहोराज्यमदैर्मत्तःकृत्याकृत्यमचिंतयन् १०७
कृतवान्निंद्यमानंहिदृष्टादृष्टक्षयंकरम्
कुर्वंतिबालिशायत्रदैवोपहतबुद्धयः १०८
अपराधाद्यथाजन्मस्यादिहामुत्रनिष्फलम्
अधुनातत्रगच्छामोयत्रशक्रःसतिष्ठति १०९
इत्युक्त्वानिर्गताःसर्वेबृहस्पतिपुरोगमाः
दृष्ट्वासरसिविस्तीर्णेस्वर्णपंकजकाननम् ११०
तुष्टुवुर्देवराजानंप्रबोधोयेनजायते
ततोगुरोःप्रबोधेननिर्गतःपद्मकुड्मलात् १११
दीनाननोविरूपस्तुव्रीडाकुंचितलोचनः
जग्राहचरणाविंद्रोगुरोस्तस्याग्रजन्मनः ११२
त्राहिमांनिष्कृतिंब्रूहिपापस्यास्यबृहस्पते
देवराजवचःश्रुत्वाजगौविप्रोबृहस्पतिः ११३
शृणुदेवेंद्रवक्ष्येऽहमुपायंपापनाशनम्
प्रयागस्नानमात्रेणतत्क्षणादेवपातकात् ११४
मुच्यसेदेवराजत्वंतत्रयामःसहैवते
अथपुरोधसासार्धमागत्यबलमर्दनः ११५
सस्नौसितासितेतीर्थेसद्योमुक्तोह्यघैस्ततः
अथदेवगुरुस्तस्मैप्रसन्नस्तुवरंददौ ११६
प्रयागस्नानमात्रेणक्षीणंपापंत्वयानघ
क्षीणपापस्यतेशक्रमत्प्रसादेनसत्वरम् ११७
सहस्त्रमेतद्योनीनांसहस्त्रंस्यादृशांतव

तदैवद्विजवाक्येनशुशुभेचशचीपतिः ११८
लोचनानांसहस्रेणपंकजैरिवमानसम्
अथवृंदारकैःसर्वैर्ऋषिभिश्चाभिपूजितः ११९
गंधर्वैःस्तूयमानस्तुगतःशक्रोऽमरावतीम्
इत्थंसद्योविपापोऽभूत्प्रयागेपाकशासनः १२०
याहित्वमपिकल्याणिप्रयागंदेवसेवितम्
सद्यःपापविनाशायतथास्वर्गतयेदृढम् १२१
इतितस्यवचःश्रुत्वासेतिहासंसमंगलम्
तदैवसंभ्रमापन्नानत्वापादौद्विजस्यतु १२२
त्यक्त्वाबंधुजनंसर्वंदासदासीगृहंतथा
सकलान्विषयान्रक्षोविषग्रासानिवस्फुटम् १२३
वपुश्चक्षणविध्वंसिपश्यंतीनिर्गताह्यहम्
नरकार्णवसंपातदारुणांतरवह्निना १२४
हृदयेकुणपव्याघ्रतदातत्तप्यमानया
मयागत्वाकृतंस्नानंमाघेमासिसितासिते १२५
तस्यस्नानस्यमाहात्म्यंशृणुवृद्धनिशाचर
त्र्यहात्पापक्षयोजातःसप्तविंशतिभिर्दिनैः १२६
शेषैर्मेयदभूत्पुण्यंतेनदेवत्वमागता
रममाणातुकैलासेगिरिजायाःप्रियासखी १२७
जातिस्मरातथाजाताप्रयागस्यप्रभावतः
स्मृत्वाप्रयागमाहात्म्यंमाघेमाघेव्रजाम्यहम् १२८
इतिराक्षसयत्पृष्टंत्वयाविस्मितचेतसा
तन्मयाकथितंसर्वंचरितंप्रीतयेतव १२९
मत्प्रीतयेचरित्रंस्वंत्वंब्रूहिममराक्षस
कर्मणाकेनजातोऽसिविरूपोऽतिभयंकरः १३०
श्मश्रुलोदीर्घदंष्ट्रश्चक्रव्यादोगिरिगह्वरे
राक्षसउवाच
इष्टंददातिगृह्णातिगुह्यंवदतिपृच्छति १३१
प्रीत्याहिसज्जनोभद्रेतच्चसर्वंत्वयिस्थितम्
त्वयासंभावितोनूनंमन्येऽहवामलोचने १३२

भाविनीनिष्कृतिःसद्यस्त्वयास्यक्रूरकर्मणः
अतोवक्ष्यामितेभद्रेदुष्कृतंयत्स्वयंकृतम् १३३
निवेद्यसज्जनेदुःखंततःसर्वसुखीभवेत्
शृणुसुश्रोण्यहंकाश्यांबह्वृचोवेदपारगः १३४
जातःपुराद्विजःश्रेष्ठःकुलेमहतिनिर्मले
राज्ञांदुष्कृतिनांभीरुशूद्राणांचतथाविशाम् १३५
वाराणस्यांकृतोघोरोमयादुष्टप्रतिग्रहः
बहुधाबहुधावारंनिषिद्धःकुत्सितोबहु १३६
चांडालस्यापिनत्यक्तोमयादुष्टप्रतिग्रहः
अन्यच्चपातकंतत्रममाभून्मूढचेतसः
तन्नास्तिदुष्कृतंकर्ममयायत्रनयत्कृतम् १३७
अन्यच्चश्रूयतांदोषःक्षेत्रस्यवरवर्णिनि
अविमुक्तेऽणुमात्रंयत्तदघंमेरुतांव्रजेत्
नधर्मस्तुमयाकश्चित्संचितस्तत्रजन्मनि १३८
ततोबहुतिथेकालेमृतस्तत्रैवशोभने
अविमुक्तप्रभावेणनचाहंनरकंगतः १३९
अविमुक्तेमृतःकश्चिन्नरकंनेतिकिल्बिषी
अविमुक्तेकृतंकिंचित्पापंवज्रीभवेदृढम् १४०
वज्रलेपेनपापेनतेनमेजन्मराक्षसम्
रौद्रंक्रूरतरंपापंसंभूतंहिमपर्वते १४१
द्विर्जातोगृध्रयोनौप्राक्त्रिर्व्याघ्रोद्विःसरीसृपः
एकवारमुलूकस्तुविड्वराहस्ततःपरम् १४२
इदंतुदशमंजन्मराक्षसंममभामिनी
अतीतानिसहस्राणिवर्षाणिममजन्मनः १४३
नास्तिमेनिष्कृतिर्भद्रेएतस्माद्दुःखसागरात्
अत्रत्रियोजनंसुभ्रूर्निर्जंतुहिमयाकृतम् १४४
अनागसांचभूतानांबहूनांचकृतःक्षयः
कर्मणातेनमेसुभ्रूर्दह्यतेसततंमनः १४५
त्वद्दर्शनसुधासिक्तंगतंशैत्यंमनोमम
तीर्थंफलतिकालेनसद्यःसाधुसमागमः १४६

अतःसत्संगतिंसुभ्रूःप्रशंसंतिमनीषिणः
एतत्तेकथितंसर्वंस्वदुःखंहृद्गतंमया १४७
विरलःसज्जनःसुभ्रूःस्वात्मायस्यनखिद्यते
जानास्यत्रोचितंत्वंहिकिंचिन्नोवच्म्यतःपरम् १४८
अस्यदुःखोदधेःपारंकथंयामीतिचिंतयन्
सज्जनानांसमाभूतिःसर्वेषामुपजीवनम् १४९
क्षीरार्णवःपयोदत्तेहंसायनबकायकिम्
दत्तात्रेयउवाच
इतितस्यवचःश्रुत्वादयार्द्रीकृतमानसा १५०
धर्मदानेमतिंकृताजगौकांचनमालिनी
करिष्येनिष्कृतिंरक्षइदानींखलुमाशुचः १५१
प्रतिज्ञांतुदृढांकृत्वायतिष्येतवमुक्तये
बहवोहिकृतामाघावर्षेवर्षेयथाविधि १५२
श्रद्धापूर्वंमयाभद्रब्रह्मक्षेत्रेसितासिते
तांवदामितुसंख्यातिंतस्यधर्मस्यराक्षस १५३
गूढोधर्मोहिकर्तव्यइत्यूचुर्विबुधाजनाः
आर्तेदानंप्रशंसंतिमुनयोवेदवादिनः १५४
सागरेवर्षतोभद्रकिंमेघस्यफलंभवेत्
अनुभूतंमयारक्षःस्वयंतत्पुरायजंफलम् १५५
तत्तुदास्यामितेमित्रसद्यःपापविनाशनम्
निष्पीड्याथततोवस्त्रंजलंकृत्वाकरांबुजे १५६
ददौसामाघजंपुरायंतस्मैवृद्धायरक्षसे
शृणुराजन्विचित्रंहिप्रभावंमाघधर्मजम् १५७
तदैवंप्राप्यतत्पुरायंविमुक्താराक्षसीतनुः
संभूतोदेवताकारस्तेजोभास्करविग्रहः १५८
देवयानंसमारूढःसहर्षोत्फुल्ललोचनः
द्योतमानस्तदाव्योम्निभासयन्प्रभयादिशः १५९
दिव्यरूपधरोरेजेद्वितीयइवभास्करः
ततोऽभिनंदयामाससतांकांचनमालिनीम् १६०
भद्रेवेत्तीश्वरोदेवःकर्मणांयःफलप्रदः

तत्त्वयोपकृतंसर्वंयत्रमेनास्तिनिष्कृतिः १६१
इदानीमपिकारुरायात्प्रसीदानुग्रहंकुरु
शिक्षांविधेहिमेदेविसर्वनीतिमयींशुभाम् १६२
सर्वधर्मकरींनूनंनकुर्वेपातकंयथा
तांश्रुत्वात्वदनुज्ञातःपश्चाद्यामिसुरालयम् १६३
दत्तात्रेयउवाच
एतन्निशम्यतेनोक्तंप्रियंधर्ममयंवचः
अतिप्रीत्याब्रवीद्धर्मराजन्कांचनमालिनी १६४
धर्मंभजस्वसततंत्यजभूतहिंसांसेवस्वसाधुपुरुषान्जहिकामशत्रुम्
अन्यस्यदोषगुणकीर्तनमाशुहित्वासत्यंवदार्चयहरिंव्रजदेवलोकम् १६५
देहेऽस्थिमांसरुधिरेस्वमतिंत्यजत्वंजायासुतादिषुसदाममतांविमुंच
पश्यानिशंजगदिदंक्षणभंगुरंहिवैराग्यभावरसिकोभवयोगनिष्ठः १६६
प्रीत्यामयानिगदितंतवधर्ममार्गंचित्तोनिधेहिसकलंभवशीलयुक्तः
संत्यज्यराक्षसतनुंधृतदेवदेहोज्योतिर्मयोव्रजयथासुखमाशुनाकम् १६७
श्रुत्वाधर्मंततोहृष्टःसंतुष्टोराक्षसोऽब्रवीत्
भवप्रमुदितानित्यंसर्वदाशिवमस्तुते १६८
आचन्द्रार्कंरमस्वत्वंकैलासेशिवसन्निधौ
उमयाऽखडितंप्रेमतवास्तुवरवर्णिनि १६९
धर्मनिष्ठातपोनिष्ठामातस्त्वंभवसर्वदा
मास्तुलोभःशरीरेतेआपन्नार्तिसदाहर १७०
इत्युक्त्वातुप्रणम्याथसतांकांचनमालिनीम्
जगामराक्षसःस्वर्गंगंधर्वैर्बहुभिःस्तुतः १७१
देवकन्यास्तदागत्यववर्षुःपुष्पवृष्टिभिः
तस्याःकांचनमालिन्यामूर्ध्निहर्षसमाकुलाः १७२
तामालिग्यततःप्रोचुःकन्यकास्तुप्रियंवचः
कृतंभद्रेत्वयाचित्रंराक्षसस्यविमोक्षणम् १७३
दुष्टस्यास्यभयात्कश्चिद्विशत्यस्मिन्नकानने
अधुनानिर्भयाह्यत्रविचरामोयथासुखम् १७४
श्रुत्वातद्वचनंराजंस्तासांकांचनमालिनी
हृष्टातेनैवदानेनकृतकृत्यातदासती १७५

तंराद्मसंकांचनमालिनीवरागन्धर्वकन्यापरिमोच्यसत्वरम्
क्रीडंत्यमूभिःप्रययौहरालयंप्रीत्यासपूर्णाचपरोपकारया १७६
संवादमेनंवरकन्यकेरितंभक्त्यापरंयःशृणुयाच्चमानवः
नबाध्यतेजातुसदासराद्मसैर्धर्मेमतिस्तस्यभृशंहिजायते १७७

इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहिताया
मुत्तरखराडेमाघमासमाहात्म्येदिलीपवसिष्ठसंवादेराद्मसमोद्मोनाम
सप्तविंशत्यधिकशततमोऽध्यायः१२७

अष्टाविशंत्यधिकशततमोऽध्यायः

वसिष्ठउवाच
कथितंमाघमाहात्म्यंदत्तात्रेयेणभाषितम्
अधुनाऽहप्रवद्म्यामिमाघस्नानस्ययत्फलम् १
सर्वक्रतुवरिष्ठंतुसर्वदानफलप्रदम्
सर्वव्रततपस्तुल्यंमाघस्नानंपरंतप २
स्नानेनमाघस्यविशुद्धमानसापितृन्दिविस्थाप्यकुलद्वयस्यवै
स्वर्गंप्रयांतिस्वयमुज्ज्वलाननावरैर्विमानैरुचिरैश्चकामगैः ३
येमानवाःपापकृतोऽपिसर्वदासदादुराचाररताविमार्गगाः
स्नात्वाहिमाघेहरिमर्चयंतियेमुंचंतितेपीहमहाघसंचयम् ४
सत्येनहीनाःपितृमातृदुःखदाह्यनाश्रमस्थाःकुलधर्मवर्जिताः
येदांभिकास्तेऽपिनराः सतांगतिंस्नानैःप्रयांत्यत्रहिमाघसंभवैः ५
पुरायेषुतीर्थेषुचमाघमासेस्नानंनराणामतिदुर्लभंभुवि
तस्माद्यतोब्रह्मविदांपदंनरैःसंप्राप्यतेनात्रविचारणामम ६
माघेतपोदानजपप्रसेवनंस्थानंहरेःपूजनमद्मयंनृप
तस्माद्यथाशक्तिनरैःप्रयत्नतःस्नात्वाप्रदेयंवसनान्नकांचनम् ७
माघेऽन्नदाताऽमृतपःसुरालयेहेम्नश्चदाताबलभित्समीपगः
दीपाग्निवासांसिददन्नरःसदासूर्यस्यलोकेवसतिप्रभामयः ८
यज्ञैःसुदानैःसुतपोभिरुज्ज्वलैःसुब्रह्मचर्यार्चनयोगसेवया
शुद्धाभवंतीहतथानपापिनःस्नानैर्यथापुरायभवैस्तुमाघजैः ९
दुःखौघसंतप्तिमसह्ययातनांयाम्यांनतेयांत्यपिपापकारिणः
येमाघमासेवरतीर्थमज्ञनंकुर्वंतिचार्धोदितसूर्यमंडले १०

स्नात्वाचमाघेहरिमर्चयंतियेस्वर्गच्युताभूपतयोभवंति
भव्याःसुरूपाःसुभगाःप्रियंवदाधर्मान्विताभूरिधनाःशतायुषः ११
दीप्तानलेकाष्ठचयोयथाहुतोभस्मावशेषोभवतीहतत्त्क्षणात्
स्नानेनमाघस्यतथाविलीयतेक्षुद्रोऽपिपापौघमहाघसंचयः १२
कायेनवाचामनसापिपातकंज्ञातंयदज्ञातमलंकृतंनरैः
स्नानंचमाघेवरतीर्थसंभवंसर्वंदहद्व्ष्णुरिवाशु हृद्गतः १३
संभुज्यमानाघफलंहिपार्थिवप्रमादतोपीहनृणांकदाचन
स्नानंहिमाघस्ययतःप्रसज्यतेतदैवतत्संक्षयमेतिनिश्चितम् १४
गंधर्वकन्याःपृथिवीशशापजंसंभुज्यमानाघफलंदुरत्ययम्
स्नानाद्विमुक्ताःखलुमाघमासजाद्वाक्यात्पुरालोमशजातमद्भुतम् १५
सूतउवाच
श्रुत्वैतत्पार्थिवः प्रीत्यानत्वातत्पादपंकजम्
श्रद्धयापरयानम्रस्तंपप्रच्छपुरोधसम् १६
भगवन्ब्रूहिकन्याभिःशापोह्यभिगतःकुतः
कस्यापत्यानितास्तासांनामकिंकीदृशंवयः १७
कथंलोमशवाक्येनविपाकाच्छापसंभवात्
विमुक्ताःकुत्रताः सस्नुर्मासंताः कतिसंख्यया १८
वसिष्ठउवाच
श्रूयतांराजशार्दूलधर्मगर्भांकथांपराम्
यथाऽरणिर्वह्निगर्भाधर्मसूर्वह्निसूरिव १९
गंधर्वःसुखसंगीतिस्तस्यकन्याप्रमोदिनी
सुशीलस्यसुशीलाचसुस्वरास्वरवेदिनः २०
सुताराचंद्रकांतस्यचंद्रिकासुप्रभस्यच
इमानिवरनामानि तासामप्सरसांनृप २१
कुमार्यः पंचसर्वास्तावयसासुसमाःपुनः
चंद्रादिवविनिष्क्रांताश्चंद्रिकेवसमुज्ज्वलाः २२
चंद्राननाः सुकेशिन्यश्चंद्रामृतरसाधराः
नेत्रेष्वानंदकारिण्यः कौमुदीकुमुदेष्विव २३
लावण्यपिंडसंभूताश्चारुरूपामनोहराः
उदिभन्नकुचकुंभिन्यःपद्मिन्यइवमाधवे २४

उन्मील्ययौवनंकांतंवल्लीवनवपल्लवैः
हेमगौराश्चहेमाभाहेमालंकारभूषिताः २५
हेमचंपकमालिन्योहेमच्छविसुवाससः
स्वरग्रामावलीहासुविविधामूर्च्छनासुच २६
तालदानविनोदेषुवेणुवीणाप्रवादने
मृदंगनादसंभिन्नंलास्यमार्गलवेषुच २७
चित्रादिषुविनोदेषुकलासुचविशारदाः
एवंभूतास्तुताःकन्यामुमुहुःक्रीडनेवने २८
पितृभिर्लालिताःसत्यश्चेरुश्चधनदालये
कौतुकादेकदापंचमिलित्वामासिमाधवे
कन्यामंदारपुष्पाणिविचिन्वंत्योवनाद्वनम् २९
गौरींसमाराधयितुंवरांगनाःकदाचिदच्छोदसरोवरंययुः
हेमांबुजानिप्रवराणिताःपुनस्तस्मादुपादायवरोत्पलैःसह ३०
वैडूर्यशुद्धस्फटिकाच्छविद्रुमेस्नात्वातडागेपरिधायचांबरम्
मौनेनचस्थंडिलपिंडिकामयीस्वर्णस्यसिक्ताभिरुमांविनिर्ममुः ३१
समर्चितांचंदनचंद्रकुंकुमैरभ्यर्च्यगौरींवरपंकजादिभिः
नानोपचारैश्चसुभक्तिभावितास्तालप्रयोगैर्ननृतुःकुमारिकाः ३२
गांधारमाश्रित्यवरंस्वरंततोगेयंसुतारध्वनिभिःसुमूर्च्छितम्
एणीदृशस्ताःप्रजगुःकलाक्षरंचारुप्रबंधंगतिभिस्तुसुस्वरम् ३३
तस्मिन्सुनादेरसवर्षहर्षदेकन्यास्वलंनिर्भरनृत्यवृत्तिषु
अच्छोदतीर्थप्रवरेतदागतःस्नातुंमुनेर्वेदनिधेःसुताग्निपः ३४
रूपेणनिःसीमतरोवराननःसरोजपत्रायतलोचनोयुवा
विशालवक्षाःसुभुजोऽतिसुंदरःश्यामच्छविःकामइवापरोहिसः ३५
सब्रह्मचारीसशिखोविराजतेदंडेनयुक्तोधनुषैवमन्मथः
एणाजिनप्रावरणःसुसूत्रधृग्घेमाभमौंजीकटिसूत्रमेखलः ३६
तंदृष्ट्वाब्राह्मणंबालास्तास्तत्रसरसस्तटे
जहर्षुःकौतुकाविष्टाःकोऽयनोनयनातिथिः ३७
संत्यक्तनृत्यगीतास्तास्तस्यालोकनतत्पराः
हरिण्योलुब्धकेनेवविद्धाःकामेनसायकैः ३८
पश्यपश्येतिजल्पंत्योमुग्धाःपंचसुसंभ्रमम्

तस्मिन्विप्रवरेयूनिकामदेवभ्रमंययुः ३९
पुनःपुनस्तमभ्यर्च्यनयनैःपंकजैरिव
पश्चाद्विचारमायासुस्ताश्चकन्याःपरस्परम् ४०
यद्ययंकामदेवोहिरतिहीनःकथंव्रजेत्
अथायमश्विनौदेवौतौनूनंयुग्मचारिणौ ४१
गंधर्वःकिन्नरोवाथसिद्धोवाकामरूपधृक्
ऋषिपुत्रोथवाकश्चित्कश्चिद्वामानुषोत्तमः ४२
अस्तुवाकश्चिदेवायंधात्रासृष्टोहिनःकृते
यथाभाग्यवतामर्थेनिधानंपूर्वकर्मभिः ४३
तथास्माकंकुमारीणांगौर्यानीतोवरोत्तमः
करुणाजलकल्लोलप्लवार्द्रीकृतचित्तया ४४
मयावृतस्त्वयाचायंत्वयावृतस्तथामया
एवंपंचसुकन्यासुवदंतीषुनृपोत्तम ४५
श्रुत्वातद्वचनंतत्रकृत्वामाध्याह्निकीःक्रियाः
आलोच्यहृदयेसोऽपिविघ्नमेतदुपस्थितम् ४६
ब्रह्मविष्णुगिरिशादयःसुरायेचसिद्धमुनयःपुरातनाः
तेऽपियोगबलिनोविमोहितालीलयातदबलाभिरद्भुतम् ४७
योषितांनयनतीक्ष्णसायकैर्भ्रूलतासुदृढचापनिर्गतैः
धन्विनामकरकेतुनाहतःकस्यनोपततिहामनोमृगः ४८
तावदेवनयधीर्विराजतेतावदेवजनताभयंभजेत्
तावदेवदृढचित्तताभृशंतावदेवगणनाकुलस्यच ४९
तावदेबवतपसःप्रगल्भतातावदेवयमधारणांनृणाम्
यावदेववनितेक्षणबाणैर्मोहयंत्युरुमदैर्नमानुषाः ५०
मोहयंतुमदयंतुरागिणांयोषितःसुललितैर्मनोहरैः
मोहयंतिमदयंतिमामिमंधर्मरक्षणपरंहिकैर्गुणैः ५१
मांसशुक्रमलमूत्रनिर्मितेयोषितांवपुषिनिर्घृणेऽशुचौ
कामिनश्चपरिकल्प्यचारुतांमारमंतुसुविमूढचेतसः ५२
दारुणोहिपरिकीर्तितोंगनासन्निधिर्विमलबुद्धिभिर्बुधैः
यावदत्रनसमीपगाइमास्तावदेवहिगृहंव्रजाम्यहम् ५३
समीपंतस्ययावद्धिनागच्छंतिवरांगनाः

वैष्णवेनप्रभावेणतावदंतर्दधेद्विजः ५४
तस्ययोगबलाद्रूपगतस्यादर्शनंतदा
दृष्ट्वातदद्भुतंकर्मऋषिपुत्रस्यधीमतः ५५
वित्रस्तनयनाबालाःकुरंग्यइवकातराः
संभ्रांतनयनाःशून्याददृशुस्तादिशोदश ५६
इंद्रजालंस्फुटंवेत्तिमायांजानातिवापुनः
दृष्टोऽप्यदृष्टरूपोऽभूदित्यूचुश्चपरस्परम् ५७
व्याप्तंतुहृदयंतासांसदैवविरहाग्निना
ज्वलद्दावानलेनेवसुस्निग्धंसांद्रकाननम् ५८
त्यक्त्वैंद्रजालिकींविद्यांकांतदर्शयसत्वरम्
स्वात्मानंनोमनोयुक्तंप्राग्ग्रासेमक्षिकोपमम् ५९
हाकष्टंदर्शितःकस्माद्धात्रात्वंघटितःपुनः
ज्ञातंमहानुसंतापहेतोर्नस्त्वंविनिर्मितः ६०
कच्चित्तेनिर्दयंचेतःकच्चिदस्मासुनोमनः
कच्चिद्धूर्तोऽसि हेकांत कच्चिन्मुष्णासि नोमनः ६१
कच्चिन्नप्रत्ययोस्मासुकच्चिदऽस्मान्परीक्षसे
कच्चिन्नर्मकलाशीलःकच्चिन्मायाविशारदः ६२
कच्चिच्चित्तेप्रवेष्टुंचवेत्सिविज्ञानलाघवम्
कच्चिन्निष्क्रमणोपायंनजानासिकुतःपुनः ६३
कच्चिद्विनापराधंतुत्वमस्मासुप्रकुप्यसे
कच्चिद्दुःखंविजानासिपरेषांविप्रलंभजम् ६४
त्वद्दर्शनंविनानूनंहृदयेश्वरसांप्रतम्
नजीवामोऽथजीवामःपुनस्त्वद्दर्शनाशया ६५
अस्मांश्चनीयतांतत्रयत्रशीघ्रंगतोभवान्
त्वद्दर्शनहरोधाताव्यदधादंकुरच्छिदम् ६६
सर्वथादर्शनंदेहिकारुण्यंभजसर्वथा
पर्यंतंनप्रपश्यंतिसर्वथासज्जनाजनाः ६७
इत्थंविलप्यताःकन्याःप्रतीक्ष्यचबहुक्षणम्
पितृभियागृहंगंतुंशीघ्रमारेभिरेगतिम् ६८
तत्प्रेमनिगडैर्बद्धाभृशंविरहविक्लवाः

कथंचिद्धैर्यमालंब्यताःस्वंस्वंगृहमागताः ६९
आगत्यपतिताःसर्वाजलयंत्रसमीपतः
किमेतन्मातृभिःपृष्टाःकुतःकालात्ययोऽभवत् ७०
कन्याऊचुः
क्रीडंत्यःकिन्नरीभिस्तुसार्धंसंगीतकंमुदा
संस्थितास्तेननज्ञातंदिवसादिसरोवरे ७१
पथिश्रांतावयंमातःसंतापस्तेननस्तनौ
मोहेनमहतावक्तुंनकेनाप्युत्सहामहे ७२
इत्युक्त्वालुलुठुस्तत्रमणिभूमौकुमारिकाः
आकारंगोपयंत्यस्तामुग्धाजल्पंतिमातृभिः ७३
काचिन्नर्तयतिक्रीडामयूरंनमुदातदा
नपाठयतितंकीरंपंजरेऽन्याकुतूहलात् ७४
लालयेन्नकुलंनान्यानोल्लासयतिसारिकाम्
अपरातीवसंमुग्धानैवक्रीडतिसारसैः ७५
भेजिरेनविनोदांस्तारेमिरेनैवमंदिरे
ऊचिरेबांधवैर्नालंवीणावाद्यंनचक्रिरे ७६
कल्पद्रुमप्रसूनंयद्रसवत्तुसुधोपमम्
मंदारकुसुमामोदिनपपुर्मधुरंमधु ७७
योगिन्यइवताःकन्यानासाग्रन्यस्तलोचनाः
अलक्ष्यध्यानसंतानाःपुरुषोत्तममानसाः ७८
चंद्रकांतमणिच्छन्नेस्त्रवद्वारिकणद्रवे
क्षणंवातायनेस्थित्वाजलयंत्रेक्षणंक्षणात् ७९
रचयंतिक्षणंशय्यांदीर्घिकांभोजिनीदलैः
वीज्यमानासखीभिस्ताःशीतलैःकदलीदलैः ८०
इत्थंयुगसमांरात्रिंमन्वानास्तावरस्त्रियः
कथंचिद्धीरतांकृत्वाविह्वलाःसज्वराइव ८१
प्रातर्व्योममणिंदृष्ट्वामन्यमानाःस्वजीवितम्
विज्ञाप्यमातरंस्वांस्वांगौरींपूजयितुंगताः ८२
स्नात्वातेनविधानेनपुष्पैर्धूपैर्यथातथा
विधायपूजनंदेव्यागायंत्यस्तत्रताःस्थिताः ८३

एतस्मिन्नंतरेविप्रःस्नातुंसोऽपिसमागतः
पित्राश्रमपदात्तस्मादच्छोदेचसरोवरे ८४
मित्रंदृष्ट्वैवरात्र्यंतेनलिन्यइवकन्यकाः
उत्फुल्लनयनाजातास्तंदृष्ट्वाब्रह्मचारिणम् ८५
गत्वातदैवताःकन्याःसमीपंब्रह्मचारिणः
सव्यापसव्यबंधेनभुजपाशंचचक्रिरे ८६
गतोऽसिधूर्तपूर्वेद्युर्गंतुमद्यनशक्यसे
वृतस्त्वंनूनमस्माभिर्नात्रतेऽस्तुविचारणा ८७
इत्युक्तोब्राह्मणःप्राहप्रसन्बाहुपाशगः
युष्माभिरुच्यतेभद्रमनुकूलंप्रियंवचः ८८
प्रथमाश्रमनिष्ठस्यकिंतुनाद्यापिमेव्रतम्
वेदाभ्यसनशीलस्यपारंयातिगुरोःकुले ८९
आश्रमेयत्रयोधर्मोरक्षणीयःसपंडितैः
विवाहोऽयमतोमन्येनधर्मइतिकन्यकाः ९०
आकर्ण्यतस्यवाक्यानितमूचुस्तावचस्ततः
सकलध्वनिसोत्कंठाःकोकिलाइवमाधवे ९१
धर्मादर्थोर्थतःकामःकामाद्धर्मफलोदयः
इत्येवनिश्चितंशास्त्रंवर्णयंतिविपश्चितः ९२
सकामोधर्मवाहुल्यात्पुरस्तेसमुपागतः
सेव्यतांविविधैर्भोगैःस्वर्गभूमिरियंततः ९३
श्रुत्वातद्वचनंतासांप्राहगंभीरयागिरा
तथ्यंवोवचनंकिंतुसमाप्येहस्वकंव्रतम् ९४
प्राप्यनुज्ञांगुरोःसर्वंवैवाहंकर्मनान्यथा
इत्युक्त्वापुनरूचुस्ताःस्फुटंमूढोऽसिसुन्दरः ९५
दिव्यौषधंब्रह्मरसायनंचसिद्धिर्निधेःसाधुकलावरांगनाः
मंत्रस्तथासिद्धिरसश्चधर्मतोनेमानिषेध्याःसुधियासमागताः ९६
कार्यंहिदैवाद्यदिसिद्धमागतंतस्मिन्नुपेक्षांनचयातिनीतिगः
यस्मादुपेक्षानपुनःफलप्रदातस्मान्नदीर्घीकरणंप्रशस्यते ९७
सांद्रानुरागाःकुलजन्मनिर्मलाःस्नेहार्द्रचित्ताःसुगिरःस्वयंवराः
कन्याःसुरूपाःखलुचारुयौवनाधन्यालभंतेऽत्रनरास्तुनेतरे ९८

क्ववयंवरसुन्दर्यःक्वचाऽयतापसोबटुः
दुर्घटस्यविधानेहिमन्येधातातिपंडितः ९९
तस्मादस्मानिदानींतुस्वीकुर्यान्मंगलंभवान्
गांधर्वेणविवाहेनह्यन्यथानोनजीवितम् १००
श्रुतवाक्यस्ततःप्राहब्राह्मणोधर्मवित्तमः
भोमृगाच्यःकथंत्याज्योधर्मोधर्मधनैर्नरैः १०१
धर्मश्चार्थश्चकामश्चमोक्षश्चैतच्चतुष्टयम्
यथोक्तंसफलंज्ञेयंविपरीतंतुनिष्फलम् १०२
नाकालेऽहव्रतीकुर्यामतोदारपरिग्रहम्
नक्रियाफलमाप्नोतिक्रियाकालंनवेत्तियः १०३
यतोधर्मविचारेऽस्मिन्प्रसक्तंममममानसम्
तस्माच्छृणुतहेकन्यानसमीहेस्वयंवरम् १०४
एवंज्ञात्वाशयंतस्यसमीच्यैताःपरस्परम्
करात्करंविमुच्याथजग्राहांघ्रीप्रमोदिनी १०५
भुजौजग्रहतुस्तस्यसुशीलासस्वरातथा
आलिलिगसुताराचचुचुंबेचंद्रिकामुखम् १०६
तथापिनिर्विकारोऽसौप्रलयानलसन्निभः
शशापब्रह्मचारीताःक्रोधेनात्यंतमूर्च्छितः १०७
पिशाच्यइवमांलग्नास्तत्पिशाच्योभविष्यथ
एवंतेनाशुशप्तास्तास्तंसंत्यज्यपुरास्थिताः १०८
किमेतच्चेष्टितंपापह्यनागसिजनेत्वया
प्रियेकृत्येऽप्रियंकृत्वाधिक्ताधर्मज्ञतांतव १०९
अनुरक्तेषुभक्तेषुमित्रेषुद्रोहकारिणः
पुंसोलोकद्वयेसौख्यंनाशंयातीतिनःश्रुतम् ११०
तस्मात्त्वमपिनःशापात्पिशाचोभवसत्वरम्
इत्युक्त्वोपरताबालानिःश्वसंत्यःक्षुधाकुलाः १११
तदाचान्योन्यसंरंभात्तस्मिन्सरसिपार्थिव
ताःकन्याब्रह्मचारीसःसर्वेपैशाचमागताः ११२
पिशाच्याःसपिशाचश्चक्रंदमानाःसुदारुणम
क्षपयंतिविपाकंतंपूर्वोपात्तस्यकर्मणः ११३

स्वकालेतुफलत्येवपूर्वोपात्तंशुभाशुभम्
स्वच्छायाइवदुर्वारंदेवानामपिपार्थिव ११४
क्रंदंतिपितरस्तासांमातरस्तत्रतस्यच
अप्रमादश्चबालानां दैवंहिदुरतिक्रमम् ११५
ततऊर्ध्वंपिशाचास्तेआहारार्थेसुदुःखिताः
इतस्ततश्चधावंतोवसंतिसरसस्तटे ११६
एवंबहुतिथेकालेलोमशोमुनिसत्तमः
पौषेमासिचतुर्दश्यामच्छोदेस्नातुमागतः ११७
दृष्ट्वातंब्राह्मणंसर्वेपिशाचाःक्षुत्समाकुलाः
धावंतोहतुकामास्तेमिलित्वायूथवर्तिनः ११८
दह्यमानासुतीव्रेणतेजसालोमशस्यच
असमर्थाःपुरःस्थातुंसर्वेतेदूरतःस्थिताः ११९
तत्रवेदनिधिर्विप्रस्तदैवहिसमागतः
समीक्ष्यलोमशंराजन्साष्टांगंप्रणिपत्यसः १२०
उवाचसूनृतांवाचंबद्ध्वाशिरसिचांजलिम्
महाभाग्योदयेविप्रसाधूनांसंगतिर्भवेत् १२१
गंगादिसर्वतीर्थेषुयोनरःस्नातिसर्वदा
यःकरोतिसतांसंगंतयोःसत्संगतिर्वरा १२२
गुरूणांसंगमोविप्रदृष्टादृष्टफलोभुवि
स्वर्गदोरोगहारीचकिंतुसोपद्रवोमतः १२३
इत्युक्त्वाकथयामासपूर्ववृत्तांतमद्भुतम्
इमागंधर्वकन्यास्ताबटुःसोऽयममात्मजः १२४
सर्वेपिशाचरूपेणमिथःशापविमोहिताः
दीनाननास्तुतिष्ठंतितवाग्रेमुनिसत्तम १२५
त्वद्दर्शनेनबालानांनिस्तारोऽद्यभविष्यति
सूर्योदयेतमःस्तोमःकिंनलीयेतगह्वरे १२६
श्रुत्वातल्लोमशोराजन्कृपार्द्रीकृतमानसः
प्रत्युवाचमहातेजास्तंमुनिंपुत्रदुःखितम् १२७
मत्प्रसादाच्चबालानांस्मृतिःसपदिजायताम्
धर्मंचवच्मितंयेनमिथःशापोलयंव्रजेत् १२८

वेदनिधिरुवाच
महर्षेकथ्यतांधर्मोमुच्यंतेयेनबालकाः
नायंकालोविलंबस्यशापाग्निर्दारुणोयतः १२९
लोमशउवाच
मयासार्धंप्रकुर्वंतुमाघस्नानंविधानतः
शापान्मुच्यंतिमाघांतेनान्यथानिष्कृतिर्भवेत् १३०
शापःपापफलंविप्रपापनाशोभवेन्नृणाम्
माघस्नानेनतीर्थेचइतिमेनिश्चितामतिः १३१
सप्तजन्मकृतंपापंवर्तमानंचपातकम्
माघस्नानंदहेत्सर्वंपुण्यतीर्थेविशेषतः १३२
प्रायश्चित्तंनपश्यंतियस्मिन्पापेमुनीश्वराः
पातकंपुण्यतीर्थेषुनश्येत्तदपिमाघतः १३३
ज्ञानकृन्मानसेमाघस्तस्मान्मोक्षफलप्रदः
हिमवत्पृष्ठतीर्थेषुसर्वपापप्रणाशनः १३४
इंद्रलोकप्रदोच्छोदेनिर्दिष्टोवेदवादिभिः
सर्वपापहरोमाघोमोक्षदोबदरीवने १३५
पापहादुःखहारीचसर्वकामफलप्रदः
रुद्रलोकप्रदोमाघोनार्मदेपापनाशनः १३६
यामुनःसूर्यलोकायभवेत्कल्मषनाशनः
सारस्वतोऽघविध्वंसीब्रह्मलोकफलप्रदः १३७
विशालफलदोमाघोविशालायांद्विजोत्तम
पातकेंधनदावाग्निर्गर्भहेतुक्रियापहः १३८
विष्णुलोकायमोक्षायजाह्नवःपरिकीर्तितः
शरयूगंडकीसिंधुश्चंद्रभागाचकौशिकी १३९
तापीगोदावरीभीमापयोष्णीकृष्णवेणिका
कावेरीतुंगभद्राचअन्यायाश्चसमुद्रगाः १४०
आशुमाघीनरोयातिस्वर्गलोकंविकल्मषः
नैमिषेविष्णुसायुज्यंपुष्करेब्रह्मणोंतिकम् १४१
आखंडलस्यलोकोहिकुरुक्षेत्रेतुमाघतः
माघोदेवहृदेविप्रयोगसिद्धिफलप्रदः १४२

प्रभासेमकरादित्येस्नानाद्रुद्रगणोभवेत्
देवक्यांदेवतादेहोनरोभवतिमाघतः १४३
माघस्नानेनभोविप्रगोमत्यांनपुनर्भवः
हेमकूटेमहाकालेऋोंकारेऋमरेश्वरे १४४
नीलकंठेर्बुदेमाघाद्रुद्रलोकेमहीयते
सर्वासांसरितांविप्रसंगमेमकरेरवौ १४५
स्नानेनसर्वकामानामवाप्तिर्जायतेनृणाम्
माघस्तुप्राप्यतेधन्यैःप्रयागेद्विजसत्तम
ऋपुनर्भवदंतत्रसितासितजलंयतः १४६
गायंतिदेवाःसततंदिविस्थामाघःप्रयागेकिलनोभविष्यति
स्नानान्नरायत्रनगर्भवेदनांपश्यंतितिष्ठंतिचविष्णुसन्निधौ १४७
मज्जंतियेऽपित्र्यहमत्रमानवास्तीर्थेप्रयागेबहुपापकंचुकाः
व्रजंतितेनोनिरयेषुधर्मिणःस्वर्गेशुभेचारुचरंतिदेववत् १४८
तीर्थैर्व्रतैर्दानतपोभिरध्वरैःसार्धंविधात्रातुलयाधृतंपुरः
माघेप्रयागस्यतयोर्द्वयोरभून्माघोगरीयानतएवसोऽधिकः १४९
वातांबुपर्णाशनदेहशोषणैस्तपोभिरुग्रैश्चिरकालसंचितैः
योगैश्चसंयांतिनरानतांगतिंस्नानेनमाघस्यहियांतियांगतिम् १५०
स्नाताश्चयेमकरभास्करोदयेतीर्थेप्रयागेसुरसिंधुसंगमे
तेषांगृहद्वारमलंकरोतिकिंभृंगावलिकुंजरकर्णताडिता १५१
योराजसूयाद्धयमेधयज्ञतःस्नानात्फलंसंप्रददातिचाधिकम्
पापानिसर्वाणिविलोप्यलीलयानूनंप्रयागःसकथंनसेव्यते १५२
ऋवंतिविषयेराजावीरसेनोऽभवत्पुरा
नर्मदातीरमागत्यराजसूयंचकारसः १५३
षोडशैरश्वमेधैश्चस्वर्णवाटविराजितैः
स्वर्णभूषणयूपाढ्यैरीजेसोऽपियथाविधि १५४
प्रददौधान्यराशींश्चद्विजेभ्यःपर्वतोपमान्
वदान्योदेवताभक्तोगोप्रदःससुवर्णदः १५५
ब्राह्मणोभद्रकोनाममूर्खोहीनकुलस्तथा
कृषीवलोदुराचारःसर्वधर्मबहिष्कृतः १५६
कृषिकर्मसमुद्विग्नोबंधुभिश्चाप्यसंस्कृतः

इतस्ततःपरिभ्रम्यनिर्गतःक्षुत्प्रपीडितः १५७
दैवतःसार्थमाविश्यप्रयागंससमागतः
महामाघींपुरस्कृत्यसस्नौतत्रदिनत्रयम् १५८
अनघःस्नानमात्रेणभूत्वेहसद्विजोत्तमः
प्रयागाच्चलितस्तत्रपुनर्यस्मात्समागतः १५९
सराजासोऽपिविप्रश्चविपन्नावेकदातदा
तयोर्गतिःसमादृष्टामयाशक्रस्यसन्निधौ १६०
तेजोरूपंबलंस्त्रैणंदेवयानंविभूषणम्
पारिजातमयीमालानृत्यंगीतंतयोःसमम् १६१
इतिदृष्टंहिमाहात्म्यंक्षेत्रस्यकथमुच्यते
माघःसितासितेविप्रराजसूयैःसमोमतः १६२
धनुस्त्रिशतविस्तीर्णेसितनीलांबुसंगमे
अपुनरावृत्तिर्माघीराजसूयीपुनर्भवेत् १६३
माघमासीयवातोऽपिसितासितजलंस्पृशेत्
अधर्म्यंनस्पृशेन्नूनंमहापातकहाहिसः १६४
किमत्रबहुनोक्तेनश्रूयतांद्विजनिश्चितम्
समुद्भूतफलंपापंतीर्थेमाघःप्रणाशयेत् १६५
अत्रतेकथयिष्यामिसावधानमतिःशृणु
र्पिशाचमोचनंनामइतिहासंपुरातनम्
शृण्वंत्यप्सरसोबालाःशृणोतुत्वत्सुतस्तथा
मत्प्रसादात्स्मृतिर्लब्ध्वापैशाच्यान्मुक्तिकामिनः १
पुरादेवद्युतिर्विप्रोवैष्णवोवेदपारगः १६६
पिशाचान्मोचयामासकरुणाप्लुतमानसः १६७
दिलीपउवाच
कुत्रस्थितःकस्यपुत्रोनियमःकोऽस्यवाजपः
केनवावैष्णवोवृत्तःकेपिशाचाश्चमोचिताः १६८
एतद्विस्तरतःसर्वंकीर्तयस्वमहामुने
कौतूहलंमहापुण्यंशृणुमस्त्वत्प्रसादतः १६९
वसिष्ठउवाच
प्लक्षप्रस्रवणेपुण्येसरस्वत्यास्तटेशुभे

तत्राश्रमपदंतस्यशैलमाश्रित्यशोभनम् १७०
शालैस्तालैस्तमालैश्चबिल्वैर्बकुलपाटलैः
तिंतिडीचिरिबिल्वैश्चचूतचंपककांचनैः १७१
करंजैःकोविदारैश्चकेसरैःकुंजराशनैः
तिलकैःकर्णिकारैश्चकुंभैःखादिरतिंदुकैः १७२
वानीरैःसाल्वजंबीरैःपीलूदुंबरवेतसैः
शाकोटैरटरूषैश्चकरहाटैर्वटद्रुमैः १७३
घोंटाकुटजपालाशैरशोकैःशोकहारिभिः
जंबूनिंबकदंबैश्चद्मीरिकाकरमर्दकैः १७४
बीजपूरैःसनारिंगैरंभाराजिविराजितैः
पनसैरसवद्भिश्चनारिकेलैःसदाफलैः १७५
सप्तच्छदैस्त्रिपत्रैश्चशिरीषामलकैःशुभैः
कर्कंधूलकुचैरद्मैःपारिभद्रैर्वचादिभिः १७६
केतकैःसिंदुवारैश्चतगरैःकुन्दमल्लिकैः
पद्मेन्दीवरकह्लारमालतीयूथिकादिभिः १७७
मालतीमोगरैश्चैवजातीफलविराजितैः
पुन्नागैःकिंशुकैश्चैवबर्वरीतुलसीद्रुमैः १७८
ऋाश्रमोरमणीयःसद्रुमैर्नानाविधैर्नृप
वनमध्येनदीयातिपुरायतोयासरस्वती १७९
कूजंतिसारसास्तत्रमदस्निग्धकलंसदा
नदंतिकोकिलाःशब्दंगुंजंतिचमधुव्रताः १८०
बहुकोलाहलंभूपतद्वनंशुकसारिभिः
चरंतिश्वापदास्तत्रविविधाःकाननोत्तमे १८१
सदाफलंसदापुष्पंपरागकराधूसरम्
ऋाच्छन्नंकाननंसर्वंमधुवृद्मैःसमंततः १८२
नवपल्लवसंजातमंजरीभरवल्लिभिः
ऋाश्लिष्टमभितोरम्यंप्रियाभिरिववल्लभः १८३
तस्यशापभयात्त्रस्तोवातोवातिसमंततः
नवर्षंत्यश्मभिर्मेघानशोषयतिभास्करः १८४
वनंनोपद्रवंतद्धिसदासिद्धनिषेवितम्

आह्लादजनकंनित्यंवनंचैत्ररथंयथा १८५
तस्मिन्वसतिधर्मात्मादेवद्युतिर्द्विजोत्तमः
पुत्रःसुमित्रोविप्रस्यलब्धोलक्ष्मीपतेर्वरात् १८६
नियमःश्रूयतांतस्यसर्वदानियतात्मनः
ग्रीष्मेपंचतपानित्यंसूर्यन्यस्तविलोचनः १८७
वर्षत्कादंबिनीयावद्वर्षास्वभ्रावकाशगः
वातेप्रवातेनिष्कंपोदुःसहोहिमवानिव १८८
वसत्यप्सुसहेमंतेह्रदेसारस्वतेद्विज
उपस्पृशतिकालेसत्रिवारंवारिनिर्मलम् १८९
पितॄन्देवानृषीन्नित्यंसंतर्पयतिश्रद्धया
ब्रह्मयज्ञपरोनित्यंसत्यवादीजितेंद्रियः १९०
भूमौविश्राम्यविश्रातःप्रदध्यौप्रार्थयन्हरिम्
वन्यैर्जुहोत्यग्निहोत्रंश्रद्धयातिथिपूजकः १९१
चांद्रायणविधानेनकालंनयतिसर्वदा
स्वयंविगलितैःपत्रैःफलैर्वृत्तिंसमीहते १९२
अनुद्विग्नस्तपोनिष्ठोवेदवेदांगपारगः
धमनीविकरालोसावस्थिमात्रकलेवरः १९३
इत्थंजगामवर्षाणांसहस्रंतस्यकानने
तदाजज्वालशैलोऽसौतपसस्तस्यतेजसा १९४
सोढुंनशक्यतेभूतैस्तेजस्तस्यमहात्मनः
वैश्वानरइवाभातिप्रज्वलंस्तपसाद्विज १९५
गतवैराणिभूतानिसमजायंततद्वने
मृगव्याघ्राखुमार्जारामिथःक्रीडंतिनिर्भयाः १९६
अन्योऽपिनियमस्तस्यश्रूयतामतिदुर्लभः
नारायणंत्रिकालंससंपूजयतिनित्यशः १९७
पुष्पाणांतुसहस्रेणविकचेनसुगंधिना
वेदसूक्तविधानेनविष्णुध्यानपरायणः १९८
विष्णोःसंप्रीतयेविप्रःकुरुतेकर्मचाखिलम्
दधीचेर्वरदानात्ससंजातोवरवैष्णवः १९९
एकदामासिवैशाखेएकादश्यांमहामुनिः

पूजांकृत्वाहरेरम्यांविचित्रामकरोत्स्तुतिम् २००
तदैवखगमारुह्यदेवोदेवोहरिःस्वयम्
आजगामपुरस्तस्यतयास्तुत्यातिहर्षितः २०१
तंदृष्ट्वागरुडारूढंप्रत्यक्षंजलदच्छविम्
चतुर्बाहुंविशालाक्षंसर्वालंकारभूषितम् २०२
उद्भूतपुलकोविप्रःसानंदजललोचनः
जगामशिरसाभूमौकृतकृत्यमनास्तदा २०३
ननमौतेनहर्षेणसब्रह्मांडोदरेऽपिहि
नसस्मारनिजंदेहंब्रह्मभूतइवाभवत् २०४
ततःसंभाषितःप्रीत्याहरिणावैष्णवोमुनिः
देवद्युतेविजानामिमद्भक्तस्त्वंमदाश्रयः २०५
संन्यस्ताखिलकर्मासिमद्भावोमन्मनाःसदा
वरंब्रूहिप्रसन्नोऽस्मिस्तोत्रेणानेनचानघ २०६
इतिश्रुत्वाहरेर्वाक्यंप्रत्युवाचसतापसः
देवदेवारविंदाक्षस्वमायाधृतविग्रह २०७
त्वद्दर्शनात्सदादेवदुर्लभोनापरोवरः
ब्रह्मादयःसुराःसर्वेयोगिनःसनकादयः २०८
त्वांसाक्षात्कर्तुमिच्छंतिसिद्धाश्चकपिलादयः
अहंममेतिपाशायेमोहलोभाःशुभाशुभाः २०९
सहेतुकाश्चदह्यंतेदृष्टेत्वयिपरावरे
जन्मनःकर्मणोबुद्धेराविर्भूतंफलंमम २१०
यदृष्टोऽसिजगन्नाथप्रार्थयेकिमतःपरम्
नवरार्थंहिदेवेशत्वत्पादपंकजंहृदि २११
चिंतयामिसदाभक्त्यात्वद्गतेनांतरात्मना
इममेववरंयाचेत्वद्भक्तिरचलामम २१२
अस्तुवैकमलानाथप्रार्थयेनापरंवरम्
इतिश्रुत्वावचस्तस्यप्रसन्नवदनोहरिः २१३
प्रत्युवाचप्रसन्नात्माएवमस्तुद्विजोत्तम
अन्यस्तेतपसःकश्चित्प्रत्यूहोनभविष्यति २१४
एतच्चत्वत्कृतंस्तोत्रंयेपठिष्यंतिमानवाः

तेषांमद्विषयाभक्तिर्निश्चलाचभविष्यति २१५
धर्मकार्यंचयत्किंचित्सांगंसर्वंभविष्यति
ज्ञानेचपरमानिष्ठातेषांस्थास्यतिनिश्चला २१६
इत्युक्त्वांतर्हितस्तत्रदेवदेवोजनार्दनः
देवद्युतिस्तदारभ्यनारायणपरोऽभवत् २१७
दिलीपउवाच
महर्षेऽनुगृहीतोऽस्मिकथयापावनीकृतः
अनयाविष्णुसंगत्यागंगयेवाहमद्यवै २१८
किंतत्स्तोत्रंसमाख्याहिप्रसन्नोयेनमाधवः
तस्यानघस्यविप्रस्यमहत्कौतूहलंमम २१९
त्वत्प्रसादादहंविप्रमन्येप्राप्तंमनोरथम्
महतांसंगतिःकस्यमहत्त्वायनकल्पते २२०
कथयस्वप्रसादेनविष्णोस्तोत्रमनुत्तमम्
येनतुष्टःसभगवान्ददौतस्यचदर्शनम् २२१
वसिष्ठउवाच
कथयामिरहस्यंतेयज्जप्तंस्तोत्रमुत्तमम्
प्राग्गृहीतंसुपर्णेनगरुडान्मयिचागतम् २२२
अध्यात्मगर्भसारंतन्महोदयकरंशुभम्
सर्वपापहरंभूपस्वात्मज्ञानकरंपरम् २२३
ओंनमोवासुदेवायनमोविश्वायचक्रिणे
भक्तप्रियायकृष्णायजगन्नाथायशार्ङ्गिणे २२४
स्तोतास्तुत्यःस्तुतिःसर्वंजगद्विष्णुमयंयदा
तदासंस्तूयतेकेनभक्तिर्मोदकरीनृणाम् २२५
यस्यदेवस्यनिःश्वासोवेदाःसांगाःससूत्रकाः
कास्तुतिःप्रमुदेतस्यभक्त्याऽहमुखरोऽभवम् २२६
चक्रवद्भ्रमतेसर्वंत्रैलोक्यंसचराचरम्
अतस्त्वंगीयतेदेवचक्रपाणिवरायुध २२७
वेदोनवक्तियंसाक्षान्नचवाग्वेत्तिनोमनः
मद्विधस्तंकथंस्तौतिभक्तिमान्वाकथंभवेत् २२८
ब्रह्मादिब्रह्मविष्णुस्त्वंत्वमेवसकलाश्रयः

स्रष्टाब्रह्मनिदानंचशुद्धंब्रह्मत्वमेवच २२६
कोऽयकायस्तवविभोभित्त्वास्पृशतिकायिनम्
कायदोषैर्नचाघ्रातस्तस्मैनमोस्तुयोगिने १९
देवभावेनजागर्तिननिद्रातिनिजात्मनि
सुखसंदोहबुद्धिर्यासात्वंविष्णोनसंशयः २३०
महदादयोमहाभावास्तथावैकारिकागुणाः
त्वमेवनाथतत्सर्वंनानात्वंमूढकल्पना २३१
केशकेशवरूपाभिःकल्पनातिसृभिस्तथा
त्वमेवकल्पसेब्रह्मपुमानिवसुतादिभिः २३२
विदोषंविगुणंचैकंचिन्मूर्तिरखिलंजगत्
कवीनांभातियत्तत्त्वंतंविष्णुंनौमिनिर्मलम् २३३
यस्यज्ञानेनकुर्वंतिकर्मापिश्रुतिभाषितम्
निरीषणाजगन्मित्राःशुद्धंब्रह्मनमामितत् २३४
ध्वस्तेतरच्चसन्मात्रंयत्प्रबोधादुपासते
योगिनःसर्वभूतेषुसद्रूपंनौमितंहरिम् २३५
ब्रह्माहमितिगायंतियंज्ञात्वैकंवराद्विजाः
पश्यंतोहित्वयातुल्यंदेवतंनौमिमाधवम् २३६
माययामोहवैचित्र्यंतथाहंममतांनृणाम्
योनाशयतिपापौघान्नमस्तस्मैचिदात्मने २३७
प्रयाणेवाप्रयाणेचयन्नामस्मरतांनृणाम्
सद्योनश्यंतिपापौघानमस्तस्मैचिदात्मने २३८
मोहानललसज्ज्वालाज्वलल्लोकेषुसर्वदा
यत्पादांभोरुहच्छायांप्रविष्टश्चनदह्यते २३९
यस्यस्मरणमात्रेणनमोहोनैवदुर्गतिः
नरोगानैवदुःखानितमनंतंनमाम्यहम् २४०
कामयंतेप्रजानैवधिषणाभ्यःसमुत्थिताः
लोकमात्मैवपश्यंतियंबुद्धैकचराजनाः २४१
शब्दार्थःसंविदर्थश्चविष्णोर्नामपरोयदि
सत्येनतेनसंसारोमासंस्पृशतुमाधव २४२
नारायणोजगद्व्यापीयदिवेदादिसंमतः

सत्येनतेननिर्विघ्नाविष्णुभक्तिर्ममास्तुवै २४३
योनबीजंविनाबीजंबीजेयोबीजभावितः
सविष्णुर्भवबीजंमेसितविद्यासिनाद्यतु २४४
त्रितनुर्नटवद्यस्तुसृष्टिस्थितिलयेषुच
गुणैर्भवतिकार्येषुसप्रसीदतुमेहरिः २४५
दशधेहाऽवतीर्णोयोधर्मत्राणायकेवलम्
अभ्यर्थितःसुरैःसर्वैःसप्रसीदतुमेहरिः २४६
ब्रह्मादिस्तंबपर्यंतंप्राणिहृन्मंदिरेऽमलः
एकोवसतियोदेवःसप्रसीदतुमेहरिः २४७
इच्छांचक्रेसदेवाग्रेएकश्चैवबहुस्तथा
प्रविष्टोदेवताःस्रष्टासप्रसीदतुमेहरिः २४८
हृत्खगःखसमःखादिःखातीतःखक्रियःखगः
खंब्रह्माखादिभुक्चांतेखमूर्तिस्त्वंमखाशनः २४९
यद्भासायन्मुदायस्यमाययासज्यतेजगत्
जाडयंदुःखमसत्यंचसभवानेवतन्मयः २५०
त्वत्सृष्टंमोदतेविश्वंत्वत्त्यक्तमशुचिर्भवेत्
तत्संगतोऽप्यसंगस्त्वंविकारस्तेनतेनहि २५१
भूतयोगजचैतन्यंचार्वाकायमुपासते
सौगताब्रवतेतर्कैस्त्वांबुद्धिंक्षणभंगुराम् २५२
शरीरपरिमाणंत्वांमन्यंतेजिनदेवताः
ध्यायंतिपुरुषंसांख्यास्त्वामेवप्रकृतेःपरम् २५३
जन्मादिरहितःपूर्वंयःस्यादानंदलक्षणम्
त्वामेवोपनिषद्ब्रह्मचिंतयंतिपरस्परम् २५४
खादिभूतानिदेहश्चमनोबुद्धींद्रियाणिच
विद्याविद्येत्वमेवात्रनान्यत्त्वत्तोऽस्तिकिंचन २५५
त्वंधातासर्वभूतानांत्वमेवशरणंमम
त्वमग्निस्त्वंहविःशक्रोहोतामंत्रःक्रियाफलम् २५६
त्वमस्तिनास्तिवैकुंठत्वामहंशरणंगतः
त्वंकर्मफलदाताचदीक्षितानांक्रियाफलम् २५७
त्वंहेतुःसर्वभूतानांत्वमेवशरणंमम

युवतीनांयथायूनियूनांचयुवतौयथा २५८
मनोऽभिरमतेतद्वत्प्रीतिर्मेरमतांत्वयि
अपिपापंदुराचारंनरंत्वत्प्रणतंहरे २५९
नेक्षंतेकिंकरायाम्याउलूकास्तपनंयथा
तापत्रयमघौघश्चतावत्पीडयतेजनम् २६०
यावत्स्मरतिनोनाथभक्त्यात्वत्पादपंकजम् २६१
यंनस्पृशंतिगुणजातिशरीरधर्मायंनस्पृशंतिगतयस्त्वखिलेंद्रियाणाम्
यंचस्पृशंतिमुनयोगतसंगमोहास्तस्मैनमोभगवतेहरयेकरोमि २६२
स्थूलंविलाप्यकरणेकरणंनिदानेतत्कारणंकरणकारणवर्जितेच
इत्थंविलाप्यमुनयःप्रविशंतितत्रतस्मैनमोस्तुहरयेमुनिसेविताय २६३
यद्ध्यानसंवहनघूर्णवशीकृतांतामैश्वर्यचारुगुणिनींसुखमोक्षलक्ष्मीम्
आलिंग्यशेरतइहात्मसुखैकभाजस्तस्मैनमोऽस्तुहरयेमुनिसेविताय २६४
जन्मादिभावविकृतेर्विरहस्वभावेयस्मिन्नयंपरिधुनोतिषडूर्मिवर्गः
यंतापयंतिनसदामदनादिदोषास्तंवासुदेवममलंप्रणतोऽस्मिहार्दम् २६५
यद्ध्यानसंगतमलंविजहात्यविद्यांयद्ध्यानवह्निपतितंजगदेतिनाशम्
यज्ज्ञानमुल्लसदसिद्यतिसंशयारिंतंत्वांहरिंविंशदिबोधघनंनमामि २६६
चराचराणिभूतानिसर्वाणिचहरेर्वशे
यथात्रतेनसत्येनपुरस्तिष्ठतुमेहरिः २६७
यथानारायणःसर्वंजगत्स्थावरजंगमम्
तेनसत्येनमेरूपंप्रदर्शयतुकेशवः २६८
भक्तिर्यथाहरौमेऽस्तितद्वरिष्ठागुरौयदि
ममास्तितेनसत्येनस्वंदर्शयतुकेशवः २६९
तस्यैवंशपथैःसत्यैर्भक्तिंतस्यानुचिंतयन्
दर्शयामासचात्मानंसप्रीतःपुरुषोत्तमः २७०
ततोदत्त्वावरंतस्यपूरयित्वामनोरथम्
जगामकमलाकांतःस्तुत्याविप्रेणतोषितः २७१
कृतकृत्योद्विजःसोऽपिवासुदेवपरायणः
शिष्यैःसार्धंजपन्स्तोत्रंतस्मिन्नास्तेतपोवने २७२
कीर्तयेद्यइदंस्तोत्रंशृणुयाद्योऽपिमानवः
अश्वमेधस्ययज्ञस्यप्राप्नोतिविपुलंफलम् २७३

आत्मविद्याप्रबोधंचलभतेब्राह्मणःसदा
नपापेजायतेबुद्धिर्नैवपश्यत्यमंगलम् २७४
बुद्धिस्वास्थ्यंमनःस्वास्थ्यंस्वास्थ्यमैंद्रियकंतथा
नृणांभवतिसर्वेषामस्यस्तोत्रस्यकीर्तनात् २७५
विचार्यार्थंजपेद्यस्तुश्रद्धयातत्परोनरः
सविधूयेहपापानिलभतेवैष्णवंपदम् २७६
लभतेवांच्छितान्कामान्पुत्रपौत्रान्पशूंस्तथा
दीर्घमायुर्बलंवीर्यंलभतेससदापठन् २७७
तिलपात्रसहस्रेणगोसहस्रेणयत्फलम्
तत्फलंसमवाप्नोतियइमांकीर्तयेत्स्तुतिम् २७८
धर्मार्थकाममोक्षाणांयंयंकामयतेसदा
अचिरात्तमवाप्नोतिस्तोत्रेणानेनमानवः २७९
आचारेविनयेधर्मेज्ञानेतपसिसन्नये
नृणांभवतिनित्यंधीरिमांसंशृणवतांस्तुतिम् २८०
महापातकयुक्तोवायुक्तोवाह्युपपातकैः
सद्योभवतिशुद्धात्मास्तोत्रस्यपठनात्सकृत् २८१
प्रज्ञालक्ष्मीर्यशःकीर्तिर्ज्ञानधर्मविवर्धनम्
दुष्टग्रहोपशमनंसर्वाशुभविनाशनम् २८२
सर्वव्याधिहरंपथ्यंसर्वारिष्टनिषूदनम्
दुर्गतेस्तरणंस्तोत्रंपठितव्यंद्विजातिभिः २८३
नक्षत्रग्रहापीडासुराजचोरभयेषुच
अग्निचोरनिपातेषुसद्यःसंकीर्तयेदिदम् २८४
सिंहव्याघ्रभयंनास्तिनाभिचारभयंतथा
भूतप्रेतपिशाचेभ्योराक्षसेभ्यस्तथैवच २८५
पूतनाजृंभकेभ्यश्चविघ्नेभ्यश्चैवसर्वदा
नृणांक्वचिद्भयंनास्तिस्तवेह्यस्मिन्प्रकीर्तिते २८६
वासुदेवस्यपूजांयःकृत्वास्तोत्रमुदीरयेत्
लिप्यतेपातकैर्नासौपद्मपत्रमिवांभसा २८७
गंगादिपूण्यतीर्थेषुयास्नानैर्नाप्यतेगतिः
तांगतिंसमवाप्नोतिपठन्पुण्यामिमांस्तुतिम् २८८

एककालंद्विकालंवात्रिकालंवापियःपठेत्
सर्वदासर्वकालेषुसोऽद्मयंसुखमश्नुते २८९
चतुर्णामपिवेदानांत्रिरावृत्त्याचयत्फलम्
तत्फलंलभतेस्तोत्रमधीयानःसकृन्नरः २९०
अद्मय्यंधनमाप्नोतिस्त्रीणांभवतिवल्लभः
पूजांविंदतिलोकेऽस्मिच्छ्रद्धयासंस्मरन्हरीम् २९१
सर्वदासंपदायुक्तोविपदं नैवगच्छति
गोभिर्नह्रियतेस्तोत्रंनित्यंयःकीर्तयेद्धियत् २९२
अलद्मीकालकर्णीचदुःस्वप्नंदुर्विचिंतितम्
सद्योनश्यंतिभक्तानामेतंसंश्रृरावतांस्तवम् २९३
प्रातरुत्थाययोऽधीतेशुचिर्विष्णुपरायणः
अद्मय्यंलभतेसौख्यमिहलोकेपरत्रच २९४
देवद्युतिप्रणीतंवैविष्णुप्रीतिकरंशुभम्
विष्णुप्रसादजननंविष्णुदर्शनकारकम् २९५
योगसारमिदंनामस्तोत्रंपरमपावनम्
यःपठेत्सततंभक्त्याविष्णुलोकंसगच्छति २९६
इतितेकथितंस्तोत्रंगुह्यंपापप्रणाशनम्
अतऊर्ध्वंप्रवद्मयामिपिशाचस्यविमोचनम् २९७

इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहिता
यामुत्तरखंडेमाघमाहात्म्येवसिष्ठदिलीपसंवादे
योगसारस्तोत्रकथनंनामअष्टाविंशत्यधिकशततमोऽध्यायः १२८

एकोनत्रिंशाधिक शततमोऽध्यायः

वसिष्ठउवाच
श्रूयतांयेपिशाचाश्चमोचितास्तेनतद्वने
आसीद्राजाचित्रनामाद्राविडेविषयेपुरा १
सोमान्वयेमहावीरःशूरःशस्त्रास्त्रपारगः
गजवाजिरथौघैश्चसंपन्नोविक्रमीसदा २
स्वर्णैर्नानाविधैरत्नैःपूर्णकोशोमहाधनः
मध्येनारीसहस्त्रस्यसदाक्रीडतितत्परः ३

स्त्रैणःकामीसदालुब्धश्चंडकोपःसपार्थिवः
नकरोतिवचोधर्म्यंसचिवैःसमुदीरितम् ४
विष्णुंनिंदतिसोऽत्यर्थंवैष्णवान्द्वेष्टिसर्वदा
कोऽसौविष्णुःक्वदृष्टोऽसौक्वचास्तेकेनकीर्त्यते ५
इत्थंनसहतेविष्णुंसराजादैवमोहितः
नारायणंभजंतेयेतान्पीडयतिकोऽपितः ६
नब्राह्मणान्नवेदांश्चवैदिकंकर्मनव्रतम्
नदानंमन्यतेदातुंपाखंडस्थितिसंस्थितः ७
अनीत्याचंडदंडैश्चप्रजापीडांकरोतिसः
निष्ठुरोनिर्दयःक्रूरःपुण्यकार्यपराङ्मुखः ८
च्युताचारोऽच्युतद्वेष्टाच्युताग्निश्चच्युतक्रियः
सोऽनुशास्तिजनंभूपःकालरूपइवापरः ९
ततोबहुतिथेकालेसराजापंचतांगतः
वैदिकेनविधानेनलेभेनैवोर्ध्व दैहिकम् १०
अथकिंकरयूथेनपीड्यमानोभृशंतदा
अयःकीलमयेमार्गेतप्तसिक्ताप्रपूरिते ११
चंडार्करश्मिसंतप्तेवृक्षच्छायाविवर्जिते
तप्तांगारप्रकीर्णेचवह्निज्वालासमाकुले १२
लोहतुंडैश्चकाकोलैर्हन्यमानःसुदारुणैः
वृकैर्दंष्ट्राकरालैश्चश्वभिर्घोरैश्चभक्षितः १३
शृण्वन्क्रंदितमन्येषांनृणांकिल्बिषकारिणाम्
जगामपार्थिवोलोकमंतकस्यभयावहम् १४
शृणुभूपगतिंतस्यतस्मिँल्लोकेसुदुःसहाम्
निरयान्निरयंयातःपर्यायेणसभूपतिः १५
आदौप्रयातस्तामिस्रेदारुणेभूरिदुःखदे
पुनश्चैवांधतामिस्रेयत्रदुःखंनिरंतरम् १६
गतोऽनतरमत्युग्रंमहारौरवरौरवम्
नरकंकालसूत्रंचमहानरकमेवच १७
पश्चान्मग्नःसभूपालोदुस्तरेदुःखमूर्छितः
संजीवनेमहावीचौतापनेसंप्रतापने १८

प्रतापनरकंराजादुःखाग्निप्लुष्टमानसः
संपातंचसकाकोलंकुड्मलंपूतिमृत्तिकम् १९
लोहशंकुंमृगीयंत्रंपंथानंशाल्मलिनदीम्
प्रविष्टोऽथमहाभीमंदुर्दर्शंदुर्गमंपुनः २०
असिपत्रवनंचैवलोहचारकमेवच
एवमेतेषुसर्वेषुपतित्वापापकृन्नृपः २१
अविंदन्नरकेघोरेसंतापंयातनामयम्
विष्णुप्रद्वेषघोषेणयुगानामेकविंशतिः २२
भुक्त्वाचयातनांयाम्यांनिस्तीर्णनरकोनृपः
समयाद्गिरिराजेतुपिशाचोऽभूत्तदामहान् २३
सभ्राम्यतिदिशःसर्वावनेतस्मिन्बुभुक्षितः
नपश्यत्यशनंतोयंमेरावपिसदागिरौ २४
कदाचित्पर्यटन्सोऽथपिशाचःशोकपीडितः
प्लक्षप्रस्रवणारण्यंप्रविष्टोभाविसत्फलम् २५
बिभीतकतरुच्छायांसमाश्रित्यसुदुःखितः
हाहतोऽस्मीतिचाक्रंदद्घोरमुच्चैःपुनःपुनः २६
क्षुत्तृड्भ्यांमुह्यमानस्यसर्वभूतद्रुहोमम
जन्मनोस्यदुरंतस्यकथमंतोभविष्यति २७
आदौपापसमुद्रेऽस्मिन्दुःखकल्लोलमालिनी
करावलंबनंकोद्यनिमग्नस्यप्रदास्यति २८
इत्थंतस्यपिशाचस्यरोदनंदीनचेतसः
देवद्युतिरधीयानःशुश्रावकरुणामयम् २९
समागम्यततस्तत्रतंपिशाचंददर्शसः
विकरालमुखंभीमंपिशंगनयनंकृशम् ३०
ऊर्ध्वमूर्धजकृष्णांगंयमदूतमिवापरम्
ललज्जिह्वंचलंबोष्ठदीर्घजंघंशिराकुलम् ३१
दीर्घांघ्रिंशुष्कतुंडंचगर्ताक्षंशुष्कपंजरम्
अथामुंकौतुकाविष्टःपप्रच्छमुनिपुंगवः ३२
देवद्युतिवाच
कोऽसित्वंभीषणाकारःकुतोरोदिषिदारुणम्

अवस्थेयंकुतोब्रूहिकिंचाहंकरवाणिते ३३
ममाश्रमप्रविष्टाहिदुःखभाजोनजंतवः
मोदंतेकेवलंसर्वेवैष्णवेभवनेयथा ३४
वदत्वंसत्वरंभद्रदुःखस्यैतस्यकारणम्
कालक्षेपंनकुर्वंतिप्राप्तेऽर्थेहिमनीषिणः ३५
वसिष्ठउवाच
श्रुत्वैतद्वचनंप्रीतःपिशाचस्त्यक्तरोदनः
उवाचदीनयावाचाप्रश्रयावनतस्तदा ३६
पिशाचउवाच
सर्वांगव्यापिसंतापंजहारत्वद्वचोमयि
ग्रीष्मेदावानलोद्भूतंवर्षन्मेघइवाचले ३७
यन्मेऽस्तिसुकृतंकिंचित्तेनदृष्टोऽसिमेद्विज
नह्यसंचितपुण्यानांसद्भिरेकत्रसंगमः ३८
इत्युक्त्वाकथयामासपूर्ववृत्तांतमात्मनः
विष्णुद्वेषप्रदोषेणदशामेतामहंगतः ३९
यन्नामप्राणान्मुक्तोहिस्मृत्वाविष्णुपदंव्रजेत्
पापिष्ठोहिहरौतस्मिन्ममद्वेषोऽभवद्द्विज ४०
यःपालयतिभूतानिधर्मंयातिजगत्त्रये
योंऽतरात्माचभूतानांतस्मिन्द्वेषोममाभवत् ४१
कर्मणांफलदोयोऽत्रसर्ववेदेषुगीयते
तपोभिरिज्यतेविप्रैःसमद्वेषवशंगतः ४२
त्यक्तक्रियैःप्रियारण्यैर्निःसंगैकचरैश्चयः
वेदांतेयतिभिश्चिंत्यःसमेद्वेषीहरिर्द्विज ४३
ब्रह्मादयःसुराःसर्वेयोगिनःसनकादयः
मुक्तयर्थमर्चयंतीहसविष्णुर्द्वेषितोमया ४४
आदौमध्येऽवसानेयोविश्वधातासनातनः
यस्यनैवादिमध्यांताःसमेद्वेषपदंययौ ४५
यन्मयासुकृतंकर्मकृतंप्राक्तनजन्मनि
विष्णुद्वेषाग्निनादग्धंतत्सर्वंभस्मसादभूत् ४६
कथंचिदस्यपापस्यसीमांद्रक्ष्यामिचेदहम्

मुक्त्वानारायणंनान्यमर्चयिष्यामिदेवताम् ४७
विष्णुद्वेषाच्चिरंभुक्त्वामयानरकयातनाम्
निरयान्निसृतःसोऽह पैशाचींयोनिमागतः ४८
अधुनाकर्ममंत्रैःकैरथानीतस्त्वदाश्रमम्
यत्रत्वद्दर्शनार्कान्मेनष्टंदुःखमयंतमः ४९
प्राप्यतेमरणंयत्रबंधनंश्रीःसुखंवधूः
सतत्रनीयतेस्वेनकर्मणागलहस्तिना ५०
इदानीमुचितंकर्मब्रूहिपैशाच्यनाशनम्
परोपकारकार्येहिनधन्यामंदगामिनः ५१
देवद्युतिरुवाच
अहोमुष्णातिमायेयंदेवासुरनृणांस्मृतिम्
ययादेवेष्वपिद्वेषोजायतेधर्मनाशनः ५२
स्रष्टापालयिताहंताजगतांयोमहेश्वरः
आत्माचसर्वभूतानांतंमूढोद्वेष्टिकःकथम् ५३
भवंतिसर्वकर्माणिसफलानियदर्पणात्
तद्भक्तिविमुखोमर्त्यःकोनयातीहदुर्गतिम् ५४
श्रुतिस्मृतिसदाचारविहितंकर्मकेवलम्
सेवितव्यंचतुर्वर्णैर्भजन्नारायणंसदा ५५
अन्यथानिरयंयांतिविनाह्यागमसेवनात्
अतोवेदविरुद्धार्थंशास्त्रोक्तंकर्मसंत्यजेत् ५६
स्वबुद्धिरचितैःशास्त्रैःप्रतार्येहतुबालिशान्
विघ्नंतिश्रेयसोमार्गंलोकनाशायकेवलम् ५७
विष्णुंनिंदंतिवेदांश्चतपोनिंदंतिसद्विजान्
तेनतेनरकंयांतिह्यसच्छास्त्रनिषेवणात् ५८
अयमेवयथाराजाद्रविडोनिरयंगतः
द्विषन्नारायणंदेवंदेवदेवंजगत्प्रभुम् ५९
तस्माद्द्वेषंहिदेवेषुब्राह्मणेषुविशेषतः
संत्यजेत्पुण्यकामोऽत्रवेदबाह्यांक्रियात्यजेत् ६०
इत्युक्त्वाकथयामासपिशाचायहितंमुनिः
प्रयागंगच्छभोभद्रमाघमासंविचारय ६१

यत्रतेनिश्चितामुक्तिःपैशाच्यान्नात्रसंशयः
तत्राप्लुतादिवंयांतिश्रुतिरेषासनातनी ६२
विजहातिनरस्तत्रप्राक्तनंकर्मदुष्कृतम्
प्रयागस्नानतोनास्तिक्वाप्यन्यदधिकंपरम् ६३
प्रायश्चित्तंतपोरूपंदानरूपंक्रियात्मकम्
यागयोगाधिकंविद्धिप्रयागंपापिनामपि ६४
स्वर्गापवर्गयोर्द्वारंतत्पृथिव्यामपावृतम्
सितासितोदवेणीयातांहित्वाभुविनापरा ६५
पापनैगडबद्धस्यछेदनैककुठारिका
क्वविष्णुःसूर्यतेजोऽग्निर्गंगायामुनसंगमः ६६
क्ववराकीनृणांतुच्छापापराशितृणाहुतिः
मलीमसघनध्वंसेयथाशरदिचंद्रमाः ६७
भातिपापक्षयादूर्ध्वंनरोवेणीजलाप्लुतः
सितासितस्यमाहात्म्यमहंवक्तुंनतेक्षमः ६८
यत्तोयकणसंस्पृष्टोमुक्तःकेरलकोद्विजः
इतिवाक्यमृषेःश्रुत्वापिशाचस्तुष्टमानसः ६९
मुक्तदुःखइवप्रीतःपप्रच्छप्रणयान्मुनिम्
कथंकेरलदेशीयोद्विजोमुक्तोमहामुने ७०
एतंकथयवृत्तांतंसंश्रित्यकरुणांमयि ७१
देवद्युतिरुवाच
पिशाचश्रृणुपुण्यांमेकथांकथयतःशुभाम्
केरलेवसुनामात्रब्राह्मणोवेदपारगः ७२
दायादैर्हृतवित्तस्तुनिर्धनोबंधुवर्जितः
जन्मभूमिंपरित्यज्यमहादुःखेनदुःखितः ७३
देशाद्देशंपरिभ्राम्यकालेनमहतापुनः
प्रविश्यसमहारण्यमीषद्व्याधिप्रपीडितः ७४
गच्छंस्तीर्थांतरंश्रांतःक्षुत्क्षामोविंध्यपर्वते
दुर्भिक्षेणमृतिंलेभेनदाहंचौर्ध्वदेहिकम् ७५
तेनकर्मविपाकेनतत्रैवगिरिगह्वरे
प्रेतीभूतश्चिरंकालमुवासनिर्जनेवने ७६

शीतातपपरिक्लिष्टोनिराहारोनिरूदकः
दिगंबरोव्युपानत्कोगिराहाहेतितिनिःश्वसन् ७७
इतस्ततःपरिभ्राम्यवायुभूतःसकेरलः
द्विजोनशरणंलेभेनसुखंकुत्रचित्तदा ७८
संशोचतिस्मदुःखार्तोनैवपश्यतिसद्गतिम्
सर्वदादत्तदानंसभुंक्तेस्वंकर्मणःफलम् ७९
हविर्जुह्वतिनाग्नौयेगोविंदंनार्चयंतिये
भजंतेनात्मविद्यांयेसुतीर्थविमुखाश्चये ८०
सुवर्णवस्त्रतांबूलंमणिमन्नंफलंजलम्
आर्तेभ्योनप्रयच्छंतिसर्वेतेकृतहीनकाः ८१
ब्रह्मस्वंचपरस्वंचस्त्रीधनानिहरंतिये
बलेनछद्मनावापिधूर्ताश्चपरवंचकाः ८२
दांभिकःकुहकाश्चौरायेचपावकवृत्तयः
बालवृद्धातुरस्त्रीषुनिर्दयाःसत्यवर्जिताः ८३
अग्निदागरदायेचयेचान्येकूटसाक्षिणः
अगम्यागामिनःसर्वेयेचान्येग्रामयाजिनः ८४
पितृमातृस्नुषापत्यस्वदारत्यागिनश्चये
येकदर्याश्चलुब्धाश्चनास्तिकाधर्मदूषकाः ८५
त्यजंतिस्वामिनंयुद्धेत्यजंतिशरणागतम्
गवांभूमेश्चहंतारोयेचान्येरत्नदूषकाः ८६
परापवादिनःपापादेवतागुरुनिंदकाः
महाक्षेत्रेषुसर्वेषुप्रतिग्रहरताश्चये ८७
परद्रोहरतायेचयथाचप्राणिहिंसकाः
कुप्रतिग्राहिणःसर्वेतेभवंतिपुनःपुनः ८८
प्रेतराक्षसपैशाचतिर्यग्वृक्षकुयोनिषु
नतेषांसुखलेशोऽस्तिइहलोकेपरत्रच ८९
तस्मात्त्यक्त्वानिषिद्धार्थंविहितंकर्मचाचरेत्
यज्ञंदानंतपस्तीर्थंमंत्रंदेवंगुरुंभजेत् ९०
विपाकंकर्मणांदृष्ट्वायोनिकोटिषुदुस्तरम्
चतुर्भिरपिवर्णैश्चसेव्योधर्मोनिरंतरम् ९१

इतिप्रेतगतिंदृष्ट्वापापबीजोत्थितांहिसः
कृत्वाधर्मोपदेशंचपुनस्तस्मैद्विजोऽब्रवीत् ९२
इत्थंसकेरलःप्रेतोवर्तमानोगिरौतदा
अतिवाह्यचिरंकालमपश्यत्पथिकंपथि ९३
वहंतंद्वौकरंडौचवेणीजलयुतौतथा
गायंतंप्रमुखादेवंपुण्यश्लोकंजनार्दनम् ९४
तंदृष्ट्वासहसाप्रेतोमार्गरोधंचकारसः
दर्शयामासचात्मानंमाभैषीरित्युवाचसः ९५
पानीयंपातुमिच्छामित्वत्तःकार्पाटिकोत्तम
नपास्यसिजलंचेन्मांप्राणायास्यंतिमेदृढम् ९६
इतिप्रेतवचःश्रुत्वापांथःप्रत्याहकौतुकात्
कार्पटीकउवाच
कस्त्वंदुःखाभिभूतस्तुकृशोम्लानोदिगंबरः ९७
जीवशेषोमुमूर्षुश्चविकृतोभयवर्धनः
नवधूममयाकारश्चंडश्चंचललोचनः ९८
पद्यामस्पृष्टभूमिस्त्वंनिर्मांसोदरबाहुकः
इतितद्वचनंश्रुत्वाप्रेतोवाक्यमथाब्रवीत् ९९
प्रेतउवाच
शृणुधर्मिष्ठतेवच्मियेनाहमीदृशोऽभवम्
ब्राह्मणोऽदत्तदानोऽहलोभीचमलिनक्रियः १००
परान्नंचसदाभुक्तमेकाकीमिष्टभोजनः
मयादत्तानभिक्षापिहंतकारोनपुष्कलः १०१
नकृतोवैश्वदेवस्तुप्रक्षिप्तोनबहिर्बलि
भूतानांतुतृषार्तानांनहतापयसाचतृट् १०२
कदाचित्पितरोनैवतर्पिताअटतामहीम्
नचश्राद्धंकृतंक्वापिपूजितानैवदेवताः १०३
वर्षातपपरित्राणंनदत्तंपादरक्षणम्
जलपात्रंनदत्तंचतांबूलंनौषधंमया १०४
नगृहेवसतिर्दत्तानातिथ्यंकस्यचित्कृतम्
अंधवृद्धाधनानाथदीनाःपानान्नतोषिताः १०५

गवांग्रासोनदत्तोवैनरोगीपरिमोचितः
नदत्तानहुताविप्रपवित्राश्चतिलामया १०६
पृथिव्यांतिलदातारोनभवंतितुमद्विधाः
व्यतीपातेनदत्तंहिकींचित्स्वर्णमहाफलम् १०७
संक्रांतावुपरागेचनदत्तंसूर्यचन्द्रयोः
पर्वारायन्यानिसर्वाणिजग्मुःशून्यानिमेद्विज १०८
तिथयःकार्तिकेमुख्याजातावंध्याःसदामम
पितृभ्योनैवदत्तंवाअ्रष्टकासुमघासुच १०९
द्विजानांनकृताप्रीतिर्मन्वादिषुयुगादिषु
नदत्तस्तिलतैलेनप्रदीपःकार्तिकेमया ११०
नस्नातोमाघमासेऽहरूपसौभाग्यकामदे
द्विजायवेदविदुषेगौतम्यांसिंहगेगुरौ १११
मयासंकल्पितंद्रव्यंनदत्तंपूर्वजन्मनि
नस्नातोऽहकृष्णवेरयांतथाकन्यागतेगुरौ ११२
अग्निंप्रज्वाल्यकाष्ठौघैःस्नातानांपौषमाघयोः
शीतार्तानांचविप्राणांनकृतोजाड्यनिग्रहः ११३
माधवादिषुमासेषुनदत्तंशीतलंजलम्
मयानारोऽपितोऽश्वत्थोन्यग्रोधोनैववर्धितः ११४
बंदीगृहान्मयामुक्तिर्नकृताप्राणिनांक्वचित्
नप्राणिभयसंत्रस्तोरक्षितःशरणागतः ११५
नोपोष्यात्रत्रिरात्राणितोषितोमधुसूदनः
कृच्छ्रातिकृच्छ्रपाराकंतथाचांद्रायणंद्विज ११६
अथान्यत्तप्तकृच्छ्रंचतथासांतपनानिच
व्रतान्येतानिपुरायानिजुष्टानींद्रादिभिःसुरैः ११७
चरित्वानमयातानिदेहःसंशोषितःपुरा
इत्थंपूर्वभवोवंध्योममजातोद्विजोत्तम ११८
पश्यद्विजमहाक्रूरामद्भुतामत्रजन्मनि
गतिंदूरप्रबोधांतुममपूर्वस्यकर्मणः ११९
संतिमांसानिमार्गेषुवृकव्याघ्रहतानिवै
फलान्यन्यानिशैलेस्मिन्शुकैस्त्यक्तानिसर्वतः १२०

पुरायानिचसुगंधीनिफलानिरसवंतिच
मूलानितुसुभक्ष्याणिमृदूनिमधुराणिच १२१
नानाविधानितिष्ठंतिमधूनिसुबहून्यपि
स्रोतसांनिर्झराणांचसंतिवारीणि सर्वशः १२२
सुलभेषुपदार्थेषुसर्वेष्वेतेषुपर्वते
नेक्षेहमशनंक्वापिदैवेनापिहतंसदा १२३
वाताहारेणजीवामियथाजीवंतिपन्नगाः
पुनर्जीवामिभोविप्रदेवयोनिप्रभावतः १२४
बलेनप्रज्ञयानित्यंमंत्रपौरुषविक्रमैः
सहायैश्चैवमित्रैश्चनालभ्यंलभतेनरः १२५
लाभालाभेसुखेदुःखेविवाहेमृत्युजीवने
भोगेरोगेवियोगेचदैवमेवहिकारणम् १२६
कुरूपाःकुकुलामूर्खाःकुत्सिताचारनिंदिताः
शौर्यविक्रमहीनाश्चदैवाद्राज्यानिभुंजते १२७
काणाःखंजाश्चभव्याश्चनीतिहीनाश्चदुर्गुणाः
नपुंसकाश्चदृश्यंतेदैवाद्राज्येप्रतिष्ठिताः १२८
यैर्दत्ताश्चतिलागावोहिरण्यंवसनानिच
गौरीकन्याचयैर्दत्तायैर्दत्ताचवसुंधरा १२९
शय्यासनानितांबूलंमंदिराणिधनानिच
भक्ष्यभोज्यानिदत्तानिचंदनान्यगरूणिच १३०
अटव्यांपर्वताग्रेचग्रामेवानगरेऽपिवा
पुरःपुरःश्चतिष्ठंतितेषांभोगाःप्रयत्नतः १३१
संत्यत्रपर्वतेऽन्येऽपिराक्षसाबलवत्तराः
राक्षसाश्चपिशाचाश्चपिशाच्यश्चातिदारुणाः १३२
कदाचिच्चकथंचिच्चक्वापियत्रस्वकर्मणा
लभंतेचान्नपानानिपर्यटंतोवनेवने १३३
इतिश्रुत्वाऽत्रतेभ्यश्चमाभयंभवतांभवेत्
शुचिंगोविंदभक्तंत्वांनतेद्रष्टुमपिक्षमाः१३४
विष्णुभक्तितनुत्राणंनारायणपरायणम्
नस्पृशंतिनपश्यंतिराक्षसाःप्रेतपूतनाः १३५

भूतवेतालगंधर्वाःशाकिन्यश्चार्यकाग्रहाः
रेवत्योवृद्धरेवत्योमुखमंडयस्तथाग्रहाः १३६
यत्ताबालग्रहाःक्रूरादुष्टावृद्धग्रहाश्चये
तथामातृग्रहाभीमाग्रहाश्चान्येविनायकाः १३७
कृत्याःसर्पाश्चकूष्मांडायेचान्येदुष्टजंतवः
नपश्यंतिपरंविप्रवैष्णवंब्राह्मणंशुचिम् १३८
शुचिंरत्तंतिभूतानिधर्मिष्ठंपीडयंतिन
रत्तंतिचशुचिंनित्यंग्रहनत्तत्रदेवताः १३९
गोविंदनामजिह्वाग्रेहृदिवेदस्तुसंस्थितः
शुचिश्चदानशीलश्चत्वंसर्वत्राकुतोभयः १४०
एवंब्राह्मणतिष्ठामिभुंजानःकर्मणःफलम्
नशोचामीतिमत्वाऽहविमृश्यचपुनःपुनः १४१
नदुनोमितथातावद्यावज्जंबालिनीतटे
सारसोदीरितंवाक्येश्रुतंपर्यटतामया १४२
ब्राह्मणउवाच
सारसोदीरितंवाक्यंकीदृशंहिश्रुतंत्वया
तदहंश्रोतुमिच्छामिब्रूहित्वंप्रेतसत्वरम् १४३
प्रेतउवाच
ब्रवीमिसारसंवाक्यंशृणुकार्पाटिकोत्तम
धूसरानामकत्तोऽस्मिन्नदीगिरिसमुद्भवा १४४
सदाजलशयोत्तालामत्तदंतिकुलाकुला
महाककुभशोभाढ्यास्निग्धजंबूमनोहरा १४५
तस्यास्तीरमहंप्राप्तोगाहमानोवनंघनम्
मयितिष्ठतिवैतत्रफलभोजनकाम्यया १४६
वनांतरात्समुड्डीयसारसोलत्त्मणायुतः
आगत्यपुलिनंनद्याःसेवितुंबहुपत्तिभिः १४७
पीत्वातत्रैवपानीयंरमित्वाभार्ययासह
सुप्तःपत्तपुटेवामेप्रवेश्यचशिरोमुखम् १४८
एतस्मिन्नंतरेदृष्टःपादपादवतीर्यच
रक्ताननःसुरक्तात्तोदंडीदृढनखावलि १४९

लोमशोदीर्घलांगूलश्चलचेष्टोहिवानरः
यत्रासौसारसःसुप्तस्तत्रवेगेनचागतः १५०
समागत्यचजग्राहसारसंचरणेदृढम्
कराभ्यांक्रूरयाबुद्ध्यापश्यतांबहुपक्षिणाम् १५१
उड्डीयोड्डीयतेसर्वेगताश्चान्यत्रखेचराः
सारसीभीतभीताचविरावान्कुर्वतीस्थिता १५२
सारसोभग्ननिद्रस्तुत्रासाच्चलितलोचनः
अवलोकितवाञ्छीघ्रंतदोत्ताम्यशिरोधराम् १५३
विलोक्यवानरंदुष्टंहंतुकामंसुदारुणम्
तदासंभाषयामासगिरामधुरयाखगः १५४
अपराधंविनामांत्वंकिंशाखामृगबाधसे
सापराधाजनालोकेवध्यंतेभूमिपैरपि १५५
नपीडयितुमर्हंतित्वादृशाउत्तमाजनाः
अस्मानहिंसकान्साधून्परवृत्तिपराङ्मुखान् १५६
जलशैवालभक्षांश्चखेचरान्वनवासिनः
स्वदाररतिशीलांश्चपरदाराभिवर्जितान् १५७
नपीडयितुमर्हंतित्वद्विधावानरोत्तम
परापवादपैशुन्यान्द्विजान्परमसेवकान् १५८
शाखामृगविमुंचाशुसर्वथामामनागसम्
जानामितवजन्माहंनत्वंवेत्सितुमामकम् १५९
इत्याकर्ण्यवचस्तस्यमुमोचसारसंतदा
चपलोवानरःशीघ्रमाहदूरेव्यवस्थितः १६०
वानरउवाच
ब्रूहिरेत्वंकथंवेत्सिममजन्मपुरातनम्
त्वंपक्षीज्ञानहीनश्चतिर्यक्चाहंवनेचरः १६१
सारसउवाच
जानेऽहतावकंजन्मजातिस्मरमितिस्फुटम्
त्वंहिविंध्याधिपोराजाप्राग्भवेपर्वतेश्वरः १६२
अहंपूज्यतमोविप्रस्तववंशेपुरोहितः
तेनप्रत्यभिजानामित्वांसम्यग्वानरोत्तम १६३

इमांपालयताभूमिंप्रजाःसर्वाःप्रपीडिताः
त्वयाविवेकहीनेनभृशंसंचयताधनम् १६४
प्रजापीडानतापोत्थवह्निज्वालैस्तुवानर
प्राक्त्वंदग्धःपुनःक्षिप्तःकुंभीपाकेऽतिदारुणे १६५
पुनःपुनश्चदग्धेनजातेनचपुनःपुनः
नारकेणशरीरेणसमास्त्रिंशद्गतंत्वया १६६
कुर्वतादारुणाञ्छब्दान्रुदताचपुनःपुनः
कुंभीपाकानलेतीव्राह्यनुभूताश्चयातनाः १६७
निस्तीर्णनरकोभूयःपापशेषेणसांप्रतम्
प्राप्तोऽसिवानरंजन्मयेनमांहंतुमिच्छसि १६८
विप्रस्योपवनात्पूर्वंपक्वरंभाफलानिवै
अननुज्ञाप्यभुक्तानित्वयापहृत्यपौरुषात् १६९
विपाकःकर्मणस्तस्यफलतेपश्यदारुणः
वानरस्त्वंवनेवासोह्यधुनातेनवर्तसे १७०
अशुभस्यशुभस्यापिपुराविहितकर्मणः
भोगःक्रीडतिभूतेषुनोल्लंघ्यस्त्रिदशैरपि १७१
इत्थंत्वज्जन्मजानामियथावत्तुसहेतुकम्
प्राप्तःसारसदेहोऽपिज्ञानेनापरिमोहितः १७२
प्रेतउवाच
इतिश्रुत्वाकथांविप्रवानरोप्याहसारसम्
सम्यग्वेत्तिभवान्नूनंकथंत्वंपक्षितांगतः १७३
सारसउवाच
कथयिष्यामितत्कर्मयेनाहंदुर्गतिंगतः
पक्षियोनिंगतोयेनतत्सर्वंश्रोतुमर्हसि १७४
धान्यंखारिशतंसाग्रमुत्सृष्टंहित्वयापुरा
बहुभ्योब्राह्मणेभ्यश्चचर्मदायांरविग्रहे १७५
पौरोहित्यमदाल्लोभाद्वंचयित्वाद्विजांस्तथा
किंचिद्दत्त्वातुतेभ्यश्चगृहीतमखिलंमया १७६
विप्रसाधारणद्रव्यग्रहणोत्पन्नपातकात्
पतितःकालसूत्रेऽहनरकेरक्तकर्दमे १७७

चलत्क्रिमिसुसंपूर्णेदुर्गंधेपूयफेनिले
आनाभेस्तत्रमग्नोस्मिलिहन्पूयमधोमुखः १७८
तथोपरिमहागृध्रैर्भक्ष्यमाणस्तुवायसैः
क्रिमिभिस्तुद्यमानस्तुममदेहोनिरंतरम् १७९
तस्मिञ्छोणितपंकेऽहनिरुच्छ्वासोऽभवंतदा
मुहूर्तोऽपिमहाकल्पसमोजातोममात्रवै १८०
यातनाश्चानुभूताश्चसमास्त्रिरयुतंमया
वक्तुंचतन्नशक्नोमिदुःखंवानरनारकम् १८१
पौरोहित्यंमहाघोरंपापदंचस्वभावतः
देवोपजीवनंयत्रब्राह्मणस्योपजीवनम् १८२
राज्ञःप्रतिग्रहोघोरस्तेनदग्धाद्विजातयः
तेषामपिहरेद्द्रव्यंपुरोधास्तेननारकी १८३
राजायत्कुरुतेपापंपुरादेहेनधीयते
तस्यतेनपुरोधाश्चगीयतेतत्वदर्शिभिः १८४
दैवात्कथमपिप्राप्तउत्तारोनरकांबुधेः
मयादौदैवयोगेनशकुनित्वमुपस्थितम् १८५
अपहृत्यपुराकांस्यभाजनंभगिनीगृहात्
आह्निकायमयादत्तंतेनमेसारसीगतिः १८६
इयंचब्राह्मणीपूर्वंकांस्यचोरीसुदारुणा
तेनेयंसारसीजाताममभार्यासधर्मिणी १८७
इत्थंवानरतेसर्वंकथितंकर्मणःफलम्
वृत्तंचवर्तमानंचभविष्यंशृणुसांप्रतम् १८८
अहंहंसोभविष्यामित्वंचहंसोभविष्यसि
हंसीयमपिमद्भार्यासारसीचभविष्यति १८९
देशेचकामरूपेवैस्थास्यामोवैयथासुखम्
योगिनींभाविकल्याणींयास्यामस्तदनंतरम् १९०
ततश्चमानुषंजन्मप्राप्यामोदुर्लभंपुनः
श्रेयस्तद्विपरीतंचप्राणिभिर्यत्रसाध्यते १९१
एवंसर्वाञ्छिवोजंतून्मोहयित्वास्वमायया
सुखैर्भुनक्तिदुःखैश्चनास्मानेवतुकेवलम् १९२

ग्रयंलोकेप्रवृत्तश्चमार्गोविविधनिर्मितः
धर्माधर्ममयोऽत्यर्थंसुखदुःखफलात्मकः १६३
सेवितःप्राणिभिःसर्वैःसर्वदावापुनःपुनः
देवासुरनरव्याघ्रक्रिमिकीटजलेचरैः १६४
नातिक्रांतोहिकेनापिपंथाऽयदुःखकंटकः
विरक्तान्योगिनोध्यायंविनावेदांतपारगान् १६५
ग्रणोर्वापिगुरोर्वापिपुरायापुरयस्यकर्मणः
ददातीहफलंज्ञात्वादेशंकालंमहेश्वरः १६६
इत्थंविधिविधानज्ञांमायांज्ञात्वेश्वरस्यच
नशोचंतिनतप्यंतिनव्यथंतिमहाधियः १६७
नान्यथाशक्यतेकर्तुंविपाकःपूर्वकर्मणाम्
उपायैःप्रज्ञयावापिशाखामृगसुरैरपि १६८
पुरात्वंभूपतिर्जातःपश्चाज्जातोऽसिनारकी
ग्रधुनावानरोभूयोजन्मप्राप्स्यसितादृशम् १६६
इतिमत्वाविशोकस्त्वंशाखामृगयथासुखम्
प्रतीद्मांकुरुकालस्यरममाणोऽत्रकानने २००
ग्रहमप्येवमीशानमायाबद्धोवनेवने
द्मपयिष्यामिवैजन्मधैर्यमास्थायसारसम् २०१
वानरउवाच
मयात्वंपूजितःपूर्वंनौमित्वामधुनाप्यहम्
जातिस्मरोऽसिजानामिसर्वंमत्पूर्वदैहिकम् २०२
तिष्ठसारससारस्याशिवमस्तुसदातव
त्वद्वाक्याद्गतमोहोऽहविचरिष्यामिसर्वदा २०३
प्रेतउवाच
इमंरम्यंविचित्रंचपावनंपरमंद्विज
पद्मिवानरसंवादंश्रुतंयावन्नदीतटे २०४
तावन्ममापिबोधोऽभूत्तेनशोकःद्मयंगतः
इदानींजाह्नवीतोयमाहात्म्यंपरमाद्भुतम् २०५
दृष्ट्वात्रब्राह्मणश्रेष्ठत्वांयाचेजाह्नवीजलम्
प्रेतत्वात्तर्तुकामोऽहतीव्रातृष्णाप्रपीडितः २०६

अस्मिन्नेवाचलेदृष्टंमयाश्चर्यंचवैद्विज
गंगातोयस्यतावद्धिपातुमिच्छामितज्जलम् २०७
पारियात्रोद्भवःकोऽपिब्राह्मणोग्रामयाजकः
अयाज्ययाजनाद्विंध्येसंभूतोब्रह्मराक्षसः २०८
अस्मत्संगस्यलोभेनस्थितोऽसौहायनाष्टकम्
तस्यास्थीनिसुपुत्रेणसंचितानिद्विजोत्तम २०९
क्षिप्तान्यानीयगंगायांतीर्थेकनखलेऽमले
तत्क्षणादेवमुक्तोऽसौराक्षसत्वात्सुदारुणात् २१०
इतिगंगाजलस्नानमहिमामहदद्भुतम्
साक्षाद्दृष्टोमयातेनगांगेयंप्रार्थितंजलम् २११
पुरस्ताद्यत्कृतस्तीर्थेमयाभूरिपरिग्रहः
नकृतस्तुप्रतीकारस्तस्यजाप्यादिलक्षणः २१२
तेनमेप्रेतरूपस्यदुर्लभोदकभोजनम्
सहस्रंयत्रवर्षाणामतीतंविंध्यपर्वते २१३
इतितेकथितंसर्वंहित्वालज्जांगरीयसीम्
इदानींधार्मिकश्रेष्ठजलदानेनसत्वरम् २१४
संतर्पयममप्राणान्कंठमात्रावलंबितान्
दुर्लभंप्रेतभावेऽपिजीवितंप्राणिनामिह २१५
शरीरंरक्षणीयंहिसर्वथासर्वदानरैः
नहीच्छंतितनुत्यागमपिकुष्ठादिरोगिणः २१६
देवद्युतिरुवाच
इतितद्वचनंश्रुत्वाविस्मयंपरमंगतः
पथिकश्चिंतयामासकृपांप्रेतेसमुद्वहन् २१७
पापपुण्यफलंलोकेप्रत्यक्षंदृश्यतेखलु
देवदानवमानुष्यंतिर्यक्त्वंक्रिमिकीटकम् २१८
नानायोनिषुजन्मानिनानाव्याधिप्रपीडनम्
मरणंबालवृद्धानामंधत्वंकुब्जतातथा २१९
एश्वर्यंचदरिद्रत्वंपांडित्यंमूर्खतातथा
एताश्चरचनालोकेभवंतिकथमन्यथा २२०
तेधन्याःकर्मभूमौयेन्यायमार्गार्जितंधनम्

सत्पात्रेभ्यःप्रयच्छंतिकुर्वंतिचात्मनोहितम् २२१
भूमिरत्नहिरगयानिगावोधान्यंगृहंगजाः
रथाश्ववसनग्रामाःसिद्धमन्नंफलंजलम् २२२
कन्यादिव्यौषधमन्नंछत्रोपानद्वरासनम्
शय्यातांबूलमाल्यानितालवृंतंवरासनम् २२३
सर्वमेतत्प्रदातव्यंलोकत्रयजिगीषुभिः
दत्तंहिप्राप्यतेस्वर्गेदत्तमेवहिभुज्यते २२४
छत्रचामरयानानिवराश्ववरवारणाः
हर्म्याणिवरशय्याश्चगोमहिष्योवरस्त्रियः २२५
अन्नभूषणमुक्ताश्चपुत्रादास्योमहाकुलम्
आयुरारोग्यमैश्वर्यंकलाविद्यासुकौशलम् २२६
दानस्यैवफलंसर्वंप्राप्यतेभुविमानवैः
तस्माद्देयंप्रयत्नेननादत्तमुपतिष्ठति २२७
धर्मिष्ठेनतुपांथेनगाथेयंसमगायत
इतिश्रुत्वापुनःप्रेतःप्रोवाचह्यार्तमानसः २२८
मन्येधर्मज्ञकल्पोऽसिपांथत्वंनात्रसंशयः
देहिमेजीवनंवारिचातकायघनोयथा २२९
एतस्मिन्प्राणदानेहिमाविलंबंकृथाबहु
ततःप्रत्याहपांथस्तुवचनंन्यायगर्भितम् २३०
भृगुक्षेत्रेशृणुप्रेतपितरौममतिष्ठतः
तदर्थंतीर्थराजस्यमयावारिसमाहृतम् २३१
तत्सितासितपानीयंमध्येचप्रार्थितंत्वया
नजानेधर्मसंदेहःकिमत्रममयुज्यते २३२
बलाबलंविचारार्थंकरिष्येप्रबलंविधिम्
वेदेभ्योधर्मशास्त्रेभ्योनाहंमानेनकेवलम् २३३
हयमेधादियज्ञेभ्यःसर्वेभ्योप्यधिकंमतम्
ऋषिभिर्देवताभिश्चप्राणिनांप्राणरक्षणम् २३४
इतिदत्त्वावरंवारिकृत्त्वाप्रेतस्यरक्षणम्
पित्रर्थंपुनरादायजलंनेष्यामिपावनम् २३५
एषमेप्रबलोभातिशुद्धधर्मप्रदोविधिः

परोपकरणादन्यत्सर्वमल्पंस्मृतंबुधैः २३६
परोपकारिभिर्दत्ताअपिप्राणानृभिर्मुदा
अद्भिःपरोपकारःस्यात्किंनलब्धंमयापुनः २३७
दधीचिनापुरागीतःश्लोकोऽयश्रूयतेभुवि
सर्वधर्ममयःसारःसर्वधर्मज्ञसंमतः २३८
परोपकारःकर्तव्यःप्राणैरपिधनैरपि
परोपकारजंपुण्यंतुल्यंक्रतुशतैरपि २३९
इत्युक्त्वाप्रददौतोयंगंगायामुनसंभवम्
प्रेतायप्राणरक्षार्थंसधर्मिष्ठोवरोद्विजः २४०
प्रेतःप्रीतोजलंपीत्वाह्यभिषिच्यशिरस्तथा
प्रजहौप्रेतदेहंतंदिव्यदेहोऽभवत्क्षणात् २४१
तदाश्चर्यंमहद्दृष्ट्वानिजगादसकेरलः
अहोविमुक्तःप्रेतत्वाद्वेणीपानीऽबिदुभिः २४२
ब्रह्मापिनैवशक्नोतिमन्येवक्तुमपांगुणम्
गङ्गातोयंमहादेवोधत्तेकेकथमन्यथा २४३
अचिंत्यशक्तिगंगांभस्तिलमात्रंतुयःपिबेत्
देवोभवेत्ससिद्धोवागर्भेनैवचसंविशेत् २४४
नगंगासदृशीसिद्धिर्नगंगासदृशीमतिः
नगंगासदृशीमुक्तिर्गंगासर्वाधिकायतः २४५
तस्मात्सर्वप्रयत्नेनमहाभक्त्याचधार्मिक
करस्थंतस्यकैवल्यंयोगंगांसेवतेसदा २४६
आयुष्मान्भवपांथत्वंमाधर्मविरतोभव
त्वयाऽहतारितःसद्योगंगांबुकणदानतः २४७
इत्युक्त्वाप्रस्थितोनाकंपिशाचस्तुसकेरलः
आशीर्भिरभिनंद्याथपांथंबंधुवरंनरम् २४८
प्रेतंविमोक्ष्यपांथोऽपिपुनरादायतज्जलम्
गतस्तेनैवमार्गेणस्मरंस्तीर्थोदकौतुकम् २४९
वसिष्ठउवाच
इत्थंप्रयागमाहात्म्यंश्रुत्वानत्वाचतंमुनिम्
प्रयागंसहसामाघेपिशाचःसत्वरंगतः २५०

स्नात्वासितासितेसोऽपिमाघमासेद्विजोत्तम
पिशाचःक्षीणपापस्तुपैशाचींविजहौतनुम् २५१
दिव्यदेहस्ततोभूत्वाद्राविडोभूपतिस्तदा
स्तुवन्नारायणंदेवंभक्त्यादोषविवर्जितः २५२
गंधर्वैःस्तूयमानस्तुनाकनारीसुपूजितः
उत्तमेनविमानेनपुरंदरपुरंययौ २५३
इतितेकथितंविप्रपूर्ववृत्तंसकौतुकम्
इतिहासंद्विजश्रेष्ठसद्यःपातकनाशनम् २५४
ज्ञानदंमोक्षदंविप्रश्रुतंदुर्गतिनाशनम्
इतितेकथितंसर्वंपुरावृत्तंसकौतुकम् २५५
इतिहासंद्विजश्रेष्ठश्रुतंदुर्गतिनाशनम्
अधुनातुमयासार्धमिमाःकन्याःसुतश्चते २५६
त्वंचायातुप्रयागंवैसर्वेसद्गतिमीप्सवः
माघस्नानंप्रकुर्मोऽत्रदेवानामपिदुर्लभम् २५७
तत्रमोक्ष्यंतिपैशाच्यंसद्यःपापसमुद्भवम् २५८
महेशउवाच
एवंवसिष्ठवक्त्राब्जकथामधुरसंमुदा
पीत्वाप्रमुदिताःसर्वेनिस्तीर्णानरकार्णवात् २५९
प्रस्थितास्तेनसार्धंतेसत्वरंव्योम्निहर्षिताः
दिलीपशृणुतत्सर्वंतत्तीर्थंतुसितासितम् २६०
सत्वरंव्योममार्गेणकाममासाद्यदुःसहाः
समागम्यतदातत्रसंहृष्टहृदयाश्चते २६१
अथोचेलोमशस्तत्रसदयंगगनांगणे
पश्यंतुश्रद्धयासर्वेतीर्थराजमिमंभुवि २६२
विनाज्ञानंप्रयागेऽस्मिन्मुच्यंतेसर्वजंतवः
इष्ट्वात्रैवमहायज्ञंस्त्रष्टुकामःप्रजापतिः २६३
अवापसृष्टिसामर्थ्यंततःसृष्टिंचकारसः
अत्रनारायणःसस्नौपत्नीकामःसितासिते २६४
अतःसलब्धवान्लक्ष्मींभार्याममृतमंथने
उषित्वाचात्रषण्मासंस्नात्वावेण्यांयथेच्छया २६५

त्रिपुरंघातयामासत्रिबाणेनत्रिशूलभृत्
इमानित्रीणिकुंडानिदीप्तान्यजस्त्रवह्निभिः २६६
एषतृप्तिंगतोवह्निर्यःकेनापिचपुष्यति
अत्रदेवास्त्रयस्त्रिंशत्तृप्तामुमुदिरेभृशम् २६७
आविर्भूतोमहेशोऽत्रनीलकंठःकपालभृत्
अनिशंससुरैःसेव्यआयातोंजलयेबटुः २६८
मृकंडसूनुनाकल्पेप्रविश्ययन्मुखेस्थितम्
लोकेज्वालाकुलेसोऽययोगरूपीजनार्दनः २६९
सेयंभागीरथीशंभोःसर्वदुःखापहारिणी
सिद्ध्यर्थंसेव्यतेसिद्धैर्भुक्तिमुक्तिफलप्रदा २७०
अनिशंभूतिदायाचस्वर्गमार्गेह्यनुत्तमा
स्वर्गहेतुश्चयादेवीसेयंभागीरथीनदी २७१
यदंभःस्नानमात्रेणविकर्तनसलोकताम्
लभंतेप्राणिनःसर्वेनदीसायमुनास्वयम् २७२
अनयोःपुण्यनद्योश्चसंगमःसुखदोमुने
अत्रस्नातानपच्यंतेनरकेज्ञानभाविताः २७३
विनाज्ञानंप्रयागेऽस्मिन्मुच्यंतेसर्वजंतवः
अन्यच्चश्रूयतांविप्रइतिहासंपुरातनम् २७४
शृणवतांसर्वपापघ्नंसर्वरोगविनाशनम्
ऋचीकेनपुराशप्तोगंधर्वोवायसोऽभवत् २७५
शापंमुमोचसोऽत्रैवस्नातःसद्यःसितासिते
वासवस्यतुशापेनस्वर्गाद्भ्रष्टाप्सरोर्वशी २७६
स्वर्गकामाचसासस्नौलेभेस्वर्गंततोचिरात्
पुत्रंचशंकरंलेभेययातिर्नाहुषोमुने २७७
पुत्रकामःप्रयागेहिस्नात्वापुण्येसितासिते
धनकामःपुराशक्रःसुस्नातोऽत्रद्विजोत्तम २७८
धनदस्यनिधीन्सर्वाञ्जहारसचमायया
कश्यपोऽत्रतपस्तेपेशिवाराधनतत्परः २७९
अस्मिंस्तीर्थेभरद्वाजोयोगसिद्धिमवाप्तवान्
अस्मिंस्तीर्थेपुराविप्रयोगेशाःशांतमानसाः २८०

योगस्यफलभूमिंतुलेभिरेसनकादयः
अस्मिन्माघेतुयेस्नातागंगायामुनसंगमे २८१
तारारूपाश्चतेसर्वे तैर्व्याप्तंसकलंजगत्
विंदंतिकामिनःकामान्मुक्तिंयांतिमुमुक्षवः २८२
विंदंतिसाधकाःसिद्धिंप्रयागेहिद्विजोत्तम
सांप्रतंमुक्तिकामास्तुकन्याश्चापिसुतश्चते २८३
मद्वाक्यादत्रमज्जंतुसर्वेत्वंचसितासिते
प्राक्कालीनाघविध्वंसिवेणीजलबलेनतु २८४
लभंतामखिलंलक्ष्मींप्राप्तशापमहाफलाम्
एवमार्षवचःसत्यमतींद्रियमलंघनम् २८५
श्रुत्वाचोत्कंठचित्तास्तेसर्वेस्नानायचोद्यताः
प्रयागंप्राप्यदुष्प्राप्यं पैशाच्यंविजहुःक्षणात् २८६
विमुक्ताःशापदुःखेनतनुंस्वांस्वांचलेभिरे
दृष्ट्वावेदनिधिःपुत्रंताःकन्यादिव्यरूपिणीः २८७
तुष्टावलोमशंप्रीत्याप्रसन्नेनांतरात्मना
त्वदनुग्रहमात्रेणोत्तीर्णःपापमहार्णवः २८८
इदानीमुचितंब्रूहिबालानामृषिसत्तम
लोमशउवाच
कुमारोधीतवेदोऽयसमाप्तनियमोयुवा २८९
आसांतुसानुरागाणांगृह्णातुकरपंकजम्
ततोलोमशवाक्येनस्वपितुर्वचनात्तदाः २९०
विवाहविधिनाचाशुब्रह्मचारीसधार्मिकः
शुभद्रव्यैश्चमंत्रैश्चऋषिभिःकृतमंगलः २९१
पंचानामपिकन्यानांपाणिंजग्राहधर्मतः
आनंदिन्यस्तदासर्वाःकन्याःपूर्णमनोरथाः २९२
बभूवःसकुमारश्चसंतुष्टश्चबभूवह
दत्त्वानुज्ञांमुनिःसोऽथलोमशस्तैर्नमस्कृतः २९३
जगामस्वाश्रमंमेरुंपर्वतंसुरसेवितम्
ततोवेदनिधीराजन्स्नुषाःपंचसुतंतथा
पुरस्कृत्यमुदायुक्तोधनदस्यपुरंययौ २९४

इतिनृपवरमाघेस्नानसंजातपुरायान्मुनिवरवचसाद्राक्तीर्थराजप्रयागे
सकलकलुषमुक्ताःपंचगंधर्वकन्याअलमभिगतलाभात्प्राप्यतर्षंचजग्मुः २९५
परमिममितिहासंपावनंतीर्थभूतंवृजिनविलयहेतुंयःशृणोतीहनित्यम्
सभवतिखलुपूर्णःसर्वकामैरभीष्टैर्व्रजतिचसुरलोकेदुर्लभोधर्मयुक्तः २९६
इतिहासमिमंश्रुत्वापूजयेद्यस्तुपाठकम्
गोभिर्हिरगयवस्त्रैश्चब्रह्मतुल्योयतोहिसः २९७
वाचकेपूजितेयस्माद्विष्णुर्भवतिपूजितः
तस्मात्प्रपूजयेन्नित्यंयदीच्छेत्सफलंभवम् २९८

इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडे माघमाहात्म्ये वसिष्ठदिलीपसंवादेगंधर्वकन्यापरिणयोनामैकोनत्रिंशाधिकशततमोऽध्यायः १२९

त्रिंशाधिकशततमोऽध्यायः

पार्वत्युवाच
श्रुतंकार्तिकमाहात्म्यंमाघस्यचमयाविभो
अधुनाश्रोतुमिच्छामिमुक्तिदंकर्मचोत्तमम् १
श्रेष्ठाभक्तिस्तुकाप्रोक्तावदविश्वेश्वरप्रभो
येनविज्ञानमात्रेणनराःसुखमवाप्नुयुः २
महादेवउवाच
तल्लीनचित्तःसपुमान्साभक्तिःपरमामता
दयाधर्मपरोनित्यंविष्णुधर्मेषुतत्परः ३
फलमूलजलाहारीशंखचक्रप्रधारकः
त्रिकालंपूजयेद्विष्णुंसाभक्तिःसात्विकीमता ४
उत्तमासात्विकीप्रोक्ताराजसीचैवमध्यमा
कनिष्ठातामसीचैवत्रिविधाभक्तिरुच्यते ५
श्रीधरेतुप्रकर्त्तव्यामुक्तिकामफलेप्सुभिः
अहंकारेणरूपेणदंभमात्सर्यमायया ६
येकुर्वंतिजनाभक्तिंतामसीसाउदाहृता
परस्योत्सादनार्थंवादंभमुद्दिश्यवाऽथवा ७
याभक्तिःक्रियतेदेवेतामसीसाप्रकीर्तिता

विषयान्प्रतिसंधाययशएश्वर्यमेववा ८
अर्चादावर्चयेद्योमांपृथग्भावःसराजसः
कर्मक्षयार्थेकर्त्तव्याब्राह्मणैर्ज्ञानतत्परैः ९
विष्णौह्यात्मार्पणींबुद्धिंसाभक्तिःसात्विकीमता
अतोवैसर्वथादेविसंसेव्यःसर्वदाहरिः १०
तामसेनतुभावेनतामसत्वंहिलभ्यते
राजसोराजसेनैवसात्विकेनतुसात्विकः ११
वेदाध्यायरतःश्रीमान्रागद्वेषविवर्जितः
शंखचक्रधरोविप्रःसर्वदाशुचिरुच्यते १२
कर्मकांडेप्रवृत्तोयःसर्वदाविष्णुनिंदकः
निंदकस्तज्जनानांचमहाचंडालउच्यते १३
वेदाध्यायरतानित्यंनित्यंवैयज्ञयाजकाः
अग्निहोत्ररतानित्यंविष्णुधर्मपराङ्मुखाः
निंदंतिविष्णुधर्मांश्चवेदबाह्याःसुरेश्वरि १४
कुर्वंतिशांतिंविबुधाःप्रहृष्टाःक्षेमंप्रकुर्वंतिपितामहाद्याः
स्वस्तिप्रयच्छंतिमुनींद्रमुख्यागोविंदभक्तिंवहतांनराणाम् १५
शुभाग्रहाभूतपिशाचयुक्ताब्रह्मादयोदेवगणाःप्रसन्नाः
लक्ष्मीस्थिरातिष्ठतिमंदिरेचगोविंदभक्तिंवहतांनराणाम् १६
गंगागयानैमिषपुष्कराणिकाशीप्रयागंकुरुजांगलानि
तिष्ठंतिदेहेकृतभक्तिपूर्वंगोविंदभक्तिंवहतांनराणाम् १७
एवमाराधयेद्विद्वान्भगवंतंश्रियासह
कृतकृत्योभवेन्नित्यंसविप्रोनात्रसंशयः १८
क्षत्रियोवाथवैश्योवाशूद्रोवासुरसत्तमे
भक्तिंकुर्वन्विशेषेणमुक्तिंयातिसवैनरः १९

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेविष्णुभक्तिमहिमावर्णनंनामत्रिंशाधिकशततमोऽध्यायः १३०

एकत्रिंशाधिक शतमोऽध्यायः

पार्वत्युवाच
शालग्रामशिलाशुद्धामूर्त्तयःसंतिभूतले

तासांचैवतुमूर्तीनांपूजनंकतिधास्मृतम् १
ब्राह्मणैःकतिपूज्यास्ताःक्षत्रियैर्वासुरेश्वर
वैश्यैर्वापिकथंशूद्रैःस्त्रीभिर्वापिसमादिश २
महादेवउवाच
शालग्रामशिलापुण्यापवित्राधर्मकारिणी
यस्यादर्शनमात्रेणब्रह्महाशुध्यतेनरः ३
तद्गृहंसर्वतीर्थानांप्रवरंश्रुतिनोदितम्
यत्रेयंसर्वदामूर्तिःशालग्रामशिलाशुभा ४
ब्राह्मणैःपंचपूज्यास्युश्चतस्त्रःक्षत्रियैस्तथा
वैश्यैस्तिस्त्रस्तथापूज्याएकापूज्याप्रयत्नतः ५
तस्यादर्शनमात्रेणशूद्रोमुक्तिमवाप्नुयात्
अनेनविधिनादेवियेनराःपूजयंतिवै ६
भोगान्सर्वांस्तत्रभुक्त्वायांतिविष्णोःसनातनम्
इयंसामहतीमूर्तिःसर्वदापापहारिणी ७
कैलासाद्यंफलंदेविजायतेपूजनाद्यतः
तत्रगंगाचयमुनागोदावरीसरस्वती ८
तिष्ठतेचशिलायत्रसर्वंतत्रनसंशयः
किमत्रबहुनोक्तेनभूयोभूयोवरानने ९
पूजनंमनुजैःसम्यक्कर्त्तव्यंमुक्तिमिच्छुभिः
भक्तिभावेनदेवेशियेऽर्चयंतिजनार्दनम् १०
तेषांदर्शनमात्रेणब्रह्महाशुध्यतेजनः
दासभावेनयेशूद्राःस्वर्चनंकुर्वतेसदा ११
तेषांपुण्यंनजानंतिब्रह्माद्याश्चसुरेश्वरि
भक्तिभावेनयेविप्राहरिमभ्यर्चयंतिवै १२
एकविंशतिकुलं तैस्तुतारितंतेषुजन्मसु
शंखचक्रांकितोयस्तुविप्रःपूजनमाचरेत् १३
पूजितंतुजगत्सर्वं तेनविष्णुप्रपूजनात्
पितरःसंवदंत्यस्मत्कुलेजाताश्चवैष्णवाः १४
तत्कुलंतारितं तैस्तुयावदाभूतसंप्लवम्
तेतुचास्मान्समुद्धृत्यनयंतेविष्णुमंदिरम् १५

सएवदिवसोधन्योधन्यामाताऽथबांधवाः
पितातस्यचवैधन्योधन्यावैसुहृदस्तथा १६
सर्वेधन्यतमाज्ञेयाविष्णुभक्तिपरायणाः
तेषांदर्शनमात्रेणमहापापात्प्रमुच्यते १७
उपपातकानिसर्वाणिमहांतिपातकानिच
तानिसर्वाणिनश्यंतिवैष्णवानांचदर्शनात् १८
पावकाइवदीप्यंतेयेनरावैष्णवाभुवि
विमुक्ताःसर्वपापेभ्योमेघेभ्यइवचंद्रमाः १९
आर्द्रंशुष्कंलघुस्थूलंवाङ्मनःकर्मभिःकृतम्
तत्सर्वंनाशमायातिवैष्णवानांचदर्शनात् २०
हिंसादिकंचयत्पापंज्ञानाज्ञानंकृतंचयत्
तत्सर्वंनाशमायातिदर्शनाद्वैष्णवस्यच २१
निःपापास्त्रिदिवंयांतिपापिष्ठायांतिशुद्धिताम्
दर्शनादेवसाधूनांसत्यंतुभ्यंमयोदितम् २२
संसारकर्दमालेपप्रक्षालनविशारदः
पावनःपावनानांचविष्णुभक्तोनसंशयः २३
प्रत्यहंविष्णुभक्तायेस्मरंतिमधुसूदनम्
तेतुविष्णुमयाज्ञेयाविष्णुस्तत्रनसंशयः २४
नवनीलघनश्यामंनलिनायतलोचनम्
शंखचक्रगदापद्मधरंपीतांबरावृतम् २५
कौस्तुभेनविराजंतंवनमालाधरंहरिम्
उल्लसत्कुंडलज्योतिःकपोलवदनश्रिया २६
विराजितंकिरीटेनवलयांगदनूपुरैः
प्रसन्नवदनांभोजंचतुर्बाहुंश्रियान्वितम् २७
एवंध्यायंतियेविप्राविष्णुंचैवतुपार्वति
तेविप्राविष्णुरूपाश्चवैष्णवास्तेनसंशयः २८
तेषांदर्शनमात्रेणभक्तयावाभोजनेनवा
पूजनेनचदेवेशिवैकुंठंलभतेध्रुवम् २९

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेशाल
ग्रामशिलापूजनमाहात्म्यंनामैकत्रिंशाधिकशततमोऽध्यायः १३१

द्वात्रिंशाधिकशततमोऽध्यायः-

पार्वत्युवाच
अनंतवासुदेवस्यकीदृशंस्मरणंस्मृतम्
यच्छ्रुत्वानपुनर्मोहोमानुषाणांप्रजायते १
महादेवउवाच
दृष्टतत्वेनदेवेशिस्मरंतिविष्णुंनित्यशः
तृषातुरोयथावारितद्वद्विष्णुंस्मराम्यहम् २
हिमेनाकुलितंविश्वंस्मरत्यग्निंयथातथा
तद्वदेवतुवैविष्णुंस्मरंतिविबुधादयः ३
पतिव्रतायथानारीपतिंस्मरतिनित्यशः
तथास्मरंतिलोकेशंविष्णुंविश्वेश्वरेश्वरम् ४
भयार्त्तःशरणंयद्वदर्थलोभीयथाधनम्
पुत्रकामोयथापुत्रंतथाविष्णुंस्मराम्यहम् ५
दूरस्थोऽपियथागेहंचातकोमाधवंयथा
ब्रह्मविद्यांब्रह्मविदस्तथाविष्णुंस्मराम्यहम् ६
हंसामानसमिच्छंतिऋषयःस्मरणंहरेः
भक्ताश्चभक्तिमिच्छंतितथाविष्णुंस्मराम्यहम् ७
प्राणिनांवल्लभोदेहोयत्रआत्माऽवतिष्ठति
आयुर्वांच्छंतियेजीवास्तथाविष्णुंस्मराम्यहम् ८
भ्रमराश्चयथापुष्पंचक्रवाकादिवाकरम्
यथात्मवल्लभाभक्तिस्तथाविष्णुंस्मराम्यहम् ९
अंधेनाकुलितालोकादीपंवांच्छंतिवैयथा
तथावैपुरुषालोकेस्मरणंकेशवस्यच १०
यथाश्रमार्त्ताविश्रामंनिद्राव्यसनिनोयथा
गतालस्यायथाविद्यांतथाविष्णुंस्मराम्यहम् ११
मातंगाःपार्वतींभूमिंसिंहावनगजादिकम्
तथैवस्मरणंविष्णोःकर्तव्यंपापभीरुभिः १२
सूर्यकांतेरवेर्योगाद्वह्निस्तत्रप्रजायते
एवंवैसाधुसंयोगाद्धरौभक्तिःप्रजायते १३
शीतरश्मेर्यथाकांतश्चंद्रयोगादपःश्रयेत्

एवंवैष्णवसंयोगान्मुक्तिर्भवतिशाश्वती १४
कुमुद्वतीयथासोमंदृष्ट्वापुष्पंविकासते
तद्वद्देवेकृताभक्तिर्मुक्तिदासर्वदानृणाम् १५
यथानलायाःसंत्रस्ताभ्रमरीस्मरणंचरेत्
तेनस्मरणयोगेननलासारूप्यतामियात् १६
गोपीभिर्जारबुद्ध्याचविष्णोश्चस्मरणंकृतम्
ताश्चसायुज्यतांनीतास्तथाविष्णुंस्मराम्यहम् १७
केऽपिवैदुष्टभावेनच्छद्मभावेनकेचन
केचापिलोभभावेनचिंतयंतिजनार्दनम् १८
भक्त्यावास्नेहभावेनद्वेषभावेनवापुनः
केऽपिस्वामित्त्वभावेनबुद्ध्यावाबुद्धिपूर्वकम् १९
येनकेनापिभावेनचिंतयंतिजनार्दनम्
इहलोकेसुखंभुक्त्वायांतिविष्णोःसनातनम् २०
अहोविष्णोश्चमाहात्म्यमद्भुतंलोमहर्षणम्
यदृच्छयापिस्मरणंत्रिधामुक्तिप्रदायकम् २१
नधनेनसमृद्धेनविपुलाविद्ययातथा
एकेनभक्तियोगेनसमीपेदृश्यतेक्षणात् २२
सांनिध्येऽपिस्थितोदूरेनेत्रयोरंजनंयथा
भक्तियोगेनदृश्येनभक्तैश्चैवसनातनः २३
इदंतत्वमिदंतत्वंमोहितोदेवमायया
भक्तितत्वंयदाप्राप्तंतदाविष्णुमयंजगत् २४
इंद्राद्यैरमृतंप्राप्तंसुखार्थेशृणुसुंदरि
तथापिदुःखितास्तेवैभक्त्याविष्णोर्यथाविना २५
भक्तिमेवामृतंप्राप्यपुनर्दुःखंनजायते
वैकुंठाख्यंपदंप्राप्यमोदतेविष्णुसन्निधौ २६
वारित्यक्त्वायथाहंसःपयःपिबतिनित्यशः
एवंधर्मान्परित्यज्यविष्णोर्भक्तिंसमाश्रयेत् २७
अन्यभक्तिंपरित्यज्यविष्णुभक्तिंसमाश्रयेत्
तोयंबद्धवातुवस्त्रेणकृतंकार्यंकथंभवेत् २८
प्राप्यदेहंविनाभक्तिंक्रियतेसवृथाश्रमः

विष्णुभक्तिंविनाधर्मानुपदिशंतियेजनाः
तेपतंतिसदाघोरेनरकेनात्रसंशयः २९
बाहुभ्यांसागरंतर्तुंयद्वन्मूर्खोऽभिवांछति
संसारसागरंतद्वद्विष्णुभक्तिंविनानरः ३०
विष्णुभक्तिंचरन्वंतिकर्मणापात्यतेयदि
अकिंचनःस्पृहायुक्तोमेरौधत्तेयथास्पृहाम् ३१
तवभक्तौतथादेवमयाहिक्रियतेस्पृहा
जन्मांतरेहिसाभक्तिर्मामकीयत्करोतिहि ३२
वह्निर्यथेहस्वल्पोऽपिदहतेविविधंवनम्
तद्वदेवतुसाभक्तिरणुमात्राकृतामया ३३
शतैश्चश्रूयतेभक्तिःसहस्रैरपिबुध्यते
तेषांमध्येतुदेवेशिभक्तोह्येकःप्रजायते ३४
बुद्धिंपरेषांदास्यंतिलोकेबहुविधाजनाः
स्वयमाचरतेसोऽपिनरःकोटिषुदृश्यते ३५
पूजयाहस्यतेभक्तिर्जयेनपरिहस्यते
एवंभावोहिदेवेशेभक्तिस्तेनैवगृह्यते ३६
सागरेचयथापातःकूपेत्राणोपवेशनम्
यस्यभावोहितद्वच्चभक्तिःसातेनगृह्यते ३७
मूलेसिक्तस्यवृक्षस्यपत्रंशाखासुदृश्यते
भजनादेवभोदेविफलमग्रेप्रतिष्ठितम् ३८
पानीयहारिणायद्वत्घटेचित्तंप्रधीयते
तद्वद्देवेहरौचित्तंधृत्वामोक्षमवाप्नुयात् ३९
शैशवेचयथामातागुडंस्तोकंददातिवै
पुनर्याचतिवैबालोगुडंवैलोभकारणात् ४०
नीरेनीरंयथाक्षिप्तंदुग्धेदुग्धेघृतेघृतम्
तद्वद्भेदंनपश्यंतिविष्णुभक्तिप्रसादतः ४१
भानुःसर्वगतोयद्वद्वह्निःसर्वगतोयथा
भक्तिःस्थितस्तथाभक्तःकर्मभिर्नैवबाध्यते ४२
अजामिलःस्वधर्मंचत्यक्त्वापापंसमाचरन्
पुत्रंनारायणंस्मृत्वामुक्तिंवैप्राप्तवान्ध्रुवम् ४३

दिवारात्रौचयेभक्तानाममात्रोपजीविनः
वैकुंठवासिनस्तेवैतत्रवेदाहिसाद्विणः ४४
अश्वमेधादियज्ञानांफलंस्वर्गेऽपिदृश्यते
तत्फलंतुसमग्रंवैभुक्त्वावैसंपतंतिच ४५
विष्णुभक्तिस्तथादेविभुक्त्वाभोगाननेकशः
वैकुंठंप्राप्यवातेषांपुनरागमनंकदा ४६
विष्णुभक्तिःकृतायेनविष्णुलोकेवसत्यसौ
दृष्टांतंपश्यदेवेशिविष्णुभक्तिप्रसादतः ४७
ग्रावाणोजलमध्यस्थाःशतशस्तेनतारिताः
विनाजलंसोमकांतोविष्णुभक्तस्यमानसम् ४८
दर्दुरोवसतेनीरषट्पदोहिवनांतरे
गंधंवेत्तिकुमुद्वत्याभक्तोभक्तौतथाहरेः ४९
गंगातटेवसंत्येकेएकेवैशतयोजनम्
कश्चिद्गंगाफलंवेत्तिविष्णुभक्तिंपरस्तथा ५०
कर्पूरागुरुभारंहिउष्ट्रोवहतिनित्यशः
मध्यगंधंनजानातितथाविष्णुंबहिर्मुखाः ५१
मृगाःशालंहिजिघ्रंतिकस्तूरीगंधमिच्छवः
स्वनाभिस्थंनजानंतितथाविष्णुंबहिर्मुखाः ५२
उपदेशोहिमूर्खाणांवृथावैनगनंदिनि
तथैवविष्णुभक्तेर्हिउपदेशोबहिर्मुखे ५३
अहिनाचपयःपीतंतत्पयोहिविषायते
तथावैचान्यभक्तानांविष्णुभक्तिर्विषायते ५४
चत्तुर्विनायथादीपंदृष्ट्वादर्पणमेवच
समीपस्थानपश्यंतितथाविष्णुंबहिर्मुखाः ५५
पावकोहियथाधूमैरादर्शोपिमलेनच
यथोल्बेनावृतोगर्भोदेहेकृष्णस्तथावृतः ५६
दुग्धेसर्पिःस्थितंयद्वत्तिलेतैलंतुसर्वदा
चराचरेतथाविष्णुर्दृश्यतेनगनंदिनि ५७
एकसूत्रेमणिगणाधार्यंतेबहवोयथा
एवंब्रह्मादिभिर्विश्वंसंप्रोतंब्रह्मचिन्मये ५८

यथाकाष्ठेस्थितोवह्निर्मंथनादेवदृश्यते
एवंसर्वगतोविष्णुर्ध्यानादेवप्रदृश्यते ५९
आदिरेकोभवेद्दीपस्तस्माज्जाताःसहस्रशः
एवमेकःस्थितोविष्णुःसर्वव्याप्यप्रतिष्ठति ६०
यथासूर्योदयेज्योतिःपुष्करेतिष्ठतेसदा
दृश्यतेबहुधानीरेलोकेविष्णुस्तथाहिसः ६१
मारुतःप्रकृतिस्थोऽपिनानागंधवहःसदा
ईश्वरःसर्वजीवस्थोभुंक्तेप्रकृतिजान्गुणान् ६२
शर्कराविषसंयोगान्नीरंभवतियादृशम्
संभूत्त्वातादृशोह्यात्माकर्मणःफलमश्नुते ६३
उर्वीचनीरसंयोगान्नानावृक्षाप्रजायते
प्रकृतेर्गुणसंयोगान्नानायोनिषुजायते ६४
गजेवैमशकेचैवदेवेवामानुषेऽपिवा
नाधिकोनचन्यूनोवैनिष्ठोदेहेसनिश्चलः ६५
ब्रह्मादिस्तंबपर्यंतायेचात्रभुविमानवाः
देवायक्षास्तथानागागंधर्वाःकिन्नरादयः ६६
तेषुसर्वेषुदृश्यंतेजलेचंद्रमसोयथा
ससच्चिदानंदशिवःसमहेशोहिदृश्यते ६७
सवैविष्णुस्तथाप्रोक्ताःसोऽयसर्वगतोहरिः
वेदांतवेद्यःसर्वेशःकालातीतोह्यनामयः ६८
ऋएवंतंवेत्तियोदेविसभक्तोनात्रसंशयः
एकोहिबहुधाज्ञेयोबहुधाप्येकएवसः ६९
नामरूपविभेदेनजल्प्यतेबहुधाभुवि
चक्षुषानरवेज्योतिर्भानुनाचक्षुरेधते ७०
परमात्मातथाचात्माप्रतिदेहेतुसर्वदा
घटेघटेयथाकाशस्तस्मिन्भग्नेयथास्थितः ७१
रूपेरूपेतथात्वंहिभग्नेतस्मिन्सुनिश्चलः
यथाकाष्ठमयंरूपंपततेप्रभुणाविना ७२
क्रिमिभेदमयोदेहोपततेचात्मनाविना
हेम्नोभवंतिवर्णाश्चवह्निनायांतिपूर्ववत् ७३

तद्वज्जीवाःप्रपद्यंतेभक्त्यावैपूर्वरूपताम्
स्वघनेनावृतंसूर्यंमूढाःपश्यंतिनिष्प्रभम् ७४
तथाऽज्ञानधियोमूढानजानंतितमीश्वरम्
निर्विकल्पंनिराकारंवेदां तैःपरिपाठ्यते ७५
निराकाराच्चसाकारंस्वेच्छयाचप्रकाशते
तस्मात्संजातमाकाशंनिःशब्दंगुणवर्जितम् ७६
आकाशान्मारुतोजातःसशब्दंचतदाऽभवत्
वातादजायतज्योतिर्ज्योतिषश्चाभवज्जलम् ७७
तज्जलेरुक्मगर्भश्चविराड्वैविश्वरूपधृक्
तस्यनाभिसरोजेचब्रह्मांडानांचकोटयः ७८
प्रकृतिःपुरुषस्तस्मान्निर्मितंतुत्रिधाजगत्
तयोर्द्वयोश्चसंयोगात्तत्त्वयोगोऽभ्यजायत ७९
सात्विकीविष्णुसंभूतिर्ब्रह्मावैराजसःस्मृतः
शिवस्तुतामसःप्रोक्तएभिःसर्वंप्रवर्तितम् ८०
एकाब्राह्मीस्थितिर्लोकेकर्मबीजानुसारतः
तयासंहरतेविष्णुःसर्वलोकानुशेषतः ८१
तिष्ठत्यसौतदातत्रभगवान्विष्णुरव्ययः
एवंसर्वगतोविष्णुरादिमध्यांतएवच ८२
अविद्ययानजानंतिलोकावैकर्मनिश्चिताः
वर्णोचितानिकर्माणियःकालेषुप्रकारयेत् ८३
यत्कर्मविष्णुदैवत्यंनहिगर्भस्यकारणम्
वेदांतशास्त्रेमुनिभिःसर्व दैवविचार्यते ८४
ब्रह्मज्ञानमिदंदेहेतदहंपरिकीर्त्तये
शुभाशुभस्यकार्यंचकारणंमनएवहि ८५
मनसाशुध्यतेसर्वंतदाब्रह्मसनातनम्
मनएवसदाबंधुर्मनएवसदारिपुः ८६
मनसातारिताःकेचिन्मनसायातिताश्चके
मध्येसर्वपरित्यागःबाह्येकर्मतथाचरन् ८७
एवमेवकृतंकर्मकुर्वन्नपिनलिप्यते
पद्मपत्रंयथानीरलेशैरपिनलिप्यते ८८

अग्निरग्नौयथाक्षिप्तोभक्त्याचकिंप्रयोजनम्
यदाभक्तिरसोज्ञातोनमुक्तीरोचतेतदा ८९
योगैरष्टविधैर्विष्णुर्नप्राप्यश्चेहजन्मनि
भक्त्यावाप्राप्यतेविष्णुःसर्वदासुलभोभवेत् ९०
वेदांतैःप्राप्यतेज्ञानंज्ञानेनज्ञेयमेवच
तत्तुज्ञेयंयदाप्राप्तंतदाशून्यमिदंजगत् ९१
बलेनप्राप्यतेविष्णुर्योगैरष्टविधैश्चकिम्
सर्वेषामेवभावानांभावशुद्धिःप्रशस्यते ९२
आलिग्यतेयथाकांतायथाभावस्तथाफलम्
उपानद्युक्तपादोहिवेत्तिचर्ममयींमहीम् ९३
बुद्धिर्यथाविधायस्यतद्वत्समन्यतेजगत्
दुग्धेनसिक्तोनिंबोऽपिकटुभावंनतुत्यजेत् ९४
प्रकृतिंयांतिभूतानिउपदेशोनिरर्थकः
छित्वावैसहकारंचफलंपत्रंकथंलभेत् ९५
इंद्रियाणांसुखार्थेनवृथाजन्मकथंनयेत्
स्थाल्यांवैडूर्यमय्यांहिपच्यतेचौषधंयथा ९६
दह्यतेचागदस्तद्वद्वृथाजन्मकथंभवेत्
निधानंचगृहेक्षिप्त्वाशुभःसेवांकथंचरेत् ९७
त्यक्त्वावैकुंठनाथंतमन्यमार्गेकथंरमेत्
भक्तिहीनैश्चतुर्वे दैःपठितैःकिंप्रयोजनम् ९८
श्वापचोभक्तियुक्तस्तुत्रिदशैरपिपूज्यते
स्वकरेकंकणंबद्धादर्पणैःकिंप्रयोजनम् ९९
ब्रह्मरुद्रादिभिर्देवैर्दत्तैश्वर्याश्चसेवकाः
अर्पितं नैवगृह्णंतिप्रभोश्चैवतुकिंचन १००
अकिंचनायभक्तायदातुंनालंगतोवरम्
निःशरीरस्यकृष्णस्यतत्रध्यानंकथंभवेत् १०१
साकारंबहवोदृष्ट्वागताभक्त्याचतत्पदम्
पूजाभक्तिःकथंशून्येसाकारेकथ्यतेबुधैः १०२
शून्यमार्गेकथंयातिआधारेणविनानरः
साकारोयःस्वयंस्वामीनिराकारःसवैप्रभुः १०३

साकारोहिसुखेनैवनिराकारोनदृश्यते
सेवारसश्चसाकारेनिराकारेणवैरसः १०४
साकारेणनिराकारोज्ञायतेस्वयमेवहि
हरिस्मृतिप्रसादेनरोमांचिततनुर्यदा १०५
नयनानंदसलिलंमुक्तिर्दासीभवेत्तदा
बाल्येचयत्कृतंपापंतत्कथंनविनश्यति १०६
पूजादानव्रतैस्तीर्थैर्जपहोमैस्त्वदर्पितैः
निजधर्मंपरित्यज्यतपोघोरंकथंचरेत् १०७
स्वधर्मेनिधनंश्रेयःपरमधर्मोभयावहः
विधिंसंत्यज्यशास्त्रीयंतपोघोरंकथंचरेत् १०८
आश्रमेणविनामूढोनैवसिद्धिमवाप्नुयात्
ब्रह्मणानिर्मितावर्णाःस्वेस्वेधर्मेनियोजिताः १०९
स्वधर्मेणागतंद्रव्यंशुक्लद्रव्यंतदुच्यते
शुक्लद्रव्येणयद्दानंदीयतेश्रद्धयान्वितम् ११०
स्वल्पेनापिमहत्पुरायंतस्यसंख्यानविद्यते
नीचसंगेनयद्द्रव्यमानीतंगृहकर्मसु १११
तेनद्रव्येणयद्दानंकृतंवैमनुजादिभिः
तत्फलंनभवेत्तेवैनैवतत्फलभागिनः ११२
यादृशंकुरुतेकर्मइंद्रियाणांसुखेच्छया
तादृशींयोनिमाप्नोतिमूढोहिज्ञानदुर्बलः ११३
इहयत्कुरुतेकर्मतत्परत्रोपभुज्यते
पुरायमाचरतःपुंसोयदिदुःखंप्रजायते ११४
तदातापोनकर्त्तव्यस्तत्कर्मपूर्वदेहजम्
पापमाचरतःपुंसोजायतेदुःखमेवच ११५
नकर्त्तव्यस्तदाहर्षःसुखेतत्रसुरेश्वरि
रज्जुबद्धाश्चपशवःप्रभुणास्वेच्छयायथा ११६
नीयंतेकर्मबंधेनमनुजाअपिभूतले
शाखामृगोवनचरोनृत्यतेचगृहेगृहे ११७
एवंचकर्मणाजीवानीयंतेसर्वयोनिषु
क्रीडताकंदुकोयद्वत्प्रेर्यतेप्रभुणेच्छया ११८

कर्मणावातथाजंतुर्नीयतेसुखदुःखयोः
प्राणीस्वकर्मभिर्बद्धोनशक्तोबंधनिग्रहे ११९
देवोवैकर्मभिर्बद्धात्रृषयश्चतथापरे
कैलासेरुद्रदेहस्थाभुजंगाविषभोजिनः १२०
अ्रसमर्थाःसुधाभोक्तुंकर्मयोनिर्बलीयसी
नीरोगदेहदातायोबुधैःसूर्योहिकथ्यते १२१
तद्रथेसारथिःपंगुःकर्मयोनिर्बलीयसी
इंद्रद्युम्नोहिराजर्षिगर्जत्वंकर्मणागतः १२२
समर्थस्वामिनातस्मिन्कर्मयोनिर्वृथाकृता
रुद्रब्रह्मादयोदेवामानवाश्चासुराश्चये १२३
तेसर्वेकर्मबद्धाश्चविचरंतिमहीतले
कर्माधीनंजगत्सर्वंविष्णुनानिर्मितंपुरा १२४
तत्कर्मकेशवाधीनंरामनाम्नाविनश्यति
सर्वत्रापिस्थितंतोयंमुक्तिदंतुसितासिते १२५
एवमाचरतांकर्ममुक्तिदंकेशवार्चनम्
इंद्रियाणांसुखार्थाययःकर्ममनसाचरेत् १२६
अ्रहंकृतेनमन्येतकेवलंदेहमेवहि
मनसासंस्मरन्जंतुःप्रायश्चित्तंसमाचरेत् १२७
सपूर्वकर्मभोक्ताचअ्रग्रेकर्मनवर्द्धते
प्रशंसंतिग्रहान्केचित्केचित्प्रेतपिशाचकान् १२८
केचिद्देवान्प्रशंसंतिह्योषधीःकेचिदूचिरे
केचिन्मंत्रंचसिद्धिंचकेचिद्बुद्धिपराक्रमम् १२९
उद्यमंसाहसंधैर्यंकेचिन्नीतिंबलंतथा
अ्रहंकर्मप्रशंसाभिःसर्वेकामानुवर्तिनः १३०
इतिमेनिश्चिताबुद्धिःकथ्यतेपूर्वसूरिभिः
यदापुण्यमयोजंतुःपापंकिंचिन्नःविद्यते १३१
ज्ञानंहिद्विविधंचैवतदापुण्यंसुभंवेत्
पापंपुण्यंसमंयस्यतदाकर्मसुविद्यते १३२
समंयोगंयदाद्वंद्वंतदानंदपदंव्रजेत्
बाह्येसर्वपरित्यागीमनसासंस्पृहीभवेत् १३३

तद्वृथाचरितंतस्यतेनतत्पापभोगिनः
बाह्येकरोतिकर्माणिमनसानिःस्पृहोभवेत् १३४
त्यागोऽसौमध्यमोज्ञेयोनतुपूर्णफलंलभेत्
बाह्यमध्येपरित्यज्यबुद्ध्याशून्यावलंबनम् १३५
त्यागःसउत्तमोज्ञेयोयोगिनामपिदुर्ल्लभः
क्रोधात्सर्वंत्यजंत्येकेकेचिद्वादप्रभावतः १३६
कष्टात्सर्वंत्यजंत्येकेत्यागाःसर्वेनुमध्यमाः
सुबुद्ध्याश्रद्धयायुक्तोनक्रोधादिवशंगतः १३७
कर्मणांह्यवलिप्तोऽपिसुगतिंयातिमानवः
शुचीनांश्रीमतांगेहेधीमतांयोगिनामपि १३८
योगाद्भ्रष्टस्तुजायेतकुलेवैद्विजपूर्वके
स्वल्पेनैवतुकालेनपूर्णंयोगंचविंदति १३९
चिदानंदपदंगच्छेद्योगभक्तिप्रसादतः
पंकेनैवयथापंकंरुधिरंरुधिरेणवै १४०
हिंसयाकर्मणाकर्मकथंद्दालयितुंद्दमः
हिंसाकर्ममयोयज्ञःकथंकर्मद्दयेद्दमः १४१
स्वर्गकामकृतायज्ञास्वर्गेतेचाल्पसौख्यदाः
अनित्यानितुसौख्यानिभवंतिचबहून्यपि १४२
नित्यंसौख्यंनतेष्वस्तिविनाभक्त्याहरेःक्वचित्
सार्वभौमसुखंराज्यंस्वर्गेचापितथासुखम् १४३
अन्यत्किंचिन्नवांछामिगर्भवासाद्बिभेम्यहम्
ग्रावावैभिद्यतेलोहैर्माणिक्यं नैवभिद्यते १४४
नानाकाममयीबुद्ध्याविष्णुभक्तिर्नभिद्यते
बकोजलचरान्भुंक्तेमंडूकादींश्चवर्जयेत् १४५
तथायमःसर्वहंतावर्जयेत्कृष्णसेवकान्
योरद्दतिसहर्ताचसवैपालकउच्यते १४६
अपराधशतैर्युक्तंस्वंस्थानेयत्रवासिता
यथाकृतापराधस्यकृष्णस्तस्यकृपाकरः १४७
फलंचलभतेवाद्यरद्दकःकिंकरोतिचेत्
एवमात्माचदेहेस्मिन्परवश्यकृपाकरः १४८

प्राप्तोनपारःशनकैर्मल्लैर्युक्तानवापिता
व्याधस्यमुक्तिदाताचकुब्जकातारितास्वयम् १४९
ब्रह्माद्यैर्दुर्लभःस्वप्नेसुलभोगोपमंदिरे
गोपोच्छिष्टंयदाभुक्तंतदातेतारिताःस्वयम् १५०
योगिभिर्गीयतेनित्यंपरमात्माजनार्दनः
अव्ययःपुरुषश्रीमान्दृष्ट्वातैर्देविविस्मये १५१
एतत्स्मरणकंदिव्यंयेपठंतिदिनेदिने
सर्वपापविनिर्मुक्तायांतिविष्णोःसनातनम् १५२
अनयाभावबुद्ध्याचपठनंविष्णुसन्निधौ
इहलोकेसुखंभुक्त्वापरंपदमवाप्नुयात् १५३

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखण्डे
विष्णुस्मरणंनामद्वात्रिंशाधिकशततमोऽध्यायः १३२

त्रयस्त्रिंशाधिकशततमोऽध्यायः

पार्वत्युवाच
द्वीपेऽस्मिन्यानितीर्थानितानिमेवदसुव्रत
द्वीपानांद्वीपराजोऽयसर्वदाभुविनिर्मितः
संख्ययात्वंवदस्वामिन्कृपांकृत्वाममोपरि १
महादेवउवाच
सर्वगःसर्वभूतेषुद्रष्टव्यःसर्वतोभुवि
सप्तलोकेषुयत्किंचिद्दृश्यतेसचराचरम् २
तत्वंतेनविनादेविनदृष्टंनश्रुतंमया
अतोविष्णुर्महादेवःकेशवःक्लेशनाशनः
तीर्थरूपेणवर्तेतद्वीपेह्यस्मिन्सुरेश्वरि ३
तानितीर्थानिवक्ष्यामिसांप्रतंनात्रसंशयः
प्रथमंपुष्करंक्षेत्रंतीर्थानांप्रवरंशुभम्
वाराणसीद्वितीयंतुक्षेत्रंमुक्तिप्रदायकम् ४
तृतीयं नैमिषंक्षेत्रमृषीणांपावनंस्मृतम्
प्रयागंवैचतुर्थंतुतीर्थानामुत्तमंस्मृतम् ५
कार्मुकंपंचमंप्रोक्तंउत्पन्नंगंधमादने

एकादशंकान्यकुब्जंयत्रतिष्ठतिवामनः ६
सप्तमंविश्वकायंतुअवरेपर्वतेशुभे
अष्टमंगौतमाख्यंचमंदरेनिर्मितंपुरा ७
मदोत्कटंतुनवमंदशमंरथचैत्रकम्
एकादशंकान्यकुब्जंयत्रतिष्ठतिवामनः ८
द्वादशंमलयंचैवकुब्जाम्रकमतःपरम्
विश्वेश्वरंगिरिकर्णंकेदारंगतिदायकम् ९
बाह्यंहिमवतःपृष्ठेगोकर्णेगोपकंतथा
स्थानेश्वरंहिमाद्रौचबिल्वकेबिल्वपत्रिकम् १०
श्रीशैलेमाधवंतीर्थंभद्रंभद्रेश्वरेतथा
वाराहेविजयंप्रोक्तंवैष्णवंवैष्णवेगिरौ ११
रौद्रंतुरुद्रकोटेतुपैत्र्यंकालिजरेगिरौ
कंपिलेकापिलंतीर्थंमुकुटेकर्कोटकंतथा १२
शालग्रामोद्भवंतीर्थंगल्लिकायांसुरेश्वरि
नर्मदायांशिवाख्यंतुमायायांविश्वरूपकम् १३
उत्पलाद्यंसहस्राद्यंजातंवैरैवतेगिरौ
गंगायांपितृतीर्थंचविष्णुपादोद्भवंतथा १४
विपाशायांविपापाचपाटलेपुंड्रवर्द्धनम्
नारायणंसुपार्श्वेतुत्रिकूटेविष्णुमंदिरम् १५
विपुलेविपुलंनामकल्याणंमलयाचले
कौरवंकोटितीर्थेचसुगंधंगंधमादने १६
कुब्जाम्रकेत्रिसंध्यंतुगंगांद्वारेहरिप्रियम्
शैलंविंध्यप्रदेशेतुबदर्यांसारस्वतंस्मृतम् १७
कालिद्यांकालरूपंचसह्येवैसायकंस्मृतम्
चांद्रंचंद्रप्रदेशेतुरमणंतीर्थनायकम् १८
यमुनायांमृगाख्यंतुकरवीरेकुरूद्भवम्
विनायकेपर्वतेवैउमाख्यंतीर्थमेवच १९
आरोग्यंभास्करेदेशेमहाकालेमहेश्वरम्
तीर्थंअभयदंनामामृताख्यंविंध्यकंधरे २०
मंडपेविश्वरूपंचस्वाहाख्यंईश्वरेपुरे

वैगलेयंप्रचंडायांचांडिकंमरकंटके २१
सोमेश्वरंतथातीर्थेप्रभासेपुष्करंतथा
देवमात्रंसरस्वत्यांपारावततटेस्थितम् २२
महालयंमहापद्मेपयोष्णयांपिंगलेश्वरम्
सिंहिकायांतथातीर्थंसौरवेरविसंज्ञकम् २३
कार्तिकंकृत्तिकाक्षेत्रेशांकरंशंकरेगिरौ
उत्पलाख्यंततोदिव्यंसुभद्रासिंधुसंगमे २४
गाणपत्यंततश्चैवपर्वतोविष्णुसंज्ञके
जालंधरेततःप्रोक्तंतीर्थंविष्णुमुखंचयत् २५
तारेवैतारकंप्रोक्तंपर्वतेविष्णुसंज्ञके
देवदारुवनेपौंड्रंपौष्कंकाश्मीरमंडले २६
भौमंहिमंहिमाद्रौचतुष्टिकंपौष्टिकंपुनः
कपालमोचनंतीर्थंजातंमायापुरेतथा २७
शंखोद्धारंततश्चैवदेवंवैशंखधारकम्
पिंडेवैपिंडनामानंसिद्धेवैखानसंभवेत् २८
अच्छोदेविष्णुकामंतुधर्मकामार्थमोक्षदम्
औषध्यंचोत्तरेकूलेकुशद्वीपेकुशोदकम् २९
मन्मथंहेमकूटेतुकुमुदेसत्यवादनम्
वदंत्यावाश्वकंतीर्थंविंध्येवैमातृकंस्मृतम् ३०
चित्तेब्रह्ममयंतीर्थंतीर्थानांपावनंस्मृतम्
एतेषांसर्वतीर्थानामुत्तमंशृणुसुंदरि ३१
विष्णोर्नाममयंतीर्थंनभूतंनभविष्यति
ब्रह्महाहेमहारीवाबालहागोघ्नएवच ३२
मुच्यतेनाममात्रेणप्रसादात्केशवस्यतु
कलौद्वारवतीरम्याधन्योदेवोजनार्दनः ३३
येपश्यंतिनरादेवंमुक्तिस्तेषांसुनिश्चला
एवंधन्यतमंदेवंविष्णुंसर्वेश्वरंप्रभुम् ३४
चिंतयामिमहादेविविद्वत्संस्थोजनार्दनम्
अष्टोत्तरंतुतीर्थानांशतमेतदुदाहृतम् ३५
योजपेच्छृणुयाद्वापिसर्वपापैःप्रमुच्यते

एषुतीर्थेषुयःस्नात्वापश्येन्नारायणंहरिम् ३६
सर्वपापविनिर्मुक्तोयातिविष्णोःसनातनम्
जगन्नाथंमहातीर्थंलोकानांपावनंस्मृतम् ३७
येगच्छंतिनरश्रेष्ठास्तेपियांतिपरांगतिम्
शताष्टकंमहापुरायंश्रावयेत्पितृकर्मणि ३८
इहलोकेसुखंभुक्त्वायातिविष्णोःसनातनम्
गोदानेश्राद्धदानेवाग्रहन्यहनिवापुनः ३९
देवार्चनविधौविद्वान्परंब्रह्माधिगच्छति ४०

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायांउत्तरखंडेजंबूद्वीपतीर्थवर्णनंनामत्रयस्त्रिंशाधिकशततमोऽध्यायः १३३

चतुस्त्रिंशाधिकशततमोऽधयायः

महादेवउवाच
वेत्रवत्यास्तुमाहात्म्यंवक्ष्यामिशृणुसुंदरि
यत्रस्नात्वाविमुच्यंतेयावदाभूतसंप्लवम् १
वृत्रेणचकृतःकूपोमहागंभीरसंज्ञकः
कूपात्सानिःसृतादेवीमहापापौघनाशिनी २
यथागंगातथेयंचसरिच्छ्रेष्ठासुरोत्तमे
अस्यादर्शनमात्रेणपापौघाःशमयंतिच ३
शृणुदेविप्रवक्ष्यामिइतिहासंपुरातनम्
यच्छ्रुत्वापापिनोदोषैर्विमुक्ताःकर्मबंधनात् ४
चंपकेनगरेचैवराजाराज्यंकरोतिसः
सदादुष्टोदुष्टरूपोजनानांसप्रपीडकः ५
अधर्मोधर्मरूपश्चविष्णुनिंदापरायणः
देवद्विजनिहंताचआश्रमाणांविदूषकः ६
वेदनिंदापरःश्रीमान्मूर्खोवानिर्घृणःशठः
असच्छास्त्रेषुनिरतःपरदाराभिमर्शकः ७
विदारुणेतिनामाचसंजातोमूर्खएवच
कदाचिद्दैवयोगेनआगतस्तांनदींप्रति ८
आखेटकसमायुक्तःस्वयंकुष्ठीसुरेश्वरि

महापापादयंजातोब्राह्मणानांचनिंदनात् ९
वृथावादीदुरात्माचशठोवैनिर्घृणः पशुः
वेदनिंदारतोनित्यंगोशास्त्राणांप्रदूषकः १०
एवंविधोवनेभ्राम्यंस्तृषार्तःससुहृद्वृतः
अश्वादुत्तीर्यराजाऽसौजलंपीत्वागृहंगतः ११
तेनैवोदकपानेनगतंकुष्ठंनसंशयः
बुद्धिस्तुनिर्मलाजातातस्यराज्ञोविशेषतः १२
विष्णौभक्तिःसमुत्पन्नातदातस्यसुरेश्वरि
ततःप्रभृतिकालेनस्नानंवैकृतवान्सदा १३
निर्मलोबहुरूपाढ्योजातस्तत्रसुरेश्वरि
इहलोकेसुखंभुक्त्वाकृत्वायज्ञाननेकशः १४
विप्रेभ्योदक्षिणांदत्वासगतोवैष्णवंपदम्
इतिज्ञात्वातुभोदेविवेत्रवत्यांविशेषतः १५
स्नानंकुर्वंतियेविप्रास्तेमुक्तानगनंदिनि
राजन्योवाथवैश्योवाशूद्रोवासुरसत्तमे १६
यत्रस्नानंप्रकुर्वंतितेमुक्ताःपापबंधनात्
कार्तिकेवाऽथमाघेवाबाह्योवावेदनिंदकः १७
सरितांसंगमेस्नात्वामुच्यतेदेविकिल्बिषात्
साभ्रमत्याःसमंयत्रतस्याःसंगःप्रदृश्यते १८
तत्रस्नात्वाविशेषेणमुच्यतेब्रह्महासदा
खेटकंनगरंदिव्यंस्वर्गरूपंतुवाऽनघे १९
ब्रह्मणातत्रवैदेवियोगाश्चबहवःकृताः
तत्रस्नात्वाचभुक्त्वाचपुनर्जन्मनविद्यते २०
साद्वितीयास्मृतागंगाकलौदेविविशेषतः
येनराःसुखमिच्छंतिधनमिच्छंतियेनराः २१
स्वर्गमिच्छंतियेलोकास्तेवैस्नात्वापुनःपुनः
इहलोकेसुखंभुक्त्वायांतिविष्णोःसनातनम् २२
सूर्यवंशेचयेजाताःसोमवंशेतथैवच
आगतावेत्रवत्यांतुस्नात्वानिर्वृतिमागताः २३
दर्शनाद्धरतेदुःखंस्पर्शनान्मानसंह्यघम्

स्नात्वाभुक्त्वातथादेविमुक्तिभागीनसंशयः २४
स्नानाज्जपात्तथाहोमादनंतंफलमश्नुते
गत्वावाराणसीतीर्थंभक्तयाचांद्रायणंचरेत् २५
तत्रगत्वामहत्पुरायंतत्पुरायंसुरसत्तमे
वेत्रवत्यांविशेषेणपंचत्वंयदिगच्छति २६
सवैचतुर्भुजोभूत्वायातिविष्णोःपरंपदम्
पृथिव्यांयानितीर्थानियेदेवाःपितरस्तथा २७
तेसर्वेचवसंतीहवेत्रवत्यांसुरेश्वरि
किमन्यद्बहुनोक्तेनभूयोभूयोवरानने २८
वेत्रवत्याःसमंतीर्थंपृथिव्यांनसनातनि
अहंविष्णुस्तथाब्रह्मादेवाश्चपरमर्षयः २९
तिष्ठंतिदेवताःसर्वेवेत्रवत्यांमहेश्वरि
एककालंद्विकालंवात्रिकालंचविशेषतः ३०
स्नानंकुर्वंतियेतत्रतेवैमुक्तानसंशयः ३१
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्र्यांसंहितायांउत्तरखंडेवेत्रवती माहात्म्येचतुस्त्रिंशाधिकशततमोऽध्यायः १३४

पञ्चत्रिंशाधिकशततमोऽध्यायः

श्रीमहादेवउवाच
साभ्रमत्यास्तुमाहात्म्यंवक्ष्येदेवियथातथम्
कश्यपोवैमुनिश्रेष्ठस्तपोवैतप्तवान्महत् १
अनेकवर्षपर्यंतंतेनतप्तंमहत्तपः
अर्बुदेपर्वतेरम्येनानाद्रुमसमाकुले २
तत्रगत्वातपस्तप्तंऋषिणाकश्यपेनवै
सरस्वतीयत्ररम्यापवित्रापापनाशिनी ३
एकस्मिन्दिवसेदेविगतोऽसौनैमिषंप्रति
तदातेऋषयःसर्वेकथांचक्रुरनेकशः ४
तदातैस्तुद्विजैःसम्यक्पृष्टोऽसौकश्यपोमुनिः
अहोकश्यपनःप्रीत्यैगंगेहानीयतांप्रभो ५
भवन्नाम्नातुसागंगाभविष्यतिसरिद्वरा

तेषांवाक्यमुपाकर्ण्यनमस्कृत्यद्विजांश्चतान् ६
आगतोह्यर्बुदारण्येसरस्वतीतीरसंनिधौ
तत्रतप्तंतदातेनतपःपरमदुष्करम् ७
आराधितोह्यहंतेनकश्यपेनद्विजेनवै
प्रत्यक्षोऽहतदाजातस्तस्यद्विजवरस्यच ८
वरंवरयभद्रंतेयत्तेमनसिवर्त्तते ९
कश्यपउवाच
वरंदातुंसमर्थोऽसिदेवदेवजगत्पते
शिरःस्थितायागंगेयंपवित्रापापहारिणी १०
ममदेयाविशेषेणमहादेवनमोस्तुते
तदादेविमयोक्तंचगृह्णीष्वत्वंद्विजोत्तम ११
जटामेकांपरित्यज्यदत्तागंगातदामया
तांगृहीत्वाद्विजश्रेष्ठःस्वस्थानंहर्षतोययौ १२
केशरन्ध्रंनामतीर्थंवासोवैकश्यपस्यच
गतस्तत्रतुदेवेशिमुनिभिःपरिवारितः १३
कश्यपेनसमानीताकाश्यपीसासरिद्वरा
यस्यादर्शनमात्रेणब्रह्महामुच्यतेकिल १४
पार्वत्युवाच
स्नानमात्रेणकिंपुण्यंतत्रतीर्थेवदस्वमे
विश्वनाथकृपालुस्त्वंदयांकुरुममोपरि १५
दर्शनेकिंभवेत्पुण्यंस्नानेकिंवददेवराट्
महिमाकीदृशोब्रह्मन्सर्वंत्वंवक्तुमर्हसि १६
महादेवउवाच
मयाश्रुतान्यनेकानितीर्थान्यायतनानिच
श्रीविष्णोश्चप्रसादाच्चनद्यःसागरगाःप्रभोः १७
गंगाचयमुनारेवातापीचैवमहानदी
गोदावरीतुंगभद्राकौशिकीगल्लिकातथा १८
कावेरीवेदिकाभद्रासरयूःपापहारिणी
अन्याश्चविविधानद्यःसर्वपापहराभुवि १९
प्रयागस्तीर्थराजश्चकाशीपुष्करएवच

नैमिषाररायसंज्ञंतुतीर्थंचामरकंटकम् २०
उत्तमंद्वारकाक्षेत्रमर्बुदाररायमुत्तमम्
एवंविधानिदिव्यानिक्षेत्राणिविविधानिच २१
श्रुतानितत्रदेवेशिमायाविष्णोःप्रसादतः
पूर्वंभगीरथेनैवयाचितोऽहतुपार्वति २२
तदादत्ताइयंगंगाविष्णोर्लोकमभीप्सुना
कश्यपायपुनर्दत्ताऋृषीणांवचनान्मया २३
इयंवैकाश्यपीगंगारोगदोषहरासदा
इयंयाकथ्यतेलोकेयुगेवैनामपूर्वकम् २४
तदहंकथयिष्यामिशृणुसुंदरितत्वतः
कृतेकृतवतीनामत्रेतायांगिरिकर्णिका २५
द्वापरेचंदनानामकलौसाभ्रमतीस्मृता
दिनेदिनेविशेषेणस्नानार्थंतुनराश्चये २६
सर्वपापविनिर्मुक्तायांतिविष्णोःसनातनम्
प्लक्षावतरणेतीर्थेसरस्वत्यांतथेश्वरि २७
केदारेचकुरुक्षेत्रेयत्फलंस्नानतोभवेत्
तत्फलंतुनृणांनूनंसाभ्रमत्यादिनेदिने २८
भवतीतिनसंदेहोव्यासस्यवचनंयथा
नभस्येपरपक्षेतुप्रत्यहंवासुरेश्वरि २९
अमावास्यादिनेसम्यक्श्राद्धदानेचयत्फलम्
नरस्तत्फलमाप्नोतिसाभ्रमत्यावगाहनात् ३०
कार्तिक्यांकृत्तिकायोगेश्रीस्थलेमाधवाग्रतः
तत्फलंलभतेमर्त्योसाभ्रमत्यावगाहनात् ३१
एषाश्रेष्ठतमादेविसर्वलोकेषुपावनी
इयंधन्यतमादेविपवित्राह्यघनाशिनी ३२
यस्यांवैसाभ्रमत्यांचएतेतिष्ठंतिनित्यशः
पूर्वसंबंधिनोयेचउत्तरेयेतथापुनः ३३
पाश्चात्यादाक्षिणात्याश्चसर्वेयांतिचनित्यशः
तीर्थयात्रामिषेणैवखेटकेब्रह्मसन्निधौ ३४
आयांतिसर्वदादेविकार्तिक्यांचनसंशयः

तत्रश्राद्धंप्रकुर्वंतितथावैविप्रभोजनम् ३५
नानाधर्मान्प्रकुर्वंतिनानायज्ञांश्चनित्यशः
विविधानिचदानानिप्रकुर्वंतिजनाःसदा ३६
चतुर्युगेषुसर्वेषुनात्रकार्याविचारणा
यवक्रीतोऽथरैभ्यश्चकाक्षीवानुशिजस्तथा ३७
भृग्वंगिरास्तथाकण्वोमेधावीचपुनर्वसुः
बंदीचगुणसंपन्नःप्राच्यांदिशिउपश्रिताः ३८
उदीच्यांयेमहाभागामधुमत्प्रमुखास्तथा
सुबंधुश्चमहाभागोदत्तात्रेयश्चवीर्यवान् ३९
शिखीदीर्घतमाश्चैवगौतमःकश्यपस्तथा
श्वेतकेतुःकहोडश्चपुलहोदेवलस्तथा ४०
विश्वामित्रभरद्वाजौजमदग्निश्चवीर्यवान्
ऋचीकपुत्रोगर्गश्चऋषिरुद्दालकस्तथा ४१
देवशर्माऽथधौम्यश्चआस्तीकःकश्यपस्तथा
लोमशोनाभिकेतुश्चलोमहर्षणएवच ४२
ऋषिरुग्रश्रवाश्चैवभार्गवश्च्यवनस्तथा
वालखिल्यादयोयेचसर्वेगच्छंतितत्रवै ४३
कृतस्नानानिराहाराःसदाविष्णुपरायणाः
शंखचक्रगदाधरास्तटेतिष्ठंतिनित्यशः ४४
पितृतीर्थंगयानामसर्वतीर्थवरंशुभम्
यत्रास्तेदेवदेवेशःस्वयमेवपितामहः ४५
गीतायाःपितृभिर्गाथाश्राद्धभागमपीप्सुभिः
एष्टव्याबहवःपुत्रायद्येकोऽपिगयांव्रजेत् ४६
यजेतवाश्वमेधेननीलंवावृषमुत्सृजेत्
तथावाराणसीपुण्यापितृणांवल्लभासदा ४७
याचैवममसांनिध्याद्भुक्तिमुक्तिफलप्रदा
ममाज्ञयातुदेवेशोबिंदुमाधवसंज्ञकः ४८
नित्यंतिष्ठतिदेवेशिवाराणस्यांविशेषतः
अतोधन्यतमाश्रेष्ठापुरीयंममसर्वदा ४९
पितृणांवल्लभंतीर्थंपुण्यंवैविमलेश्वरम्

पितृतीर्थंप्रयागंचसर्वतीर्थसमन्वितम् ५०
साभ्रमत्युदकेदेविश्रायांतिवचनान्मम
वटेश्वरश्चभगवान्माधवेनसमन्वितः ५१
दशाश्वमेधकंपुगयंगंगाद्वारंतथैवच
मन्नियोगाच्चदेवेशिसाभ्रमत्यांवसंतिहि ५२
नदाथललितादेवीतीर्थंयत्सप्तधारकम्
तथामित्रपदंनामकेदारंशंकरालयम् ५३
गंगासागरमित्याहुःसर्वतीर्थमयंशुभम्
तीर्थंब्रह्मसरस्तद्वच्छतद्रुसलिलेह्रदे ५४
तीर्थंतुनैमिषंनामश्राज्ञयाममसर्वदा
साभ्रमत्युदकेदेविनिवसंतिनसंशयः ५५
श्वेतावल्कलिनीपुगयाततःश्वेताहिरगमयी
हस्तिमत्यथवार्त्तघ्नीनदीसागरगामिनी ५६
पितृणांवल्लभाह्येताःश्राद्धकोटिफलप्रदः
तत्रश्राद्धानिदेयानिपुत्रैःपितृहितायवै ५७
पाटलंवाडवाख्यंचनगरंतत्रसुंदरि
साभ्रमत्यांसदाएताःप्राप्तानद्योविशेषतः ५८
तत्रस्नानंचदानंचयेकुर्वंतिनराभुवि
इहलोकेसुखंभुक्त्वायांतिविष्णोःसनातनम् ५९
जंबूद्वीपंमहापुगयंयत्रपुगयंविवर्द्धते
तत्रार्याख्यंमहापुगयंसर्वकामफलप्रदम् ६०
नीलकंठमितिख्यातंतीर्थंनंदह्रदस्तथा
तथारुद्रह्रदस्तीर्थंपुगयंरुद्रमहालयम् ६१
मंदाकिनीमहापुगयातथाच्छोदामहानदी
साभ्रमत्यांवहंत्येतेस्वात्मनादर्शनीकृते ६२
धूम्रामित्रपदंतद्वद्वैजनाथंदृषद्वरम्
क्षिप्रानदीमहाकालंतथाकालिजरोगिरिः ६३
गंगोद्भूतंहरोद्भेदंनर्मदाकारमेवच
गंगापिंडप्रदानेनसमान्याहुर्मनीषिणः ६४
एतानिब्रह्मतीर्थानिसाभ्रमत्युत्तरेतटे

गुप्तीकृतानिदेवेशिदेवैर्ब्रह्मपुरोगमैः ६५
स्मरणादपिलोकानांपापघ्नानिमहेश्वरि
किंपुनःश्राद्धदातॄणांमानवानांसुरेश्वरि ६६
ॐकारंपितृतीर्थंचकावेरीकपिलोदकम्
संभेदश्चंडवेगायास्तथैवामरकंटकम् ६७
कुरुक्षेत्राच्छतगुणमस्मिन्स्नानादिकंभवेत्
वार्तघ्नीसंगमेदेविगणेश्वरपुरःसरम् ६८
साभ्रमत्यांपुरानीतंगणैस्तीर्थकदंकबम्
एषतूद्देशतःप्रोक्तस्तीर्थानांसंगमोमया ६९
वागीशापिनशक्नोतितीर्थानांतत्वविस्तरम्
सत्यंतीर्थंदयातीर्थंतीर्थमिंद्रियविग्रहः ७०
तस्यास्तीर्थेप्रयत्नेनस्नानंकुर्यान्नसंशयः
प्रातःकालोमुहूर्तांस्त्रीन्संगवस्तावदेवतु ७१
तदास्नानादिकंतीर्थेदेवानांप्रीतिदायकम्
मध्याह्नस्त्रिमुहूर्तःस्यादपराह्णस्ततःपरम् ७२
पितॄणांप्रीतिजननंस्नानपिंडादितर्पणम्
सायाह्नस्त्रिमुहूर्तःस्याच्छ्राद्धंतत्रनकारयेत् ७३
राक्षसीनामसावेलागर्हितासर्वकर्मसु
अह्नोमुहूर्ताविख्यातादशपंचचसर्वदा ७४
तत्राष्टमोमुहूर्तोयःसकालःकुतुपःस्मृतः
मध्याह्नेसर्वदायस्मान्मंदीभवतिभास्करः ७५
तस्मादनंतफलदःपितॄणांपिंडदानतः
मध्याह्नःखड्गपात्रंचतथानेपालकंबलः ७६
रूप्यंदर्भास्तथागावोदौहित्रंकुतपास्तिलाः
पापंकुत्सितमित्याहुस्तस्यसंतापकारकाः ७७
अष्टावेतेयतस्तस्मात्कुतपाइतिविश्रुताः
ऊर्द्ध्वंमुहूर्तात्कुतुपात्यन्मुहूर्तचतुष्टयम् ७८
महूर्तपंचकंचैतच्छ्राद्धकालेसमिष्यते
विष्णोर्देहात्समुद्भूताःकुशाःकृष्णतिलाःस्मृताः ७९
श्राद्धस्यरक्षणार्थायएवमाहुर्दिवौकसः

तिलोदकांजलिर्देयोजलस्थैस्तीर्थवासिभिः ८०
सदर्भहस्तैरेकेनश्राद्धमेवंनहिंस्यते
साभ्रमत्यांनामधेयैरितितीर्थप्रवेशनम् ८१
कारयित्वामयादेविदत्तावैकश्यपायच
ममभक्तःकश्यपोसौवल्लभोममसर्वदा ८२
दत्तातस्मादियंगंगापवित्रापापनाशिनी
साभ्रमत्यांमहाभागेतीर्थेवैब्रह्मचारिके ८३
आत्मानंचप्रतिष्ठाप्यतन्नाम्नाशंकरोह्यहम्
स्थितोलोकहितार्थायब्रह्मचारीशसंज्ञकः ८४
साभ्रमत्यामुपकंठेब्रह्मचारीशसंज्ञके
कलौभक्तोविशेषेणपूजनंकुरुतेयदा ८५
इहलोकेसुखंभुक्त्वायातिशैवंपदंमहत्
महद्भिर्व्याधिभिश्चैवपीडितोयदिगच्छति ८६
यस्याशुनश्यतिव्याधिर्दर्शनाच्चमहेश्वरि
गत्वावैतस्यसंस्थानेउपवासीजितेंद्रियः ८७
पूजनंकुरुतेभक्त्यारात्रौतिष्ठन्सुनिश्चलः
तदाहंयोगिरूपेणदर्शनंतस्ययामिहि ८८
ददामिवांछितान्कामान्सत्यंसत्यंवरानने
ममस्थानेविशेषेणसमायांतिचयेजनाः ८९
तेषांव्याधिप्रशमनंकरोमिसुचिरादहम्
चतुरशीतिसंज्ञेयोव्याधिःसंकथितोमया ९०
ससव्याधिर्विनश्येतदर्शनादेवसुंदरि
नलिगंवर्ततेतत्रमामकंनगनंदिनि ९१
स्नानमात्रंतुतत्रैवमामकंनात्रसंशयः
एकस्मिन्नेवकालेतुअस्यांभूमौमहातपाः ९२
राजावैसूर्यवंशीयोब्रह्मदत्तस्तुवीर्यवान्
तेनराज्ञातपस्तप्तंबहुकालंसुरेश्वरि ९३
पंचाग्निसाधनंतेनकृतंचबहुधाततः
मासोपवासकादीनितपस्तप्तान्यनेकशः ९४
एवंबहुतरंकालंराज्ञातप्तंतपोमहत्

प्रत्यक्षोऽहतदाजातोवरार्थंवरवर्णिनि ९५
ब्रह्मदत्तशृणुष्वत्वंमहद्वाक्यंनरेश्वर
यंयंवांछयसेनित्यंतंतंदद्मिनसंशयः ९६
तेनोक्तंममदेवेशवांच्छितंयदिदीयते
एकएववरोदेवदीयतांममसर्वदा ९७
ममनाम्नाहिदेवेशईश्वरोभुविजायताम्
तेनवाक्येनसंतुष्टोवरोदत्तोमयाऽनघे ९८
तदाहंतेनवैसार्द्धंनिवसामिसुरेश्वरि
अत्रस्थित्वानिराहारोभक्तिंकुर्यादशेषतः ९९
ददामिवांछितान्कामान्यावदिंद्राश्चतुर्दश
अत्रागत्यतुयेविप्रारुद्रजाप्यादिकंचयत् १००
प्रकुर्वंतिविशेषेणतेषांदद्मिशृणुष्वतत्
स्त्रीसौख्यंपुत्रसौख्यंचलक्ष्मीवृद्धिकरंपुनः १०१
यशएश्वर्यमेवापितथारोगादिनाशनम्
तत्सर्वंप्राप्यतेक्षिप्रंवांच्छितंवैकलौयुगे १०२
अस्मिन्कलौयुगेघोरेमद्भक्ताभुविपार्वति
अत्रागत्यप्रतिष्ठाप्यउषित्वादिनपंचकम् १०३
ददामिवांच्छितानर्थान्सत्यंसत्यंसुरेश्वरि
ब्रह्मदत्तंतुतन्नाम्नाद्वितीयंब्रह्मचारिणम् १०४
गंगाधरंप्रतिष्ठाप्यउषित्वादिनपंचकम्
सराजागतवांस्तत्रस्वकेराज्येततःपुनः १०५
ब्रह्मदत्तस्तुविख्यातोलोकेवैपरमोमहान्
राज्यंचकारधर्मज्ञोह्ययुतंवर्षसंज्ञकम् १०६
ततःकतिपयेकालेराज्यंभुक्त्वासवैनृपः
गतवाञ्शिवलोकंतंब्रह्माख्यंपदमुत्तमम् १०७
देवौद्वौतत्रवर्त्तेतेममनामाभिधायकौ
एकोवैब्रह्मचारीशोअन्योगंगाधरःस्मृतः १०८
ममस्थानेविशेषेणपूजांकुर्वंतियेजनाः
तेषांसर्वंददामीहवांच्छितंनात्रसंशयः १०९
स्थानमेवसदालिगंगंतव्यंचनृभिःसदा

तत्रपुष्पंचधूपंचनैवेद्यंविविधंतथा ११०
यःकरोतिनरःप्राज्ञःससर्वंलभतेध्रुवम्
बिल्वपत्रैश्चपुष्पैश्चतथावाचंदनादिभिः १११
पूजांकुर्वंतिमत्स्थानेतेषांसर्वंददाम्यहम्
यइदंशृणुयान्नित्यंब्रह्मचारिकथानकम् ११२
इहलोकेसुखंप्राप्यव्रजतेशिवसंनिधौ
यत्रगंगाधरोदेवोनित्यंतिष्ठतिभूतिदः ११३
ब्रह्मचारीशसंज्ञस्तुद्वितीयोवर्त्ततेसदा
ताभ्यांध्यानसमायोगाच्छिवत्वमश्नुतेध्रुवम् ११४
दर्शनान्नश्यतेरोगःपूजनादायुराप्नुयात्
स्नानात्तत्रतुदेवेशिमुक्तिभागीनसंशयः ११५
शृणुसुंदरिवक्ष्यामितीर्थंपरमम‌द्भुतम्
राजखङ्गइतिख्यातंसाभ्रमत्यांविशेषतः ११६
सूर्यवंशसमुत्पन्नोराजावैकर्त्तनस्तथा
दुराचारीतुपापात्माब्राह्मणानांचनिंदकः ११७
गुरुद्रोहीसदारुष्टोनिंदकःसर्वकर्मणाम्
परदाररतोनित्यंनित्यंविष्णुप्रदूषकः ११८
प्रजापीडनकंनित्यंकरोतिबहुधाततः
एवंविधःसदुष्टात्मापृथिव्यांवर्त्ततेसदा ११९
कियत्येवंगतेकालेशृणुसुंदरितत्वतः
पापेनदैवयोगाच्चकुष्ठत्वंसमजायत १२०
निरीक्ष्यस्वंशरीरंतुविचार्यचपुनःपुनः
किंकर्त्तव्यमितिध्यायन्इतिचिंतापरोऽभवत् १२१
कदाचिद्दैवयोगाच्चक्रीडार्थंगतवान्वने
तत्रसाभ्रमतीतीरंसमासाद्यसतिष्ठति १२२
तत्रस्नानंकृतंतेनपीतंपानीयमुत्तमम्
तत्रस्नानेनसपदिशरीरंदिव्यसंज्ञकम् १२३
सुसौवर्णमयीमूर्त्तिर्दृश्यतेनगनंदिनि
तत्तदैवतुसंजातःसराजानात्रसंशयः १२४
दिव्यरूपमनुप्राप्यकियत्कालंततोनृपः

राज्यंभुक्त्वातुदेवेशिगतोवैपरमंपदम् १२५
तदातीर्थमिदंजातंराजखङ्गेतिसंज्ञकम्
अत्रस्नानंप्रकुर्वंतिदानंयोवैददातिच १२६
इहलोकेसुखंभुक्त्वायातिविष्णोःसनातनम्
नरोगोवर्त्ततेतेषांनशोकश्चकदाचन १२७
प्रत्यहंकुरुतेस्नानंखङ्गेऽस्मिन्राजसंज्ञके
योनरःप्राप्नुयात्स्वर्गंब्रह्माद्यैःसचपूज्यते १२८
कृतेसत्येश्वरोनामत्रेतायांभुवनेश्वरः
राजेश्वरसमाख्यातोद्वापरेनगनंदिनि १२९
अस्मिन्कलियुगेघोरेगुप्तीभूतोऽथविश्वराट्
अतोवैतीर्थसंभूतंराजखङ्गेतिसंज्ञकम् १३०
पितॄणांतर्पणंचात्रश्रद्धयायेप्रकुर्वते
तेनराःपुण्यकर्माणःपृथिव्यांपरिकीर्तिताः १३१
ब्रह्मघ्नाबालहंतारःस्नानंयेऽत्रप्रकुर्वते
तैर्दोषैरहितास्तेचगच्छंतिशिवसन्निधौ १३२
नीलोत्सर्गंकरिष्यंतिसाभ्रमत्यांनराश्चये
तेषांवैपितरस्तृप्तायावदाभूतसंप्लवम् १३३
इदमाख्यानकंदिव्यंराजखङ्गेतिसंज्ञकम्
येशृण्वंतिनरादेविनतेषांविद्यतेभयम् १३४
रोगादोषाविनश्यंतिश्रवणात्पठनात्ततः १३५

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायांउत्तरखंडेउमामहेश्वर
संवादेसाभ्रमतीमाहात्म्यंनामपंचत्रिंशाधिकशततमोऽध्यायः १३५

षट्त्रिंशाधिकशततमोऽध्यायः-

पार्वत्युवाच
साभ्रमत्यपियान्देशान्नंदिकुंडाद्विनिःसृता
गच्छंतीपावयामासकान्कान्देशान्वदस्वमे
चकारकानितीर्थानिविलंघ्यार्बुदपर्वतम् १
सूतउवाच
इतितत्रोदितेदेव्यामहादेवःसविश्वराट्

उवाचवचनंतांवैपार्वतींविश्वमोहिनीम् २
महादेवउवाच
नंदिकुंडात्प्रथमतःतीर्थात्परमपावनात्
कपालमोचनंतीर्थंमुनिभिःसंप्रकारितम् ३
सर्वतेजोधिकंतीर्थंपावनात्पावनंपरम्
अत्रमयापरित्यक्तंकपालंब्रह्मसंज्ञकम् ४
कपालमोचनंतीर्थमतोजातंहिपार्वति
पावनंसर्वभूतानांप्रकटंलोकविश्रुतम् ५
कपालकुंडमाख्यातंतत्तीर्थंतीर्थराजकम्
यत्रदेवास्तथानागागंधर्वाःकिंनरादयः ६
निवसंतिमहात्मानस्तीर्थेवैनिर्मलेशुभे
त्रैलोक्येविश्रुतंतीर्थंदानदंमुक्तिदायकम् ७
तत्रस्नात्वाशुचिर्भूत्वाकपालेशंप्रपूजयेत्
उपोष्यरजनीमेकांकृत्वाब्राह्मणभोजनम् ८
तत्रापिवस्त्रदानेनअग्निहोत्रफलंलभेत्
तस्मिंस्तीर्थेतुयःकश्चिद्दर्शनव्रतमास्थितः ९
संत्यज्यदेहमात्मानंशिवलोकंव्रजेद्ध्रुवम्
अस्मिंस्तीर्थेपुरास्नानात्सौदासोब्रह्महत्यया १०
मोचितोविमलंज्ञानंप्राप्तवान्वैसुरेश्वरि
भागीरथ्यान्वयेजातःसुदासाख्योमहाबली ११
तस्यपुत्रोमित्रसहःसौदासेतिचविश्रुतः
वसिष्ठशापतःप्राप्तःसौदासोराक्षसींतनुम् १२
साभ्रमत्यांकृतस्नानोविमुक्तःशापजादघात्
अत्रगंगाचयमुनागोदावरीसरस्वती १३
नंदितीर्थेवसंत्येताःपवित्राःपुण्यदाःसदा
गोदानंभूमिदानंचशय्यादानंतथैवच १४
कन्यादानंविशेषेणकर्तव्यंज्ञानिभिर्नरैः
एतद्दानसमंप्रोक्तंसाभ्रमत्यावगाहनम् १५
यत्रवैसकलान्येवपतितानी भूतले
वारिणास्पर्शमात्रेणशुद्धत्वंयांतितान्यपि १६

अत्रश्राद्धंप्रकुर्वाणोनरोवैभक्तितत्परः
पितरस्तस्यसंतुष्टागच्छंतिपरमंपदम् १७
एतदाख्यानकंदिव्यंयेशृण्वंतिनराःसदा
सर्वपापविनिर्मुक्ताविष्णोःसायुज्यमाप्नुयुः १८
कर्मणामनसावाचायेस्तुवंतिमहेश्वरम्
नतेषांविद्यतेदुःखंयावदाभूतसंप्लवम् १९
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वरसंवादेनंदितीर्थमहिमानामषट्त्रिंशाधिकशततमोऽध्यायः १३६

सप्तत्रिंशाधिकशततमोऽध्यायः

महादेवउवाच
अथनंदिप्रदेशात्तुयथासाभ्रमतीनदी
समायाताविकीर्णंचवनंविप्रर्षिसेवितम् १
बहुधाजलवेगेनपर्वतानांचरोधसः
सप्तधाप्रविभक्ताचदक्षिणोदधिगामिनी २
आद्यासाभ्रमतीपुण्याद्वितीयासेटिकातधा
तृतीयावल्किनीपुण्याचतुर्थीचहिरण्मयी ३
सर्वपापहराप्रोक्ताहस्तिमत्यथपंचमी
वेत्रवतीसाचषष्ठीवृत्रेणनिर्मितापुरा ४
इयंसापरमादेवीवृत्रकूपाद्विनिःसृता
वेत्रवतीततोजातामहापापप्रणाशिनी ५
भद्रामुखीशुभप्रायासप्तमीलोकपावनी
एतैस्तुसप्तभिर्देवितांस्तान्जनपदांस्तथा ६
पवित्रीकृत्यचैकेनसप्तस्रोताप्रतिष्ठिता
विकीर्णतीर्थेयःश्राद्धंपितॄनुद्दिश्यदास्यति ७
गयापिंडप्रदानस्यफलंयत्तद्भविष्यति
अवकीर्णाच्युतायेचलुप्तपिंडोदकक्रियाः ८
तेविकीर्णेप्रमुच्यंतेदत्तपिंडोदकक्रियाः
तत्रश्राद्धंतुयःकुर्याद्गाणपत्यंभवेद्ध्रुवम् ९
तस्मात्रयीविधानेनश्रद्धयाश्राद्धमाचरेत्

अस्मिंस्तीर्थेविशेषेणसप्तनद्युदयेद्विजाः १०
स्नानंकुरुतविप्रेंद्राऋषिलोकमभीप्सवः
इत्युक्तंकश्यपेनाथद्विजान्प्रतिविशेषतः ११
यदिचेत्क्रियतेस्नानंसर्वदुःखापहंसदा
तीर्थानांप्रवरंतीर्थंक्षेत्राणामुत्तमोत्तमम् १२
तीर्थमेतद्विकीर्णंचशुभदंरोगदोषहृत्
कुर्वंत्यत्रविशेषेणयेस्नानंसर्वदाकलौ १३
तेनराःपुणयभाजोहिजायंतेनात्रसंशयः
गयातीर्थसमंतीर्थंविकीर्णंपावनंपरम्
पितृणांपुणयदंनित्यंलोकानांदुःखनाशनम् १४
इतिविकीर्णतीर्थम्
तीर्थादस्मात्परंतीर्थंश्वेतोद्भवमनुत्तमम्
यत्रश्वेतानदीजातामत्पृष्ठोदरभस्मना १५
विश्रुतात्रिषुलोकेषुसर्वपापप्रणाशिनी
हरांगभस्मसंयोगात्जातादेवैस्तुमानिता १६
तस्यांस्नातःशुचिर्दांतस्त्रिरात्रमुषितःपुमान्
महाकालेश्वरंदृष्ट्वारुद्रलोकेमहीयते १७
पिंडपितृभ्योयोदद्यात्तस्यास्तीरेकुशैस्तिलैः
सुतृप्ताःपितरस्तस्यभवंतीतिनसंशयः १८
श्वेतगंगामहापुणयादुःखदारिद्र्यमोचनी
यत्रस्नानेनभोदेविपरंसुखमवाप्यते १९
तस्यावैसंगमेपुणयेनित्यंतिष्ठामिपार्वति
येऽत्रदानंप्रकुर्वंतिस्नानंचतत्रसुंदरि २०
तदनंतफलंतस्यभवेद्वैनात्रसंशयः
तत्रभूतेश्वरोदेवःसंगमेवसतेध्रुवम् २१
तत्रधूपंचदीपंचपुष्पमारार्तिकंतथा
येकुर्वंतिनरश्रेष्ठास्तेनराःपुणयरूपिणः २२
बिल्वदलंसमादाययोददातिशिवोपरि
वांच्छितंलभतेनित्यंश्वेतायांशिवसंनिधौ २३
इति श्रीपाद्मेमहापुराणेपंचपंचात्साहस्र्यांसंहितायामुत्तरखंडे

उमामहेश्वरसंवादेश्वेतातीर्थंनामसप्तत्रिंशाधिकशततमोऽध्यायः १३७

अष्टत्रिंशाधिक शततमोऽध्यायः

महादेवउवाच
गणतीर्थंततोगच्छेत्तीर्थयात्रापरायणः
त्रिविष्टपमितिप्रोक्तंगणैस्तुचंदनातटे १
त्रिविष्टपेनरःस्नात्वापूर्णमास्यांसमाहितः
संशयोनात्रकर्त्तव्योमुच्यतेब्रह्महत्यया २
चतुरोवार्षिकान्मासान्स्थितिर्यस्यत्रिविष्टपे
सोऽपिपुण्योमहाभागेरुद्रलोकेमहीयते ३
गणतीर्थेनरःस्नात्वाकृष्णाष्टम्यामुपोषितः
बकुलासंगमेस्नात्वास्वर्गंगच्छतिमानवः ४
तस्मिंस्तीर्थेनरःस्नात्वाबकुलेशंविलोक्यच
गणेश्वरप्रसादेनगाणपत्यमवाप्नुयात् ५
इंदपवित्रंपरमंपुण्यायुष्यविवर्द्धनम्
श्रुत्वातुलभतेपुण्यंगंगास्नानसमंनरः ६
अत्रस्थित्वानिराहारोजितेंद्रियसमाहितः
जपत्येवंपरंदेवंगणेश्वरंमनोरमम् ७
संप्राप्नोत्यखिलान्भोगान्सत्यंसत्यंवरानने
अत्रराजासोमवंशीविश्वदत्तःसवीर्यवान् ८
तेनतपोमहत्तप्तंबहुकालंसुरेश्वरि
गाणपत्यंतदाप्राप्तंश्रीगणेशप्रसादतः ९
वसिष्ठोवामदेवश्चहोडःकौशीतकोमुनिः
भरद्वाजोंगिराश्चैवविश्वामित्रोऽथवामनः १०
एतेवैमुनयःसर्वेपुण्यरूपामहेश्वरि
नित्यंसेवांप्रकुर्वंतिश्रीगणेशप्रसादतः ११
अपुत्रोलभतेपुत्रान्निर्द्धनोलभतेधनम्
अविद्योलभतेविद्यां मोक्षार्थीमोक्षमाप्नुयात् १२
किमन्यद्बहुनोक्तेनभूयोभूयोवरानने
योऽत्रस्नानंप्रकुर्वीतपूजनंवाकरोतिच १३

सर्वपापविनिर्मुक्तोयातिविष्णोःपरंपदम्
शिवायविष्णुरूपायविष्णवेशिवरूपिणे १४
नांतरंदेविपश्यामिश्रीविष्णोश्चप्रसादतः १५
इति श्रीपाद्मेमहापुराणेपंचपंचात्साहस्र्यांसंहितायामुत्तरखरडेउमामहेश्वर
संवादेबकुलासंगमेगणतीर्थंनामाष्टत्रिंशाधिकशततमोऽध्यायः१३८

एकोन चत्वारिंशदधिकशततमोऽध्यायः

महादेवउवाच
साभ्रमत्युत्तरेकूलेग्रग्नितीर्थमितिश्रुतम्
तस्याश्चोत्तरपूर्वेणनातिदूरेकृतास्पदम् १
तीर्थंपालेश्वरंनामचंडीयत्रप्रतिष्ठिता
पीठंतद्योगमातृणांसर्वसिद्धिविधायकम् २
यत्रताःसर्वदेवानांकार्यार्थेमातरःस्थिताः
परमंयत्नमास्थायलोकानुग्रहकारणात् ३
त्रिरात्रमुषितोभूत्वातस्मिंस्तीर्थेदृढव्रतः
ग्रभिगच्छेत्तमीशानंदेवेशंचंडिकेश्वरम् ४
साभ्रमत्यांकृतस्नानोमातृतीर्थस्यसंनिधौ
समाधिविधिनायुक्तोगच्छेद्वैमातृमंडलम् ५
गोसहस्रप्रदानस्यफलंप्राप्नोतिमानवः
ग्रग्नितीर्थेनरःस्नात्वाचामुंडादर्शनेकृते ६
नभयंजायतेतस्यरक्षोभूतपिशाचजम्
गोखुराचनदीयत्रसाभ्रमत्यांतुसंगता ७
तत्रतीर्थसहस्राणितिष्ठंतीतिसुरेश्वरि
श्राद्धंतत्रप्रकर्त्तव्यंतिलचूर्णेनपार्वति ८
पिंडान्दत्त्वाद्विजान्भोज्यग्रक्षयंपदमाप्नुयात्
यत्रकुकर्दमोराजापापिष्ठोदुर्द्धरःखलः ९
मूढोऽहकारसंयुक्तोद्विजानांपरिनिंदकः
गोघ्नोऽपिबलहाचैवपापिष्ठोदुर्दमःसदा १०
राज्यंचकुर्वतस्तस्यपुरेपिंडारसंज्ञके
तदामृत्तिःसमापन्नाधर्मेयोगेसुरेश्वरि ११

मृतोऽसौतत्रसंजातःप्रेतरूपोमहेश्वरि
पीतास्यःशुष्कतुंडश्चपीतरोमाऽथकर्कशः १२
उच्चस्तरोबहुरोमाक्षुत्पिपासाप्रपीडितः
वायुभक्षंप्रकुर्वाणःप्रगच्छतिइतस्ततः १३
बहुप्रेतैःसमायुक्तोहाहेतिकरुणोरुदन्
किंकर्तव्यमितिप्राहुःप्रेतास्तेवैसमीपगाः १४
तेऽपितदारोदमानाःक्षुत्पिपासादिपीडिताः
अन्येप्रेतादुरात्मानोराज्ञःसंगतिमाययुः १५
राज्ञासार्द्धंचगच्छंतिलोकान्विजनकान्बहून्
नोदकमथवाचान्नंनमार्गेदृश्यतेकदा १६
तेप्रेतादुष्टरूपाश्चविचरंतिमहीतले
भक्षंतिशवमांसानिपिबंतिरुधिरंसदा १७
एवंकुकर्दमोराजासदातैःपरिवारितः
कदाचिद्दैवयोगेनगुरोराश्रममन्वगात् १८
पूर्वजन्मकृतंपुण्यंतेनयोगेनसंगतः
पार्वत्युवाच
किंकृतंतेनवैपुण्यंवदविश्वेश्वरप्रभो १९
अयंपापीदुरात्माचब्राह्मणानांचदुःखदः
सत्संगतिःकथंजातातन्मेदुस्तरतोवद २०
महादेवउवाच
एतेननरदेवेनपूर्वजन्मनियत्कृतम्
तत्सर्वंकथयिष्यामिशृणुत्वंनगनंदिनि २१
पूर्वजन्मन्ययंदेविब्राह्मणोवेदपाठकः
संपूज्यचमहादेवंकृत्वाचातिथिपूजनम् २२
भोजनंकुरुतेनित्यमसौवाडवसत्तमः
तेनपुण्यप्रभावेनपुरोऽपिडारसंज्ञके २३
राजावैतत्रसंजातःकुकर्दमइतिश्रुतः
कर्मणामनसाचैवनकृतंपुण्यमेवच २४
तेन देवा भियोगेन मृतोवैप्रेतराडभूत्
शुष्कास्यःशुष्करूपश्चपीतवर्णःकरालकः २५

पूर्वजन्मकृतंपुरायंननश्यतिसुरेश्वरि
तेनपुरयाभियोगेनसंगतोगुरुणाश्रमे २६
कहोडोवर्ततेतत्रतेनदृष्टोऽथप्रेतराट्
शुष्कास्यःशुष्करूपश्चपीतवर्णःकरालकः २७
गंभीराद्द्योमहापापीदुष्टैःप्रेतैश्चसंयुतः
ऊर्द्ध्वरोमाजटायुक्तःकालरूपोभयंकरः २८
एवंदृष्ट्वातदादेविविह्वलोवाडवोऽभवत्
कहोडउवाच
अस्मिन्मनोरमेचाहंस्थानेवैपरमाद्भुते २९
अग्निपालेश्वरेतीर्थेनित्यंतिष्ठामिभूमिप
यजमानस्त्वमस्माकंकथंजातोऽसिप्रेतराट् ३०
दुरात्मादुष्टरूपश्चकालरूपोभयंकरः
केनकर्मविपाकेनजातोवैभूतलेशुभे ३१
प्रेतउवाच
शृणुवाडवमेपापंपूर्वजन्मनियत्कृतम्
अहंकुकर्दमोराजापुरेपिंडारसंज्ञके ३२
तत्रस्थेनमयादेवयत्कृतंतच्छृणुष्वहि
ब्रह्मणांहिंसनंचैवपुराऽसत्यादिभाषणम् ३३
प्रजानांपीडनंचैवजीवानांहिंसनंसदा
गवांवैदुःखकर्ताऽहब्राह्मणव्रतलोपनः ३४
अस्नातःसर्वदाविप्रसज्जनानांविदूषकः
विष्णुनिंदापरोनित्यंवैष्णवानांचनिंदकः ३५
दुराचारोदुरात्माचवृषलीसंयुतःसदा
तत्रतत्रप्रभुंजानोनाऽहशौचपरायणः ३६
तेनकर्माभियोगेनमृतोवैद्विजराट्ततः
पेतयोनिंप्रपन्नोऽस्मिदुःखीजातोह्यनेकधा ३७
यस्यमातापितानास्तियस्यस्वजनबांधवाः
तस्यबंधुर्गुरुर्मातापितापिगुरुरेवच ३८
इतिज्ञात्वातुभोब्रह्मन्मुक्तिंदातुंत्वमर्हसि ३९
कहोडउवाच

शृणुत्वंनृपतिश्रेष्ठकरिष्येवचनंतव
मुक्तिंयास्यतिवैसद्योभवांस्त्विहनसंशयः ४०
एकादशपुरोगाश्चप्रेतायेतवसंगताः
तेचापिमुक्तिमायांतिसुतीर्थेऽस्मिन्विशेषतः ४१
तदावैतेनविप्रेणतीर्थेगत्वासुरेश्वरि
सर्वैश्चकारयामासतिलपिंडोदकक्रियाः ४२
नमासोनतिथिर्देवीतीर्थेगत्वापुनःपुनः
कर्त्तव्यंश्राद्धकर्मादिब्रह्मणोक्तंपुरामम ४३
कृतेकर्मणिदेवेशिमुक्तास्तेतीर्थराजके
विमानवरमारूढास्तेगतामामकींपुरीम् ४४
संगतागोखुरायत्रसाभ्रमत्यासुरेश्वरि
तत्रस्नानंचदानंचकोटियज्ञफलंलभेत् ४५
यत्राग्नितीर्थंवर्तेतकपालेश्वरसंज्ञकम्
तत्रमुक्तिस्तुसंप्रोक्तासत्यंसत्यंभवेद्ध्रुवम् ४६

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
उमामहेश्वरसंवादेअग्निपालेश्वरमहिमानामैकोन
चत्वारिंशत्यधिकशततमोऽध्यायः १३९

चत्वारिंशदधिकशततमोऽध्यायः

श्रीमहादेवउवाच
भोदेव्यन्यत्प्रवक्ष्यामिहिरण्यासंगमंमहत्
यदासाभ्रमतीगंगासप्तस्रोतापुराभवत् १
तदासाब्रह्मतनयासप्तस्रोतेतिविश्रुता
सप्तमंतद्धिरण्याख्यंस्रोतइत्यभिधीयते २
तस्मिंस्तीर्थेनरःस्नात्वापापीगतिमवाप्नुयात्
ऋक्षुमंजुमयोर्मध्येसत्यवान्नामपर्वतः ३
तस्यप्राक्सुमहत्तीर्थंहिरण्यासंगमंशुभम्
तत्रस्नात्वाचपीत्वाचशुभांगतिमवाप्नुयात् ४
वनस्थल्यांततोगच्छेद्दृष्ट्वानारायणंहरिम्
तीर्थमप्सरसांपुण्यंहिरण्यासंगमेश्वरम् ५

यत्रोर्वशीपुराजातासमस्ताप्सरसांशुभा
नरनारायणौतत्रतपस्तेपतुरुत्तमम् ६
हिरण्यासंगमेरम्येमहापापहरेशुभे
यत्रवैऋषयःसर्वेमज्जंतिवीतकल्मषाः ७
वसिष्ठाद्याश्चयेविप्रावालखिल्यादयश्चये
यत्रमज्जंतिदेवेशिहिरण्यासहसंगमे ८
यत्रहिरण्मयंरूपंस्नानाद्वैभवतिध्रुवम्
कपिलागोसहस्रस्यदानेनैवतुयत्फलम् ९
तत्फलंसमवाप्नोतिहिरण्यासंगमेसदा
दशाश्वमेधेयत्पुण्यंग्रहणेचंद्रसूर्ययोः १०
तदनंतगुणंप्रोक्तंहिरण्यासंगमेपुनः
तुलापुरुषदानेचयत्फलंसमवाप्नुयात् ११
तत्फलंसमवाप्नोतिहिरण्यासंगमेसदा
हिरण्याक्षोमहादैत्यस्तेनतप्तंमहत्तपः १२
हिरण्यसदृशंतत्रशरीरमभवत्पुरा
जनमेजयेतथाराज्ञियत्रस्नानंप्रकुर्वति १३
ब्रह्महत्यागतादेविहिरण्यासंगमेतदा
विश्वामित्रोऽथराजर्षिःस्नानार्थंवैसमागतः १४
स्नानंकृत्वाविशेषेणगतोऽसौमामकींपुरीम् १५
ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चाथसुरेश्वरि
स्नानंयेऽत्रप्रकुर्वंतितेगच्छंतिशिवालयम् १६
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वर
संवादेहिरण्यासंगमंतीर्थंनामचत्वारिंशदधिकशततमोऽध्यायः १४०

एकचत्वारिंशदधिक शततमोऽध्यायः

महादेवउवाच
ततोदेविप्रवक्ष्यामिहिरण्यासंगमादनु
धर्मावतीनदीयत्रसंगतासहगंगया १
तत्रस्नात्वानरोधन्यस्त्रिदिवंयात्यसंशयम्
यत्रधर्मकृतंतीर्थंयःपश्यतिसपुण्यभाक् २

श्राद्धंतत्रैवयेकुर्युर्मुच्यंतेपितृजादृणात्
ततश्चमधुरातीर्थंसर्वपापप्रणाशनम् ३
स्नातव्यंमधुरातीर्थेद्रष्टव्योमधुहाहरिः
यत्रविश्रांतवान्कृष्णोजरासंधभयाकुलः ४
कंसासुरवधेवृत्तेगंतुकामःकुशस्थलीम्
उषित्वासप्तरात्रंतुसदेवश्चंदनातटे ५
भोजवृष्ण्यंधकवृतोवी रैर्यादवपुंगवैः
मधुरातीर्थमासाद्यस्नानंकृंत्वाविधानतः ६
मधुरादित्यनामानंयत्रस्थापितवान्हरिः
अष्टादशसहस्राणिविप्राणांयज्ञशालिनाम् ७
स्थापयित्वाययौदत्त्वायानानिविविधानिच
तत्रतीर्थसहस्राणितिष्ठंतिचसुरेश्वरि ८
श्राद्धंतत्रप्रकर्तव्यंपितृणांहितकाम्यया
नभेतव्यंजरासंधान्मत्तीर्थेवसतांसदा ९
इत्युक्त्वातान्द्विजान्कृष्णःप्रययौद्वारकांप्रति
तस्मिंस्तीर्थेनरःस्नात्वामधुरार्कंप्रपूजयेत् १०
माघस्यशुक्लसप्तम्यांकपिलागोप्रदानतः
चिरंसौख्यानिभुंक्त्वेहपदमादित्यमाव्रजेत् ११
शृणुसुन्दरिवक्ष्यामिइतिहासंपुरातनम्
यंश्रुत्वामुच्यतेलोकोब्रह्महत्यादिपातकात् १२
एकस्मिन्समयेदेविमांडव्योऋषिसत्तमः
गङ्गाद्वारेमहापुण्यंतप्तवांस्तुमहत्तपः १३
पत्राशीचफलाशीचवायुभक्षकरःसदा
अहोरात्रंसदादेविविष्णुध्यानपरायणः १४
योगाभ्यासरतोनित्यंनित्यंधर्मपरायणः
तस्मिन्देशेतुवैदेविराजावैविश्वमोहनः १५
गजाश्वरथपत्तीनांसंपदोबहुलाभुवि
सोमचंद्रेतिविख्यातःपुत्रस्तस्यसुलक्षणः १६
एकदातुतदादेविगतोह्याखेटकेवने
तत्रगत्वातदातेनकृत्वाह्याखेटकक्रियाः १७

स्वात्मानंरमयामासस्वलोकैःपरिवारितः
क्रीडारतेतदाराज्ञिरात्रिर्जातासुरेश्वरि १८
तस्यांरात्रौतदाराजाउवासाखेटकेवने
तस्यांरात्र्यांव्यतीतायांमुहूर्तेब्रह्मसंज्ञके १९
हृतोऽश्वोऽथविशेषेणचौरेणात्रदुरात्मना
तदाहाहेतिशब्दोऽभूत्क्वगतःक्वगतोहरिः २०
तदाराज्ञोभयात्सर्वेगंतुकामाःसमुत्सुकाः
चौरेणापहृतश्चाश्वइत्येवंसंवदंतिहि २१
निरीक्ष्यमाणास्तेसर्वेहरिद्वारंसमागताः
ऋषिस्तत्रतुमांडव्यस्तपस्तपतिनित्यशः २२
ध्यानेनचसमायुक्तोदृष्टोऽसौतैर्भटैस्तदा
अयंचौरःसदापापीध्यानंकृत्वाप्रतिष्ठति २३
बद्धवाश्वंतुसमायातोज्ञात्वाराजभटैस्तदा
एवंविचार्यतेसर्वेगृहीत्वातंमहामुनिम् २४
राज्ञेनिवेदयामासुस्तंचौरंमुनिसत्तमम्
अश्वापहारीह्यानीतश्चौरोऽयनृपसर्वदा २५
आज्ञादत्तातदातेनशूलिकारोपणेपुनः
तदातैस्तुभटैःसर्वैर्मिलित्वाबंधनंकृतम् २६
पश्चाद्वैशूलिकाप्रोतस्तत्क्षणात्तुकृतस्तदा
नज्ञातंतेनतत्कर्मशूलिकायाःप्रतोदनम् २७
यतोयोगसमारूढोविष्णुध्यानपरायणः
शूलिकाप्रोतनंज्ञातंकतिचित्कालयोगतः २८
मांडव्योऽहमृषिश्रेष्ठःकेनकर्मइदंकृतम्
त्रिकालज्ञानीसर्वज्ञोभगवांस्तचिंतयत् २९
धर्मस्यचइदंकर्मनचान्यस्यकदाचन
योगारूढःसधर्मात्मागतोऽसौधर्मसंनिधौ ३०
तत्रगत्वाउवाचेदंशृणुत्वंधर्मसांप्रतम्
त्वंवैधर्मइतिख्यातोलोकेवेदेचसर्वदा ३१
शूलिकाप्रोतनंकर्मकथंचैवत्वयाकृतम्
तत्सर्वंश्रोतुमिच्छामित्वत्तोदेवनसंशयः ३२

धर्मउवाच
शृणुष्वत्वंद्विजश्रेष्ठपूर्वजन्मनिपातकम्
तदहंकथयिष्यामिकृपांकुरुमोपरि ३३
बालत्वेतुइदंकर्मपूर्वजन्मजपातकम्
तच्छृणुष्वमहाप्राज्ञभवेऽस्मिन्पातनंकृतम् ३४
एकस्मिन्समयेविप्रत्वंगतोविजनेवने
तत्रगत्वात्वयाविप्रजीवःशलभसंज्ञकः ३५
आरोऽपितःसवैशूल्यांकर्मणातेनदुःखितः
राज्ञाशूलेऽपितस्त्वंवैकर्मणानेनसुव्रत ३६
सर्वथैवप्रभोक्तव्यंकृतंकर्मशुभाशुभम्
अल्पमात्रमिदंकर्मत्वयाभुक्तंनसंशयः ३७
सुखीभवतुविप्रेंद्रगच्छत्वंहियथेच्छया
एतद्वाक्यंततःश्रुत्वामांडव्योद्विजसत्तमः ३८
उवाचवचनंतत्रसकोपादारुणेक्षणः
मांडव्यउवाच
रेपापिष्ठदुराचारकिंकृतंबहुपातकम् ३९
येनकृत्वाइदंकर्मशूलिकायाःप्रतोदनम्
ममवाक्यप्रकोपेनशूद्रस्त्वंभवसर्वथा ४०
कियताकालयोगेनवंशेवैचंद्रसंज्ञके
जातोविदुरनामाख्योविष्णुभक्तिपरायणः ४१
तीर्थयात्रामिषेणैवगतःसाभ्रमतींनदीम्
यत्रधर्मावतीसंगोवर्त्ततेचससुरेश्वरि ४२
तत्रवैकृतवान्स्नानंविदुरोधर्मरूपवान्
त्यक्तंतत्रहिशूद्रत्वंधर्मावत्यांनसंशयः ४३
एतस्मात्कारणाद्देवियत्रस्नानंप्रकुर्वते
तेनराःपुण्यकर्माणोगच्छंतिपरमंपदम् ४४
अत्रश्राद्धंचदानंचयेकुर्वंतिनराभुवि
इहलोकेपरामृद्धिंप्राप्यतैर्दिविमुद्यते ४५

इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे उमामहेश्वरसंवादेसाभ्रमतीमाहात्म्येमधुरादित्यमाहात्म्यं

नामैकचत्वारिंशदधिकशततमोऽध्यायः १४१

द्विचत्वारिंशदधिक शततमोऽध्यायः

श्रीमहादेवउवाच
कंबुतीर्थेनरःस्नात्वाकृत्वावापितृतर्पणम्
अर्चयेद्देवदेवेशंनारायणमनामयम् १
दत्त्वादानानिविधिवद्ब्रह्मणेभ्योविधानतः
विष्णुलोकमवाप्नोतितीर्थस्यास्यप्रभावतः २
अत्रराजर्षिणापूर्वंविश्वामित्रेणधीमता
तपस्तप्तंविशेषेणप्रजाकामेनसुंदरि ३
वायुभक्षोनिराहारोयत्रासीदनिलाशनः
विष्णुपूजापरोनित्यंविष्णुध्यानपरायणः ४
तपसानेनसंजातःप्रजाकाममवाप्तवान्
प्रजाकामोनरोयश्चकंबुतीर्थंहिगच्छति ५
सप्रजांलभतेनित्यंसत्यंसत्यंवरानने ६
इतिकंबुतीर्थमाहात्म्यम्
ततोगच्छेत्सुरश्रेष्ठेतीर्थंनामकपीश्वरम्
संनिधौरक्तसिंहस्यमहापातकनाशनम् ७
बध्यमानेपुरासेतौरामरावणविग्रहे
गृहीत्वापर्वतश्रेष्ठंविशेषात्कपिभिःकृतम् ८
नाम्नाकपीश्वरादित्यंचक्रुस्तीर्थमनुत्तमम्
यत्रतीर्थेनरःस्नात्वाकृत्वावापितृतर्पणम् ९
दृष्ट्वाकपीश्वरादित्यंमुच्यतेब्रह्महत्यया
तत्रस्नानंप्रकर्तव्यंचैत्राष्टम्यांविशेषतः १०
हनुमत्प्रमुखैस्तत्रस्नातंयत्रदिनत्रयम्
कपितीर्थप्रभावोऽयभवत्यैसमुदीरितः ११
अस्मिंस्तीर्थेनरःस्नात्वापूजयित्वाकपीश्वरम्
रूपवान्बहुभोगश्चजायतेनात्रसंशयः १२
बलंवांछतियोलोकोधर्मंवापुत्रमेवच
सर्वंसतुलभेन्नित्यंकपितीर्थप्रभावतः १३

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वर
संवादेकपितीर्थमाहात्म्यंनामद्विचत्वारिंशदधिकशततमोऽध्यायः १४२

त्रिचत्वारिंशदधिक शततमोऽध्यायः

एकधारंततोगच्छेत्तीर्थंपरमपावनम्
एकधारेनरःस्नात्वाएकरात्रमुपोषितः १
अर्चयन्स्वामिदेवेशंकुलानांतारयेच्छतम्
स्वामितीर्थसमंज्ञेयंयत्रतीर्थेऽवगाहनम् २
रुद्रलोकेनरोगच्छेत्तीर्थस्यास्यप्रभावतः
यत्रस्नात्वाचपीत्वाचब्रह्मलोकेचगच्छति ३
त्रैलोक्येपुण्यकर्माणस्तटेऽस्मिन्संवसंतिहि ४
नभयंविद्यतेतेषांखड्गधारादिकंचयत्
सत्सर्वमाशुनश्येतततीर्थेह्येकप्रधारके ५
इतिएकधारतीर्थवर्णनम्
सप्तधारंततोगच्छेत्तीर्थानांतीर्थमुत्तमम्
सप्तसारस्वतंनामयत्कृतेमुनिभिःकृतम् ६
त्रेतायुगेमंकितीर्थंकृतंमंकिमहर्षिणा
द्वापरेपांडुपुत्रैस्तुसप्तधारंप्रवर्तितम् ७
सप्तधारकतांप्राप्तंतीर्थंहरजटाच्युतम्
सप्तरूपाणिगंगायायामिलोकेषुसप्तसु ८
वहंतितानिपुण्यानितीर्थेऽस्मिन्सप्तधारके
सप्तधारेकृतंश्राद्धंपितृणांतृप्तिदायकम् ९
शृणुदेविप्रवक्ष्यामिइतिहासंपुरातनम्
यच्छ्रुत्वादेवदेवेशिब्रह्मलोकंव्रजेद्ध्रुवम् १०
कौषीतकस्यपुत्रोवैमंकिनामेतेविश्रुतः
विष्णुध्यानरतोनित्यंविष्णुलोकप्रपूजकः ११
वेदाध्ययनकर्ताचअग्निहोत्रपरायणः
सुरूपाविश्वरूपेतिस्त्रियौद्वेस्तस्तुतद्गृहे १२
ताभ्यांपुत्रविहीनाभ्यांदृष्ट्वादेविविशंकितः
किंकर्तव्यमितिध्यायन्नतिचिंतापरोऽभवत् १३

स्थिरोवंशस्तुपुत्रेणह्यन्यथानरकंव्रजेत्
एवंचिंताप्रकुर्वाणोनसुखंलभतेक्वचित् १४
तदास्वगृहमुत्सृज्यगतोवैगुरुसन्निधौ
नमोवैगुरुवेतुभ्यंदेवानामुपकारिणे १५
त्वंनाथःसर्वलोकानांब्राह्मणानांचरक्षकः
यज्ञानांत्वंप्रकर्त्ताचद्विजराजनमोस्तुते १६
अपुत्रोऽहतुविप्रर्षेकिंकर्त्तव्यमितिप्रभो
वदत्वंतुयथासर्वंपुत्रोभवतिनिश्चितम् १७
अपुत्रस्यगतिर्नास्तिस्वर्गेनैवचनैवच
येनकेनाप्युपायेनपुत्रस्यजननंचरेत् १८
इतिवाक्यंतुसंस्मर्य्यह्यागतस्तवसन्निधौ १९
गुरुरुवाच
गच्छत्वंमुनिशार्दूलयत्रसाभ्रमतीनदी
तत्रगत्वामुनिश्रेष्ठपुत्रान्वैप्राप्स्यसेध्रुवम् २०
तद्वाक्यंतुसमाकर्ण्यनमस्कृत्वातुदंडवत्
सगतोविप्रराजस्तुनदींसाभ्रमतींप्रति २१
मंकिनामातुविप्रर्षिस्तत्रगत्वातपोमहत्
अतप्यततदादेवियावद्वर्षचतुष्टयम् २२
यत्रतीर्थंकृतंतेनमंकिनाब्रह्मवादिना
त्रेतायुगेतदादेवितदातीर्थंमहाद्भुतम् २३
जातंतत्रनसंदेहःपुत्रदंसार्वकामिकम्
अद्यापिमंकितीर्थाभंनभूतंनभविष्यति २४
सवैद्विजवरोमंकिःपुत्रान्प्राप्ययथासुखम्
भोगान्नानाविधान्भुक्त्वासगतोमंदिरंमम २५
एतदाख्यानकंदिव्यंपवित्रंपरमंमहत्
पुत्रसौख्यादिकंसर्वंलभतेश्रवणादतः २६
इति श्रीपाद्मेमहापुराणेपंचापंचाशत्साहस्त्र्यांसंहितायामुत्तरखंडेउमामहेश्वर
संवादेसप्तधारतीर्थमहिमानामत्रिचत्वारिंशदधिकशततमोऽध्यायः १४३

चतुश्चत्वारिंशदधिकशततमोऽध्यायः

महादेवउवाच
ब्रह्मवल्लीमहत्तीर्थंततोगच्छेत्सुरेश्वरि
तस्यतीर्थस्यस्वरूपंसाद्याच्छृणुसुरोत्तम १
यत्रसाभ्रमतीतोयंब्रह्मवल्ल्यंभसासह
युज्यतेब्रह्मतीर्थंतत्प्रयागेनसमंस्मृतम् २
तत्रपिंडप्रदानेनतृप्तिर्द्वादशवार्षिकी
पितृणांजायतेनूनंब्रह्मणोवचनंयथा ३
गयाश्राद्धसमंपुण्यंब्रह्मवल्ल्यांविशेषतः
यत्रज्ञात्वाप्रकुर्वंतिपितरस्तृप्तिमाप्नुयुः ४
गोदानंभूमिदानंचअन्नदानंतथैवच
एतद्दानसमंपुण्यंब्रह्मवल्ल्यांविशेषतः ५
अत्रैवसनकाद्यास्तुस्नात्वाचविधिपूर्वकम्
परंब्रह्मपदध्यानाद्विष्णुलोकमवाप्नुयुः ६
पुष्करेचैवगंगायांक्षेत्रेचामरकंटके
तत्रगत्वातुदेवेशियत्फलंलभतेनरः ७
तत्फलंसमवाप्नोतिब्रह्मवल्ल्यांविशेषतः
चंद्रसूर्योपरागेचदानंयेददतेनराः ८
तत्फलंसमवाप्नोतिब्रह्मावल्लयांसुरेश्वरि
दिव्यरूपधरास्तेचशंखचक्रगदाधराः ९
तेऽपिस्वर्गेहिगच्छंतिस्नानंकृत्वासुरेश्वरि
धृत्वातुलसिजांमालांनारायणमनुस्मरन्
वैकुंठंदिव्यमानंदंयातिवैपदमव्ययम् १०
इति ब्रह्मवल्लीतीर्थमाहात्म्यम्
वृषतीर्थंततोगच्छेत्खंडतीर्थेऽतिविश्रुतम्
तत्रस्नात्वादिवंगावोगोलोकंचपुराश्रिताः ११
खंडरूपेणधर्मेणयागावोलोकमातरः
शापाद्भ्रष्टावितास्तेनखंडतीर्थमथोच्यते १२
पार्वत्युवाच
शापोहिलोकमातॄणांगवांकस्यपुराऽभवत्

कथंलोकात्परिभ्रष्टाःकथंधर्मेणरच्चिताः १३
महादेवउवाच
पुरावृषेणगोलोकेक्रीडतासहमातृभिः
मुक्तंतथाशकृन्मूत्रंपतितंहरमूर्द्धनि १४
ततस्तासांददौशापंतेनदोषेणवैहरः
नष्टसंज्ञास्वलोकाच्चगावोयास्यथमेदिनीम् १५
गावःशप्ताभगवतासंप्रसाद्यपुनर्हरम्
प्राप्स्यामहेपुनर्लोकंइतिदेवंययाचिरे १६
यदासाभ्रमतीतीर्थेब्रह्मवल्लीसमीपतः
खंडसंज्ञह्रदेस्नात्वास्वर्गंवैप्राप्स्यथध्रुवम् १७
ततस्तस्मिन्ह्रदेस्नात्वागावोगोपतिनासह
स्वर्गंगताशुद्धतमामहादेवसमीपतः १८
गोह्रदेतुनरःस्नात्वाकृत्वावैपितृतर्पणम्
गवांलोकमवाप्नोतिदाहप्रलयवर्जितम् १९
तत्रस्थित्वानिराहारोगोपिंडंचददातिवै
सनरःसुखमेधेतयावदिंद्राश्चतुर्दश २०
गवांकोटिप्रदानेनयत्फलंप्राप्यतेध्रुवम्
तत्फलंसमवाप्नोतिखंडतीर्थेनसंशयः २१
गृहीत्वावृषमूत्रंचतीर्थंयःपिबतेनरः
तत्च्चणादेवशुद्धिःस्यात्खंडतीर्थेनसंशयः २२
खंडतीर्थात्परंतीर्थंनभूतंनभविष्यति
येगच्छंतिसुरश्रेष्ठतेनराःपुगयभागिनः २३
तत्रगत्वासुरश्रेष्ठेगवांपूजनमाचरेत्
वृषभंचततःपूज्यस्नानंकृत्वासमाहितः २४
पूजनाद्वैनसंदेहोगोलोकेतुवसेच्चिरम्
तत्रगत्वाविशेषेणसौवर्णीगांददंतिये २५
तेनराभुंजतेसौख्यंयावदिंद्राश्चतुर्दश
दशधेनुंततःकृत्वायोददातिद्विजातये २६
खंडतीर्थेसुरश्रेष्ठेतदनंतफलंस्मृतम्
तत्रगत्वातुकर्त्तव्यंपिप्पलारोपणंबुधैः २७

तत्कृतेसतिदेवेशिपितृलोकंसगच्छति
पंचवामलकीर्दिव्यायेकुर्वंतिप्ररोपणम् २८
इहलोकेसुखंभुक्त्वाहरिलोकंव्रजंतिते २९
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वर
संवादेखंडतीर्थंनामचतुश्चत्वारिंशदधिकशततमोऽध्यायः १४४

पञ्चचत्वारिंशदधिकशततमोऽध्यायः

श्रीमहादेवउवाच
ततोगच्छेःमहत्तीर्थेसंगमेश्वरमुत्तमम्
यत्रहस्तिमतीपुण्यासाभ्रमत्याहिसंगता १
शापंकौडिन्यमुनितःप्राप्यशुष्काभवन्नदी
बहिश्चर्येतिनाम्नावैलोकेख्यातिमुपागता २
तत्तीर्थंसंप्रवक्ष्यामिपुण्यं त्रैलोक्यविश्रुतम्
सर्वपापहरंपुण्यं त्रैलोक्येचापिविश्रुतम् ३
यत्रतीर्थेनरःस्नात्वादृष्ट्वादेवंमहेश्वरम्
मुच्यतेसर्वपापेभ्योरुद्रलोकंप्रगच्छति ४
शृणुदेविप्रवक्ष्यामिएतच्छापस्यकारणम्
यथैहशुष्करूपाहिजाताशापस्यकारणात् ५
यत्रसाभ्रमतीपुण्यागंगानाममहानदी
तत्रहस्तिमतीनामगंगयासहसंगता ६
तत्रारब्धंचमुनिनातपोवैपरमंमहत्
एवंबहुगतेकालेऋषिणापरमात्मना ७
आराधितोहृषीकेशोनारायणनिरंजनः
तस्यास्तटेतुदेवेशिवर्षाणिचबहून्यपि ८
गतानिचविशेषेणमुनेस्तस्यतुपार्वति
कदाचिद्दैवयोगाच्चवर्षाकालःसमागतः ९
नदीतत्रतुसंपूर्णाकालयोगेनसुव्रते
तत्कौंडिन्येनऋषिणास्थानंत्यक्तंतदानिशि १०
रात्रौदुःखंमहज्ञातंहाहेतिकरुणोरुदन्
किंकर्तव्यमितिध्यायन्नतिचिंतापरोऽभवत् ११

आश्रमोहिमहादिव्योऋषिरगैवसमायुतः
सगतोवारियोगेनहस्तिमत्यांसुरोत्तमे १२
फलानिचैवमूलानिपुस्तकानिबहून्यपि
तानितस्यांगतान्येववारियोगेनसुंदरि १३
सकौंडिन्योऋषिश्रेष्ठःशशापतांनदींकिल
उदकेनविनात्वंचभविष्यसिकलौयुगे १४
एवंसदत्त्वावैशापंहस्तिमत्यामहेश्वरि
गतोऽसौविप्रप्रवरोविष्णुलोकंसनातनम् १५
अद्यापिवर्ततेतीर्थंसंगमेश्वरसंज्ञकम्
यदृष्ट्वामुच्यतेपापीब्रह्महत्यादिपातकात् १६
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वर संवादेसोमेश्वरतीर्थमहिमानमपंचचत्वारिंशदधिकशततमोऽध्यायः १४५

षट्चत्वारिंशदधिकशततमोऽध्यायः

महादेवउवाच
ततोगच्छेतदेवेशितीर्थंरुद्रमहालयम्
केदारानुपमंसाक्षाद्रुद्रेणपरिनिर्मितम् १
श्राद्धंतत्रैवकर्तव्यंपितृणांतृप्तिकारणम्
तत्रश्राद्धप्रदानेनपितरः सपितामहाः २
तृप्ताःसमभिगच्छंतिरुद्रस्यपरमंपदम्
वृषमुत्सृजतेयस्तुतत्ररुद्रमहालये ३
कार्तिक्यामथवैशाख्यांरुद्रेणसहमोदते
केदारेउदकंपीत्वापुनर्जन्मनविद्यते ४
अत्रतुस्नानमात्रेणमुक्तिभागीनसंशयः
एकस्मिन्समयेदेवित्यक्त्वाकैलासमागतः ५
साभ्रमतींमहागंगांज्ञात्वालोकहितायवै
तत्रस्नात्वाचपीत्वाचकृत्वातीर्थमनुत्तमम् ६
ततोहंचस्वकंस्थानंकैलासंप्रतिभामिनि
तदनंतरंमहापुरायंतीर्थंजातंमहालयम् ७
रुद्रमहालयमितल्केख्यातिंगमिष्यति

कार्तिक्यामथवैशाख्यांयेगच्छंतिसुरोत्तमे
नतेषांविद्यतेदुःखसर्वसंसारजंपुनः ८
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायांमुत्तरखंडेउमामहेश्वर
संवादेरुद्रमहालयतीर्थंनामषट्चत्वारिंशाधिकशततमोऽध्यायः १४६

सप्तचत्वारिंशदधिकशततमोऽध्यायः

महादेवउवाच
देविवैश्रूयतांतीर्थं देवानामपिदुर्ल्लभम्
खड्गतीर्थमितिख्यातंसर्वपापप्रणाशनम् १
खड्गतीर्थेनरःस्नात्वादृष्ट्वाखड्गेश्वरंशिवम्
ननरोदुर्गतिंगच्छेत्स्वर्गलोकंप्रगच्छति २
खड्गधारेश्वरंदेवंयःपश्यतिसुरोत्तमे
कार्तिक्यांतुविशेषेणपूजनंतत्रकारयेत् ३
अयंविश्वेश्वरोदेवःसर्वदाभुविवल्लभे
सर्वंददातिसर्वेशोवांच्छितार्थप्रदायकः ४
वैशाखेराज्यकामार्थीयःपश्यतितमीश्वरम्
तमर्थंलभतेह्विप्रंविश्वनाथप्रसादतः ५
पुष्पैर्धूपैश्चनैवेद्यैर्दीपैर्वानगनंदिनि
फलप्रदानैर्बिल्वैश्चविश्वेशंपूजयेत्ततः ६
धनधान्यप्रदंचाशुपुत्रपौत्रादिसंपदः
प्राप्यंतेनात्रसंदेहःश्रीविश्वेश्वरपूजनात् ७
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वर
संवादेखड्गतीर्थंनामसप्तचत्वारिंशदधिकशततमोऽध्यायः १४७

अष्टचत्वारिंशदधिकशततमोऽध्यायः

महादेवउवाच
साभ्रमत्यास्तटेतीर्थंगयातीर्थमनुत्तमम्
चित्रांगवदनंनाममालार्काधिष्ठितंशुभम् १
कल्पपादपसंतानैर्मंदारैश्चोपशोभितम्
चूतनिंबकदंबैश्चकाश्मर्यश्वत्थतिंदुकैः २

तस्मादपहरेत्कुष्ठंयोजनस्मृतिविभ्रमात्
यस्यसंजायतेकुष्ठंतस्यमालार्ककोहरेत् ३
यातुवेदोक्तविधिनानारीतत्राभिषिंचति
मृतवत्साऽथवावंध्यापुत्रंप्राप्नोतिसाचिरात् ४
संध्यास्नानंजपोहोमःस्वाध्यायोदेवतार्चनम्
कृतंभास्करभक्तेनमालार्केह्यक्षयंभवेत् ५
अत्रगत्वातुदेवेशिश्रीरवेर्व्रतमाचरेत्
इहलोकेसुखंभुक्त्वारवेर्लोकंहियातिवै ६
मृतवत्सोहिराजर्षिस्तत्रगत्वाऽकरोत्तपः
सराजाप्राप्तवान्पुत्रंश्रीमालार्कप्रसादतः ७
अत्रगत्वाविशेषणउपवासीजितेंद्रियः
मालार्कंपूजयेद्योवैमुक्तिभागीभवेद्ध्रुवम् ८
वसिष्ठप्रमुखाविप्रादेवाइंद्रादयःसदा
निवसंतिसुरश्रेष्ठेमालार्केरविसन्निधौ ९

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वर
संवादेमालार्कतीर्थंनामअष्टचत्वारिंशदधिकशततमोऽध्यायः १४८

एकोनपञ्चाशदधिकशततमोऽध्यायः

महादेवउवाच
तीर्थादस्मात्परंतीर्थंमालार्कांतरतःस्थितम्
चंदनेश्वरमागच्छेदामोदस्थानमुत्तमम् १
दुःशासनस्यरुधिरंपीत्वाभीमोमहाबलः
प्रतिज्ञामात्मनःसर्वांपूरयित्वासुदारुणाम् २
कराभ्यांरुधिराक्ताभ्यांद्रौपद्याःकेशबंधनम्
कृत्वादत्त्वाद्विजातिभ्योतीर्थयात्रांततोऽगमत् ३
साभ्रमत्यास्तटेरम्येगतोवैभ्रातृभिःसह
आनीतःसाभ्रमत्यांयःस्वर्गाच्चंदनपादपः ४
सतुलिगतयाजातःपुण्यतीर्थप्रभावतः
तत्रस्नात्वाचपीत्वाचकृत्वावैपितृतर्पणम् ५
ननरोनिरयंगच्छेद्रुद्रलोकमवाप्नुयात्

चंदनेशंततोदृष्ट्वाविश्वेशंलोकशंकरम् ६
पूजयेच्चयथाशक्त्यायत्रगत्वानशोचति
यत्रकैवर्तकोराजापूजांकृत्वाह्यनेकशः ७
सगतःशिवलोकंतंयत्रगत्वानशोचति
मज्जंतिऋषयोयत्रयत्रदेवःसनातनः ८
साक्षाद्विष्णुःपरमात्मानित्यंतिष्ठतिभूतिदः
इयंसाभ्रमतीधन्याधन्योविश्वेश्वरःप्रभुः ९
यत्रतीर्थान्यनेकानिजातानिभुविपार्वति
अत्रचामर्दकीपुण्यैःफलैर्नानाविधैःशुभैः १०
कर्त्तव्यमर्घदानंचविधिनातत्रसुंदरि ११

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वर संवादेचंदनेश्वरमाहात्म्यंनामैकोनपंचाशदधिकशततमोऽध्यायः १४९

पञ्चाशदधिकशततमोऽध्यायः

महादेवउवाच
जंबूतीर्थंततोगच्छेत्स्नानार्थंपापनाशनम्
कलिकालेचयत्पुंसांस्वर्गसोपानवत्स्थितम् १
यत्रजांबवतापूर्वंदशांगेपर्वतोत्तमे
स्थापितंऋक्षराजेशंलिंगंसुरगणार्चितम् २
रामेणहियदापूर्वंहतोवैरावणोऽसुरः
तदाजांबवतादिक्षुभेरीघोषैःप्रघोषितम् ३
जितंवैरामचंद्रेणरावणोनिहतोरणे
लब्ध्वासीतेतिसंघुष्यस्नातंतीर्थवरेशुभे ४
स्थापितंतत्रलिंगंतुस्वनाम्नातुसुरेश्वरि
तत्रस्नात्वानरःसद्यःस्मृत्वारामंसहानुजम् ५
जाबवंतेश्वरंस्नात्वारुद्रलोकेमहीयते
यत्रयत्रहिभोदेविश्रीरामस्मरणंकृतम्
भवबंधविमोक्षोहिदृश्यतेसचराचरे ६
अहंरामस्तुविज्ञेयोरामोवैरुद्रएवच
एवंज्ञात्वातुतेदेविनभेदोवर्ततेक्वचित् ७

रामरामेतिरामेतिमनसायेजपंतिच
तेषांसर्वार्थसिद्धिश्चभविष्यतियुगेयुगे ८
अहंहिसर्वदादेविश्रीरामस्मरणंचरे
यंश्रुत्वातुपुनर्देविनभवोजायतेक्वचित् ९
काश्यांहिनिवसन्नित्यंश्रीरामंकमलेक्षणम्
स्मरामिसततंदेविभक्त्याचविधिपूर्वकम् १०
जांबवतातदापूर्वंस्मृत्वारामंसुशोभनम्
जांबवंतमितिख्यातंप्रस्थाप्यजगतांगुरुम् ११
तत्रस्नात्वाचभुक्त्वाचकृत्वादेवस्यपूजनम्
शिवलोकमवाप्नोतियावदिंद्राश्चतुर्दश १२
अत्रहिस्नानमात्रेणयथाजांबवतोबलम्
तथावैबलमाप्नोतिश्रीविश्वेशप्रसादतः १३
अत्रगत्वातुभूदानंपुमान्यश्चकरोतिवै
फलंसहस्रगुणितंजांबवंतेशदर्शनात् १४

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउ-
मामहेश्वरसंवादेजांबवततीर्थमाहात्म्यंनामपंचाशदधिकशततमोऽध्यायः १५०

एकपञ्चाशदधिक शततमोऽध्यायः

महादेवउवाच
अस्मात्तीर्थात्परंतीर्थंइंद्रग्राममितिस्मृतम्
यत्रस्नात्वापुराशक्रोविमुक्तोघोरकिल्बिषात् १
पार्वत्युवाच
केनेहकर्मणाशक्रःप्राप्तवान्घोरकिल्बिषम्
विपाप्माचकथंसोऽभूदितिविस्तरतोवद २
महादेवउवाच
इंद्रःसुरेश्वरःपूर्वंनमुचिश्चासुरेश्वरः
अशस्त्रवधमन्योऽन्यसमयंतौप्रचक्रतुः ३
अथेंद्रस्तुनभोवाणीनिर्देशान्नमुचिंतदा
जघानफेनमादायब्रह्महत्यातदाऽभवत् ४
पप्रच्छचगुरुंशक्रःपापनिर्नाशकारणम्

बृहस्पतेरथादेशात्साभ्रामत्युत्तरेतटे ५
अस्मिन्स्थानेसमागत्यस्थानंचक्रेसुरेश्वरः
तस्येहस्नानमात्रेणगतपापस्यतत्क्षणात् ६
पूर्णेंदुधवलाकांतिःशरीरेसमजायत
धवलेश्वरमीशानंस्थापयामासवृत्रहा ७
इंद्रनाम्नाचतल्लिंगंविश्रुतंपृथिवीतले
पूर्णिमास्यांतथादर्शेसंक्रांतौग्रहणेतथा ८
श्राद्धेकृतेपितृणांतुतृप्तिर्द्वादशवार्षिकी
धवलेश्वरमासाद्ययःकुर्याद्द्विप्रभोजनम् ९
एकस्मिन्भोजितेविप्रेसहस्रंभोजितंभवेत्
हिरण्यभूमिवासांसिदातव्यानिस्वशक्तितः १०
शुक्लागौब्राह्मणेदेयासवत्साचपयस्विनी
अत्रागत्यतुयोविप्रोरुद्रजाप्यादिकंचरेत् ११
तत्कृतंकोटिगुणितंश्रीमहेशप्रसादतः
अत्रतीर्थेनरोयस्तुउपवासादिकंचरेत् १२
सएवसर्वकामाढ्योभवत्येवनसंशयः
बिल्वपत्रंसमानीययःपूजयतितंप्रभुम् १३
धर्ममर्थंचकामंचलभतेमानवोभुवि
सोमवारेविशेषेणयेगच्छंतिनरोत्तमाः १४
तेषांरोगंतथादोषंशमयेद्धवलेश्वरः
रवौवाऽथविशेषेणअर्चनंकुरुतेयदा १५
तेषांमहिमातुभोदेविनज्ञातःकर्हिचिन्मया
दूर्वयाचार्कपुष्पैर्वाकल्हारैःकमलैर्दलैः १६
पूजनंकुर्वतेयेऽत्रतेनराः पुण्यभागिनः
श्वेतार्कपुष्पमानीयधवलेशंप्रपूज्यतु १७
वांच्छितंलभतेनित्यंधवलेशप्रसादतः
कृतेवैनीलकंठस्तुसर्वेषांशंकरःसदा १८
त्रेतायुगेसविख्यातोहरोवैभगवान्प्रभुः
द्वापरेशर्वसंज्ञस्तुकलौवैधवलेश्वरः १९
अत्रार्थेयत्पुरावृत्तंतच्छृणुष्वसुरेश्वरि

नंदिर्नामपुरावैश्यइंद्रग्रामेसमावसत् २०
शिवध्यानपरोभूत्वाशिवपूजांचकारसः
नित्यंतपोवनस्थंहिलिगंधवलसंज्ञकम् २१
उषस्युषसिचोत्थायप्रत्यहंशिववल्लभः
नंदीलिगार्चनरतोबभूवातिशयेनहि २२
यथाशास्त्रेणविधिनापुष्पार्चनपरोऽभवत्
एकदामृगयालुब्धःकिरातोभूतहिंसकः २३
पापीपापसमाचारश्चरन्साभ्रमतीतटे
अनेकश्वापदाकीर्णेहन्यमानोमृगान्शरैः २४
एवंविचरमाणोऽसौकिरातोभूतहिंसकः
यदृच्छयागतस्तत्रयत्रलिगंसुपूजितम् २५
धवलेश्वरविख्यातंअनेकाश्चर्यमंडितम्
दृष्टंसुपूजितंलिगंनानापुष्पैःफलैस्तथा २६
एवंलिगंसमालिग्यगतःसाभ्रमतीतटे
तत्रपीत्वापयःसोऽथमुखंगंडूषपूरितम् २७
कृत्वाचैकेनहस्तेनमृगमांसंसमुद्वहन्
करेणैकेनपूजार्थबिल्वपत्राणिवैदधत् २८
शीघ्रमागत्यलिगांतेपदापूजांसमाहनत्
पुष्पाणितानिसर्वाणिविधूतानिइतस्ततः २९
स्नापनंतस्यलिगस्यकृतंगंडूषवारिणा
करेणैकेनपूजार्थबिल्वपत्राणिसोऽपयत् ३०
द्वितीयेनकरेणैवमृगमांसंसमर्पयत्
दंडप्रणामसंयुक्तःसंकल्पंमनसाऽकरोत् ३१
अद्यप्रभृतिपूजांवैकरिष्यामिप्रयत्नतः
त्वंमेस्वामीचभक्तोऽहअद्यप्रभृतिशंकर ३२
एवंनियमवान्भूत्वाकिरातोगृहमागमत्
तथाप्रभातसमयेदेवायतनमागतः ३३
नंदीददर्शतंसर्वंकिरातेनचयत्कृतम्
अव्यवस्थंचतंदृष्ट्वाअमेध्यंशिवसन्निधौ ३४
विधूतानिचसर्वाणिहिंसकेनदुरात्मना

चिंतायुक्तोभवन्नंदीजातंकिंचित्रमद्यमे ३५
कथितानिचविघ्नानिशिवपूजारतस्यहि
उपस्थितानितान्येवममभाग्यविपर्ययात् ३६
एवंविमृश्यसुचिरंप्रक्षाल्यशिवमंदिरम्
यथागतेनमार्गेणनंदीस्वगृहमागमत् ३७
ततो नंदिनमालक्ष्यपुरोधागतमानसम्
अब्रवीद्वचनंतंतुकस्मात्त्वंगतमानसः ३८
पुरोहितंप्रतितदानंदीवचनमब्रवीत्
अद्यदृष्टंमयाविप्रअमेध्यंशिवसन्निधौ ३९
केनेदंकारितंतत्रनजानामीहकिंचन
ततःपुरोधावचनंनंदिनंचाब्रवीत्तथा ४०
येनविस्खलितंतत्रपुष्पादीनांप्रपूजनम्
सोऽपिमूढोनसंदेहःकार्याकार्येषुमंदधीः ४१
तस्माच्चिंतानकर्तव्यात्वयापुनरपिप्रभो
प्रभातेचमयासार्द्धंगम्यतांतच्छिवालयम् ४२
निरीक्षणार्थंदुष्टस्यतस्यदंडंकरोम्यहम्
एतच्छ्रुत्वातुवचनंनंदीतस्यपुरोधसः ४३
आस्थितःस्वगृहेनक्तंदूयमानेनचेतसा
तस्यांरात्र्यांव्यतीतायांआहूयचपुरोधसम् ४४
गतःशिवालयंनंदीसमंतेनमहात्मना
प्रक्षाल्यपूजनंकृत्वानानारत्नपरिच्छदम् ४५
पंचोपचारसंयुक्तंकृत्वावैब्राह्मणैःसह
एवंयामद्वयंजातंस्तूयमानस्यनंदिनः ४६
आयातोऽसौमहाकालस्तथारूपोमहाबलः
कालरूपोमहारौद्रोधनुष्पाणिःप्रतापवान् ४७
तंदृष्ट्वाभयसंत्रस्तोनंदीतत्रन्यलीयत
पुरोधाश्चैवसहसाभयभीतस्तदाभवत् ४८
किरातेनकृतंतत्रयथापूर्वमविस्खलन्
तांपूजांसपदाहृत्यबिल्वपत्रंसमर्पयत् ४९
नैवेद्येनपलेनैवकिरातःशिवमार्चयत्

दंडवत्पतितोभूमौउत्थायस्वगृहंगतः ५०
तंदृष्ट्वामहदाश्चर्यंचिंतयामासवैचिरम्
पुरोधसातदानंदीसहव्याकुलचेतसा ५१
तेनपृष्टास्तदाविप्राःकथ्यतांचयथातथम्
संप्रधार्यततःसर्वेमिलित्वाधर्मशास्त्रतः ५२
ऊचुःसर्वेतदाविप्रानंदिनंजातशंकितम्
ईशविघ्नंसमुत्पन्नंदुर्निवार्यंसुरैरपि ५३
तस्मादानयलिगंत्वंस्वगृहेवैश्यसत्तम
तथेतिमत्वाऽसौनंदीशिवस्योत्पाटनंमहत् ५४
कृत्वास्वगृहमानीप्रतिष्ठाप्ययथाविधि
सुवर्णपीठिकांकृत्वानवरंभासुशोभिताम् ५५
उपाहारैरनेकैश्चपूजयामासवैतदा
अथापरेद्युरायातःकिरातःशिवमंदिरम् ५६
यावद्विलोकयामासलिगमैशंनदृष्टवान्
मौनंविहायसहसासाक्रोशमिदमब्रवीत् ५७
हेशंभोक्वगतोऽसित्वंदर्शयात्मानमद्यवै
यदिनोदर्शनंहेयंत्यद्व्याम्यद्यकलेवरम् ५८
हेशंभोहेजगन्नाथत्रिपुरांतकशंकर
हेरुद्रहेमहादेवदर्शयात्मानमात्मना ५९
एवंसाक्षेपमधुरैर्वाक्यैःक्षिप्त्वासदाशिवम्
किरातोऽसौक्षुरिकयाधीरोवैजठरंस्वकम् ६०
बिभेद्याशुततोबाहुमासाद्योच्चैरुषाब्रवीत्
हेशंभोदर्शयात्मानंकुतोमांत्यज्ययास्यसि ६१
इतिक्षिप्त्वाततोंत्राणिमांसमुद्धृत्यसर्वतः
तस्मिन्गर्तेकरेणैवकिरातःसहसाक्षिपत् ६२
स्वच्छंचहृदयंकृत्वासाभ्रमत्यांनिमज्ञतु
तथैवजलमानीयबिल्वपत्रंत्वरान्वितः ६३
पूजयित्वायथान्यायंदंडवत्पतितोभुवि
यदाध्यानस्थितस्तत्रकिरातःशिवसन्निधौ ६४
प्रादुर्भूतस्तदारुद्रःप्रमथैःपरिवारितः

कर्पूरगौरोद्युतिमान्कपर्दीचंद्रशेखरः ६५
तंगृहीत्वाकरेरुद्रउवाचपरिसांत्वयन्
भोभोवीरमहाप्राज्ञमद्भक्तोऽसिमहामते ६६
वरंवृणीष्वभोभक्तयत्तेमनसिवर्त्तते
एवमुक्तःसरुद्रेणमहाकालोमुदान्वितः ६७
पपातदंडवद्भूमौभक्तयापरमयायुतः
ततोरुद्रंबभाषेदंनवरंप्रार्थयाम्यहम् ६८
अहंदासोऽस्मितेरुद्रत्वंमेस्वामीनसंशयः
एतत्श्लाघ्यतमंलोकेदेहिजन्मनिजन्मनि ६९
त्वंमाताचपितात्वंचत्वंबंधुश्चसखाचमे
त्वंगुरुस्त्वंमहामंत्रोमंत्रैर्वेद्योऽसिसर्वदा ७०
निष्कामंवाक्यमाकर्ण्यकिरातस्यतदाभवः
ददौपार्षदमुख्यत्वंद्वारपालत्वमेवच ७१
तदाडमरुनादेननादितंभुवनत्रयम्
भेरीभांकारशब्देनशंखानांनिनदेनच ७२
तदादुंदुभयोनेदुःपटहाश्चसहस्रशः
नंदीतंनादमाकर्ण्यविस्मयात्त्वरितोययौ ७३
तपोवनंयत्रशिवःस्थितःप्रमथसंवृतः
किरातोहितथादृष्टोनंदिनाचतदाभृशम् ७४
उवाचप्रसृतोवाक्यंसनंदीविस्मयान्वितः
किरातंस्तोतुकामोऽसौपरमेनसमाधिना ७५
इहानीतस्त्वयाशंभुस्त्वंभक्तोऽसिपरंतपः
त्वद्भक्तोऽहमिहप्राप्तोमांनिवेदयशंकरे ७६
तच्छ्रुत्वावचनंतस्यकिरातस्त्वरयान्वितः
नंदिनंचकरेगृह्यशंकरंसमुपागतः ७७
प्रहस्यभगवान्रुद्रःकिरातंवाक्यमब्रवीत्
ब्रूहिकोऽसौत्वयानीतोगणानामिहसन्निधौ ७८
किरातउवाच
त्वद्भक्तोऽसौतदादेवतवपूजारतोह्यसौ
प्रत्यहंरत्नमाणिक्यपुष्पैश्चौच्चावचैरिह ७९

जीवितेनधनेनापिपूजितोऽसिनसंशयः
तस्माज्जानीहिभोस्वामिन्नंदिनंभक्तवत्सल ८०
महादेवउवाच
जानाम्यहंमहाभागनंदिनंवैश्यवर्त्तनम्
त्वंमेभक्तःसखाचेतिमहाकालमहामते ८१
उपाधिरहितायेचयेनिष्कपटमानसाः
तेप्रियास्तेचमेभक्तास्तेविशिष्टानरोत्तमाः
तावुभौस्वीकृतौतेनपार्षदत्वेनशंभुना ८२
ततोविमानानिबहुनितत्रसमागतान्येवमहाप्रभाणि
किरातवर्येणसवैश्यवर्यउद्धारितस्तेनमहाप्रभेण ८३
कैलासलोकमापन्नौविमानैर्वेगवत्तरैः
सारूप्यमेवसंप्राप्तोईश्वरस्यमहात्मनः ८४
नीराजितौगिरिजयापुत्रवत्तौगणावुभौ ८५
उवाचेदंततोदेवीप्रहस्यगजगामिनी
यथात्वंहिमहादेवतथाचेतौनसंशयः ८६
सारूप्येणचगत्याचहास्यभावैःसुपूजितैः
देव्यास्तद्वचनंश्रुत्वाकिरातोवैश्यएवच ८७
सद्यःपराङ्मुखौभूत्वाशंकरस्यचपश्यतः
ऊचतुस्त्वरयायुक्तौगणौरुद्रस्यपश्यतः ८८
उभावप्यनुकंप्यौचभवताहित्रिलोचन
तवद्वारिस्थितौनित्यंभवावस्तेनमोनमः ८९
तयोर्भावंसभगवान्विदित्वाप्रहसन्भवः
उवाचपरयाभक्त्याभवतोरस्तुवांछितम् ९०
ततःप्रभृतिद्वावेतौद्वारपालौबभूवतुः
शिवद्वारिस्थितौदेविमध्याह्नेशिवदर्शिनौ ९१
एकोनंदीमहाकालोद्वावेतौशिववल्लभौ
येपापिनोप्यधर्मिष्ठाश्रंधामूकाश्चपंगवाः ९२
कुलहीनादुरात्मानःश्वपचाद्याहिमानवाः
यादृशास्तादृशाश्चान्येश्राराध्यधवलेश्वरम् ९३
गतास्तेऽपिगमिष्यंतिनात्रकार्याविचराणा

अत्रस्नानंचदानंचसांनिध्यंशंकरस्यच ९४
साभ्रमत्यांकृतस्नानाधवलेश्वरपूजकाः
तेरुद्रलोकंगच्छंतिनात्रकार्याविचारणा ९५
अत्रस्नानंचदानंचयेकुर्वंतिनरोत्तमाः
धर्मार्थकामभोगाश्चभुक्त्वायांतिहरालयम् ९६
चंद्रसूर्योपरागेचपितुःसांवत्सरेदिने
यत्फलंलभतेमर्त्यस्तत्फलंप्राप्नुयाद्ध्रुवम् ९७
स्वर्गात्कामदुघादेविनित्यमायातिसर्वथा
आगत्यतंशिवंदेवंसमभ्यर्च्ययथातथा ९८
सागच्छतिसुरश्रेष्ठेस्वर्गंप्रतिनसंशयः
तेनदुग्धाभियोगेनलिगंतद्धवलीकृतम् ९९
धवलेश्वरंनामततःसंजातंभुविसर्वदा
जंतवोऽत्रसदादेविम्रियंतेकालनोदिताः
तेतेशिवपदंयांतियावच्चंद्रदिवाकरौ १००

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायांउत्तरखंडेउमा महेश्वरसंवादेधवलेश्वरमाहात्म्यंनामैकपंचाशदधिकशततमोऽध्यायः १५१

द्विपंचाशदधिकशततमोऽध्यायः

महादेवउवाच
तीर्थानांप्रवरंतीर्थंसाभ्रमत्यास्तटेस्थितम्
बालापइतिविख्यातंभुक्तिमुक्तिप्रदायकम् १
तपस्विधारितंतीर्थंविबुधानांसमाश्रयम्
तत्रकन्यातपस्तेपेपरमंसुदृढव्रता २
कन्याकण्वमुनेःसाध्वीरूपेणाप्रतिमाभुवि
बालाबालावतीनामकुमारीब्रह्मचारिणी ३
व्रतंचचारसावित्र्यानियमैर्बहुभिर्युता
भर्तामेभास्करोभूयादितिनिश्चित्यभामिनि ४
समास्तस्यसमाक्रांतादशसाभ्रमतीतटे
चरंत्यानियमांस्तांस्तान्भक्त्यापरमदुश्चरान् ५
तस्यास्तुतेनव्रतेनतपसाव्रतचर्यया

भक्त्याचभगवान्प्रीतःपरयाभक्तिसंपदा ६
आजगामाश्रमपदंदेवदेवोदिवाकरः
आस्थायरूपंविप्रर्षेःप्रविष्टस्तुमहामनाः ७
सातंदृष्ट्वोग्रतपसावरिष्ठंब्रह्मवित्तमम्
वानप्रस्थविधानेनपूजयामासतंद्विजम् ८
उवाचरविभक्तासाकल्याणीतंतपोधनम्
भगवन्मुनिशार्दूलकिमाज्ञापयसिप्रभो ९
सर्वंतुभ्यंयथाशक्तिदास्यामिस्वतनुंविना
सूर्यभक्तास्मितेपाणिंदास्यामिनकथंचन १०
व्रतैश्चनियमैश्चापितपोभिश्चतपोधन
सूर्यस्तोषयितव्योमेदेवस्त्रिभुवनेश्वरः ११
इत्युक्तवत्यांतस्यांतुस्मयन्निवनिरीक्ष्यताम्
उवाचनियमस्थांतांसांत्वयन्निवभास्करः १२
उग्रंचरसिकल्याणितपःपरमदुष्करम्
यदर्थंचसमारंभस्तवबालेतथैवतत् १३
तपसालभ्यतेसर्वंसर्वंतपसितिष्ठति
देवत्वंप्राप्यतेभद्रेतपसामोक्षएवच १४
इमानिपंचसुभगेबदराणिप्रतीच्छमे
दत्त्वासबदराण्यस्यैपचेत्युक्त्वारविर्ययौ १५
अपृष्ट्वातांतुकल्याणींब्रह्मरूपीविहायताम्
स्थितोऽसौनातिदूरेणइंद्रग्रामेमहायशाः १६
स्थित्वाजिज्ञासयाभावंतस्याश्चब्राह्मणोरविः
बदराणामुपवनंकारयामासभास्करः १७
ततःसाप्रयताबालाप्रांजलिर्विगतश्रमा
पाकायबदराणांसापावकंसमधिश्रयत् १८
अपचत्परमादेविबदराणिमहाप्रभा
तस्याःपचंत्याःसुमहान्कालोऽगात्त्वसुरेश्वरि १९
भस्मपुंजोमहान्जातोदिनंचक्षयमन्वगात्
हुताशनेनदग्धस्तुमहान्वैकाष्ठसंचयः २०
पादौप्रक्षाल्यसापश्चात्पावकेचारुदर्शने

ददाहबदरार्थंचब्राह्मणप्रियकाम्यया २१
दग्ध्वादग्ध्वापुनःपादौउपर्याधार्यतेऽनघे
अथास्याःकर्मतदृष्ट्वाप्रीतोदेवोदिवाकरः २२
ततःसंदर्शयामासकन्यायैरूपमात्मनः
उवाचपरमप्रीतस्तांकन्यांसुदृढव्रताम् २३
सूर्यउवाच
प्रीतोऽस्मिबालेभक्त्यातेतपसाव्रतचर्यया
यस्मादभिमतःकामोबालेसंपद्यतांतव २४
अस्मिंस्तीर्थेतपोयुक्तामद्गृहेत्वंनिवत्स्यसि
इदंचतीर्थप्रवरंतवनाम्नाचलक्षितम् २५
बालापइतिविख्यातंसाभ्रमत्यास्तटेस्थितम्
विख्यातंत्रिषुलोकेषुब्रह्मर्षिभिस्तुस्तुतंपुरा २६
बालातीर्थेनरःस्नात्वात्रिरात्रमुषितःशुचिः
रक्तादित्यमुखंदृष्ट्वासूर्यस्योदयनंप्रति २७
सूर्यलोकमवाप्नोतिनात्रकार्याविचारणा
सूर्यवारेऽथसंक्रांतौसप्तम्यांतुविशेषतः २८
विषुवत्ययनेचापिचंद्रसूर्यग्रहेऽपिच
स्नात्वासंतर्पयेद्देवान्पितॄनथपितामहान् २९
गुडधेनुंततोदद्याद्ब्राह्मणेभ्योगुडोदनम्
करवीरैर्जपापुष्पैरक्तादित्यप्रपूजनम् ३०
येकुर्वंतिनरास्तेवैसूर्यलोकेवसंतिवै
रक्तांधेनुंनरोदद्यादेकंचैवधुरंधरम् ३१
सयज्ञफलमाप्नोतिननरोनिरयंव्रजेत्
व्याधितोमुच्यतेरोगात्बद्धोमुच्येतबंधनात्
तीर्थेऽस्मिन्पिंडदानेनतृप्तिंयांतिपितामहाः ३२
महादेवउवाच
तथान्यदपिमाहात्म्यंतीर्थस्यास्यतपोधने
श्रूयतांयत्पुरावृत्तंव्यासेनकथितंमहत् ३३
पुरात्रमहिषोवृद्धोजरयाजर्जरीकृतः
अशक्तोभारमुद्वोढुंसार्थवाहस्तमत्यजत् ३४

सनिदाघेजलंपातुंजगामचमहानदीम्
दैवात्पंकेनिमग्नोऽसौततोमृत्युवशंगतः ३५
प्लवितास्थिर्जलेपुगयेतीर्थस्यास्यप्रभावतः
कान्यकुब्जेश्वरसुतोराजाजातिस्मरोऽभवत् ३६
संस्मृत्यचस्ववृत्तांतंप्रभावंतीर्थजंमहत्
आगत्यतज्जलेस्नात्वाददौदानान्यनेकशः ३७
सतत्रस्थापयामासदेवदेवंमहेश्वरम्
अत्रतीर्थेनरःस्नात्वासंपूज्यमहिषेश्वरम् ३८
रक्तादित्यमुखंदृष्ट्वासर्वपापैःप्रमुच्यते
साभ्रमत्युदकंयत्रपूर्वतःपश्चिमंव्रजे ३९
प्रयागादपितत्पुगयंसर्वकामप्रदंमहत्
दत्तंद्विजेंद्रेषुहुतंयदग्नौश्राद्धंकृतंजाप्यमिहाक्षयंस्यात् ४०
गोभूतिलाःकांचनवस्त्रधान्यंशय्यासनंवाहनछत्रदानम्
यंयंवांछयतेकामंतंतंप्राप्नोतिमानवः ४१
श्रीमहेशप्रसादाच्चतीर्थस्यास्यप्रभावतः
बालापेंद्रंइदंतीर्थंपुगयपापहरंसदा ४२
यंदृष्ट्वामुनयःसर्वेवीतरागाःसदैवतु
यत्रमाहिषनामेतिश्वेताख्यंपुगयदंमहत् ४३
यत्रस्नात्वातुदेवेशिपुनर्जन्मनविद्यते
गोदावर्यांकृतेस्नानेयत्फलंलभतेनरः ४४
तत्फलंलभतेदेविअत्रतीर्थेनसंशयः ४५

इति श्रीपाद्मेमहापुरागोपंचपंचाशत्सहस्रसंहितायामुत्तरखंडे बालापेंद्रंतीर्थंनामद्विपंचाशदधिकशततमोऽध्यायः १५२

त्रिपञ्चाशदधिकशततमोऽध्यायः

महादेवउवाच
अन्यत्तीर्थंप्रवक्ष्यामिदुर्द्धर्षेश्वरमुत्तमम्
यस्यस्मरगामात्रेगापापोऽपिपुगयवान्भवेत् १
वृत्तेदेवासुरेयुद्धेदैत्येचनिधनंगते
दुर्धर्षंचव्रतंकृत्वायत्रभार्गवनंदनः २

समाराध्यमहादेवंदुर्द्धर्षंलोककारणम्
मृतसंजीवनीमापयत्रविद्यांहित्र्यंबकात् ३
दैत्यार्थमुशनस्तीर्थंविख्यातंजगतीतले
काव्यतीर्थेकृतस्नानःपूज्यदेवंमहेश्वरम् ४
दुर्द्धर्षेश्वरसंज्ञंवैसर्वपापैःप्रमुच्यते
अत्रवृत्तंतुश्रोतव्यंत्वयाचनगनंदिनि ५
पुरायदाभवद्युद्धंवृत्रवासवयोरिह
तदासुरैर्जितादेवामघवान्वैसुरेश्वरः
किंकर्त्तव्यमितिध्यात्वागतोऽसौतंगुरुंप्रति ६
इंद्रउवाच
अस्माकंत्वंगुरुःसाक्षाद्देवानांपालकःसदा
ऋषीणांत्वंवरःश्रीमान्कृपांकुरुदयानिधे ७
वृत्रेणनिर्जितोऽहचक्वगच्छामिचसुव्रत ८
बृहस्पतिरुवाच
शृणुदेवेंद्रवक्ष्यामियेनत्वंहिसदासुखी
ममवाक्यंकुरुष्वैवयदीच्छेच्छुभमात्मनः ९
साभ्रमत्यांतदागच्छतत्रगत्वासुखीभव
दुर्द्धराख्योयत्रदेवोनित्यंतिष्ठतिभूतिदः १०
ददातिवांछितान्कामान्सत्यंसत्यंसुरेश्वर
गुरोर्वचनमाकर्ण्यसगतस्तांनदींप्रति ११
तत्रस्नात्वातुदेवेशोमहेशंतमपूजयत्
स्नानाच्चपूजनादेवसंतुष्टःश्रीमहेश्वरः १२
महादेवउवाच
यंयंप्रार्थयसेनित्यंतत्सर्वंहिददाम्यहम्
श्रुत्वावाक्यंतुदेवेशोह्युवाचपरमंवचः १३
इंद्रउवाच
त्वंनाथःसर्वलोकानांत्वमेवकारणंपदम्
त्वंहिविश्वेश्वरोदेवोसर्वदालक्ष्यसेमया १४
यदित्वंमेप्रसन्नोऽसिविश्वेश्वरसुरेश्वर
वृत्रंहनमहादेवएषकामोमहान्मम १५

महादेवउवाच
तववाक्यात्तुदेवेशवृत्रोऽसौनिहतोमया
मयायद्दीयतेशस्त्रंतद्गृह्णीष्वसुरेश्वर १६
तेनैवचासुयोगेनहनिष्यसिनसंशयः १७
इंद्रउवाच
किमस्त्रंवदविश्वेशयेनवृत्रंहिहन्म्यहम्
वज्रादप्यधिकंकिंत्तन्निर्मितंतुत्वयाकदा १८
महादेवउवाच
इदंपाशुपतंह्यस्त्रंनिर्मितंतुमयापुरा
नदत्तंकस्यचिच्छक्रतवार्थेरक्षितंमया १९
अत्रस्नातंत्वयादेवपूजनंवैत्वयाकृतम्
अतस्त्वंगृह्णमेशस्त्रंयेनवृत्रंहनिष्यसि २०
श्रीमहेशप्रसादाच्चप्राप्तंमघवताततः
तेनपाशुपतास्त्रेणहतोवृत्रोमहाबलः २१
तत्सर्वमत्रसंजातंदुर्द्धर्षेशप्रसादतः
स्नानमात्रात्तुदेवेशिपूजनादेवसांप्रतम् २२
तीर्थप्रभावात्संप्राप्तंसत्यंसत्यंवरानने
एवंज्ञात्वातुदेवेशितत्रवैस्नानमाचरेत्
दर्शनंतुमहेशस्यसर्वपापप्रणाशनम् २३
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तर
खंडेदुर्द्धर्षेश्वरमाहात्म्यंनामत्रिपंचाशदधिकशततमोऽध्यायः १५३

चतुष्पञ्चाशदधिकशततमोऽध्यायः

साभ्रमत्यास्तटेगुप्तंतीर्थंपरमपावनम्
खड्गधारमितिख्यातंकलौगुप्तंभविष्यति १
यत्रप्रसंगतःस्नात्वापीत्वावापोयदृच्छया
सर्वपापविनिर्मुक्तोरुद्रलोकेमहीयते २
यत्रसाभ्रमतीपुण्याकश्यपानुगतासती
रुद्रेणहिजटाजूटेधृतापातालगामिनः ३
खड्गधारेतिवैनाम्नारुद्रस्तत्रैवसंस्थितः

यत्रस्नात्वादिवंयाताःपापिनोऽपिसुरेश्वरि ४
अत्रैवोदाहरंतीममितिहासंपुरातनम्
किरातेनकृतंयच्चव्रतंपरमदुष्करम् ५
पार्वत्युवाच
किंनामवैकिरातोऽभूत्किंतेनव्रतमाहितम्
तत्सर्वंश्रोतुमिच्छामियथातथ्येनकथ्यताम् ६
नह्यन्योविद्यतेलोकेत्वांविनावदतांवरः
तस्मात्कथयभोदेवसर्वंशुश्रूषणेहितम् ७
महादेवउवाच
आसीत्पुरामहारौद्रश्चंडोनामदुरात्मवान्
क्रूरःशठोनैष्कृतिकोभूतानांचभयावहः ८
जालेनमत्स्यान्दुष्टात्माघातयत्यनिशंततः
भल्लैर्मृगान्श्वापदांश्चकृष्णसारान्सशल्लकान् ९
खगान्नानाविधांश्चैवविध्वाकांश्चित्प्रपातयेत्
पक्षिणोघातयन्क्रुद्धोबर्हिणश्चविशेषतः १०
लुब्धकोहिमहापापोदुष्टोदुष्टजनप्रियः
भार्यातथाविधातस्यपुंश्चलीचमहामया ११
एवंविहरतस्तस्यबहुकालोव्यवर्त्तत
एकदानिशिपापीयान्श्रीवृक्षोपरिसंस्थितः १२
कोलंहंतुंधनुःपाणिःशरंसंयोज्यकार्मुके
एवंनिशागतातस्यजाग्रतोनिमिषस्यहि
माघमासेसितायांवैचतुर्दश्यांनगात्मजे १३
श्रीवृक्षपत्राणिबहूनितत्रसंच्छेदयामासरुषान्वितोऽपि
श्रीवृक्षमूलेपरिवर्त्तमानंलिगंचतस्योपरितानिपेतुः १४
श्रीवृक्षपर्णानिचदैवयोगात्जातंचसर्वंशिवपूजनंतत् १५
गंडूषकारिणातेनस्नपनंचमहत्कृतम्
अज्ञानिनाचतेनैवपुष्कसेनदुरात्मना १६
माघमासेसितेपक्षेचतुर्दश्यांविधूदये
पुष्कसोहिदुराचारोनिष्पन्नोगतकल्मषः १७
तस्यभार्याप्रचंडाचआगतातस्यसन्निधौ

निराशाचनिराहारायत्रासौपुष्कसःस्थितः १८
नप्राप्तःशूकरस्तेनमृगोऽपिमहिषोऽपिवा
अशनार्थंचतस्यैवअन्नमादायभामिनी १९
तेनदृष्टाप्रचंडासाआयांतीक्रूरलोचना
सातस्यभार्यानद्यांवैजलमध्येपपातह २०
तावत्तयोक्तश्चंडात्माएहिशीघ्रंचभक्षय
समानीतंत्वदर्थंचमत्स्यमांसंमयाधुना २१
कृतंकिंमूढपूर्वेद्युर्मांसंपार्श्वेनदृश्यते
नाशितंचत्वयामूढकुटुंबंलंघतेतव २२
एतच्छ्रुत्वातुवचनंचंडायाश्चंडरूपवान्
शिवरात्र्युपवासेनरात्रौजागरणेनच २३
शुद्धांतःकरणोजातःस्नातुंनद्यांशुचिव्रतः
यावत्स्नातिसदुष्टात्मातावत्श्वातत्रचागतः २४
शुनातदाभक्षितंचसर्वंमांसंसुरेश्वरि
चंडाप्रकुपितातंचश्वानंहंतुमुपस्थिता २५
निवारिताहिचंडेनचंडाप्रकुपितातदा
नहंतव्यस्त्वयाचैषकिमनेनाशुभंकृतम् २६
तयोक्तंभक्षितंचान्नंअनेनैवदुरात्मना
किंत्वंभक्षयितामूढभविताद्यबुभुक्षितः २७
पुष्कसउवाच
यच्छुनाभक्षितंचान्नंतेनाहंपरितोषितः
किमनेनशरीरेणनश्वरेणगतायुषा २८
येपुष्यंतिशरीरंवैसर्वभावेनभामिनि
मूढास्तेपापिनोज्ञेयालोकद्वयबहिष्कृताः २९
तस्मान्मानंपरित्यज्यकामंचापिदुरात्मताम्
स्वस्थाभावविमर्शेनतत्वबुध्यास्थिराभव ३०
अहमेतच्छरीरंवैखड्गधारव्रतेनच
त्यक्ष्याम्यद्यवरारोहेकिंचिरंजीवनेनमे ३१
इत्युक्त्वाखड्गमाकृष्ययावद्भिनत्तिकंस्वकम्
आगताश्चगणास्तावद्बहवःशिवनोदिताः ३२

विमानानिबहून्यत्रआगतानितदंतिके
दृष्ट्वासचैवतान्येवंविमानानिगणांस्तथा ३३
उवाचपरयाभक्त्यापुष्कसोऽपिचतान्प्रति
कस्मात्समागतायूयंसर्वेरुद्राक्षधारिणः ३४
सर्वेस्फटिकसंकाशाःसर्वेचंद्रार्द्धशेखराः
कपर्दिनश्चर्मपरीतवाससोभुजंगभोगैःकृतहारभूषणाः ३५
श्रियान्वितारुद्रसमानवीर्यायथातथंभोवदतोचितंमम
पुष्कसेनतदापृष्टाऊचुस्तेरुद्रपार्षदाः ३६
गणाऊचुः
प्रेषितास्मोवयंचंडशिवेनपरमेष्ठिना
आगच्छत्वरितोभूत्वासस्त्रीकोयानमारुह ३७
लिगार्चनंकृतंयच्चत्वयारात्रौशिवस्यच
तेनकर्मविपाकेनप्राप्तोऽसिपरमांगतिम् ३८
तथोक्तोवीरभद्रेणउवाचप्रहसन्निव
किंमयासुकृतंचीर्णंपापिनापुष्कसेनहि ३९
मृगयारसिकेनैवमूढेनचदुरात्मना
पापाचारोह्यहंनित्यंकथंस्वर्गेवसाम्यहम् ४०
कथंलिगार्चनंचाद्याकृतमस्तितदुच्यताम्
परंकौतुकमापन्नःपृच्छामिकृपयावद ४१
वीरभद्रउवाच
देवदेवोमहादेवोयोगंगाधरसंज्ञकः
परितुष्टोऽद्यतेचंडसभार्यस्यउमापतिः ४२
प्रासंगिकंत्वयाचाद्यकृतमर्चनमेवच
कोलंनिरीक्षमाणेनविल्बपत्राणिचैवहि ४३
छेदितानित्वयाचंडपतितानितदैवहि
लिगस्यमस्तकेतानितेनत्वंसुकृतीप्रभो ४४
तवैवंजागरोजातोमहावृक्षोपरिध्रुवम्
तेनैवजागरेणैवतुतोषजगदीश्वरः ४५
छलेनैवमहाभागकोलसंदर्शनेनहि
शिवरात्रिदिनंव्याधप्रसंगेनाप्युपोषितम् ४६

तेनोपवासेनचजागरेणतुष्टोह्यसौदेववरोमहात्मा
तवप्रसादायमहानुभावोददातिसर्वान्वरदोवरांश्च ४७
एवमुक्तस्तदातेनवीरभद्रेणधीमता
पुष्कसोऽपिविमानाग्र्यमारुरोहचपश्यताम् ४८
गणानांदेवतानांचसर्वेषांप्राणिनामपि
तदादुंदुभयोनेदुर्भेरीतूर्याण्यनेकशः ४९
वीणावेणुमृदंगानिलास्यनाट्ययुतानिच
जगुर्गंधर्वपतयोननृतुश्चाप्सरोगणाः ५०
चामरैर्विज्यमानोहिछत्रैश्चविविधैरपि
महोत्सवेनमहताह्यानीतःशिवसन्निधौ ५१
पुष्कसोऽपितदाप्राप्तस्तीर्थस्नानशिवार्चनात्
किंपुनःश्रद्धयाभक्तयाशिवायपरमात्माने ५२
पुष्पादिकंफलंगंधंतांबूलान्नतमेवच
येप्रयच्छंतिलोकेऽस्मिंस्तेरुद्रानात्रसंशयः ५३
महादेवउवाच
तदाप्रभृतितत्तीर्थंखड्गधारेतिविश्रुतम्
एतत्तीर्थंकलौगुप्तंभविष्यतिसुरेश्वरि ५४
माघमासेऽथवैशाखेकार्तिक्यांचविशेषतः
स्नानंयेनप्रकुर्वंतिमुक्तास्तेनगनंदिनि ५५
वसिष्ठोवामदेवश्चभरद्वाजोऽथगौतमः
स्नानार्थेवैसमायांतिदेवंद्रष्टुंपिनाकिनम् ५६
त्रियुगेवर्त्ततेलिगंकलौनैवतुपार्वति
विश्वामित्रेणऋषिणादत्तशापोह्यहंतदा ५७
पार्वत्युवाच
कथंशापस्तुऋषिणादत्तश्चैवसुरेश्वर
तदहंश्रोतुमिच्छामित्वत्तोदेवनसंशयः ५८
महादेवउवाच
एकस्मिन्समयेदेविविश्वामित्रोमहातपाः
आगतःखड्गधारेऽस्मिंस्तीर्थेवैपरमाद्भुते ५९
साभ्रमत्यांकृतस्नानोदर्शनंकृतवान्मम

तत्रतिष्ठतिनित्यंवैपूजांकुर्वन्ननेकधा ६०
तत्रकोऽपिमहादुष्टःकौलिकःपापरुपधृक्
मांसंदत्तंतदातेनशिवस्योपरिभामिनि ६१
दृष्ट्वातदपिमांसंचविश्वामित्रोऽथवैपुनः
अब्रवीच्चतदातत्रदुष्कृतंपापिनाकृतम् ६२
नदत्तस्तस्यदंडोहिशर्वेणपरमात्मना
तस्मादहंहिनिश्चित्यशापंदास्येनसंशयः ६३
विचार्यैवंतदातेनशप्तोऽहदेविवैतदा ६४
अस्मिन्कलियुगेघोरेगुप्तस्त्वंभवसर्वथा
इतिदत्वाथवैशापंगतवान्मुनिसत्तमः ६५
तदाप्रभृतिभोदेविगुप्तोऽहऋृषिशापतः
ममस्थानेविशेषेणपूजनंकुरुतेयदि ६६
तेषांहिदुरितंयच्चनश्यतेतत्क्षणादपि
मृन्मयींमामकींमूर्तिंकृत्वायेपूजयंतिवै ६७
अत्रस्थानेविशेषेणमामकेतुवसंतिहि
खड्गधारेश्वरइतिनाम्नाख्यातःकलौयुगे ६८
कृतेवैमंदिरंनामत्रेतायांगौरवःस्मृतः
द्वापरेविश्वविख्यातःकलौखड्गेश्वरःस्मृतः ६९
दक्षिणंभागमाश्रित्यममस्थानंसुरेश्वरि
इतिज्ञात्वातुतत्रैवकृत्वामूर्तिंसदाबुधः ७०
पूजनंकुरुतेनित्यंवांछितंफलमाप्नुयात्
धर्मार्थकाममोक्षांश्चलभतेमानवोभुवि ७१
धूपंदीपंचनैवेद्यंतथावैचंदनादिकम्
येऽपयंतिहिदेवेशिलोकनाथेमहेश्वरि
नदुःखंतुभवेत्तेषांसत्यंसत्यंवरानने ७२

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्रसहितायामुउत्तर
खंडेधारेश्वरमाहात्म्यंनामचतुष्पंचाशदधिकशततमोऽध्यायः १५४

पञ्चपञ्चाशदधिकशततमोऽध्यायः

महादेवउवाच

खड्गधाराद्दक्षिणतस्तीर्थंपरमपावनम्
दुग्धेश्वरमितिप्रोक्तंसर्वपापप्रणाशनम् १
यस्मिंस्तीर्थेनरःस्नात्वादृष्ट्वादुग्धेश्वरंहरम्
पुमान्सद्योविमुच्येतदुःखात्पापसमुद्भवात् २
दधीचिनातपस्तप्तंसाभ्रमत्यास्तटेशुभे
चन्द्रभागामहत्पुण्यंगंगायासंगतायतः ३
तत्रस्नानंचदानंजपःपूजातपस्तथा
सर्वमक्षयतांयातिदुग्धतीर्थप्रभावतः ४
पार्वत्युवाच
दुग्धेश्वरसमुत्पत्तिंश्रोतुमिच्छामिवैप्रभो
महिमादुग्धतीर्थस्यकथ्यतांचसुरेश्वर ५
महादेवउवाच
पुरादेवासुरेयुद्धेदैत्यैर्देवाःपराजिताः
पलायनपराभूत्वादधीचाश्रममागताः ६
मुक्त्वातत्रायुधान्येवगतादेवादिशोदश
पश्चात्कोलाहलंश्रुत्वादधीचोदैत्यसंभवम् ७
पीतवांस्तानिशस्त्राणिजलेनाप्लाय्यभार्गवः
कालेनतेसुराःसर्वेअस्त्राण्यादातुमुत्सुकाः ८
गुरुणासहिताःसर्वेपरस्परमुदान्विताः
नकुलैःसहसर्पाश्चक्रीडंतेतेपरस्परम् ९
एवंविधान्यनेकानिसाश्चर्याणितदाश्रमे
पश्यंतोविबुधाःसर्वेविस्मयंपरमंगताः १०
ददृशुस्तेमुनिवरंआसनोपरिसंस्थितम्
यत्रसाभ्रमतीपुण्यामिलिताचंद्रभागया ११
वर्चसापरमेणैवभ्राजमानंयथारविम्
विभावसुद्वितीयंचसुवर्चाभार्ययासह १२
यथाब्रह्माहिसावित्र्यातथाऽसौमुनिसत्तमः
दृष्टःसुरवरैःसर्वैःप्रणिपातपुरःसरम् १३
ऊचिरेतंतदादेवाबृहस्पतिपुरोगमाः
त्वंदातात्रिषुलोकेषुविदितःपूर्वमेवच १४

याच्ञार्थंचवयंसर्वेत्वत्सकाशंसमागताः
भयभीतावयंसर्वेऽस्त्राणिनोदातुमर्हसि १५
इत्युक्तोमुनिवर्योऽसौदेवानाहमहामतिः
पीतानितानिभोदेवाजलेनाप्लाव्यमंत्रतः १६
ततोदेवाब्रुवन्विप्रं दैत्यानांनिधनायच
देह्यस्थीनित्वराविप्रदत्तानीतिद्विजोऽवदत् १७
इत्युक्त्वातान्स्वपत्नींसप्रेषयामासचाश्रमम्
तदोवाचद्विजोहृष्टोदेवान्स्मित्वामहामतिः १८
पीतानितानिभोदेवागृह्णीध्वंचयथातथम्
इत्युक्त्वाचद्विजोदेवियोगमास्थाययोगवित् १९
ततोब्रुवन्सुराविप्रंस्मयंतंछलयागिरा
त्वयिजीवतिभोब्रह्मन्कुतोस्थीनिलभामहे २०
प्रहस्योवाचविप्रर्षिस्तिष्ठध्वंक्षणमेकतः
स्वयमेवचभोदेवास्त्यक्ष्याम्यद्यकलेवरम् २१
इत्युक्त्वासद्विजोदेवियोगमास्थाययोगवित्
ब्रह्मलोकंगतःसद्योयतोनावर्त्ततेपुनः २२
ततःसर्वेसुरास्तत्रदृष्ट्वातंविलयंगतम्
चिंतयंतःसुरगणाःकथंचविशसामहे २३
सुरभिंचाह्वयामासतामुवाचशचीपतिः
कलेवरंद्विजेंद्रस्यलिहत्वंवचसामम २४
तथेतिचवचोमत्वातत्क्षणादेवलिह्यतत्
निर्मांसंचकृतंसद्यस्तयाधेन्वाकलेवरम् २५
जगृहुस्तानिचास्थीनिचक्रुःशस्त्राणिवैसुराः
तस्यवंशोद्भवंत्वस्त्रमासीद्ब्रह्मशिरस्तथा २६
शस्त्राण्यस्त्राणिकृत्वातेमहाबलपराक्रमाः
ययुर्देवास्त्वरायुक्तावृत्रघातनतत्पराः २७
ततःसुवर्चातुदधीचपत्नीसंप्रेषितायासुरकार्यसिद्धये
विलोकयामाससमेत्यतत्रमृतंपतिंदेहमथोविशस्तम् २८
ज्ञात्वातुतत्सर्वमथोसुराणांकृत्यंतदानींचचुकोपसाध्वी
ददौतदाशापमतीवरुष्टातदासुवर्चाऋृषिवर्यपत्नी २९

अहोसुरादुष्टतराश्चसर्वेह्यनेकशप्ताश्चतथैवलुब्धाः
तस्मात्तुसर्वेह्यप्रजाभवंतुसेंद्रासुराद्यप्रभृतीत्युवाच ३०
एवंशापंददौतेषांसुराणांसातपस्विनी
उपविश्याश्वत्थमूलेसाभ्रमत्यास्तटेस्थिता ३१
सगर्भासासतीसाध्वीस्वोदरंविददारह
निर्गतोजठराद्गर्भोदधीचस्यमहात्मनः ३२
साक्षाद्रुद्रावतारोऽसौपिप्पलादोमहाप्रभुः
प्रहस्यजननीगर्भंउवाचवचनंमहत् ३३
सुवर्चातंपिप्पलादंचिरंतिष्ठास्यसन्निधौ
अश्वत्थस्यमहाभागसर्वेषांशुभदोभव ३४
तथैवभाषमाणासासुवर्चातनयंप्रति
पतिंप्रत्यगमत्साध्वीपरमेनसमाधिना ३५
एवंदधीचपत्नीसापतिनास्वर्गमास्थिता
तेदेवाःकृतशस्त्रास्त्रदैत्यान्प्रतिसमुत्सुकाः ३६
आजग्मुश्चेंद्रमुख्याश्चमहाबलपराक्रमाः
कामधेनुःप्रसुस्त्रावययौयत्रद्विजःक्षयम् ३७
मुनेःप्रभावतोदुग्धंलिंगरूपंव्यजायत
दुग्धेश्वरमितिख्यातंदेविसाभ्रमतीतटे ३८
तदाप्रभृतितीर्थंहितन्नाम्नाप्रथितंभुवि
अतुलंयस्यमाहात्म्यंश्रवणात्पातकापहम् ३९
येशृण्वंतिनराभक्त्यादुग्धेश्वरसमुद्भवम्
तेऽपिपापविनिर्मुक्तायांतिरुद्रपदंमहत् ४०
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायांउत्तर
खंडेदुग्धेश्वरमाहात्म्यंनामपंचपंचाशदधिकशततमोऽध्यायः १५५

षट्पञ्चाशदधिकशततमोऽध्यायः

महादेवउवाच
दुग्धेश्वरस्यपूर्वेतुतीर्थंपरमपावनम्
चंद्रभागेतिवैनाम्नानदीयत्रतुसंगता १
तत्रचंद्रेश्वरोदेवोनित्यंतिष्ठतिपुण्यदः

योहरःसर्वदाव्यापीलोकानांसुखदोमहान् २
अत्रस्नानंप्रकुर्वंतिध्यानंकुर्वंतिनित्यशः
तत्फलंप्राप्नुयुस्तेवैसाभ्रमत्यांशिवार्चनात् ३
सोमेनात्रतपस्तप्तंकालंबहुतरंकिल
तस्माच्चन्द्रेश्वरोनामस्थापितोवैमहेश्वरः ४
शुक्रेणापितपस्तप्तंचन्द्रभागासमीपतः
अतस्तीर्थाधिकंतीर्थंपावनंसर्वदाभुवि ५
कलौगुप्तंतुऋषिणाकारितंवैसुरेश्वरि
यत्रहेममयंलिगंदृश्यतेनात्रसंशयः ६
अत्रस्नात्वाचपीत्वाचकृत्वावैशिवपूजनम्
येनराःसंगमिष्यंतिधर्मानर्थांल्लभंतिते ७
वृषोत्सर्गादिकंकर्मयेकुर्वंतिविशेषतः
भुक्त्वास्वर्गपदंतेवैपश्चाद्यांतिहरालयम् ८
स्नानार्थेप्रत्यहंदेविचंद्रभागासमीपतः
आगमिष्यंतियेलोकास्तेज्ञेयाःपुण्यभागिनः ९
गत्वापरतटेयेवैह्यर्चयंतिचतंशिवम्
चंद्रेश्वरेतिनामानंश्रीहरंपापकृंतनम् १०
अत्रगत्वाविशेषेणरुद्रजाप्यादिकंतथा
येकुर्वंतिनरश्रेष्ठास्तेज्ञेयाःशिवरूपिणः ११
सर्वदातुसुरश्रेष्ठयत्रस्नानंप्रकुर्वते
तेनराविष्णुरूपाणिविज्ञेयानात्रसंशयः १२
येऽत्रश्राद्धंप्रकुर्वंतितिलपिंडेनवापुनः
तेऽएपिविष्णुपदंयांतिपिंडदानप्रभावतः १३
अत्रदानंप्रकर्त्तव्यंस्नानंवैविधिपूर्वकम्
यत्रस्नात्वातुमुच्यंतेब्रह्महत्यादिकिल्बिषात् १४
तटेस्मिन्येविशेषेणवटंचारोपयंतिते
मृताःशिवपदंयांतियावच्चंद्रदिवाकरौ १५
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायांउत्तर
खंडेउमा०चंद्रेश्वरचंद्रभागामहिमानामषट्पंचाशदधिकशततमोऽध्यायः१५६

सप्तपञ्चाशदधिकशततमोऽध्यायः-

महादेवउवाच
दुग्धेश्वरसमीपतेतुतीर्थंचातीवपावनम्
रम्यंतत्पिप्पलादस्यनाम्नावैप्रथितंभुवि १
यत्रकृत्वातपःपूर्वंमातुर्वचनतोमुनिः
उत्पादयामासकृत्यांवडवानलसम्मिताम् २
पितुरानृरायमन्विच्छन्दधीचस्यमहात्मनः
तत्रस्नात्वाचपीत्वाचब्रह्महत्यांव्यपोहति ३
साभ्रमत्यास्तटेगुप्तंपिप्पलादंसुरेश्वरम्
तत्रस्नात्वातुभोदेविमुक्तिभागीभवेन्नरः ४
आरोपणंपिप्पलानांकर्त्तव्यंविधिपूर्वकम्
कृतेसतिमहादेविमुच्यतेकर्मबंधनात् ५
पार्वत्युवाच
किमर्थंसातुकृत्यावैउत्पन्नातांनिबोधय
तयावैकृत्ययापूर्वंकिंकृतंवदमेप्रभो ६
येनपुत्रेणसानीतापितुरानृरायकारणात् ७
महादेवउवाच
दाधीचोऋृषिवर्योऽसौह्यागतस्तपकारणात्
अत्रतेनमहत्तप्तमृषिणापरमात्मना ८
तत्रकोलासुरोनामविघ्नार्थंवैसमागतः
तेनविघ्नंबहुतरंकृतंवैनात्रसंशयः ९
तदृष्टंतुसुपुत्रेणकहोडेनचधीमता
कृत्याह्युत्पादितातत्रहननार्थंसुरेश्वरि १०
तयावैनिहतोदैत्यःकोलोनाममहासुरः
तस्मात्तीर्थंमहज्ञातंकलौगुप्तंतुपार्वति ११

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायांउत्तरखंडे उमामहेश्वरसंवादेपिप्पलादतीर्थंनाम सप्तपंचाशदधिकशततमोऽध्यायः१५७

अष्टपञ्चाशदधिकशततमोऽध्यायः

महादेवउवाच

पिप्पलादात्ततस्तीर्थेपिचुमंदार्कमुत्तमम्
तीर्थंसाभ्रमतीतीरेव्याधिदौर्गंध्यनाशनम् १
पुराकोलाहलेयुद्धेदानवैर्निर्जिताःसुराः
वृक्षेषुविविशुस्तत्रसूक्ष्माःप्राणपरीप्सया २
तत्रबिल्वेस्थितःशंभुरश्वत्थेहरिरव्ययः
शिरीषेऽभूत्सहस्राक्षोनिंबेदेवःप्रभाकरः ३
एवमादियथायोग्यंवृक्षेषुविबुधास्तथा
यावत्कोलाहलोदैत्योविष्णुना प्रभविष्णुना ४
हतोमहाहवेतावत्स्थितास्तेवृक्षमाश्रिताः
येनयेनहियोवृक्षोविबुधेनसमाश्रितः ५
सतुतन्मयतांयातस्तस्मात्तंनविनाशयेत्
इतिसूर्य्यस्यविश्रामात्पिचुमंदार्कमुत्तमम् ६
तीर्थंरोगहरंस्नानात्साभ्रमत्यास्तटेऽभवत्
अत्रगत्वाविशेषेणतंरविंयदिपूजयेत् ७
पूजयित्वासुरश्रेष्ठेलभतेवांछितंफलम्
अत्रद्वादशनामानिगत्वायेवैपठंतिच ८
तेनराःपुण्यकर्माणोयावज्जीवंनसंशयः
आदित्यंभास्करंभानुंरविंविश्वप्रकाशकम् ९
तीक्ष्णांशुंचैवमार्तंडंसूर्यंचैवप्रभाकरम्
विभावसुंसहस्राक्षंतथापूषणमेवच १०
एवंद्वादशनामानियःपठेत्प्रयतःसुधीः
धनंवैपुत्रपौत्रांश्चलभतेनगनंदिनि ११
एकैकंनामआश्रित्ययोऽचयेतनरोभुवि
सप्तजन्मभवेद्विप्रोधनाढ्योवेदपरागः १२
क्षत्रियोलभतेराज्यंवैश्योधनमवाप्नुयात्
शूद्रोवैलभतेभक्तिंतस्मात्सूक्तंपरंजपेत् १३
निंबार्कतःपरंतीर्थंनभूतंनभविष्यति
अत्रस्नात्वाचपीत्वाचमुक्तिभागीभवेद्ध्रुवम् १४

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायांउत्तरखंडे उमामहेश्वर
संवादेनिंबार्कदेवतीर्थनामाष्टपंचाशदधिकशततमोऽध्यायः १५८

एकोनषष्ट्य्धिकशततमोऽध्यायः

महादेवउवाच
तस्माद्दूरतरेदेविसिद्धक्षेत्रमनुत्तमम्
अनिरुद्धोवृतःपूर्वंउषार्थेचित्रलेखया १
नीतोबाणासुरपुरंतिष्ठतिस्मगृहेपुरा
पाशैर्बाणैश्चसंरुद्धःकोटराक्षीमथास्मरत् २
साक्षाद्याविष्णवीशक्तिःसदारक्षणतत्परा
सेयंदेवीनदीतीरेकृष्णेनात्रप्रतिष्ठिता ३
जित्वाबाणासुरंसंख्येद्वारकांप्रतिगच्छता
अनिरुद्धस्यस्तोत्रेणसाक्षात्सांनिध्यमागता ४
तत्रतीर्थेनरःस्नात्वावर्षमेकंप्रयत्नतः
कोटराक्षीमुखंदृष्ट्वालक्ष्मीमाप्नोतिपुष्कलाम् ५
सिद्धतीर्थेनरःस्नात्वादृष्ट्वाकोटरवासिनीम्
सिंहयुक्तेनयानेनरुद्रलोकेमहीयते ६
यस्यांवैस्मरणादेवमुक्तःसोइऽपवरानने
अतोयेऽत्रप्रगच्छंतितेनरामुक्तिभागिनः ७
तत्रगत्वाविशेषेणस्नानंकृत्वातुपार्वति
कोटराक्ष्यास्ततःस्तोत्रंपठेद्वैबुद्धिपूर्वकम् ८
कोटराक्षीविश्वरूपामहामायाबलाधिका
त्रिपुरात्रिपुरघ्नीचशिवावैशिवरूपिणी ९
कन्यासारस्वतीप्रोक्तादुर्गादुर्गतिहारिणी
भैरवीभैरवाक्षीचलक्ष्मीदेवीजनप्रिया १०
एतानिबहुधोक्तानिनामानिचसुरेश्वरि
येपठंतिनरश्रेष्ठास्तेयांतिशिवसन्निधौ ११
अनिरुद्धकृतंस्तोत्रंयेजपंतिमनीषिणः
मुच्यंतेकष्टबंधात्तेसत्यंसत्यंवरानने १२
तीर्थानांपरमंतीर्थंकोटरानिर्मितंभुवि
दर्शनादेवनश्यंतिपापानांराशयस्तथा १३
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायांउत्तर
खंडेकोटरातीर्थनामैकोनषष्ट्यधिकशततमोऽध्यायः १५९

षष्ट्य्धिकशततमोऽध्यायः

महादेवउवाच
अस्मात्तीर्थात्परंतीर्थंतीर्थराजेतिविश्रुतम्
सप्तनद्योवहंत्यत्रचंदनोदकमिश्रितम् १
अन्यतीर्थाच्छतगुणंस्नानंचात्रविशिष्यते
देवानांप्रवरोदेवोयत्रास्तेवामनःस्वयम् २
द्वादश्यांमाघमासस्यदद्याद्यस्तिलधेनुकम्
विमुक्तःसर्वपापेभ्यःकुलानांतारयेच्छतम् ३
पानीयमप्यत्रतिलैर्विमिश्रंदद्यात्पितृभ्यःप्रयतोमनुष्यः
श्राद्धंकृतंतेनसमाःसहस्रंरहस्यमेतत्पितरोवदंति ४
तीर्थेऽस्मिन्भोजयेद्योवैब्राह्मणान्गुडपायसैः
एकस्मिन्भोजितेविप्रेसहस्रंभोजितंभवेत् ५
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायांउत्तर
खंडेवामनतीर्थंनामषष्ट्यधिकशततमोऽध्यायः १६०

एकषष्ट्य्धिकशततमोऽध्यायः

महादेवउवाच
सोमतीर्थंततोगच्छेद्गुप्तंसाभ्रमतीतटे
पातालात्तत्रनिर्गत्यकालाग्निरभवद्भवः १
सोमतीर्थेनरःस्नात्वादृष्ट्वासोमेश्वरंशिवम्
सोमपानफलंसाक्षाद्भवतीतिनसंशयः २
रूपवान्सुभगोभोगीसर्वशास्त्रविशारदः
नरोभवतिलोकेऽस्मिन्परत्रचशिवंव्रजेत् ३
अत्रेतिहासंवक्ष्यामिशृणुसुंदरितत्वतः
यंश्रुत्वामुच्यतेचात्रब्रह्महत्यादिपातकात् ४
कौषीतकेनऋषिणातपस्तप्तंविशेषतः
निराहारीसवैजातःपर्णाशनरतःपरम् ५
वायुभक्षस्ततःकुर्वन्नात्मध्यानपरायणः
एवंबहुयुगंतत्रतप्तंतेनमहत्तपः ६
कदाचिद्दैवयोगेनसुप्रसन्नोमहेश्वरः

यंयंप्रार्थयसेविप्रतत्सर्वंप्रददाम्यहम् ७
कौषीतकउवाच
तवप्रसादाद्देवेशश्रत्रलिगंप्रजायताम्
श्रत्रसोमेश्वरइतिख्यातोदेवोभवेद्ध्रुरुवम् ८
यत्रस्नात्वाचभुक्त्वाचवांछितंफलमाप्नुयात्
श्रत्रस्थानेविशेषेणरुद्रजाप्यादिकंयदि ९
कारयंतिनरश्रेष्ठाधर्मानर्थाल्लँभंतिते
श्रपुत्रोलभतेपुत्रंनिर्धनोलभतेधनम् १०
राज्यकामीतुतद्राज्यंलभतेनात्रसंशयः
यदिचेत्त्वंप्रसन्नोऽसितत्सर्वं देहिमेप्रभो ११
ईश्वरउवाच
तदाचैवसुरेशेनसर्वंदत्तंद्विजन्मने
तदाप्रभृतितत्तीर्थंसोमलिगेतिविश्रुतम् १२
चंदनैर्वाबिल्वपत्रैर्येऽचयंतिसदाशिवम्
लभंतेमानुषेदेहेसौख्यंपुत्रादिसंभवम् १३
सोमवारेतथाप्राप्तेयोगच्छतिहरालयम्
वाछितंलभतेनित्यंसोमलिगप्रसादतः १४
श्रत्रगत्वातुयोदेवियद्ददातिफलादिकम्
ययाकामनयाचैवतंतंप्राप्नोतिनिश्चितम् १५
श्वेतैर्वाकरवीरैश्चपारिजातैस्तथापुनः
येऽचयंतिचतंदेवंश्रीमहेशंपिनाकिनम् १६
तेलभंतेसुरश्रेष्ठेशैवंपदमनुत्तमम् १७

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्र्यांसंहितायांउत्तर
खंडेसोमतीर्थवर्णनंनामैकषष्ट्यधिकशततमोऽध्यायः १६१

द्विषष्ट्य्धिकशततमोऽध्यायः

महादेवउवाच
ततोगच्छेत्तथादेवितीर्थंकापोतिकंपुनः
यत्रसाभ्रमतीतोयंप्राचीनंसंप्रवर्त्तते १
पिंडंददातियस्तत्रपितृतर्पणपूर्वकम्

वन्यैःफलैस्तथापुष्पैःसदापर्वणिपर्वणि २
काकादिभ्यश्चश्वादिभ्योबलिसंददतेतुयः
यमस्यपंथानंसोऽपिससुखंनिस्तरेन्नरः ३
तत्रतीर्थेनरःस्नात्वावैशाख्यांगौरसर्षपैः
पूजयेद्देवमीशानंप्राचीनेश्वरमुत्तमम् ४
आत्मानंतारयेत्सोऽथपितॄनथपितामहान्
कपोतोयत्रचात्मानंदत्त्वाचातिथयेमुदा ५
स्तुतोदेवगणैःसर्वैर्विमानेनदिवंगतैः
तदाप्रभृतितत्तीर्थंकापोतमितिविश्रुतम् ६
तत्रस्नात्वानरःपीत्वाब्रह्महत्यांव्यपोहति
पार्वत्युवाच
कपोतेनकथंदत्तंशरीरंचवदप्रभो
निमित्तंकिंतथादेवनाहंवेद्मिसुरेश्वर ७
महादेवउवाच
अत्रतीर्थेतिदेवेशिवटोवैपरमोमहान्
तस्यशाखाह्यनंताश्चदृश्यंतेविपुलाभुवि ८
तत्रजीवावसंतीहपक्षिणोबहवस्तथा
कपोतेनगृहंतत्रकारितंतुसुरेश्वरि ९
तत्रतिष्ठतिपक्षीशोनित्यंविष्णुपरायणः
कुटुंबेनसमायुक्तोशाखायांवसतिध्रुवम् १०
एकस्मिन्वासरेदेविद्वादश्यांविष्णुवासरे
श्येनस्तत्रसमायातोह्यतिथित्वेनभामिनि ११
कपोतभोदेहिमांसंतवशारीरकंमम
नोचेच्छापंप्रदास्यामिइत्युक्तंनगनंदिनि १२
अद्यवैवासरेविष्णोःक्षुधार्तोऽहसमागतः
तस्माद्देयंहिमांसंतत्क्षुधार्तायममप्रभो १३
श्येनोक्तंतत्तुवैश्रुत्वाकपोतोवैष्णवोमहान्
तेनदत्तंतदादेविशरीरंनात्रसंशयः १४
तेनदानप्रभावेनतीर्थंजातंसुरोत्तमे
कापोतकंमहत्तीर्थंपावनानांचपावनम् १५

अत्रतीर्थेनरःस्नात्वाकृत्वावैशिवपूजनम्
ददातिचातिथिभ्यश्चमिष्टमन्नंसुरोत्तमे १६
इहलोकेसुखंभुक्त्वायातिविष्णोःसनातनम्
दत्त्वावैस्वशरीरंतुकपोतोऽथमहात्मने १७
सगतोवैष्णवंतत्रयावच्चंद्रदिवाकरौ
अतोगत्वातुभोदेविअतिथिंपूजयेत्सदा
पूजितेचातिथौतत्रसर्वंचलभतेध्रुवम् १८
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तर
खंडेकपोततीर्थंनामद्विषष्ट्यधिकशततमोऽध्यायः १६२

त्रिषष्ट्यधिकशततमोऽध्यायः

महादेवउवाच
तीर्थानांप्रवरंतीर्थंमहापातकनाशनम्
गोतीर्थमितिविख्यातंकाश्यपह्रदसमीपतः १
यानिकानिचपापानिब्रह्महत्यासमानिच
गोतीर्थेतुततःस्नात्वानश्यंतेनात्रसंशयः २
गावःकृष्णांतनुंप्राप्यपूर्वपातकयोगतः
यत्रतीर्थेततःस्नात्वाशुक्लत्वंपुनरागताः ३
तत्रतीर्थेनरःस्नात्त्वादत्वागोभ्योगवाह्निकम्
गोमातृणांप्रसादेनमातृणामनृणीभवेत् ४
गोतीर्थेतुनरोगत्वास्नात्वागांतुपयस्विनीम्
ददातिविप्रमुख्येभ्यःसयातिब्रह्मणःपदम् ५
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तर
खंडेसाभ्रमतीमाहात्म्येगोतीर्थंनामत्रिषष्ट्यधिकशततमोऽध्यायः १६३

चतुःषष्ट्यधिकशततमोऽध्यायः

महादेवउवाच
अत्रतीर्थंमहच्चान्यत्कश्यपाख्यंसुरेश्वरि
यत्रह्रदोमहानासीन्नगदेवविनिर्मितः १
तत्रकुशेश्वरोनामदेवोयत्रविराजते

यत्रकुंडंतथारम्यंकश्यपेनविनिर्मितम् २
तत्रस्नात्वातुभोदेविननरोनिरयंव्रजेत्
अग्निहोत्रकराविप्रानित्यंवेदपरायणाः ३
निवसंतिमहदेविकाश्यपायांबहुश्रुताः
यथाकाशीतथाचेयंनगरीऋषिनिर्मिता ४
काश्यपेनयतश्चात्रतप्तंबहुतरंतपः
गंगावैतपसायेनआनीतेशजटोद्भवा ५
सागंगाकाश्यपीदेविमहापातकनाशिनी
यस्यादर्शनमात्रेणमुच्यंतेदुष्टकिल्बिषात् ६
गोदानंचप्रशंसंतिरथदानंतथैवच
श्राद्धंकृत्वातुतत्रैवदानंदेयंप्रयत्नतः ७
कलौयुगेतथाघोरेमहापातकनाशनम्
कश्यपाख्यंसमंतीर्थंनभूतंनभविष्यति ८
यत्रवैदेवताःसर्वाऋषयोवीतकल्मषाः
नित्यंतिष्ठंतिदेवेशितीर्थराजप्रसादतः ९

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेसाभ्रमती माहात्म्येकश्यपह्रदमाहात्म्यंनामचतुःषष्ट्यधिकशततमोऽध्यायः १६४

पंचषष्ट्यधिकशततमोऽध्यायः

महादेवउवाच
भूतालयंततोगच्छेत्तीर्थंपापहरंपदम्
भूतालयोवटोयत्रयत्रप्राचीतुचंदना १
भूतालयेनरःस्नात्वाकृष्णाष्टम्यामुपोषितः
यस्तुकृष्णतिलान्दद्यान्नसप्रेतोऽभिजायते २
पितॄनुद्दिश्ययोदद्यादुदकुंभंतिलैःसह
पूर्वजान्प्रेतभावात्समोचयेन्नात्रसंशयः ३
यस्यनाम्नानरःस्नातिप्रेतत्वात्सविमुच्यते
चतुर्दश्यामथाष्टम्यांप्रभातेविमलोदके ४
तीर्थेभूतालयेस्नात्वादृष्ट्वाभूतालयंवटम्
भूतेश्वरप्रसादेनभूतेभ्योनलभेद्भयम् ५

इति श्रीभूतेश्वरतीर्थम्
अतस्तीर्थात्परंतीर्थंघटेश्वरमितिस्मृतम्
यत्रस्नात्वातुतंदृष्ट्वामुक्तिभागीभवेद्ध्रुवम् ६
यत्रसाभ्रमतीतीर्थंघटोवैपरमोमहान्
दृष्ट्वाचैवमहादेवंमुच्यतेनात्रसंशयः ७
तत्रगत्वाविशेषेणप्लक्षपूजांकरोतियः
मनसाभीप्सितान्कामाँल्लभतेमानवोभुवि ८
इतिघटेश्वरतीर्थम्
ततोगच्छेन्नरोभक्त्यावैद्यनाथेतिविश्रुतम्
तत्रस्नात्वानरस्तीर्थेशिवपूजनतत्परः ९
पितॄन्संतर्प्यविधिनासर्वयज्ञफलंलभेत्
विजयोदेवसंभूतःसर्वपापक्षयंकरः
यंदृष्ट्वाविविधान्कामान्प्राप्नुयुस्तेनराःसदा १०
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
विजयीतीर्थमाहात्म्यंनामपंचषष्ट्यधिकशततमोऽध्यायः १६५

षट्षष्ट्यधिकशततमोऽध्यायः

महादेवउवाच
वैद्यनाथात्परंतीर्थंसर्वसिद्धिप्रदायकम्
तीर्थानामुत्तमंतीर्थंदेवतीर्थमनुश्रुतम् १
विभीषणाद्राक्षसेंद्राद्गृहीत्वाकरमोजसा
प्रारब्धोधर्मपुत्रेणराजसूयोमहाक्रतुः २
दिग्जयेदक्षिणेजातेनकुलेनहिपांडुना
साभ्रमत्यास्तटेदेविपांडुरार्येतिविश्रुता ३
स्थापितापरयाभक्त्याभुक्तिमुक्तिप्रदायिनी
स्नातःसाभ्रमतीतोयेपांडुरार्यांनमस्यच ४
अणिमाद्यासिद्धयोऽष्टौतथामेधांमहीयसीम्
नरःप्राप्नोतिवैनूनंनात्रकार्याविचारणा ५
पांडुरार्यांनमस्कृत्यशुद्धभावेनमानवः
संवत्सरकृतापूजादातव्यातत्त्वबुद्धिभिः ६

तत्रतीर्थेतनुंत्यक्त्वापांडुरार्यासमीपतः
कैलासशिखरंप्राप्यचंडेश्वरगणोभवेत् ७
पुराहनूमतातत्रतपस्तप्तंसुदुष्करम्
समुद्रप्लवनेशक्तिर्जातातीर्थप्रभावतः ८
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहिता
यामुत्तरखंडेपांडुरार्यातीर्थंनामषट्षष्ट्यधिकशततमोऽध्यायः १६६

सप्तषष्ट्यधिकशततमोऽध्यायः
अत्रतीर्थात्परंतीर्थंचंडेशइतिविश्रुतम्
यत्रचंडेश्वरोदेवोनित्यंतिष्ठतिभूतिदः १
यंदृष्ट्वामुच्यतेपापादज्ञानादथवाकृतात्
सर्वाभिर्देवताभिश्चमिलित्वानगरंकृतम्
चंडेशइतिविख्यातंनाम्नाचैवमहेश्वरि २
इति चंडेशतीर्थम्
अत्रतीर्थात्परंतीर्थंगाणपत्यंततोभुवि
साभ्रमत्यांसमीपेतुविख्यातंदेविनिर्मितम् ३
तत्रस्नात्वानरोदेविमुच्यतेनात्रसंशयः
मन्येसाभ्रमतीतीरेजनानांहितकाम्यया ४
पृथिव्यांयानितीर्थानिसागरांतानियानिच
तानिसर्वाणिसंत्यज्यतीर्थेवैपरमाद्भुते ५
श्राद्धंकरोतियस्तत्ररुद्रभक्त्याजितेंद्रियः
फलंप्राप्नोतिशुद्धात्मासर्वयज्ञसमुद्भवम् ६
पितृनुदिश्ययत्किंचिद्गणतीर्थेप्रदीयते
तत्सर्वंजायतेद्विप्रंगणनाथप्रसादतः ७
तस्मिंस्तीर्थेनरःस्नात्वावृषंविप्रायदापयेत्
सर्वलोकानतिक्रम्यसगच्छेत्परमांगतिम् ८
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
गणतीर्थंनामसप्तषष्ट्यधिकशततमोऽध्यायः १६७

अष्ट षष्ट्यधिकशततमोऽध्यायः

महादेवउवाच
ततोगच्छेन्महादेविवार्त्रघ्नयागिरिकन्यया
शक्रश्चैवतयासाध्व्यासंगमंयत्रलब्धवान् १
तत्रस्नानंप्रकुर्वंतिनरानियतमानसाः
दशानामश्वमेधानांयत्फलंस्नानकृल्लभेत् २
तत्रयःकुरुतेश्राद्धंपिडान्वैतिलचूर्णजान्
पुनातिपुरुषोवंशान्सप्तसप्तपरावरान् ३
संपूज्यविधिवत्स्नात्वासंगमेगणनायकम्
नविघ्नैरभिभूयेतलक्ष्म्यानैवविहीयते ४
पार्वत्युवाच
कस्मिन्कार्यसमारंभेसमायातःपुरंदरः
स्वर्गलोकादिमंलोकमेतदाख्यातुमर्हसि ५
वार्त्रघ्नीचनदीकेननिरुक्तेननिगद्यते
पुरंदरपुरंदेवब्रह्मघोषनिनादितम्
संभावयतियोऽजस्त्रंममतत्संगमंवद ६
महादेवउवाच
अस्मिंश्चैवतुभूर्लोकेप्रश्नोऽयसमभूत्पुरा
युधिष्ठिरेतिविख्यातोराजावैधार्मिकोमहान् ७
पृष्टवान्सतुभीष्मायधर्मिणेज्ञानरूपिणे
तेनोक्तंयत्तुतद्देविप्रवक्ष्यामितवाग्रतः ८
दशवर्षसहस्राणिदशवर्षशतानिच
वृत्रवासवयोर्युद्धमभवल्लोमहर्षणम् ९
ततःपराजितःशक्रःकृत्वावृत्रेणसंविधम्
अद्रोहेसरणंत्यक्त्वाजगामशरणंमम १०
वार्त्रघ्न्यासंगमेपुण्येतोषयामासशंकरम्
अथांतरिक्षेऽहदेविदर्शनंदत्तवांस्तदा ११
ममगात्रात्तुयद्भस्मपतितंकाश्यपीतटे
भस्मगात्रेतितत्पुण्यंलिगंदेविविनिर्मितम् १२
भूतेश्वरंभस्मगात्रंब्रह्मणासंप्रतिष्ठितम्

तस्यवैदर्शनादेवब्रह्महत्यालयंव्रजेत् १३
मुच्यतेसर्वपापेभ्यःश्राद्धंकृत्वायुगादिषु
तदहंसुप्रसन्नोऽभूदिन्द्रायसुमहात्मने १४
यद्यत्त्वंवांछसेदेवतत्सर्वंहिददामिते
अनेनवज्रयोगेनशीघ्रंवृत्रंहनिष्यसि १५
शक्रउवाच
भगवंस्त्वत्प्रसादेनदितिजंचदुरासदम्
वज्रेणनिहनिष्यामिपश्यतस्तेसुरोत्तम १६
एवमुक्त्वातदाइंद्रोगतवांश्चासुरंप्रति
तदादुंदुभयोनेदुर्देवसैन्येविशेषतः १७
मृदंगडिंडिमाश्चैवभेरीतूर्याण्यनेकशः
असुराणांचसर्वेषांवृत्तिलोभोमहानभूत १८
बलवान्मघवाचैवक्षणेनसमजायत्
तमाविष्टंततोज्ञात्वाऋषयःपन्नगास्तथा १९
स्तुवंतिशक्रमीशानंस्तुत्याजयजयेतिच
गच्छतस्तस्यशक्रस्ययुद्धकामस्यसन्निधौ
ऋषिभिःस्तूयमानस्यरूपमासीत्सुदुर्भरम् २०
महादेवउवाच
वृत्रस्यसहसादेवितदासंग्राममूर्द्धनि
अभवन्यानिलिगानिशरीरेतानिमेशृणु २१
ज्वलतास्योभवद्घोरोवैवर्ण्यमभवत्परम्
गात्रकंपश्चसुमहान्श्वासःसोष्माव्यजायत् २२
रोमहर्षश्चतीव्रोऽभूच्छ्वासश्चैवमहानभूत्
निष्पपातमहाघोराउल्काःपार्श्वंप्रपेदिरे २३
गृध्रावटाःश्येनकंकावचोमुंचन्सुदारुणाः
वृत्रस्योपरितेसर्वेचक्रवत्परिबभ्रमुः २४
ततःसगजमास्थायइंद्रस्तत्रसमागतः
वज्रोद्यतकरस्तत्रशक्रस्तं दैत्यमासदत् २५
अमानुषमथोनादंसमुमोचसुरेश्वरः
वृत्रासुरस्ययततःशक्रोवज्रमपातयत् २६

सवज्रःसुमहातेजाःकालाग्निसदृशोमहान्
समुद्रस्यतटेवृत्रंशक्रोदैत्यमपातयत् २७
ततोनादःसमभवत्पुनरेवसमंततः
वृत्रंविनिहतंदृष्ट्वासर्वदेवभयंकरम् २८
पुष्पवृष्टिस्तुमहतीइंद्रमूर्ध्निपपातह
वृत्रंहत्वासभगवान्दानवेशंभयंकरम् २९
स्तूयमानोऽमरैःसार्द्धंदेवदानींतमाविशत्
अथवृत्रशरीरात्तुनिर्गतंतेजउत्तमम् ३०
ब्रह्महत्यामहाघोरारौद्रलोकभयंकरी
करालवदनासाचविकृताकृष्णपिंगला ३१
कपालमालिनीचैवसुकृशानगनंदिनि
रुधिराक्ताचपापिष्ठामीनगंधातिभीषणा ३२
सानिष्क्रम्यमहादेवितादृग्रूपाभयावहा
इंद्रमन्वेषयामासतदावैसुरसत्तमे ३३
निर्धावतीततःसातुदृष्ट्वाशक्रंमहौजसम्
कंठेजग्राहदेवेंद्रंसुलग्नासाभवत्तदा ३४
सचतस्मिन्समुद्भ्रांतोब्रह्महत्याकृतेभये
निलिल्यबिसमध्येऽसौस्थितोवर्षगणान्बहून् ३५
तयागृहीतोभोदेविनिश्चेष्टःसमपद्यत
तस्याव्यपोहनेशक्रःप्रयत्नंचचकारह ३६
नशक्तोऽभून्महादेविब्रह्महत्यांव्यपोहितुम्
तयागृहीतमात्रस्तुदेवेंद्रोनिष्ठरूपधृक् ३७
पितामहमुपागम्यशिरसाप्रत्यपूजयत्
ज्ञात्वागृहीतंशक्रंतुद्विजप्रवरहत्यया ३८
ब्रह्मासंचितयामासतदावैसुरसत्तमे
साचिंत्यमानाब्रह्माणमुपगम्याब्रवीद्वचः ३९
प्राप्तस्मिभगवन्देवत्वत्सकाशंहिमानद
यत्कर्त्तव्यंमयादेवतद्भवान्वक्तुमर्हति ४०
तामुवाचमहाभागेब्रह्महत्यांपितामहः
स्वरेणमधुरेणाथसंक्षेपेणयथातथम् ४१

मुच्यतांदेवराजोऽयमत्प्रियंकुरुभामिनि
ब्रूहिकिंतेकरोम्यद्यकामंत्वंकिमिहेच्छसि ४२
हत्योवाच
शक्रादपगमिष्यामिवचनात्तेनरोत्तम
देवदेवनमस्तेस्तुनिवासंचददस्वमे ४३
महादेवउवाच
तथेतितांप्रतिज्ञायहत्यांचापिपितामहः
उपायमथशक्रस्यब्रह्महत्यापनोदने ४४
ततोवह्निंसमाहूयब्रह्मावचनमब्रवीत्
शक्रहत्याचतुर्थांशंजातवेदोगृहाणभो ४५
अग्निरुवाच
ममभोक्षस्यकोहेतुर्ब्रह्महत्याकृतेप्रभो
एतदिच्छामिविज्ञातुंतत्त्वतोलोकपूजित ४६
ब्रह्मोवाच
यस्त्वांज्वलंतमासाद्यनहोष्यतिनरःक्वचित्
बीजौषधितिलानग्रेफलमूलसमित्कुशान् ४७
तदैवत्यक्षतित्वांचतत्रैवचनिवत्स्यति
ब्रह्महत्याहव्यवाहव्येतुतेमनसोज्वरः ४८
ततःसपरिजग्राहतद्वचोहव्यकव्यभुक्
पितामहश्चभगवान्तथातदलभत्प्रियम् ४९
ततोवृक्षौषधितृणान्याहूयसपितामहः
इममर्थंमहाभागेवक्तुंसमुपचक्रमे ५०
ततोवृक्षौषधितृणैस्तथैवोक्तंयथातथम्
व्यथितान्यग्निवद्देविब्रह्माणंवाक्यमब्रुवन् ५१
अस्माकंब्रह्महत्यायाःकथयंतःपितामह
स्वभावनिहितातस्मान्नपुनर्हंतुमर्हसि ५२
वयमग्निंतथाशीतंवर्षंचपवनेरितम्
सहामःसततंदेवतथाछेदनभेदनम् ५३
ब्रह्मोवाच
अकारणंनरोयस्तुयुष्मच्छेदनभेदनम्

करिष्यतिमहामोहात्तमेषानुप्रयास्यति ५४
महादेवउवाच
ततोमहौषधितृणैरोमित्युक्तंमहात्मभिः
ब्रह्माणमपिसंपूज्यजग्मुश्चाथयथागतम् ५५
आहूयाप्सरसोदेवस्ततोलोकपितामहः
वाचामधुरयाप्राहसांत्वयन्निवसत्तमे ५६
इयंवृत्रादनुप्राप्ताब्रह्महत्यावराङ्गनाः
चतुर्थमस्याभागंचमयोक्तंसंप्रतीच्छथ ५७
अप्सराऊचुः
ग्रहणेकृतबुद्धीनांदेवेशतवसासनात्
संमोक्षसमयोऽस्माकंचिंतनीयःपितामह ५८
पितामहउवाच
रजस्वलासुनारीषुयोवैमैथुनमाचरेत्
तमेषायास्यतिक्षिप्रंव्येतुवोमनसोज्वरः ५९
महादेवउवाच
तथेतिहृष्टमनसःप्रत्युक्ताह्यप्सरोगणाः
स्वानिस्थानानिसंप्राप्यरेमिरेशैलजेतदा ६०
ततश्चलोककृद्देवःपुनरेवपितामहः
आपःसंचिंतयामासततस्ताश्चसमागमन् ६१
ताश्चसर्वाःसमागम्यब्रह्माणममितौजसम्
इदमूचुर्वचोदेविप्रणिपत्यपितामहम् ६२
इमाःस्मदेवसंप्राप्तास्त्वत्सकाशमरिंदम
शासनात्तवदेवेशसमाज्ञापयतत्प्रभो ६३
ब्रह्मोवाच
इयंवृत्रादनुप्राप्तापुरुहूतंभयानका
ब्रह्महत्याचतुर्थांशंयूयमस्याःप्रतीच्छथ ६४
आपऊचुः
एवंभवतुलोकेशयत्त्वंवदसिनःप्रभोः
मोक्षस्यसमयंनस्त्वंसंचिंतयितुमर्हसि ६५
त्वंहिदेवेंद्रसर्वस्यजगतःपरमागतिः

कोऽन्येभ्योहिप्रसादोऽपियःकृच्छ्रान्नःसमुद्धरेत् ६६
ब्रह्मोवाच
अल्पमेवमतिंकृत्वायोनरोबुद्धिमोहितः ६७
श्लेष्ममूत्रपुरीषाणियुष्मासुप्रतिमोक्षति
तमेवयास्यतिक्षिप्रंतत्रैवचनिवत्स्यति
ततोवैभवितामोक्षइतिसत्यंब्रवीमिवः ६८
महादेवउवाच
ततोविमुच्यदेवेंद्रंब्रह्महत्यासुरेश्वरि
गतातिहृष्टोदेवेशोह्यभवद्देवशासनात् ६९
एवंशक्रेणसंप्राप्ताब्रह्महत्यापुरायुगे
अस्मिंस्तीर्थेतपस्तप्त्वाशुद्धात्मात्रिदिवंययौ ७०
अश्वमेधंततःकृत्वाविपाप्मासमपद्यत
इतिसाभ्रमतीतीर्थेवार्त्रघ्नीयंनगात्मजे ७१
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
वार्त्रघ्नीमाहात्म्यंनामाष्टषष्ट्यधिकशततमोऽध्यायः १६८

एकोनसप्तत्यधिकशततमोऽध्यायः

महेशउवाच
ततःपरंदेवनदीवार्त्रघ्नीसंगमात्किल
प्रविष्टाभद्रयासार्द्धंसागरंवरुणालयम् १
समुद्रोऽपितयातावदागम्यप्रियकाम्यया
साभ्रमत्यानुरागेणकृतवान्प्रियमेलनम् २
भद्रावापिसुभद्रायावयस्यासानदीपुरा
सहायमकरोन्मार्गेसाक्षात्श्रीरूपधारिणी ३
तयोस्तुसंगमःपुण्यःसागरस्योत्तरेतटे
तत्रतीर्थेनरःस्नात्वामृष्टंवारिददातियः ४
नमस्कृत्यवराहायवारुणंस्थानमाप्नुयात्
प्रविश्यभगवान्विष्णुस्तेनमार्गेणसागरम् ५
जित्वावैदानवान्सर्वान्देवानांपरिपंथिनः
देवोयज्ञवराहश्चसंक्षोभ्यमकरालयम्

क्रीडित्वासुचिरंकालंकर्दमालेननिर्ययौ ६
पार्वत्युवाच
देवयज्ञवराहस्यसाभ्रमत्यांप्रवेशनम्
निर्गमंकर्दमालेनब्रूहित्वंममविस्तरात् ७
महादेवउवाच
अंतर्भूक्रीडितमिदंवराहस्यहरेःपुरा
तत्सर्वंकथयिष्यामिशृणुत्वंनगनंदिनि ८
योऽयवैभगवान्साक्षाद्भूतवान्सूकरंवपुः
देवानांकार्यसिद्ध्यर्थंरूपंधृत्वासुरेश्वरः ९
धृत्वावैपृथिवींदेवींनिर्गतःकर्दमालयम्
तत्रतीर्थंमहज्जातंवराहाख्यंतुसुंदरि १०
तत्रस्नातिनरोयस्तुमुक्तिभाक्सनसंशयः
अत्रश्राद्धंप्रकुर्वीतपितॄणांमुक्तिहेतवे
विमुक्तस्तैःसमंलोकंप्रयातिसुखदंमहत् ११

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेवाराहतीर्थनामैकोनसप्तत्यधिकशततमोऽध्यायः १६९

सप्तत्यधिकशततमोऽध्यायः-

महादेवउवाच
अत्रतीर्थात्परंतीर्थंसङ्गमाख्यमितिश्रुतम्
अत्रसाभ्रमतीगंगामिलितासागरेणतु १
तत्रस्नानंचदानंचकर्तव्यंविधिपूर्वकम्
यत्रस्नात्वातुमुच्यंतेमहापातकिनोऽपिये २
तत्रश्राद्धंप्रकर्तव्यंस्वानांचहितमिच्छता
यत्रवैतुकृतेश्राद्धेपितृलोकेवसेद्ध्रुवम् ३
यत्रवैसागरोदेवोनित्यंमिलतिगंगया
ब्रह्महातत्रमुच्येतकिमन्यैरितरैरघैः ४
यत्रतीर्थंनजानंतिलोकावैमंदबुद्धयः
तदावैममनाम्नाचकर्तव्यंतीर्थमुत्तमम् ५

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तर
खंडेसङ्गमतीर्थनामसप्तत्यधिकशततमोऽध्यायः १७०

एकसप्तत्यधिक शततमोऽध्यायः

महादेवउवाच
संगमस्यसमीपेतुसत्तीर्थंलोकविश्रुतम्
आदित्याख्यंपरंतस्मान्नभूतंनभविष्यति १
यस्यवैदर्शनंकार्यंस्नानंवैपुष्करेणतु
पूजनंचार्कपुष्पेणकरवीरैस्तथापुनः २
तत्रश्राद्धंचदानंचकुर्युर्वैमानवाःसदा
इदमादित्यकंतीर्थंपवित्रंपापनाशनम् ३
दर्शनात्पुण्यदतीर्थंमहापातकिनामपि ४

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तर
खंडेसत्तीर्थमाहात्म्यंनामैकसप्तत्यधिकशततमोऽध्यायः १७१

द्विसप्तत्यधिक शततमोऽध्यायः

महादेवउवाच
तस्मात्तीर्थात्परंतीर्थंनीलकंठेतिविश्रुतम्
तस्यवैदर्शनंकार्यंमुक्तिंचैवेच्छतासदा १
बिल्वपत्रैस्तथाधूपैर्दीपैर्वाथसुरेश्वरि
वांछितंलभतेमर्त्योनीलकंठस्यदर्शनात् २
उपवासपरोदेविनिर्जनेसौस्थितःसदा
यद्यद्वांच्छंतियेलोकास्तेषांतत्तद्ददातिच ३
कलौसातुमहादेविविख्याताकाश्यपीतिवै ४

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तर
खंडेनीलकंठमाहात्म्यंनामद्विसप्तत्यधिकशततमोऽध्यायः १७२

त्रिसप्तत्यधिक शततमोऽध्यायः

महादेवउवाच
दुर्गयासंगतायत्रदेविसाभ्रमतीनदी

संगमः सागरेणाथस्नानंतत्रसमाचरेत् १
वीतदोषाभविष्यंतिकलौवैनात्रसंशयः
तत्रश्राद्धंप्रकर्त्तव्यंदुर्गयासंगमेतथा २
तत्रगत्वाविशेषेणब्राह्मणानांचभोजनम्
दानंगोमहिषीणांचकर्तव्यंविधिपूर्वकम् ३
इयंधन्याधन्यतमापवित्रापापनाशिनी
यांदृष्ट्वाचापिभोदेविमुच्यतेपातकैर्नरः ४
यथागंगातथाचेयंज्ञेयासाभ्रमतीनदी
कलौदेविविशेषेणबहुकालफलप्रदा ५
यदिचेच्छतशोजिह्वामुखेवैमामकेसति
तस्याअपिनशक्नोमिगुणान्वक्तुंकदाचन ६
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वर संवादेसाभ्रमतीमाहात्म्यंनामत्रिसप्तत्यधिकशततमोऽध्यायः १७३

चतुःसप्तत्यधिक शततमोऽध्यायः

महादेवउवाच
शृणुदेविप्रवक्ष्यामिव्रतं त्रैलोक्यदुर्लभम्
यंश्रुत्वामुच्यतेलोकोब्रह्महत्यादिपातकात् १
उत्पतिःस्वप्रकाशस्यभक्तानांसुखहेतवे
तिथिर्वापिसमासोवैसंजातःपुणयकारकः २
यस्यनामगृणन्देविमुक्तिंलभतिशाश्वतीम्
सएवपरमात्माचकारणानांचकारणम् ३
विश्वात्माविश्वरूपीचसर्वेषांभगवान्प्रभुः
द्वादशार्काधृतायेननृसिंहेनमहात्मना
सएवप्रकटीजातोभक्तानांशमभीप्सया ४
पार्वत्युवाच
अवताराह्यसंख्याताःकथिताःसुरसत्तम
नृसिंहाख्यंपरंधामवदविश्वेश्वरप्रभो
येनविज्ञानमात्रेणसुखलोकमवाप्नुयात् ५
महादेवउवाच

हिरण्यकशिपुंहत्वादेवदेवंजगद्गुरुम्
सुखासीनंतदुत्संगेस्थितोवचनमब्रवीत् ६
प्रह्लादोज्ञानिनांश्रेष्ठःपितृहंतारमुत्तमम् ७
प्रह्लादउवाच
नमस्तेभगवन्विष्णोनृसिंहाद्भुतरूपिणे
त्वद्भक्तोहंसुरश्रेष्ठत्वांपृच्छामिचतत्वतः ८
स्वामिंस्त्वयिममाभिन्नाभक्तिर्जाताह्यनेकधा
कथंतेऽहप्रियोजातःकारणंवदमेप्रभो ९
नृसिंहउवाच
कथयामिमहाप्राज्ञशृणुष्वैकाग्रमानसः
भक्तेर्यत्कारणंवत्सप्रियत्वस्यचयत्पुनः १०
पुराकस्यद्विजस्यापिजातस्त्वंनाप्यधीतवान्
नाम्नातुवसुदेवोहिवेश्यायामतिलंपटः ११
तस्मिन्जन्मनिनैवंचचकारसुकृतंकियत्
भुक्त्वामधुघृतंचैववेश्यासंगमलालसः १२
मद्व्रतस्यप्रभावेनभक्तिर्जातातवानघ
प्रह्लादोवाच
विस्तराद्वददेवेशकस्यपुत्रस्यकिंव्रतम् १३
वेश्यायांवर्तमानेनकथंचिद्धिकृतंमया
ममोपरिकृपांकृत्वासर्वंकथयसांप्रतम् १४
नृसिंहउवाच
सृष्टयर्थंतुपुराब्रह्माचक्रेह्येतदनुत्तमम्
मद्व्रतस्यप्रभावेननिर्मितंसचराचरम् १५
ईश्वरेणव्रतंचीर्णंवधार्थंत्रिपुरस्यच
व्रतस्यास्यप्रभावेनत्रिपुरस्तुनिपातितः १६
अन्यैश्चबहुभिर्देवैर्ऋषिभिश्चपुरातनैः
राजभिश्चमहाप्राज्ञैर्विहितंव्रतमुत्तमम् १७
व्रतस्यास्यप्रभावेनसर्वेसिद्धिमवाप्नुयुः
ममतेवैप्रियाजातादिविभोगाननेकशः १८
भुक्त्वामयिविलीनास्तुप्रह्लादत्वंविशस्वमाम्

कार्यार्थमवतारस्तेमच्छरीरत्पृथग्यतः १९
नतेषांपुनरावृत्तिर्महाकल्पशतैरपि
दरिद्रोलभतेलद्म्मींधनदस्यचयादृशी २०
ततःकामीलभेत्कामंराज्यार्थीराज्यमुत्तमम्
ग्र्रायुष्कामोलभेदायुर्यादृशंचशिवस्यहि २१
ग्र्रवैधव्यकरंस्त्रीणांपुत्रदंभाग्यदंतथा
धनधान्यकरंचैवतथाशोकविनाशनम् २२
स्त्रियोवापुरुषावापिकुर्वंतिव्रतमुत्तमम्
तेभ्योददाम्यहंसौख्यंभुक्तिमुक्तिफलंतथा २३
बहुनोक्तेनकिंवत्सव्रतस्यास्यफलस्यहि
मद्व्रतस्यफलंवक्तुंनाहंशक्तोनशंकरः २४
प्रह्लादउवाच
भगवंस्त्वत्प्रसादेनश्रुतंव्रतमनुत्तमम्
व्रतस्यास्यफलंश्रोतुंत्वयिमेभक्तिकारणम् २५
ग्र्रधुनाश्रोतुमिच्छामिव्रतस्यास्यविधिंपरम्
कस्मिन्मासेभवेदेवकस्मिंश्चिद्वासरेप्रभो २६
एतद्विस्तरतोदेववक्तुमर्हसिसांप्रतम्
विधिनायेनवैस्वामिन्समग्रफलभाग्भवेत् २७
नृसिंहउवाच
प्रह्लादवत्सभद्रंतेशृणुष्वैकमनाव्रतम्
वैशाखेसितपद्मेतुचतुर्दश्यांसमाचरेत् २८
ममाविर्भावसंयुक्तंममसंतुष्टिकारणम्
शृणुपुत्रममोत्पत्तिंभक्तानांसुखहेतवे २९
पश्चिमायांदिशायांचसंजातंकारणांतरात्
मौलिस्तानमिदंद्मेत्रंपवित्रंपापनाशनम् ३०
तस्मिन्द्मेत्रेतुविख्यातोब्राह्मणोवेदपारगः
हारीतइतिनाम्नाचज्ञानध्यानपरायणः ३१
तस्यस्त्रीतुमहापुरायासतीरूपासदाप्रभो
लीलावतीतुनाम्नाचभर्तुर्वशपरासदा ३२
ताभ्यांतपोमहत्तप्तंकालंबहुतरंसुत

एकविंशयुगाश्चैवयातास्तत्रनसंशयः
तस्मिन्क्षेत्रेतुवैताभ्यांप्रत्यक्षोवाभवत्तदा ३३
नृसिंहउवाच
यंयंवांछयसेब्रह्मंस्तंददामिनसंशयः
ताभ्यामुक्तंतदातस्मैदीयतेचेद्वरोमम ३४
त्वादृशोममपुत्रस्तुह्यधुनैवभवत्विति
मयोक्तंतुतदावत्सपुत्रोऽहतेनसंशयः ३५
विश्वकर्माह्यहंसाक्षात्परमात्मापरात्परः
उदरेऽहनवत्स्यामियतोऽहवैसनातनः ३६
हारीतेनतदाचोक्तंभवत्वेवंनसंशयः
तदाप्रभृतिवैक्षेत्रेस्थितोऽहभक्तकारणात् ३७
अत्रागत्यप्रकुर्वीतदर्शनंभक्तसत्तमः
तस्याहंसकलांबाधांनाशयामिनिरंतरम् ३८
एतस्मात्कारणाच्चैवव्रतंवैविधिपूर्वकम्
येकुर्वंतिनरश्रेष्ठानतेषांविद्यतेभयम् ३९
बालरूपमयंध्यात्वाताभ्यांसहविशेषतः
पूजनंकुरुतेरात्रौसवैनारायणोभवेत् ४०
चतुर्भुजंमहादंष्ट्रंकालरूपंदुरासदम्
सूर्यकोटिप्रतीकाशंयमकोटिदुरासदम्
सिंहवक्त्रमुखंयस्यनरवक्त्रांगसंयुतम् ४१
श्रीनृसिंहंदिव्यसिंहंकालरूपंभजेत्सदा
एवंज्ञात्वाविशेषेणयःस्थानंमामकंव्रजेत् ४२
व्रतंपवित्रंपरमंश्रीकदंबप्रदंमहत्
अंतेमुक्तिप्रदंचैवभक्तानांचनसंशयः ४३
येनवैक्रियमाणेनसहस्रद्वादशीफलम्
स्वातीनक्षत्रसंयोगेशनिवारेतुमद्व्रतम् ४४
सिद्धियोगस्यसंयोगेवणिजेकरणेतथा
योगैःसर्वैश्चसंयोगंहत्याकोटिविनाशनम् ४५
एतदन्यतरैर्योगेमद्दिनंपापनाशनम्
विज्ञायमद्दिनंयस्तुलंघयेत्सतुपापकृत् ४६

अकर्त्तानरकंयातियावच्चंद्रदिवाकरौ
प्राप्तेममदिनेवत्सदंतधावनपूर्वकम् ४७
ममाग्रेव्रतसंकल्पंमद्भक्तोविजितेंद्रियः
अद्याहंतेविधास्यामिव्रतंनिर्विघ्नतांनय ४८
व्रतस्थेननकर्त्तव्यंदुष्टसंभाषणादिकम्
ततोमध्याह्नसमयेनद्यादौविमलेजले ४९
गृहेवादेवखातेवातडागेवाथशोभने
वैदिकेनतुमंत्रेणस्नानंकुर्याद्विचक्षणः ५०
मृत्तिकागोमयेनैवतथाधात्रीफलेनच
तिलैश्चविधिवत्स्नायात्सर्वपापौघशांतये ५१
परिधायशुभेवस्त्रेनित्यकर्मसमारभेत्
ततोगृहंविलिप्याथकुर्यादष्टदलंशुभम् ५२
कलशंतत्रसंस्थाप्यताम्रंत्रसमन्वितम्
तस्योपरिन्यसेत्पात्रंतंडुलैःपरिपूरितम् ५३
हैमींचतत्रमन्मूर्तिंस्थाप्यलक्ष्म्यासमन्विताम्
निर्मायशक्त्यास्वर्णेनस्नाप्यपंचामृतैस्ततः ५४
ततोब्राह्मणमाहूयआचार्यंनातिलोलुपम्
शास्त्रज्ञमग्रतःकृत्वाततोदेवंसमर्चयेत् ५५
मंडपंकारयेत्तत्रपुष्पस्तबकशोभितम्
ऋतुकालोद्भवैःपुष्पैःपूज्योऽहचयथाविधि ५६
उपचारैःषोडशभिर्मं त्रैर्नियमैश्चयः
ततःपौराणिकैर्मंत्रैःपूजनीयोविशेषतः ५७
चंदनंचसकर्पूरंघनकुंकुममिश्रितम्
कालोद्भवानिपुष्पाणितथातुलसीदलानिच ५८
श्रीनृसिंहाययोदद्यात्समुक्तोनात्रसंशयः
कृष्णागुरुमयंधूपंसर्वदाहरिवल्लभम् ५९
हरयेगुरवेदद्यात्सर्वकामार्थसिद्धये
महादीपःप्रकर्त्तव्योह्यज्ञानध्वांतनाशनः
महानीराजनंकुर्याद्घंटानादपुरःसरम् ६०
नैवेद्यंशर्करांचापिभक्ष्यभोज्यसमन्वितम्

ददामितेरमाकांतसर्वपापक्षयंकुरु ६१
नैवेद्यमंत्र
नृसिंहाच्युतदेवेशतवजन्मदिनेशुभे
उपवासंकरिष्यामिसर्वभोगविवर्जितः ६२
तेनप्रीतोभवस्वामिन्पापंजन्मनिराकुरु
रात्रौजागरणंकार्यंगीतवादित्रनिःस्वनैः ६३
पुराणपठनंनित्यंश्रीनृसिंकथाश्रयम्
ततःप्रभातसमयेस्नानंकृत्वाह्यनंतरम् ६४
पूर्वोक्तेनविधानेनपूजयेन्मांप्रतर्पयन्
वैष्णवंकारयेच्छ्राद्धंमदग्रेस्वस्थमानसः ६५
ततोदानानिदेयानिवक्ष्यमाणानियान्युत
पात्रेभ्यःसद्विजेभ्योहिलोकद्वयजिगीषया ६६
सहस्वर्णमयोदेवोममसंतोषकारकः
गोभूतिलहिरण्यादिप्रददातिद्विजातये ६७
शय्यासतूलिकादेयासप्तधान्यसमन्विता
अन्यानिचयथाशक्त्यादेयानिनिजशक्तितः ६८
वित्तशाठ्यंनकुर्वीतयथोक्तफलकांक्षया
ब्राह्मणान्भोजयेत्पश्चात्तेभ्योदद्यात्सुदक्षिणाम् ६९
निर्धनैरपिकर्त्तव्यंदेयंशक्त्यनुसारतः
सर्वेषामेववर्णानामधिकारोऽस्तिमद्व्रते
मद्भक्तैस्तुविशेषेणकर्त्तव्यंमत्परायणैः ७०
ततःप्रार्थनामंत्रः
मद्वंशेयेनराजातायेभविष्याश्चमानवाः
तानुद्धरस्वदेवेशदुःखदाद्भवसागरात् ७१
पातकार्णवमग्नस्यव्याधिभिश्चांबुचारिभिः
जीवैस्तुपरिभूतस्यमहादुःखगतस्यमे ७२
करावलंबनंदेहिशेषशायीजगत्पते
व्रतेनानेनदेवेशभुक्तिमुक्तिप्रदोभव ७३
एवंप्राथ्यर्ततोदेवंविसृज्यचयथाविधि
उपहारादिकंसर्वंआचार्यायनिवेदयेत् ७४

दक्षिणाभिश्चसंतोष्याब्राह्मणांश्चविसर्जयेत्
ममध्यानसमायुक्तोभुंजीतसहबंधुभिः ७५
अकिंचनोपिनियतमुपोष्यतिचतुर्दशीम्
सप्तजन्मकृतात्पापान्मुच्यतेनात्रसंशयः ७६
यइदंशृणुयाद्भक्त्याव्रतंपापप्रणाशनम्
तस्यश्रवणमात्रेणब्रह्महत्यांव्यपोहति ७७
पवित्रंपरमंगुह्यंकीर्तयेद्यस्तुमानवः
सर्वकामनवाप्नोतिव्रतस्यास्यफलंसदा ७८
यइदंकुरुतेशक्त्याकालेमध्याह्नसंज्ञके
लीलावत्यासहऋषिंश्रीनृसिंहप्रसादतः ७९
पूजयेत्परयाभक्त्यामुक्तिंप्राप्नोतिशाश्वतीम्
तस्मिन्क्षेत्रेतुयोगत्वाश्रीनृसिंहंप्रपूजयेत् ८०
वांच्छितलभतेनित्यश्रीनृसिहप्रसादतः
श्रीनृसिंहमहद्रूपकालकोटिदुरासद ८१
भैरवशहरार्तिघ्नबालरूपनमोस्तुते
श्रीनृसिंहायरूपायबालायबालरूपिणे ८२
व्यापकायसुनंदायस्वात्मप्रकटरूपिणे
सर्वजीवात्मकायैवविश्वेशायस्वरात्मने ८३
मार्तंडमंडलस्थायदयासिंधोनमोस्तुते
चतुर्विंशस्वरूपायकालरुद्राग्निरूपिणे ८४
जगदेकस्वरूपायनृसिंहायनमोस्तुते
भालेदधारयोदेवोनृसिंहोवीरभद्रजित् ८५
द्वादशादित्यबिंबानिसुतप्तानिप्रमाणतः
तत्रसिंधुमंहापुणयानदीरम्याविशेषतः ८६
तस्याःसमीपेनगरंवर्त्ततेऽद्यापिसुंदरि
मौलिस्तानेतिविख्यातंसर्वदादेवनिर्मितम् ८७
वसतिर्वर्त्ततेतत्रहारीतस्यमहात्मनः
लीलावतीतुतत्रैवतिष्ठतेनात्रसंशयः ८८
प्रतिशब्दोभवेत्तत्रसिंधुनद्याःसमीपतः
कलौयुगेतुसंप्राप्तेम्लेच्छावैपापचारिणः ८९

निवसंतितुतत्रैवबहवोनात्रसंशयः
नृसिंहजन्मनियथाशब्दोऽभूदद्भुतःपरः ९०
नृसिंहेतिनृसिंहेतियउच्चैर्नदतेनरः
तादृशःप्रतिशब्दोवैजायतेनगनंदिनि ९१
ब्रह्महाहेमहारीवासुरापोगुरुतल्पगः
सिंधौगत्वाविशेषेणस्नानंकुर्वंतियेजनाः ९२
मुच्यतेनात्रसंदेहःश्रीनृसिंहप्रसादतः
दशारात्रिप्रमाणेनमानवायेवसंतिहि ९३
तेज्ञेयाःपुण्यकर्माणोनासत्यंमामकंवचः
निवसंतिकलौतत्रवर्णायेद्विजपूर्वकाः ९४
म्लेच्छवत्तेऽपिविज्ञेयावेदबाह्याःसुरोत्तमैः
मांसंखादंतितेतत्रमद्यपानंपपुःसदा ९५
अतोह्यधर्मरूपास्तेपापिष्ठानात्रसंशयः
संध्याहीनायथाविप्रावेदबाह्यास्तथैवच ९६
निवसंतिपुरेतस्मिन्पश्चिमायांसुरेश्वरि
एकमेवपरंतीर्थंनृसिंहाख्यंसुविस्तरम्
यंश्रुत्वामुच्यतेपापान्नरःसद्योनसंशयः ९७

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेनृसिंहोत्पत्तिर्नामचतुःसप्तत्यधिकशततमोऽध्यायः १७४

पञ्चसप्तत्यधिक शततमोऽध्यायः

पार्वत्युवाच
भगवन्सर्वतत्वज्ञश्रीविष्णोस्त्वत्प्रसादतः
श्रुतानानाविधाधर्मालोकनिस्तारहेतवः १
अधुनाश्रोतुमिच्छमिगीतामाहात्म्यमप्यहम्
श्रुतेनयेनदेवेशहरौभक्तिर्विवर्द्धते
तद्वदस्वाधुनादेवयद्यहंतववल्लभा २
ईश्वरउवाच
अतसीपुष्पसंकाशंखगेंद्रासनमच्युतम्
शयानंशेषशय्यायांमहाविष्णुमुपास्महे ३

कदाचिदासनेरम्येसुखासीनंमुरद्विषम्
आनंदयित्रीलोकानांलक्ष्मीःपप्रच्छसादरात् ४
श्रीरुवाच
शयालुरसिदुग्धाब्धौभगवन्केनहेतुना
उदासीनइवैश्वर्यंजगंतिस्थापयन्निव ५
ईश्वरउवाच
इतिदेव्यावचःश्रुत्वामुरभिज्ज्ञानगर्वितम्
उवाचश्लक्ष्णयावाचाविस्मयस्मेरलोचनः ६
श्रीभगवानुवाच
नाहंसुमुखिनिद्रालुर्निजंमाहेश्वरंवपुः
दृशातत्वानुवर्त्तिन्यापश्याम्यंतर्निमग्नया ७
कुशाग्रयाधियादेवियदंतर्योगिनोहृदि
पश्यंतियच्चवेदानांसारंमीमांसतेभृशम् ८
तदेवमक्षरंज्योतिरात्मरूपमनामयम्
अखंडानंदसंदोहनिष्पादिद्वैतवर्जितम् ९
यदाश्रयाजगद्वृत्तिर्यन्मयाचानुभूयते
नयेनरहितंकिंचिज्जगत्तत्वंचराचरम् १०
निर्मथ्यबहुधालोक्यवेदशास्त्रांबुधिंसुधीः
द्वैपायनोयदासाद्यगीताशास्त्रंनिसृष्टवान् ११
यदास्थायमहानंदमानंदीकृतमानसः
निद्रालुरिवदेवेशिदुग्धाब्धौप्रतिभामिवै १२
इतितस्यमुरारातेर्मितमानंदवद्वचः
साहर्षोत्फुल्ललोलाक्षीलक्ष्मीश्रुत्वाविसिस्मिरे १३
श्रीरुवाच
भवानेवहृषीकेशध्येयोऽसियमिनांसदा
तस्मात्त्वत्तःपरंयत्तच्छ्रोतुंकौतूहलंहिमे १४
चराचराणांलोकानांकर्त्ताहर्त्तास्वयंप्रभुः
यथास्थितस्ततोऽन्यत्वंयदिमांबोधयाच्युत १५
श्रीभगवानुवाच
मायामयमिदंदेविवपुर्मेनतुतात्विकम्

सृष्टिस्थित्योपसंहारक्रियाजालोपबृंहितम् १६
अतोऽन्यदात्मनोरूपं द्वैताद्वैतविवर्जितम्
भावाभावविनिर्मुक्तमाद्यंतरहितंप्रिये १७
शुद्धसंवित्प्रभालाभंपरानंदैकसुंदरम्
रूपमैश्वरमात्मैक्यगम्यंगीतासुकीर्तितम् १८
इत्याकर्ण्यवचोदेविदेवस्यामिततेजसः
शंकमानाहवाक्येषुपरस्परविरोधिषु १९
स्वयंचेत्परमानंदमवाङ्मनसगोचरम्
कथंगीताबोधयतिइतिमेच्छिंधिसंशयम् २०
ईश्वरउवाच
श्रियःश्रुत्वावचोयुक्तमितिहासपुरःसरम्
आत्मानुगामिनींदृष्टिंगीतांबोधितवान्प्रभुः २०
अहमात्मापरेशानिपरापरविभेदतः
द्विधाततःपरःसाक्षीनिर्गुणोनिष्कलःशिवः २१
अपरःपंचवक्त्रोऽहद्विधातस्यापिसंस्थितिः
शब्दार्थभेदतोवाच्योयथात्माहंमहेश्वरः २२
गीतानांवाक्यरूपेणयन्निरुच्छिद्यतेदृढः
मदीयपाशबंधोऽयसंसारविषयात्मकः २३
यदाभ्यासपराधीनौपंचवक्त्रमहेश्वरौ
इतितस्यवचःश्रुत्वागीतासारमहोदधेः २४
इदंपरविभेदेनबुध्यतेभवभीरुभिः
तमपृच्छदिदंलक्ष्मीरंगप्रत्यंगसंस्थितम् २५
माहात्म्यंसेतिहासंचसर्वंतस्यैन्यवेदयत्
श्रीभगवानुवाच
शृणुसुश्रोणिवक्ष्यामिगीतासुस्थितिमात्मनः २६
वक्त्राणिपंचजानीहिपंचाध्यायाननुक्रमात्
दशाध्यायाभुजाश्चैकउदरंद्वौपदांबुजे २७
एवमष्टादशाध्यायावाङ्मयीमूर्तिरैश्वरी
विज्ञेयाज्ञानमात्रेणमहापातकनाशिनी २८
अतोध्यायंतदर्धंवाश्लोकमर्द्धंतदर्धकम्

अभ्यस्यतिसुमेधायःसुशर्मेवसमुच्यते २९
श्रीरुवाच
सुशर्मानामकोदेवकिंजातीयःकिमात्मकः
कुतस्तस्यचवैमुक्तिःकेनाजायतहेतुना ३०
श्रीभगवानुवाच
सुशर्मानामदुर्मेधाःसीमापापात्मनामभूत्
जातोनात्मविदांवंशेविप्राणांक्रूरकर्मणाम् ३१
नध्यानंनजपोहोमोनचैवातिथिपूजनम्
केवलंविषयेष्वेवबलाढ्येनाभिवर्त्तते ३२
कृषिकर्मरतोनित्यंपर्णजीवीसुराप्रियः
मांसोपहारीसुचिरंकालमेवंनिनायसः ३३
आनेतुकामःपर्णानिपर्यटन्नृषिवाटिकाम्
ततःसतत्रदष्टोऽभूत्कालसर्पेणमूढधीः ३४
कालधर्मंसमासाद्यगत्वाचनिरयान्बहून्
पुनरागत्यमर्त्येषुबलीवर्दत्वमीयिवान् ३५
पंगुनाकेनविक्रीतःसस्वजीवनहेतवे
नयन्पृष्ठेनशरदःसप्ताष्टौकष्टतोनयत् ३६
कदाचित्पंगुनासोऽपिचिरमावर्तितोजवात्
पपाततरसाभूमौमूर्च्छांचप्रतिपेदिवान् ३७
विकलांगोविवृत्ताक्षःफेनसंततिमुद्गिरन्
नजीवतिनमृत्युंवाप्रतिपेदेस्वकर्मणा ३८
कौतुकाकृष्टलोकेऽस्मिस्तस्मिन्जनसमागमे
श्रेयसेतस्यसुकृतीकश्चित्पुण्यंवितीर्णवान् ३९
कर्माणिस्वान्यनुस्मृत्यददुरन्येचकेचन
गणिकाकापितत्रस्थालोकयात्रानुवर्तिनी ४०
अज्ञातनिजपुण्यासाकिंचिदुत्सृष्टवत्यभूत्
परेतनगरीमादौसनीतःकालकिंकरैः ४१
गणिकादत्तपुण्येनपुण्यवानितिमोचितः
पुनरागत्यभूर्लोकंकुलशीलवतांगृहे ४२
द्विजन्मनामसौजज्ञेजातिंस्वामनुसंस्मरन्

कालेमहतिजिज्ञासुःश्रेयःस्वाज्ञाननोदनम् ४३
उपेत्यगणिकांदत्तंख्यापयित्वासपृष्टवान्
आचष्टमांशुकोनित्यंपंजरस्थःपठत्यसौ ४४
तेनपूतांतरात्माहंतत्पुरयंपर्यकल्पयम्
ताभ्यांशुकस्तुपृष्टोऽसौव्याख्यातुमुपचक्रमे ४५
आख्यायिकांपुरावृत्तांस्मृत्वाजातिंनिजामपि
शुकउवाच
पुराविद्वानहंभूत्वावैदुष्यस्मयमोहितः ४६
रागद्वेषेणविद्वत्सुगुणवत्स्वपिमत्सरी
कालेनाहंततःप्रेत्यप्राप्यलोकाञ्जुगुप्सितान् ४७
सोऽहकीरकुलेऽभूवंसद्गुरावतिनिंदकः
कालेधर्मणिदुष्कर्मापितृभ्यांचवियोजितः ४८
निदाघेऽध्वनिसंतप्तेआनीतोऋषिपुंगवैः
पातितःपंजरस्थोऽहमाश्रमेमहदाश्रये ४९
आवर्तयद्भ्योगीतानामाद्यमध्यायमादरात्
श्रुत्वाऋषिकुमारेभ्यःपाठंचाकरवंमुहुः ५०
एतस्मिन्नंतरेकश्चिद्व्यागुरिश्चौरकर्मकृत्
मामाहृत्यतदाक्रीणादितिवृत्तमुदाहृतम् ५१
श्रीभगवानुवाच
अध्यायोऽयपुराम्नातोयेनपापमनोदयम्
पूतांतरात्मायेनासौमोचितश्चद्विजोत्तमः ५२
एवमन्योन्यमाभाष्यतन्माहात्म्यंप्रशस्यच
तेजपंतोनिशंधीरामुक्तिंगेहेप्रपेदिरे ५३
तस्मादध्यायमाद्यंयःपठतेशृणुतेस्मरेत्
अभ्यसेत्तस्यनभवेद्भवांभोधिर्दुरुत्तरः ५४

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेसतीश्वर संवादेगीतामाहात्म्येपंचसप्तत्यधिकशततमोऽध्यायः १७५

षट्सप्तत्यधिकशततमोऽध्यायः

श्रीभगवानुवाच

आदिमस्यैवमाख्यानमुदीरितमनुत्तमम्
शृणुमाहात्म्यमन्येषामध्यायानामपींदिरे १
दक्षिणस्यांदिशिश्रीमानासीदाम्नायवादिनाम्
पुरेपुरंदराह्वानेदेवशर्मेतिविश्रुतः २
अर्चितातिथिराम्नातोवेदशास्त्रविशारदः
आहर्ताक्रतुसंघानांतापसानांप्रियःसदा ३
देवान्संतर्पयामासहव्यैर्हुतवहंचिरम्
नचोपलेभेधर्मात्माशांतिमेकांतिकींततः ४
निःश्रेयसंसजिज्ञासुस्तापसाननुवासरम्
सिषेवेसत्यसंकल्पाननल्पैरेवकल्पकैः ५
एवमाचरतस्तस्यकालेमहतिगच्छति
मुक्तकर्माततःकश्चित्प्रादुरासीत्पुराभुवि ६
अनुभूतनिराकांक्षीनासाग्रन्यस्तलोचनः
शांतचेताःपरंब्रह्मध्यायन्नानंदनिर्भरः ७
पादौतस्योपसंगृह्यप्रणतेनांतरात्मना
चकारविधिवत्तस्मैविद्वानतिथिसत्क्रियाम् ८
तंचशुद्धेनभावेनपरितुष्टंतपस्विनम्
प्रणतःपरिपप्रच्छनिर्वाणस्थितिमात्मनः ९
सतस्मैकथयामासपुरेऽसौपुरनामनि
मित्रवंतमजापालमुपदेष्टारमात्मवित् १०
सचाभिवंद्यतत्पादावेत्यसौपुरमूर्जितम्
तस्योत्तरदिशोभागेददर्शविपुलंवनम् ११
मारुतांदोलितानेककुसुमामोदसुंदरम्
उन्मत्तभ्रमरोद्गीतनादापूरितदिङ्मुखम् १२
तस्मिन्वनेसरित्तीरेनिषीदंतंशिलातले
मित्रवंतंददर्शाथसानंदस्तिमितेक्षणम् १३
अपिस्वाभाविकंवैरंहित्वान्योन्यंविरोधिभिः
सत्वैरावृतमुद्यानेमंदस्यंदनभास्वति १४
शांतेषुमृगयूथेषुदशानंदमनोज्ञया
कृपानुविद्धयाभूमिंनिषिंचंतमिवामृतम् १५

उपेत्यविनयेनामुमुन्मनाःप्रीतमानसः
किंचिदानम्रशिरसातेनापिसतुसत्कृतः १६
उपतस्थेततोविद्वान्मित्रवंतमनन्यधीः
समाप्तध्यानकालंसपर्यपृच्छत्समाहितः १७
देवशर्मोवाच
आत्मानंवेत्तुमिच्छामितदमुष्मिन्मनोरथे
लब्धसिद्धिमुपायंमामुपदेष्टुंत्वमर्हसि १८
श्रीभगवानुवाच
परामृश्यक्षणंसोऽपिमित्रवानिदमब्रवीत्
मित्रवानुवाच
विद्वन्विद्धिपुरावृत्तमुच्यमानमिदंमया १९
अस्तिगोदावरीतीरेप्रतिष्ठानाभिधंपुरम्
तत्रदुर्दमनामासीदन्वयेचमनीषिणाम् २०
तत्रास्तिविक्रमोनामसेव्यमानोमहीपतिः
दानानिप्रत्यहंगृह्णन्वर्त्ततेउदरंभरः २१
कालेनकालपाशेनबद्धानीतोयमालयम्
निरयेषुसमग्रेषुयातनाअनुभूयच २२
कस्मिंश्चित्सकुलेजातोदुर्वृत्तानांद्विजन्मनाम्
भवांतरानुवर्तिन्याविद्ययासपुरस्कृतः २३
उपयेमेदुराधर्षांकन्यकामधमेकुले
कालेनसावयोहित्वाशैशवंयौवनंययौ २४
पीनस्तनीचसुश्रोणीमदविह्वललोचना
पतिंनसेहेदुर्वृत्तंचकमेस्वपतीन्परान् २५
वृत्तिमाहर्तुकामस्मिन्निर्गतासापुराद्बहिः
संगताकामुकेनासौचिरंचांडालजन्मना २६
दधेगर्भमसौतस्मात्साचकन्योपपद्यते
सैवभार्यापितस्यासीत्पूर्वपापप्रसंगतः २७
सैववृद्धाततःकालेडाकिनीसमजायत
कुसंगात्कुमतिर्जातादुष्टनारीप्रसंगतः २८
चखादव्याधितंव्याधमसृगास्वादलालसा

भ्रमंतीविपिनेघोरेजनैर्दृष्ट्वाबहिष्कृता २९
परेतलोकमासाद्यव्याधौव्याघ्रोऽभ्यवर्त्तत
नरकान्दारुणान्भुक्त्वाजीवहिंसाप्रभावतः ३०
सापिकालेनदुष्टात्मामृत्युवेगमुपागता
निरयानेत्यदुर्द्धर्षनजाजायतमद्गृहे ३१
तामन्याश्रप्यहंविद्वन्पालयन्काननांतरे
श्रपश्यन्द्वीपिनघोरंजिघांसंतमिवाखिलम् ३२
समालोक्यतमायांतभयेनप्रपलायितम्
श्रजायूथंपरित्यज्यमयामरणभीरुणा ३३
उपदुद्रावसद्वीपीपूर्ववैरमनुस्मरन्
श्रजातुतत्समीपेऽगात्सत्वरंसरिदंतिके ३४
तत्रसाभयमुत्सृज्यहित्वावैरमनर्गला
श्रवतस्थेसचद्वीपीतूष्णीमासीदमत्सरः ३५
तंतथाविधमालोक्यसावक्तुमुपचक्रमे
द्वीपिन्नभीप्सितंभुंन्त्वमांसमुद्धृत्यसादरः ३६
नेयंभवतितेबुद्धिःकथंवैरमतिंत्यजः
इत्याकर्ण्यतदावाक्यंप्राहद्वीपीविमत्सरः ३७
स्थानेऽस्मिन्मेगतोद्वेषःक्षुत्पिपासाचनिर्ययौ
नप्रार्थयामितेनत्वांसमीपेसमुपस्थिताम् ३८
सैवमुक्तापुनःप्राहजाताहंनिर्भयाकथम्
किमत्रकारणंवेत्सियदिमेवक्तुमर्हसि ३९
एवमुक्तःपुनर्द्वीपीतामाहाजांनवेद्म्यहम्
पुरोगतमिमंप्रष्टुंमहांतमितिनिर्गतौ ४०
ताभ्यामुभाभ्यामागत्यपृष्टोऽहबहुविस्मयः
श्रहंचसहितस्ताभ्यामपृच्छंवानरेश्वरम् ४१
मयापृष्टःसविप्रेदमब्रवीत्सादरंकपिः
शृणुवक्ष्याम्यजापालवृत्तमत्रपुरातनम् ४२
इदमायतनंपश्यपुरोवनगतंमहत्
श्रत्रत्र्यंबकलिगंहिद्रुहिणेनप्रतिष्ठितम् ४३
सुकर्मानाममेधावीपर्युपास्तेतपश्चरन्

वनपुष्पाण्यपाहृत्यसुरपूज्यंपुरोभवम् ४४
संस्नाप्यसरिदंभोभिःकेवलंकर्मणावसन्
कालेमहतितस्यागादतिथिःकश्चिदंतिकम् ४५
उपाहृत्यफलाहारंसतस्मैपर्यकल्पयत्
तेनातिथ्येनसंप्रीतःसुकर्माणमभाषत ४६
किमिदंकर्मणोमूलंफलंभुक्त्वातुतिष्ठसि
गतानुगतयावृत्त्याकिंवाकेवलमीहसे ४७
सएवमुक्तःप्रायेणप्रीतेनात्मविदातदा
प्रत्युवाचवचःस्पष्टमात्मनोहितमुत्तमम् ४८
विद्वन्नवेद्मितत्वेनफलमेतस्यकर्मणः
बुभुत्सयापरःशंभुःसेव्यतेकेवलंयया ४९
फलमेतस्यसेवायाःपरिपाकंकपर्दिनः
यन्मांसमनुगृह्णासिसंस्पृश्यात्ममनोरथम् ५०
तस्यैवंसूनृतंवाक्यंश्रुत्वाप्रीतस्तपोधनः
द्वितीयमालिलेखाऽसौगीताध्यायंशिलातले ५१
आदिदेशाशुतंविप्रंपठनाभ्यसनायच
फलिष्यत्यात्मनःस्वैरंपरितस्तेमनोरथः ५२
इत्युक्त्वांतर्दधेधीमान्पुरतस्तस्यपश्यतः
विस्मितस्तस्यचादेशात्सोऽन्वतिष्ठदनारतम् ५३
ततःकालेनमहताभावितात्माप्रसन्नधीः
यत्रयत्रचचारासौशांतंतत्तत्तपोवनम् ५४
नद्वंद्वबाधानैवक्षुत्पिपासानचवाभयम्
तपसातस्यजानीहिद्वितीयाध्यायजापिनः ५५
मित्रवानुवाच
एवमुक्तश्चतेनाऽहंख्यापयित्वापरांकथाम्
अनुज्ञातप्रसंनेनच्छागीव्याघ्रयुतोगमम् ५६
गत्वाशिलातलेपश्यमध्यायंलिखितंपठेत्
तस्यैवावर्त्तनादाप्तंतपसःपारमुत्तमम् ५७
तेनत्वमपिकल्याणनित्यमाहर्तुमर्हसि
अध्यायंतेनतेमुक्तिरदूरस्थाभविष्यति ५८

देवशर्मासमादिष्टस्तेनमित्रवतास्वयम्
अभ्यर्च्यप्रणतोभूत्वापुरंदरपुरंययौ ५९
तत्रात्मविदमासाद्यदेवतायतनेक्वचित्
वृत्तमेतन्निवेद्यादावध्यायमपठत्ततः ६०
शिक्षितस्तेनपूतात्मापठन्नध्यायमादरात्
द्वितीयमाससादोच्चैर्निरवद्यंपरंपदम् ६१
द्वितीयस्येदमाख्यानंकथितंशृणुसांप्रतम्
तृतीयस्याथवक्ष्यामिमाहात्म्यमपिचेंदिरे ६२
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेगीता
माहात्म्येसतीश्वरसंवादेषट्सप्तत्यधिकशततमोऽध्यायः १७६

सप्त सप्तत्यधिक शततमोऽध्यायः

श्रीभगवानुवाच
जनस्थानेजडोनामद्विजन्माकौशिकान्वयी
हित्वाजात्युचितंधर्मंवणिग्वृत्त्यांमनोदधे १
व्यसनीपरदारेषुदीव्यन्नक्षैःपिबन्मधु
मृगयानिरतोनित्यंकालमेवंनिनायसः २
क्षीणेवित्तेततोरात्रौचौर्यामारब्धवांस्ततः
प्रतिपेदेधनंतेनयज्वनांयष्टुमर्थिनाम् ३
सदूरमगमत्तेनवाणिज्यायोत्तरांदिशम्
कस्तूरिमगुरुंकृष्णांचामरांश्चंद्रिकोज्ज्वलान् ४
गृहीत्वावृत्यचानिन्येपंचषादध्वयोजनात्
अथापरस्मिन्नहनिप्रियादर्शनदोहनि ५
दूरमध्वानमुल्लंघ्यरवावस्तमितेसति
ध्वांतेप्रसर्पतिस्वैरंदिशोदशतरोस्तले ६
गतोवशंसदस्यूनांनिजघ्नेतैश्चसत्वरम्
धर्मलोपादसौजज्ञेघोरश्चोग्रतरोग्रहः ७
पिपासितोबुभुक्षार्तोलेलिहानश्चसृक्किणी
उर्ध्वकेशोऽतिजंघालुःपृष्टलग्नोदरोमहत् ८
अस्थिमात्रशरीरोऽभूद्दुर्वृत्तनयनोभृशम्

अत्रांतरेसुतस्तस्यधर्मात्मावेदकोविदः ९
पर्यपालयदत्यर्थंदिदृक्षुस्तंतदागमत्
नित्यमन्वेषयन्वार्त्तांपांथेभ्योनोपलब्धवान् १०
ततःकदाचिदायातेसहायिनिचमानवे
तस्माद्विदितवृत्तांतःशुशोचपितरंबहु ११
ततोविमृश्यमेधावीचिकीर्षुःपारलौकिकम्
वाराणसींससंभारःसगंतुमुपचक्रमे १२
मार्गेनिवासान्सप्ताष्टौनीत्वातस्यतरोस्तले
संध्यांप्रचक्रमेकर्तुंयत्रास्यनिहतःपिता १३
तत्राध्यायंसगीतानांतृतीयंसंजजापह
ततोघोरस्वरस्तत्रव्योममध्येपरामृशत् १४
ददर्शघोरमाकाशात्पतंतंपितरंततः
विस्मयेनभयेनापिविकलीकृतचेतनः १५
तेजसाभूयसाव्याप्तमालुलोकेपुरोऽम्बरे
किंकिणीकोटिसंकीर्णंतेजसाव्याप्तदिङ्मुखम् १६
विमानमग्रतोऽपश्यद्दिव्यमध्यग्रचेतनः
तत्रापश्यत्समारूढंदिव्याभिःस्त्रीभिरावृतम् १७
संस्तूयमानंमुनिभिःपितरंपीतवाससम्
प्रणतस्तंसमालोक्ययुयुजेतेनशाशिषा १८
ततोऽपृच्छदिदंवृत्तंसचतस्मैन्यवेदयत्
दुस्त्यजात्कर्मणोवत्सवपुषोपुण्यकारणात् १९
मोचितोऽस्मित्वयादैवादध्यायंजपतांतिके
तन्निवर्त्तस्वजपतःसांप्रतंत्वामुपस्थितम् २०
वाराणसींयदर्थंयत्तदनुष्ठितमात्मनः
श्रीभगवानुवाच
एवमुक्तःसचप्राहपितरंदीप्ततेजसम् २१
सुतउवाच
हितंममानुशाधित्वंकार्यमन्यन्मयानुकिम्
श्रीभगवानुवाच
ततःप्राहपितापुत्रं कार्यमेतत्त्वयानघ २२

यन्मयाचरितंकर्मभ्रात्राममतुतत्कृतम्
सयातोनरकंघोरंतंमोचयितुमर्हसि २३
अन्येमदन्वयेयेवैनिरयंप्रतिपेदिरे
तेचमोचयितव्यास्तेइतिमेऽस्तिमनोरथः २४
इत्येवमुक्तःपुत्रस्तंपुनःप्राहकृतांजलि
कर्मणाकेनतान्सर्वान्मोचयामितदादिश २५
एवंनिवेदितोवाक्यंपितासुतमुवाचह
पितोवाच
येनाहंमोचितोवत्सतदनुष्ठातुमर्हसि २६
अनुष्ठायतदुत्पन्नंतेभ्यःपुण्यंसमुत्सृज
ततोऽहमिवतेसर्वेपूर्वेसंत्यज्ययातनाम् २७
गमिष्यंत्यचिरेणैवतद्विष्णोःपरमंपदम्
ससंदिष्टोवदत्पुत्रोयद्येवंतातनारकान् २८
सर्वानपिविमोक्ष्यामियदितेरोचतेवचः
एवमस्तुशिवंभूयादुपपन्नंमहत्प्रियम् २९
इत्यादिश्यपितापुत्रंययौविष्णोःपरंपदम्
सोऽपितस्मात्परावृत्त्यजनस्थानंप्रपद्यच ३०
सुंदरस्यपुरःशौरेश्चालयेकालमभ्यगात्
सकुर्वाणःसमादीनिपित्राचयदुदीरितम् ३१
उत्ससर्जकृतंपुण्यंमोचयिष्यन्सनारकान्
अत्रांतरेपदेविष्णोर्यातनापदमीयुषः ३२
नारकान्मोचयिष्यंतःकिंकरायममभ्ययुः
तेनतेपूजिताःसर्वेसत्क्रियाभिरनेकधा ३३
कुशलंपरिपृष्टास्तेसर्वतःसुखमूचिरे
एमंसत्कृत्यमेधावीपितृलोकमहेश्वरः ३४
हेतुमागमनेपृच्छत्तेचतस्मैन्यवेदयन्
विद्धिकीनाशनाथत्वंशेषपर्यंकशायिना ३५
शौरिणाप्रहितानस्मान्समादेष्टुंत्वदंतिके
अस्मन्मुखेनदेवस्त्वांकुशलंपरिपृच्छति ३६
नारकान्प्राणिनःसर्वान्विमोक्तुंचनियच्छति

इत्याकर्ण्यसमादिष्टंविष्णोरमिततेजसः ३७
नतेनमूर्ध्नासंभाव्यदध्यौकिंचनचेतसा
विमुक्तान्निरयात्सर्वांस्तान्विलोक्यमदोत्कटान् ३८
सतैरनुगतःसर्वैर्विष्णोरायतनंततः
ययौसवरयानेनयत्रास्तेदुग्धवारिधिः ३९
तदंतउदितानेकसूर्यकोटिसमप्रभम्
इंदीवरदलश्याममालुलोकजगद्गुरुम् ४०
शय्याफणिफणारत्नमरीच्यामिश्रतेजसम्
विलोक्यमानमानंदनिर्भरंप्रीतमानसम् ४१
भावानुगैर्दृगालीकैःश्रियाप्रेम्णेक्षितंमुहुः
योगिभिःपरितोजुष्टंध्याननिष्पंदतारकैः ४२
स्तूयमानंमहेंद्रेणपराजेतुंविरोधिनः
आम्नायवचसामंतेब्रह्मणोनिःसृतैर्मुखात् ४३
मूर्तिमद्भिर्वचोभिश्चगीयमानंगुणोत्करम्
संप्रीतंचाप्युदासीनमपिसर्वासुयोनिषु ४४
योगसंचितपुण्यानांयौगपद्येनजंतुषु
विलोकमानमात्मानमखिलंसचराचरम् ४५
आमोद्यन्नमालोकैरात्मानंदीप्तिपूरितैः
आबिभ्राणंवपुर्व्यापिद्योतितंभोगिनस्त्विषा ४६
इंदीवरदलश्यामंज्योत्स्नयेवनभस्तलम्
विलोक्यतंसतुष्टावधियाबहुलयानतः ४७
यमउवाच
नमःसमस्तनिर्माणनिर्मलीभूतचेतसे
वदनोद्गीर्णवेदायविश्वरूपायवेधसे ४८
बलवेगसुदुर्द्धर्षदानवेंद्रमदद्रुहे
नमःस्थितौचसत्वायविश्वाधारायविष्णवे ४९
नमःपातकसंघातजिष्णवेऽखिलदेहिनाम्
ईषदुन्मीलल्ललाटनेत्राग्निप्रभवार्चिषे ५०
त्वंहिसर्वस्यलोकस्यगुरुरात्मामहेश्वरः
विसृज्यवैष्णवान्सर्वानतस्त्वमनुकंपसे ५१

व्यापयन्नखिलंलोकंमाययापरिबृंहितम्
नतयापरिभूतोऽसिनचतत्प्रभवैर्गुणैः ५२
अंतरावर्तमानोऽपिनताभ्यामभिभूयसे
दृशाविषयवर्तिन्यानिग्रहीतमनाअपि ५३
तयाफलाभिगामिन्याआत्मन्येवाभिलीयसे
नतवास्तिमहिम्नोंतोयथानिरवधिःस्वयम् ५४
मौनमेवात्रयुक्तंमेविषयोऽसिकथंगिराम्
इतिस्तुत्वाततोवाक्यमिदमाहकृतांजलि ५५
विनियोगादमीयुक्तादेहिनोनिर्गुणामया
समादिशयदन्यन्मेकार्यमस्तिजगद्गुरो ५६
इतिविज्ञापितस्तेनतमाहमधुसूदनः
मेघगंभीरयावाचासिंचन्निवसुधारसैः ५७
पापादुद्धार्यतेलोकोमयासमयवर्तिना
त्वयिविन्यस्तभारोऽहनानुशोचामिदेहिनः ५८
तदाचरनिजंकर्मप्रयाहिस्वंनिकेतनम्
श्रीभगवानुवाच
इत्युक्त्वांतर्दधेदेवःसोऽपिस्वपुरमाययौ ५९
सोऽपिस्वजातिजान्सर्वान्निरयस्थाननेकशः
उद्धृत्यवरयानेनविष्णुलोकंययौस्वयम् ६०

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्र्यांसंहितायामुत्तरखंडेगीता माहात्म्येसप्तसप्तत्यधिकशततमोऽध्यायः १७७

अष्टसप्तत्यधिक शततमोऽध्यायः

श्रीभगवानुवाच
चतुर्थस्यापिमाहात्म्यमाख्यास्याम्यधुनाशृणु
बदरीत्वंसमुत्सृज्ययेनकन्येदिवंगते १
श्रीरुवाच
कथंकन्येदिवंयातेबदरीत्वंविसृज्यवै
तेकचास्तांपुरादेवकथंप्राप्तेतुमुख्यताम् २
एतद्वेदितुमिच्छामिनाथवक्तुंत्वमर्हसि

नतुतृप्यामिशृरावंतीपरमांचकथामिमाम् ३
श्रीभगवानुवाच
ग्रस्तिभागीरथीतीरेनाम्नावाराणसीपुरी
भरतोनामयुक्तात्मातत्रविश्वेश्वरालये ४
नित्यमात्मरतस्तुर्यंजपत्यध्यायमादरात्
तदभ्यासाददुष्टात्मानद्वंद्वैरभिभूयते ५
कालेकदाचनक्रीडन्ययौसनगराद्बहिः
उपांत्यवर्तिनोदेवान्दिदृक्षुःसतपोधनः ६
विशश्रामतयोर्मूलेबदर्योर्न्यपतत्फले
उपधायतयोरेकामन्यामालंब्यचांघ्रिणा ७
तपस्विनिततोयातेबदर्योश्चतथार्द्वयम्
शुष्कंनिष्पत्रशाखंचदिवसैःपंचषैरभूत् ८
गृहेक्वचनविप्राणांजज्ञातेकन्यकेततः
वर्द्धमानंतयोर्युग्मंसप्तभिःपरिवत्सरैः ९
विहृत्यदूरदेशेभ्योयतिमायांतमैक्ष्यत
गृहीत्वाचरणौतस्यवचःसूनृतमब्रवीत् १०
त्वत्प्रसादादेवमुनेमोचितंद्वंद्वमावयोः
उत्सृज्यबदरीभावंमानुष्यंप्रतिपद्यते ११
एवमुक्तोमुनिस्ताभ्यांविस्मृतःप्रत्युवाचसः
कदावत्सेयुवांकेनहेतुनामोचितेमया १२
युवयोर्बदरीत्वेचहेतुंब्रूतांनवेद्म्यहम्
ऊचतुःकन्यकेतस्मैबादर्येहेतुमात्मनः १३
ग्रादौविमोचनेतस्माद्दुस्त्यजादपिकारणम्
ग्रस्तिगोदावरीतीरेतीर्थंपुरायप्रदंनृणाम् १४
च्छिन्नपापमितिख्यातंपरांकोटिमवापयत्
तत्रसत्यतपानामतपस्तेपेसुदारुणम् १५
ग्रीष्मेमहतिदीप्तानांमध्यगोजातवेदसाम्
वर्षासुजलधाराभिर्नित्यमासिक्तमूर्द्धजः १६
शिशिरेचवसन्नप्सुबिभ्रत्कंटकितांतनुम्
विशुद्धःसततंकालेतपस्तप्त्वासंयमी १७

आत्मन्येवमतिंचक्रेपरांप्राप्यसुनिर्वृतिम्
सदाफलानिबिभ्रत्सुसांद्रच्छायेषुशाखिषु १८
निर्मत्सरेषुसत्वेषुबध्वाप्रीतिपरामपि
तपःफलानुसंधानेवैदुष्येनोपपादितम् १९
ब्रह्माप्येनंस्वयंपृच्छन्नुपतस्थेतमन्वहम्
तेनसंकोचहीनत्वाद्ब्रह्मरायनुगतेन्वहम् २०
तद्ध्यानानुगतव्यक्तिववृधेतस्यतत्तपः
विमुक्तकल्पंमन्वानःसमृद्धादात्मनःपदात् २१
अंतरायशतंचक्रेततोभीतःपुरंदरः
आहूयाप्सरसांमध्यादावांतुल्यंसमादिशत् २२
कुरुतंतत्तपोविघ्नमनेनाचरितंयुवाम्
योमांपदादवष्टभ्यस्वराज्यंभोक्तुमिच्छति २३
इतिसंदेशमापन्नेपुरस्ताच्चबिडौजसः
गोदावरीमगच्छावःसमुनिर्यत्रवर्तते २४
मृदंगैर्मंदगंभीरैर्वेणुभिःकलवादिभिः
कलंगीतंसमारब्धंतन्वंगीभिःसमन्वितम् २५
उद्वहंत्यौपृथुश्रोणींघनपीनपयोधरे
स्मयस्मेरमुखांभोजेकिंचिदाकुंचितालके २६
मणिकुंडलदृष्टांसेपुंडरीकोज्ज्वलेक्षणे
तनुमध्येसुवृत्तोरुवहंत्यौचसमेपदे २७
आनर्तायोवनस्यार्थेस्वरताललयानुगाम्
दर्शयंत्यौस्वतःकृत्स्नांगतिंभावानुगामिनीम् २८
मृदूपक्रममुत्पन्नंमंदंमंदंविवर्द्धनम्
गर्जयामासदिक्चक्रंतत्तयोर्नृत्यमानयोः २९
ततोंगहारवेगेनवायुर्वासःसुशीतलः
ईषदुच्छसितेचैलेदर्शयंत्यौपयोधरौ ३०
उद्वर्धयंतीकंदर्प्पमुल्बणागतिरावयोः
कोपमुत्पादयामासुमुनेरविकृतात्मनः ३१
ततःशापंददौकोपाञ्जलमुत्सृज्यपाणिना
बदरीत्वंप्रपद्येथांजाह्नवीरोधसीतिनौ ३२

आवाभ्यांपारतंत्र्येणयद्दुश्चरितमास्थितम्
तत्क्षमस्वविनम्राभ्यांमुनिःपश्चात्प्रसादितः ३३
ततःशापविमोक्षंनौकल्पयामासपुण्यधीः
भरतागमनांतोयमितिसत्यतयामुनिः ३४
मर्त्येषुजन्मलाभश्चस्मृतिश्चातीतजन्मनाम्
आवयोरंतिकंगत्वाबदरीभूतयोस्ततः ३५
स्मरतातुर्यमध्यायंभवतानिष्कृतिःकृता
तत्तावत्प्रणमावस्त्वांशापादेवनकेवलात ३६
घोरादेवतुसंसारात्त्वयैतेनविमोचिते
श्रीभगवानुवाच
एवमुक्तोमुनिस्ताभ्यामतिप्रीतमनास्ततः ३७
पूजितस्तेसमामंत्र्ययथागतमसौययौ
कन्येचतुर्थमध्यायंजपेतांनित्यमादरात् ३८

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेगीता माहात्म्येअष्टसप्तत्यधिकशततमोऽध्यायः १७८

एकोनाशीत्यधिक शततमोऽध्यायः

श्रीभगवानुवाच
पंचमस्याधुनादेविमहात्म्यंलोकपूजितम्
कथयामिसमासेनसावधानाशृणुप्रिये १
पिंगलोनामभद्रेषुपुरुकुत्सपुरेद्विजः
अवदातेकुलेजातोविश्रुतेवेदवादिनाम् २
कुलोचितानिशास्त्राणितथावेदान्विसृज्यसः
तौर्यत्रिकेमतिंचक्रेवादयन्मुरजादिकम् ३
कृतश्रमस्ततस्तत्रगीतेनृत्येचवादने
परांप्रसिद्धिमासाद्यनृपसद्मविवेशसः ४
समातस्थेसतेनासौपुराभूमिभुजासह
परदारानुपाहृत्यबुभुजेताअनन्यधीः ५
ततउत्सिक्तगर्वोऽयसूचमानोनिरंकुशः
परच्छिद्राणिचामुष्मैविविक्तेसनिरंतरम् ६

तस्यासीदरुणानामभार्याहीनकुलोद्भवा ७
भ्रमत्यन्वेषयंतीसाकामुकेनविहारिणी
तमंतरायंमन्वानानिशीथिन्यांनिजालये ८
निजघानशिरश्छित्त्वानिचखानमहीतले
वियोजितस्तःप्राणैरुपेत्ययमसादनम् ९
दुर्जयान्नरकान्भुंक्त्वागृध्रोऽभूद्विजनेवने
भगंदरेणरोगेणसापिहित्वावरांतनुम् १०
उपेत्यनरकान्घोरान्जज्ञेतत्रवनेशुकी
कणानादातुकामांतांसंचरंतीमितस्ततः ११
विददारनखैस्तीक्ष्णैर्गृध्रोवैरमनुस्मरन्
नृकपालेपयःपूर्णेनिपतंतींततःशुकीम् १२
अभिदुद्रावगृध्रोऽपिनिजघ्नेसचजालिकैः
पत्नीवियोजिताप्राणैर्नृकपालजलेततः १३
तत्रैवनिममज्जासावेत्यक्रूरतरःखगः
पितृलोकंप्रपेदातेनीतौतौयमकिंकरैः
प्राक्कृतंदुष्कृतंकर्मस्मरंतौभयभागिनौ १४
ततोयमःसमालोक्यतयोःकर्मजुगुप्सितम्
अकस्मादेवतत्स्नानान्मरणेसुकृतंमहत् १५
अनुजज्ञेततोलोकमीप्सितंगंतुमेतयोः
महापातकसंघातैरपिदुर्द्धर्षमानसौ १६
ततोविस्मयमापन्नौस्मृत्वातौदुष्कृतंनिजम्
उपेत्यप्रणतौभूत्वावैवस्वतमपृच्छताम् १७
संचितंदुष्कृतंपूर्वमावाभ्यामपिगर्हितम्
लोकानामीप्सितानांतुकोहेतुस्तद्वदस्वनौ १८
एवमुक्तस्ततस्ताभ्यामाहवैवस्वतोवचः
आसीद्गंगातटेनाम्नाबुद्धवाब्रह्मसनातनम् १९
एकाकीनिर्ममःशांतोवीतरागोविमत्सरः
गीतानांपंचमाध्यायमावर्त्तयतिसर्वदा २०
तेनपुण्येनपूतात्माबुद्धवाब्रह्मसनातनम्
पापीयानपियंश्रुत्वातनुमुत्सृष्टवानसौ २१

निर्मलीकृतदेहस्यगीताभिर्भावितात्मनः
तत्कपालजलंप्राप्ययुवांयातौपवित्रताम् २२
तद्गच्छतंयुवांलोकान्मनोरथपथिस्थितान्
गीतानांपंचमाध्यायमाहात्म्येनपवित्रितौ २३
एवंतौबोधितौतेनमुदितौसमवर्तिना
व्योमयानंसमारुह्यजग्मतुर्वैष्णवंपदम् २४
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेगीता
माहात्म्येएकोनाशीत्यधिकशततमोऽध्यायः १७९

अशीत्यधिकशततमोऽध्यायः

श्रीभगवानुवाच
षष्ठाध्यायस्यमाहात्म्यंप्रवक्ष्यामिवरानने
यदाकर्णयतांनृणांमुक्तिःकरतलेस्थिता १
अस्तिगोदावरीतीरेप्रतिष्ठानंपुरंमहत्
पिप्पलेशाभिधानोऽहयत्रास्मिस्मेरलोचने २
यत्रगोदावरीतीरशीकरैरवशीतलैः
हंसाःपक्षपुटैःकीर्णैर्हरंतियमिनांश्रमम् ३
स्फुरत्पद्मावलीकोशपरागसुरभीकृतम्
श्लाघ्यंगोदावरीतोयंयेनतेनिर्जरानराः ४
धिक्सुधामौषधीशस्यविकृत्क्षयविधायिनीम्
महाराष्ट्रवधूकानांमज्जंतीनांमुनीश्वराः ५
स्पृशंतियत्रवक्त्राणिफुल्लपंकजशंकया
यत्रखेलन्महाराष्ट्क्वणत्कंकणसुंदराः ६
हरंतिध्वनयोलीनांमनांस्यपितपस्विनाम्
अत्युच्चसौधशिखरविहारिवनितामुखम् ७
पश्यन्ननुदिनंयत्रक्षीयतेमृगलांच्छनः
अंत्युच्चसौधवलभीमहामणिमरीचिभिः ८
चुंब्यंतेमुनिगंधर्वैर्दूर्वाचंदनचंचलैः
यस्मिन्नाधूयमानानांपताकानांसमीरणैः ९
गतश्रमारवेर्यानिभवंतिरथवाजिनः

राशीकृतैर्मलयजैरसंख्यातैर्वणिग्गणैः १०
यस्मिन्नुपलशेषोऽसौलक्ष्यतेमलयाचलः
पुंजीकृतानिदृश्यंतेयत्रमुक्ताफलान्यपि ११
नगरीदेवताहास्यस्तबकाइवसर्वतः
तत्रज्ञानश्रुतिर्नाम्नामेदिनीवल्लभोऽभवत् १२
यस्मिन्नुद्धरतिक्षोणींशेषोऽयमणिसंनिभां
अपिप्रतापमार्तंडमंडलीतीव्रतेजसि १३
नित्यमध्वरधूमेनश्यामलाःकल्पशाखिनः
असाधारणदातृत्वंपश्यंतइवलज्जया १४
यदध्वरपुरोडाशचर्वणास्वादलंपटाः
नतत्यजुःसुपर्वाणःप्रतिष्ठानपुरंमनाक् १५
यस्यदानांबुधाराभिःप्रतापज्योत्स्नयानिशम्
मखधूमैश्चसंपुष्टाववृषुःसमयेघनाः १६
स्वल्पमात्रमपिक्वापिनपदंप्रापुरीतयः
नीतयःप्रसरंतिस्मयस्मिन्शासतिमेदिनीम् १७
वापिकूपतडागानांच्छद्मनायोऽनुवासरम्
हृदयस्थानिमेदिन्यानिधानानिव्यलोकयत् १८
पांडुराभिःपताकाभिःप्रासादोयस्यराजते
वियद्गंगातरंगोघैर्हिमाद्रिरिवसानुमान् १९
दानैस्तपोभिर्यज्ञैश्चप्रजानांपालनेनच
तुष्टाःस्वर्गौकसस्तस्मैवरंदातुंसमागमन् २०
ततोंतरिक्षमार्गेणधुन्वानाःपक्षसंहतीः
मृणालधवलादेवीदेवहंसाविनिर्गताः २१
त्वरयागच्छतांतेषामन्योन्यंतत्रभाषिणाम्
भद्राश्वप्रमुखाद्वित्राःपुरस्तान्निर्ययुर्जवात् २२
सर्वैर्मिलद्भिरूचुस्तेपुरस्तद्गच्छतोजवात्
कथंवेगेननिर्याताभवंतःपुरतःस्थिताः २३
सर्वैर्मिलित्वागंतव्यमस्मिन्नध्वनिदुर्गमे
प्रकाशमानंपुरतस्तेजःपुंजंनपश्यथ २४
ज्ञानश्रुतेर्महीभर्तुःपुण्यमूर्त्तेरतिस्फुटम्

निशम्येतिवचःसम्यक्पाश्चात्यानापुरःस्थिताः २५
हंसाहसित्वासावज्ञमूचुर्वचनमुच्चकैः
रैक्याभिधस्यदुर्द्धर्षतेजसोब्रह्मवादिनः २६
किंनुज्ञानश्रुतेरस्यराज्ञस्तीव्रतरंमहः
इतिशुश्रावहंसानांगिरोज्ञानश्रुतिर्नृपः २७
अत्युच्चसौधभवनमारुह्यचसुखंस्थितः
ततःसारथिमाहूयभूपालोविस्मयान्वितः २८
संदिदेशमहात्माऽसौ रैक्यआनीयतामिति
ततोऽवधार्यभूपालवचःपीयूषगर्भितम् २९
निर्जगाममहोनाम्नासारथिःप्रथयन्मुदम्
यत्रवाराणसीनामनगरीमुक्तिदायिनी ३०
यत्रविश्वेश्वरोनामह्युपदेष्टाजगत्पतिः
ततोगयाभिधेक्षेत्रेयत्रदेवोगदाधरः ३१
उद्धर्तुमखिलान्लोकान्वसत्युत्फुल्ललोचनः
ततोगौरीगुरोःपार्श्वेसर्वैस्तीर्थैरनेकधा ३२
पर्यटन्गतवान्यत्रकेदारःपापदारणः
यमालोक्यसकृन्मर्त्यामुक्ताःस्युर्नात्रसंशयः ३३
महापापविनिर्मुक्ताभुक्त्वाभोगान्यथेप्सितान्
ततोगौडेषुनिर्यातोयत्रास्तेपुरुषोत्तमः ३४
यस्यावलोकनादेवनराःस्वर्लोकगामिनः
ततोद्वारावतींप्रागान्नगरींमुक्तिदायिनीम् ३५
यत्रास्तेगोमतीतीरेरुक्मिणीवल्लभोहरिः
स्नात्वाचगोमतीतीर्थेपंचकृष्णान्विलोक्यच ३६
मर्त्योमुक्तिमवाप्नोतिभुक्त्वाभोगान्यथेप्सितान्
ततःसमुद्रमासाद्यसोमनाथंविलोक्यच ३७
भुक्तिमुक्तिप्रदंदेवंततोनिरगमन्सुधीः
अवंतिकांपुरींप्राप्तोभुक्तिमुक्तिप्रदायिनीम् ३८
यत्रोमयासुखंक्रीडन्महाकालोस्तिशंकरः
अथोंकारंसमासाद्यशर्मदंनर्मदातटे
भुक्तिमुक्तिप्रदातारंत्वरयानिर्गतस्ततः ३९

अश्वमेधकरंनाम्नानगरंपर्यटंस्ततः
यत्रशार्ङ्गधरःसाक्षादास्तेलक्ष्मीपतिःस्वयम् ४०
ततोविष्णुगयांप्राप्तःकुण्डंलोणारसंज्ञितम्
यत्रस्नात्वाचपीत्वाचमुच्यतेबन्धनान्नरः ४१
ततःकोल्हापुरंनामगतोरुद्रगयांप्रति
आस्तेभगवतीयत्रलक्ष्मीर्भक्तिप्रदायिनी ४२
पञ्चनद्यांनरःस्नात्वामहालक्ष्मींविलोक्यच
भुक्त्वाभोगान्यथाकामंभक्तिंचप्रतिपद्यते ४३
ततोऽमलगिरिंनामनगरींप्रतिपद्यच
नन्दिकेश्वरमारुह्यसोमनाथोऽस्तियत्रतु ४४
दृष्ट्वाचतुर्भुजंदेवंवरदानोद्यतंशिवम्
सोमनाथंनृणांमुक्तिर्भवत्येवनसंशयः ४५
तुङ्गभद्रानदीतीरेदृष्ट्वाहरिहरंततः
युगेयुगेभुजायस्यपतन्त्यवनिमण्डले ४६
यद्विलोक्यनराःसर्वेरम्यंहरिहरंवपुः
भुक्त्वाभोगान्यथाकामंमुच्यन्तेबन्धनान्नराः ४७
स्वर्गेकल्पशतंस्थित्वामुक्तसंसारबन्धनाः
ततःस्वामिनमालोक्यलोकानांस्वामिनंविभुम् ४८
यमालोक्यनपश्यन्तिनिरयंजातुचिन्नराः
स्वर्गेकल्पशतंस्थित्वामुक्तसंसारवासनाः ४९
मुक्तिंचप्रतिदद्यन्तेनात्रकार्याविचारणा
ततःश्रीशैलमासाद्यसिद्धगन्धर्वसेवितम् ५०
गिरिजावल्लभोयत्रमल्लिनाथोऽभिधानतः
उद्धर्तुमखिलाँल्लोकान्संसाराम्भोधिमध्यतः ५१
स्वर्गेकल्पशतंस्थित्वामुक्तसंसारबंधनाः
मुक्तिंचप्रतिपद्यंतेनात्रकार्याविचारणा ५२
ततःश्रीशैलमासाद्यसिद्धगंधर्वसेवितम्
गिरिजावल्लभोयत्रमल्लिनाथोऽभिधानतः ५३
उद्धर्तुमखिलाँल्लोकान्संसारांबुधिमध्यतः
कालेकालेपरंज्योतिर्यःसंदर्शयतेस्वयम् ५४

अवलोकयतांनॄँणांयमनुस्मरतामपि
दूरेतिष्ठंतिसंत्रस्तादूरंनिरययातनाः ५५
स्वर्गेलोकेसुखंभुक्त्वामुक्तसंसारबंधनाः
मुक्तिंचप्रतिपद्यंतेमानवानात्रसंशयः ५६
रामोस्तिसानुजःसार्द्धंजानक्यापिततोगतः
तत्रस्नात्वाचपीत्वाचमुच्यतेनरकाद्ध्रुवम् ५७
कल्पकोटिशतंभुक्त्वास्वर्गलोकसुखंनराः
मुक्तसंसारवर्त्मानोमुक्तिंयांतिनसंशयः ५८
ततोनिवृत्यआयातःपश्यन्भीमरथीतटे
द्विभुजंविठ्ठलंदेवंभुक्तिमुक्तिप्रदायकम् ५९
यत्रगोदावरीजन्मस्थानंब्रह्मगिरिर्महान्
गौतमालयमासाद्ययत्रास्तेत्र्यंबकोहरः ६०
अरुणावरुणयोर्मध्येयत्रगोदावरीनदी
तत्रस्नात्वाचपीत्वाचब्रह्महत्याविलीयते ६१
असंख्यतीर्थसंपन्नंदृष्ट्वाब्रह्मगिरिंनराः
मुक्तिमेवप्रपद्यंतेमुक्ताःसंसारदुःखतः ६२
गौतम्युभयतीरस्थतीर्थान्वेषणकौतुकी
ततोजगामसूतस्तुमथुरांपापनाशिनीम् ६३
यत्रस्वायंभुवंदेवंभजंतिसुरमानवाः
आद्यंभगवतःस्थानंमहन्मुक्तिप्रदायकम् ६४
त्रैलोक्येशजनिस्थानंविख्यातंवेदशास्त्रयोः
नानादेवगणैर्जुष्टंद्विजर्षिगणसेवितम् ६५
कालिदीकूलसंशोभिह्यर्द्धचंद्रप्रभाकृति
सर्वतीर्थनिवासैकपूर्णमानंदसुंदरम् ६६
गोवर्द्धनगिरिप्रख्यंपुण्यद्रुमलतावृतम्
द्विषड्वनंमहापुण्यंविश्रांतिश्रुतिसारभृत् ६७
ततःकाश्मीरनगरमपश्यत्प्रत्यगुत्तरम्
दृष्ट्वाधर्मधुरंक्षेत्रंकुरुक्षेत्रंसमंततः ६८
यत्राभ्रंलिहगेहानांपंक्तयःशंखपाण्डुराः
ताजाताधूर्जटेःस्पष्टअट्टहासदशाइव ६९

भक्तिप्रसादमालानांसुवर्णकलशैर्वृतम्
स्वःसिंधोःपतितानीवहेमपद्मानिमारुतैः ७०
यत्रप्रासादशिखरेनीलपट्टपताकिकाः
शैवालवलयाभांतिस्वःसिंधोर्लतिकाइव ७१
यत्रकाश्मीरमाश्रित्यनित्यंवसतिभारती
नौचेद्युगपदेवेदंकथंलिखतिवाङ्मयम् ७२
विश्रामंत्याःसरस्वत्याश्चिरंयत्रमदालसाः
मृणालचंचवोहंसावाहनानिचरंत्यमी ७३
कलाविशेषंप्रहितायत्रबोद्धुंविरंचिना
ताराइवविराजंतेहंसायाताःसमंततः ७४
स्थलपद्मानिदृश्यंतेकरस्पर्शसुखानिच
शयनायनितंबिन्यायस्मिन्दानववैरिणा ७५
उपन्यासैर्द्विजातीनांयत्रनश्रूयतेस्फुटम्
मूकोऽपिनिर्जरोवाचापदकल्लोलडंबरः ७६
यस्मिन्नध्वरधूमेनव्याप्तंगगनमंडलम्
अपिचक्षालितंमेघैःकालिमानंनमुंचति ७७
गलितायाःसुधायास्तुयत्राध्वरमहार्चिषा
लांछितंछद्मनास्थानंदृश्यतेतुहिनत्विषि ७८
जन्माभ्यासवशादेवपठंतिबटवःस्वयम्
यत्रोपाध्यासान्निध्यमाश्रित्यसकलाःकलाः ७९
यत्रब्राह्मणपत्नीनांकंकणध्वनिहुंकृतिः
लुंपत्यनुदिनंभ्राम्यद्भ्रमराणांचगर्जितम् ८०
यत्रब्राह्मणपत्नीनांकपोलफलकंमुहुः
स्पृशन्समीरणोमंदंवातिशापभयादिव ८१
माणिक्येश्वरनामासौयत्रशीतांशुशेखरः
वसत्यनुदिनंदेवोवरदानायदेहिनाम् ८२
अर्चितोभूपतीन्जित्वामणिकेशेनचादृतः
माणिक्येश्वरइत्याख्यांतदाप्रभृतियोदधौ ८३
राज्ञाकाश्मीरदेवेशदिग्जयोत्सवकारिणा
असौसुपूजितोयस्मान्माणिक्यैर्भूरिभूतिभिः ८४

संसेवमानंतद्वारिछायांशकटिकोपरि
कंडूयमानमंगानियंतारैक्यमपश्यत ८५
राज्ञापिकथितैस्तैस्तैश्चिह्नैःपरिचितंजवात्
प्रणतःसारथी रैक्यंप्रणम्यतमभाषत ८६
सारथिरुवाच
कस्मिन्ब्रह्मन्किन्नामासिस्वछंदोऽसिनिरंतरम्
किमर्थमत्रविश्रांतःकिंचकर्तुंचिकीर्षसि ८७
इत्याकर्ण्यचतद्वाक्यंपरमानंदनिर्भरः
स्मृत्वासारथिमित्यूचेवयंपूर्णमनोरथाः ८८
परंकेनापिबहुनापरिचर्याविधायिना
भवितव्यंमनोवृत्तिंजानतास्माकमेवहि ८९
हृदयस्थितमादायरैक्याभिप्रायमादरात्
शनैर्निरगमद्यंतायत्रास्तेवसुधाधिपः ९०
ततःप्रणम्यभूपालंयथावृत्तंन्यवेदयत्
बद्धांजलिपुटोहृष्टःसारथिःस्वामिदर्शनात् ९१
ततोनिशम्यतद्वाक्यंविस्मयस्मेरलोचनः
श्रद्धालुरभवद्भूपो रैक्यसंभावनाविधौ ९२
आदायाश्वतरीयुग्मयुक्तांशकटिकामगात्
मुक्ताहारदुकूलानिसहस्रंचगवांनृपः ९३
गतोऽसौतत्रयत्रास्तेयोगीकाश्मीरमंडले
तन्निवेद्यपुरोराजादंडवत्पतितोभुवि ९४
आनम्यपरयाभक्त्यारैक्योराज्ञेचुकोपह
रेशूद्रमामकंवृत्तंनजानासिदुरीश्वर ९५
गृहाणशकटीमेतामुत्थाप्याश्वतरीयुताम्
वस्त्राणिमुक्ताहारांश्चगाश्चदोग्ध्रीरपिस्वयम् ९६
इत्थमाज्ञतवान्भूपोरैक्यस्यभयमादधे
ततःशापभयाद्राजातत्पदांभोरुहद्वयम् ९७
गृह्णन्भक्त्याप्रसीदेतिब्रह्मन्नित्यूचिवान्स्वयम् ९८
राजोवाच
भगवंस्तवमाहात्म्यमेतदत्युद्भुतंकुतः

प्रसन्नीभूयभगवन्नाख्याहिममतत्त्वतः ९९
रैक्यउवाच
गीतानांषष्ठमध्यायंजपामिप्रत्यहंनृप
तेनैवतेजोराशिर्मेसुराणामपिदुःसहः १००
गीतानांषष्ठमध्यायैरैक्यादभ्यस्ययत्नतः
ज्ञानश्रुतिर्महीपालोमुक्तिमापततःसुधीः १०१
रैक्योऽपिसुखमालेभेमाणिक्येश्वरसन्निधौ
गीतानांषष्ठमध्यायंजपन्मोक्षप्रदायकम् १०२
मरालवेषमास्थायवरदानार्थमागताः
दिवौकसोऽपिनिर्जग्मुःस्वैरंविस्मयकारिताः१०३
इममध्यायमप्येकंयोजपेत्सततंनरः
सोऽपितत्पदवीमेतिविष्णोरेवनसंशयः १०४

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेगीता
माहात्म्येअशीत्यधिकशततमोऽध्यायः १८०

एकाशीत्यधिक शततमोऽध्यायः

श्रीभगवानुवाच
अथतेवर्णयिष्यामिसप्तमाध्यायगौरवम्
यदाकर्ण्यसुधापूरपूर्तिर्भवतिकर्णयोः १
अस्तिपाटलिपुत्राख्यंदुर्गमुत्तुङ्गगोपुरम्
तत्राभूद्ब्राह्मणोनामशंकुकर्णोदयार्णवः २
वैश्यवृत्तिंसमासाद्यधनमर्जितवान्बहु
पितृन्नतर्पयामासपूजयामासनोसुरान् ३
पार्थिवान्भोजयांश्चक्रेधनार्जनपरायणः
तुरीयपाणिग्रहणंमंगलार्थंगृहांतरे ४
तनुजैर्बंधुभिःसार्धंसंप्रतस्थेकदाचन
रजन्यांधर्मकल्पायांनिद्रालोस्तस्यदोस्तले ५
दशतिस्मसमागत्यदंदशूकःकुतश्चन
सदष्टमात्रोऽसाध्यात्मामणिमंत्रौषधादिभिः ६
क्षणैःकतिपयैरेवगतासुरभवत्ततः

पिचुमंददलैर्नालैरवगुंठितविग्रहम् ७
तमारोप्यतरुस्कंधेसूनवोगृहमाययुः
ततःकालेनबहुनाततोजातःसरीसृपः ८
तद्वासनानिबद्धात्माजन्मपूर्वमनुस्मरन्
वंचयित्वासुतानेतान्पूरयामिगृहाद्बहिः ९
आत्मनःकोटिसंख्याकंयत्रास्तेस्थापितंवसु
ततोनारायणबलिश्रद्धयापरयान्विताः १०
कृतवंतःपरेतस्यसूनवोहिद्विजन्मनः
एकदास्वप्नमागत्यपीडितःसर्पजन्मना ११
अभाषयन्मनोवृत्तंपुत्राणामग्रतःपिता
ततस्तेप्रातरुत्थायपरंविस्मयमोहिताः १२
इतरेतरमाख्यायपर्यंतस्तेनिरंकुशाः
एकस्तत्रपितृस्नेहादुद्धर्तुमपिवांछति १३
अन्योद्रविणलोभेननिहंतुंसर्पमीहते
इतरस्तुपितृस्नेहरसमोहितमानसः १४
किंवाअहिमयोनस्याच्छोचन्नोदितिकेवलम्
मध्यमस्तुततःपुत्रोवंचयित्वासहोदरौ १५
केनापिछद्मनोत्थायजगामनिजमालयम्
ततःशनैःसमाहूयगृहिणींगुणशालिनीम् १६
कुद्दालहस्तोनिरगाद्यत्रास्तेपन्नगःपिता
तेनाविदितवित्तेनचिह्नैर्निश्चित्यतत्वतः १७
स्थानमागत्यतंहंतुंवल्मीकंलोभबुद्धितः
भार्ययोत्सार्यतेमृत्स्नास्वयंतेनचखन्यते १८
निखन्यमानादत्युग्रोवल्मीकादहिरुत्थितः
ततोगरलगंडूषैर्निर्गतैरतिदुःसहैः १९
गिरःसकथयांचक्रेफणीफूत्कारमारुतैः २०
अहिरुवाच
कस्त्वंकिमर्थमायातःकथंवाखन्यतेबिलम्
केनवाप्रहितोमूढतदाख्याहिममाग्रतः २१
पुत्रउवाच

पुत्रस्तेऽहशिवोनामहेमग्रहणकौतुकी
आगतोरात्रलब्धस्यस्वप्नस्यतुसुविस्मितः २२
शिवउवाच
इत्थमाकर्ण्यपुत्रस्यगिरंलोकविगर्हिताम्
वक्तुमारभतस्पष्टंहसन्नुच्चैःफणीतदा २३
सर्पउवाच
यदिपुत्रोऽसिमेतूर्णंमामुन्मोचयबंधनात्
निक्षेपार्थायसंजातंपन्नगंपूर्वजन्मनः २४
पुत्रउवाच
पितःकथंतेमुक्तिःस्यादित्याचक्ष्वममाग्रतः
परित्यक्त्वाखिलंलोकमागतोस्मियथानिशि २५
पितोवाच
नतीर्थानिनदानानिनतपांसिनचाध्वराः
मामुन्मोचयितुंपुत्रप्रभवंतिचसर्वथा २६
गीतानांसप्तमाध्यायमंतरेणसुधामयम्
जंतोर्जरामृत्युदुःखनिराकरणकारणम् २७
सप्तमाध्यायिनंविप्रंमदीयेश्राद्धवासरे
भोजयश्रद्धयापुत्रतेनमुक्तिर्नसंशयः २८
अन्यानपिद्विजान्वत्सवेदविद्याविशारदान्
संभोजययथाशक्तिपरमश्रद्धयान्वितः २९
इत्याकर्ण्यपितुर्वाक्यमुरगत्वमुपेयुषः
तेसर्वेसूनवोकुर्वन्यथादिष्टंततोऽधिकम् ३०
शंकुकर्णस्ततःश्रीमानुत्सृज्यतनुमौरगीम्
कृत्वाविभागंपुत्राणांदिव्यंदेहमुपाददे ३१
विभज्यदत्तंपित्रायद्द्रव्यंतत्कोटिसंख्यया
तेनतेसूनवःसर्वेमुमुदुःसाधुवृतयः ३२
वापीकूपसरोयज्ञदेवप्रासादहेतवे
अन्नशालांततःकुर्वन्पुत्रास्तेधर्मबुद्धयः ३३
सप्तमाध्यायजपतोमुक्तिभाजोभवंस्ततः
षष्ठमिष्टतमंज्ञात्वानिर्वाणार्पितदृष्टयः ३४

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेगीता माहात्म्येएकाशीत्यधिकशततमोऽध्यायः १८१

द्व्यसशीत्यधिक शततमोऽध्यायः

शिवउवाच
अष्टमाध्यायमाहात्म्यंशृणुवक्ष्यामिपार्वति
यस्यश्रवणमात्रेणपरांमुदमवाप्स्यसि १
आमर्दकंपुरंनाम्नाविश्रुतंदक्षिणापथि
द्विजन्माभावशर्मेतितत्रासीद्गणिकापतिः २
खादन्मांसंपिबन्मद्यंचोरयन्साधुसंपदः
रममाणःपरस्त्रीभिराखेटककुतूहली ३
अत्यवाहयदत्युग्रोगरीयांसंमनोरथम्
सुहृदांविटगोष्ठ्यांचतालीफलसुधारसम् ४
निपीयकंठपर्यंतमजीर्णेनातिपीडितः
मृतःकालेनपापात्माजातस्तालीतरुर्महान् ५
तस्यच्छायामुपाश्रित्यनिबिडामतिशीतलाम्
अभूतांदंपतीकौचिद्ब्रह्मराक्षसतांगतौ ६
देव्युवाच
किंजातीयौकिमात्मानौकिंवृत्तावित्युदीरय
कर्मणाकेनवादेवब्रह्मराक्षसतातयोः ७
शिवउवाच
वेदवेदांगतत्वज्ञःसर्वशास्त्रार्थकोविदः
सदाचारोऽभवत्कश्चिद्दिवजोनामकुशीवलः ८
जायाचतस्यकुमतिनामधेयादुराशया
ससभार्योमहादानान्याददानोऽतिलोभवान् ९
महिषींकालपुरुषंहयादीननुवासरम्
अप्रयच्छन्द्विजातिभ्योदानलब्धांवराटिकाम् १०
कालेनदंपतीप्रेतौब्रह्मराक्षसरूपिणौ
पर्यटंतौमहीमेतांक्षुत्तृषाकुलविग्रहौ ११
विशश्रमतुरागत्यमूलंतालीतरोस्ततः

कथमेतन्महादुःखमावयोरपगच्छति १२
कथंवाजायतेमुक्तिर्ब्रह्मराक्षसयोनितः
इतिपृष्टोगृहिरयाऽसौब्राह्मणःसमभाषत १३
ब्रह्मविद्योपदेशेनविनाध्यात्मविचारणात्
विनाकर्मविधिज्ञानात्कथंमुच्येतसंकटात् १४
भार्योवाच
किंतद्ब्रह्मकिमध्यात्मंकिंकर्मपुरुषोत्तम
एतावदुक्तेतत्पत्न्यायदाश्चर्यमभूच्छृणु १५
अष्टमाध्यायश्लोकार्द्धश्रवणात्सतरुस्तदा
विहायतालीरूपंतद्बभूवद्विजसत्तमः १६
सद्योज्ञानविधूतात्माविमुक्तःपापकंचुकात्
तन्माहात्म्याद्विनिर्मुक्तौदंपतीतौबभूवतुः १७
एतावदेवमुक्तंचदैवान्निर्गत्यतन्मुखतात्
ततोंतरिक्षादायांतंक्वणत्किंकिणिकंशुभम् १८
दिविदिव्यांगनावक्त्रचंद्रमंडलमंडितम्
अप्सरोवदनांभोजभ्राम्यद्भ्रमरसंकुलम् १९
निर्मथ्यमानदुग्धाब्धिवेलाडिंडिरपांडुरैः
गंगातरंगसुभगैश्चामरैरुपशोभितम् २०
गायद्गंधर्वसुभगंनृत्यत्सुरवधूशतम्
दिव्यंविमानमारूढौदंपतीजग्मतुर्दिवम् २१
अत्रत्यंवृत्तमखिलमेतद्विस्मयकारकम्
ततोलिलेखमेधावीश्लोकार्द्धमिदमादरात् २२
ययौवाराणसींनामनगरींमुक्तिदायिनीम्
आराधयितुमन्विच्छन्देवदेवंजनार्दनम् २३
सतत्रकर्तुमारेभेतपःपरमुदारधीः
अत्रांतरेजगन्नाथोदेवदेवोजनार्दनः २४
पृष्टोदुग्धाब्धिसुतयासंयोज्यकरसंपुटम्
निद्रापथंविहायैवस्थीयतेकथ्यतामिति २५
श्रीभगवानुवाच
काश्यांभागीरथीतीरेतपस्यतितरांद्विजः

भावशर्मातिमेधावीमद्भक्तिरसपूरितः २६
जपन्गीताष्टमाध्यायश्लोकार्द्धंनियतेंद्रियः
संतुष्टवानहंदेवितदीयतपसाभृशम् २७
चिरंविचारयन्नेवतत्तपःसदृशंफलम्
दातुमुत्कंठितमनावर्तेयंसांप्रतंप्रिये २८
पार्वत्युवाच
हरिःप्रसन्नभूतोऽपिचिंतांप्रापयदिप्रभो
भावशर्माहरेर्भक्तःप्राप्तःकिंतत्फलंपुनः २९
श्रीमहादेवउवाच
ततःप्रसादमासाद्यप्रसन्नस्यमुरद्विषः
सुखमात्यंतिकंप्रापभावशर्माद्विजोत्तमः
लेभिरेपदवींसर्वेतदीयाअपिवंशजाः ३०
तत्कर्मवशतोयेवैसंप्राप्तायातनांपुरा
एतदेवाष्टमाध्यायमाहात्म्यंकिंचिदेवते ३१
कथितंमृगशावाक्षिद्रष्टव्यंतुसदैवच ३२

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सा०उत्तरखंडेगीता
माहात्म्येद्व्यशीत्यधिकशततमोऽध्यायः १८२

त्र्यशीत्यधिकशततमोऽध्यायः

श्रीमहादेवउवाच
अतःपरंप्रवक्ष्यामिनवमाध्यायमादरात्
संशृणुष्वस्थिरीभूयतुहिनाचलकन्यके १
अस्तिमाहिष्मतीनामनगरीनर्मदातटे
तत्रासीन्माधवोनामद्विजन्मासशिवोद्विजः २
वेदवेदांगतत्वज्ञःकालेकालेऽतिथिप्रियः
अर्जयित्वाबहुधनंविद्ययैवविशुद्धधीः ३
महांतमध्वरंकर्तुंसमारेभेकदाचन
आलंभनार्थमानीतश्छागःपूजितविग्रहः ४
वाचमूचेहसन्नुच्चैर्जगद्विस्मयकारकः
किमेतैर्बहुभिर्यागैर्विधिवद्विहितैरपि ५

विनश्वरफलैर्जन्मजरामरणहेतुभिः
एतावत्यपिमेविप्रदशेयंदृश्यतामिति ६
छागस्यैवंवचोतीवकुतूहलपरंजनाः
निशम्यविस्मयंयाताःकृतमंडपवासिनः ७
ततोबद्धांजलिपुटोद्विजातिस्तिमितेक्षणः
प्रणम्यश्रद्दधानस्तमपृच्छच्छागमादरात् ८
द्विजउवाच
किंजातीयःकिमात्मात्वंकिंवृत्तमितिमेवद
केनवाकर्मणावासीच्छागत्वमितिकारणम् ९
छागउवाच
आसंपुराद्विजातीनामन्वयेचातिनिर्मले
आहर्ताक्रतुसंघानांवेदविद्याविशारदः १०
एकदाममगेहिन्यापुत्ररोगप्रशांतये
छागःप्रयाचितोमत्तःचंडिकाभक्तिनम्रया ११
ततोनिहन्यमानस्यचंडिकामंडपस्थले
छागस्यजननीमांतुशशापब्रह्मवादिनी १२
अशास्त्रीयाध्वनापापमत्सुतंयज्जिघांससि
द्विजात्यधमतेनत्वमजायोनिमवाप्स्यसि १३
ततोऽहप्रेत्यकालेनछागोऽभूवंद्विजोत्तम
निस्तीर्यचानेकविधायोनिसंतापयातनाः १४
विप्रउवाच
जातिस्मरत्वमप्यस्तिपशुयोनिमुपेयुषः
त्वदीयजन्मशुश्रूषाकुतूहलरसोन्मुखम् १५
छागउवाच
मनःसर्वान्द्विजानेतानपितत्कथयाखिलम्
कदाचिन्मर्कटोभूवमाहितुंडिकशिक्षया १६
क्रीडद्भिर्वीक्षितोडिंभैर्नृत्यन्प्रतिगृहांगणे
उदारानात्मनोदारान्विलोक्यतनयानपि १७
क्रियापराङ्मुखोजातस्त्यक्तनर्तनसंभ्रमः
ततोवर्तुलदंडैश्चदुःसहैराहितुंडिकः १८

मामुच्चैस्ताडयांचक्रेरुषालोहितलोचनः
ततोऽहमूर्च्छितोऽभूवं त्तरत्त्तजसंततिः १९
आजिघ्रन्नन्नमुदकमगमंकालधर्मताम्
ततोऽहमासीच्छुनकःपरिभ्राम्यन्गृहेगृहे २०
कुत्तिंभरिरहंमार्गेत्यक्तोच्छिष्टान्नभत्तकः
कदाचिदाविशंस्वांतरात्मवेश्ममहानसम् २१
बुभुत्तितोभत्तयितुंस्थालीस्थापितमोदनम्
जिघ्रन्भूमितलंपश्यन्दिशोदशशनैर्भयात् २२
शंकमानोजनरवात्पार्श्वेचविलिहन्निव
ततःकदाचिदागत्यवीत्तितस्तनुजैर्निजैः २३
जाययाचजरत्याहंताडितोलकुटादिभिः
ततोभग्नकटिर्यातोबहुशोणितमुद्वहन् २४
निर्जगामबहिर्गेहात्कथंचिन्मूर्च्छयाकुलः
अंगेषुपूतिगंधेषुक्रिमिगर्भेषुकालतः २५
ततःकदश्वतांप्राप्तःशौंडिकस्यचवेश्मनि
अश्वोभवमहंविद्वन्मृतःकालक्रमादिह २६
कदाचिच्चत्वरेतेनसमानीतोजनाकुले
विक्रयायजरालीढपतयालुरदावलि २७
जाययाद्वारकायात्रांकर्तुमुद्यतयासकृत्
मौल्येनाल्पीयसाक्रेतुंतुरंगंचेष्टमानया २८
जगृहेहंतयादाम्नाअल्पेनवसुनाजरन्
गंतुंचारभतद्वित्रैःपुत्रैरारुह्यमांसमम् २९
शनैःशनैसरस्तीरेमग्नोऽहगाढकर्दमे
तत्राहंकुटिलग्रीवश्चापतन्कर्दमान्तरे ३०
ताड्यमानोमुहुःपुत्रैःलकुटोपलपाणिभिः
उत्थाप्यमानोबहुधाप्राणान्मोचितवानहम् ३१
ततोनिश्चित्यमांतत्रमृतंभग्नोद्यमाःसुताः
आक्रुश्यमातरंदीनांप्रावृत्यनिर्ययुर्गृहम् ३२
ततःसंप्रेत्यबहुनाकालेनछागतांगतः
निस्तीर्णानेकहीनोच्चयोनिसंतापयातनः ३३

द्विजउवाच
किमनेनमहाछागदुःखजातेननित्यशः
यथावदंजसामह्यंसुखमात्यंतिकंभवेत् ३४
छागउवाच
आश्चर्यंकथयिष्यामिपुनरन्यदपिद्विज
स्वस्थमापृच्छमानस्यतवास्तियदिकौतुकम् ३५
अस्तिनाम्नाकुरुक्षेत्रंनगरंमोक्षदायकम्
सूर्यवंशोऽभवत्तत्रचंद्रशर्मामहीपतिः ३६
सूर्योपरागसमयेश्रद्धयापरयान्वितः
दानंसकालपुरुषंदातुंसमुपचक्रमे ३७
समाहूयद्विजन्मानंवेदवेदांगपारगम्
स्नातुंपुरायोदकैःपुरायैर्ययौसार्द्धंपुरोधसा ३८
अथोच्चैःकालपुरुषोवाचमूचेहसन्निव
अन्येनैवप्रगृह्णंतिक्षेत्रेचारावपिकिंचन ३९
सूर्योपरागसमयेकुरुक्षेत्राभिधेस्थले
दानंचकालपुरुषंजिघृक्षसिकथंद्विज ४०
ज्ञात्वापिनिश्चितंसर्वमेतत्पातककारकम्
प्रवर्तसेकथंकर्तुंधनलोभान्धयाधिया ४१
इत्थमाकरार्यतद्वाक्यंजगद्विस्मयकारकम्
किमनेनमहादानभयेनेत्यवदद्द्विजः ४२
एवंविधमहादानपातकागाधवारिधिम्
जानामितरितुंसम्यगुपायमहमेवहि ४३
ततःस्नात्वामहीपालःपरिधायचवाससी
शुचिःप्रसन्नहृदयःसितमाल्यानुलेपनः ४४
अवलंब्यकरांभोजंपार्श्ववर्तिपुरोधसः
समाययौसेव्यमानःसतत्कालोचितैर्जनैः ४५
समागत्यचभूपालःसंप्रादात्कालपूरुषम्
यथोचितेनविधिनातस्मैभक्त्याद्विजन्मने ४६
निर्भिद्यकालपुरुषहृदयंनिर्दयोदयः
पापात्मानिर्ययौकश्चिच्चांडालोरक्तलोचनः ४७

किंचप्रापितकालस्यपरनिंदारसोत्सवे
निंदाचांडालिकादेहपार्श्वमागाद्दिवजन्मनः ४८
एतच्चांडालयुगलंनिर्गत्यारुणलोचनम्
ततःसंचरितंचक्रेप्रसह्यांगेद्विजन्मनः ४९
गीतानांनवमाध्यायंजपन्नेवहृदिस्थितः
कंपमानंद्विजंकिंचित्तूष्णींपश्यतिभूपतौ ५०
अंतर्निद्राणगोविंदंकंपमानमिवांबुधिम्
मरुदांदोलनैर्विद्वान्द्विजन्मापापसंश्रयम् ५१
ततोगीताक्षरोद्भूतैर्वैष्णवैःपरिपीडितम्
पलायमानंचांडालयुगलंनिष्फलोद्यमम् ५२
तन्निश्चक्रामवेगेनद्विजातेःपार्श्ववर्तियत्
शरीरेवर्त्तमानंचपरनिंदारसोत्सवे ५३
इत्थंकलितवृत्तांतःप्रत्यक्षंक्षितिवल्लभः
पर्यपृच्छद्द्वीजन्मानंविस्मयस्मेरलोचनः ५४
कथमापदियंघोरानिस्तीर्णामहतीत्वया
कंमंत्रंजपताविप्रकंवासंस्मरतासुरम् ५५
कःपुमान्काचसायोषित्कथमेतावुपस्थितौ
कथंचशांतिमापन्नावित्युदीरयमेद्विज ५६
द्विजउवाच
चांडालमूर्तिमासाद्यमूर्तिकिल्बिषमुल्बणम्
योषिन्मूर्त्तिमयींनिंदाद्वयमेतदवैम्यहम् ५७
गीतायानवमाध्यायमंत्रमालामयास्मृता
तन्माहात्म्यमिदंसर्वंत्वमवेहिमहीपते ५८
गीतायानवमाध्यायंजपामिप्रत्यहंनृप
निस्तीर्णाश्चापदस्तेनकुप्रतिग्रहसंभवाः ५९
अभ्यस्यनवामाध्यायंराजातस्माद्दिवजन्मनः
तावुभावपिलेभातेपरांनिर्वृतिमुत्तमाम् ६०

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेगीता
माहात्म्येत्र्यशीत्यधिकशततमोऽध्यायः १८३

चतुरशीत्यधिकशततमोऽध्यायः

देव्युवाच
सर्वज्ञसर्वचैतन्यसर्वेश्वरगिरांगुरो
धन्यास्मिशिवमान्येनदृश्यमानेनयत्त्वया १
निरूपितमिदंपुण्यंनवमाध्यायवैभवम्
अनेकविस्मयस्वादुकथानकमयंमधु २
शृण्वंत्याममदेवेशनतृप्तिर्जातुजायते
अकुंठाश्रवणोत्कंठावर्द्धतेवृषभध्वज ३
आसीन्ममहिमांभोधेगीतानांश्रुतिजीवितम्
तत्रापिदशमाध्यायंप्रधानंमुनयोजगुः ४
तमुद्दिश्यमहाध्यायमभिधेहिकथानकम्
शिवउवाच
शृणुसुश्रोणिनिश्रेणींस्वर्गदुर्गस्यदुर्ल्लभाम् ५
सीमामिवप्रभावानांपावनींपरमांकथाम्
आसीत्काशीपुरेविप्रःपुण्यकीर्त्तिपरायणः ६
प्रशांतचेतानिर्मुक्तहिंसाकार्कश्यसाहसः
निवृत्तिनिरतोनित्यंजितेंद्रियतयातथा ७
धीरधीरितिविख्यातोनंदीवमयिभक्तिमान्
निस्तीर्णनिगमांभोधिःसर्वशास्त्रार्थकोविदः ८
तस्यध्यानपराधीनचेतसःप्रतिगच्छतः
अंतरात्मनिनिर्मग्नमनसस्तत्त्वचक्षुषः ९
करावलंबनंतस्यधावन्प्रीत्याददाम्यहम्
कदाचनचमत्कारकारकंविमनामुनिः १०
आचांतःकिंचनासाग्रपरमानंदमेदुराम्
दृशमासाद्यनिद्राणकरणोयमिवास्थितः ११
उपाधास्यविशालाद्विविशालांद्वारदेहलीम्
अशेतनिशिनिःशंकंतावल्लंबेक्षणःक्षणम् १२
मामपृच्छद्भृंगिरिटिःप्रणम्यपादपंकजम्
अनेनविधिनाकेनविहितंतवदर्शनम् १३
तपस्तप्तंहुतंजप्तंकिमनेनमहात्मना

दत्तेप्रतिपदंदेवोयस्यहस्तावलंबनम् १४
अयंनलभतेगंतुंकस्मादस्मात्पुराद्बहिः
यदृच्छयायदाकाशीसीमामुल्लंघ्यगच्छति १५
नपश्यतितदासर्वान्पार्श्वस्थानपिदेहिनः
अत्रहेतुमहंज्ञातुमिच्छामिस्वामिभाषिताम् १६
अनुग्राह्योस्मिचेद्वक्तुंयुक्तंचेत्तदुदीरय
भृंगिरिटेरिमंप्रश्नंसमाकर्ण्याहमूचिवान् १७
कदाचिदासंकैलासंपार्श्वेपुन्नागकानने
रणत्खेचरसुश्रोणिपूर्णस्तबककानने १८
कलकंठकुलालापकल्लोलितदिगंतरे
गरुत्मदादिदात्यूहसमूहस्वरसंकुले १९
भ्रमद्दारुघटीयंत्रप्रोल्लसद्बिंदुदंतुरे
प्रबुद्धसारणिप्रांतकदलीकंदलालसे २०
कस्तूरीहरिणोपेतेकिंनरस्वरमोहिते
रोमंथमंथरापांगैर्मृगैःक्वापिनिषेविते २१
हंसैःकीरेषुपांडित्यंकुर्वाणैःसंकुलेशुकैः
निर्ह्रदिक्वणिनीरंध्रसमीरणविलोडिते २२
माधवीपुष्पनिर्यासशीधुक्षीबमधुव्रते
उन्मीलित्त्रिवलीपुष्पगुच्छसौरभनिर्भरे २३
प्रोत्फुल्लबकुलामोदमदमंथरषट्पदे
सोमादुद्भूतपीयूषक्षालितक्षितिमंडले २४
अध्यास्यवेदिकामेकामहंक्षणमवस्थितः
उद्दंडशाखिसंघट्टस्फुटन्मंथामुखोत्करैः २५
प्रकंपिताचलच्छायोववौचंडसमीरणः
पश्चादभून्महाघोषोनिर्घोषितदरीतटः २६
अवातरत्ततःकश्चित्पक्षीगगनगह्वरात्
शारदानरिदच्छायःकज्जलानामिवोच्चयः २७
तमसामिवसंघातःपक्षच्छेदीवपर्वतः
अवष्टभ्यक्षितिंपद्भ्यांपक्षीमांप्रणनामसः२८
आनीयपद्ममम्लानमसौमत्पादयोर्व्यधात्

अथासौस्पष्टयावाचापक्षीस्तोत्रमुदीरयत् २९
जयदेवचिदानंदसुधासिंधोजगत्पते
सदासद्भावनासंगकल्लोलानंतविग्रह ३०
अद्वैतवासनामत्यामलत्रयविवर्जित
जितेंद्रियपराधीनसमाधिप्राप्यविग्रह ३१
निरुपाधिविनिर्मुक्तनिराकारनिरामय
निःसीमनिरहंकारनिरावरणनिर्गुण ३२
शरणागतसंत्राणप्रवीणचरणांबुज
भीममालमहाव्यालज्वालादग्धमनोभव ३३
कुठारभिन्नदैत्येंद्रगंडूषितमहाविभो
त्रिपुरप्रमदाभालसिंदूरोद्धूलिमार्जन ३४
कात्यायनीकुचांभोजवरकुंकुमचर्चित
नमःप्रमाणदूरायनमःप्रमतिरूपिणे ३५
नमश्चैतन्यनाथायनमस्त्रैलोक्यरूपिणे
वंदेतवपदांभोजंयोगिप्रवरचुंबितम् ३६
अपारभवपाथोऽधिपारावतरणाद्भुतम्
वाचस्पतिरपिस्तोत्रेभवतोनप्रगल्भते ३७
सहस्रवदनस्यापिफणींद्रस्यनचातुरी
त्वद्वर्णनेमहादेवकोऽहमल्पमतिःखगः ३८
स्तोत्रमेतत्समाकर्ण्यकृतंतेनपतत्रिणा
तमवोचमहंकोऽसिकुतस्त्योसिविहंगम ३९
हंसेनसदृशःकायोवर्णःकाकेनसंनिभः
प्रयोजनंकमुद्दिश्यप्राप्तोसीहतदुच्यताम् ४०
इतिपक्षीमयापृष्टःप्रश्रयानतकंधरः
जगादश्लक्ष्णयावाचापक्षीवाक्यविदांवरः ४१
देवेशधूर्जटेविद्धिमांमरालंस्वयंभुवः
कर्मणायेनमेकार्ष्ण्यंजातमाधुनिकंविभो ४२
तदाकर्णयसर्वज्ञपृष्टंयदितदुच्यते
मानसात्सरसःपृथ्वद्यंयातःप्राप्तोस्मिसंकटम् ४३
सौराष्ट्रनगरादारात्सरसिस्फुटदंबुजे

बालेंदुखंडधवलान्मृणालकवलानहम् ४४
आदायबलमाश्रित्यनिरगांगगनंद्रुतम्
विहायसस्ततस्तस्मादकस्मादपतंभुवि ४५
अथमोहपरीतात्मासर्वथाविकलेंद्रियः
वेपमानवपुर्मोहात्स्पृष्टःशीतैःसमीरणैः ४६
प्रबुद्धःपतनेहेतुमपश्यन्नात्मनस्तदा
अहोकिमेतदापन्नमद्यपातःकथंमम ४७
कालिमायेनकायेस्मिन्पक्वकर्पूरपांडुरे
इत्यहंविस्मयाविष्टोयावत्कुर्वेविचारणम् ४८
तावदंबुरुहाद्वाणीमश्रौषमहमीदृशीम्
उत्तिष्ठहंसवक्ष्यामिकारणंपातकार्ष्ण्ययोः ४९
अथोत्थायसमागत्यमयामध्येसरोवरे
दृष्टराजीविनीरम्याराजीवैःपंचभिर्युता ५०
कारणंप्रष्टुमारेभेकार्ष्ण्यस्यपतनस्यच
अथतत्रघनश्यामान्स्वर्णवर्णांबरावृतान् ५१
चतुर्भुजान्गदाशंखचक्रपंकेरुहायुधान्
किरीटहारकेयूरकुंडलद्युतिचित्रितान् ५२
अद्राक्षमंतरिक्षस्थान्पुरुषानयुतानिषट्
नत्वाप्रदक्षिणीकृत्यपंचपद्मांसरोजिनीम् ५३
आत्मीयंपातमारभ्यपृष्टंतदखिलंमया
पद्मिन्युवाच
कलहंसगतोऽसित्वंमांविलंघ्यविहायसा ५४
तेनपातकयोगेनपतितोऽसिमहीतले
तेनैवकालिमाकायेपक्षिसत्तमलक्ष्यते ५५
भवंतंपतितंवीक्ष्यकृपापूर्णेनचेतसा
मध्यमेनामुनाब्जेनवदताजातसौरभम् ५६
आघ्रायषट्पदाःषष्टिसहस्राणिदिवंययुः
एतेयेभवतांदृष्टाःनीलोत्पलसमत्विषः ५७
सर्वेतेसप्तमेऽतीतेजन्मन्यासन्मुनेःसुताः
अस्यैवसरसस्तीरेतेपुस्तेपरमंतपः ५८

कदाचित्कामिनीकाचिच्चंपकस्तबकस्तनी
चलापांगकालाकांततरंगितरसालिनी ५९
नासामुक्ताफलज्योत्स्नाचुंबितस्मितदीधितिः
वीणांविन्यस्यकुचयोर्वनेऽस्मिन्मधुरंजगौ ६०
गायंत्यास्वरमाकर्ण्यब्राह्मणाहरिणाइव
तांसमागत्यतेसर्वेसममेवव्यलोकयन् ६१
मयादृष्टाममैवेयमित्यूचुस्तेपरस्परम्
मुष्टामुष्टिततस्तेषांभ्रातॄणामभवद्रणः ६२
अन्योन्यमुष्टिनिष्पिष्टवक्षसस्त्यक्तजीविताः
तेभुक्त्वानिरयान्घोरान्बभूवुःसारसाभुवि ६३
तदातेश्वापदान्जघ्नुर्दग्धावन्येनवह्निना
ततोमातंगतामेत्यपथिपांथानघातयन् ६४
वनेविषोदकंपीत्वातेययुर्यममंदिरम्
खरोष्ट्रकपिमार्जारजन्मान्यासाद्यचक्रमात् ६५
ततोमधुव्रताजातावर्ततेऽत्रसरोवरे
अद्यमेगंधमाघ्रायप्रापुस्तेवैष्णवंपदम् ६६
शृणुपक्षींद्रवक्ष्यामियेनमय्यस्तिवैभवम्
एतस्माज्जन्मनःपूर्वेतृतीयेजन्मनिद्विजौ ६७
सरोजवदनानामद्विजातेःकन्यकाऽभवम्
पातिव्रत्यैकनिरतागुरुशुश्रूषणेरता ६८
कदाचित्सारिकामेकांपाठयंत्याविलंबितम्
सारिकाभवपापेत्वंपत्याशप्तास्मिकुप्यता ६९
प्रेत्यसारित्वमासाद्यपातिव्रत्यप्रसादतः
मुनीनामेवसदनेकन्याकाचित्पुपोषमाम् ७०
गीतानांदशमाध्यायंविभूतिरितिविश्रुतम्
प्रातःपठतिविप्रोसावश्रौषंतमघापहम् ७१
कालेनसारिकादेहमहंहित्वाविहंगम
दशमाध्यायमाहात्म्यादप्सराश्चाभवंदिवि ७२
पद्मावतीतिविख्यातापद्मायादयितासुखी
कदाचनमयायांत्याविमानेनविहायसा ७३

एतत्सरोवरंरम्यंविलोक्यविमलांबुजम्
अवतीर्यजलक्रीडायावदारभ्यतेमया ७४
दुर्वासास्तावदायातोविवस्त्रातेनवीक्षिता
तद्भयात्पद्मिनीरूपंधृतमेतन्मयास्वयम् ७५
पद्भ्यांपद्मद्वयंचैवद्वयंहस्तद्वयेनच
मुखेनपंचमांभोजमितिपंचांबुजास्म्यहम् ७६
दृष्टातेनमुनीद्रेणकोपज्वलितचक्षुषा
अनेनैवस्वरूपेणतिष्ठपापेशतंसमाः ७७
इतिशापंसमुत्सृज्यसचैवांतर्दधेक्षणात्
विभूत्यध्यायमाहात्म्याद्वाणीमेनविलीयते ७८
मद्विलंघनमात्रेणपतितोसिमहीतले
अद्यशापनिवृत्तिर्मेतिष्ठतस्तेखगोत्तम ७९
निशामयमयागीयमानमध्यायमुत्तमम्
यस्याकर्णनमात्रेणत्वमद्यैवविमोक्ष्यसे ८०
इत्यसौदशमाध्यायंपपाठश्लक्ष्णयागिरा
तमाकर्ण्यतयादत्तमादायचसरोरुहम् ८१
मयासमर्पितंतुभ्यंपद्मिन्यापद्ममुत्तमम्
इत्युक्त्वासजहौदेहंतदद्भुतमिवाभवत् ८२
भृंगिरिटिरुवाच
पुरातनेभवेकोऽयब्रह्महंसोऽभवत्कथं
तवाग्रतःकुतोहेतोरुत्ससर्जकलेवरम् ८३
इतिभृंगिरिटिर्वाक्यमाकर्ण्याहंतदाब्रुवम्
द्विजवेश्मनिपूर्वस्मिन्जन्मन्ययमजायत ८४
सुतपाइतिविख्यातोब्रह्मचारीजितेंद्रियः
वसन्गुरुकुलेकुर्वन्वेदाध्ययनमन्वहम् ८५
गुरुशुश्रूषणंसम्यग्विदधातिचभक्तितः
शयानस्यगुरोःशय्यांनिद्रितःसपदास्पृशत् ८६
तेनपापेनतिर्यक्त्वमयंस्वर्गेऽपिलब्धवान्
पद्मयोनिमरालानांमध्येजातस्ततोद्विजः ८७
अस्मिञ्जन्मन्यमुष्येहपुरास्मल्लोकनावधि

गीतानांदशमाध्यायंनलिन्याकथितंततः ८८
आकर्ग्यविहगोलेभेब्रह्मज्ञानमनुत्तमम्
सोऽयविप्रकुलेजातोदशमाध्यायवैभवात् ८९
जन्माभ्यासवशादस्यशिशोरपिमुखांबुजात्
गीतानांदशमाध्यायःसमुल्लसतिसर्वदा ९०
तदर्थपरिणामेनसर्वभूतेष्ववस्थितम्
शंखचक्रधरंदेवमयंपश्यतिसर्वदा ९१
यस्मिन्यस्मिन्यदैवास्यदृष्टिःस्निग्धाशरीरिणः
ससमुक्तोभवेत्सर्वःसुरापोब्रह्महाऽपिवा ९२
तद्विज्ञायमयाविप्रःपरमात्मस्वरूपिणा
इदंनगरमानीतोमुक्तिक्षेत्रंस्वभावतः ९३
अत्रत्यानांमनुष्याणांमुक्तिःकरतलेस्थिता
तेनास्यदृष्टिपातेनविशेषोऽन्योनजायते ९४
नददामिबहिर्गंतुमहमस्यपुराकृतम्
दशमाध्यायमहात्म्यात्तत्वज्ञानंसुदुर्लभम् ९५
लब्धमेतेनमुनिनाजीवन्मुक्तिरियंतथा
तेनास्यचलतोहस्तंददामिपथिगच्छतः ९६
दशमाध्यायमहिमाभृंगिरिटेमहानयम्
इतिभृंगिरिटेरग्रेकथितंयत्कथानकम् ९७
तवेदमत्रकथितंसर्वपापप्रणाशनम्
नरोवाप्यथवानारीयापिकोऽपिचवापुनः ९८
अस्यश्रवणमात्रेणसर्वाश्रमफलंलभेत् ९९

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे गीतामहात्म्येचतुरशीत्यधिकशततमोध्यायः १८४

पञ्चाशीत्यधिकशततमोऽध्यायः

देव्युवाच
इतिहासोऽयमीशानश्रेयसांसाधनंपरम्
आकर्ग्यकरुणापूर्णममकांक्षाप्रवर्त्तते १
एकादशस्यमाहात्म्यमध्यायस्यकथाश्रयम्

व्यावर्णयविरूपाक्षवक्तृणांप्रथमप्रभो २
ईश्वरउवाच-
आकर्णयकथांकांतेगीतावर्णनसंश्रयाम्
विश्वरूपाभिधानस्यमाहात्म्यमपिपावनम् ३
अध्यायस्यविशालाक्षिवक्तुंतावन्नशक्यते
सहस्राणिकथाः संतितत्रैकाकथ्यतेमया ४
प्रणीतायास्तटेनद्यामेघंकरमितिश्रुतम्
नगरंगरिमाधारतुंगप्राकारगोपुरम् ५
विशालाश्रमशालासुस्वर्णस्तंभविभूषितम्
श्रीमद्भिःसुखिभिः शांतैःसदाचारैर्जितेंद्रियैः ६
अधिष्ठितंजवैश्चारुशृंगाटकमनोहरम्
मणिस्तंभस्फुरत्स्वर्णापणचत्वरशोभितम् ७
पताकाकिंकिणीक्वाणकदंबककलस्वरम्
वेदाध्ययननिर्घोषवाचालितदिगंतरम् ८
तूर्यसंघोषणाकीर्णविशालव्योममंडलम्
पताकापल्लवोद्भूतवातनिर्जितविग्रहम् ९
राजामार्गवरद्वारनारीमंजीरसिंजितैः
वल्लकीवेणुकैर्गीतैर्भातिवाजींद्रहेषितैः १०
प्रेक्षमाणमिवाभीक्ष्णंदिक्पालानांपुरैःसमम्
आस्तेजगत्पतिर्यत्रशार्ङ्गपाणिर्विराजितः ११
मूर्तिमत्परमंब्रह्मजगल्लोचनजीवितम्
लक्ष्मीनयनराजीवपूजिताकारगौरवः १२
त्रिविक्रमवपुर्मेघश्यामलः कोमलद्युति
श्रीवत्सवक्षाराजीव वनमालाविभूषितः १३
अनेकभूषणोपेतः सरत्नइववारिधिः
चलत्सौदामिनीदामसांद्रमेघसमद्युतिः १४
तस्यास्तेमुकुटेसाक्षात्शार्ङ्गपाणिःपरःपुमान्
तंदृष्ट्वामुच्यतेजंतुर्जन्मसंसारबंधनात् १५
यस्मिन्पुरेमहातीर्थंविद्यतेमेखलाभिधम्
यत्रस्नात्वानरैर्नित्यंप्राप्यतेवैष्णवं पदम् १६

तत्रवीद्त्यजगन्नाथंनरसिंहं कृपार्णवम्
सप्तजन्मार्जिताद्घोरान्मुच्यतेदुष्कृतान्नरः १७
मेखलायांगणाधीशंविलोकयतियोनरः
सनिस्तरतिविघ्नानिदुस्तराण्यपिसर्वदा
ब्रह्मचर्यपरोदांतोनिर्ममोनिरहंकृतिः १८
तस्मिन्मेघंकरेकश्चिदभूद्ब्राह्मणसत्तमः
सुनंदइतिविख्यातोवेदशास्त्रविशारदः १९
वशीकृतेंन्द्रियग्रामोवासुदेवपरायणः
देवस्यशार्ङ्गिणःपार्श्वेगीताध्यायमिमंप्रिये २०
एकादशंपठत्येषविश्वरूपप्रदर्शनम्
अध्यायस्यप्रभावेनब्रह्मज्ञानमवापसः २१
परमानंदसंदोहश्लाघ्यसंवित्समाधिना
प्रत्यङ्मुखेंद्रियतयानिश्चलांस्थितिमीयुषा २२
सततंस्थीयतेतेनजीवन्मुक्तेनयोगिना
एएकदासमहायोगीसिंहराशिस्थितेगुरौ २३
गोदावरीतीर्थयात्रांविधातुमुपचक्रमे
प्रथमेऽह्निसमागत्यविरजं तीर्थमुत्तमम् २४
नाभिमारभ्यतीर्थेषुससमभ्यर्च्यदेवताम्
मज्जन्मज्जन्जगद्धात्रींकमलांसव्यलोकयत् २५
तांसंपूज्यमहामायांसर्वकामफल प्रदाम्
तारातीर्थेततःस्नात्वाकपिलासंगमेततः २६
अष्टतीर्थमसौचक्रेविधायपितृतर्पणम्
कुमारीशंशिवंनत्वाकपिलाद्वारमाययौ २७
तत्रनिर्मज्ज्यनिर्धुतप्राग्जन्मांतरदुष्कृतः
संपूज्यनत्वाश्रुत्वाचदेवंवैमधुसूदनम् २८
उषित्वातत्रतांरात्रिंप्रागात्प्रातःसहद्विजैः
नरसिंहवनेतत्रतीर्थे रामस्यदीर्घिका
प्रह्लादपूजितः साक्षादास्तेयत्रनृकेसरी २९
तंदृष्ट्वादेवदेवेशंपूजयित्वातुभक्तितः
तत्रतंदिवसंनीत्वासययावंबिकापुरम् ३०

अनुग्रहेणभक्तानामंविकातत्रतिष्ठति
पूरयंतिमनुष्याणांवांच्छितान्यखिलान्यपि ३१
पूजयित्वांबिकांभक्त्या पुष्पगंधानुलेपनैः
उपहारैश्चविविधैःस्तौत्रैःप्रणमनैरपि ३२
विप्रस्तस्मात्पुराप्राप्तःकंठस्थानाभिधंपुरम्
यत्रास्तेपरमाशक्तिर्महालक्ष्मीर्महाद्युतिः ३३
तामवेक्ष्यसुधाभानुभास्करद्युतिमंडलाम्
संसारतापविच्छेदपद्मपीयूषवाहिनीम् ३४
योगिराजहृदंभोजराजहंसनिषेविताम्
अनाहतमहानादमयीमद्वयरूपिणीम् ३५
महालक्ष्मींभगवतींवांछितार्थप्रदायिनीम्
आराध्यभक्तिभावेनचेतसासमुनीश्वरः ३६
विवाहमंडपंप्रापपुरंविप्रैःसमन्वितः
पुरेतत्रप्रतिगृहंवासस्थानमयाचत ३७
नलेभेवसतिंस्थातुंगेहेकस्मिन्नपिद्विजः
दर्शितंग्रामपालेनविशालंवासमंदिरम् ३८
प्रविश्यवशतिंचक्रेब्राह्मणः संगिभिःसह
ततः प्रभातेविमलेसुनंदोऽसौद्विजोतमः ३९
बहिरालोकयांचक्रेवासगेहान्निजंवपुः
अध्वन्यानखिलान्यत्रजातान्क्वापियदृच्छया ४०
गम्यमानः समायांतंग्रामपालोददर्शसः
तंवभाषेग्रामपालआयुष्मानसिसर्वशः ४१
भागधेयवतांपुंसांपुण्यः पुण्यवतामसि
प्रभावोविद्यतेवत्सकोपिलोकोत्तरस्त्वयि ४२
क्वप्रयाताः सहायास्तेकथंतत्सदनाद्बहिः
तत्पश्यमुनिशार्दूलकथयामितवाग्रतः ४३
किंतुनान्यंत्वयातुल्यंपश्यामीहतपस्विनम्
किंजानासिमहामंत्रंकांविद्यामवलंबसे ४४
कस्यदेवस्यकारुण्याच्छक्तिर्लोकोत्तरात्वयि
तत्कारुण्यवशात्तिष्ठग्रामेऽस्मिन्ब्राह्मणोत्तम ४५

शुश्रूषामखिलामेवभगवंस्तेकरोम्यहम्
इतिसंवासयामासतस्मिन्ग्रामेमुनीश्वरम् ४६
परिचर्याचतस्यासौभक्त्याचक्रेदिवानिशम्
दिवसेषुप्रयातेषुसप्ताष्टसुसमेयिवान् ४७
प्रातरागत्यतस्याग्रे रुरोदभृशदुःखितः
अद्यमेभाग्यहीनस्यगुणवान्भक्तिमान्सुतः ४८
जाज्वल्यमानदंष्ट्रेणभक्षितोनिशिरक्षसा
इत्येवंरक्षकेणोक्तंतंपप्रच्छससंयमी ४९
क्वास्तेसराक्षसःपुत्रोभक्षितस्तेकथंवद
ग्रामपालउवाच–
वर्ततेनगरेघोरः पुरुषादोनिशाचरः ५०
सखादतिनरानेत्यनित्यं नगरगोचरान्
ससर्वैर्नागरैरत्रप्रार्थितः पुरुषैःपुरा ५१
रक्षराक्षसनःसर्वान्ग्रासंतेकल्पयामहे
पथिकानिशिनिद्रांतियेचतान्भुंक्ष्वराक्षस ५२
एतस्मिन्सदनेपांथान्ग्रामपालप्रवेशितान्
आहारंकल्पयांचक्रुरात्मीयप्राणगुप्तये ५३
भवान्सुप्तोगृहेऽमुष्मिन्नधन्यैः संयुतः परैः
तेग्रस्ताःकिलचानेननत्वंमुक्तोसिद्विजोत्तम ५४
प्रभावंभवतोवेत्तिभवानेवद्विजोत्तम
मदीयतनयस्याद्यमित्रमेकमुपागतम् ५५
अजानतामयासोऽपितनयस्यप्रियः सखा
अन्यैः पांथजनैः सार्द्धतस्मिन्गेहेप्रवेशितः ५६
श्रुत्वातत्रप्रविष्टंतंनिशीथेतनयोमम
तमानेतुंगतः सोऽपिभक्षितस्तेनरक्षसा ५७
दुःखितेनमयाप्रोक्तः प्रातः सपिशिताशनः
ममापिपुत्रोदुष्टात्मन्भवतानिशिभक्षितः ५८
भवज्जठरनिर्मग्नः सुतोऽसौयेनजीवति
अस्तिचैवमुपायस्तेब्रूहिमेत्वं निशाचर ५९
राक्षसउवाच–

अंतःप्रविष्टात्वत्पुत्रमज्ञात्वाहमभक्षयम्
अजानन्भक्षितः पांथैः सहितोऽसौसुतस्तव ६०
यथाजीवतिमे कुक्षौयथाभवतिरक्षितः
तथाविहितमप्यस्तिदैवेनपरमेष्ठिना ६१
गीतैकादशमध्यायंयः पठत्यनिशंद्विजः
तत्प्रभावेनमेमुक्तिर्मृतानांपुनरुद्भवः ६२
ग्रामपालउवाच–
कथमेकादशाध्यायसामर्थ्यमिदमद्भुतम् ६३
इतिपृष्टोमयाविप्रसबभाषेनिशाचरः ६४
पुरागृध्रेणकेनापिनभोमार्गेणगच्छता
अस्थिखंडंस्वतुंडाग्रात्पातितंक्वापिवारिणि ६५
तंजलाशयमागत्यकोऽपिज्ञानीश्वरस्तदा
महातीर्थमितिज्ञात्वाविदधेपितृतर्पणम् ६६
तमूचिरे जनाः सर्वेतीर्थमेतत्कथंवद
जपत्येकादशाध्यायंत्रिसन्ध्यंनियतेंद्रियः ६७
कृतमौनस्तुविप्रोऽसौचौरैर्व्यापादितः पथि
तस्यास्थिशकलंगृध्रवदनात्पतितंजले ६८
तेनतीर्थमिदंदिव्यंजातंपातकनाशनम्
ततस्तेमानवाः सर्वेसस्नुस्तत्रलाशये ६९
निष्कल्मषतयाचैवंप्रापुस्तेपरमंपदम्
एकादशस्यसामर्थ्यादध्यायस्यभविष्यति ७०
ममापिमुक्तिः पांथानांपुनरुत्थानमेवच
योमयाकश्चिदुद्गीर्णोब्राह्मणोऽत्रैवतिष्ठति ७१
सच एकादशाध्यायंजपतिस्मनिरंतरम्
सतेनाध्यायमंत्रेणसप्तवाराभिमंत्रितम् ७२
विधायवारिविप्रेंद्रः क्षिपेद्यदिममोपरि
ततोमेशापनिर्मुक्तिर्भविष्यतिनसंशयः
इतितेनास्मिसंदिष्टः समायातस्त्वदंतिकम् ७३
विप्रउवाच–
राक्षसः केनपापेनजातोसौवदरक्षक

यत्त्नपायां गृहेतस्मिन्नरान्खादतिनिद्रितान् ७४
ग्रामपालउवाच
अस्मिन्ग्रामेपुराकश्चिदासीद्विप्रःकृषीवलः
एकदाशालिकेदाररत्तणेव्याकुलोद्विजः ७५
नातिदूरेमहागृध्रःपांथमेकमभत्तयत्
तंविमोचयितुंदूराद्दयांचक्रेऽपितापसः ७६
भुक्त्वापांथंखगस्तावन्निरगादंबराध्वना
ततः स तापसः कोपात्तंबभाषेकृषीवलम् ७७
धिक्त्वांहालिकदुर्बुद्धेकठोरमतिनिर्घृण
कुत्तिभरंपरत्राणविमुखंहतजीवितम् ७८अं
चोरैश्चदंष्ट्रिभिःसर्प्पैररिवह्निविषांबुभिः
गृध्ररात्तसभुतैश्चवेतालादिभिराहतान् ७९
जनानुपेत्ततेशक्तःसतद्वधफलंलभेत्
नमोचयतियोविप्रंप्रभुश्चोरादिभिर्धृतम् ८०
सयातिनरकंघोरंसपुनर्जायतेवृकः
निहन्यमानंविपिनेगृध्रव्याघ्रेणपीडितम् ८१
मुंचमुचेतियोवक्तिसयातिपरमांगतिम्
गवा मर्थेहताव्याघ्रैर्न्याधैर्दुष्टैश्चराजभिः ८२
तेपियांतिपदंविष्णोर्दुष्प्राप्यंयोगिनामपि
अश्वमेधसहस्राणि वाजपेयशतानिच ८३
शरणागतसं त्राणकलांनार्हंतिषोडशीम्
दीनस्योपेत्तणंकृत्वाभीतस्यचशरीरिणः ८४
पुरायवानपिकालेनकुंभीपाकेसपच्यते
पश्यन्नपिभवान् पांथंदुष्टगृध्रेणभत्तितम् ८५
निवारणसमर्थोपिनचक्रेयन्निवारणम्
निष्कृपोसियतस्तस्माद्भविष्यसिनिशाचरः ८६
इमांशापंमुने श्रुत्वाकंपमानकलेवरः
प्रणम्यहालिकोविप्रंबभाषेकरुणंवचः ८७
अत्राहंत्तेत्ररत्तायांचिरंत्तिप्तेनचत्तुषा
नवेद्मिनिकटंगृध्रहन्यमानमिमंनरम् ८८

तेनमेऽनुग्रहंकर्तुंकृपणस्यत्वमर्हसि
विप्रउवाच
योवेत्त्येकादशाध्यायं जपत्यनुदिनंचयः ८९
तेनाभिमंत्रितंवारियदाशिरसितावके
पतिष्यतितदाशापात्तवमुक्तिर्भविष्यति ९०
इत्युक्त्वातापसोयातोहालिकोराक्षसोऽभवत्
तदागच्छद्विजश्रेष्ठतेनाध्यायेनमंत्रय
तीर्थोदकंस्वहस्तेनतस्यमूर्द्धनिनिक्षिप ९१
महादेवाउवाच
इतितत्प्रार्थितंतस्यश्रुत्वाचकरुणाप्लुतः
तथेतिसहपालेनमुनीरक्षोंतिकंययौ ९२
एकादशेनतेनांबुविश्वरूपेणमंत्रितम्
निक्षिप्तंतस्यशिसितेनविप्रेणयोगिना ९३
गीताध्यायप्रभावेणशापमोक्षमवापसः
विहायराक्षसंदेहंचतुर्वाहुस्ततोऽभवत् ९४
निगीर्णायेजनास्तेनपांथाश्चासन्सहस्रशः
चतुर्भुजाबभूवुस्तेशंखचक्रगदाधराः ९५
तेविमानान्यारुरुहुस्तावदूचेसराक्षसम्
मदीयस्तनयः कस्तंदर्शयस्वनिशाचर ९६
इत्युक्तेग्रामपालेनदिव्यधीराहराक्षसः
एवंचतुर्भुजंविद्धितमालश्यामलद्युतिम् ९७
माणिक्यमुकुटंदिव्यमणिकुंडलमंडितम्
हारहारिमहास्कंधंस्वर्णकेयूरभूषितम् ९८
राजीवलोचनंस्निग्धंहस्तेकृतसरोरुहम्
दिव्यंविमानमारूढंदेवत्वंप्राप्तमात्मजम् ९९
इतितस्यवचः श्रुत्वासुतंदृष्ट्वाचतादृशम्
स्वगेहंनेतुमारेभेजहाससससुतस्ततः १००
कतिवाराणिजातोऽसित्वंपुत्रो ममरक्षक
पूर्वपुत्रस्त्वदीयोऽस्मिन्नधुनाविबुधोऽस्म्यहम् १०१
यास्यामिवैष्णवंधामब्राह्मणस्यप्रसादतः

निशाचरोऽपिप्राप्तोऽयपश्यदेहंचतुर्भजम् १०२
एकादशस्यमाहात्म्याद्यातिस्वर्गंसमंजनैः
विप्रादस्मात्तमध्यायमधीष्वत्वंजपानिशम् १०३
भविस्यतिनसंदेहस्तवापिगतिरीदृशी
ताततस्मात्सतांसंगंदुर्लभंसर्वथाजनैः १०४
सोप्यद्यतेसमुत्पन्नोह्यात्मनः साधयेप्सितम्
किंधनैर्भोगदानैर्वाकिंयज्ञैस्तपसानुकिम् १०५
किंपूर्तैर्वापरंश्रेयोविश्वरूपस्यपाठतः
तद्विष्णोःपरमंरूपमध्यायस्यश्रुतेनच १०६
यत्पूर्णानंदसंदोहकृष्णब्रह्मास्यनिर्गतम्
कुरुक्षेत्रेऽजुनेमित्रेतत्कैवल्यरसायनम् १०७
नृणांचभवभीतानामाधिव्याधिभयापहम्
अनेकजन्मदुःखघ्नंनान्यत्पश्यामितत्स्मर
शिव उवाच
इत्युक्त्वा सहतैः सर्वैर्ययौविष्णोःपरंपदम् १०८
तमध्यायंततोविप्राद्ग्रामपालः पपाठसः
तावुभौतस्यमाहास्याज्ञग्मतुर्वैष्णवंपदम् १०९
इत्येकादशमाहात्म्यकथातुभ्यंनिरूपिता
यस्याः श्रवणमात्रेणमहापातकसंक्षयः ११०

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेगीता-
माहात्म्येसतीश्वरसंवादेपंचाशीत्यधिकशततमोऽध्यायः १८५

षडशीत्यधिकशततमोऽध्यायः

महादेवउवाच-
अस्तिकोल्हापुरंनामनगरंदक्षिणापथे
सुखानांसदनंसाध्विसाधूनां सिद्धिसंभवम् १
परशक्तेः परंपीठंसर्वदेवनिषेवितम्
पुराणेषुप्रसिद्धंयद्भक्तिमुक्तिफलप्रदम् २
कोटिशस्तत्रतीर्थानिशिवलिगानिकोटिशः
आस्तेरुद्रगयायत्रविशालंलोकविश्रुतम् ३

तुंगाचलमहावप्रगोपुरोल्लासितोरणम्
प्रासादशिखरेयत्रतुंगंचकनकध्वजम् ४
सोमकांतिमहासौधवलभीपंक्तिशोभितम्
जालरंध्रोद्गिरद्धूपधूमाऽमोदितदिक्तटम् ५
चलत्पताकविस्तीर्णच्छायंदेवालयान्वितम्
चतुरैः सुंदरैः स्निग्धैः श्रीमिद्भिःशुचि मानसैः ६
अधिष्ठितंसदाचारैःपुरुषेर्भूरिभूषणैः
कुरंगनयनाश्चंद्रवदनाःकुटिलालकाः ७
उत्फुल्लचंपकच्छायाः पीनतुंगपयोधराः
कृशमध्या निम्ननाभिवलित्रयविराजिताः ८
विशालजघनाश्चारुजंघायुग्मावरांघ्रयः
वाचालमेखलादामनिक्वणन्मणिनूपुराः ९
रणत्कंकणहस्ताब्जस्फुरत्करजरश्मयः
वसंतिप्रमदायत्रमादयंत्योमुनीनपि १०
समस्तवस्तुसंयुक्तंसर्वभोगसमन्वितम्
मंगलैःसकलैर्युक्तंमहालक्ष्मीसमन्वितम् ११
तत्रागच्छत्पुमान्कश्चिद्युवागौरंसुलोचनः
कंबुकंठःपृथुस्कंधोमहावक्षामहाभुजः १२
समस्तलक्षणोपेतोगोचरासक्तमानसः
प्रविश्यनगरंपश्यन्शोभांसौधेषुसर्वतः १३
उत्कंठितमनाद्रष्टुंमहालक्ष्मींसुरेश्वरीम्
मणिकुंडेकृतःस्नानः संपन्नपितृतर्पणः १४
महालक्ष्मींमहामायांनत्वातुष्टावभक्तितः
जयत्यपारकरुणाशरण्याजगदंबिका १५
कुर्वाणाजगतोजन्मपालनंक्षपणंदृशा
ययाशक्त्याकृतादिष्टःपरमेष्ठीसृजत्यसौ १६
अवष्टभ्यचतांशक्तिंपालयत्यच्युतोजगत्
ययाशक्त्याकृतावेशः संहरत्यखिलंहरः १७
तांभजेपरमांशक्तिंसर्गस्थितिलयोर्जिताम्
योगिध्येयांघ्रिकमलेकमलेकमलालये १८

स्वभावानखिलान्नस्त्वंगृह्णासींद्रियगोचरान्
त्वमेवकल्पनाजालंतत्कल्पंकुरुषेमनः १९
इच्छाज्ञानक्रियारूपापरसंवित्स्वरूपिणी
निष्फलानिर्मलानित्यानिराकारानिरंजना २०
निरंतरानिरातंकानिरालंवानिरामया
तवैवंमहिमानंहिकोवर्णयितुमीशते २१
वंदेनिर्भिन्नषट्चक्रद्वादशांतर्विहारिणीम्
अनाहतध्वनिमयींबिंदुनादकलात्मिकाम् २२
मातस्त्वंपूर्णशीतांशुगलत्पीयूषवाहिनी
पुष्णासिवत्सलेवालान्सनकादीन्दिगंबरान् २३
अनुस्यूताशिवासंविज्जाग्रत्स्वप्नसुषुप्तिषु
तुरीयायांवर्त्तमानांदयासूनृतसंधिषु २४
ददासि प्राणिनासर्वाः सततंब्रह्मसंपदः
संहृत्यतत्वसंघातंतुरीयातीतयात्वया २५
योगिनांबिंवतादत्म्यंदीयतेनिर्विकल्पया
परांनमामिपश्यंतींमध्यमांवैखरीमपि २६
रूपाणिदेविगृह्णासिजगत्संत्राणहेतवे
त्वंब्राह्मीवैष्णवीचत्वंमाहेशीचत्वमंबिके २७
वाराहित्वंमहालक्ष्मीर्नारसिंहीत्वमैंद्रिका
त्वंकौमारीचंडिकात्वंलक्ष्मीस्त्वंविश्वपावनी २८
सावित्रीत्वंजगन्माताशशिनीत्वंचरोहिणी
त्वंस्वाहात्वंस्वधात्वंहित्वं सुधापरमेश्वरी २९
चंडमुंडभुजादंडखंडदोर्दंडमंडिते
रक्तवीजगलद्रक्तपानघूर्णितलोचने ३०
उन्मत्तमहिषग्रीवोन्मूलनप्रौढदोर्युगे
शुंभासुरमहादैत्यदारणायातविक्रमे ३१
अनंतचरितेतुभ्यंनमस्त्रैलोक्यमातृके
भक्तकल्पलतेमह्यंप्रसीदपरमेश्वरि ३२
इतितेनस्तुतादेवीमहालक्ष्मीस्ततः स्वयम्
निजरूपंसमास्थायपुरुषंप्रत्युवाचतम् ३३

श्रीलक्ष्मीरुवाच-
राजपुत्रप्रसन्नाऽहवृणीष्ववरमुत्तमम्
राजपुत्रउवाच
पितामेधरणीपालोवाजिमेधंमहाक्रतुम् ३४
कुर्वाणोदैवयोगेनरोगाक्रांतोदिवंययौ
तद्वपुस्तप्ततैलेनशोषयित्वामयाततः ३५
स्थापितस्तत्रयागोऽसौयथापूर्वमवर्तत
अथक्रांतमहीचक्रोयूपेयागतुरंगमः ३६
निशीथेबंधनंहित्वानीतः केनापिकुत्रचित्
अदृष्ट्वातद्गतंक्वापिनिवृत्तेषुजनेष्वहम् ३७
आमंत्र्यऋत्विजः सर्वाञ्छरणंत्वामुपागतः
प्रसन्नायदिदेवित्वंतन्मेयागतुरंगमः ३८
दृष्टोभवतुयागोऽसौसंपूर्णोजायतेयथा
आनृण्यंममतातस्य तेनराज्ञोभविष्यति ३९
तथाकुरुजगद्धात्रिशरणागतवत्सले
देव्युवाच
ममद्वारंद्विजः सिद्धसमाधिरितिविश्रुतः ४०
ममाज्ञयासतेसर्वंकार्यंनिष्पादयिष्यति
इत्युक्तः श्रीमहालक्ष्म्याततोराजकुमारकः ४१
आजगाममुनिःसिद्धसमाधिर्यत्रतिष्ठति
प्रणम्यतस्यपादाब्जंकृतांजलिरवस्थितः ४२
तमुवाचततोविप्रःप्रहितोऽसित्वमंबया
त्वदीप्सितमिदंसर्वंसाधयामिविलोकय ४३
इत्युक्त्वात्रिदशान्सर्वानाचकर्षसमांत्रिकः
एवंतत्क्षितिपालस्यतनयोऽसौतदासुरान् ४४
कृतांजलिपुटान्देवान्वेपमानकलेवरान्
अथतानमरान्सर्वान्संवभाषेद्विजोत्तमः ४५
अमुष्यराजपुत्रस्यवाजीयज्ञायकल्पितः
नीतोस्तिदेवराजेनक्षपायामपहृत्यसः ४६
गीर्वाणाअश्वमेवास्यसमानयतमाचिरम्

अथतस्यमुनेर्वाक्याद्देवैर्यज्ञतुरंगमः ४७
समर्पितस्ततस्तेनतेऽनुज्ञात्वादिवौकसः अं
आकृष्टानमरान्दृष्ट्वागतंलब्ध्वातुरंगमम् ४८
महीपतिसुतोनत्वातंमुनिंवाक्यमब्रवीत्
आश्चर्यमिदमेतत्तेसामर्थ्यमृषिसत्तम ४९
कृतंत्वयाचित्रमिदंत्रिदशाकर्षणंत्क्षणात्
हस्तादाकृष्यदत्तोमे यज्ञीयोऽयतुरंगमः ५०
नकिंचिदपरंयावद्दुष्करंयत्सुरैरपि
प्रभविष्यतितत्कर्तुंभवानेवनचापरः ५१
शृणुविप्रमहीपालपितासीन्मेबृहद्रथः
प्रारब्धहयमेधोऽसौदैवेननिधनंगतः ५२
अद्यापितस्यदेहोस्तितप्ततैलेनशोषितः
तस्यसंजीवनंभूयः कर्त्तुमर्हसिसत्तम ५३
इत्याकर्ण्यस्मितंकृत्वासजगादमहामुनिः
यामस्तत्रपितायत्रतावकोयागमंडपः ५४
अथागत्यसमतेनतत्रसिद्धः समाधिना
पयोऽभिमंत्र्यविदधेतस्यप्रेतस्यमूर्द्धनि ५५
ततः प्रापनृपः संज्ञामुत्तस्थेवैददर्शच
सतंपप्रच्छविप्रेंद्रंकोऽसिधर्मेतिभूपतिः ५६
ततोराजसुतः सर्वंभूपालायन्यवेदयत्
सनत्वाब्राह्मणंराजातंपुनर्दत्तजीवितम् ५७
बभापेकेनपुण्येनत्वयिशक्तिरलौकिकी
ययाषेजीवितंदत्तमाकृष्टाश्चदिवौकसः ५८
यागश्चोद्धरितोविप्रयेनमेतन्निरूपय
इत्युक्तस्तेनविप्रोऽसौजगादश्लक्ष्णयागिरा ५९
गीतानांद्वादशाध्यायंजपाम्यहमतंद्रितः
तेनशक्तिरियंराजन्ययाप्राप्तोइऽसजीवितम् ६०
एतदाकर्ण्यराजाऽसौद्वादशाध्यायमुत्तमम्
पपाठतस्माद्विप्रर्षेः सकाशात्ब्राह्मणान्वितम् ६१
तस्याध्यायस्यमाहत्म्यात्तेसर्वेसद्गतिंययुः

अन्येपठित्वाजीवाश्चमुक्तिमापुरहोपराम् ६२
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेगीता-
माहात्म्येषडशीत्यधिकशततमोऽधयायः १८६

सप्ताशीत्यधिकशततमोऽध्यायः

देव्युवाच
द्वादशाध्यायमाहात्म्यंभवताकथितंमम
ब्रूहित्रयोदशाध्यायमाहात्म्यमतिसुंदरम् १
ईश्वरउवाच-
शृणुत्रयोदशाध्यायमहिमांभोनिधिंशिवे
यदाकर्णनमात्रेण परांमुद मवाप्स्यसि २
अस्तिदक्षिणदिङ्मार्गेतुंगभद्रामहानदी
तत्तटेनगरंरम्यंनाम्नाहरिहरंपुरम् ३
यत्राऽस्तेभगवान्देविदेवोहरिहरःस्वयम्
यस्यदर्शनमात्रेणपरंकल्याणमाप्यते ४
तस्मिन्पुरेद्विजन्मासीद्धरिदीक्षितसंज्ञिकः
तपः स्वाध्यायनिरतोश्रोत्रियोवेदपारगः ५
दुराचारेतितस्यासीद्भार्यानाम्नाचकर्मणा
नसुष्वापसमंपत्यादुरालापाकदाचन ६
क्षणमप्यात्मसदनेनचास्तेस्वैरचारिणी
कंठदघ्नंद्विजद्वारेधयंतीवारुणीरसम् ७
पतिसंबधिनः सर्वान्तर्जयंतीपुनःपुनः
विटैःसहसदोन्मत्तारममाणानिरंतरम् ८
कदचिद्व्याकुलंदृष्ट्वापुरंपौरैरितस्ततः
संकेतगेहमकरोत्कांतारेनिर्जनेस्वयम् ९
अथतत्रैवसाधूर्तारममाणाविटैःसह
निनायसाबहून्कालान्निजयौवनगर्विता १०
अथतस्मिन्पुरेरम्येनिवसंत्यानिरंकुशम्
वसंतकालं समभूत्परंचित्तेभुवःसखा ११
आमूलपल्लवाकीर्णं सहकारविकारिणा

पिकानांपंचमालापैः पुनः सजीवितः स्मरः १२
स्फुरच्चंपकसौरभ्यहारकैर्मलयानिलैः
मंदंमंदंप्रसर्पद्भिरांदोलितवनद्रुमः १३
उत्फुल्लमल्लिकामोदमदिरापारणावताम्
अलीनांकलटंकारैः समंताद्रावशोभितः १४
प्रसन्नचारुभिःस्मेरः सरोवरसुगंधिभिः
मीलन्मरालनिवहैः सरोभिः प्रकटीकृतः १५
घनच्छायासुखासीनहरिणार्भकधारिभिः
नीरंध्रपल्लवैर्नानाशाखिभिः शोभितावनिः १६
तस्मिन्वसंतसमयेमुदितासाभिसारिका
अपश्यज्जगदानंददायिनींचंद्रिकांनिशि १७
चंचच्चकोरचंच्वग्रगलत्पीयूषासीकराम्
द्रवदिंदुशिलानिर्यत्सुधानिर्झरनिर्भराम् १८
विकाशिकुसुमक्रोडसांद्रीभूतकरोत्कराम्
उल्लासितपयोराशिकल्लोलालिगितांबराम् १९
मनोभवमहासिंहकुलटाकंठकर्तरीम्
घनांधकारसंदोहविदारणपटीयसीम् २०
श्वेतीकृतसतीकारपरार्थहिमगर्भिणीम्
म्लानपंकजसंकोचाद्यूनामानंददायिनीम् २१
चक्रवाकवधूवक्त्रकरुणाक्रोशसाक्षिणीम्
मुक्ताश्रेणीविशुद्धांशुप्रभासितदिगंतराम् २२
अथतस्यांप्रभूतायांपूरयंत्यादिशोदश
कामांधाकामिनीजातापथिसौधविहारिणी २३
अपश्यंतीविटान्रात्रौनिर्भिद्यभवनार्गलम्
ययौसंकेतभवनंनिर्गत्यनगराद्बहिः २४
तत्रप्रियतमंकंचित्काममोहितमानसा
अन्वेषयंतीनाद्राक्षीत्कुंजेकुंजेतरौतरौ २५
आकर्णयंतीकांतस्यमंदालापान्पदेपदे
अभियातिततः क्रीडन्यत्रसंहारिनिस्वनः २६
चक्रवाकरवान्श्रुत्वाकांतालापभ्रमादसौ

सरोवराणिसर्वाणिपर्यटंतीमुहुर्मुहुः २७
कांतभ्रांत्यातरुतलेप्रसुप्तान्हरिणोत्करान्
प्रबोधयंतीसोच्छ्वासमागतास्मीतिभाषिणी २८
आलिगंतीवनस्थाणुंजीवनेश्वरशंकया
तदाननभ्रमाद्भूयंचुंबंतीविकचांबुजम् २९
तत्रतत्रकृतव्यर्थश्रमादृष्टप्रियास्वयम्
विललापवनेतस्मिन्मूर्च्छतीविविधोक्तिभिः
हाकांतहागुणाक्रांतमच्चैतन्यस्यनायक ३०
हेमनोहरसौभाग्यभाग्यलावण्यशेवधे
हापूर्णचंद्रवदनहासरोजायतेक्षण ३१
हाकांततत्वसौहित्यविश्रमायसुरद्रुम
यदिकोपेनकुत्रापिगुह्यवेषोऽत्रतिष्ठसि ३२
प्रसादयामित्वांकांतदत्त्वाप्राणान्प्रियानपि
इत्युच्चैः सर्वतोदिक्षुविलपंत्यावियोगतः ३३
तस्याः श्रुत्वावचः कोऽपिसुप्तोव्याघ्रः प्रबुद्धवान्
कुर्वन्घुरघुरध्वानंपश्यन्प्रतिदिशं रुषा ३४
आस्फालयन्नखैर्भूमिंगर्जन्नाकाशगह्वरम्
पृष्ठनिर्भग्नलांगूलद्रुतमुत्थायवेगवान् ३५
गतोव्याघ्रः समुत्पत्ययत्रास्तेसाभिसारिका
अथ सापितमायांतमालोक्यपतिशंकया ३६
निर्जगामपुरः स्थातुंप्रेममनिर्भरमानसा
ततस्तस्यनखक्रीडाक्रूरतांधीकृतासती ३७
जहौप्रियवपुःशंकांश्रुत्वागर्जितमूर्जितम्
तथाविधापिसानारीभ्रांतिमुत्सृज्यसत्वरम् ३८
व्याघ्रत्वंतुकुतोहेतोर्मानिहंतुमिहागतः
इदंसर्वंसमाख्याहियतस्त्वंहंतुमिच्छसि ३९
इतितस्यावचः श्रुत्वाशार्दूलश्चंडविक्रमः
क्षणंविहायतद्ग्रासमुवाचप्रहसन्निव ४०
मलापहानदीनाम्नादेशेतिष्ठतिदक्षिणे
नगरीमुनिपर्णेतितस्यारोधसिवर्तते ४१

तत्रास्तेभगवान्साक्षात्पंचलिंगोमहेश्वरः
तस्यांपुर्यामहंविप्रपुत्रोभूत्वास्थितस्ततः ४२
अयाज्यान्याजयन्नश्नन्नेकोद्दिष्टेनदीतटे
वेदपाठफलंशश्वद्विक्रीणन्धनकांक्षया ४३
भिक्षुकानपरान्लोभात्तिरस्कुर्वन्दुरुक्तिभिः
अदेयद्रविणंगृह्णन्नदत्तमनिशंदिनम् ४४
छलयन्सकलंल्लोकान्क्षणग्रहणकौतुकात्
ततः कतिपयेकालेजरठत्वमुपागतः ४५
वलीपलितवानंधः प्रपतन्प्रस्खलद्गतिः
पतद्दंतोभवंभूयः प्रतिग्रहपरायणः ४६
हस्तेगृहीतदर्भोऽहमगमंतीर्थसन्निधिम्
धनग्रहणलोभेनभ्रमन्पर्वसुपर्वसु ४७
ततोऽहशिथिलांगः सन्कंचिद्भूनिर्जरालयम्
गतवान्याचितंभोक्तुंदष्टोमध्येपदेशुना ४८
अपतंमूर्छितोभूत्वाततः क्षितितलेक्षणात्
ततोऽहगलितप्राणोव्याघ्रयोनिमुपागतः ४९
अत्रतिष्ठामिकांतारेपूर्वपापमनुस्मरन्
नभक्षयामिधर्मिष्ठान्मुनीन्साधुजनान्सतीः ५०
किंतुपापान्दुराचारनसतीर्भक्षयाम्यहम्
अतोऽसतित्वंतत्वेनममैवकवलायसे ५१
इत्युक्त्वास्वैर्नखैःकूरैस्तांविभज्यांगखंडशः
अथतांभक्षितांतेनपापदेहमुपाश्रिताम् ५२
यमस्यकिंकरानिन्युःसद्यः संयमनींपुरीम्
यमादेशेनतत्रापिपातयामासुराशुताम् ५३
विरामूत्ररक्तपूर्णेषुघोरकुंडेष्वनेकथा
कल्पकोटिषुपीतासुतस्मादानीयतांमुहुः ५४
रौरवेस्थापयामासुर्मन्वंतरशतावधि
ततोप्याकृष्यतांदीनांरुदतींसर्वतोमुखीम् ५५
मुक्तकेशांभग्नगात्रांचिक्षिपुर्दहनानने
एवं पापपरांघोरां भुक्त्वानरकयातनाम् ५६

इहजातामहापापात्पुनः श्वपचयोनिषु
ततः श्वपचगेहेऽपिवर्द्धमानादिनेदिने ५७
पूर्वजन्मवशेनैवतथैवासीद्यथापुरा
ततः कतिपयेकालेपुनःस्वंभवनंययौ ५८
यत्रास्तेजृंभकादेवीशिवस्यातः पुरेश्वरी
तत्रापश्यद्द्विजन्मानंवासुदेवाभिधंशुचिम् ५९
गीतात्रयोदशाध्यायमुद्गिरंतमनारतम्
ततस्तच्छ्रवणादेवमुक्ताश्वपचविग्रहात् ६०
दिव्यंदेहंसमासाद्यजगामत्रिदशालयम् ६१

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेगीता-माहात्म्येसप्ताशीत्यधिकशततमोऽध्य १८७

अष्टाशीत्यधिकशततमोऽध्यायः

ईश्वरउवाच-
अतः परंप्रवक्ष्यामिभवानिभवमुक्तये
गीताचतुर्दशाध्यायमवधारयसुस्मिते १
मेदिन्यांयत्किलस्थूलमस्तिकाश्मीरमंडलम्
राजधानीसरस्वत्याआस्तेचैवमनोहरा २
यामधिष्ठायवाग्देवीब्रह्मलोकंप्रयच्छति
हंसमारुह्यमानापिसावित्रीप्रहतैरपि ३
सरस्वतीपदांभोजसेवामाश्रित्यकुंकुमैः
यत्रगौरवयंत्याशाहंसपद्मपुटोद्भवैः ४
निरंतरंतयाचैवनृणांसंस्कृतभाषिणाम्
सुपर्वाणमयीभाषानिषेणोपलभ्यते ५
प्रातर्गृहांगणोद्भूतैर्यत्रकुंकुमपांसुलैः
सर्वतोरुणितच्छायशशांकरविमंडलम् ६
तत्रासीत्तेजसांराशिः शौर्यवर्मानरेश्वरः
उद्यदुज्ज्वलवाणौघखंडितारातिमंडलः ७
अभूच्चसिंहलद्वीपेराजासिंहपराक्रमः
नाम्नाविक्रमवेतालः कलानामपिशेवधिः ८

उभौपरस्परंमैत्रींवर्द्धयांचक्रतुः क्रमात्
तत्तद्देशसमुत्पन्नैरपूर्वैः प्रचुरोत्करैः ९
एकदाप्रहितंप्रेम्णाप्रभूतंशौर्यवर्मणा
राजाविक्रमवेतालोविलोक्यशुनकीद्वयम् १०
मत्तमातंगतुरगमणिभूषणचामरम्
प्रेषयामासमित्रायप्रभूतं शौर्यवर्मणे ११
एकदाशिबिकारूढश्चारुचामरवीजितः
सुवर्णशृंखलारूढंवाद्यडिंडिमंडबरम् १२
शुनीयुगलमादायमृगयाकौतुकोत्सुकः
राजाजगामबाह्यालद्यंसमंराजकुमारकैः १३
पणबंधविधानेनसमुपेतंशशामिषम्
तत्रराजकुमाराणांमहान्कोलाहलोऽभवत् १४
ततः समानवयसाकेनचिद्राजसूनुना
बहुमूल्यंपणंकृत्वाराजाचिक्रीडकौतुकी १५
ततोवतार्यदोलायाविरुदावलिगर्विताम्
धावतः शशकस्योच्चैःपृष्ठेमुंचन्नृपंशुनीम् १६
मुमोचराजपुत्रोऽपिप्रेमपात्रंमहाभुजः
विररामशुनीमुच्चैःसंकीर्त्यविरुदावलीम् १७
अलक्ष्यमाणवेगेऽस्मिन्शुनीयुगलकेभृशम्
धावत्युत्थितमेवासीत्पश्यतांसर्वभूभृताम् १८
पपातगर्तेमहतिशशकोऽतिश्रमादसौ
पतितोऽपिशुनीवश्योनाभवच्छशशावकः १९
ततः शनैः समुत्थायधावन्नाक्रम्यरोषतः
जगृहेराजशुन्याऽसौशशकः फेनमुद्वमन् २०
ततः कथंचिदुप्लुत्यगच्छन्विस्खलयञ्छशः
राजपुत्रशुनक्यासौगृहीतः कंधरातटे २१
जितमस्माभिरत्यर्थमितिसंजल्पतांनृणाम्
कोलाहलेशंकितायाशुन्यानिर्गतवान्मुखात् २२
ततोदंष्ट्राव्रणश्रेणीक्षरद्रुधिरधारकः
क्वापिर्मर्मरभूभागेनिलीयस्थितवाञ्छशः २३

जिघ्रंत्याराजशुन्याऽसौभूभागंधनरोषया
दृष्टमात्रः परित्रस्तोहस्तमात्रंततोऽगमत् २४
यत्रकर्पूरकदलीक्रोडव्याघ्रदरीतलः
चोलीकपोलफलकान्चुबन्वातिसमीरणः२५
उद्भिन्नकेतकीकोशरजोमुकुलितेक्षणः
विस्रब्धाहरणायत्रच्छायांतांपरितन्वतः २६
नारिकेलफलैर्यत्रस्वयंनिपतितैरधः
अपिचूतफलैस्तृप्ताःपक्वैः शाखामृगाअपि २७
अपिकेसरिणोयत्रखेलंतिकलभैःसमम्
फणिनः केकिबर्हेषुनिर्विशंकंविशंतिच २८
यत्राश्रमांतरेविप्रोवत्सनामाजितेंद्रियः
शांतश्चतुर्दशाध्यायंजपन्नास्तेनिरंतरम् २९
तत्रतच्छिष्यपादाब्जप्रक्षालनजलैःकृते
कर्दमेन्यपतद्गत्वाजीवशेषोमुहुःश्वसन् ३०
ततः कर्दमसंस्पर्शमात्रनिस्तीर्णसंसृतिः
दिव्यंविमानमारुह्यनिर्ययौशशकोदिवम् ३१
ततःशुन्यपिलिप्तांगीस्तोकैःकर्दमबिंदुभिः
क्षुत्पिपासार्तिरहिताशुनीरूपंविहायसा ३२
ततोदिव्यांगनारम्यं गंधर्वैरुपशोभितम्
दिव्यंविमानमारुह्यशुन्यपित्रिदिवंययौ ३३
ततोजहासमेधावीशिष्योनाम्नास्वकंधरः
विचार्यविस्मितः पूर्वजन्मवैरस्यकारणम् ३४
राजापिपर्यपृच्छत्तंविस्मयस्मेरलोचनः
प्रणम्यपरयाभक्त्याविनयैकपयोनिधिः ३५
कथांकथयमेविप्रहीनयोनिनिषेवितौ
अज्ञौयौजग्मतुःस्वर्गेशुनीशशकशावकौ ३६
शिष्यउवाच-
वत्सनामाद्विजन्मास्तेवनेऽमुष्मिन्जितेंद्रियः
चतुर्दशंतुह्यध्यायंगीतानांसर्वदाजपन् ३७
शिष्योऽह तस्यभूपालब्रह्मबिद्याविशारदः

चतुर्दशतुअध्यायंजपामिप्रत्यहंनृप ३८
मदीयचरणांभोजप्रक्षालनजलेलुठन्
शशस्त्रिदिवमापन्नः शुनक्यासह भूपते ३९
राजोवाच
हेतुनाकेनकथयहसितंचद्विजोत्तम
अतः किमपिसाकूतंमन्यमानेनसादरम् ४०
शिष्यउवाच
महाराष्ट्रेतिनगरंनाम्नाप्रत्युदकंमहत्
तत्रासीद्ब्राह्मणोनाम्नाकेशवः कितवाग्रणीः ४१
विलोभनाभवत्तस्यजायास्वैरविहारिणी
तेनसाहन्यतेक्रोधाद्वैरंसंचित्यजन्मनः ४२
ततः स्त्रीवधपापेनशशकोजायतेद्विजः
किल्विपाच्छुनकीसापिजातावंचनजन्मनः ४३
पूर्वेणजन्मनाभ्यस्तंवैरंविस्मरतोनहि
आसेदिवद्यांबहुधायोन्यंतरमपिक्वचित् ४४
इत्याकलय्यसकलंभूपालः श्रद्धयान्वितः
गीतामभ्यस्यसकलामवापपरमांगतिम् ४५

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेगीता-
माहात्म्येअष्टाशीत्यधिकशततमोऽध्यायः १८८

एकोननवत्यधिक शततमोऽध्यायः

ईश्वरउवाच
प्रवक्ष्यामिविशालाक्षितुहिनाचलकन्यके
गीतापंचदशाध्यायमाहात्म्यमवधारय १
कृपालुर्नरसिंहोऽभून्नाम्नागौडेषुभूपतिः
यस्यासिधारयासंख्येदेवासंघावधीकृताः २
यदीयमत्तमातंगदानधाराजलैरिला
निदाघेपिचसेहेतांरविसंतापवेदनाम् ३
संक्रंदनपरित्रस्तायदीयशरणंगताः
रेजिरेकरिणोमत्ताश्चलंतः पर्वताइव ४

मत्तमातंगचीत्कारप्रतिस्वनमिवादरात्
यस्यगोपायतः शैलाव्याहरंतिकृपावतः ५
यदीयधावत्तुरगक्षुरसंघातजर्जरम्
नाभूच्चित्रंकथंकारंगतखंडंधरातलम् ६
यस्मिन्वृत्रहणोमित्रेसमुद्धरतिमेदिनीम्
पुनरुज्ज्वलयांचक्रेमहाभाष्यंफणीश्वरः ७
तस्यासीत्सनिकोधीमाञ्छस्त्रशास्त्रकलानिधिः
नाम्नासरभभेरुंडःप्रचंडभुजमंडलः ८
भांडारेणतुरंगैश्चभटैर्वीररसोद्धवैः
समानएवभूपालदुर्गैरत्यंतदुर्गमैः ९
सकदाचित्स्वयंराज्यंकर्तुंपापोदधेमनः
निहत्यवसुधापालंबलात्साकंकुमारकै १०
कर्तुंव्यवस्यदिवसैः स्वल्पैरित्थंचिकीर्षया
विषूचिकामयादाशुपरासुः समजायत ११
कालेनाल्पीयसाप्रेत्यपापात्मातेनकर्मणा
तेजस्वीतुरगोजातः सिंधुदेशेकृशोदरिः १२
मूलेनबहुनाक्रीत्वाहयतत्वविदाततः
बहुयत्नवतानीतः केनचिद्वैश्यसूनुना १३
राजापिपौत्रनप्त्त्राद्यैस्तस्यैवमरणात्परम्
कालेनबृद्धतांप्राप्तः स्वराज्यंचापिपालयन् १४
सवैश्यसूनुस्तंचाश्वंराज्ञे दातुं समागतः
राज्ञोद्वारिस्थतस्तत्रप्रतीक्षंस्तत्समागमम् १५
ज्ञातपूर्वोऽपिवैश्योऽसौ प्रतीहारेणदर्शितः
किमर्थंब्रूहिराज्ञेति पृष्टःस्पष्टमभाषत १६
देवत्रिजगतीरत्नमितिमत्वातुरंगमः
मयानियुतमूल्येनबहुनासाधुलक्षणः १७
ततोऽवलोक्यवक्त्राणिभूपालः पार्श्ववर्तिनाम्
समादिदेशवणिजमश्वोऽत्रनीयतामिति १८
शिरांसिधूनयन्नृणामश्वलक्षणवेदिनाम्
शूराणामपिचेतांसिमुहुरुत्साहयन्महान् १९

अखंडमेदिनीवेगबहुसंक्रमणार्जितम्
लालाफेनछलेनासौवमन्शुभ्रतरंयशः २०
उच्चैःश्रवस्तुलांभेजेगुणसाम्येनतत्त्वतः
विवृणवन्नतितेजस्वीहयेवनतकंधरः २१
चामरैरिंदुधवलैर्वीज्यमानोनिरंतरम्
दुग्धांभोनिधिलोलैस्तैः श्वासैरुच्चैःश्रवाइव २२
नीलातपत्रयुगलंघनच्छायतुलश्रिया
बिभ्राणोवारिदालीढहिमाद्रिशिखरश्रियम् २३
मेदिनीमंडलस्पर्शसंक्रांतमिवपावकम्
मुहुरुद्धरयन्धुन्वन्बंधुरंकंधरातटम् २४
दारयन्वैरिणः सर्वान्व्याहरंश्चजयश्रियम्
हेषारवेणगुरुणादिक्षुप्रख्यापयन्यशः २५
सत्त्वस्यराशिरत्युच्चैर्गतीनामिवशेवधिः
रूपस्यनिलयंसाक्षाल्लक्षणानांपयोनिधिः २६
आनीतोवणिजावाजीराज्ञाचसमदृश्यत
बहुधावर्णितोऽमात्यैरश्वलक्षणवेदिभिः २७
यथेच्छंवणिजोदीर्णंस्वर्णंदत्त्वामहीपतिः
जग्राहतुरगंवेगादसीमानंदनिर्भरः २८
ततोऽश्वपालमाहूययत्नतस्तंनिरूप्यच
विसर्जितसभालोकोगृहांतरमगान्नृपः २९
अनेकधासमापृष्टोमहीपालरणांगणे
शस्त्रव्रणकिणश्रेणीभूषणंसत्वसन्निभम् ३०
एकदामृगयांखेलन्कुतूहलरसात्मना
तमारुह्यमहीपालोवनंप्रतिविवेशह ३१
विसृज्यसैनिकान्पृष्टेधावतः परितोऽखिलान्
आकृष्यमाणोहरिणैःपिपासाकुलितोऽभवत् ३२
ततउत्तीर्यतुरगाज्जलमन्वेषयन् नृपः
बध्वाश्वंतरुशाखायामारुरोहशिलांनृपः ३३
गीतापंचदशाध्यायश्लोकार्द्धलिखितंततः
पातितंमरुतातत्र्यत्रखंडेविलोकयत् ३४

पत्रंवाचयतोराज्ञः श्रुत्वागीताक्षरावलीम्
ततोमुक्तिपदंलेभेतुरगस्त्वरयाऽपतत् ३५
ततोग्रंथिंसमाच्छिद्यपल्याणवतार्यच
उत्थापमानस्तुरगोराज्ञानोत्थितवान्मृतः ३६
ततं सरभभेरुंडोनृपमाभाष्यसुस्वरम्
दिव्यंविमानमारुह्यजगामत्रिदशालयम् ३७
ततोगिरिंसमारुह्यददर्शाश्रममुत्तमम्
पुन्नागकदलीचूतनारिकेलसमन्वितम् ३८
द्राक्षेक्षुवाटिकापूगनागकेसरचंपकम्
खेलत्करभसारंगंनृत्यत्केकिकुलंनृपः ३९
प्रणिपत्यद्विजन्मानमुटजाभ्यंतरस्थितम्
पप्रच्छपरयाभक्त्यामुक्तसंसारवासनात् ४०
तुरगोनिरगात्स्वर्गहेतुनाकेनमेवद
इत्याकर्ण्यवचोराज्ञोद्विजन्मावाचमूचिवान् ४१
कालेनबहुनाप्रेत्यतत्पापात्तुरगोऽभवत्
अथपंचदशाध्यायश्लोकार्द्धंलिखितंक्वचित् ४२
ततोवाचयतः श्रुत्वानिरगात्तुरगोदिवम्
ततः समागतैस्तत्रपरिवारजनैर्वृतः ४३
प्रणिपत्यद्विजन्मानंहृष्टरोमाविनिर्गतः
पत्रंतदेवलिखितंगीतापंचदशाक्षरम् ४४
वाचयन्समहीपालोहर्षसंफुल्ललोचनः
अभिषिच्यनिजंपुत्रंमंत्रविन्मंत्रिभिः समम् ४५
सिंहासनेसिंहबलंमुक्तिमापविशुद्धधीः ४६

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेगीता-
माहात्म्येएकोननवत्यधिकशततमोऽध्यायः १८९

नवत्यधिकशततमोऽध्यायः

ईश्वरउवाच-
अतः परंप्रवक्ष्यामिषोडशाध्यायगौरवम्
आकर्णयकुरंगाक्षिहर्षोत्कंठप्रविर्षिणि १

अस्तिसौराष्ट्रिकंनाम्नापुरंगुर्जरमंडले
तत्रासीत्खड्गबाहुश्चराजाचंद्रइवापरः २
यदीयकुसुमामोदमालासुरभितोदरे
वारांनिधौहरिः स्वास्थ्यादशेतसहपद्मया ३
यदीयकीर्तिकर्पूरकणाभांतिनभोंगणे
कीर्णावैरिकृतश्वासमारुतैस्तारकाछलात् ४
यस्यासिधारातीर्थेषुस्नातावैरिपुभूभुजः
व्यावर्त्ततेदिवोऽद्यापिस्वर्गस्त्रीवाग्विमोहिताः ५
तस्यारिमर्दनोनाममदहस्तीमदोद्धुरः
मदांबुधारासलिलेगुंजद्भ्रमरमंडलः ६
कपोलफलकोत्तीर्णमदधाराजलाविलः
बभौयोनिर्झरोद्गारैरंजनाद्रिरिवाद्यकैः ७
यस्यांगेषुव्यराजंतचामराश्चंद्रिकोज्ज्वलाः
किरणाइवशीतांशोः पतिताः काननोदरे ८
सिंदूरपांसुपटलीराजत्कुंभस्थलोबभौ
यःसंध्यावारिदव्याप्तंवियत्खंडमिव स्थितम् ९
सकदाचिन्मोचयित्वा शृंखलान्निगडानपि
भंक्त्वालौहदृढस्तंभंप्रसह्यनिशिनिर्गतः १०
आधोरणगणान्सर्वान्पार्ष्णिविस्फूर्जदंकुशान्
क्रोधादवगणय्यैवनिजशालांबभंजसः ११
तीक्ष्णांकुशमुखैर्विष्वक्हन्यमानोऽपिवैणवैः
दंडैस्तुत्रासयामासुः सादिनोनमनागपि १२
ततोराजासमागत्य निशम्येदंकुतूहलम्
तत्रहस्तिकलाभिज्ञैः समंराजकुमारकैः १३
अदृश्यतसमागत्यराज्ञादंतावलोबली
मोहयन्नुद्भटाटोपोहृताट्टालिकमालिकः १४
ददृशुस्तंमहाभीमंपौरादूरतरंस्थिताः
गोपायंतः शिशून्भीत्यानिबृत्तान्यकुतूहलाः १५
रुद्धेषुतत्रमार्गेषुपलायनपरैर्जनैः
वासितेषुतदीयोग्रदानधारांबुसीकरैः १६

स्नात्वातेनाध्वनायातः सरसः कश्चनद्विजः
गीतानांषोडशाध्यायश्लोकान्कतिपयाञ्जपन् १७
निषिद्ध्यमानोबहुधापौरैराधोरणैरपि १८
अमन्यमानः करिणोभीतान्चलितवांस्ततः
फूत्कारेणसश्रावृणवञ्जनान्विपरिमर्दयन् १९
स्पृशन्दानांबुजंतस्यस्वस्तिमान्निर्गतोद्विजः
ततोमहानभूत्तत्रविस्मयोवागगोचरः २०
मानसेभूमिपालस्यपौराणामपिपश्यताम्
समाहूयततोराजाफुल्लराजीवलोचनः २१
तमापृच्छद्विजंवाहादवतीर्यप्रणम्यच २२
राजोवाच-
अलौकिकमिदंविप्रत्वयाद्याचरितंमहत्
कृतांतकल्पादेतस्मात्कथंनिर्यातवान्गजात् २३
कमर्चयसिगीर्वाणंकंमंत्रंजपसिप्रभो
काचशिद्धिस्तवास्तीतिद्विजन्मन्समुदीरय २४
द्विजउवाच
गीतायाःषोडशोध्यायः श्लोकान्कतिपयानहम्
जपामिप्रत्यहंभूपतेनैताःसर्वसिद्धयः २५
ततोविहायद्विरदंकौतूहलरसंनृपः
आजगामद्विजन्मानमादायनिजमंदिरम् २६
शुभं मुहूर्तमन्वीक्ष्यतोषयित्वाद्विजोत्तमम् २७
सुवर्णैर्लक्ष्यसंख्याकैर्गीतामंत्रमुपाददे
गीतायाःषोडशाध्यायश्लोकान्कतिपयानपि २८
समभ्यस्यततोराजासत्कारेणसकौतुकः
अथैकदाविनिर्गत्यबाह्यालद्यंसहसैनिकैः २९
तमेवामोचयद्राजामत्तमाधोरणाद्गजम्
विस्पष्टमितिवाक्यानिराज्यसौख्यममानयन् ३०
तृणवज्जीवितंराजागजस्याग्रेविशत्ततः
आदायगंडफलकंमदपंक्तिनिरंकुशम् ३१
आययौमंत्रिविश्वासान्नृपः साहसिकाग्रणीः

राहोरिवमुखादिंदुःकालास्यादिवधार्मिकः ३२
साधुः खलस्यवदनान्नृयोनिरगमद्गजात्
आगत्यनगरंराजात्वभिषिच्यकुमारकम् ३३
गीतायाः षोडशाध्यायादवापपरमांगतिम् ३४
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरंखडेगीता-
माहात्म्येनवत्यधिकशततमोऽध्यायः१९०

एकनवत्यधिकशततमोऽध्यायः

ईश्वरउवाच-
षोडशाध्यायसामर्थ्यंकथितं शृणुसांप्रतम्
स्पष्टंसप्तदशाध्यायमहिमांभोनिधिंशिवे १
खड्गबाहोः सुतस्यैवभृत्योदुःशासनोऽभवत्
तंगजंधर्तुमागत्यगजात्प्राप्तोयमक्षयम् २
तद्वासनानिबद्धात्मागजयोनिमवाप्यच
गीतासप्तदशाध्यायंश्रुत्वाप्राप्तः परंपदम् ३
देव्युवाच
दुःशासनोगजत्वंचप्राप्यमुक्तइति श्रुतम्
तदेववदकल्याणविस्तरेणममप्रभो ४
ईश्वरउवाच-
स्थितः कश्चन दुर्मेधामंडलीककुमारकैः
बहुमूल्यंपणंकृत्वागजमारूढवांस्ततः ५
गत्वाकतिपयान्येवपदानिजनवारितः
नाम्नादुःशासनोमूढः प्रौढवाक्यमुदीरयन् ६
ततोनिशम्यतद्वाक्यंक्रोधांधःसिंधुरोऽभवत्
न्यपतच्चस्खलत्पादः कंपमानकुमारकैः ७
ततोनिपतितंकिंचिदुच्छ्वसंतंगजोरुषा
ऊर्द्ध्वमुन्मूलयांचक्रेकृतांतकनिरंकुशः ८
गतासोरपिरोषेणतस्यास्थ्न्यांचगणंगजः
विकीर्णवान्पृथक्कृत्वामत्तोदंतावलस्ततः ९
ततः कालेनसंप्रेत्यगजयोनिमवापसः

महांतंकालमनयत्सिंहलद्वीपभूपतेः १०
मैत्रीगरीयसीसार्द्धंखड्गबाहुमहीभुजा
ततोऽयजलोमार्गेणप्रापितोवारुणोमतः ११
जयदेवेनखड्गबाहोः प्रीत्यानीतोमहीभुजा
जातिंस्मरन्स्वकीयांसपश्यन्बंधून्सहोदरान् १२
दुःखेनमहतास्तोकान्दिवसानत्यवाहयत्
उवासखड्गबाहोश्चगृहेतूष्णीमनिर्दिशन् १३
सकदाचित्तुसंतुष्टः समस्याश्लोकपूरणे
कस्मैचित्कवयेप्रादात्तमुपायनहस्तिनम् १४
शतेनतेनकविनारोगोपद्रबभीरुणा
मालवक्षोणिपालस्यविक्रीतश्चैत्यकुंजरः १५
कियत्यपिगतेकालेपाल्यमानोऽपियत्नतः
मुमूर्षुरभवत्तत्रकुंजरोदुर्जरज्वरः १६
नजिघ्रतिपयः शीतंनादत्तेकवलंगजः
स्वपित्यपिनसौख्येनमुंचत्यश्रूणिकेवलम्
ततोहस्तिपकाख्यातंबृत्तांतमवनीपतिः १७
आकर्ण्य ससमायातोयत्रास्तेज्वरितोगजः
सचावलोक्यभूपालंजगद्विस्मयकारिणीम् १८
वाचमूचेगजःसम्यग्विसृष्टज्वरवेदनः
राजन्नशेषशास्त्रज्ञराजनीतिपयोनिधे १९
निर्जितारातिसंघातमुरारिचरणप्रिय
किमौषधैरलंबैद्यैःकिंधानैःकिंनुजापकैः २०
गीतासप्तदशाध्यायजापकंद्विजमानय
तेनायंमामकोरोगः शाम्यत्यत्रनसंशयः २१
यथादिष्टंगजेनासौतथाचक्रेनराधिपः
ततोगजत्वमुत्सृज्यमुक्तोदुःशासनोऽभवत् २२
तेनविप्रेणाभिमंत्र्यजलेक्षिप्तेतदुत्तमे
अथदिव्यंसमारूढंविमानमवनीपतिः २३
तंदुःशासनमद्राक्षीत्पाकशासनतेजसम् २४
राजोवाच

किंजातीयः किमात्मात्वंकिंवृत्तइतिमेवद
केनवाकर्मणाजातोगजः कथमिहागतः २५
पृष्टोराज्ञाविमुक्तोऽसौविमानस्थः स्थिराक्षरम्
वृत्तंयथायदाचख्यौनिजंदुःशासनः क्रमात् २६
गीतासप्तदशाध्यायंजपन्मालवभूपतिः
नरवर्माभवन्मुक्तः कालेनाल्पीयसाततः २७

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेगीता-
माहात्म्येएकनवत्यधिकशततमोऽध्यायः १९१

द्विनवत्यधिकशततमोऽध्यायः

पावर्त्युवाच-
उक्तंसप्तदशाध्यायगौरवंभवताशिव
सत्वमष्टादशाध्यायमहिमानमुदीरय १
ईश्वरउवाच-
श्राकर्णयचिदानंदनिष्पादिनिगमोत्तरम्
पुगयमष्टादशाध्यायमाहात्म्यंगिरिनंदिनि २
समस्तशास्त्रसर्वस्वंश्रोत्रप्राप्तंरसायनम्
संसारयातनाजालविदारणपरायणम् ३
परंरहस्यंसिद्धानामविद्योन्मूलनक्षमम्
चैतन्यंकैटभारातेरग्रगगयंपरंपदम् ४
विवेकवल्लरीमूलंकामक्रोधर्मलापहम्
पुरंदरादिगीर्वाणचित्तविश्रामकारकम् ५
सनकादिमहायोगिमनोरंजनकारणम्
पाठमात्रपराभूतकालकिंकरगर्जितम् ६
अष्टोत्तरशतव्याधिमूलोन्मूलनकारकम्
नातःपरतरंकिंचिद्रहस्यंहंसगामिनि ७
उपतापत्रयहरंमहापातकनाशनम्
यथाकालेष्वहंनित्योयथापशुषुकामधुक् ८
यथाव्यासोमुनींद्रेषु व्यासेषुब्रह्मवित्तमः
यथादिवौकसांशक्रोगुरुःशक्राद्यथावरः ९

यथारसानांपीयूषमुत्तमंविश्वविश्रुतम्
तथागिरीणांकैलासोयथाचेंद्रोदिवौकसाम् १०
तीर्थानांपुष्करंतीर्थंयथापुष्पेषुपंकजम्
पतिव्रतासुनारीषुयथालोकेष्वरुंधती ११
यथामखेष्वश्वमेधोयथोद्यानेषुनंदनम्
यथारुद्रेषुसर्वेषुवीरभद्रोममानुगः १२
यथादानेषुभूदानंयथासिंधुषुगौतमी
यथालोकेहरिक्षेत्रंप्रशस्तंधर्मकर्मसु १३
तथैवाष्टादशाध्यायमाहात्म्यंभुवनोत्तरम्
तत्राख्यानमिदंपुण्यंभक्त्याकर्णयपार्वति १४
यथाकर्णनमात्रेण जंतुः पापैः प्रमुच्यते
अस्तिमेरुगिरेःशृंगेपुरीरम्यामरावती १५
पुराममविनोदायनिर्मिताविश्वकर्मणा
निरंतरंगुणयुताकोटिगीर्वाणसेविता १६
तेजः पुंजवतीसाक्षाद्ब्रह्मविद्येवविश्रुता
चिंतामणिशिलावद्धाःप्रासादायत्रकामदाः १७
जयंतिमेरुशिखरेचतुर्मुखपुरावधि
यत्रकल्पद्रुमच्छायासुखासीनापुलोमजा १८
शृणोतिश्यामलागीर्भिर्गीतंगंधर्वयोषिताम्
यत्रास्तेसबलारातिर्दैवैश्चदलितायुषाम् १९
दैत्यानांरक्तकल्लोलैःस्वर्धुनीशोणतांगता
पुरातनसुधास्वादुस्मारंस्मारंदिवौकसः २०
धयंतियत्रक्षुत्क्षामाकलांप्रत्यहमैंदवीम्
तस्यांकैवल्यकल्पायामासीत्पूर्वंशतक्रतुः २१
शचीसमन्वितः श्रीमान्सर्वगीर्वाणसेवितः
सकदाचित्सुखासीनोविष्णुदूतैरधिश्रितम् २२
सहस्रनेत्रमायांतमपश्यत्पुरुषंपरम्
ततस्तदीयतेजोभिरभिभूतः पुरंदरः २३
मणिसिंहासनात्तूर्णपतितःस्थानमंडपे
सिंहासनात्प्रयातस्यततस्तस्यहरेर्भटाः २४

गीर्वाणगणसाम्राज्यपट्टबंधंवितेनिरे
अथतस्याभिषिक्तस्यमहेंद्रस्यपुलोमजा २५
वामांकमारुरोहाशुदिव्यदुंदुंभिनिःस्वनैः
अथत्रिदिवसंगीतगीर्वाणाः प्रमदान्विताः २६
सुरानीराजयामासुर्दिव्यरत्नैः सुरस्त्रियः
ततोवैऋषयोवेदैराशीर्वादास्तदाददुः २७
रंभाद्याननृतुस्तस्यपुरस्तादप्सरोगणाः
गंधर्वाललितालापाज्ञगुर्मंगलकौतुकम् २८
एवंनूतनमिंद्रंतुजुष्टंबहुभिरुत्सवैः
विनाशतक्रतुंदृष्ट्वाशक्रोविस्मयमाययौ २९
नमयाविहितामार्गेतडागानविनिर्मिताः
नरोपितामहावृक्षाः पांथविश्रांतिकारकः ३०
नकदाचिदहोदृष्टोदेवस्त्रिपुरभैरवः
निधिवासेस्थितादेवीपूजितानमदालसा ३१
मेघंकरस्थितः शार्ङ्गधरोनैवनिरीक्षितः
नकृतंविरजेस्नानंनैवंकाशींपुरींगतः ३२
नदेववाटिकावासीदृष्टोनरहरिःस्वयम्
एरंडविष्णुर्हेरंबोनजातुपरिशीलितः ३३
रेणुकानेक्षिताजातुमातापुरनिवासिनी
नभक्त्यापूजितादेवीदानापुरनिवासिनी ३४
नभक्त्यात्रिपुरेदृष्टस्त्रिलिगस्त्र्यंबकःस्वयम्
नशार्दूलतडागस्थोवीक्षितः सोमनाथकः ३५
रेवापुरस्थितोदेवोघुसृणेशोनवीक्षितः
नागदंतपुरेख्यातोनागनाथोनवेक्षितः ३६
पर्णग्रामस्थितोदृष्टोनमहानमृतेश्वरः
नतुंगभद्रातीरस्थोदृष्टोहरिहरः स्वयम् ३७
नवेंकटाद्रिनिलयः श्रीनिवासः सुलक्षितः
कावेरीकर्णिकातीरेश्रीरंगोनैववीक्षितः ३८
दीनास्त्वनाथाः क्रोशंतः कारागारान्नमोचिताः
अन्नदानेनदौर्भिक्षेप्राणिनोनैवपूजिताः ३९

रात्रौरात्रौकृताक्वापिनिर्जले नोदकप्रभा ४०
नगौतम्यांकृतंस्नानंनदृष्टोहरिणेश्वरः
कृष्णवेरायांचनकृतंस्नानंकन्यागतेगुरौ ४१
दत्तंनोभूखंडमपिकवयोनैवपूजिताः
नतीर्थेषुकृतंसत्रंनग्रामेषुकृतामखाः ४२
पुष्करिरायोनविहितामध्येमार्गंबहूदकाः
नप्रासादाः कृताः क्वापिब्रह्मविष्णुपिनाकिनाम् ४३
नजातुचिद्भयाक्रांतारक्षिताःशरणागताः
कथमेकेनपुरायेनदेवदत्तमिहार्जितम् ४४
इतिचिंताकुलोभूत्वाहरिंप्रष्टुंपुरंदरः
ययौसरभसंखिन्नःक्षीरकूपारगह्वरम् ४५
तत्रप्रविश्यगोंविंदंकृतनिद्रंनवैस्तवैः
अकस्मान्निजसाम्राज्यभ्रंशदुःखमुवाचह ४६
इंद्रउवाच-
रमाकांतभवत्प्रीत्यैकृतंक्रतुशतंपुरा
तेनपुरायेनसंप्राप्तंमयापौरंदरंपदम् ४७
इदानींनूतनः कोऽपिजातोदिविपुरंदरः
नतेनधर्मोविहितोनतेनक्रतवः कृताः ४८
ममसिंहासनंदिव्यंकथमाक्रांतमच्युत ४९
महादेवउवाच-
इत्येवंवदतस्तस्य श्रुत्वावाचंरमापतिः
उन्मीलितस्मिताक्षोसावुवाचमधुरंवचः ५०
श्रीभगवानुवाच-
किंदानैरल्पफलदैःकिंतपोभिःकिमध्वरैः
वर्त्तमानः क्षितितलेसत्वंप्रीणितवान्पुरा ५१
इन्द्रउवाच-
भगवन्कर्मणाकेनसत्वांप्रीणितवान्द्विजः
यत्प्रीत्याभगवान्प्रादात्तस्मैपौरंदरंपदम् ५२
श्री भगवानुवाच
जपत्यष्टादशाध्यायेगीतानां श्लोकपंचकम्

यत्पुरायेनचसंप्राप्तंतवसाम्राज्यमुत्तमम् ५३
सर्वपुरायशिरोरत्नभूतेनत्वंस्थिरोभव
इतिविष्णोर्वचः श्रुत्वाज्ञातोपायंपुरंदरः ५४
विप्रवेषधरोभूत्वागतोगोदावरीतटम्
तत्रापश्यत्पुरंपुरायंकालिकाग्राममुत्तमम् ५५
यत्रकालेश्वरोदेवोवर्त्ततेकालमर्दनः
तत्रगोदावरीतीरेस्थितंपरमधार्मिकम् ५६
अपश्यत्करुणावंतंब्राह्मणंवेदपारगम्
नित्यमष्टादशाध्यायं जपंतंदांतचेतसम् ५७
ततस्तच्चरणद्वंद्वेलुठित्वापरयामुदा
सत्वमष्टादशाध्यायमपठत्तेनशिक्षितम् ५८
अथपुरायेनतेनाऽसौविष्णोःसायुज्यमाययौ
हित्वापुरंदरादीनांदेवानांपदमल्पकम् ५९
ज्ञात्वातीव मुदायुक्तोवैकुंठमगमत्पुरम्
अतएवपरंतत्वंमुनीनामिदमुत्तमम् ६०
दिव्यमष्टादशाध्यायमाहात्म्यंकथितंमया
यस्यश्रवणमात्रेणसर्वपापैःप्रमुच्यते ६१
इत्येवंगीतामाहात्म्यंकथितंपापनाशनम्
पुरायंपवित्रमायुष्यंस्वर्ग्यंस्वस्त्ययनंमहत् ६२
यःशृणोतिमहाभागेश्रद्धयासंयुतः पुमान्
सर्वयज्ञफलंप्राप्यविष्णोःसायुज्यमाप्नुयात् ६३

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायांमुत्तरखंडेसतीश्वरसंवादे गीतामाहात्म्येद्विनवत्यधिकशततमोऽध्यायः १९२

त्रिनवत्यधिकशततमोऽध्यायः

पार्वत्युवाच-
देवदेवमहादेवसर्वज्ञसकलार्थद
कृपांमयिपरांकृत्वायत्पृच्छेतद्वदस्वमे १
श्रुतंचगीतामाहात्म्यंबह्व्राश्चर्यकथायुतम्
तेनमेभक्तिरुत्पन्नाश्रोतुंकृष्णकथांपराम् २

पुराणेषुतुसर्वेषुश्रीमद्भागवतंपरम्
यत्रप्रतिपदंकृष्णोगीयतेबहुधर्षिभिः
तन्माहात्म्यंयथातत्वंसेतिहासंवदाधुना ३
ईश्वरउवाच-
नैमिषेसूतमासीनमभिवाद्यमहामतिम्
कथामृतरसास्वादकुशलःशौनकोऽब्रवीत् ४
शौनकउवाच
अज्ञानध्वांतविध्वंसिकोटिजन्माघनाशनम् ५
श्रीमद्भागवताख्यानंसूताख्याहिरसायनम्
भक्तिज्ञानविरागाढ्योविवेकोवर्द्धतेकथम् ६
माहामोहनिरासश्चवैष्णवैः क्रियतेकथम्
इहघोरेकलौप्रायोजीवश्चासुरतांगतः ७
क्लेशाक्रांतस्यतस्याथशोधनेकिंरसायनम्
श्रेयसांयद्भवेच्छ्रेयः पावनानांचपावनम् ८
कृष्णप्रीतिकरंयच्चसाधनं तद्वदाधुना
चिंतामणिंलोकसुखंसुरेंद्रास्पदसंपदम् ९
प्रयच्छतिगुरुःप्रीतोवैकुंठंचातिदुर्लभम् १०
सूतउवाच-
प्रीतोऽहतेद्विजश्रेष्ठाःकथयिष्येयथाश्रुतम्
सारात्सारतरंयच्चसंसारभयनाशनम् ११
भक्तिप्रवर्द्धकंयच्चकृष्णसंतुष्टिहेतुकम्
तन्मेकथयतःसाधोसावधानतयाशृणु १२
कालव्यालमुखालीढजगत्त्राणविधायकम्
श्रीमद्भागवतंशास्त्रंकलौकृष्णेनभाषितम् १३
एतस्मादपरंकिंचिन्मनः शुद्धिकरंनहि
जन्मांतरकृतैःपुण्यैर्लभ्यतेसाधुभिस्तुतत् १४
राज्ञः परीक्षितोमोक्षंज्ञात्वाकमलसंभवः
तोलयामासाशास्त्राणिपुराणानिमहांतिच १५
श्रीमद्भागवतंतत्रगरीयोभुवि संगतम्
श्रीमद्भागवतीवार्तासुराणामपिदुर्लभा १६

इतिसंचित्यबहुशोमुनयः साधवोऽमलाः
मेनिरेभगवद्रूपंश्रीमद्भागवतंह्नितौ १७
पठनाच्छ्रवणाद्यस्यनरोयातिहरेः पदम्
वर्षेणश्रवणंतस्यबहुसौख्यप्रदायकम् १८
मासेनभक्तिराभास्यंलभतेद्विजसत्तम
सप्ताहेनश्रुतंचैतत्सर्वथामुक्तिदायकम् १९
किंबहूक्तेनवैसाधोश्रीमद्भागवताऽमृतम्
नित्यंसद्भिःप्रपातव्यंकृष्णलीलाप्रकाशकम् २०
सनकाद्यैः पुराप्रोक्तंनारदायदयापरैः
ब्रह्मणःश्रुतपूर्वायसप्ताहश्रवणेविधिः २१
शौनकउवाच-
पितुर्लब्ध्वावरंज्ञानं श्रीमद्भागवताभिधम्
नारदोलोकतत्वज्ञः सर्वदाह्यटतेमहीम् २२
कुत्रतैः संगमोजातोनारदस्यमहात्मभिः
श्रुतोदेवर्षिणायत्रसप्ताहश्रवणेविधिः २३
सूतउवाच-
अत्रतेवर्णयिष्यामिभक्तियुक्तंकथानकम्
यत्पुराब्रह्मरातेनमह्यंप्रोक्तंदयालुना २४
एकदातुविशालायामुपविष्टमधोमुखम्
नारदंसनकाद्यास्तेददृशुर्दीनमानसम् २५
तंदृष्ट्वाचिंतयानंतुदेवर्षिर्भ्रातरं स्वकम्
पप्रच्छुर्विस्मयाविष्टामुनयस्तत्वचिंतकाः २६
कुमाराऊचुः-
किंत्वंचिंतयसेब्रह्मन्नतिदीनइवातुरः
तवेत्थंमुक्तिसंगस्यनोचितं वदकारणम् २७
नारदउवाच-
अहंपृथ्व्यां समायातोज्ञात्वासर्वोत्तमोत्तमाम्
तीर्थैर्नानाविधैर्युक्तांपुरायदैः पुरायरूपिणीम् २८
पुष्करेच प्रयागेचकाश्यांगोदावरीतटे
हरिक्षेत्रेकुरुक्षेत्रेश्रीरंगेसेतुबंधने २९

एतेष्वन्येषुतीर्थेषुभ्रममाणइतस्ततः
नापश्यंकुत्रचिच्छर्ममनः संतोषकारकम् ३०
कलिनाधर्ममित्रेण धरेयंबाधिताऽधुना
सत्यंशौचंदयादानंनास्तिकुत्रापिभूतले ३१
उदरंभरिणोलोकावराकाःकूटसाक्षिणः
मंदाःसुमंदमतयोमहापाखंडसंश्रयाः ३२
स्त्रीप्रधानगृहस्थाश्चवर्णिनोव्रतवर्जिताः
वानप्रस्थाःपुरावासान्यासिनोभोगतत्परा ३३
कन्याविक्रयिणोलोभात्कृषिकर्मपरायणाः
भ्रष्टाचारादंभिनश्चस्वेच्छाचारनिदर्शिनः ३४
आश्रमायवनैरुद्धास्तीर्थानिसरितोह्रदाः
देवतायतनान्यत्रदुष्टैरुच्छेदितानि च ३५
योगीसिद्धोऽथवाज्ञानीसत्क्रियोऽत्रनदृश्यते
कलिदावानलेनाद्यसाधनंभस्मतांगतम् ३६
अट्टशूलाजनपदाः शिवशूलाद्विजातयः
कामिन्यःकेशशूलिन्योदृश्यंतेभुविसर्वतः ३७
एकदाहमनुप्राप्तोयमुनायास्तटंशुभम्
दृष्टंवृंदावनंतत्रयत्रलीलाहरेरभूत् ३८
तत्रयच्चाद्भुतंदृष्टंश्रूयतांतन्मुनीश्वराः
एकातुतरुणीतत्रनिषण्णाखिन्नमानसा ३९
द्वौवृद्धौपतितौपार्श्वेनिःश्वसंतावचेतनौ
शुश्रूषंतीप्रबोधंतीरुदतीचतयोः पुरः ४०
दृष्टादिशोनिरीक्षंतीरक्षितारमिवात्मनः
वीज्यमानाबहुस्त्रीभिर्बोध्यमानामुहुर्महुः ४१
दृष्ट्वादूराद्गतश्चाऽहकौतुकेनतदंतिकम्
मांदृष्ट्वोत्थायसाबालावचनं चेदमब्रवीत् ४२
बालोवाच-
भोसाधोऽत्रक्षणंतिष्ठमम चिंतामपाकरु
पुंसांचदर्शनंभद्रसर्वाघौघनिवारणम्
पुण्येनप्राक्तनेनैवदर्शनंतवाजायते ४३

अतोमेमानसंदुःखंच्छेत्तुमहंसिमानद
नारदउ०
एवमुक्तस्तयाचाहंकृपयास्निग्धमानसः
अपृच्छंतांवरारोहांकौतुकेनसमाकुलः ४४
कात्वमेतौचकौभद्रेकाश्चेमाः पद्मलोचनाः
आख्याहिमत्पुरः सर्वंतवदुःखस्यकारणम् ४५
इति पृष्टामयासातुबालादुःखितमानसा
प्रोवाचनिखिलंदुःखमात्मनोदुःखकारणम् ४६
बालोवाच–
अहंभक्तिरितिख्याताएतौ मेतनयौवरौ
ज्ञानवैराग्यनामानौकालयोगेनजर्जरौ ४७
गंगाद्याः सरितश्चेमाममसेवार्थमागताः
एताभिः सेवितानित्यंसत्कारेणापिनारद ४८
नचश्रेयोलभेकिंचित्क्षीणाऽहसर्वतोमुने
ममपूर्वंतुवृत्तांतंशृंणुब्राह्मणसत्तम ४९
येनाऽहदुःखिताजातानलभेशर्मकुत्रचित्
उत्पन्नाद्रविडेचाहंकर्णाटेवृद्धिमागता ५०
स्थिताकिंचिन्महाराष्ट्रेगुर्जरेजीर्णतांगता
तत्रघोरकलेर्योगात्पाखंडैः खंडितांगका ५१
दुर्बलाहंचिरं जातापुत्राभ्यांसहमंदताम् ५२
वृंदावनमिदंप्राप्तादैवयोगेननारद
जाताहंतुपुनर्बालानवीनेवसुरूपिणी ५३
इमौतुशयितावत्रसुतौमेक्लिष्टमानसौ
अतिवृद्धौपरित्यज्यगंतुंनाहंक्षमाधुना ५४
अहंबालाकथं जातासुतौमेजरठौकुतः
त्रयाणामेकभावानांवैपरीत्यंकुतोऽभवत् ५५
घटतेजरठामाताबालकौतनयाविति
अतः शोचामिचात्मानंविस्मयाविष्टमानसा ५६
यदित्वंवेत्सिधर्मज्ञकृपालोदीनपालक
वदसर्वंयथातत्वंकारणंचात्रयद्भवेत् ५७

एवं पृष्टस्तयाचाहंद्मणंचैवविमृश्यतु
अवोचंभक्तिमाभाष्यक्लिष्टांकालेनभूयसा ५८
ज्ञानेनाहंप्रपश्यामि वृत्तंसर्वंतवानघे
माविषादंकुरुप्राज्ञेहरिःशंतेकरिष्यति ५९
सर्वसत्वहरोबालेयुगोऽयदारुणः कलि
लुप्तोऽनेनसदाऽचारोयोगमार्गस्तपांसिच ६०
जनाश्चाघा द्यिा सुरायंतेशाठय्दुष्कृतकारिणः
संतोह्यस्मिन्सुदुःखार्ताअसंतोहृष्टमानसाः ६१
दृश्यतेधीरचित्तस्तुपंडितोऽपिनकोऽपिच
अस्पृश्य नवलोक्येयंदुष्टभाराकुलाधरा ६२
अन्वब्दंक्रमतोजातोमंगलंहीयतेऽन्वहम्
नत्वांतवसुतौचेमौकोऽपिपश्यति भामिनि ६३
यूयंतुरागबहुलैस्त्यक्ताजर्जरतांगताः
वृंदावनस्यसंयोगाद्बालात्वमभवः पुनः ६४
धन्यंवृंदावनंचेदंभक्तिर्यत्राभवन्नवा
अत्रेमौग्राहकाभावान्नवीनत्वंनचागतौ ६५
किंचिदात्मसुखेनेहप्रसुप्तावितिलद्द्यते
भक्तिरुवाच-
कथंपरिद्मिताराज्ञास्थापितोद्यशुचिःकलि
दयापरेणहरिणाह्यधर्मः किमुपेद्मितः ६६
एनंमेसंशयंछिधित्वद्वाचासुखितास्म्यहम्
तस्यावचः समाकर्णर्यभूयोऽहमवदंद्विजाः ६७
यदिपृष्टस्त्वयावालेप्रेमतः श्रवणंकुरु
यदामुकुंदोभगवान्द्मांत्यक्त्वास्वपदंगतः ६८
कलिस्तद्दिनमारभ्यप्रवृत्तः सत्यबाधकः
दृष्टोदिग्विजयेराज्ञादीनवच्छरणंगतः ६९
नहतोऽस्यगुणद्रष्टासर्वसाधारणंत्विदम्
यत्फलंतपसानैतिनयोगेनसमाधिना ७०
तत्फलंलभतेधीमान्कलौकेशवकीर्तनात्
एतादृशंकलिदृष्ट्वासारात्सारफलप्रदम् ७१

विष्णुरातःस्थापितवान्कलिजानांहितायच
कुकर्माचरणात्सारःसर्वतोनिर्गतोऽधुना ७२
पदार्थाःसंस्थिताभूमौबीजहीनास्तुषायथा
विप्रैर्भागवतीवार्त्तागेहेगेहेजनेजने ७३
कारिताधनलोभेनकथासारस्ततोगतः
अत्युग्रभूरिकर्माणोनास्तिकादांभिकाजनाः ७४
तिष्ठंतिसर्वतीर्थेषुतीर्थसारस्ततोगतः
कामक्रोधमहालोभतृष्णाव्याकुलचेतसः ७५
समारंभंतेकर्माणिकर्मसारस्ततोगतः
मनसश्चाजयाल्लोभाद्दंभात्पाखंडसंश्रयात् ७६
शास्त्रानभ्यसनाच्चैवध्यानयोगफलंगतम्
पंडितास्तेकलत्रेषुरमंतेमहिषाइव ७७
पुत्रोत्पादनदक्षाश्चनदक्षामुक्तिसाधने
नहिवैष्णवताकुत्रसंप्रदायपुरःसराः ७८
देवनिंदापराः सर्वेसाधुनिंदापरायणाः
अयंतुयुगधर्मोऽस्तिदीयतेकस्यदूषणम् ७९
अतस्त्वंपुंडरीकाक्षंस्मृत्वासौख्यमवाप्स्यसि ८०
एवंमयोक्तंवचनंश्रुत्वासाविस्मयंगता
उवाचवचनंभूयोमांप्रशस्यद्विजोत्तमाः ८१
भक्तिरुवाच-
देवर्षेत्वंतुधन्योऽसिमद्भाग्येनसमागतः
साधूनांदर्शनंलोकेसर्वसिद्धिप्रदायकम् ८२
सुखोपायोयथामेस्यात्तथादिशमुनेऽधुना
सर्वज्ञस्यतवब्रह्मन्नसाध्यंकिमपीहवै ८३
अजयदजितमायांयस्यकायाधवस्तेवचनरचनमेकंकेवलंचाकलय्य
ध्रुवपदमुपयातोयत्कृपातोध्रुवोवैतमहमरणभूतंब्रह्मपुत्रंनतास्मि ८४
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेभागवतमा-
हात्म्येत्रिनवत्यधिकशततमोऽध्यायः १९३

चतुर्नवत्यधिकशततमोऽध्यायः

सूतउवाच-
एवंसंप्रार्थितोविप्रास्तयाभक्त्यातिदीनया
यतश्चाकथयंतद्वैतच्छृणुध्वंदयालवः १
नारदउवाच-
माखिदस्त्वंवृथाबालेसमाधायमनोहृदि
श्रीकृष्णचरणांभोजंस्मरसौख्यंलभिष्यसि २
द्रौपदीचपरित्रातायेनकौरवकश्मलात्
पालितागोपसुंदर्यः सकृष्णः क्वापिनोगतः ३
त्वंतुभक्तिः प्रियातस्यसततंप्राणतोऽधिका
त्वयाहूतस्तुभगवान्यातिनीचगृहेष्वपि ४
सत्यादित्रियुगेबोधोविरागोमुक्तिसाधकौ
कलौतुकेवलाभक्तिर्ब्रह्मसायुज्यकारिणी ५
इतिनिश्चित्यविद्रूपीस्वकांगात्त्वांससर्जह
परमानंदचिन्मूर्तिःस्वप्रियांप्रीतमानसः ६
बध्वांजलित्वयापृष्टःकिंकरोमीतिवै हरिः
त्वांतदाज्ञापयत्कृष्णोमद्भक्तान्पोषयेतिच ७
अंगीकृतंत्वयातद्वैप्रसन्नोऽभूद्धरिस्तदा
मुक्तिदासींददौतुभ्यंज्ञानवैराग्यआत्मजौ ८
भक्तानांपोषणंनित्यंवैकुंठस्थाकरोषिच
भूमौचभक्तपोषायछायारूपंसमाश्रिता ९
विमुक्तिज्ञानवैराग्यैःसहचैवागतात्रहि
कृतादिद्वापरांतेहिकालेमुक्तिमुदास्थिता १०
कलौतुसंक्षयंप्राप्तापाषंडामयपीडिता
त्वदाज्ञयागताशीघ्रंवैकुंठेपुनरेवसा
स्मृतमात्रात्वयाद्यापिमुक्तिरायातिसत्वरम् ११
पुत्रीकृत्यत्वयैमौचस्वपार्श्वेपरिरक्षितौ
उपेक्षातः कलौमंदौवृद्धौजातौसुतौतव १२
तथापिचिंतांमुंचत्वमुपायंचिंतयाम्यहम्
कलिनासदृशःकोऽपियुगोनास्तिवरानने १३

तस्मिंस्त्वांख्यापयिष्यामिगेहेगेहेजनेजने
अन्यधर्मास्तिरस्कृत्यपुरस्कृत्यमहोत्सवान् १४
यदिप्रवर्त्तयेनत्वांतदादासोहरेर्नहि
त्वदन्विताश्चयेजीवाभविष्यंतिकलाविह १५
पापिनोऽपिगमिष्यंतिनिर्भयाहरिमंदिरम्
येषांचित्तेभवेद्भक्तिः सर्वदाप्रेमरूपिणी १६
नतेपश्यंतिकीनाशंस्वप्नेऽप्यमलमूर्त्तयः
नप्रेतोनपिशाचोवाराक्षसोवासुरोपिच १७
भक्तियुक्तमनस्कानांस्पर्शनेदर्शनेप्रभुः
नतपोभिर्नवेदैश्चनज्ञानेनापिकर्मणा १८
हरिर्हिसाध्यतेभक्त्याप्रमाणंतत्रगोपिकाः
नृणांजन्मसहस्रेणभक्तिः सुकृतिनांभवेत् १९
कलौभक्तिः कलौभक्तिर्भक्त्याकृष्णःपुरःस्थितः
भक्तिद्रोहकरायेचतेसीदंतिजगत्त्रये २०
दुर्वासादुःखमापन्नःपुराभक्तिविनिंदकः
अलं वृत्तैरलंतीर्थैरलंयोगैरलंमखैः २१
अलंज्ञानकथालापैर्भक्तिरेकैवमुक्तिदा
एवमुक्तंमयासातुस्वमाहात्म्यंनिशम्यवै २२
सर्वांगहर्षसंयुक्तामांपुनर्वाक्यमब्रवीत्
अहोनारदधन्योऽसिप्रीतिस्तेमयिनिश्चला २३
नकदाचिन्विमुंचामिचित्तंतेमयिसंगतम्
कृपालुनात्वयासाधोमद्बाधाध्वंसतिताक्षणात् २४
पुत्रयोश्चेतनानास्तिममेमौप्रतिबोधय
तस्यास्तद्वचनंश्रुत्वाकारुरायेनान्वितोह्यहम् २५
तयोःप्रबोधनं कर्तुंप्रवृत्तःपाणिनास्पृशन्
मुखंसंसृज्यकर्णांतिशब्दमुच्चैः समुच्चरन् २६
ज्ञानप्रबुद्ध्यतांशीघ्रंवैराग्यप्रतिबुध्यताम्
वेदवेदांतघोषैश्चगीता पाठैर्मुहुर्मुहुः २७
बोध्यमानौतदातेनकथंचिद्बोधमागतौ
नेत्रैरनवलोकंतौजृंभंतौसालसावुभौ २८

बकवत्पलितौप्रायः शुष्ककाष्ठसमांगकौ
क्षुत्क्षामौतौनिरीक्ष्यैवपुनः स्वापमुपागतौ २९
तदाचिंतापरोऽभूवंकिंविधेयंमयेतिच
अहोनिद्राकथंयातिवृद्धत्वंचानयोः परम् ३०
चिंतयन्नितगोविंदंस्मरन्नासंद्विजोत्तमाः
व्योमवाणीतदैवाभून्माऋृषेखिद्यतामिति ३१
उद्यमस्सफलस्तेतुभविष्यतिनसंशयः
एतदर्थंतुसत्कर्मसुरर्षेत्वंसमाचर ३२
तत्कर्मतेऽभिधास्यंतिसाधवः साधुभूषणाः
सत्कर्मणिकृतेतस्मिन्स्वपनंबृद्धतानयोः ३३
गमिष्यतिक्षणाद्भक्तिः सर्वतःप्रसरिष्यति
इत्याकाशवचः स्पष्टंनिशम्यापिमयाद्विजाः ३४
नज्ञातंयन्नभोवाण्यागोप्यत्वेननिरूपितं
किंतत्कर्मचयेनैतौभवतोज्ञानसंयुतौ ३५
क्वभविष्यंतिते संतः कथंवक्ष्यंतिकर्मसत्
मयात्रकिंप्रकर्त्तव्यंयदुक्तंव्योमभाषया ३६
अथतौतत्रसंस्थाप्यनिर्गतोऽहबहिर्द्विजाः
वृंदारण्यादपृच्छंचयत्रतत्रद्विजोत्तमान् ३७
वृत्तांतंसर्वएवाथ श्रुत्वाविस्मितमानसाः
नैवोत्तरंप्रयच्छंतिह्यनभिज्ञानभोगिरः ३८
असाध्यंकेचनप्रोचुराविज्ञेयमथापरे
मूकीबभूवुरन्येतुचिंतयानाः पुनः पुनः ३९
वेदवेदांतघोषैश्चगीतापाठैर्मुहुर्मुहुः
बोध्यमानंत्रिकंतत्तुनोदतिष्ठदहोविधिः ४०
योगिनानारदेनापिस्वयंनज्ञायतेतुयत्
तत्कथंशक्यते कर्तुमितरैरिहमानुषैः
ततश्चिंतातुरश्चाहंबदरीवनमागतः ४१
तपश्चरामिचात्रैवतदर्थंकृतनिश्चयः
तावद्ददर्शपुरतः सनकाद्यान्मुनीश्वरान्
कोटिसूर्यसमाभासानुवाचमुनिसत्तमान् ४२

इदानींभूरिभागेनभवतांदर्शनंह्यभूत्
तदुपायंमहाभागावदंतुप्रीतमानसाः ४३
भवंतोयोगिनांश्रेष्ठाबुद्धिमंतोबहुश्रुताः
कुमाराएवपंचाब्दाः पूर्वेषामपिपूर्वजाः ४४
सदावैकुंठनिलयाहरिकीर्त्तनतत्पराः
लीलामृतकथोन्मत्ताहरिस्मरणतत्पराः ४५
अतोहिकालदुहितायुष्मान्नैवप्रबाधते
येषांभ्रूभंगमात्रेणद्वारपालौहरेः पुरा ४६
दैत्यौभुत्वात्रिजन्मानिपुनस्तत्स्थानमास्थितौ
अशरीरगिरोक्तंयत्किंतत्साधनमुच्यताम् ४७
अनुष्ठेयंयथायत्रप्रब्रुवंतुकृपालवः
भक्तिज्ञानविरागाणांसुखमुत्पद्यतेयथा
ख्यातिर्वःसर्बलोकेषुतथासाधूच्यतांबुधाः ४८
कुमाराऊचुः–
माचिंतांकुरुदेवर्षेस्वचित्तेहर्षमावह
उपायः सुखासाध्योऽत्रविद्यतेविश्वसौख्यदः ४९
अहोनारदधन्योऽसिविरक्तानांशिरोमणिः
श्रीकृष्णप्रेमपात्राणामग्रणीर्वदतांबरः ५०
त्वयिचित्रंनदेवर्षेभक्तिसाधनतत्परे
उचितंकृष्णदासानांभक्तेः संचारणंभुवि ५१
ऋषिभिर्बहुधालोकेउपायाःसिद्धयेकृताः
श्रमसाध्याश्चतेसर्वेप्रायःस्वर्गफलप्रदाः ५२
वैकुंठसाधकः पंथागुप्तोलोकेषुवर्त्तते
तस्योपदेशकः साधुःप्रायोभाग्येनलभ्यते ५३
यत्तेसत्कर्मनिर्दिष्टंव्योमवाचामुनीश्वर
तज्ज्ञेयमिहसर्वज्ञैर्ज्ञानयज्ञःपुरातनैः ५४
श्रीमद्भागवतालापोज्ञानयज्ञःशुकोदितः
भक्तिज्ञानविरागाणांसुखदः प्रतिभातिनः ५५
कलिदोषाइमेसर्वेश्रीमद्भागवतध्वनेः
प्रभीताःप्रलयायंतेसंहशब्दाद्वृकाइव ५६

ज्ञानवैराग्यसंयुक्ताभक्तिःप्रेमरसावहा
प्रतिगेहंप्रतिजनंसुखक्रीडांकरिष्यति ५७
सूतउवाच-
कुमारोक्तंसमाकर्ण्यनारदःप्रीतमानसः
पुनःप्रोवाचभगवांस्तदुत्कर्षंविभावयन् ५८
नारदउवाच-
वेदवेदांतघोषैश्चगीतापाठैः प्रबोधितम्
नोदतिष्ठत्त्रिकंतत्तुकलिदोषतिरस्कृतम् ५९
कथंभागवतालापात्तद्विबोधमिहैष्यति
छिंदंतुसंशयंह्येनंभवंतोऽमोघदर्शनाः ६०
विलंबोनात्रकर्त्तव्यः शरणागतवत्सलाः
ततस्तेसनकाद्यास्तुविरक्तह्यूर्द्धर्वरेतसः ६१
सिद्धाःसनातनाबिप्रानारदंप्रोचुरादरात् ६२
कुमाराऊचुः
वेदोपनिषदांसाराज्जाता भागवतीकथा
अत्युत्तमाततोभातिपृथग्भूताफलोन्नतिः ६३
आमूलाग्रंरसोस्त्येवरसालस्ययथाफले
पृथग्भूतंतुपानेनयथाविश्वमनोहरः ६४
यथादुग्धेस्थितंसर्पिर्नचस्वादूपकल्प्यते
पृथग्भूतंतुतद्दिव्यंदेवानांप्रीतिबर्द्धनम् ६५
इक्षुष्विवादिमध्यांतंशर्कराव्याप्यतिष्ठति
पृथग्भूतातुसामिष्टातथाभागवतीकथा ६६
श्रीमद्भागवतंनामपुराणंरसमेवहि
भक्तिज्ञानविरागाणांसौख्यायस्वप्रकाशितम् ६७
कृष्णेनब्रह्मणेनाभिकंजस्थायहृदैवहि
तच्चतुःश्लोकमखिलंब्रह्मैवप्रतिभासते ६८
तुभ्यंचब्रह्मणाप्रोक्तंतच्चरित्रनिदर्शनम्
त्वयापिव्यासदेवायप्रोक्तंतत्तापहानये ६९
यदीयस्मरणात्सद्योनिर्विण्णोबादरायणः
चकारमहदाख्यातुमात्माराममनोहरम् ७०

अत्रतेविस्मयः केनयेनपृच्छेःपुनः पुनः
श्रीमद्भागवतं शास्त्रंक्षमंकृष्णानुकर्षणे ७१
सूतउवाच-
एतन्निशम्यवचनंसमुदाहृतंतुयोगीश्वरैःसनकमुख्यतमैरभीष्टम्
भक्त्याविधृत्यचरणंचप्रणम्यमूर्ध्नाहृष्टोजगादजगदाधिनिवर्त्तकांस्तान् ७२
नारदउवाच-
संदर्शनंचभवतांविनिहंत्यघौघं श्रेयस्तनोतिभवदुःखदवार्दितानाम्
निःशेषशेषमुखगीतकथैकपानात्प्रेमप्रकाशनकृतेशरणंगतोवः ७३
पुण्योदयेनबहुजन्मसमर्जितेनसत्संगमोयदिभवेत्कृतिनोजनस्य
अज्ञानहेतुकृतमोहमहांधकारोनश्येत्तदाह्युदयमेतिमहान्विवेकः ७४

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्रयांसंहितायामुत्तरखंडे
श्रीभागवतमाहात्म्येचतुर्नवत्यधिकशततमोऽध्यायः १९४

पञ्चनवत्यधिकशततमोऽध्यायः

सूतउवाच-
अथदेवऋषिस्तत्रकुमारानन्नुमान्यच
उवाचप्रणतोवाक्यंज्ञानयज्ञकृतादरः १
नारदउवाच-
ज्ञानयज्ञंकरिष्यामिशुकशास्त्रकथोज्वलम्
भक्तिज्ञानविरागाणांस्थापनार्थेप्रयत्नतः २
यत्रकार्योमयायज्ञः स्थानंतत्कथ्यतांद्विजाः
चत्वारोयज्ञवाहाश्चयूयमेववृतामया ३
कियद्भिर्दिवसैः श्राव्याश्रीमद्भागवतीकथा
कोविधिस्तत्रकर्तव्योज्ञानयज्ञविशारदाः ४
कुमाराऊचुः
शृणुनारदवक्ष्यामस्तुभ्यंयत्रकथानृणाम्
शृण्वतांपापराशिघ्नोभवेत्पुण्यविबर्द्धिनी ५
गंगाद्वारसमीपेतुकामदाख्यंपुरंमहत् ६
स्वर्णद्याश्चोत्तरे पुण्येतटमानंदनामकम्
नानाऋषिगणैर्जुष्टंदेवसिद्धनिषेवितम् ७

नानातरुलताकीर्णंस्वच्छकोमलवालुकम्
रम्यमेकांतदेशस्थंस्वर्णपंकजशोभितम् ८
यत्समीपस्थजीवानांक्षेत्रस्यैवप्रभावतः
मिथःसंस्निग्धचित्तानां वैरंचेतसिनस्थितम् ९
ज्ञानयज्ञस्त्वयातत्रकर्त्तव्योहिप्रयत्नतः
अपूर्वरसदात्रीचकथातत्रभविष्यति १०
वृंदावनप्रतोलिस्थंजराजीर्णकलेवरम्
सुतद्वयंपुरस्कृत्यभक्तिस्तत्रागमिष्यति ११
यत्रभागवती वार्ताभक्तिस्तत्रसहात्मजा
कृष्णकीर्तिसुधांपीत्वातरुणीवाभविष्यति १२
सूत उवाच-
एवमुक्त्वाकुमारास्तेनारदेनसमंततः
गंगाद्वारेसमाजग्मुर्ज्ञानयज्ञायसत्वराः १३
यदाप्राप्तास्तटंतेतुगंगायाभार्गवर्षभ
तदाकोलाहलश्चासीद्भूर्लोकादिकसप्तसु १४
श्रीमद्भागवतास्वादलंपटासाप्तलौकिकाः
धावंधावंसमाजग्मुःप्राचीनावैष्णवाश्चये १५
भृगुर्वसिष्ठश्च्यवनश्चगौतमोमेधातिथिर्देबलदेवरातौ
रामस्तथागाधिजशाकलौचमृकंडपुत्रात्रिजपिप्पलादाः १६
योगेश्वरौव्यासपराशरौचशुकादयोभागवतप्रधानाः
शिष्यैरुपेताबहुशास्त्रविज्ञाःकृष्णामृतास्वाद कृतौप्रधानाः १७
वेदांतानिचवेदाश्चमंत्रास्तंत्राणिसंहिताः
दशसप्तपुराणानिषट्शास्त्राणितथाययुः १८
गंगाद्याःसरितस्तत्रपुष्करादिसरांसिच
क्षेत्राणिचदिशःसर्वादंडकादिवनानिच १९
हिमादयोनगास्तत्रदेवगंधर्वकिन्नराः
द्वीपाःसमुद्रादिक्पालाः पातालस्थास्तथाययुः २०
दीक्षायांनारदेनाथदत्तमासनमुत्तमम्
कुमारावंदितासर्वेनिषेदुः कृष्णतत्पराः२१
वैष्णवाः सुविरक्ताश्चन्यासिनोब्रह्मचारिणः

मुख्याह्यग्रेस्थिता स्तेषांपुरतोनारदः स्थितः २२
वामभागेमुनिगणादक्षिणेचदिवौकसः
वेदोपनिषदोऽन्यत्रतीर्थानिचभृगूद्वह २३
जयशब्दोनमः शब्दःशंखशब्दस्तथैवच
बभूवाकाशसंस्पर्शीघोषयन्विदिशोदश २४
विमानानिसमारुह्यप्रहृष्टानाकवासिनः
कल्पवृक्षप्रसूनैश्चतांसभांसमवाकिरन् २५
सूतउवाच–
एवंतेषुनिविष्टेषुभृग्वादिषुयथार्हतः
श्रीभागवतमाहात्म्यमूचिरेनारदायते २६
कुमाराऊचुः
शृणुनारदवक्ष्यामोमहिमानंमहाद्भुतम्
श्रीमद्भागवताख्यस्यशास्त्रस्यविधिपूर्वकम् २७
सदानरैः सुकृतिभिःसेव्याभागवतीकथा
यस्याःश्रवणमात्रेणकृतार्थत्वंप्रयांतिते २८
ग्रंथोऽष्टादशसाहस्रोद्वादशस्कंधसंयुतः
परीक्षिच्छुकसंवादः श्रीमद्भागवताभिधः २९
तावत्संसारचक्रेस्मिन्भ्रमत्यज्ञानमोहितः
यावत्कर्णगतंनोस्याच्छुकशास्त्रंजनस्यच ३०
किंश्रुतैर्बहुभिः शास्त्रैःपुराणैःसंहितागमैः
यदिभागवतंपुंभिर्नश्रुतंभक्तिभावनैः ३१
कथाभागवतस्यापिनित्यंभवतियद्गृहे
तद्गृहंतीर्थरूपंहिनृणांपापविनाशनम् ३२
अश्वमेधसहस्राणिराजसूयशतानिच
भागवत्याः कथायाश्चकलांनार्हंतिषोडशीम् ३३
तावत्पापानितिष्ठंतिदेहेऽस्मिन्मुनिपुंगव
यावन्नश्रूयतेसम्यक्श्रीमद्भागवतंनरैः ३४
नगंगानगयाकाशीप्रतिष्ठानंनपुष्करः
कथायाभागवत्याश्चसमापुण्यफलेनच ३५
श्लोकार्द्धंश्लोकपादंवानित्यंभागवतोद्भवम्

पठस्वस्वमुखेनापियदीच्छसिभवक्षयम् ३६
वेदादिर्वेदमाताचपौरुषंसूक्तमेवच
त्रयीभागवतंचैवद्वादशाष्टाक्षरौमनू ३७
द्वादशात्माप्रयागश्चकालः संवत्सरात्मकः
ब्राह्मणश्चाग्निहोत्रंचसुरभिर्द्वादशीतिथिः ३८
तुलसीचवसंतर्तुः पुरुषोत्तमएवच
एतेषांवस्तुतोनास्तिपृथग्भावोमुनीश्वर ३९
यश्चभागवतंशास्त्रंव्याकुर्यादन्वहंद्विज
जन्मकोटिकृतंपापंतस्यनश्यतिनारद ४०
श्रुतंचपठितंध्यातं श्रीमद्भागवतंनृभिः
ददातिमुक्तिंभक्तिंवातुलस्यग्न्योश्चसेवनम् ४१
अंतकालेतुसंप्राप्तेभयंत्यक्त्वासुदूरतः
श्रीमद्भागवतंभक्तयाशृणुयाद्यःसमुक्तिभाक् ४२
प्रौष्ठपद्यांचराकायांहेमसिंहसमन्वितम्
अलंकृत्यद्विजाग्र्यायश्रीमद्भागवतंददेत् ४३
भक्तियुक्तोविमानश्चमिताशीचजितेंद्रियः
श्रुत्वादितःसकृष्णस्यसायुज्यंलोकमाप्नुयात् ४४
आजन्ममात्रमपियेनशठेनचित्तंसम्यङिनयम्यभुविकृष्णकथानपीता
चांडालवच्चपशुवद्वततेननीतंमिथ्यास्वजन्मजननीभृशमर्दिताच ४५
यैर्नश्रुतंभागवतंपुराणमाराधितोनोपुरुषः पुराणः
मुखेहुतंनैवधरामराणांतेषांवृथाजन्मगतंनराणाम् ४६
चित्तंनयस्यतुनरस्यहरेःकथायांसंप्रीयतेदुरितदुष्टमसत्प्रसंगात्
धिक्तंनरंपशुसमंभुविभारभूतमेवंवदंतिमुनयःकिलपूर्वसिद्धाः ४७
दुर्ल्लभैवकथालोकेश्रीमद्भागवतोद्भवा
कोटिजन्मसमुत्थेनपुण्येनैवतुलभ्यते ४८
तेनयोगनिधेसाधोश्रोतव्यासात्वतीकथा
प्रत्यहंनियमोनास्तिदिनानांवस्तुतोद्विज ४९
सत्येनब्रह्मचर्येणयतोऽस्यश्रवणंमतम्
ततः कलौविशेषोहिविधिःसप्तदिनात्मकः ५०
मनसश्चाजयाद्रोगात्पुंसांचैवायुषःक्षयात्

कलेर्दोषबहुत्वाच्चसप्ताहश्रवणंमतम् ५१
मनसोनिग्रहश्चैवनियमाचरणंतथा
कर्तुंसप्तदिनंशक्यंततोनियमकल्पना ५२
श्रद्धयाश्रवणेनित्यमाद्यंतावधियत्फलम्
तत्फलंशुकदेवेनसप्ताहश्रवणेकृतम् ५३
यत्फलंनास्तितपसानयोगेनसमाधिना
अनायासेनतत्सर्वंसप्ताहश्रवणाल्लभेत् ५४
यज्ञाद्व्रताच्चतपसोध्यानाज्ज्ञानाच्चतीर्थतः
श्रीभागवतसप्ताहनियमोह्युत्तमोमतः ५५
यदाकृष्णोभुवंत्यक्त्वास्वपदंगंतुमुद्यतः
तदाज्ञायोद्धवोधीमान्गोविंदंवाक्यमब्रवीत् ५६
उद्धवउवाच-
भगवन्भवतासर्वंदेवकार्यंप्रसाधितम्
अधुनागंतुमिछुस्त्वंस्वंपदंतमसः परम् ५७
अतश्चिंता ममोत्पन्नात्वद्वियोगभियाबिभो
तामपाकुरुदेवेशत्वामहंशरणंगतः ५८
आगतोऽयकलिर्घोरोऽत्रसर्वेऽपिजनाःखलाः
भविष्यंतिततोनाथकिंविधेयंतदादिश ५९
इयंभारवतीभूमिःशरणंकिंप्रयास्यति
त्वदन्योदृश्यतेनात्रत्रातास्यायदुनंदन ६०
अतोऽस्मासुदयांकृत्वातिष्ठात्रैवदयानिधे
साधूनांरक्षणायैवत्वमाविरभवः प्रभो ६१
निर्गुणोऽपिनिराकारः सच्चिदानंदविग्रहः
त्वद्वियोगेनतेभक्ताः कथंस्थास्यंतिभूतले ६२
निर्गुणोपासनेकष्टमतोऽस्मद्धितमाचर
सूतउवाच-
इत्युद्धववचःश्रुत्वाचिंतयित्वाक्षणंहरिः ६३
ददौभागवतंतस्मैकृपयापरयायुतः
निजंतेजः समाधायश्रीमद्भागवतेद्विज ६४
दत्वोद्धवायभगवान्स्वकीयंपदमाविशत्

तेनेयंवाङ्महीमूर्तिर्वर्त्ततेश्रीहरेरिह ६५
सेवनात्सततंचास्याः पापंनश्येन्नृणांक्षणात्
सप्ताहश्रवणंतेनकथितंसर्वतोऽधिकम् ६६
श्रोतावक्तापृच्छकश्चयांतितन्मयतांद्विज
दुःखदारिद्र्यदौर्भाग्यपापप्रक्षालनायच ६७
कामक्रोधजयार्थंचकलौभागवतंक्षमम्
अन्यथावैष्णवीमायादेवानामपिदुर्जया
कथंनिवर्ततेपुंसांश्रीमद्भागवतंविना ६८
सूतउवाच-
इत्येवमुक्त्वामाहात्म्यंश्रीमद्भागवतस्यते
कथांभागवतींदिव्यांप्रवक्तुमुपचक्रमुः ६९
वेदोपनिषदांसारेश्रीमद्भागवतेद्विजैः
आरभ्यमाणेतत्रैव भक्तिराविरभूत्क्षणात् ७०
प्रेमान्विताचारुतनुर्मुदान्वितौसुतौगृहीत्वातरुणौस्वदोर्भ्याम्
श्रीकृष्णगोविंदहरेमुरारेनाथेतिनामानिमुहुर्वदंती ७१
तामागतांभागवतार्थभूषांसुचारुवेषांददृशुःसदयाः
व्यतर्कयंश्चापिकथंकुतासौकास्तीतिसर्वेऽपिसुविस्मिताक्षाः ७२
ततः कुमाराजगदुःकृतार्थाकथार्थतोनिष्पतिताधुनेयम्
एवंगिरः साससुतानिशम्यजगादनम्राब्जभुवः कुमारात् ७३
भक्तिरुवाच-
भवद्भिरद्यैवकृतास्मिपुष्टाकलौप्रणष्टापिकथारसेन
तिष्ठामिकुत्राहमभीष्टमाभ्यांसहास्पदंमह्यमुपादशध्वम् ७४
सूतउवाच-
तद्वाक्यमाकर्ण्यविधेःकुमाराविचार्यसम्यक्प्रणिधायचित्ते
उचुश्चभक्तिंभवरोगहर्त्रीं प्रेमैकदात्रींहरिभक्तिभाजाम् ७५
कुमाराऊचुः
भक्तेषुगोविंदपरायणेषुसाधुष्वथोदीनदयापरेषु
मनोनियम्योत्पथसंप्रवृत्तंकृत्वैकतानंहरिपादपद्मे ७६
ततोहिदोषाः कलिजाइमेत्वांद्रष्टुंनशक्ताः प्रभवोपिलोके
कलौत्वमेकैवजगद्धितायभविष्यसेनारदसंप्रणीता ७७

सकलभुवनमध्येनिर्धनाश्चातिधन्यानिवसतिहृदियेषां श्रीहरिर्भक्तिरेका
हरिरपिनिजलोकंसत्वरंसंविहायप्रविशतिहृदियेषांप्रेमसूत्रापिनद्धः ७८
इति श्रीपाद्मेमहापुराणेपचंपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
श्रीभागवतमाहात्म्येपंचनवत्यधिकशततमोऽध्यायः १९५

षराणवत्यधिकशततमोऽध्यायः

सूतउवाच-
अथवैष्णवचित्तेषुदृष्ट्वाभक्तिमलौकिकीम्
निजलोकंपरित्यज्यभुवमभ्यगमद्धरिः १
वनमालीघनश्यामःपीतवासाः किरीटधृक्
कांचीकलापपर्यस्तोलसन्मकरकुंडलः २
त्रिभंगललितश्चारुकौस्तुभेनविराजितः
कोटिमन्मथलावरायोहरिचंदनचर्चितः ३
परमानंदचिन्मूर्तिर्मधुरोमुरलीधरः
आविवेशस्वभक्तानांहृदयान्यमलानिच ४
वैकुंठवासिनोयेचवैष्णवाः शांतमानसाः
गूढरूपाःसमायाताः श्रवणायहरेः कथाः ५
तदाजयजयेत्युच्चैःशब्दोऽभूत्कंबुशब्दयुक्
येनामंगलमत्युग्रंकलिजंप्रलयंगतम् ६
तत्रस्थानांजनानांचदृष्ट्वागेहात्मविस्मृतिम्
नारदोऽध्यात्मतत्वज्ञः कुमारान्प्रत्युवाचह ७
नारदउवाच-
अलौकिकोऽयमहिमामुनीश्वराः सप्ताहजन्योद्यविलोकितोमया ८
मूढाःशठायेपशुपद्मिणोऽपितेपिप्रयांत्येवगतिंपराख्यात्
अतोनृलोकेनतुशास्त्रमन्यच्चित्तस्यशुध्यैबिहितंपवित्रम् ९
अघौघविध्वंसिकृतार्थतावहंकलौयुगेदोषनिधौकुमाराः केकेनशुध्यंतिवदं-
तुमह्यंसप्ताहजज्ञेनकथामयेन १०
कृपालुभिर्लोकहितोभवद्भिः प्रकाशितं कोऽपिनवीनमार्गः
कुमाराऊचुः
येमानवाःपापकृतः सुदुष्टाःसदादुराचाररताःसमत्सराः ११

क्रोधाग्निदग्धाःकुटिलाश्चकामिनःसप्ताहयज्ञेनहरिंव्रजंतिते १२
सत्येनहीनाः पितृमातृदूषकास्तृष्णाकुलाश्चाश्रमवर्णबाह्याः
येदांभिकाजीवविहिंसकाश्चसप्ताहयज्ञेनहरिंव्रजंतिते १३
पंचोग्रपापाश्च्छलकारिणश्चक्रूराः पिशाचाइवनिर्दयाश्च
ब्रह्मस्वपुष्टाव्यभिचारिणश्चसप्ताहयज्ञेनहरिंव्रजंतिते १४
कायेनवाचामनसापिपातकंनित्यंप्रकुर्वंतिशठाहठेनये
नीचाःकृतघ्नामलिनादुराशयाः सप्ताहयज्ञेनहरिंव्रजंतिते १५
सूतउवाच-
अथैवंतुष्टचित्तेऽथनारदेदेवपूजिते
प्रसन्नास्तेकुमाराश्चपुनरूचुश्चनारदम् १६
कुमाराऊचुः
अत्रतेकीर्तयिष्यामइतिहासंपुरातनम्
यस्यश्रवणमात्रेणपापहानिःप्रजायते १७
तुंगभद्रातटेपूर्वंपत्तनेकोहलाभिधे
वर्णाश्रमाचारयुतेधनधान्यसमाकुले १८
आत्मदेवइतिख्यातस्तत्रासीद्द्विजसत्तमः
वेदविद्याविधिप्राज्ञोनित्यकर्मपरायणः १९
तत्प्रियाधुंधुलीनामनित्यंस्वीयहितेरता
स्ववाक्यस्थापनाचापिसुंदरीसुकुलोद्भवा २०
पूर्वकर्मविपाकेनप्रायशोबहुजल्पिनी
शूराचगृहकृत्येषुक्रूराचकलहप्रिया २१
एवंनिवसतोस्तत्रदंपत्योर्निरपत्ययोः
व्यतिक्रांतंवयश्चापिपंचाशद्वर्षसंमितम् २२
अथतौदुःखितौजातौनिरपत्यौगृहेस्थितौ
संतानोत्पत्तयेताभ्यांदत्तंचापिधनादिकम् २३
गोभूहिरण्यवासांसिदत्तान्यपि बहूनिच
नपुत्रोनापिदुहिताजायतेपूर्वकर्मणा २४
सचैकदातुनिर्विण्णआत्मदेवोद्विजोत्तमः
गृहंत्यक्त्वागतोऽरण्यमानपत्येनदुःखितः २५
यत्रतत्रभ्रमन्भ्रांतोदुःखाकुलितमानसः

क्षुत्क्षामस्तृट्परीतश्चदैवात्प्राप्तोजलाशयम् २६
जलंपीत्वाततस्तस्मिंस्तडागेसद्विजोत्तमः
वृक्षच्छायांसमाश्रित्यनिषगणस्तत्रनारद २७
अथतत्रतदैवागात्कश्चित्सिद्धोभ्रमन्महीम्
जलंपीत्वातडागेतुसोऽपितत्रैवचागतः २८
तंदृष्ट्वान्यासिनंशांतमात्मदेवउदारधीः
सत्कृत्योत्थायतत्पादौजग्राहस्वगुरोरिव २९
उपविष्टौततस्तौद्वौकृतप्रश्नौपरस्परम्
सुस्निग्धमानसौभूत्वागुरुशिष्याविवाश्रमे ३०
अथतंसयतिर्दृष्ट्वाश्वसंतंदुःखितांतरम्
पप्रच्छकरुणासिंधुरात्मदेवंपुरः स्थितम् ३१
सिद्धउवाच–
कातेचिंताद्विजश्रेष्ठदुःखायहृदिवर्तते
तांसमाचक्ष्वधर्मज्ञपरितापप्रदायिनीम् ३२
तच्छ्रुत्वावचनंतस्यसिद्धस्यसुमहात्मनः
आत्मदेवउवाचाथस्वस्यदुःखस्यकारणम् ३३
आत्मदेवउवाच–
किंब्रवीमिमुनेदुःखंसंचितंपूर्वकर्मणा
मदीयाः पूर्वजास्तोयंकवोष्णमुपभुंजते ३४
मद्दत्तंनैवगृह्णंतिपितरोदेवताबलिम्
तेनदुःखेननिर्विगणःप्राणांस्त्यक्तुमिहागतः ३५
धिग्जीवितंप्रजाहीनंगृहंचैवधनंकुलम्
पाल्यतेयामयाधेनुःसाऽपिवंध्यात्वमेतिह ३६
योमयारोपितोवृक्षःसोपिवंध्यत्वमागतः
निर्भाग्यस्यानपत्यस्यकिमतोजीवितेनमे ३७
कुमाराऊचुः
इत्युक्त्वासरुरोदोच्चैस्तत्पुरोदुःखपीडितः
यदातदायतेश्चित्तेकरुणाभूद्गरीयसी ३८
ललाटाक्षरमालांचदृष्ट्वाज्ञात्वासयोगवान्
आत्मदेवंद्विजंप्राज्ञः पुनरूचेसविस्तरम् ३९

सिद्धउवाच
शृणुविप्रमयातेऽद्यप्रारब्धमवलोकितम्
सप्तजन्मावधिप्राप्तिःपुत्रस्यनचदृश्यते ४०
मुंचाग्रहंप्रजाहेतोर्बलिष्टाकर्मणोगतिः
विवेकंतुसमासाद्यसुखीभवमहामते ४१
एवमुक्तंसमाकर्ण्यसिद्धस्यद्विजसत्तमः
प्रजाशाबद्धचित्तस्तुसिद्धंप्राहातिदुःखितः ४२
विप्रउवाच–
विवेकेनभवेत्किंमेपुत्रंदेहिवलादपि
नोचेत्त्यजाम्यहंप्राणांस्त्वदग्रेशोकमूर्च्छितः ४३
इतिविप्राग्रहंदृष्ट्वाप्राब्रवीत्सतपोधनः
संततेःसगरोदुःखमवापांगःप्रजापतिः ४४
चित्रकेतुर्गतः कष्टंविधिलेखविमार्जनात्
अतस्त्वमपिधर्मज्ञयदि पुत्रंलभेरपि ४५
सुतेननसुखीभूयाः दैवंहिबलवत्तरम्
इत्युक्त्वाद्विजवर्यायससिद्धः साधुसंमतः ४६
ददावेकंफलंतस्मैप्राग्रहेणसुतार्थिने
इदंफलंमयातुभ्यंदत्तंपुत्राप्तयेद्विज ४७
भार्यायैदेहिपुत्रस्तेभविष्यतिनसंशयः
सत्यंशौचंदयादानमेकभक्तंतुभोजनम् ४८
वर्षावधिस्त्रियाकार्यं तेनशुद्धोभवेत्सुतः
एवमुक्त्वाययौयोगीविप्रःस्वगृहमागतः ४९
दत्त्वापत्न्यैफलंतत्तुसिद्धोक्तमवदच्चह
अथसाधुंधुलीक्रूरास्ववाक्यस्थापनोत्सुका ५०
स्वसख्यैप्राहतत्सर्वं पत्योक्तंसिद्धभाषितम्
यद्यहंभक्षयेचेदंफलंसिद्धेनचार्पितम् ५१
गर्भोममभवेत्तर्हिकथंचाहंसहाम्यहम्
स्वल्पंभक्ष्यमशक्तिश्चगमनेगृहकर्मणि ५२
तिर्यक्चेदागतोगर्भोतदामेमरणंभवेत्
प्रसूतौदारुणंदुःखंसुकुमारीकथंसहे

मंदयांमयिसर्वस्वंननांदासंहरेत्सदा ५३
चिंतामेसमनुप्राप्ताकिंकरोमिशुचिस्मिते
सातद्वचनमाकर्ण्यस्नेहभंगभयाद्द्विज ५४
एवमेवेतितांप्राहप्रीत्याप्रहसितानना
एवंकुतर्कयोगेनतत्फलंनैवभक्षितम् ५५
पत्यापृष्टेफलंभुक्तंभुक्तंचेतितयेरितम्
एकदाभगिनीतस्याः स्वेच्छयातद्गृहंगता ५६
तदग्रे कथितंसर्वंचिंतेयंमहतीहिमे
किंकरोमिसगर्भोऽहत्वंप्रब्रूहियथातथम् ५७
साब्रवीन्ममगर्भोस्तितुभ्यंदास्येप्रसूतितः
तावत्कालंसगर्भेवगुप्तातिष्ठगृहेसुखम् ५८
तंबालंपोषयिष्यामित्वद्गृहेचैवनित्यदा
फलंधेनोःप्रयच्छाद्यपरीक्षार्थंशुभानने ५९
इत्युक्त्वासाययौगेहमात्मनोहृष्टमानसा
धुंधुल्यापियथोद्दिष्टंतद्भगिन्यातथाकृतम् ६०
अथप्रसूयसाबालंधुंधुल्यैचार्पयद्द्रुतम्
तयाचकथितंभर्त्रेप्रसूतःसुखमर्भकः ६१
लोकस्यसुखमुत्पन्नमात्मदेवप्रजोदयात्
दत्त्वादानंद्विजाग्रेभ्योजातकर्मचकारच ६२
गीतवादित्रनिर्घोषोगृहेतस्यातिमङ्गलम्
बभूवहर्षमापन्नआत्मदेवोमहामतिः ६३
अथसाप्राहभर्त्तारंदुग्धंमेस्तनयोर्नहि
पालयिष्येकथंबालंसद्यःसूतंप्रभोऽधुना ६४
मत्स्वसुश्चप्रसूतायामृतोबालःपुराभवत्
तामानीयगृहेरक्षसार्भकंपोषयिष्यति ६५
इतिश्रुत्वावचस्तस्याधुंधुल्याद्विजसत्तमः
तथैवकृतवान्भ्रांतरात्मदेवोमुदान्वितः ६६
धुंधुकारीतिनामास्यकृतंमात्रायथार्थतः
स्तन्येनपोषमाप्नोतिनित्यंमातृष्वसुःसुतः ६७
त्रिमासेनिर्गतेचाथसाधेनुःसुषुवेऽभकम्

सर्वांगसुंदरंदिव्यंनिर्मलंकनकप्रभम् ६८
दृष्ट्वाप्रसन्नस्तंबिप्रःसंस्कारान्स्वयमादधे
तंदिदृक्षवआयाताजनाः सर्वेऽतिविस्मिताः ६९
आत्मदेवस्यविप्रस्यमहाभाग्योदयेनच
धेन्वाबालः प्रसूतश्चदेवरूपोऽतिकौतुकम् ७०
नज्ञातंतद्रहस्यंतुकेनापिविधियोगतः
गोकर्णःतंसुतंदृष्ट्वागोकर्णेत्येवचाभ्यधात् ७१
कियत्कालेनसंप्राप्तौतारुण्यंताबुभावपि
गोगकर्णपंडितोज्ञानीधुंधुकारीमहाखलः ७२
स्नानशौचक्रियाहीनोभक्ष्याभक्षीक्रुधाप्लुतः
चौरःसर्वजनद्वेषीदुष्टचांडालसंगतः ७३
क्रीडतोह्यर्भकान्धृत्वाबलात्कूपेनिपातयेत्
एवंवेश्याप्रसंगेनानयद्द्रव्यंक्षयंपितुः ७४
पिताकृपणवत्तस्यशुचानिः स्वोरुरोदह
अनपत्यः सुखीनित्यंकुपुत्रोदुःखदायकः ७५
सिद्धेनोक्तंवचः सत्यमनुभूतंमयाधुना
क्वगच्छामिक्वतिष्ठामिकोमेदुःखंनिवारयेत् ७६
प्राणांस्त्यक्ष्येजले वह्नौभृगोर्वापिपतेह्यहम्
इत्येवंचिंतयानंतमधोमुखमुपागतः ७७
गोकर्णोजनकंज्ञानीबोधयामासतत्वतः
गोकर्णउवाच-
असारस्तातसंसारदुःखमोहप्रदोनृणाम् ७८
कःसुत किंधनंकस्यकाजायाकः पतिःपितः
मोहेनबद्धोदीनात्मालोकः क्लिश्यतिनान्यथा ७९
नचेंद्रस्यसुखंकिंचिन्नसुखंचक्रवर्तिनः
विरक्तस्यसुखंतातमुनेरेकांतशीलिनः ८०
मुंचाज्ञानंप्रजारूपंमोहंनरककारणम्
निर्द्वंद्वोनिरभीमानोब्रजत्यक्त्वाखिलंवनम् ८१
ततस्तद्वाक्यमाकर्ण्यगोकर्णंसद्विजोऽब्रवीत्
द्विजउवाच-

यत्कर्त्तव्यंवनेसाधोतन्ममाचद्त्वविस्तरात् ८२
मोहपाशनिबद्धंहिशठंकृपणमानसम्
संसारगर्तेपतितंमामुद्धरदयानिधे ८३
पितुरित्थंवचःश्रुत्वागोकर्णोज्ञानपंडितः
उवाचदीनंनिर्विराणंपितरंहृष्टमानसः ८४
गोकर्णउवाच-
मांसास्थिरक्तनिकरेस्वशरीरकेऽस्मिन्स्वत्वंत्यजाशुममतांवनितासुतादौ
पश्यानिशंजगदिदंच्चणभंगनिष्ठंज्ञानीविरागरसिकोभवभक्तिनिष्ठः ८५
धर्मंभजस्वसततंत्यजलोकधर्मान्संसेव्यसाधुपुरुषान्जहिकामतृष्णाम्
अन्यस्यदोषगुणचिंतनमाशुमुक्त्वाविष्णोःकथारसमथोनितरांपिबत्वम् ८६
कुमाराउचुः-
एवंसुतोक्तविदितानुभवोनिरीहस्त्यक्त्वागृहंस्थिरमतिर्गतषष्टिवर्षः
नित्यंहरिप्रियजनानुगतोमहात्मादुष्प्रापमापचपदंसहरेर्वनस्थः ८७

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेश्रीभागवत माहात्म्येषरणवत्यधिकशततमोऽध्यायः १९६

सप्तनवत्यधिकशततमोऽध्यायः

कुमाराऊचुः
पितर्येवंवनंप्राप्तेपश्चादागत्यनारद
जननींतर्जयामासधुंधुकारीमहाखलः १
क्ववित्तंतिष्ठतिब्रूहिमातरंप्रतिनारद
सर्वथात्वांहनिष्यामिनचेद्ब्रूयानिधानकम् २
सातस्यवचनात्त्रस्तारात्रौदुःखितमानसा
निपत्यकूपेतुमृतालोकैर्ज्ञात्वाबहिःकृता ३
गोकर्णस्तांतुनिर्हृत्यद्विजैस्तज्ज्ञातिबांधवैः
तीर्थयात्रांययौप्राज्ञः समदुःखसुखोमुने ४
धुंधुकारीगृहेतिष्ठन्स्वकेपरायवधूवृतः
अत्युग्रकर्माचारेणतत्पोषणविमूढधीः ५
भूषणान्यभिलिप्स्यंत्यस्तमूचुर्वारयोषितः
भोभोप्रियवयंसर्वास्त्वयानाथेनसंगताः ६

स्थितानैवात्रकोप्यन्योधनदोभ्येतिमानद
तस्यात्सूक्ष्माणिवस्त्राणिभूषणानिद्युमंतिच ७
देहिनोचेद्व्रजिष्यामस्त्वत्सकाशान्नरांतरम्
इति श्रुत्वावचस्तासांचिंतयित्वाक्षणंसच ८
निर्गतः स्वगृहाद्रात्रौकामांधोमृत्युमस्मरन्
मुषित्वाकस्यचिद्गेहाद्वस्त्राण्याभरणानिच ९
ददौताभ्योमुदायुक्तःप्रीत्यैतासांसनारद
तानिदृष्ट्वाह्यमूल्यानिवस्त्राण्याभरणानिच १०
ताःस्त्रियश्चिंतयामासुश्चौर्येणैतानिचामुना
आहृतानीतिनिश्चित्यपरस्परममंत्रयन् ११
चौर्यंकरोत्यसौनित्यमेनंराजागृहीष्यति
वित्तंहृत्वापुनश्चैवमारयिष्यतिनिश्चितम् १२
अतोरहसिचास्माभिर्हत्वामुंचौर्यकारिणम्
वित्तंचबहुसंगृह्यकिमन्यत्रनगम्यते १३
इतिताःक्रूरहृदयांसुप्तंकंठग्रहंतदा
पाशैःसुतीक्ष्णैर्बद्ध्वाचव्यापादयितुमुद्यताः १४
यदाचनमृतश्चासौभृशंकंठग्रहेणवै
तदांगाराणिबहुशोमुखेचास्यविचिक्षिपुः १५
अग्निज्वालातिदुःखेनव्याकुलोनिधनंगतः
तद्देहंचिक्षिपुर्गर्तेप्रायःसाहसिकाः स्त्रियः १६
नज्ञातंतच्चरित्रं तुकेनापिमुनिसत्तम
लोकैःपृष्टावदंतिस्मदूरेयातः पतिर्हिनः १७
आगमिष्यतिदीर्घेणकालेनधनकर्षितः
अतःस्त्रीणांनविश्वासः कर्त्तव्योविदुषां वरैः १८
विश्वस्तंसर्वथाघ्नंतिप्रार्थयंत्योनवंनवम्
सुधामयंवचोयासांकामिनांरसवर्द्धनम् १९
हृदयंक्षुरधाराभंप्रियःकोनामयोषिताम्
अथताबहुलंवित्तंगृहीत्वावारयोषितः २०
ग्रामांतरंययुःशीघ्रंभयाद्राज्ञोऽतिविह्वलाः
धुंधुकारीबभूवाथमहाप्रेतः कुकर्मकृत् २१

वात्यारूपधरोनित्यंधावन्दुर्मृत्युतोदिशः
शीतातपपरिक्लिष्टोनिराहारः पिपासितः २२
नचलेभेसुखंक्वापिहाहेतिप्रबदन्मुहुः
कियत्कालांतरेत्वेनंमृतंचैवावबुध्यच २३
गोकर्णस्तीर्थयात्रायांगयाश्राद्धमथाकरोत्
समाप्यतीर्थयात्रांतुस्वंपुरंसमुपेयिवान २४
सभाजितः सपौरैस्तुप्रीत्यास्वजनबांधवैः
उवासस्वगृहेचैवदिनानिकतिचिद्द्विजः २५
रात्रौप्रसुप्तंगोकर्णंज्ञात्वावेश्मांगणेसतु
धुंधुकारीमहादुष्टोरौद्रंरूपंव्यदर्शयत् २६
क्षणंनागःक्षणंचोष्ट्रःक्षणंसमहिषोऽभवत्
क्षणमग्निःक्षणंसर्पःक्षणेनपुरुषोऽभवत् २७
वैपरीत्यमिदंदृष्ट्वागोकर्णोधैर्यसंयुतः
चिंतयामासमेधावीकिमेतदितिविस्मितः २८
अयंदुर्गतिमापन्नः कोप्यस्तिपुरुषाधमः
इतिनिश्चित्यमनसातमुवाचदयान्वितः २९
गोकर्णउवाच-
कस्त्वमुग्रतरोरात्रौभीषयन्मामुपागतः
प्रेतोचाथपिशाचोवाकुतःप्राप्तोदशामिमाम् ३०
तद्ब्रूहित्वंमहाभागकिंकार्यं तेमयाधुना
घोररूपोयतोरात्रौमत्समीपमुपागतः ३१
इति श्रुत्वावचोभ्रातुर्धुंधुकारीमहाखलः
प्रेतभावमनुप्राप्तोरुरोदभृशमातुरः ३२
वक्तुंनैवक्षमोवाचाप्रेतत्वेन विमोहितः
संज्ञयानिर्दिदेशाथजलंपातुंपिपासितः ३३
अथासौसुमहाभागोगोकर्णः साधुसंमतः
स्वकांजलौजलंकृत्वाप्राक्षिपत्तमुदीरयन् ३४
तत्क्षिप्तंतज्जलंभ्रात्रागोकर्णेनमहात्मना
उपस्थितंचतृप्त्यर्थं प्रेतस्यधुंधुकारिणः ३५
अथोवाचागतज्ञानः प्रदत्तेनांबुनामुना

पुण्यात्मनात्मनो भ्रात्रागोकर्णेनचनारद ३६
प्रेतउवाच-
अहंभ्रातात्वदीयोऽस्मिधुंधुकारीतिनामतः
आत्मनः कर्मदोषेणप्रेतत्वंसमुपागतः ३७
ममम‍ातामृतादुःखाद्बहुशस्तर्जितामया
द्रव्यहेतोस्ततः पश्चाद्वारस्त्रीपोषणोत्सुकः ३८
निषिद्धंकृतवान्कर्मचौर्यादिधनलोभतः
एकदाप्रार्थितस्ताभिर्भूषणान्यंबराण्यहम् ३९
धनिकस्यगृहाद्रात्रौमुषित्वातान्युपानयम्
ततस्ताधनलोभेनपाशैर्बद्ध्वागलेबलात् ४०
मांतुव्यापादयामासुर्वह्निक्षेपेणमानद
गृहीत्वामद्धनं भूरिताः सर्वाभूपतेर्भयात् ४१
पलायिताःपुरादस्मात्स्वार्थोन्मूलितसौहृदाः
अतः प्रेतत्वमापन्नोभ्रातरद्यत्वयांबुना ४२
सिक्तः संज्ञामहंप्राप्तः पुण्येनातिकृपालुना
वाताहारेणजीवामिदैवादिष्टफलोदयः ४३
अपश्यंत्वामहंसुप्तंभ्रातरंस्वगृहांगणे
ततस्त्वामनभिज्ञंमांधर्षणायकृतोद्यमः ४४
अभवंसहसासाधोज्ञातश्चाहंत्वयाधुना
दीनबंधोदयासिंधोभ्रातर्मामाशुमोचय ४५
प्रेतभावादमुष्मात्त्वंकृतार्थोऽसिनसंशयः
इति श्रुत्वावचोभ्रातुर्गोकर्णोज्ञानवान्सुधीः ४६
भ्रातरंप्राहखिन्नात्मादुःखितंधुंधुकारिणम्
गोकर्णउवाच-
तुभ्यंदत्तोमयापिंडोगयायांत्वामहंभृतम् ४७
श्रुत्वालोकमुखाद्भ्रातस्त्वंकथंप्रेततांगतः
गयापिंडप्रदानेनदुर्गतोऽपिशुभांगतिम् ४८
प्राप्नोतिनात्रसंदेहस्त्वंकथंनदिवंगतः
भ्रातुरित्थंवचः श्रुत्वागोकर्णस्यमहात्मनः ४९
धुंधुकारीदुःखितात्माप्रोवाचपुरतःस्थितः

गयाश्राद्धशतेनापिनमेमुक्तिर्भविष्यति ५०
उपायोऽन्यश्चिंतनीयोममोद्धारायवैत्वया
इतितद्वाक्यमाकरार्यगोकर्णोविस्मयंगतः ५१
प्राहश्राद्धैर्नमुक्तिश्चेत्तर्ह्यसाध्यागतिस्तव
इदानींत्वंनिजस्थानमातिष्ठप्रेतनिर्भयः ५२
विचार्याहंकरिष्यामिमुक्त्युपायंपरंतव
इतिवाक्यंसमाकरार्यधुंधुकारीततोगतः ५३
निजंस्थानंश्मशानस्थंकलिद्रुममतःपरम्
शेषांरात्रिंसगोकर्णश्चिंतयन्नेवन्नारद ५४
तस्यमुक्तिंस्थितस्तत्रतदुपायंनचाध्यगात्
प्रातस्ततः सगोकर्णःस्वज्ञाति कुलबांधवान् ५५
धर्मशास्त्रविदोविप्रान्रात्रिवृत्तंन्यवेदयत्
तेविचार्यचतद्वृत्तंशास्त्रेषुबहुशोद्विजाः ५६
यदानज्ञातवंतस्तद्वृत्तंसूर्यंतदास्तुवन्
द्विजाऊचुः-
नमस्तेभास्करादित्यतमोहंतर्गभस्तिमन् ५७
लोकसाद्मिन्जगद्धामसुरासुरनमस्कृत
द्वादशात्मन्हरिहयभास्वन्लोकप्रबोधक ५८
त्वंगतिः सर्वलोकानांसततंधर्मशीलिनाम्
त्वंब्रह्मात्वंहरिःशूलीसृष्टिस्थितिविनाशकृत् ५९
त्वामृतेनास्तिलोकेस्मिञ्छरणंप्राणिनांविभो
शर्वस्त्वंद्मितिरूपोऽसिभवोऽसिजलरूपधृक् ६०
त्वमग्निरुपोरूद्रोसिवायुरस्युग्ररूपधृक्
भीमोस्याकाशदेहस्त्वंयज्वापशुपतिःस्वयम् ६१
महादेवः सोममूर्तिरीशानः सूर्यएवहि
तवाष्टौमूर्त्तयोदिव्याइज्यंतेवेदवादिभिः ६२
सर्वकामसमृद्ध्यर्थंव्याप्तलोकत्रयस्यच
मत्स्यस्त्वंवेदधृक् चासिकूर्मश्चाद्रिधरोवरः ६३
धराधरोवराहोसिलोकधृक्त्वंत्रिविक्रमः
ब्रह्मध्रुन्घोभार्गवस्त्वंलोकध्रुक्न्घोसिराघवः ६४

भूभारहंताकृष्णोसिबुद्धोस्यसुरमोहकृत्
कल्क्यसिम्लेच्छहंतात्वंधर्मग्लानौयुगेयुगे ६५
देवासुरमनुष्याणांपशुपक्ष्यंबुचारिणाम्
नानाविधानं जीवानांत्वंस्त्रष्टाब्रह्मरूपधृक् ६६
इंद्रोसिधर्मराजोसिवरुणस्त्वंधनेश्वरः
लोकपालस्वरूपेणवर्त्तसेगोगणेश्वर ६७
त्रयीमूर्त्तिस्त्रिकालेज्यस्त्रिधामात्रिगुणात्मकः
त्वमेवपूज्यसेलोकैस्त्रिधाभिन्नोदिवाकरः ६८
पद्मप्रबोधनकरस्त्वमेवासिजगत्पते
इत्युदीर्यद्विजश्रेष्ठायावत्तस्थुर्मुनीश्वर ६९
तावदाकाशगःप्राहस्फुटंतेषांतुशृणवताम्
श्रीसूर्यउवाच-
श्रूयतांभोद्विजश्रेष्ठायावत्तस्थुर्मुनीश्वर ६९
तावदाकाशगः प्राहस्फुटंतेषांतुशृणवताम्
श्रीसूर्यउवाच-
श्रूयतांभोद्विजश्रेष्ठायदर्थंवर्णितोस्म्यहम् ७०
भवद्भिर्धुंधुलीसूनोर्महापातकशांतये
आत्मदेवस्यपुण्येनगोकर्णोरौहिणोह्ययम् ७१अं
श्रीभागवतसप्ताहस्तस्योद्धर्ताभविष्यति
यद्भवद्भिःकृतंस्तोत्रंममवैभववर्णनम् ७२
तेनस्तुत्वा नरोविप्रादेवयानंलभिष्यति
पुत्रार्थीचधनार्थीचधर्मार्थीमोक्षकामुकः ७३
वांछाचिंतामणिस्तोत्रंपठित्वात्यंतमाप्नुयात्
इत्युक्त्वाभास्करोदेवोविररामदिविस्थितः ७४
तेद्विजाः साध्वितिप्रोचुर्गोकर्णंहृष्टमानसाः
ततः समाजेविप्राणांतुंगभद्रातटेशुभे ७५
कौतुकंसुमहद्द्रष्टुंतत्रागान्नागरीप्रजा
गोकर्णोज्ञाततत्वार्थोवक्ताध्यासनमास्थितः ७६
नारायणादिकान्नत्वासप्ताहंसमवर्त्तयन्
श्रीहरेस्तुवचःशास्त्रंतीर्थपादाब्जसंभवम् ७७

यदिसत्यं तदाप्नोतुधुंधुलीतनयोगतिम्
इतिसंकल्प्यमनसाश्रीमद्भागवताभिधम् ७८
जन्माद्यस्ययतश्चेतिधीमह्यंतमुपावदत्
तत्रप्रेतं समागत्यस्थानंपश्यन्नितस्ततः ७९
सप्तग्रंथियुतंवंशंप्रविष्टोवातरूपधृक्
शृरावत्सुवैष्णवाग्र्येषुब्राह्मरोष्वथनारद ८०
शुश्रावधुंधुलीपुत्रोग्रंथिछिद्रस्थितोऽन्वहम्
यदाकथाविरामोऽभूत्प्रथमेऽहनिनारद ८१
तदैकाकीचकग्रंथिः पुस्फोटत्यद्भुतंह्यभूत्
द्वितीयादिष्वहः स्वेवमेकैकग्रंथिभेदनम् ८२
बभूवसप्तमेभिन्नेससद्यः प्रेततांजहौ
दिव्यरूपधरोभूत्वातुलसीदाममंडितः ८३
पीतवासाघनश्यामः प्रबभौभूषणान्वितः
गोकर्णंभ्रातरंनत्वाप्रोवाचाखिलतत्वदृक् ८४
त्वयाऽहमोचितोबंधोकृपयाप्रेतकश्मलात्
धन्याभागवतीवार्ताप्रेतत्वोन्मूलिनीश्रुता ८५
सप्ताहोपितथाधन्योविष्णुलोकगतिप्रदः
यत्प्रभावाद्विमुक्तोऽह प्रेतभावाद्भृशातुरः ८६
आर्द्रंशुष्कंलघुस्थूलंवाङ्मनः कर्मभिःकृतम्
पातकंभस्मसात्कुर्यात्सप्ताहोऽग्निरिवेंधनम् ८७
अस्मिन्वैभारतेवर्षेदेवानामप्यभीप्सिते
शृरावतांभगवच्छास्त्रंगतिरत्युत्तमाभवेत् ८८
स्नाय्वस्थिमज्जामांसासृक्संघातंदेहमुच्यते
शुचिभागवतास्वादादशुचित्वन्यथामतम् ८९
कर्मकश्मलसंदुष्टोदेहोनरकभाजनम्
अतोदोषनिवृत्यर्थमेतदेवहिसाधनम् ९०
बुद्बुदाइवतोयेषुमशकाइवजंतुषु
जायंते मरणायैबभगवच्छास्त्रवर्जिताः ९१
भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः
क्षीयंतेचास्यकर्माणिश्रुतेभागवतेद्विजाः ९२

एवंब्रुवतिवैतस्मिन्विमानवरमागतम्
वैकुंठात्तदधिष्ठायगतोऽसौविष्णुमंदिरम् ९३
विष्णुलोकंगतेतस्मिन्सर्वेविस्मितमानसाः
बभूवुश्चापिपप्रच्छुर्गोकर्णं तेद्विजोत्तमाः ९४
द्विजाऊचुः
श्रुतंभागवतंसर्वैरस्माभिरिहसंगतैः
किंकारणंमहाभागत्वद्भ्रातैकोगतोहरिम् ९५
गोकर्णउवाच-
श्रूयतामभिधास्यामिकारणंभातृसद्गतौ
यच्छ्रुत्वायूयमेवापिगोलोकंचगमिष्यथ ९६
सप्ताहश्रवणंकार्यमुपवासपरायणैः
कृष्णैकतानमतिभिर्गोलोकगतिदायकम् ९७
पुनः शृणुध्वंसप्ताहंश्रीमद्भागवतंद्विजाः
एकाग्रचित्ताः सततंकृष्णप्रेमामृतप्रदम् ९८
इति श्रुत्वावचस्तस्यगोकर्णस्य द्विजोत्तमाः
पुनः श्रोतुंभागवतंसप्ताहंसमुपावसन् ९९
कृष्णैकतानमतयोनियमेनचनारद
पुनस्तेशुश्रुवुंसर्वेश्रीमद्भागवतंद्विजाः १००
कथावसानेभगवान्कृष्णः कमललोचनः
आविरासीन्मुनिश्रेष्ठंशंखचक्रगदाब्जधृक् १०१
किरीटकुंडलधरोवनमालीविभूषितः
पीतवासाघनश्यामःकटकांगदभूषितः १०२
तंदृष्ट्वातेद्विजाःसर्वेविष्वक्सेनादिभिर्युतम्
पार्षदप्रवरैर्हृष्टाःप्रणेमुर्भुविसंगताः १०३
जयशब्दोनमः शब्दस्तदासीत्सर्वतोमुने
अथशंखध्वनिंचक्रेहरिःसंहर्षयन्द्विजान् १०४
तदानेकेविमानास्तुवैकुंठात्समुपागताः
द्विजानांपश्यतांतत्रपार्षदप्रवरैर्युताः १०५
गोकर्णंतुसमालिंग्यददौसारूप्यमात्मनः
श्रोतॄनन्यान्घनश्यामान्पीतकौशेयवाससः १०६

किरीटिनः कुंडलिनोहारिणोवनमालिनः
चकारतत्क्षणात्तत्रमहदाश्चर्यमप्यभूत् १०७
तस्मिन्ग्रामेस्थितायेतुश्राचांडालजनामुने
समारुह्यविमानांस्तान्ययुःकृष्णाज्ञयादिवम् १०८
गोकर्णसहितः कृष्णोगोपगोपीजनप्रियः
गोलोकंसमनुप्राप्तःसर्वलोकोपरिस्थितम्
यत्रवृंदावनंरम्यंशतशृंगसमावृतम् १०९
तद्व्राह्येपरितोवृतंविजययाह्यत्यद्भुतंराजतेऽरगयंयत्रुतमंडपानिसुबहून्यच्छोद
वाप्योह्रदाः
गावः कामदुघाः सुरद्रुमततिच्छायाश्रितागोपकैः क्रीडातत्परमानसैः
परिवृतोनंदात्मजःक्रीडति ११०
मध्येत्वस्यसुकाननस्यरचितोवृंदावनेशेच्छयारम्यंरत्नसमूहभर्मखचितं
प्राकारमुद्भासयन्
न्यग्रोधःसुमहांस्ततः
प्रतिदिशंगोपीजनाध्यासितंवत्सालंकृतमद्भुताकृतिमहच्छ्री
गोकुलंराजते १११
तन्मध्येभवनंहरेरधिकृतंप्रोद्भासतेभास्वरंयस्मिन्नंदगृहेश्वरीसमुदितास्ते
राधयाराधिताः
यद्भाग्यंमहदप्युमापतिमुखैश्चिंत्यंसदाभ्यंतरैस्तत्सूनोर्मधुराकृतेरधिचकास्त्यंडौ
घभास्यांशु
भिः ११२
वातांबुपर्णाशनदेहशोषणैस्तपोभिरुग्रैर्जपयज्ञकर्मभिः
असाध्यमप्यायसधेनुसंभवोलोकंनगाहाख्यमखप्रवर्त्तनात् ११३
इतिहासमिमंपुगयंयःपठेच्छृणुयादपि
सोऽपिगोलोकमभ्येतिकिंश्रीभागवतंपुनः ११४

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
भागवतमाहात्म्येसप्तनवत्यधिकशततमोऽध्यायः१९७

अष्टनवत्यधिकशततमोऽध्यायः

कुमाराऊचुः-

अथतेसंप्रवक्ष्यामः सप्ताहश्रवणेविधिम्
येनभागवतंसिद्ध्येत्पुंसांकृष्णार्पितात्मनाम् १
दैवज्ञंशास्त्रकुशलंसमाहूयधनांशुकैः
समभ्यर्च्यमुहुर्तंतुप्राक्पृच्छेद्भक्तिमान्नरः २
सवदेद्यंमुहूर्तंतुतत्रारंभःप्रशस्यते
नभोनभस्येषोर्जाश्चसहःशुचिसमन्विताः ३
मासाःश्रेष्ठाःकथारंभेपूर्णाचापितिथिःशुभा
भौमार्किवर्जितावाराभानिध्रुवमृदूनिच ४
शुभेयोगेशुभेलग्नेप्रारंभःशस्यतेसदा
नित्यायांचकथायांतुपुराणानांमुनीश्वर ५
द्वादशींवर्जयेत्प्राज्ञःसूतसूतकसंभवात्
श्रीमद्भागवतस्यापिसप्ताहेनैवकेऽपिच ६
ननिषेधोस्तिदेवर्षेप्राहुरेवंपुराविदः
श्रीभागवतसप्ताहोमहायज्ञः स्मृतोबुधैः ७
अतोनिमंत्रणंकार्यंवैष्णवानांसमंततः
सतांसमाजोभवितासप्ताहंवैष्णवोत्तमाः ८
आगंतव्यमतश्चात्रवैष्णवैःश्रवणार्थिभिः
समागतानांतेषांतुनिवासंपरिकल्पयेत् ९
तीर्थेवापिवनेवापिग्रामेवापिप्रयत्नतः
संशोधितायांभूम्यांतुमंडपंपरिकल्पयेत् १०
कदलीस्तंभसंयुक्तंचतुर्दिक्षुध्वजान्वितम्
उच्चमासनमप्युक्तंवक्तुस्तस्याग्रतोमुने ११
आपार्श्वद्वयमुक्तानिश्रोतॄणामासनानिच
उदङ्मुखोभवेद्वक्तासमाजेस्मिन्विदांवरः १२
वेदशास्त्रार्थतत्वज्ञोवैष्णवोब्राह्मणोत्तमः
दृष्टांतकुशलोधीरोवक्ताकार्योऽतिनिस्पृहः १३
सर्वसंदेहहर्त्तापिकार्योवक्तानचैवहि
वक्तुःपार्श्वेसहायार्थंस्थाप्योऽन्य पंडितः सुधीः १४
श्रोतॄणांसंशयच्छेत्ताज्ञानांबोधविधायकः
कथाविघ्नविघातार्थंगणेशंप्राक्प्रपूजयेत् १५

ततोदुर्गांहरंविष्णुंब्रह्माणंभास्करंद्विजान्
संपूज्यविधिवद्भक्त्यातर्पयेद्देवताः पितॄन् १६
मुख्यः श्रोताततः पश्चात्पूजयेत्पुस्तकेहरिम्
ततः प्रदक्षिणीकृत्यद्रव्यवस्त्रफलानिच १७
धृत्वांजलौपुस्तकस्थंहरिंसंप्रार्थयेन्मुने
त्वंभागवतलोकेस्मिन्स्वयंकृष्णोव्यवस्थितः १८
समाश्रितोमयानाथमुक्त्यर्थंभवसागरे
मनोरथोमदीयोऽयसर्वथासफलस्त्वया १९
निर्विघ्नेनप्रकर्तव्योदासोऽहतवकेशव
इत्युच्चार्यमुनेद्रव्यं पुस्तकाग्रेसमर्प्यतु २०
वक्तारंप्रार्थयेच्चापिनमस्कुर्वन्कृतांजलि
शुकरूपद्विजश्रेष्ठसर्वशास्त्रविशारद २१
श्रीभागवतव्याख्यानादज्ञानंमेविनाशय
इति संप्रार्थ्यवक्तारंवरयेत्पंचवाडवान् २२
द्वादशाक्षरमंत्रस्यजपार्थंमुनिसत्तम
गीतवाद्यविधिज्ञांश्चसंपूज्यार्थांशुकादिभिः २३
स्थापयेत्कीर्तनार्थंतुकथांतेविधिवन्मुने
यस्तुजायाधनागारपुत्रचिंतांव्युदस्यच २४
शृणुयादेकचित्तस्तुससमग्रंफलंलभेत्
सूर्योदयंसमारभ्यसार्द्धत्रिप्रहरांतकम् २५
पठित्वार्थः प्रकर्त्तव्योवाक्यमध्यायमेववा
मध्याह्नेघटिकायुग्मंविरमेदपिनारद २६
कथाऽवसानेकर्त्तव्यंकीर्तनंकेशवस्यच
उपवासःप्रकर्त्तव्यः श्रोतृभिस्तत्फलेप्सुभिः २७
तदशक्तोहविष्यान्नंसकृत्स्वल्पंसमाहरेत्
जलेनापिफलेनापिदुग्धेनचघृतेनवा २८
केवलेनैवकर्त्तव्यंनिर्विघ्नंधारणंतनोः
सप्ताहव्रतिनांपुंसानियमान्शृणुनारद २९
विष्णुदीक्षाविहीनानांनाधिकारोऽत्रकीर्तितः
ब्रह्मचर्यमधःसुप्तिः पत्रावल्यांचभोजनम् ३०

समाचरेन्नित्यमेवसप्ताहेमुनिसत्तम
द्विदलंमधुतैलंचपरान्नंचेद्मुजंरसम् ३१
भावदुष्टंक्रियादुष्टंजह्यात्पर्युषितंव्रती
पलांडुलशुनंहिंगुंमूलकंगृंजनंतथा ३२
नालिकांचैवकूष्मांडंनरोनाद्यात्कथाव्रती
कामंक्रोधंमदंलोभंदंभंमात्सर्यमेवच ३३
मोहंद्वेषंतथाहिंसांनैवकुर्यात्कथाब्रती ३४
वेदवैष्णवविप्राणांगुरुगोव्रतिनांतथा
स्त्रीराजमहतांचापिनिंदां जह्यात्कथाब्रती ३५
सत्यंशौचंदयामौनमार्जवं विनयंतथा
मनः प्रसन्नतांचापिबुधःकुर्यात्कथाब्रती ३६
श्रीकामस्तनयार्थीचजयकामश्चमोन्नधीः
शृणुयाद्वैभागवतंनिष्कामः श्रीहरिंलभेत् ३७
सप्तमेदिवसेकुर्याल्लंघनंतत्समाप्तिके
वक्तुश्चपूजाकर्त्तव्यागोभूस्वर्गवरादिभिः ३८
प्रसादतुलसींमालांश्रोतृभ्यःप्रतिपदापयेत्
उत्सवश्चतथाकार्योगीतवाद्यविशारदैः ३९
गीतार्थंशृणुयाच्चापिपरेऽहनिविचन्नणः
प्रतिश्लोकंचजुहुयाद्गायत्र्यावायथाविधि ४०
पायसंमधुसर्पिश्चतिलांस्तंडुलकान्यवान्
शर्करांचप्रियालंचद्रान्नांवातामखर्जुरौ ४१
अंभोजानिचकर्पूरंचंदनागुरुणीपुरम्
लवंगंबिल्वपत्राणिसहस्त्रंचपृथक्पृथक् ४२
विघ्नस्यचविघातार्थंन्यूनाधिक्यनिवृत्तये
आत्मनःपूततार्थंचपठेन्नामसहस्त्रकम् ४३
द्वादशाष्टादशाथापिश्रद्धयाह्यधिकांस्तथा
पायसेनाशयेद्विप्रान्स्वर्णंधेनुश्चदन्निणा ४४
व्रतसिद्ध्यर्थमप्यत्रप्रौष्ठपद्यामथापिवा
स्वर्णसिंहविनिर्मायतस्यपृष्ठेनिधायच ४५
श्रीमद्भागवतंवक्त्रेलेखयित्वासमर्पयेत्

एवंकृतेविधानेतुसर्वपापनिवारणम् ४६
भवेच्छ्रोतुः सुफलदंश्रीमद्भागवतंश्रुतम्
धर्मकामार्थमोक्षाणांसाधनंभक्तिदायकम् ४७
नकार्यंविद्यतेलोकेयदनेननसिध्यति
ततोभागवतंलोकेपुराणेभ्योऽधिकंमतम् ४८
दोषाष्टादशनिर्मुक्तोवाचकः परिकीर्तितः
द्वात्रिंशदपराधैर्हिमुक्तोश्रोतामतोबुधैः ४९
श्रीमद्भागवतंनामपुराणंकामदंनृणाम्
तथापिश्रवणंचास्यनिष्कामस्यैवभक्तिदम् ५०
श्रीमद्भागवताभिधःसुरतरुस्तारांकुरःसज्जनिःस्कंधैर्द्वादशभिस्ततःप्रविलसद्भक्त
्या
लवालोदयः
द्वात्रिंशत्त्रिशतंचयस्यविलसच्छाखाः
सहस्राण्यलंपर्णान्यष्टदशेष्टदोतिसुलभोवर्वर्तिसर्वोपरि ५१
इतितेकथितंसर्वंकृतंचापितवेप्सितम्
ज्ञानवैराग्यभक्तीनांतारुण्यंलोकमोक्षदम् ५२
सूतउवाच-
इत्युक्तातेकुमारास्तुकृष्णांघ्रिसुधयाप्लुताः
विरेमुर्भगवद्भक्तादीनोद्धरणतत्पराः ५३
तद्वाक्यंतुसमाकर्ण्यनारदोभगवत्प्रियः
प्रेमगद्गदयावाचातानुवाचकृतांजलि ५४
नारदउवाच-
धन्योस्म्यनुगृहीतोस्मिभवद्भिःकरुणापरैः
यद्भागवतसप्ताहान्निकटेदर्शितोहरिः ५५
एवंब्रुवतिवैतस्मिन्नारदेवैष्णवोत्तमे
पर्यटंस्तंसमायातस्तत्रयोगेश्वरःशुकः ५६
द्विरष्टवर्षाकृतिरंबुजाक्षोव्यासात्मजोज्ञानपयोधिचंद्रः
कथावसाने निजलाभतुष्टोहृदानिशंभागवतंपठंश्च ५७
दृष्ट्वासदस्यास्तमथोरुतेजसंसद्यःसमुत्थायवरासनंददुः
सचोपविष्टः सुखमासनेयदातदाविरासीद्धरिरब्जलोचनः ५८

भवोभवान्याकमलासनः सुतैस्तत्रागतः कीर्तनदर्शनायच
सुरेशमुख्यास्त्रिदशाविमानकैः समागतास्तैरभवद्भृतंनभः ५९
प्रह्लादस्तालधारीतरलगतितयाह्युद्धवः
कांस्यधारीवीणाधारीसुरर्षिःस्वरकुशलतयारागकर्ताऽर्जुनोऽभूत्
इंद्रोमार्दंगिकोऽभूज्जयजयसुवचःप्रावदंस्तेकुमाराःसद्भावस्यप्रवक्तानिरतिशय
गुणोव्या
सपुत्रोबभूव ६०
ननर्त्तमध्येत्रिकमेवतत्रज्ञानादिकानांनवरूपयुक्तम्
अलौकिकंकीर्त्तनकंसमीक्ष्यप्रसन्नचेताहरिरित्युवाच ६१
मत्तोवरंभागवतावृणीध्वंप्रीतात्कथाकीर्त्तनतोभृशंवः
श्रुत्वाथतद्वाक्यमतिप्रसन्ना प्रेमार्द्रचित्ताहरिमूचिरेते ६२
कुमाराऊचुः-
सप्ताहयज्ञेनवितायतेनसद्यः प्रसन्नोभवितामुरारे
कलौयुगेघोरतरेनराणांस्वल्पायुषांविघ्नशताकुलानाम् ६३
एवंवरंविश्वविधानपालनप्रणाशहेतोर्भवतोखिलात्मनः
वृणीमहेऽन्योनमनोरथोविभोभवत्पदांभोजनिषेविणांहिनः ६४
एवमस्त्वितिचैवोक्त्वातत्रैवांतर्दधेहरिः
नारदःसुप्रसन्नात्माकुमारानभ्यवादयत् ६५
ततस्तेसनकाद्याश्चभृग्वाद्याश्चशुकादयः
प्रययुःस्वाश्रमान्हृष्टाःपीत्वातच्चकथामृतम् ६६
भक्तिःसुताभ्यांसहितानारदेनप्रवर्तिता
भूमंडलेसमस्तेऽस्मिस्तदाप्रभृतिशौनक ६७
शिवउवाच-
आख्यानंमहदाकर्ण्यप्रीतात्माशौनकः प्रिये
पर्यपृच्छत्पुनः सूतंसर्वसंदेहभंजनम् ६८
शौनकउवाच-
शुकेनोक्तंकदाराज्ञेगोकर्णेनकदापुनः
सुरर्षयेकदाब्राह्मैरेतदाख्याहिमानद ६९
सूतउवाच-
श्रीकृष्णनिर्गमात्त्रिंशद्वर्षाविधिगतेकलौ

भाद्रशुक्लनवम्यांवैकथारंभंशुकोऽकरोत् ७०
परीक्षिच्छ्रवणांतेतुगतेवर्षशतद्वये
शुचिशुक्लनवम्यांतुगोकर्णोकथयत्कथाम् ७१
कलौसहस्रमब्दानामधुनाप्रगतंद्विज
परीक्षितोजन्मकालात्समाप्तिंनीयतांमखः ७२
ईश्वरउवाच–
इति श्रुत्वावचस्तस्यशौनकोमुनिसत्तमः
पूर्णंचकारतंयज्ञंसहस्रपरिवत्सरम् ७३
ब्राह्मंपाद्मंवैष्णवंचकौर्म्यंमात्स्यं चवामनम्
वाराहंब्रह्मवैवर्त्तनारदीयंभविष्यकम् ७४
ग्राग्नेयमर्द्धंवैसूताच्छुश्रुवुर्लोमहर्षणात्
एतानितुपुराणानिद्वापरांते श्रुतानिहि ७५
शौनकाद्यैर्मुनिवरैर्यज्ञारंभात्पुरैवहि
यदातुतीर्थयात्रायांवलदेवः समागतः ७६
नैमिषंमिश्रिकंनामसमाहूतोमुनीश्वरैः
तत्रसूतंसमासीनंदृष्ट्वात्वध्यासनोपरि ७७
चुक्षुभेभगवान्रामः पर्वणीवमहोदधिः
ग्राषाढशुक्लद्वादश्यांपारणाहनिपार्वति ७८
पूर्वार्द्धयामवेलायांभावित्वात्कृष्णमायया
मुग्धोदर्भकरोरामःप्राहरल्लोमहर्षणम् ७९
ततोमुनिगणाःसर्वेहाकारपरायणाः
बभूबुर्नगजेत्यर्थंशोकदुःखाकुलांतराः ८०
ऊचुश्चरामंलोकेशंविनयेनक्षमापराः
ऋषयऊचुः–
रामराममहाबाहोभवतालोककारिणा ८१
ग्रजानतेवाचरिताहिंसाब्रह्मवधाधिका
व्यासशिष्योह्ययंसाक्षात्पुराणर्षिर्महातपाः ८२
ग्रस्मैह्यध्यासनंदत्तमस्माभिर्यज्ञकर्मणि
ग्रष्टादशपुराणानांवाचकायकृतक्षणैः ८३
कथायांजगदीशस्यदीर्घमायुश्चमानद

तद्भवांल्लोकरक्षार्थंधर्मसेतुप्रवर्तकः ८४
आविर्भूतोजगन्नाथोनिग्रहानुग्रहक्षमः
इत्युक्त्वामुनयस्तेतुबलदेवाग्रतः प्रिये ८५
तूष्णींबभूवुः सहसास्मरंतोनियतेर्बलम्
ततः प्रोवाचभगवान्रामः शत्रुनिषूदनः ८६
विप्रान्संप्रीणयंस्तास्तुलोकवेदपथानुगः
श्रीरामउवाच-
विप्राः शृणुतभद्रंवः कोपंत्यक्त्वासुदूरतः ८७
यदहंवेद्मिभवतामभीष्टंकार्यसिद्धिदम्
अस्यपुत्रोमहाज्ञानीभविष्यतिवरान्मम ८८
भवतामीप्सितंसर्वंशास्त्रंवैकथयिष्यति
यदर्थमहमाहूतस्तच्चकार्य्यंसमुच्यताम् ८९
ईश्वरउवाच-
इति श्रुत्वावचस्तेतुरामस्यसुमहात्मनः
बल्वलस्यवधार्थायप्रेरयामासुरीश्वरम् ९०
ततः सबल्वलंहत्वाप्रसाद्यमुनिपुंगवान्
प्रणिपत्याभ्यनुज्ञातस्तीर्थयात्रामुपागमत् ९१
तीर्थयात्रांगतेरामेशौनकाद्यामुनीश्वराः
लौमहर्षणिमाहूयसत्कृत्यनगनंदिनि ९२
तत्पदेस्थापयामासुः शेषंसंकीर्तनायवै
आग्नेयोत्तरमाहात्म्यं श्रीमद्भागवतांतकम् ९३
पुराणसप्तकंसार्द्धंशुश्रुवुर्हृष्टमानसाः
दशसप्तपुराणानिकृत्वासत्यवतीसुतः ९४
नाप्तवान्मनसस्तोषंभारतेनापिभामिनि
ज्ञात्वास्यहृदयंखिन्नंनारदोदेवदर्शनः ९५
समाजगाम भगवान्व्यासस्याश्रममुत्तमम्
तंदृष्ट्वावासवीसूनुःसत्कृत्यासनपूर्वकम् ९६
नारदंपूजयामासविधिदृष्टेनकर्मणा
अथतंनारदः प्राहकिंभवान्क्लिष्टमानसः ९७
ध्यायतेतत्समाचक्ष्वसर्वंसंदेहकारणम्

इति पृष्टःसमुनिनापराशर सुतोऽब्रवीत् ९८
ब्रह्मन्किंकारणंचेतोमोहेजानेनतत्त्वहम्
भवान्विज्ञानकुशलोज्ञात्वाततप्रब्रवीतुमे ९९
एवंविज्ञापितस्तेननारदोऽध्यात्मकोविदः
उवाचपरमंतत्वंयदुक्तंविधिनात्मने १००
नारदउवाच-
शृणुपाराशरेमत्तः कारणंयेनवैतव
असंपन्नंमनोभातिशास्त्रयोनेरपिप्रभोः १०१
त्वयावतीर्यलोकेस्मिन्वेदाव्यस्ताविभागशः
कृतानिचपुराणानिसेतिहासानिचानघ १०२
यत्रसर्वस्त्रयीधर्मोवर्णाश्रमनिवासिनाम्
निर्दिष्टोवीक्ष्यकालेननृणामल्पायुषांकलौ १०३
यत्राधिकारःसर्वेषांदृश्यतेश्रवणादिषु
स्त्रीशूद्रद्विजबंधूनांसाधूनांसाधूसंगमः १०४
धर्मादयोयथाशश्वद्वर्णितास्तेषुवैत्वया
प्राधान्येनतथानैववर्णितोमहिमाहरेः
सर्वधर्मक्रियाशून्येकलौदोषनिधौमुने १०५
नगतिःपापकर्तृणांविनाकृष्णकथाऽमृतम्
एषएवगुणोह्यस्मिन्घोरेकलियुगेनराः १०६
यत्कृष्णकीर्तनेनैवमुच्यंतेकर्मबंधनात्
यज्ञोदानंतपःकर्मज्ञानंध्यानंकृतादिषु १०७
सिद्धिदंचतथाब्रह्मन्नामकीर्त्तनकंकलौ
अतोवैकलिजातानामुद्धारार्थंनृणांभवान् १०८
श्रीमद्भागवतंनामपुराणंवर्णयत्वलम्
येनप्रवर्तितेनांगभवतोमानसंध्रुवम् १०९
तोषमेष्यतिलोकाश्चप्राप्स्यंतिकृतकृत्यताम् ११०
ईश्वरउवाच-
एवमादिश्यसमुनिर्व्यासायामिततेजसे
ययौयादृच्छिकःशश्वद्गायन्हरिगुणान्प्रिये १११
नारदेतुगतेपश्चाद्व्यासः सर्वार्थदर्शनः

चकारसंहितामेतांश्रीमद्भावतींपराम् ११२
पैलादींश्चतुरोवेदानध्याप्यविधिपूर्वकम्
पुराणसंहिताःसर्वाःसूतायप्रत्यपादयत् ११३
श्रीमद्भागवतंनामपुराणंब्रह्मसंमितम्
शुकमध्यापयामासविरतं लोकवेदतः ११४
सासंहिताभागवतीलोमहर्षणसूनुना
श्रुताकथयतोराज्ञेश्रौत्तरेयायवैशुकात् ११५
शौनकादिऋृषिभ्यस्तुतेनप्रोक्तायथार्थतः
वरीवर्त्तिपुराणानामुपरीयंनगात्मने ११६
अस्यांसंलग्नचित्तानांनृणामन्यत्रनोरतिः
जायतेमानसेकृष्णोनंदसूनुश्चकास्तिच ११७
यत्तुपृष्टंत्वयाभद्रेलोकनिस्तारहेतवे
श्रीभागवतमाहात्म्यंमह्यंसंकीर्त्तयेतिह ११८
तत्सर्वंचमयातुभ्यंनिर्दिष्टंगणपांबिके
नानेतिहाससहितंभक्तिमुक्तिप्रदायकम् ११९
यःशृणोतिनरोभक्त्यामाहात्म्यंपठतेऽपिच
अनुमोदनेनवासोपिलभतेपरमांगतिम् १२०
द्विजोऽधीत्याप्नुयाद्वेदान् क्षत्रियस्तुलभेज्जयम्
धनंवैश्यस्तथाशूद्रःश्रुत्वैवलभतेगतिम् १२१
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वरसंवादेश्रीमद्भागवतमाहात्म्येअष्टनवत्यधिकशततमोऽध्यायः १९८

एकोनद्विशततमोऽध्यायः

ऋृषयऊचुः-
कालिंद्याश्चैवमाहात्म्यंवदसूतसविस्तरम्
यस्मैप्रकाशितंयेनतदाख्यानसमन्वितम् १
सूतउवाच-
एकदापांडुतनयःशुश्रूषुःसौभरेःशुभम्
ज्ञानंतत्स्थानमभ्येत्यनत्वातमितिपृष्टवान् २
युधिष्ठिरउवाच-

ब्रह्मन्मार्तंडतनयातीरतीर्थेषुयच्छुभम्
तीर्थंतद्वदवैकुंठजन्मभूमिपरात्परम् ३
सौभरिरुवाच-
एकदातुमुनिश्रेष्ठौदिविनारदपर्वतौ
गच्छंतौखांडवंपश्यन्पश्यतःसुमनोहरम् ४
तत्रावतीर्णौनभस उपविष्टौतटेशुभे
कालिंद्याःक्षणविश्रांतौस्नातुंविविशतुर्जले ५
शिबिरौशीनरोराजामृगयांतौचरन्वने
दृष्ट्वातान्निर्गमापेक्षीनिषसादसरित्तटे ६
तौमुनीविधिवत्स्नात्वापरिधायांबराणिच
वंदितौशिरसाराज्ञातेनोपाविशतांतटे ७
तत्रालोक्यसुवर्णस्यशिबिर्यूपान्सहस्रशः
नारदंगर्वरहितः पर्वतंचजगादसः ८
शिबिरुवाच-
कथ्यतांमुनिशार्दूलौकस्येमायागयष्टयः
केनात्रविहितोयज्ञः सुरेणाथनरेणवा ९
मुक्त्वाकाश्यादितीर्थानियज्ञैरीज्येऽत्रकःपुमान्
कोविशेषोऽत्रतीर्थेभ्यस्तेभ्योविज्ञानसन्निधिः १०
नारदउवाच-
पुराहिरण्यकशिपुर्जित्वाशक्रादिदेवताः
त्रैलोक्यराज्यमासाद्यसोखर्वंगर्वमाददे ११
प्रह्लादस्तस्यतनयोनारायणपरायणः
तस्मैसोद्रुह्यताभीक्ष्णंपापात्मानष्टमंगलः १२
तद्रोहाद्विष्णुनासद्योनृसिंहतनुधारिणा
हत्वादैत्यपतिंस्वर्गराज्यंस्वः पतयेऽपितम् १३
स्वपदंप्राप्यदेवेशोबृहस्पतिमथावदत्
मूर्ध्नाभिवंद्यतत्पादौनारायणगुणान्स्मरन् १४
इंद्रउवाच-
गुरोनृसिंहरूपेणहरिणालोकधारिणा
दत्तंमेदेवताराज्यंयष्टुमिच्छामितंमखैः १५

स्थानंपवित्रंकथयब्राह्मणांश्चैवमेगुरो
नविधेयोविलंबोऽत्रत्वयानोहितकारिणा १६
बृहस्पतिरुवाच-
अस्तितेखांडववनंरम्यंपरमपावनम्
केतक्यशोकबकुलमधुमत्तमधुव्रतम् १७
तत्रास्तियमुनापुण्याधन्यात्रैलोक्यपावनी
ददातिस्मरणेस्वर्गंमरणेब्रह्मणःपदम् १८
तत्तीरेयजदेवेशकेशवंबहुभिर्मखैः
यदीच्छसिस्वकीयानांकल्याणंत्वंनिरंतरम् १९
नारदउवाच-
गुरोर्वचनमाकर्ण्यतूर्णमारुह्यवाहनम्
शिवप्रदमिमंशक्रः स्वकीयवनमागमत् २०
गुरुणासहदेवैश्चयज्ञोपकरणैस्तथा
अत्रागत्यविलोक्यैतद्वनंलेभेमुदंपराम् २१
गुरुणानोदितः शक्रोसप्तर्षीन्ब्रह्मणःसुतान्
वसिष्ठादीन्द्विजानवृत्वायजतिस्मजगत्पतिम् २२
तस्यप्रसन्नोभगवान्ब्रह्मेशाभ्यांसहागतः
क्रतौशतक्रतोर्यत्रमहानभवदुत्सवः २३
देवत्रयींसतांवीक्ष्यशक्रोवक्रमतिस्तदा
उत्थायासनतस्तूर्णंववंदेमुनिभिः सह २४
वाहनेभ्योऽवरुह्याशुतदंतेषूपविश्यते
आसनेषुसुहैमेषुबभुर्वेदीष्विवाग्नयः २५
सितरक्तांगयोः शंभुब्रह्मणोर्हरिराबभौ
नीलच्छविः पीतवासास्तडित्वानिवशृंगयोः २६
शक्रः प्रक्षाल्यतत्पादान्मूर्ध्नातज्जलमादधे
अब्रवीच्चमुदायुक्तोवचनंमधुराक्षरम् २७
इंद्रउवाच-
विहितोऽयमयादेवयज्ञोऽद्यसफलोऽभवत् २८
यद्ययंदर्शनंप्राप्तादुर्लक्ष्याअपियोगिभिः
एकेनैवत्वयाविष्णोकृतामूर्तिस्त्रयीमयी २९

गुणैस्तथापिनानात्वंस्फटिकस्येवतेमृषा
यथादारुषुगूढोऽग्निर्घर्षणेनविनाविभो ३०
नाविर्भवतिभूतानांहृत्सुभक्त्यातथाभवान्
एकस्यत्वयिभक्तिःस्यात्सर्वभूतोपकारिणी ३१
बभूवुःसुखिनोदेवाःप्रह्लादकृतयातया
वयंविषयिणोदेवत्वन्मायावृतचेतसः ३२
नजानीमःस्वरूपंतेयथावत्पादसेवकाः
भोब्रह्मन्भोमहादेवयुवामपिजगद्गुरू ३३
एतस्यैवगुरुत्वेनयतोनातः पृथक्युवाम्
यत्किंचिदुच्यतेवाचामनसाचविचिंत्यते
अस्यैवमायातत्सर्वेगद्वयीदूरवर्त्तिनः ३४
प्रपंचजातंयदिदंविलोक्यतेनसत्यमित्येवविचिंतयेन्नसः
भजंतिविष्णोश्चरणंतरंतितेयदंबुमूर्ध्नाहरधार्यतेत्वया ३५
विधेस्यभूयादनुजन्मपादयोरतिर्मदीयाकमलाभयोर्भृशम्
यदीक्षणक्षोभितयातयाजगत्समस्तमेतन्महदादिजायते ३६
भवादृशोनास्तिकृपापरोपरोविपक्षपक्षेवितनोषियत्सुखम्
स्वलोकशोकापनयेकृपालुतायदुच्यतेतेनृहरेतदज्ञता ३७
नारदउवाच-
इत्यभिष्टूयदेवेशंकेशवंप्रणतोऽग्रतः
तस्थौतद्वाक्यशुश्रुषादत्तचित्तोमहीयते ३८
एवमाकर्ण्यमुनयस्तुतिंतस्यरमापतेः
कृतामिंद्रेणसदसिसाधुसाध्वितिचाब्रुवन् ३९
शतमन्योवर्षशतंयेकुर्वंतिमहत्तपः
नतेषामीदृशीभक्तिर्यादृशीतवमाधवे ४०
नयोगःसुलभोष्टांगःख्यातिर्येनाधिगम्यते
समत्वेनचतत्त्यागस्तद्भक्तिःशरणंनृणाम् ४१
स्वधर्मार्जितवित्तैर्यद्यथा विधिविधीयते
कर्मतस्यार्पणंविष्णौभक्तिरेषाशिवप्रदाः ४२
ननिंदेद्देवतामन्यांविष्णुबुद्ध्यांचयोनमेत्
नत्यजेद्वेदवाक्यानिसभक्तोऽस्य हरेःप्रियः ४३

येशृण्वंतिहरेर्गुणानहरहःकुर्वंतियेकीर्तनंयेचास्यस्मरणंयदोश्चभजनंयेऽमुजयंतेत
था ४४
येदास्येननमंतिचैनममुनाकुर्वंतियेमित्रतांयेचस्वंचनिवेदयंतिनहितेवांच्छंतिमु
क्त्यादिकम् ४५
इंद्रभक्त्यात्वमप्येनमाराधयजगद्गुरुम्
नकामयेकिमप्यास्मत्कृतकृत्योभविष्यति ४६
नारदउवाच-
मुनिभिरितिशिक्षितेसमस्तसेव्यांत्रिभुवनपारपदप्रदांनिशम्य
हरिरनिशगुरुःकृतांस्वभक्तिंमधुरमुवाचवचोहरिंसमाजे ४७
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
कालिदीमाहात्म्येइंद्रयागविधिनोनामएकोनद्विशततमोऽध्यायः१९९

द्विशततमोऽध्यायः

श्रीभगवानुवाच-
नैतच्चित्रंसुराधीशमुनयोज्ञानवत्तराः
मदीयांपदवींभक्तिंगुर्वींकुर्बंतिसत्कृताम् १
एतेज्ञानोपदेष्टारस्त्रिलोकतलवासिनाम्
प्रवर्तयंत्यमीनष्टंवेदमार्गंयतःसदा २
भक्त्याभवानपिस्वर्गभोगासक्तोऽपिमांयतः
प्रपन्नोऽसिकिमाश्चर्यंयतस्तवगुरुर्गुरुः ३
यजस्वसुरशार्दूलमखैर्मांबहुदक्षिणैः
निष्कामस्त्वंसमीपस्थंतूर्णंप्राप्स्यसिमत्पदम् ४
प्रतियागंप्रयच्छत्वंरत्नप्रस्थान्यनेकशः
आख्ययास्थानमेतत्तेइंद्रप्रस्थंभविष्यति ५
विधेत्वमत्ररचयप्रयागंतीर्थपुंगवम्
सरस्वतींसमानीयगंगांचजनपाविनीम् ६
काशींचशिवकांचींचत्वमत्रस्थापयेश्वर
गोकर्णंचसमंगौर्यानिवासंकुरुसर्वदा ७
भोभोब्रह्मसुतायूयंज्ञानविज्ञानकोविदाः
निजयोगबलेनात्रकुरुध्वंतीर्थसप्तकम् ८

निगमोद्बोधकंतीर्थंत्वंगुरोप्रतिपादय
विनाध्ययनमप्यत्रस्नानाद्बोधोस्तुछंदसाम् ९
स्मृतिश्चजायतांपूर्वजन्मनस्तुपरात्मनोः
अहमारोपयाम्यत्रद्वारकांसुमनोहराम् १०
समुद्रेणसमंयत्रगोमत्यासंगमोऽभवत्
कोशलांचकरोम्यत्रमध्वरगयंचवासव ११
ययोरवतरिष्यामिवपुर्भ्यांरामकृष्णयोः
बदर्याश्रममप्यत्रनरनारायणास्पदम् १२
विदधामिसदायत्रवसामिसुरनायक
हरिद्वारंपुष्करंच तीर्थद्वयमनुत्तमम् १३
तदपिस्थापयाम्यत्रतवैवहितकाम्यया
नैमिषेयानितीर्थानियानिकालंजरेगिरौ १४
सरस्वतीतटेयानिस्थापयाम्यहमत्रवै
नारदउवाच–
शिवेशिवतरंवाक्यंहरेः श्रुत्वाकृतंचतत् १५
दृष्ट्वातदुक्तमपितेचक्रुर्ब्रह्मशिवादयः
सर्वतीर्थमयेऽमुष्मिन्स्थानेसत्रिदशाधिपः १६
स्वर्णयूपैर्बहुमखैरीजेभूयोरमापतिम्
रत्नप्रस्थानिविप्रेभ्यःकृष्णस्यपुरतोददौ १७
नारायणःसमस्तात्माममायमितितुष्यतु
इंद्रप्रस्थमिदंतीर्थंततःप्रभृतिकथ्यते १८
सर्वतीर्थमयेयत्रमृतोभूयोनजायते
इंद्रदत्तानितेलब्ध्वारत्नप्रस्थानिभूसुराः १९
तस्मैददुरवितथामाशिषंतत्रसंसदि
इंद्रायतवगोविंदोदानेनानेनतुष्यतु २०
तावकीभक्तिरप्यस्मिन्भूयादव्यभिचारिणी
कर्मभूमाविहविभोपुरायज्ञशतंकृतम् २१
तेनपुरायेनलब्धंतेसकामेनसुरास्पदम्
अधुनापूजितोविष्णुर्निःकामेनत्वयामखैः २२
स्वपदाद्विच्युतोभूमौभविष्यतिद्विजाग्रणीः

तत्रापिनिजधर्मेणविष्णुमाराधयन्भवान् २३
स्मरिष्यतिनिजंकर्मकृतमत्रमखादिकम्
तत्स्मृतेगृर्हमुत्सृज्यभवान्तीर्थानिपर्यटन् २४
जनकेनसमंशक्रतीर्थेऽस्मिन्संप्रपत्स्यते
चतुर्थाश्रममादायत्यद्मत्यत्रकलेवरम् २५
ततोविमानमारुह्यगणानीतंरविप्रभम्
भवान्दिव्यांगवान्भूत्वाप्राप्स्यति श्रीहरेः पदम् २६
नारदउवाच-
एवमाकर्ण्यविप्राणामाशिषंत्रिदशाधिपः
भविष्यपिशुनांचोक्तिंशिवेमुदमगात्तराम् २७
समाप्यविधिवद्यज्ञान्नात्रसौवर्णयष्टिकान्
माधवप्रमुखान्देवान्पूजितान्सव्यसर्जयत् २८
ऋत्विजोब्रह्मणः पुत्रानभ्यर्च्यचधनादिभिः
बृहस्पतिंपुरस्कृत्यययौशक्रस्त्रिविष्टपम् २९
तत्रराज्यंविधायेंद्रोहरिभक्तियुतःशिवे
अवातरद्भविद्मीणपुण्येहास्तिनपत्तने ३०
शिवशर्माद्विजःकश्चिद्वेदवेदांगपारगः
तस्यभार्यागुणवतीनाम्नान्वर्थवतीभृशम् ३१
तस्यांजातःसुवेलायामिंद्रःश्रीपतिसेवकः
ज्योतिर्विदःसमाहूतालग्नदृष्ट्वाबभाषिरे ३२
ज्योतिर्विदऊचुः-
शिवशर्मन्नयंबालः तवभावीहरिप्रियः
उद्धरिष्यतितेवंशंब्रूमः सत्यंनवैमृषा ३३
त्रयोदशाब्ददेहोयः सांगंवेदचतुष्टयम्
अधीतज्ञानसंपन्नोविवाहंतुकरिष्यति ३४
पुनरुत्पाद्यसत्पुत्रंवानप्रस्थोभविष्यति
तीर्थेषुपर्यटन्धीरः संन्यासंधारयिष्यति ३५
इंद्रस्यखांडववनेयमुनास्तिसरिद्वरा
तत्तीरेस्तिहरिप्रस्थंमरणंतत्रयास्यति ३६
नारदउवाच-

गणकोदितमाकर्ण्यशिवशर्माशिवंवचः
चकारविष्णुशर्माणंनाम्नानिजसुतंतदा ३७
तान्विसृज्यचवित्तेनचिंतयामासबुद्धिमान्
धन्योऽहयस्यमेपुत्रो विष्णुभक्तोभविष्यति ३८
साधयिष्यतिपुत्रोऽयमाश्रमांश्चतुरोमम
मरिष्यतिचसत्तीर्थेमदन्यः कोऽस्तिभाग्यवान् ३९
एवंविचिंत्यमनसा जातकर्माद्यकारयत्
शिशोर्द्विजातिप्रवरैःशिवशर्माशुभेऽहनि ४०
अथसप्तस्वतीतेषुवर्षेषुद्विजसत्तमः
सुतोपनयनंचक्रेचैत्रमास्यष्टमेऽब्दके ४१
आद्वादशाब्दादध्याप्यवेदानन्वगतःसुतम्
शिवशर्माशिवेराजन्युयोजसहभार्यया ४२
विष्णुशर्मास्वभार्यायांपुत्रमुत्पाद्यबुद्धिमान्
चकारतीर्थयात्रायांमनोनिर्विषयंस्वकम् ४३
अभ्येत्यपितरंप्राहनत्वातच्चरणद्वयम्
विष्णुशर्मामहाप्राज्ञोमुनिवाक्यमनुस्मरन् ४४
विष्णुशर्मोवाच -
अनुजानीहिमांतातविष्णुमाराधयाम्यम्
तृतीयाश्रममासाद्यसत्संगतिविधायकम् ४५
दारागारधनापत्यसुहृदःक्षणभंगुराः
बुद्बुदाइवतोयेषु सुधीस्तेषुनसज्जते ४६
स्वाध्यायेनचसंतत्यामयातीर्णमृणद्वयम्
तीर्थेषुकामरहितोयष्टुमिच्छामिकेशवम् ४७
सन्यस्तगुणरागोऽहपश्चात्तीर्थोत्तमेक्वचित्
स्थातुमिछाम्यहंतावद्यावत्प्रारब्धमस्तिमे ४८
इत्युक्तस्तेनपुत्रेणसपिताबुद्धिमत्तरः
स्मृत्वाज्योतिर्विदांवाक्यमाहसंसारनिस्पृहः ४९
शिवशर्मोवाच-
चतुर्थाश्रमकालोऽयममापिनिरहंकृतेः
विषयान्विषवत्त्यक्त्वासेविष्येकेशवामृतम् ५०

गृहेमममनः पुत्ररमतेनाद्यवार्द्धके
आनीतस्यवनाद्बद्धवागजस्येवनृपालये ५१
तवानुजंसुशर्मायंकुटुंबंधारयिष्यति
आवाभ्यामुज्झितंविद्याश्रीकुलाभ्यांयथानरम् ५२
प्रव्रजंतंतुमामेवतवमातापतिव्रता
अनुयास्यतिमार्तंडंयथाकांतिर्दिनात्यये ५३
तस्मादावामविज्ञातोतयाताततवांबया
गच्छावश्चिंतयंतौश्रीहरेःपादसरोरुहम् ५४
नारदउवाच-
इत्यालोच्यमुमुचूतौनिशीथेतमसावृते
सुप्तंकुटुंबमुत्सृज्यगृहान्निर्याय जग्मतुः ५५
सहैवपर्यटंतौतौसुतीर्थेनिरहंकृती
शिवेऽत्रशिवदेतीर्थेशक्रप्रस्थेसमीयतुः ५६
अत्रागतःस्वविहितान्पूर्वजन्मनियूपकान्
विष्णुशर्माशमालोक्यसस्मारहरिसंगमम् ५७
ऊचेचपितरंधीमान्शक्रआसमहंपुरा
मयात्रविहितायज्ञामाधवप्रीणनेच्छया ५८
अत्रैवमेप्रसन्नोऽभूत्केशवोभक्तवत्सलः
संतोषितामणिप्रस्थैःद्विजाःसप्तर्षयश्चमे ५९
तैरेववैष्णवीभक्तिर्दत्तामोचोभवेऽत्रच
विष्णवादिभिःसमस्तैस्तुतीर्थान्यत्रकृतानिवै ६०
सर्वतीर्थमयंतीर्थमिन्द्रप्रस्थमिदंकृतम्
अत्रैवमेमृतिश्चोक्तातैरेवमुनिपुंगवैः ६१
ततोहरिपदप्राप्तिरेतत्सर्वंस्मराम्यहम्
इमेगंगासरस्वत्यौनिजलोकाद्विरिंचिना ६२
समानीतेययोर्योगेप्रयागोऽयनिगद्यते
एषाकाशीशिवपुरीप्रयागात्पूर्वदेशके ६३
द्विपंचाशद्धनुर्मात्रिमृतोयस्यांनजायते
काश्याःपश्चिमकेभागेधनुषामेकविंशतिः ६४
शिवकांचीशिवेनैषास्थापितामृतमुक्तिदा

गोकर्णाख्यमिदंक्षेत्रंशंभोःपरमवल्लभम् ६५
धनुर्द्वयप्रमाणेतुभूमिभागेव्यवस्थितम्
इयंद्वारवतीपुण्यातीर्थराजस्यपश्चिमे ६६
धनुषांसप्ततिर्यत्रमृतोभावीचतुर्भुजः
अतोऽसौपूर्वदिग्भागेकोशलाजनवत्सला ६७
अष्टादशधनुर्मात्रेदृश्यतेपुण्यदर्शना
एतन्मधुवनंतातस्थापितंविष्णुनास्वयम् ६८
कोशलापश्चिमेभागेदशचापप्रमाणतः
अतउत्तरतस्तातनरनारायणास्पदम् ६९
एतदेकादशधनुर्भूमिदेशेचतिष्ठति
एतत्तीर्थंहरिद्वारमतोदक्षिणतःस्थितम् ७०
त्रिंशद्धनुर्महीदेशेदृश्यतेदेवदुर्ल्लभम्
एतत्तुपुष्करंनामतीर्थंतीर्थशिरोमणिम् ७१
द्वादशेष्वासमात्रेभूभागेभोताततिष्ठति
प्रयागादिकगव्यूतिःसप्तर्षीणांमहात्मनाम् ७२
पूर्वस्यांदिशितीर्थानिसप्ततत्तीर्थसप्तकम्
तीर्थसप्तककाशोस्तुसंतितीर्थान्यनेकशः ७३
पदेपदेयेषुमृतोजायतेसचतुर्भुजः
प्रयागादेकगव्यूतिमात्रेपश्चिमभूतले ७४
निगमोद्बोधकंनामतीर्थंगुरुकृतंपुरा
तीर्थसप्तकनिगमोद्बोधयोरंतरंमहत् ७५
इंद्रप्रस्थमिदंक्षेत्रंस्थापितं दैवतैः पुरा
पूर्वपश्चिमयोस्तातएकयोजनविस्तृतम् ७६
कालिंद्यादक्षिणेयावद्योजनानांचतुष्टयम्
इंद्रप्रस्थस्यमर्यादाकथितैषामहर्षिभिः ७७
देवत्रय्यांचयोह्यत्रत्यजत्यंगंभवत्यजः
नारदउवाच-
पुत्रस्यैतद्वचः श्रुत्वाशिवशर्माशिवेद्विजः ७८
प्रत्याहसंदिहानस्तंस्वपुत्रंसत्यवादिनम्
शिवशर्मोवाच-

कथमेतद्विजानीयांत्वंपुरासीःसुरेश्वरः ७९
त्वमत्रकृतवान्यज्ञान्मणिभिस्तोषिताद्विजाः
त्वदुक्तज्ञानवान्पुत्रयथाऽहस्यांतथाकुरु ८०
इंद्रप्रस्थस्यमर्यादाकुतएषात्वयाश्रुता
यतः प्रभृतितेजातामतिस्त्वंनात्यजोगृहम् ८१
मत्तएवत्वयाधीतंसांगंवेदचतुष्टयम्
पूर्वजन्मकृतेकृत्येज्ञानमासीत्कुतस्तव ८२
विष्णुशर्मोवाच -
ऋषिभिर्मेवरोदत्तःपूर्वजन्मस्मृतिप्रदः
तेभ्यएवास्यतीर्थस्यश्रुताह्येषास्मृतिर्मया ८३
निगमोद्बोधकेतीर्थेस्नानमत्रपितः कुरु
दुर्लभंप्राप्स्यसेज्ञानंपूर्वजन्मस्मृतिप्रदम् ८४
ममापिपूर्वजनुषः प्रवृत्तित्वंस्मरिष्यसि
एतत्तीर्थजलस्पर्शात्तातसत्यंवदामिते ८५
नारदउवाच-
शिवशर्मणिविप्रेंद्रेश्रुत्वैतत्स्नातुमुद्यते
निगमोद्बोधकेतीर्थेस्मृतयेपूर्वजन्मनः ८६
सिंहेनानुगतः कश्चिद्भिल्लोधावन्समागतः
अतित्रासपरीतांगोनिःश्वसन्श्रमविह्वलः ८७
हिंसात्मकोवर्त्मघातीवणिजांलुंठकःसदा
कृष्णांगःपिंगकेशश्चखर्वोमार्जारलोचनः ८८
कुंतहस्तोभीममूर्तिदेहीपाप्मेवभूयते
सतःपश्चात्कियद्दूरेसिंहमालोक्यतावुभौ ८९
पितृपुत्रौसमीपस्थेद्रुममारुह्यतस्थतुः
वदंतावितिहाकृष्णमोचयातोऽपमृत्युतः ९०
सकिरातस्तुराजेंद्रगृहीतुंवेगवत्तरम्
वीक्ष्यसिंहद्रुमंभीतःसमारोढुंप्रचक्रमे ९१
आरोहणंप्रकुर्वंतंसिंहोजग्राहवेगवान्
पादयोरथभूपृष्ठेपातयित्वारुरोहतम् ९२
अधःस्थितोकिरातोऽपिकुंतेनोदरमस्यवै

ददाररुधिरौघाक्तनिसृतांत्रकदंबकम् ९३
जातव्यथोविधायाथनादंपरमदारुणम्
सिंहःपिपेषभिल्लस्यशिरःसद्योममारच ९४
तयोःपंचत्वमापन्नेभूतसंघेऽत्रभूपते
विमानद्वयमुत्तीर्णंगणाभ्यांसहसत्पदात् ९५
नवीनघनवर्णाभ्यांस्फटिकोपलनिर्मितम्
चारुकुंडलकर्णाभ्यांमणिप्रकरमंडितम् ९६
शंखचक्रगदापद्महस्ताभ्यांचारुचित्रभृत्
दधद्भ्यांपीतवस्त्राणिहेममित्तिविभूषितम् ९७
प्रफुल्लांबुजनेत्राभ्यांपद्मरागगवाक्षभृत्
धीरनिह्दमंजीरपद्भ्यांरणितकिंकिणी ९८
प्रकोष्ठेवलयश्रेणींबिभ्रद्भ्यांचारुवेदिकम्
मुक्ताहारैर्मनोहारिवक्षोभ्यांसवितानवत् ९९
कुटिलालकवक्त्राभ्यांमुन्नतध्वजिराजितम्
भ्रूयुगाक्षिप्तपंचेषुधनुर्भ्यामुच्चतोरणम् १००
नासालञ्जितकीराभ्यांनिर्व्यूहशतशोभितम्
नवविद्रुमसच्छायतलाभ्यांदर्पणामलम् १०१
दिव्यांगौभिल्लपंचास्यौत्यक्त्वांगंप्राकृतंस्थितौ
पुरैवप्राणनिर्याणेतीर्थस्यास्यप्रभावतः १०२
तयोःसमीपमानीयविमानौतौहरेर्गणौ
ऊचतुस्तावथारूपवेषाकृतिधरौततः १०३
भोकिरातनरश्रेष्ठभोपंचास्यमृगाधिप
आवांजानीतमायातौवैकुंठात् श्रीहरेर्गणौ १०४
नेष्यामस्तत्पदंसत्यंयुवांतत्रनचोर्मयः
स्वंस्वंविमानमारुह्यगम्यतामाशुमाचिरम् १०५
स्वंस्वंविमानमारूढौतौकिरातमृगाधिपौ
ऊचतुर्विस्मयाविष्टौलक्ष्मीपतिगणौप्रति १०६
भोभोत्रिदशशार्दूलौश्रूयतांवाक्यमावयोः
युवयोर्दर्शनाज्ञातंज्ञानंतौपारमार्थिकम् १०७
अत्रजन्मनिनावाभ्यांकृतंसुकृतमल्पकम्

स्मृतिर्नोजायतेपूर्वकर्मणांवांप्रसादतः १०८
मांसाहारौप्राणिहिंसारतौक्रूरांतरेंद्रियौ
पापाचारकुलेजातौदर्शनेनभयप्रदौ १०९
आवामेतादृशेलोकेह्यभूतामितिपापिनौ
केनपुण्येनयुवयोर्जातंदर्शनमावयोः ११०
सारूप्यंचकुतःपुण्याद्यायावः श्रीहरेःपदम्
गणावूचतुः
तीर्थेत्रमरणान्नूनंसुराचार्यकृतेपुरा १११
युवयोर्दर्शनंजातंनौचसारूप्यमद्भुतम्
लक्ष्मीपतिपदप्राप्तिर्भविष्यतिचवांचिरम् ११२
तावत्पापानिगर्जंतिब्रह्महत्यादिकानिवै
जातंनदर्शनंयावत्तीर्थस्यास्यबृहस्पतेः ११३
यथातमांसिनश्यंतिभास्करस्योदयादिह
तथापापानिनिगमोद्बोधकस्यावलोकनात् ११४
इंद्रप्रस्थाख्यमेतद्वैक्षेत्रमिंद्रस्यपावनम्
तेनात्रपूजितोविष्णुःक्रतुभिर्बहुदक्षिणैः ११५
तुष्टेनविष्णुनातस्मैवरोदत्तोनिशम्यताम्
भोशक्रतावकेक्षेत्रेसर्वतीर्थमयेजनाः ११६
तनुंत्यक्षंतियेतेवैमत्तुल्याहिंसकाअपि ११७
नारदउवाच–
इत्युक्त्वातौगणः श्रेष्ठौनीत्वातौजग्मतुःपदम्
हरेर्यत्रगतोभूयोविश्वाब्धौननिमज्जति ११८
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेकालिंदी
माहात्म्येभिल्लसिंहवैकुंठारोहणंनामद्विशततमोऽध्यायः २००

एकाधिकद्विशततमोऽध्यायः

नारदउचाव–
अथावरुह्यतौवृक्षात्पितृपुत्रौसुविस्मितौ
दृष्ट्वाहरिपदप्राप्तिमभूतांपापिनोरपि १
शिवशर्माथविप्रेंद्रःश्रुत्वातीर्थस्तुतिंतदा

गणोक्तांविष्णुशर्माणमुवाचसुतमात्मनः २
शिवशर्मोवाच-
यत्पदंनसुलभंद्विजन्मनांसाधितेनतपसापिलीलया
प्रापतुःशबरदंष्ट्रिणौचतत्तीर्थराजमहिमाविलोक्यताम् ३
जन्मनःप्रभृतितावदामृतेः पापिनावपिचयत्प्रभावतः
जग्मतुःसुतहरेः सरूपतामस्यतीर्थवृषभस्यकास्तुतिः ४
शुद्धसत्वमपिरूपमैश्वरंक्वाम्बुजन्मजनिदेवदुर्ल्लभम्
तामसौक्वमृगनाथभिल्लकौकिंतुतीर्थमिदमद्भुतक्रियम् ५
तातभोपततिवेधसःपदात्जंतुरंतमधिगम्यकर्मणाम्
अत्रदेवगुरुनिर्मितेमृतिंप्राप्यमाधवपदान्नविच्युतिः ६
नारदउवाच-
एवंप्रत्यक्षमालोक्यमाहात्म्यंसद्विजोत्तमः
तीर्थस्यास्यगुरोराजन्स्नातुंतत्रप्रचक्रमे ७
मुखदंतपदानांसः कृत्वाशुद्धिंचचेतसः
पंचकच्छःशिखाबंधोपग्रहीमाधवंस्मरन् ८
अश्वक्रांतेतिश्लोकेनपाठेनतटमृत्तिकाम्
स्पृशंस्तयैवविदधत्तिलकंजलमाविशत् ९
तत्रप्रवाहाभिमुखोनिमज्जन्पुनरुत्थितः
पुनर्मग्नोहरिंस्मृत्वागंगांचजनपावनीम् १०
अयोध्याद्यापुरीः सप्तपुनरुत्थायसंस्मरन्
पुनर्ममज्जसलिलेगोविंदार्पितमानसः ११
कृत्वायथाविधिस्नानंधौतवस्त्रेचपर्यधात्
बहिरागत्यतिलकंचक्रेचद्विजसत्तमः १२
करपादशिखासूत्रैर्दर्भांश्चविदधद्वशी
संध्यांचकारविधिवत्तर्पणंत्रिविधंतथा १३
सूर्यायकुसुमैर्दत्त्वासजलैरर्घमादृतः
शिरोबद्धांजलिपुटोनमश्चक्रेद्विजोत्तमः १४
आवाहनादिनैवेद्यपर्यंतमथविप्रराट्
जगत्पूज्यपदाब्जस्यविष्णोःपूजामचीकरत् १५
कृतक्रियःसूपविष्टःतादृशंसुतमात्मनः

जगादसंस्मरन्पूर्वजन्मकर्माणिकृत्स्नशः १६
शिवशर्मोवाच-
विष्णुशर्मन्नतेमिथ्यावाक्यंतातयतःस्मृतिः
अत्रस्नानेनमेजातापूर्वेषांजन्मकर्मणाम् १७
आकर्णयमाहाभागकथयामितवाग्रतः
पुराहमन्वयेजातोविशांधनिकधर्मिणाम् १८
पितामेशरभोनाम्नाकान्यकुब्जेपुरेऽवसन्
वाणिज्येनार्जयन्वित्तंभूरिधर्मधनाश्रितः १९
व्यतीतस्तुमहान्कालस्तस्यनाभवदात्मजः
जरागृहीतदेहस्यतच्चिंतातुरचेतसः २०
अचिंतयदहोरात्रमितिवैश्यवरस्तदा
विनासुतेनमेव्यर्थंधनंभूर्यपिसंचितम् २१
अृतेसुतमृणीलोकेपितॄणांधनवानपि
सजलोऽपिविनावर्षंचातकानांयथाघनः २२
पुमान्जयतिसंतत्याविश्वंधर्मधुरीणया
शक्त्यात्रिविधयाराजाविपक्षमिवदुर्जयम् २३
प्रीणातिसंततिः शुद्धासुमनः पितृमानवान्
मित्रप्रत्यर्थ्युयदा सीनान्सूनृतावाग्यथेरिता २४
उदयस्थेनपुत्रेणवर्द्धतेस्वयशः पितुः
निर्मलंद्विजराजेननीरंतीरनिधेरिव २५
तस्माद्यतेत्सुतोत्पत्त्यैशरीरेणधनेनवा
तमृतेहिद्वयंव्यर्थंजनानांतडिदायुषाम् २६
एवंचिंतयतस्तस्यगृहेमुनिवरस्तदा
देवलोऽतीद्रियज्ञानोवरंदातुंसमाययौ २७
आगतंतंसमालोक्यप्रत्युत्थायासनात्पिता
दत्त्वार्घमथपाद्यंचवबंदेशिरसामुनिम् २८
उपवेश्यासनेदत्तेस्वहस्तेनपितामम
पप्रच्छचमुनिश्रेष्ठंदेवलंदेवदर्शनम् २९
स्वागतंतुमुनिश्रेष्ठशमस्तिभवतांकुले
तपःस्वाध्यायनियमानिष्प्रत्यूहाभवंतिच ३०

कालेचातिथयःकच्चिदायांतिभवदाश्रमे
कच्चिदाश्रमवृन्नावःफलंतिमनसेप्सितम् ३१
व्याघ्रादयोनकुर्वंतिकच्चिद्वैरंमृगादिभिः
त्वदीयाश्रममभ्येत्यभ्रातरोभ्रातृभिर्यथा ३२
तवाटनंभुविमुदेगृहिणामन्यथाकथम्
तेषांगृहाधिमग्नानांदर्शनंक्वभवादृशः ३३
हरिपादरजोबुद्धेः कामंकामोनकुत्रचित्
मुनेतवतथाप्याशुहेतुमागमनेवद ३४
शिवशर्मोवाच-
इत्युक्तस्तेनसमुनिर्देवलोदेवपूजितः
अब्रवीत्तन्मनोभावंज्ञातुकामोविशांपतिम् ३५
देवलउवाच-
वैश्यवर्यत्वयाभूरिधनंधर्मेणसंचितम्
करोषियेनधर्मज्ञनित्यनैमित्तिकीक्रियाः ३६
आदरंराजसदसिधनेन लभतेनरः
सुभटःशत्रुसंग्रामेविक्रमेणयथाजयम् ३७
गृहस्थस्तुधनंप्राप्यपरांपुष्टिंव्रजत्यलम्
शरत्परिणतंसस्यमनड्वानिवविश्पते ३८
धनिनांनविमुंचंतिबंधवोऽन्येचयेजनाः
मधुमत्सुमनोयुक्तं पादपंमधुपा इव ३९
धनाभावेनगृहिणांकृशत्वमुपजायते
सर्वतोग्रीष्मसमयेनभसांसरसामिव ४०
तद्धनंवर्त्ततेभूरिगृहेतवविशांपते
कुतः कृशत्वमंगानांगोप्यंचेन्नवदाद्यमे ४१
वैश्यउवाच-
हितोपदेशविरताभवंतः पितरोयथा
गोपनीयंभवद्भ्यःकिंमादृशैःपुत्रतांगतैः ४२
त्वत्प्रसादान्मुनिश्रेष्ठसर्वतोऽस्तिशिवंमम
वार्द्धकेपिसुताभावोदुःखमेकमिदंमम ४३
तस्मात्कृशत्वमंगानांविद्धिमेमुनिपुंगव

बिभेम्यहंपितृऋणाद्यतोऽध पतनंनृणाम् ४४
तमुपायंकुरुमुनेयेनस्यांसुतवानहम्
किंचित्कर्तुमशक्यंनभूतलेऽत्रभवादृशैः ४५
शिवशर्मोवाच-
इत्याकर्ण्यवचस्तस्यवैश्यवर्यस्यदेवलः
मनःक्षणंस्थिरंकृत्वादध्यौमीलितलोचनः ४६
संततेर्मत्पितुर्दृष्ट्वाप्रतिवंधस्यकारणम्
देवलोतींद्रियज्ञानीवभाषेकारयन्स्मृतिम् ४७
देवलउवाच-
एकदातुपुरावैश्यतवेयंधर्मचारिणी
यंचकारस्वचित्तेतंकथयामिमनोरथम् ४८
गुर्विणीयद्यहंगौरिभवेऽहशंभुवल्लभे
तदात्वांतोषयिष्यामिषड्रसान्वितभोजनैः ४९
धूपदीपकमालाभिस्तांबूलैर्नृत्यबाधकैः
तंत्रीमुखोद्गतैर्गीतैर्नानाविधविलेपनैः ५०
एवंप्रतिश्रुत्यपुरः सखीनांदयितातव
प्रतीक्षमाणातंकालंतस्थौतद्भक्तिसंयुता ५१
तस्मिन्नेवाभवद्गर्भोमासेऽस्यायोषितस्तव
ऊचुरेनांततः सख्यःसर्वाःसस्नेहचेतसः ५२
यस्त्वयावांछितोगर्भोगौर्यासंप्रतिपादितः
अतःप्रतिश्रुतंदेव्याः पूजनंसुभगेकुरु ५३
नोचेद्विकाराद्भवतिविघ्नंतुतदनुष्ठितात्
तोषितारोषिताश्चात्रदेव्योहिवरशापदाः ५४
सखीभिरितितेभार्याकथितेयंमुदान्विता
त्वामुवाचमहाभागाविनयेनपतिव्रता ५५
नाथपूजयितुंगौरींवांछाम्यखिलकामदाम् अं
यत्प्रसादादहंयातावांछितार्थवतीप्रभो ५६
वैश्यवर्यत्वमेवैतच्छ्रुत्वास्यावचनंशुभम्
अमन्यतगर्भवतीमेनांनिजगृहेश्वरीम् ५७
परमोत्सवयामोदमानः सद्योभवानपि

भृत्यानाज्ञापयामासपूजावस्तूपपादने ५८
तैरानाय्यसमस्तानिवस्तूनिभवताततः
अस्यैदत्तानिमध्वन्नद्राक्षागंधादिकान्यपि ५९
ततोनिजसखीःसर्वाअाहूयेदमिदंजगौ
सख्यःसमस्ताःसामग्रीसमानीतांबिकार्चने ६०
नीत्वापूजोपकरणंयूयंयातांबिकालयम्
संतोषयततांदेवींपूजयाविधिदृष्टया ६१
गुर्विणीतिकुलेऽस्माकंननिर्यातिगृहाद्बहिः
अतोऽहनागमिष्यामियूयंयाततदर्चने ६२
इत्याज्ञप्तास्तुताः सख्योनीत्वोपकरणंययुः
अंबिकालयमुन्मत्तभ्रमद्भ्रमरकेतनम् ६३
कोकिलाकुलसंकेलिसहकारकुलाकुलम्
हंससारसचक्राह्वमंडितंस्वच्छसारसम् ६४
महादेवगुणालापिशुकसारिसमावृतम्
हारपूरालतासेकेतत्परोमासखीधरम् ६५
उमापतेरुमापादन्यासपूतमहीतलम्
स्फटिकोपलसंबद्धजलाधारसुरद्रुमम् ६६
पार्वतीपतिसंनाटचगायद्गंधर्वनादितम्
मन्दानिलमनाग्धूतचूतचंपककोरकम् ६७
नृत्यन्मयूरनिर्ह्लादप्रतिनादिलतागृहम्
तल्लीलाचलविद्योतमानंरत्नलसत्प्रभम् ६८
तत्रगत्वागिरिसुतांप्रणेमुस्ताःसभर्तृकाः
प्रदक्षिणीकृत्यततोभक्त्यातांचबभाषिरे ६९
जगदंबेनमतुभ्यंशन्नोदेहिशिवप्रिये
त्वत्पूजार्थेसमानीतोबलिरेषप्रगृह्यताम् ७०
वैश्यस्तुशरभोनाम्नातस्यास्तिललितांगना
तयाभिलषितोगर्भस्तत्प्राप्तौतवपूजनम् ७१
त्वत्प्रसादादभूत्तस्याःसगर्भःशंभुवल्लभे
त्वत्पूजनायप्रहितोबलिरस्माभिरेषकः ७२
तस्याःकुलेगर्भवतीननिरेतिबहिर्गृहात्

अतःसानागतादेविप्रसीदैनगृहाणवै ७३
इत्युक्त्वातांतदावैश्यत्वत्स्त्रीसख्यस्तुतंबलिम्
समर्पयित्वाविधिवदानर्चुश्चंदनादिभिः ७४
प्रतिवाक्यमलब्ध्वातागौर्याप्रत्याययुर्गृहम्
निजसख्यैसमाचख्युर्विषण्णांतांशिवप्रियाम् ७५
तासामाकर्ण्यवचनमितिवैश्यतवाबला
उन्मनाश्चिंतयामासकुतोगौरीनपिप्रिये ७६
साजानातियथाभक्तिस्तत्पूजायाकृतामया
तादृशीनांकिमज्ञातंबाह्यंचाभ्यंतरंनृणाम् ७७
नगताहंयतस्तत्रतज्ञानात्यपिकारणम्
मयादत्तेनबलिनाकुतःसानतुतोषवै ७८
नाहमन्यत्प्रजानामितदतोषेहिकारणम्
ऋतेमदगतेस्तत्रनूनंरम्येतदालये ७९
यदतीतंनतच्छक्यमन्यथाकर्तुमद्यवै
गर्भान्मुक्तागमिष्यामितत्पूजायैतदालये ८०
नमस्तस्यैमहादेवभार्यायैसाकरोतुशम्
इत्युक्त्वादधतीगर्भंतस्थौवैश्यतवांगना ८१
शिवशर्मोवाच-
विष्णुशर्मन्निदंपूर्ववृत्तमाज्ञायमत्पिता
पप्रच्छमुनिशार्दूलंदेवलंज्ञानवत्तरम् ८२
वैश्यउवाच-
मुनेयथाप्रतिश्रुतापूजातेस्नुषयातया
तथैवाकारिपार्वत्याविषादेकारणंवद ८३
यतोऽसौनगतातत्रतज्ञानातिशिवास्वतः
सखीभ्यश्चोक्तमस्यास्तद्विषण्णासाकुतोभवत् ८४
देवलउवाच-
वैश्यवर्यशृणुष्वेदंकारणंकथयामिते
यतस्तस्याविषादोऽभूत्पार्वत्यागर्भनाशकः ८५
निवृत्तासुसखीष्वस्याःसंपूज्यस्कंदमातरम्
विजयापार्वतींप्राहकौतूहलसमन्विता ८६

विजयोवाच-
गिरिजेश्रद्धयातुभ्यंदत्तोमूभिरयंबलि
मानुषीभिः कुतः प्रीतानाभवस्त्वंवरानने ८७
धूपदीपकनैवेद्यैःपूजितातोषहेतवे
प्रत्युताकारणंदेवित्वंविषादंकुतोगता ८८
देवलउवाच-
इत्याकर्ण्यवचः सख्यादेवीदेववरार्चिता
अब्रवीद्विजयांवैश्यविषादेकारणंसखीम् ८९
पार्वत्युवाच-
विजयेसखिजानामिवैश्यभार्यागृहाद्बहिः
निर्गंतुमक्षमांगर्भधारणास्वविवेकतः ९०
समागतास्तुतत्सख्योमत्पूजायैतदीरिताः
मादृशोनचगृह्णंतिपरहस्तकृतंबलिम् ९१
तत्पतिश्चेत्समायास्यदभविष्यत्तदाशिवम्
तस्यास्तुमदवज्ञातोगर्भपातोभविष्यति ९२
यद्व्रतंपूजनंयच्चकर्तुंनक्षमतेंगना
तत्कारयतिनाथेननभंगःस्यात्तयोःसखि ९३
अथवाविप्रमुख्येनपृष्ट्वापतिमनन्यधीः
यतःस्वयमनागत्यतत्कृतंमेतयार्चनम् ९४
नकारितंचभर्त्रातोभवितादोहदोऽफलः
यद्युभौतौसमागत्यदंपतीश्रद्धयापुनः ९५
मांपूजयिष्यतः पुत्रोभविष्यतितदातयोः
देवलउवाच-
सशापोनत्वयावैश्यनचैवतवभार्यया ९६
श्रुतःसखीभिरस्यानोप्रसादश्चतयार्पितः
तयोरज्ञानतोवैश्ययुवयोर्नाभवत्सुतः ९७
अजानतोप्रतिविधिंपरत्रात्रसुखप्रदम्
एतत्तेकथितंवैश्यसंतानाभावकारणम् ९८
वसिष्ठेनयथापूर्वंदिलीपस्यमहीपतेः
तच्छ्रुत्वासयथाराजानंदिनींसमतोषयत् ९९

सस्त्रीकस्त्वंतथावैश्यगौरिंतोषयकामदाम्
सायथाराधिताराज्ञेदिलीपायददौसुतम् १००
आराधय तथागौरींत्वंसातुभ्यंचदास्यति
वैश्यउवाच-
दिलीपइतिभूपःकःकाचसानंदिनीमुने १०१
यामाराध्यसुतंलेभेसभूयोभूपसत्तमः
महेशादिसुरान्मुक्त्वात्रिवर्गफलदायिनः १०२
आराधिताकुतः सैवसुतार्थं तेनभूभुजा
एतत्सर्वसमाख्याहिमुनेयत्पृष्टवानहम्
श्रुत्वाततोगिरिसुतांसेविष्येसहभार्यया १०३
शिवशर्मोउवाच-
गदितमितिनिशम्यविष्णुशर्मन्विनययुतेनविशामदीयपित्रा
मुनिरितिगदितुंदिलीपवृत्तंजगतिपवित्रतरंविचक्रमेसः १०४

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेकालिंदी माहात्म्येएकाधिकद्विशततमोऽध्यायः २०१

द्व्यधिकद्विशततमोऽध्यायः

देवलउवाच-
शृणुष्वभोमहाप्राज्ञदिलीपस्यमहीपतेः
कथांदिव्यांविचित्रांचशृणुतांपापनाशिनीम् १
वैवस्वतमनोर्वंशेदिलीपोभूभुजांवरः
आसीत्प्राचीनबर्हिस्तुस्वायंभुवमनोरिव २
सतुधर्मभृतांश्रेष्ठोधर्मेणप्रतिपालयन्
महींमहीपतिर्लोकान्गुणैराह्वैररंजयत् ३
मगधाधिपतेःपुत्रीमहिषीतस्यभूपतेः
सुदक्षणाख्ययाख्याताशचीवासीद्दिवस्पतेः ४
गतेमहतिकाले तुमहिष्यांनाभवत्सुतः
दध्यावितिनिजस्वांतेससम्राट्कोशलाधिपः ५
रत्नाकरसुमेर्वादिनगरत्नैर्विराजितम्
धृतंभूवलयंदोषोभूषायैनाप्रजस्यमे ६

वर्गत्रयीयथाकालंसेवितानविरोधिता
तथापिमेऽनपत्यस्यनसौख्यंविद्यतेहृदि ७
यज्ञैराराधितोविष्णुरिंद्राद्याश्चसुरोत्तमाः
दीर्घिकाराममकूपाश्चकारिताःसर्वतोभुवि ८
गोभूहिरगयवासोभिःषड्रसान्वितभोजनैः
विप्राश्रतिथयश्चैवभक्त्यासंतोषितामया ९
बृत्यर्थंपृथिवीपालानुद्धृत्ययुधिधर्मतः
धनेनमहताकोशोमयाहिबहुलीकृतः १०
उन्मार्गगामिनोमत्तानिजधर्मविलंघिनः
विमुखःपितृदेवेभ्योदंडयास्तेदंडितामया ११
पंचपर्वसुवैष्णव्यांरवौपित्र्येचकर्मणि
दशम्यैकादशीतिथ्योर्नस्त्रीसेवाकृतामया १२
ऋृतुकालावधौस्नातांस्वस्त्रियंनाहमत्यजम्
अनृतावपितद्योग्येकालेचेत्प्रार्थितस्तया १३
तदातस्यांसकामिन्यांसकामंरमितंमया
एवंधर्मार्थकामामेयथाकालंनिषेविताः १४
महिष्यांकेनदोषेणजायतेमेनसंततिः
अतीतानागतज्ञानोवसिष्ठोगुरुरेवनः १५
कथयिष्यतितंदोषंयन्मेपुत्रोनजायते
देवलउवाच-
इत्यालोच्यसभूपालोगमिष्यन्नाश्रमंगुरोः
मंत्रिष्वारोपयामासकोशलामृद्धिकोशलाम् १६
अथप्रजासृजंदेवंपूजयित्वाश्रमंगुरोः
प्रतस्थातेपुत्रकामौदंपतीतौशुभेऽहनि १७
कतिचिद्वासरैर्मार्गमुल्लंघ्यैकरथेस्थितौ
तौदंपतीगुरोःसायमाश्रमंप्रापतुःशुभम् १८
वैश्वदेवांतसंप्राप्तातिथिसत्कारकृन्मुनिम्
हुताशनहुतद्रव्यप्रसरद्धूममालया १९
पवित्रयंतमात्मस्थान्मुनीनागंतुकानपि
मृगैर्दूर्वाप्रतानौघप्रपूर्णोदरमंथरम् २०

अभ्यागच्छद्भिरभितोमंडपंसमृगीगणैः
वासवृक्षमिलत्पक्षिकुलकोलाहलाकुलम् २१
परस्परविनिर्मुक्तवैरव्याघ्रमृगादिकम्
जपध्यानपरर्षीणां क्षणश्रांतश्रुतिध्वनिम् २२
अनध्ययनकालोत्थक्रीडारक्तकुमारकम्
तस्मिन्वसिष्ठमद्राष्टांदंपतीतौकृतक्रियम् २३
बृस्यांनिषण्णमव्यग्रमरुंधत्योपसेवितम्
सववंदेगुरोः पादौमहिषीसाचतत्स्त्रियः २४
आशिषागुरुरप्येनंयुयोजारुंधतीचताम्
अतिथिंतमथाभ्यर्च्यमधुपर्कादिभिर्गुरुः २५
अर्हणैरर्हतां श्रेष्ठोवसिष्ठइतिपृष्टवान्
वसिष्ठउवाच-
भोभोभूमिभृतांश्रेष्ठराज्येकुशलमस्तिते २६
कुलेचकच्चिल्लोकेचनिजधर्मानुवर्त्तिनि
धर्मेणपालिताकच्चित्वयावीरवसुंधरा २७
संवर्द्धयतितेकोशंर्मधीरिवसात्विकी
तवजानपदाराजन्पौराश्चस्थितिमात्मनः २८
सारवंतोविमुंचंतिकच्चिन्नांबुधयोयथा
स्नेहेनसाहचर्येणसहवासतयाप्रभो २९
लक्ष्मीनारायणायेतेकच्चित्तेपुरदंपती
काम्यव्रतानिराजेंद्रप्रजानांनगरेतव
फलंतिवांछितंकच्चिद्धरिचंदनवद्दिवि ३०
देवलउवाच-
पृष्टैवंसमुनिश्रेष्ठोवसिष्ठोमुनिपुंगवः
योगप्रभावोपनतैर्नृपंभोज्यैरभोजयत् ३१
अरुंधतीचतांराज्ञींबह्वादरसमन्विता
नानाव्यंजनपक्वान्नैरभोजयदुदारधीः ३२
कृतभोजनमासीनंस्वस्थः स्वस्थंमुनिर्नृपम्
पुनःपप्रच्छसंगृह्यपाणिनायाणिमानतम् ३३
वसिष्ठउवाच-

सप्तांगसंयुतंराज्यंनिजधर्मरतप्रजम्
प्रीतबंधुजनामात्यंशस्त्रास्त्रविधिवद्भटम् ३४
वश्यमित्रंहतामित्रंकृष्णार्चापरमानसम्
यंस्यास्तिनृपतेराज्यंस्वर्गराज्येनतस्यकिम् ३५
इक्ष्वाकुवंशराजानः पुत्रानुत्पाद्यधार्मिकाः
राज्यंचतेषुविन्यस्यप्रपन्नास्तपसिप्रभो ३६
त्वंयुवादृष्टपुत्रास्योनाधिकारीतपोविधौ
किमर्थमागतोह्यत्रराज्यंत्यक्त्वातथाविधम् ३७
राजोवाच–
ब्रह्मन्नाहंतपः कर्तुमागतस्तावकाश्रमे
स्वर्गकामनयात्यक्त्वाराज्यमत्रतथाविधम् ३८
ब्रह्मन्सत्य मिदंचोक्तंभवतायत्तपोवनम्
राज्यमारोप्यपुत्रेषुप्राप्ताइक्ष्वाकुवंशजाः ३९
नतैस्त्यक्तंमहीराज्यमिदंस्वर्गगतैरपि
तन्मूर्तिरस्यांविमनास्तिष्ठतिह्येवसंततिः ४०
यथाबाल्यंगतंतातयौवनंचसमागतम्
यास्यत्यदोपिचतथाजराप्येष्यतिनिश्चितम् ४१
जरसोऽनतरंमृत्युःपुरुषस्यनसंशयः
मृत्युंगतेमयिब्रह्मन्विनातनयसंभवम् ४२
कस्येदंजगतीराज्यंभविष्यतिगुरोवद
तस्मादपत्यहीनस्यराज्येऽपिममतिष्ठतः ४३
ममत्वंविद्यतेनात्रपुरस्तात्तदभावतः
वर्गत्रयस्यवैसम्यक्संवेत्तात्वंगुरोमम ४४
केनदोषेणमेपुत्रोजायतेनतपोनिधे
ध्यानेनदोषमालोक्यतंगुरोकथयाशुमे ४५
तस्यप्रतिक्रियांकुर्यांश्रुत्वासंतानलब्धये
देवलउवाच–
इत्याकर्ण्यवसिष्ठस्तुवचस्तस्यमहीपतेः ४६
उवाचसंततिस्तंभहेतुंवीक्ष्यसमाधिना
वसिष्ठउवाच–

त्वंपुराराजशार्दूलसंसेव्यसुरनायकम् ४७
स्नातामिमांवधूंस्मृत्वाचलितोनिजमंदिरम्
गच्छतस्त्वरयातातसंतानोत्कंठितस्यते ४८
आसीत्सुरतरोर्मूलेकामेधनुः स्थितापथि
उत्पादितात्वयातस्याः पूज्यांघ्रिरजसोऽतिरुट् ४९
प्रदक्षिणनमस्कारसदाचारमकुर्वता
साऽशपत्त्वामतिक्रोधात्पुत्रोनोत्पत्स्यतेतव ५०
ममसंतानशुश्रूषांयावत्त्वंनकरिष्यसि
गच्छंस्त्वमृतुदानायत्वरयासुतकामुकः ५१
तन्मनानाश्रृणोः शापंनयंताद्मनिनादतः
तस्याःसुतासुतांधेनुंनंदिनींससुतांमम ५२
आराधयानयावध्वासार्द्धंसादास्यतेसुतम्
देवलउवाच-
इत्युक्तवतितत्रर्षौवसिष्ठेसातुनंदिनी ५३
तपोवनात्समायातावत्सस्नेहस्नुतस्तनी
तांदृष्ट्वाहृष्टहृदयोवसिष्ठोमुनिपुंगवः
उवाचभूपतिंभूयोदर्शयित्वाचनंदिनीम् ५४
वसिष्ठउवाच-
राजन्समागताह्येषास्मृतमात्रशुभाह्वया
अतोविद्धिसमीपस्थांकार्यसिद्धिमिहात्मनः ५५
आराधितानुगत्येयंत्वयारण्येतथाश्रमे
वध्वाप्रसादात्तेपुत्रंदास्यतेनात्रसंशयः ५६
यथानाभिभवेदेनांजंतुःकश्चिद्वनोद्भवः
तथाचारयराजेंद्रवनेहिंस्त्रोधनुर्द्धर ५७
देवलउवाच-
तथेतिलघुवादिनेनृपतयेस्नुषायैचसद्मपाशयनहेतवैसदुटजंददौतापसः
सतत्रसहभार्ययासमधिशय्यदर्भास्तृतांमहीमगमयन्निशांनियतमानसो
विश्पतिः ५८

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेकालिदी
माहात्म्येद्व्यधिकद्विशततमोध्यायः २०२

त्र्यधिकद्विशततमोऽध्यायः

देवलउवाच
अथोषसिनराधीशः पूजितांकुसुमादिभिः
महिष्यानंदिनींधेनुंनीत्वाररायंजगामसः १
गच्छंतीमनुतांदेवींछायेवनृपतिर्ययौ
खादंतीमनुशष्पादिसोऽपिमूलाद्यभन्नयत् २
तरुच्छायामुपासीनामनुसोऽप्युपविष्टवान्
पिबंतीमनुपानीयंराजापिसलिलंपपौ ३
सचराजामृदुग्रासैर्दंशापनयनेनच
कंडूयनैः कामधेनुंगुरोरेवमसेवत ४
अथप्रत्याश्रमंसायंन्यवर्त्ततमहीपतेः
अंगंपवित्रयंतीसाखुरोद्धूतैरजःकरौः ५
अधोभारेणगुरुणागच्छंतीमंथरंबभौ
महीपालमहत्कार्यभाराक्रांतेवनंदिनी ६
तांमुनेराश्रमाभ्याशेराज्ञीप्रत्युज्जगामह
चंदनान्ततनैवेद्यधूपादीनुपनीयच ७
तांपूजयित्वाविधिवत्प्रणम्यचपुनः पुनः
कृत्वाप्रदन्निणंराज्ञीतस्थौप्रांजलिरग्रतः ८
सागृहीत्वा चतांपूजांविहितां श्रद्धयातया
राज्ञानिश्चलमास्थायययौताभ्यांसहाश्रमम् ९
आराधयतितामेवंदिलीपेतुदृढ्रवते
एकाधिकाव्यतीयायदिनानांवेश्यविंशतिः १०
अथभूमिपतेस्तस्यभावजिज्ञासयातुसा
विवेशनिर्भयस्वांतासशष्पांहिमवद्गुहाम् ११
पश्यताहिमवत्सानुशोभामथमहीभृता
अलन्तितागमः सिंहोबलाज्जग्राहनंदिनीम् १२
साचक्रंदभृशंधेनुर्दुःखितेवदयास्वना
चित्तेधनुर्भृतस्तस्यजनयंतीदयो दयम् १३
तदाक्रंदितमाकरार्यतस्याः सजगतीपतिः
हिमवत्सानुसंलग्नांनिजदृष्टिंन्यवर्त्तयत् १४

उपर्युपरितांधनुंस्त्रवदश्रुमुखींनृपः
तीक्ष्णदंष्ट्रनखंसिंहंदृष्ट्वासव्यथितोऽभवत् १५
गृहीतांतेनसिंहेनतामालक्ष्यधनुर्द्धरः
निषंगाद्बाणमुद्धर्तुंप्राहिणोद्दक्षिणंभुजम् १६
बाणमुद्धृत्यतूणीरान्निहंतुंतंमृगाधिपम्
गुणेनापूर्णमायोज्यचकर्षवसुधाधिपः १७
जडीभूतः समस्तांगस्तत्सिंहालोकनेनसः
नाशकद्बाणमुत्सृष्टुंराजासीद्विस्मितस्ततः १८
तादृशंनृपमालक्ष्यजगादसमृगाधिपः
नरवाचाभृशंभुयोविस्मयंप्रापयन्निदम् १९
सिंहउवाच-
दिलीपंत्वामहंराजन्जानामिरविवंशजम्
त्वंचजानीहिमांशंभोर्गणंकुंभोदराभिधम् २०
देवदारुरयंयस्तेवर्त्ततेदृष्टगोचरे
पार्वत्यापुत्रवद्वीरपालितः स्निग्धचित्तया २१
एकदामुष्यवन्येनगजेनाघर्षताकटम्
उदपाटिमहाराजवल्कलंमृदुलंभृशम् २२
एनंतादृशमालक्ष्यमृडानीकरुणान्विता
मामत्रस्थापयामाससिंहंकृत्वास्यरक्षणे २३
ममाहचेतिसादेवीकुंभोदरनिशम्यताम्
योऽत्रजंतुःसमागच्छेत्तंखादेस्त्वंवसन्निह २४
ततः प्रभृतिराजेंद्रतदाज्ञांपालयन्नहम्
पालितांत्रिदशैःसर्वैःकंदरेऽत्रवसाम्यहम् २५
जडीभावेस्वदेहस्यत्वयाकार्योनविस्मयः
महतीशांभवीमायावर्त्ततेऽत्रहिमाचले २६
अन्यस्मिन्निवसिंहेत्वंप्रहर्तुंनमयिक्षमः
यतोमत्पृष्ठमारुह्यवृषमारोहतिप्रभुः २७
निवर्त्तस्वनिजंदेहंरक्षसर्वार्थसाधनम्
दैवेनासादितावीरगौरियंभक्षणायमे २८
देवलउवाच-

इत्याकरार्यवचस्तस्यवीरसंबोधनान्वितम्
प्रत्युवाचदिलीपस्तंसजडीभूतविग्रहः २९
राजोवाच-
सर्गस्थितिविसर्गाणांकारणंजगतः शिवम्
अंबिकांजगदंबांचनमामिमृगराजतौ ३०
त्वंचतत्सेवकत्वेनमान्योममम‍ृगाधिप
ब्रवीमियदहंवाक्यंश्रुत्वाशाधिकरोमिकिम् ३१
वसिष्ठोब्रह्मणःपुत्रोगुरुर्नोविदितस्तव
तस्येयंनंदिनीनामधेनुःसर्वार्थसाधिका ३२
संतानोत्पत्तयेतेनदत्ताराधयितुंमम
येयमाराधितासम्यक्‌दिनानिकतिचिन्मया ३३
लघुतर्णक मातेयंधृतातेगिरिकंदरे
शंभुभृत्याद्बलात्त्वत्तोशक्तामोचयितुंमया ३४
अहंतस्यमुनेरग्रेगच्छाम्येनामृतेकथम्
कामधेनोस्तुदौहित्रीजगत्सेव्यायशस्विनी ३५
अनयासदृशीनान्यागौर्ययातोषयामितम्
तस्माद्विमुच्यगामेनामग्रयांकुरुनिजाशनम् ३६
ददामिदेहमात्मीयमपकीर्तिमलीमसम्
एवंनधर्महानिः स्यादृषेस्तवतुभोजनम्
गवार्थेत्यजतः प्राणान्ममापिगतिरुत्तमा ३७
देवलउवाच-
एवमाकरार्यसिंहेनकृतेमौनेविशांपते
तदग्रेऽवाङ्मुखोराजान्यपतद्धर्मकोविदः ३८
तस्यप्रतीक्षमाणस्यसिंहपातंसुदुःसहम्
पपातोपरिपुष्पाणांवृष्टिर्मुक्तासुरेश्वरैः ३९
पुत्रोत्तिष्ठेतिवचनंश्रुत्वाराजासउत्थितः
जननीमिवतांधेनुंददर्शनमृगाधिपम् ४०
तंविस्मितमुवाचेदंनंदिनीनृपसत्तमम्
नंदिन्युवाच-
माययासिंहरूपिरयात्वंमयासिपरीक्षितः ४१

मुनिप्रभावान्मांराजन्गृहीतुंनक्षमोंऽतकः
मनसापिकुतोऽन्येषां यद्ग्रहेशक्तिरंगिनाम् ४२
स्वशरीरस्यदानेनत्वंमांरक्षितुमुद्यतः
अतस्तेऽहप्रसन्नास्मिवृणीष्ववरमीप्सितम् ४३
राजोवाच-
नगुप्तंदेहिनामंतर्वर्तिवृत्तं भवादृशम्
अतोजननिजानासिवांच्छितंममदेहितत् ४४
मगधेशसुतायांमेवंशकर्तारमात्मजम्
प्रयच्छकिंचित्स्वच्छानांनासाध्यंहिभवादृशाम् ४५
इत्युक्त्वांजलिमाधायतत्पुरस्तस्थिवान्नृपः
तूष्णींतदुत्तरापेक्षीतत्पुरोबद्धलोचनः ४६
देवलउवाच-
निशम्येतिवचस्तस्यभूपतेरिदमब्रवीत्
नंदिनीपितृदेवर्षिनरभूतार्थसाधिका ४७
नन्दिन्युवाच-
पुत्रपत्रपुटेदुग्ध्वापयोममपिबेप्सितम्
आश्रमेगुरुणाज्ञप्तः पुनःपास्यसिशेषितम् ४८
भवितावंशकर्तातिसुतःशस्त्रास्त्रतत्ववित्
देवलउवाच-
इत्युक्तःसौरभेय्यातामुवाचविनयेनसः ४९
दिलीपउवाच-
मातस्तवैवपास्यामिशेषंसर्वक्रियाविधेः
तृप्तोऽहमातरासाद्यमिष्टंतेवचनामृतम् ५०
नान्यदिच्छामिसारंगःकादंबिन्यायथाजलम्
तवशुश्रूषणान्मातरभवंसकलोद्भवः ५१
समस्तजनपूज्यायाविद्यायाइवमूढधीः
तवमातामहीदत्तः शापोऽप्यासीद्गुरोमम ५२
तमृते पुत्रलाभोमेकुतस्तवचदर्शनम्
वरायैवतथाप्यंबसमाराध्याभवादृशः
नहिकश्चिद्द्विषाकांक्षीमहादेवात्त्रिवर्गदात् ५३

देवलउवाच-
श्रुत्वेतितद्वचःसागौःप्रसन्नासाधुसाध्विति
आभाष्यहिमहादर्पाययौतेनसहाश्रमम् ५४
पूर्वेद्युरिवतत्रापिपूजिताराजभार्यया
प्रसन्नासावभौधेनुःकार्यसिद्धिरिवांगभाक् ५५
मुखंप्रसन्नमालक्ष्यमृगाक्षीसाक्षितीशितुः
अज्ञासीत्तंनिजंकार्यसिद्धंयत्नस्तुयत्कृते ५६
अथतौदंपतीधेन्वाविधिवद्विहितार्चया
तयासहगुरोरग्रेकृतकृत्यस्यजग्मतुः ५७
निरीक्ष्यतौमुनिवरः प्रसन्नमुखपंकजौ
अतींद्रियज्ञाननिधिः प्रोवाचेदंप्रहर्षयन् ५८
वसिष्ठउवाच-
राजञ्ज्ञानामिगौरेषाप्रसन्नावामभूत्किल
अपूर्वायुवयोरद्यमुखकांतिर्हिलक्ष्यते ५९
सुरभिःसुरशाखीचविश्रुतौकामपूरिणौ
तदपत्यंसमाराध्यसिद्धोऽथ स्यात्किमद्भुतम् ६०
योददातिनिखिलंमनोरथंकीर्तितेयमनधापिदूरतः
श्रद्धयानिकटएवसेविताकिंपुनः सुरतरंगिणीवसा ६१
ज्ञानतोविदितमद्भुतंमयात्वत्कृतंयदनयापरीक्षणम्
भूपतेत्वमपिधर्ममात्मनोरक्षसिस्मचयथाचतत् ६२
त्वय्यसौमममनोऽनुकूलतांभावमात्मनिविबुध्यतेतथा
तुष्यति स्मकमलायथाहरेः पार्वतीवगिरिशस्यसज्जते ६३
रात्रिरत्रसहाभार्ययानयाधेनुपूजनपरेणनीयताम्
भूपभव्यभवतागमिष्यतेश्वः समाप्तविधिनानिजांपुरीम् ६४
देवलउवाच-
वैश्यैवंधेनुमाराध्यसभार्यःप्राप्तवांछितः
प्रातर्युक्तरथः प्राप्यगुरोराज्ञामगाद्गृहम् ६५
कतिचिद्वासरैस्तस्य दिलीपस्याभवद्रघुः
यस्यनाम्नारघोर्वंशः पृथिव्यांविश्रुतोऽभवत् ६६
यःपठिष्यतिभूपस्यदिलीपस्यकथामिमाम्

धनंधान्यंसुतंवैश्यलप्स्यतेसपुमानिह ६७
शरभवरसुताप्तयेस्वबुद्ध्यासममनयापरितोषयाशुगौरीम्
त्वमपिकुलधुरंगुणान्वितंसासुतमनघंखलुदास्यतेचतुभ्यम् ६८
शिवशर्मोवाच-
मुनिरितिचरितंदिलीपराज्ञोललिततरंशरभायपुरयमुक्त्वा
अभिमतगतमात्मनः प्रपेदेविधिमुपदिश्यचपूजजनेंबिकायाः ६९
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेकालिदीमाहात्म्येत्र्यधिकद्विशततमोऽध्यायः २०३

चतुरधिकद्विशततमोऽध्यायः

शिवशर्मोवाच-
विष्णुशर्मंस्ततोवैश्यःशरभःसहभार्यया
नीत्वापूजोपकरणंययौश्रीचंडिकालयम् १
तत्रतौविधिवत्स्नात्वासुमनोधूपदीपकैः
आनर्चतुर्भक्तियुक्तौचंडिकांपुत्रकाम्यया २
श्रद्धयापूजितातांभ्यांदिनैःसप्तभिरंबिका
उवाचवाचाप्रत्यक्षंभूत्वाविशदमानसा ३
पार्वत्युवाच-
भोभोवैश्यप्रसन्नास्मिभक्त्यासुदृढयातव
ददामिपुत्रंतेसाधोयदर्थेयत्नवानसि ४
गच्छत्वंमाविलंबस्ववनमैंद्रंचखांडवम्
तत्रतीर्थंमहापुरयमिंद्रप्रस्थाख्यमुत्तमम् ५
निगमोद्बोधकंतत्रतीर्थंनिखिलकामदम्
बृहस्पतिकृतंतत्रस्नाहित्वंसुतवांछया ६
भविष्यतिसुतस्तातततवस्नानेनतत्रहि
तत्रस्नात्वामयाप्यंगलब्धः स्कंदःसुरारिहा ७
शिवशर्मोवाच-
इत्याकरर्यवचोदेव्याः पितामसहस्त्रिया
अत्राजगामसत्तीर्थेसस्नौचसुतवांछया ८
उंपस्करवतीर्धेनूर्द्विजेभ्यः प्रददौशतम्

देवान्पितॄंश्चसंतर्प्ययथाविध्यत्रबुद्धिमान् ९
सप्तरात्रमुषित्वातुदंपतीयतमानसौ
जग्मतुःस्वगृहानिष्टलाभोत्फुल्लमुखांबुजौ १०
तस्मिन्नेवाभवद्गर्भोमासिमातुर्ममान्वहम्
व्यतीतेनवमेमासिजातोऽहदशमेशुभे ११
विष्णुशर्मन्यदुक्तंतेपुरावृत्तमिदंमया
दशाब्दद्वयमेवैतच्छ्रुतंसर्वंपितुर्मुखात् १२
एकदाक्षममालोक्यगृहकर्मणिमांपिता
गृहंमामर्पयामास विश्वाद्वैराग्यमाप्नुवन् १३
मांचोवाचसधर्मात्मागोविंदासक्तमानसः
विनिंदन्विषयासक्तिंविष्णुभक्तिंस्तुवन्मुहुः १४
पितोवाच-
सुमतेवार्द्धकंप्राप्तंपलिताश्चिकुराम्मम
गोविंदचरणांभोजंसेविष्येसाधुसेवितम् १५
तत्सैवयाभवेत्स्वच्छंमनोयस्यचसुस्थिरम्
सपुमानात्मसंतुष्टोनकिंचिदभिबांछति १६
निष्कामः सुखदुःखाभ्यांभुंजन्सुकृतदुष्कृते
प्राकृतेतत्समाप्तौचत्यजन्देहंभवत्यजः १७
तांवद्द्रव्यंगुणसुखंयावत्प्राप्तंनचित्सुखम्
तत्प्राप्तौतद्भवेत्तुच्छंसुधायाइवतक्रकम् १८
हरेर्मायाबलवतीयंमोहयतिदेहिनम्
हितानितंनजानातिसयथामदिरामदः १९
प्रवृत्तिंचनिवृत्तिंचविद्ययाविद्ययाचसः
करोतिस्वेच्छयाकालेबाललीलोहिसप्रभुः २०
वेदोदितंयदाकर्मक्रियतेफलमिच्छता
प्रवृत्तिंसापरातातततेषामर्पणमीश्वरे २१
यथानिर्दग्धाबीजानिनप्ररोहंतियत्नतः
यथाकर्माणिविश्वेशेनिःकामेनार्पितानितु २२
कार्मणांचलयोमोक्षः सुखदुःखप्रदायिनाम्
तदुत्पत्तिस्तुबंधःस्यादित्यसौशास्त्रनिर्णयः २३

अतोऽहकर्मवेदोक्तंकुर्वन्नाभिवषन्फलम्
पर्यटिष्यामितीर्थेषुहृदिभक्तिदधद्धरेः २४
एवंप्रारब्धकर्माणिभुंजन्नान्यान्यतर्जयन्
हनिष्यामिजगद्रोगंपीत्वासत्संगमौषधम् २५
शिवशर्मोवाच-
एवमाकर्ण्यवचनंतस्याहंपितुरात्मनः
अवदंविष्णुशर्मस्त्वंतन्निशामयतत्वतः २६
वैश्यपुत्रउवाच-
अयंजनोदुराराध्यःकथयिष्यतिनोयशः
दुष्टकुटुंबादुद्विज्यनिःसृत्यगतइत्ययम् २७
इयंविष्णुपदीतातभुवनत्रयपावनी
स्मृताहरत्यघंदूरात्कस्मादेनांविमुंचसि २८
पापकारीजनस्तातम्रियते मगधेतुयः
सोप्यस्तपापोगंगायांस्वर्यातित्यजमाशुभम् २९
पुत्राःषष्टिसहस्राणिसगरस्यमहात्मनः
कपिलक्रोधनिर्दग्धागतायत्स्पर्शनाद्दिवम् ३०
तामिमांत्रिदिवश्रेणींमुक्तेरपिविधायिनीम्
मुमुक्षुसेवितांतातमुक्त्वामान्यत्रगम्यताम् ३१
मावजानीहिसामीप्येगंगात्रिदशमानिताम्
यदिच्छसिमहाभागसेवितैषाप्रदास्यति ३२
तिर्यंचोऽपिविनाज्ञानाज्जलेचेत्स्युर्गतासवः
भवेयुस्तर्हितेब्रह्मसाकथंत्यज्यतेत्वया ३३
शिवशर्मोवाच-
निशम्यैतद्वचस्तातस्ततोममऋतप्रियः
उवाससदनेसर्वविषयेभ्यःपराङ्मुखः ३४
त्रिषुकालेषुंगगायांप्रत्यहंस्नानमाचरन्
पुराणंस्याद्गृहेयत्रतत्रयातिसनित्यशः ३५
एकदाकर्णयन्धीरोयमुनातीर्थगौरवम्
तत्रशुश्रावमाहात्म्यमस्यतीर्थस्यपुत्रसः ३६
अविमुक्तहरिद्वारप्रयागेभ्यश्चपुष्करात्

अयोध्याद्वारिकाकांचीमथुराभ्यस्तथान्यतः ३७
सर्वतीर्थमयस्यास्यपुरायंशतगुणाधिकम्
कथितंतेनविदुषासुतेनाकरार्यमत्पिता ३८
त्यक्त्वागृहमगादत्रतीर्थेसर्वैरलक्षितः
आवामिवमहाभागोगोविंदपदसेवकः ३९
अत्रागत्यमहाभागोमत्पितामोक्षवांछया
निगमोद्बोधकेतीर्थेत्रिकालंस्नानमाचरन् ४०
उवासकतिचिन्मासानत्रतीर्थोत्तमेहिसः ४१
कुर्वन्निजक्रियांधीमान्निस्पृहोप्यजवेश्मनि
एकदासहसातस्यज्वरोऽभूदतिदारुणः ४२
महत्यापीडयातस्यमुमोहगतचेतनः
मुहूर्तंसपितामुह्यंतदवस्थोव्यतिष्ठित ४३
पश्चात्समागतप्राणोविचिंत्ययदिदंतदा
अहोमेकष्टमापन्नंदूरेपुत्रःसधार्मिकः ४४
योमांज्वरवितप्तांगमाश्वासयतिबुद्धिमान्
अगम्यागमनंपापंकृतंयन्मेसुदारुणम् ४५
प्रायश्चित्तंनतस्यापिकृतंकामेगतिर्भवेत्
आगमिष्यतिपुत्रोमेतस्मैदास्यामिवस्विति ४६
यन्मयागोपितंगेहेनदृष्टंचतदप्यहम्
शिवशर्मोवाच-
इतिचिंतयतस्तस्यपान्थोवर्षेणपीडितः ४७
शीतार्तःकंपितवपुरुटजंप्राविशत्तदा
सतंसंविष्टमालोक्यभूयोगत्वातदंतिके ४८
मुनिरेषइतिज्ञात्वाववंदेशिरसाध्वगः
ऊचेचकस्मात्सुप्तोसिमुनेसंध्यासमागता ४९
रविरस्तंप्रयात्येषनसुप्तेःकालएषते
इत्युक्तमात्रेवचसिपथिकेनपितामम ५०
शरभोज्वरतप्तांगस्तमाहकथमप्यहो
शरभउवाच-
श्रूयतांवचनंपांथयद्वदामिपुरस्तव ५१

श्रुत्वामद्भाग्ययातेनत्वयासाधोविधीयताम्
वैश्योऽहशरभोनाम्नाकान्यकुब्जेगृहंमम ५२
अत्रागतोनिषिद्धोपिजायामित्रसुतैरहम्
अस्यतीर्थस्यमाहात्म्यंश्रुत्वासूनुमुखेरितम् ५३
मासास्तुकतिचित्साधोव्यतीतामयिचागते
दिनत्रयमतिक्रांतंज्वरितस्यममाधुना ५४
प्राणामेविगताअासन्नद्यभूयःसमागताः
कियानप्यायुषः शेषः साधोमेखलुतिष्ठति ५५
शमनस्यगृहं दृष्ट्वायदहंपुनरागतः
भाग्योदयेनकेनापिममात्रत्वंसमागतः ५६
नयमांमद्गृहंमित्रद्रव्यंबहुददामिते
दास्याम्यपिगृहंगत्वाकृपांकुरुकृपानिधे ५७
इहभूभागउत्खायगृह्यतांमामकंधनम्
शिवशर्मोवाच-
इत्याकर्ण्यसदुर्बुद्धिर्ग्राम्योविषयलंपटः ५८
उवाचधनलुब्धस्तंत्वदुक्तंसाधयाम्यहम्
इत्युक्त्वाधनमुत्खायतस्माद्भूभागतस्तदा ५९
अग्रतः स्थापयामासशरभस्याहचाध्वगः
अध्वगउवाच-
धनमेतद्विशांनाथतवभूभागतोमया ६०
निष्कासितंप्रयच्छाशुशिबिकानयनायमे
यामारोप्यज्वरार्तंत्वांनयामितवकेतनम् ६१
शिवशर्मोवाच-
इत्युक्तस्तेनसतदाददौस्वर्णपलत्रयम्
सोपिनीत्वापितुर्द्रव्यंययौलवणपत्तनम् ६२
उषित्वारात्रिमेकांतुशिबिकांसपरिच्छदाम्
सवाहामानयत्पुत्रदत्त्वास्वर्णपलद्वयम् ६३
पलंद्वयंगृहीतंतत्तेनैवाधर्मबुद्धिना
आरोप्यशिबिकांतंतुशरभंवैश्यसत्तमम् ६४
पांथःसचलितोवाहांस्त्वरयन्कान्यकुब्जकम्

अस्यतीर्थवरस्याथकमंडलुजलंधृतम् ६५
पाययन्नल्पमल्पंतंतृषार्तंसोध्वगोययौ
अथतेसरसस्तीरेउत्तीर्णाभोक्तुमध्वनि ६६
स्नात्वाभुक्त्वापुनस्तस्मात्स्थानाच्चेलुस्त्वरान्विताः
कियंतिभूमिमुल्लंघ्यतृषार्तास्तेकमंडलोः ६७
जलंपीत्वातृषार्ततंशरभंचाप्यपाययत्
अथकश्चिन्महाभीमोविकटोनामराक्षसः ६८
विचरन्निर्जनेऽरण्येगच्छतस्तानवैक्षत
तान्दृष्ट्वासक्षुधाक्रांतोवेगवान्विवृताननः ६९
अभिदुद्रावचरणाघातेनाकंपयन्महीम्
आगत्यतरसापार्श्वेतान्वाहान्पथिकंचतम् ७०
सकोशेषुसमादायभ्रामयामासखेचरः
गतासून्भ्रामणेनैवभूतलेतानपोथयत् ७१
चखादपिशितंतेषांपपौकोशाच्चशोणितम्
कुत्रयास्यतिरोगार्तोनरोऽयपुरतोमम ७२
एनंतुभक्षयिष्यामिपश्चादंबुपिबाम्यहम्
इति कृत्वामतिर्वारितीर्थस्यास्यकमंडलोः ७३
मुखेचिक्षेपसतदारजनीचरपुंगवः
क्षिप्तमात्रेजलेतस्यपूर्वजन्मभवास्मृतिः ७४
जातासतुवधात्तस्यशरभस्यन्यवर्तत
पूर्वजन्मकृतंपापंतदपिस्मृतिमागमत् ७५
येनराक्षसभावस्तुभूतोविप्रोद्भवादपि
स्मृत्वापापमुपेत्याशुसमीपेशरभस्यतु
उवाचज्ञानमापन्नोराक्षसःपितरंमम ७६
राक्षसउवाच–
भोभोमनुष्यशार्दूलकस्त्वंकेचजनाअमी
भक्षितायेमयाघोररूपेणाधमरक्षसा ७७
कस्यतीर्थवरस्येदंजलंयस्यप्रभावतः
पापिनोऽपिस्मृतिर्जातापूर्वजन्मभवामम ७८
वैश्यउवाच–

वैश्योऽहराक्षसश्रेष्ठकान्यकुब्जेगृहंमम
तीर्थानिपर्यटन्निंद्रप्रस्थेऽहसमुपागतः ७९
तत्राहमभवंदुःखीज्वरेणविधियोगतः
ततोमेबुद्धिरुत्पन्नागंतुंगृहमसत्पथ
तत्रकश्चित्समायातःपांथोवर्षेणपीडितः ८०
प्रार्थितःसमयानीयशिबिकांमांगृहं नय
सचायंशिबिकांपांथःसमुपानीयसत्वरः ८१
मामारोप्यचतांधीरश्चलितोमद्गृहंप्रति
सपांथस्तेचशिबिकावाहाः संप्रतिभक्षिताः ८२
त्वयाजलमिदंयस्यतीर्थस्यापिचतच्छृणु
इंद्रस्यखांडववनेयमुनास्तिसरिद्वरा ८३
तत्तीरेऽस्तिहरिप्रस्थंतीर्थंतीर्थोत्तमोत्तमम्
सुराचार्यस्यतत्रास्तितीर्थंसर्वार्थसाधकम् ८४
निगमोद्बोधकंजातास्मृतिस्तेयज्जलाशनात्
एतत्तेसर्वमाख्यातंयत्पृष्टोऽहमिहत्वया ८५
पृच्छामित्वामहंकिंचित्तद्वदाशुनिशाचर
पूर्वजन्मकृतंकर्मस्मरसित्वमिहाधुना
वदकिंतेकृतंपापंयेनजातोऽसिराक्षसः ८६
राक्षसउवाच-
पुराहमभवंविप्रःपुण्येवेदविदांकुले
दुराचारोह्यधर्मात्माशृणुसर्वंवदामिते ८७
क्रीडताहिमयानित्यंद्यूतेनसहतद्विदैः
हारितंद्रविणंभूरिस्वकीयंपितुरेव च ८८
पित्रानिवेद्यभूपायमामकंकर्मतज्ज्ञनैः
पुरान्निःसारितोनिःस्वोगतोऽहग्राममंतिके ८९
तत्रासीन्मेसखानामदेवकोब्राह्मणोत्तमः
तेनाऽहरक्षितोगेहेकुर्वताचिरमादरम् ९०
वस्तुंतत्रसुखेनाहंतद्भार्यांरूपशालिनीम्
कामातुरोऽहमभजंबलान्मित्रेगतेक्वचित् ९१
सामृतातत्क्षणात्साध्वीभक्षयित्वामहाविषम्

तांदृष्ट्वातमसायुक्तेनिशीथेऽहपलायितः ९२
पलायमानस्तरसाधृतोऽहराजकिंकरैः
चौरोऽयमितिखङ्गेनचिच्छिदुस्तेशिरोमम ९३
मृतंमांयातनादेहमावेश्ययमकिंकराः
रौरवेनिरयघोरेचिन्निपुर्यमशासनात् ९४
षष्टिवर्षसहस्राणितत्राऽहतीव्रयातनाम्
भुक्त्वातेनैवपापेनराक्षसत्वमुपागतः ९५
शतवर्षाग्यतीतानिराक्षसत्वेविशांपते
वदामितमुपायंमेयेनास्मान्मुक्तिमाप्नुयाम् ९६
पुरायंतदर्पितेसाधोवदामि शृणुसादरम्
येनतीर्थवरस्येदंजलंममुखेगतम् ९७
तत्रैवजन्मनिमयाकृत्वाहरिदिनेव्रतम्
संसर्गान्निच्छयावैश्यरात्रौजागरणं कृतम् ९८
द्वादश्यामथसंस्नात्वाभोक्तुंमपिसमुद्यते
मद्गृहेकश्चिदायातोवैष्णवोविष्णुरूपधृक् ९९
कुपितोऽहतमालोक्यदुर्वचोवदमग्रतः
क्वगच्छसिदुराचारदांभिकस्त्रीजनांतरे १००
इत्युक्तंसमयाधीरस्तुल्योमानापमानयोः
तूष्णीमेवनिकेतान्मेनिर्गत्यचलितोयदा १०१
तदाभिमुखमायांतीपत्नीममपतिव्रता
पतित्वापादयोस्तस्यतंसाधुंगृहमानयत् १०२
मयापमानितस्यापिनक्रोधोऽभून्महात्मनः
तयादृतस्याप्यानंदोयतः सोरिसुहृत्समः १०३
तमर्चयित्वाविधिवद्विष्टरेचोपवेश्यसा
भोज्यंभोजयजीवेशजयताद्भुवनत्रयम् १०४
इत्युक्तोऽहतयासाध्व्यान्यगदंतंमहाशयम्
म्लानवक्त्रःप्रसन्नास्यमुत्तिष्ठशमयक्षुधाम् १०५
इत्युक्त्वातस्यचरणौनोदितस्तनुमध्यमा
प्राक्षालयंपुनस्तंतुनिवेश्यासनमुत्तमम् १०६
अददांपात्रमन्नेनपूर्णंतस्मैविवेकिने

जलंचतत्करेसाध्व्याप्रेरितोऽहतयामुहुः १०७
उपभुज्यस धर्मात्मास्वैरंविगतविक्रियः
हरेरामहरेकृष्णजपन्नितिजगामह १०८
कृतंपुरायमिदंबैश्यनोदितेनमयास्त्रिया
पूर्वजन्मनियेनेदंप्रापितंतीर्थवारिमे १०९
शिवशर्मोवाच-
विष्णुशर्मन्निदंवाक्यमुक्त्वातिष्ठतिराक्षसे
पथिकःसचतेवाहाःप्राहुःखेदिव्यदेहिनः ११०
पथिकवाहाऊचुः
भोभोविशांपतेसाधोप्राप्ताश्चप्यपमृत्युताम्
त्वत्प्रसादादिदंवारिपीत्वादेवत्वमागताः १११
त्वत्संगेधनलोभेनविट्पतेचलितायतः
विगतानधनाकांक्षामरणावसरेप्यतः ११२
तीर्थराजजलस्यास्यतिष्ठतोजठरेहिनः
मरणेह्यनुभावात्तुमैत्रीप्राप्ताधनेशितुः ११३
नमामस्त्वांवयंयामोधनेशनगरींप्रभो
विमानैस्तद्गणानीतैर्नानामणिविभूषितैः ११४
प्रयाहिमाविलंबस्वतीर्थेनिगमबोधके
त्वमनेनसमंसाधोतारयैनमपिद्रुतम् ११५
शिवशर्मोवाच-
इत्युक्त्वातेगतास्तातदिश्युदीच्यांसमंततः
विमानकिंकिणीनादैर्नादयंतोऽथरोदसी ११६
अथवैश्योममपितातमाहरजनीचरम्
शरभउवाच-
उत्तिष्ठनयमामाशुतीर्थेनिगमवोधके ११७
ज्वरार्त्तेनमयापद्भ्यांतत्रगंतुंनशक्यते
योमांनयतितत्तीर्थत्वदन्योनास्तिकश्चन ११८
शिवशर्मोवाच-
तथेतितमथाश्वास्यवैश्यंसरजनीचरः
स्कंधमारोप्यवेगेनतत्तीर्थंपावनंययौ ११९

ऊषतुस्ताबुभौतत्रविश्पतिःसचराक्षसः
कुर्वंतौस्नानमात्रंतुसर्वतीर्थोत्तमोत्तमे १२०
अथाऽहपितुराकर्ण्यमहतींगुरुवेदनाम्
तंप्रतिप्रेरितोमात्राचलितोनिजसद्मतः १२१
अत्रागत्यमयादृष्टःसमहाज्वरपीडितः
मूर्ध्नाचवंदितस्तेनदत्ताशीर्मेऽभ्यभाषिच १२२
शरभउवाच-
किमर्थमिहभोतातदूरमार्गेसमागतः
दिनानिकतिचित्तिष्ठन्कुर्वन्नत्रनिजक्रियाम् १२३
विकटोनाममेमित्रःराक्षसःसमुपैतिवै
उत्तिष्ठवपुषामुष्यदंडवत्पतपादयोः १२४
नभेतव्यंत्वयामुष्मात्त्यक्तहिंसादिकर्मणः
अधुनातीर्थमासाद्यसन्निधौममतिष्ठति १२५
शिवशर्मोवाच-
इत्युक्तोऽहतदापित्राशरभेणमहात्मना
उत्थायपतितस्तस्य पादयोर्दंडवद्भुवि १२६
दोर्भ्यामुत्थाप्यमांसोऽथगाढमालिग्यराक्षसः
स्वागतंमित्रपुत्रेतिजगादाशिषमीरयन् १२७
राक्षसउवाच-
भाग्यवानसिभोतातयत्त्वमत्रसमागतः
पितुर्धर्मात्मनः श्रुत्वाज्वरपीडांसुदारुणाम् १२८
पितुराण्यमाप्नोषितीर्थेकृत्वातिलोदकम्
स्नात्वाकुरुक्रियां स्वीयाः पूर्वजन्मस्मरिष्यसि १२९
शिवशर्मोवाच-
एवमुक्तस्तदातेनस्नातुंतीर्थेवरांभसि
प्रविष्टोऽहस्मरंस्तातपूर्वजन्मशुभाशुभम् १३०
स्नात्वाविधिवदत्रैवपितुरंतिकमागतः
अपृच्छंरक्षसोवृत्तंकुतोऽयधर्मधीरिति १३१
पित्रोक्तंरक्षसोवृत्तंवाहानांपथिकस्यच
श्रुत्वाऽहतीर्थराजस्यस्तुतिमस्यचकारवै १३२

पितामेरोगनिर्मुक्तोभविष्यतियदातदा
यास्यामिगृहमित्यत्रदशोषितमहानिमे १३३
दशाहाभ्यंतरेतातततातस्यमरणंमम
अभूदर्धजलेह्यस्यतीर्थराजस्यपश्यतः १३४
अथोगरुडमारुह्यवक्षसोधारयन्श्रियम्
आजगामस्वयंविष्णुर्नवीनघनविग्रहः १३५
पीतवासाचतुर्बाहुःपंकजारुणलोचनः
ब्रह्मेंद्रादिभिरादिव्यैःसनाथैरंधकारिणा १३६
सेव्यमानोगुणग्रामान्गायद्भिःकिन्नरैःसह
हाहाहूहूप्रभृतिभिःस्तूयमानश्चसर्वतः १३७
दत्त्वास्वकीयसारूप्यमारोप्यगरुडंतदा
पितरंममब्रह्माद्यैर्वृतोवैकुंठमारुहत् १३८
पितुःसारूप्यमालोक्यविष्णोरहमचिंतयम्
इतिचित्तेतदालोक्यजाततत्वोदयेतदा १३९
नहिवर्णयितुंशक्योह्यस्यतीर्थशिरोमणेः
महिमायज्जलार्द्रेस्यान्मृतोजंतुश्चतुर्भुजः १४०
नमयासर्वथात्याज्यंतीर्थराजमिदंननु
अंजसादृढमाहात्म्यंधनरोगादितृष्णया १४१
पितुरत्रोटजेतावत्स्थातव्यंहिमयामम
या वत्तुकर्मणांभुक्तः प्रारब्धानांमहीतले १४२
एवंविचिंतयित्वाचपितुःकृत्वातुसत्क्रियाम्
रक्षसातेनसहितः स्थितोऽहमोक्षवांछया १४३

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्र्यांसहितायामुत्तरखंडेकालि
दीमाहात्म्येचतुरधिकद्विशततमोऽध्यायः २०४

पंचाधिकद्विशततमोऽध्यायः

शिवशर्मोवाच–
एकदाऽत्रमहातीर्थेपंकेमग्नांपयस्विनीम्
दृष्ट्वासराक्षसश्रेष्ठस्तामुद्धर्तुंविवेशह १
गोरक्षणेमहान्धर्मोरक्षतुःस्वर्गतिर्भवेत्

चिंतयन्निति मध्ये तु स गृहीतोंबुहस्तिना २
नीतस्तुवारिणोऽधस्ताज्जलपूर्णोदरस्तदा
तत्याजजीवितंसद्यस्तेनपीडितविग्रहः ३
दिव्यरूपंसमास्थायविमानमपिढौकितम्
गणेनप्रहितेनाथदैवैरिंद्रपुरोगमैः ४
गछन्नितिमयापृष्टः सनिशाचरपुंगवः
मुक्तिदेऽत्रमहातीर्थेमृत्युंप्राप्यसदुर्लभे ५
कथंदेवपदप्राप्तिर्जातातवमहामते
इत्युक्तोमामुवाचेदंवांछासीदत्रमेऽनघ ६
तस्मिन्गतेपुरायजनेस्वर्गंपुरायवतांपदम्
एकाकिनामयाविष्णुःसद्गतिःप्रापितस्तदा ७
गच्छंस्तिष्ठन्स्वपन्जाग्रत्स्नानंकुर्वंश्चनित्यशः
तमेवपुंडरीकाक्षमहंदध्यावनन्यधीः ८
हरेतवपदांभोजमहंशरणमागतः
ब्रह्मत्वेचमहेशत्वेनेंद्रत्वेमममानसम् ९
प्रार्थयन्नित्यहंताततमेवपुरुषोत्तमम्
उषितोऽत्रमहातीर्थेकृत्वानिर्विषयंमनः १०
विष्णुशर्मोवाच-
वसतोऽत्रमहातीर्थेमरणंचेत्तवाभवत्
कथंजन्मपुनः प्राप्तंत्वयेतिममसंशयः ११
मर्यादांयस्यतीर्थस्यत्यक्त्वापिधनलोभतः
राक्षसान्मरणंप्राप्ताः पथिकस्तेचवाहकाः १२
यस्यतीर्थवरस्यास्यजलपानाद्विवंगताः
तथैवराक्षसोऽप्यस्मिन्नपमृत्युमवाप्यसः १३
नक्रतःस्वेच्छयास्वर्गजगामतवपश्यतः
ननूनंतत्रमरणंजातंयज्जन्मदृश्यते १४
नारदउवाच-
शिवेनिशम्यपुत्रस्यशिवशर्माशुभंवचः
उवाचपूर्ववृत्तांतंकारणंनिजजन्मनः १५
शिवशर्मोवाच-

विष्णुशर्मन्शृणुष्वेदंकारणंममजन्मनः
कथयामितवाग्रेऽहश्रुत्वानिःसंशयोभव १६
एकदाविष्णुपूजायांमयिध्यानंसमास्थिते
दुर्वासाःप्रकृतिक्रोधीममाश्रममुपागतः १७
तमागतमविज्ञायविष्णुध्यानपरायणः
तस्थिवांस्तदवस्थोऽहचिरंतंनामसंस्मरन् १८
समुहूर्तंमुनिःस्थित्वाममाग्रेक्रोधमूर्छितः
आत्मनात्मानमाहेदमुच्चैरारक्तलोचनः १९
दुर्वासाउवाच-
अहोअत्रेरहंपुत्रोऽनसूयागर्भसंभवः
शिवांशोमानुषेणालमवज्ञातोऽमुनाभवम् २०
त्रिलोकीराज्यतः शक्रोमयायेनप्रपातितः
तंमामपिमनुष्योऽयमवजानातिदुर्मतिः २१
योबिभेतिनकःसोसिमत्तःकालानलादिव
मुक्त्वादेवत्रयींलोकयतः सार्हत्तमामम २२
यामसौध्यायतेमूढोदेवतांध्यानमास्थितः
नकथंबोधयत्येनंसेतिमूर्त्तिस्थितोयमः २३
नूनंनारायणंदेवंध्यायत्येषजगद्गुरुम्
यद्ध्यानामृततृप्तोहिनबाह्यज्ञानवानयम् २४
हरिंवाब्रह्मवाशंभुमन्यंवाध्यायतामहम्
मयायंसर्वथादंड्योमदवज्ञाकरोह्ययम् २५
शिवशर्मोवाच-
एवंविचिंतयित्वाससुमतिंमाम बोधयत्
शशापचबिबुद्धंमामितिक्रोधारुणेक्षणः २६
मामवज्ञाययश्चित्तेध्यानकालेमनोरथः
कुतस्तेनभवेद्यस्मिन्भविष्यतिहिसर्वथा २७
इत्युक्त्वासयदातातचलितोमुनिरत्रिजः
तदामयाचरणयोर्गृहीतोभयभीरुणा २८
इत्युक्तश्चमुनिश्रेष्ठक्षम्यतांरुडिबमुच्यताम्
मादृशान विजानंतिसम्यक्कर्मभवादृशाम् २९

शापंत्वंदत्तवान्घोरंसांप्रतंमेनिरेनसः
प्रसीदममनम्रस्यशापांतेकुर्वनुग्रहम् ३०
इत्युक्तः कोपमुत्सृज्यदुर्वासाशीतलोभवत्
किमेतन्नोचितंतातसयतश्चंद्रशेखरः ३१
उवाचेतिसमांधीमांस्तंभूत्वाब्राह्मणोत्तमः
अत्रैवमरणंप्राप्यनभूयोजन्मलप्स्यसे ३२
इतिमामनुगृह्याथसजगामदिगंबरः
उषित्वातद्दिनंतातमयासत्कारपूजितः ३३
नमुनेर्भाषितंमिथ्याचिंतयित्वाहमित्यपि ३४
जगामस्वगृहंचित्तेपश्चात्तापंवहन्निति
अहोमेध्यायतोनित्यंसतीर्थाश्रमिणस्तथा ३५
दर्शनंदुर्लभंजातंश्रीपतेरिहजन्मनि
चातकस्येवमेघस्यशुचौसंतापकारिणि ३६
कुतोऽयमागतोमह्यंवैकुंठगतिरोधकः
जनस्यप्रस्थितस्येवजलदो कालवारिमुक् ३७
नदोषोऽस्तिमुनेर्नूनंतस्यैवेच्छाहरेःखलु
सुदर्शनंहिदत्त्वापिममजन्मांतरंकृतम् ३८
मयासंसारभीतेनग्राह्यंपादांबुजंहरेः
निदाघातपतप्तेनपथिकेनेवपादपः ३९
किंधनापत्ययोषिद्भिरनित्यैश्चान्यबंधुभिः
गोविंदपरमानंदरामेतिममजल्पतः ४०
उदासीनवदासीनःकुंटुबेषुहरिंभजन्
प्रारब्धमेवभोक्ष्यामिकर्माण्यन्यान्यतर्जयन् ४१
चिंतयन्नित्यहंतातकियद्भिर्वासरैरहम्
प्राप्तवान्स्वगृहंस्नात्वाहरिपादोदकांतरे ४२
पितुर्मरणमाख्यातंमात्रेबंधुभ्यएवच
श्रुत्वातेऽपिशुचंचक्रुर्नाविंदन्निममस्थिरम् ४३
सत्यलोकादिलोकेषुनिस्पृहोऽहगृहेवसन्
मरणंप्राप्तवान्कूलेगंगायामुनिसेविते ४४
मुनेर्दुर्वाससः शापाज्ज्ञातोऽहवैष्णवेकुले

मरणंचात्रसत्तीर्थेलब्ध्वाप्राप्स्येहरेःपदम् ४५
नारद उवाच-
एवंसुराचार्यविनिर्मितेतदातीर्थेमहाभागपुराकृतानितौ
द्विजोत्तमौप्रोच्यमिथः सुतस्थतुर्विचिंतयंतौहरिपादपल्लवम् ४६
विचिंतयंतौहरिमब्जलोचनंचतुर्भुजंनीरदनीलविग्रहम्
निजायुधालंकरणावभासितंस्मृत्वात्रसारूप्यमवापतुर्हरेः ४७
यस्यक्षेत्रमिमंपुण्यमिंद्रप्रस्थाख्यमुत्तमम्
तस्योपाख्यानमाख्यातंफलमस्यशिवेश्रृणु ४८
गंगास्नानेनयत्पुण्यंकन्यादानोद्भवंचयत्
श्रवणादस्यतत्पुण्यंश्रद्धयालभतेनरः ४९
पुत्रे जातेतुगोदानात्सिंहगेचबृहस्पतौ
गोदावरीजलेस्नानाद्यत्फलंभुविजायते ५०
तत्फलंश्रवणादस्यजायतेनात्रसंशयः
अतस्तीर्थोत्तमादन्यत्तीर्थंनास्त्यखिलार्थदम्
यस्मिन्मरणतोनूनंतिर्यंचोऽपिचतुर्भुजाः ५१
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेकालिंदी माहात्म्येनिगमबोधोपाख्यानंनामपंचाधिकद्विशततमोऽध्यायः २०५

षडधिकद्विशततमोऽध्यायः

सौभरिरुवाच-
धर्मराजशिबिः श्रीमानाकर्ण्यतद्वचोमुनेः
नारदस्याब्रवीत्प्रीतमनाइतितमुत्तमम् १
शिबिरुवाच-
मुनेतीर्थवरस्यास्यनिगमोद्बोधकस्यते
माहात्म्यंवर्णितंसम्यक्श्रुतंपापहरंमया २
इंद्रप्रस्थेत्रशतशः संतितीर्थानिवैमुने
अन्यस्यापिसमाचक्ष्वमाहात्म्यंयदिविद्यते ३
नारदउवाच-
इंद्रप्रस्थांतरावर्तिन्येषायाद्वारकानृप
अस्यांपुराहियद्वृत्तंतत्तेवच्मिश्रृणुष्वमे ४

काम्पिल्येऽथद्विजःकश्चितपुष्पेषुर्मूर्तिमानिव
सर्वासांयोषितांचित्तहारीस्यादग्रविभ्रमैः ५
संगीतविद्याकुशलः कोकिलामधुरध्वनिः
एकदासकरेवीणांधारयन्वादयन्मुहुः ६
कंठेनकोकिलालापमधुरेणनराधिप
गायन्बभ्रामनगरेप्रतिरथ्यंमहामतिः ७
तस्यगीतिध्वनिंश्रुत्वामूर्छनातानसंयुतम्
त्वक्त्वास्वगृहकार्याणितमीयुःपौरयोषितः ८
मोहितास्तस्यरूपेणकामवेगंनसेहिरे
जातास्खलितवीर्यास्तागीतं श्रुत्वासमन्ततः ९
ब्रह्मणोमानसंयेनलोभितंभारतींप्रति
शिवस्यार्द्धशरीरंचपार्वत्यैयेनदापितम् १०
ताभ्यामन्योजनोलोकेवशीवाज्ञानवानपि
यःस्मरंतंक्षमोजेतुंस्त्रियःप्रकृतिचंचलाः ११
ताःस्मरावेशमासोढुंनसाध्योपिविषेहिरे
वक्तव्यमितिकिंराजन्लोकेकामोहिदुर्जयः १२
अथतास्तत्रतत्रेयुर्यत्रयत्रव्रजत्यसौ
प्रगायन्कंठवीणाभ्यांप्रगायन्स्वरमोहितः १३
तासांपतिसुतभ्रातृपितरोऽथनराधिप
आगत्यभर्त्सयित्वातानिन्युःस्वान्स्वान्गृहान्प्रति १४
तमन्विष्यपुनस्तास्तुजग्मुःसर्वास्तदंतिके
यदातदापौरजनावृत्तं तत्प्राहुरीश्वरे १५
राजापितंसमाहूयपप्रच्छरहसिद्विजम्
केनमंत्रेणभोविप्रमोहितास्ताःपुरस्त्रियः १६
तन्ममाचक्ष्वविप्रेंद्रदास्यामिबहुतेधनम्
नोचेन्निष्कासयामित्वांनिजराज्यान्नसंशयः १७
नारदउवाच-
श्रुत्वेतिनृपतेर्वाक्यंनृपतिंसद्विजोत्तमः
उवाचसत्यंतस्याग्रेवचोरूपगुणार्णवः १८
द्विजउवाच-

नमंत्रंनौषधंराजन्विद्यतेमयिभिन्नुके
किंतुतेनगरेसर्वायोषितोह्यजितेंद्रियाः १९
रूपंममसमालोक्यश्रुत्वागीतध्वनिंतथा
स्मरवेगंसहंतेनराजंस्तवपुरेस्त्रियः २०
किंकरोमिमहाराजकोऽपराधोस्तिमेविभो
पुराकृतमिवोल्लंघ्यंशासनं नमहीपते २१
नारदउवाच-
उशीनरशीबेराजन्नेवंकथयतिद्विजे
सर्वेपौराःसमेत्याथप्रावदन्नितिभूपतिम् २२
पौराऊचुः -
राजन्ननेनविप्रेणमोहिताःपौरयोषितः
गृहेषुनहितिष्ठंतिह्यस्माभिरनिवारिताः २३
यद्ययंमोहनः स्त्रीणांनगरेवत्स्यतिप्रभो
तदादेशांतराण्येवयास्यामोवयमद्यवै
गतोऽस्माकंवृषोदेवोहव्यकव्यक्रियात्मकः २४
तमनुप्रस्थितात्वेत्राद्गौरियंपापिनामिव
विनातंशरणंयातंत्यक्तश्रीभिर्नरेश्वर २५
अथैनमनुयास्यंतिवासिताभिर्वृषंयथा
शून्यालयेकथंलक्ष्मीर्यन्नतोप्यवतिष्ठति २६
धर्मोऽथश्चगृहंचैतत् त्रयंस्त्रीवशगंयतः
कांताधर्मधनाधीनातयोर्नाशेनतिष्ठति २७
नारदउवाच-
एवंवदत्सुपौरेषुस्त्रियस्तेषांसमागताः
राजांतिकउपाविष्टाइत्यूचुस्ताःपरस्परम् २८
पौरस्त्रियऊचुः
कामंवामाकृतिंविप्रमेनंप्राप्यमनांसिनः
उल्लसंतिदिवाधीशंकमलानीववारिणि २९
संकुचंतिविनातेनकुमुदानियथेंदुना
आगच्छंतमिलित्वैनंधारयामोनृपाग्रतः ३०
अवध्योऽयवयंचास्यकिंकरिष्यतिभूपतिः

नारद उवाच-
इत्युक्त्वातास्त्वरावत्योजगृहुस्तंद्विजोत्तमम् ३१
पश्यतांनिजभर्तॄणांराज्ञश्चैवपुरस्तदा
ऊचुश्चैनंमनोनाथगृहानागच्छहृच्छयम् ३२
शमया शुविनाद्यत्वांस्थातुं नैवचशक्नुमः
इत्याकर्ण्यवचस्तासांसविप्रःप्रत्युवाचह ३३
विप्रउवाच-
भवतीनामहंपुत्रोभवत्योमातरोमम
गृहान्किमर्थमुत्सृज्यभवत्यःपर्यटंतिहि ३४
आराधयतनाथान्स्वान्यतोलोकद्वयंध्रुवम्
आराधितेषुपतिषुविष्णुःसर्वसुरेश्वरः ३५
प्रसन्नोभवतित्वत्रप्रसन्नेकिमुदुर्लभम्
यास्त्रीस्वपतिमुत्सृज्यसेवतेऽन्यसुखेच्छया ३६
सापवादमवाप्नोतियातिघोरांचदुर्गतिम्
उषित्वातत्रकल्पांतेयावत्सापतिवंचना ३७
पुनस्तस्माद्विनिर्गत्यस्थावरत्वंप्रपद्यते
तस्मादपिपशुत्वंसालभतेबहुजन्मसु ३८
ततो मुक्तामनुष्यत्वेव्यंगाभवतितत्रसा
एवंपापगतिंज्ञात्वानिवर्तध्वमतोजनात् ३९
नोवायास्यथदेहांतेनरकंभृशदारुणम्
यदिच्छंतिभवंत्योमेसुखंतन्नेहलप्स्यथ
पापमेवहियुष्माकंयतोधःपतनंनृणाम् ४०
नारदउवाच-
श्रुत्वैवंवचनंतस्यदृष्ट्वाभर्तृसुखानिच
लज्जयानम्रमुख्यस्तालतावातहताइव ४१
तासांतुपुरनारीणांस्मराग्निर्भृशदारुणः
शशामतस्यशीतेनबटोर्वचनवारिणा ४२
उत्थायचेलुःसर्वास्ताविनिंदंत्यइतिस्मरम्
ब्रह्मशक्रादिदेवानामपिमोहकरंनृप ४३
स्त्रियऊचुः

धिगिमंपापकर्माणंशीलदारुकुठारकम्
कामवामदृशांप्रीत्यैधन्योयेनहतःस्मरः ४४
किंवदेमजगत्पूज्यांरुक्मिणींजठरेयया
धृतःप्रद्युम्ननाम्नाऽसौराहुःस्त्रीशीलचंद्रभुक् ४५
सदेवाधमश्रायातियदिनोदृष्टगोचरम्
भुयोध्यानकृतेशानदृगग्नौतंक्षिपामहे ४६
येनायंजनितःपापोह्यात्मारामेणविष्णुना
कृतःषोडशसाहस्त्रस्त्रीप्रियः काहिनः कथा ४७
एवंविनिंद्यतंकामंतुष्टवुस्तंद्विजोत्तमम्
शीलंस्वस्यचतासांचरक्षितंयेनभूपते ४८
धन्यासामुष्यजननीययायंब्राह्मणोत्तमः
स्मरजिन्निर्मितोलोकेपरधर्मस्यरक्षकः ४९
धिगस्तुनोराजलोकैर्हसिताःस्मरनिर्जिताः
याभिर्वाक्यमनोभ्यांचजनितंपापमुल्वणम् ५०
नारदउवाच-
एवंविचिंतयंत्यस्ताएक्यमत्ययुताः स्त्रियः
जग्मुःस्वंस्वंगृहंसर्वाद्विजवाक्येनवोधिताः ५१
अथराजापिकांपिल्यस्तंद्विजंवस्त्रभूषणैः
संपूज्यप्रेषयामाससद्गृहेसंयतेंद्रियम् ५२
अथागच्छतिकालेतुकारूषाधिपतिर्बली
कापिल्याधिपतिंसैन्येर्नगरंरुरुधेतदा ५३
तयोर्युद्धमभूद्धोरंतेनयुद्धेसघातितः
नगरंलुठितंसर्वहताः शूराश्चसर्वशः ५४
तास्त्रियःकालकूटंतुखादित्वामरणंगताः
प्रायश्चित्तंतुनकृतंताभिः पापस्यतस्यतु ५५
येनपापेनताः सर्वाभीषणाख्यस्यरक्षसः
राक्षस्योनगरेजातामहाकायाभयानकाः ५६
तत्रतानिहिताः सर्वाःपुरनार्योहनूमता
यज्ञांश्वरसतोजिष्णोस्तिष्ठतांरथकेतने ५७
पुनस्ताएवराक्षस्योबभूवुर्मारवेध्वनि

क्षुधार्ताश्चतृषार्ताश्चदर्शनेनभयप्रदाः ५८
एएवंतेनतुपापेनवाङ्मनोविहितेनतु
ताभिर्जन्मद्वयंप्राप्तंराक्षसीयोनिमिश्रितम् ५९
पापेननाशितंतासांसनृपंनगरद्वयम्
अतएवनकर्त्तव्यंपरकांतनिषेवणम् ६०
नारीभिःपापभीताभिर्वाङ्गनोभ्यामपिप्रभो
रोगीजडोदरिद्रोवानेत्राभ्यांवर्जितोऽपिवा
नत्याज्यःस्वपतिः स्त्रीभिःइच्छंतीभिस्तुसद्गतिम् ६१
कथितमिदंमयामनोवचोभ्यांजनितमघंचयदन्यकांतभक्त्या
फलमपिचयदेव लब्धमाभिस्तदपिशिबेबहुविस्तरेणतुभ्यम् ६२
इंद्रप्रस्थगतानयेममनघायाद्वारकादृश्यतेतास्तस्याजलबिंदुदेहपतनात्पौरस्त्रियो रेभिरे
स्वर्गंचित्तवचोऽन्यकांतभजनाज्ञातंविमुच्वोल्बणंक्रव्यादत्वमवाप्यदेववनिता भावंसुराह्लाददम् ६३

इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्र्यांसंहितायामुत्तरखंडे कालिंदीमाहात्म्येद्वारकावर्णनंनाम षष्ठाधिकद्विशततमोऽध्यायः २०६

सप्ताधिकद्विशततमोऽध्यायः

सौभरिरुवाच-
धर्मात्मजनिशम्यैतद्वचस्तस्यमहात्मनः
नारदस्यशिबीराजाप्रोवाचेदंविनीतवत् १
शिबिरुवाच-
तिष्ठंत्योमरुमार्गेताराक्षस्योमुनिपुंगव
एतस्याद्वारिकायास्तुलेभिरेसलिलं कुतः २
नारदउवाच-
शृणुराजन्कथांदिव्यांपूतांपापप्रणाशिनीम्
विमलाख्यस्यविप्रस्यहिमवद्द्रोणिवासिनः ३
एकस्तुहिमवद्द्रोण्यांविमलोनामभूसुरः
देवर्षिपितृवह्नीनांपूजकोऽतिथिपूजकः ४
हरिपादार्चनरतोवेदवेदांगधर्मवित्

वासुदेवगुणग्रामपुराणश्रुतिमानसः ५
वार्द्धकेतस्यपुत्रोऽभूत्प्रसादाच्चक्रपाणिनः
चकारहरिदत्तेतिनाम्नातंजनकस्तदा ६
विधिवद्विदधेचास्यचौरकर्मादिकंचतत्
गुरोः सकाशाज्जग्राहछंदांसिहरिदत्तकः ७
अधीत्यविधिवद्वेदान्दत्त्वाचगुरुदक्षिणाम्
प्रवव्राजविरक्तः सन्समूलंचाश्रमद्वयम् ८
ज्ञात्वातत्कर्मतन्माताव्यलपत्पुत्रवत्सला
स्नापयंतीकुचद्वंद्वंपुत्रविश्लेषजाश्रुभिः ९
मातोवाच-
मामनाथांपरित्यज्यताततयातोऽसिकुत्रवै
पितरंचजराग्रस्तंषट्पदोबल्वजाविव १०
वार्द्धकेत्वंमयाप्राप्तः श्रीपतेःपादसेवया
मांविहायाभजस्त्वंवैचरणंतस्यमुक्तये ११
अंहमूढाध्रुवंतातध्रुवमाराध्ययद्धरिम्
अध्रुवंवांछितवतीभवन्तंतुसुखलब्धये १२
त्वंसुधीर्वत्ससर्वार्थंयद्विष्णुंभजसेस्वयम्
अध्रुवंजगदेतद्वैमत्वासीस्त्वमपिध्रुवम् १३
किंकरोमिक्वगच्छामिमायाज्ञानंछिनत्तिमे
सुफलोत्पादकंशास्त्रीरंभामूल मिवोल्बणा १४
धन्योदशरथोराजायोमृतोरामशोकतः
धिङ्मांपुत्रस्यविश्लेषाद्धारयंतीस्वजीवितम् १५
आगच्छदर्शनदेहितातमांपरितारय
वदवेदमयींवाणींपितुरग्रेगुणार्णव १६
नारदउवाच-
एवंविलप्यतन्माताराजन्सापतिताभुवि
दलनाद्राहुदत्तानांलेखाचांद्रमसीयथा १७
अथाजगामविप्रर्षिर्विमलोनृपसत्तमः
दृष्ट्वातांपतितांभूमौकिंकिमित्यभ्यभाषत १८
कस्मादियंकीर्णकेशव्यस्तवस्त्रविभूषणा

पतिताभुविकल्याणंहरिदत्तस्यविद्यते १९
तस्यावयस्यास्ताःसर्वाःप्रोचुस्तंविमलंनृप
वयस्याऊचुः -
अधीत्यवेदांस्तेपुत्रोदत्त्वाचगुरुदक्षिणाम् २०
नारायणपरोभूत्वाप्राव्रजद्धरिदत्तकः
तस्यविश्लेषशोकेनपतितेयंधरातले २१
नारदउवाच-
इत्याकर्ण्यवचस्तासांविमलोबुद्धिमत्तरः
प्राबोधयन्निजांभार्यामितिवागमृतेनसः २२
विमलउवाच-
उत्तिष्ठजायेशृणुवाक्यमीरितंमयाकिमर्थंपतिताविषीदसि
धन्यःसुतस्तेयइमंविनश्वरंविज्ञायभेजेहरिपादपल्लवम् २३
धन्यात्वमप्यस्यजनिप्रदायिनीयस्याःसुतस्तेहरिपादभागभूत्
संतारयिष्यत्यपिमामसंशयंकुलंकुलोत्थानपिपूरुषान्शुभे २४
क्वविश्वमेकतच्चपतच्चलंक्वसेवनंशाश्वतलोकदंहरेः
मत्वेतिभेजुर्भरतादयोनृपायथाहरिंसाध्वितथैवतेसुतः २५
दाराधनागारशरीरबांधवाएतेभवंतिप्रतिजन्मदुःखदाः
तावन्नयावद्धरिपादपल्लवंभजेतधीरोऽखिलकामवर्जितः २६
नारदउवाच-
एवंप्रबोधितातेनधीरेणधरणीतलात्
उत्थायनिजभर्तारमब्रवीद्दीनयागिरा २७
भार्योवाच
सर्वंजानाम्यहंकांतयत्त्वयासाधुभाषितम्
कुलधुर्यंनपश्यामियतस्तप्यामिवैभृशम् २८
पुत्रेसतिमहत्तीर्थेकिंवाकेशवसेवया
गृहएवावयोर्मृत्युश्चेत्स्याल्लोकद्वयंतदा २९
सत्पुत्रोत्पादनेयत्नः कर्त्तव्यःखलुमानवैः
तारयंतिपितॄन्पुत्रायतः संसारवारिधेः ३०
स्रष्टारंसर्वजंतूनांधातारंपुत्रकाम्यया
भजवांछसिचेत्पुत्रंकुलधुर्यंमहामते ३१

नारदउवाच-
इत्याकर्ण्यवचस्तस्याः प्रत्याहविमलोद्विजः
ब्रह्मक्षेत्रंप्रयागंहियाम्यहंपुत्रकाम्यया ३२
इत्युक्त्वाचलितः सोऽथहरिद्वारमगाद्द्विजः
स्नात्वातत्रापिविधिवदिंद्रप्रस्थमथागमत् ३३
कतिभिर्वासरैर्वीरसायंकालेऽखिलार्थिदम्
स्नात्वाभुक्त्वानिशायांससुष्वापयमुनातटे ३४
निशीथेस्वपतस्तस्य विमलस्यांतिकेविधिः
हंसमारुह्यदेवेशस्तीर्थैःसर्वैरनुद्रुतः ३५
आगत्योत्थापयामासविमलंपुत्रवांच्छकम्
उवाचचसुरश्रेष्ठोवचनंमधुराक्षरम् ३६
ब्रह्मोवाच-
जानेसमीतिंचित्तंत्वदीयेमनसिस्थितम्
नतत्पूरयितुंकल्पोयतस्तत्कारणंशृणु ३७
एकदामेरुशिखरेमिलिताः सर्वदेवताः
तुष्टुवुर्मद्धवमुखामाधवंकार्यसिद्धये ३८
स्तुतोस्मदादिविबुधैः कृपयाभगवान्हरिः
प्रन्नोभूत्तदाविष्णुर्वृणुध्वमितिचाब्रवीत् ३९
इत्युक्तास्तेनतेदेवायथाभिलषितंवरम्
श्रीपतेःप्राप्यतेजग्मुःसर्वेस्वंस्वंनिकेतनम् ४०
मयोक्तमितिदेवेशदेहिमेवरमुत्तमम्
प्रयागंनाममेक्षेत्रंभवत्वखिलकामदम् ४१
ततःसतगुणंभूयाद्द्वितीयंक्षेत्रकंमम
इंद्रप्रस्थगतंसम्यग्वृत्तंत्वत्तोमयानघ ४२
इत्याकर्ण्यवचोमह्यंभगवानाहमांतदा
तथास्त्वितिपुनर्वाचमुवाचश्रूयतांवचः ४३
श्रीभगवानुवाच
इंद्रस्यखांडवारण्येइंद्रप्रस्थाभिधंशुभम्
क्षेत्रंकलिदजातीरेमत्तुल्यास्तत्रयेमृताः ४४
विरिंचेरचितातत्रस्वकीयाद्वारकापुरी

मयाशतगुणांभोधीतीरस्थायाः पुरागुणैः ४५
तामुल्लंघ्यनरोयस्तुतीर्थमन्यन्निषेव्यते
नतीर्थफलमाप्नोतिसपुमान्नमृषोदितम् ४६
सर्वतीर्थोदितंपुरायंशक्रतीर्थेलभेन्नरः
द्वारकाचपुरीमायातीर्थमन्यच्चरद्वति ४७
योनिमज्ज्यान्यतीर्थेषुकृत्वाचविविधांक्रियाम्
अत्रैष्यतिफलंतेभ्यःफलंप्राप्स्यतिसध्रुवम् ४८
इत्युक्त्वांतर्द्धधेविष्णुरहमप्यगमंस्वकम्
लोकंद्विजेंद्रवैकुंठादधोभागेव्यवस्थितम् ४९
प्रयागान्मामकात्क्षेत्रात्काशीशतगुणास्मृता
काश्याःशतगुणंतीर्थनिगमोद्बोधकंतथा ५०
तीर्थसप्तकमेतत्तुत्रयंतुल्यफलंस्मृतम्
एतत्त्रयमनुल्लंघ्ययोगच्छतिसितासितम् ५१
तस्याहंवांछितंविप्रददामिखलुनान्यथा
केचिदाहुःसप्तपुरीसमपुरायामहर्षयः ५२
अयोध्याद्याः शतंताभ्यइंद्रप्रस्थंप्रचक्षते
त्वमत्रागत्यविप्रेंद्रसर्वकामफलप्रदे ५३
तीर्थेश्रीद्वारकाख्येहिकुरुस्नानंसुतेच्छया
यावंतिसर्वतीर्थानिब्रह्मांडकलशोदरे ५४
तेभ्योपरिमितंपुरायंशतनामनिकीर्तिते
सुतंतेकुलधौरेयंतीर्थमेतत्प्रदास्यति ५५
स्नानाच्चतवगोविंदःप्रसन्नात्माभविष्यति
नारदउवाच-
इत्युक्त्वादेवदेवेशोब्रह्मातत्रतिरोधते ५६
विमलोऽपितदा स्नात्वादेवादीनप्यतर्पयत्
इत्युवाचसधर्मात्माद्वारकेकृष्णवल्लभे ५७
सुतंवंशकरंदेहिमह्यंभक्तायतेनमः
इत्युक्तेतेनविप्रेणदेववागभवत्तदा ५८
देववागुवाच-
पुत्रस्तेधर्म्मतत्वज्ञोवंशकर्त्ताभविष्यति

प्रसादादस्यतीर्थस्यसर्वतीर्थशिरोमणेः ५९
याहिगेहंविलंबंमासुकृतं तेनमज्ञनम्
नारदउवाच-
इत्याकर्ण्यसतांवाणींविश्वस्तःपुत्रजन्मनि ६०
चचालजलमादायद्वारकायाः कमंडलौ
मार्गेतस्यसखाविप्रोमलयाचलकेतनः ६१
मीलितश्चलितोगेहंकृत्वातीर्थानिसर्वतः
तस्मैस्ववृत्तमाख्यातंब्रह्मसंवादकात्मकम् ६२
यद्भूतंद्वारकातीर्थेश्रुत्वासोऽपिविसिस्मये
उवाचसचधर्मात्मासखेममवचः शृणु ६३
यावंतिभारतेक्षेत्रेतीर्थानिविहितानिमे
तावंतिकर्तुमिच्छामित्वदुक्तंतीर्थमुत्तमम् ६४
नीत्वामांदर्शयसखेतत्तीर्थंसर्वकामदम्
सखायस्तेवराभूमावुपकुर्वंतियेसखीन् ६५
नतैर्ननुसमोलोकेपितामाताऽथवासुतः
निर्द्धनंपुरुषंलोकेसर्वेमुंचंतिबांधवाः ६६
नमुंचंतिसखायस्तुतस्यदुःखेनदुःखिताः
संसारार्णवनिर्मग्नान्सखीनुद्धरतेसखा ६७
उपदिश्यहरेर्भक्तिमार्गंजन्मेंधनानलम्
अतस्त्वंमेसखाश्रेष्ठउपकारंविधेहिमे ६८
दर्शयैतद्वरश्रेष्ठंतीर्थाख्यंद्वारकांद्विज ६९

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेकालिदीमाहात्म्येसप्ताधिकद्विशततमोऽध्यायः २०७

अष्टोत्तरद्विशततमोऽध्यायः

नारदउवाच-
विमलस्तंद्विजंनीत्वाद्वारकायामिहागतः
पुनस्तौसस्नतुंधीरौश्रीपतेर्भक्तिकाम्यया
भूयःखेमेघगंभीरावागासीदितिभूपते १
आकाशवागुवाच-

शृणुतंद्विजशार्दूलौहरेस्तीर्थमिदंशुभम्
एतत्तीर्थ प्रसादाद्वांविष्णुभक्तिर्भविष्यति
ययाजहातिलोकोऽयमवविद्यामोहमुल्वणम् २
नारदउवाच-
निशम्येतिद्विजश्रेष्ठौतांवाचमशरीरिणीम्
प्रसादोऽयहरेरासीदित्यूचातेपरस्पर्राम् ३
स्नात्वातौविधिवत्तत्रलंब्ध्वाभक्तिंहरेः पराम्
चेलतुःप्रणिपत्येदंभाषमाणौमिथस्तदा ४
द्विजावूचतुः
यथावयोर्हिसंयोगः पथिजातो विचारतः
यथागृहकलत्रादिसंयोगोभुविजायते
सांप्रतंविरहोभावीयथानौमार्गवर्तिनौ ५
तथादारसुतादीनांकालव्यास्यवर्तिनाम्
धन्यःसपुरुषोलोकेयोदारसुतसंगमम् ६
विज्ञायत्त्रणिकंनित्यंसंश्रयेत्श्रीपतिंभजेत्
नारदउवाच-
स्मरणंकरणीयंमेदासोऽहत्वत्पदाश्रयः ७
संदेशःप्रेषणीयोमामित्युक्त्वास्वगृहंगतौ
शृणुराजन्यथातेनमित्रेणविमलस्यतु ८
मोत्तणंरात्तसीनांतुविहितंपथिगच्छया
व्रजन्सब्राह्मणःप्राप्तस्तंदेशंजलवर्जितम् ९
यत्रताःपापविप्लुष्टारात्तस्यः त्तुत्तृषाकुलाः
अथताः पथिगच्छंतंदूरादृष्ट्वाद्विजोत्तमम् १०
सजलामत्रहस्तंतंमिथस्त्वितिबभाषिरे
रात्तस्यऊचुः -
आयातिपथिकःकश्चिज्जलपात्रंकरेदधत् ११
अस्माकंत्तुत्तुषोःशांतिर्मनागपिभविष्यति
एनंसंभत्तयिष्यामः पास्यामोऽस्यकरेस्थितम् १२
पात्रंजलंवयंतृष्णात्तुधार्ताःशतवर्षतः
नारदउवाच-

काचिदाहेत्यहंपूर्वमस्योष्णांकालखंडकम् १३
भक्षयित्वाततोरक्तंपीत्वायास्यामिजीवितम्
अन्याप्राहकियद्द्रव्यंविद्यतेऽस्यगजानने १४
ममव्याघ्राननायास्तुपानायापिनदृश्यते
अन्यावैरथचक्राख्याश्रूयतांवचनंमम १५
करिष्येकुंडलमहंकेनां त्रैरस्यमेखलाम्
अन्यावददहंदं तैरेकतःश्यामलीकृतैः १६
रमेषोडशभिर्द्यूतशालायांतद्विशारदः
इत्युक्त्वाताः मिथःसर्वास्तंद्विजंप्रतिदुद्रुवुः १७
विवृतास्याललज्जिह्वाः प्रद्योतैकमहाभुजाः
आयांतीस्ताःसमालोक्यब्राह्मणोभयविह्वलः १८
आत्मानमभितश्चक्रेरक्षांवेदोदितांनृप
ताआगत्यस्थितादूरंराक्षस्योभीमविक्रमाः १९
तेजसातस्यमंत्रैश्चप्रत्यादिष्टानराधिपः
ऊचुश्चकोभवानत्रकुतः प्राप्तोऽसितद्वद २०
त्वद्दर्शनान्मनोऽस्माकंप्रसादमधिगच्छति
त्वत्पादस्पर्शनात्किंनोनविप्रभविताफलम्
अतोमूर्द्धसुनोदेहिस्वकीयंपादपंकजम् २१
नारदउवाच-
इत्याकर्ण्यवचस्तासांजगादहरिदत्तजः
द्विजउवाच-
कृत्वापवित्रतीर्थानिब्राह्मणोऽहसमागतः २२
सांप्रतंपुष्करंयामिभवतीभिःकिमिच्छते
यतस्तत्प्राथ्र्यतांदातुंशक्तोदास्यामिचेत्तदा २३
राक्षस्यऊचुः
येषुतीर्थेषुविप्रेंद्रत्वयास्नातंवदस्वनः
तानिसर्वाणिपुण्यानिमोचयातः कुजन्मनः
अस्मानतितरांतृष्णाक्षुद्भ्यांदारुणादुःखदात् २४
ब्राह्मणउवाच-
अवंतीमाश्रमात्पूर्वमहंहरिपुरीमितः

गतोऽहद्वारकांतस्मात्स्नात्वासोमोद्भवाजले २५
ततःप्राप्तःप्रभासाख्यंतीर्थंनीरधितीरगम्
तस्मात्सेतुनिबंधेऽहस्नातः परमपावने २६
तस्मादहंमहापुरायांकिष्किंधांसमुपागतः
हतोयत्रतुरामेणवालीकपिगणेश्वरः २७
तस्मान्मठंसरस्वत्यानर्मदातीरसंस्थितम्
समागतोऽहयत्रास्तिभारतीसर्वसेविता २८
ततोऽहमावेशंवेणींतांनत्वादक्षिणापथे
शिवकांचीविष्णुकांच्यौदृष्टेतत्रमयापुरौ २९
ययोर्मरणतोजंतुःशिवोविष्णुश्चजायते
ततोऽहमुत्कलंप्राप्तोयत्रास्तिहरिरीश्वरः ३०
चतुर्वर्गप्रदःसाक्षाद्भक्तानामपिकांक्षितम्
तमर्चयित्वाविधिवद्भक्षयित्वानिवेदितम् ३१
प्रसादभूतंतस्यैवगंगासागरसंगमम्
तत्रदेवानृषीन्पितृंस्तर्पयित्वायथाविधि ३२
यत्रगंगाशतमुखीजातातत्राहमागमम्
ततोगयामुपागत्यपिंडान्दत्त्वायथाविधि ३३
पितृभ्यस्तुलसीपुष्पचंदनोदकपूजितान्
कोशलांशरयूंवारिकर्णधारनभस्वता ३४
पवित्रिताखिलजनांस्पर्शनेनाहमागमम्
तत्रास्तिगोप्रताराख्यंतीर्थंत्रिदशदुर्ल्लभम् ३५
तत्रस्नानादिकंकर्मनिशाचर्यःकृतंमया
ततः काशीमहंप्राप्तोराजधानीमुमापतेः ३६
नत्वाविश्वेश्वरंदेवंबिंदुमाधवमेवच
स्नातंमणिकर्णिकायांज्ञानवाप्यांचभक्तितः ३७
त्रिरात्रिमुषितस्तत्रप्रयागंपुनरागमम्
पौषशुक्लचतुर्दश्यांसाक्षाद्यत्रप्रजापतिः ३८
एकस्मिन्माघमासेतुस्नानंकृत्वाऽरुणोदये
पुनस्तस्मात्समायातोनैमिषंगोमतीतटे ३९
यत्रतीर्थानिसर्वाणिवसंतिचस्वमायया

ततोऽहमथुरांप्राप्तोयत्रविश्रांतिसंज्ञकम् ४०
तीर्थंतत्सन्निधौपुरायमसिकुंडाख्यमुत्तमम्
कृष्णगंगाध्रुवाक्रूरकेशिकालीयतीर्थभृत् ४१
यमुनास्तिमहापुरायायत्रसर्वार्थदायिनी
उभयोःकूलयोस्तस्यावनानिद्वादशश्रिया ४२
राजमानानिखेचर्यःसमस्तार्थकराणिच
संतितेषुनरःस्नात्वापीत्वाभूयोनजायते ४३
ततोहमागमंपुरयंहस्तिनापुरमुत्तमम्
यत्रश्रीपतिपादाब्जजातागंगासरिद्वरा ४४
ततोनारायणस्थानंहिमवद्भूमिसंस्थितम्
आगत्यमाधवं दृष्ट्वाकेदारमहमागमम् ४५
तत्रसंपूज्यविश्वेशंपीत्वाहंसोदकंपुनः
हरिद्वारंमहापुरयमागमंजाह्नवीतटे ४६
तत्रस्नात्वापितॄन्देवानृषीन्संतर्प्यचाप्यहम्
समागतः कुरुक्षेत्रयत्रप्राचीसरस्वती ४७
तत्राप्यहंक्रियाःसर्वाःकृतवान्नियतेंद्रियः
अर्चयित्वाचपादाब्जं श्रीपतेः पुष्करंप्रति ४८
चलितोमार्गमध्येतुविमलोनाममेसखा
मिलितोमांव्रजन्गेहमिंद्रप्रस्थात्तुतीर्थतः ४९
नीतोऽहतेनराक्षस्यः पुनस्तत्रद्विजन्मना
तीर्थेतिमेपरावृत्यशक्रप्रस्थेऽखिलार्थदे ५०
तत्रास्तिद्वारकापुरयानिर्मिताविष्णुनास्वयम्
तत्रावलोकितः साक्षाद्विष्णुर्वाक्यान्नरूपतः ५१
तत्राहंसचसंस्नातौविष्णुभक्तिप्रलब्धये
दत्तासाविष्णुनामह्यंतस्मैचकृष्णमूर्तिना ५२
श्रुत्वातत्रहरेर्वाणीनरूपंवैविलोकितम्
भक्तिर्लब्धाततः स्थानाद्यमहंपुष्करंप्रति ५३
तस्यतीर्थाधिपस्येदंद्वारकाख्यस्यवैजलम्
कमंडलुगतंपुरयंनिशाचर्योवदाम्यहम् ५४
भवतीभिरहंपृष्टोयत्तदाख्यातमेवमे

दृष्ट्वावोदुर्दशामेतांकृपामेजायतेहृदि ५५
उच्यतांकिंकरोम्यद्यभवतीनांवशोह्यहम्
ज्ञानंभवतुयुष्माकमितिताः सिषिचेंभसा ५६
तास्तज्जलाभिमर्शात्तुसर्वेषांजन्मकर्मणां
संस्मृत्यतत्यजुश्चैवराक्षसंदेहमुल्वणम् ५७
आसाद्यदेवतादेहंविमानंसप्तमागतम्
आरुह्याप्सरसोभुत्वाताः प्रणेमुर्द्विजन्मने ५८
ऊचुश्चभोद्विजश्रेष्ठद्वारकाजलसंगमात्
राक्षसत्वाद्वयंमुक्तागच्छामस्त्रिदशालयम् ५९
इंद्रप्रस्थांतरावर्तिन्येषायाद्वारकाद्विज
नातःपरतरंलोकेऽन्यत्तीर्थमखिलार्थदम् ६०
नारदउवाच–
इत्युक्त्वाताःसमारूढाविमानेषुमहीपते
जग्मुःप्राचींदिशंतेनदत्ताज्ञावैद्विजन्मना ६१
यमुनातीरवर्तिन्याद्वारकायामहीपते
शृरावन्माहात्म्यमेतस्यानरः पापैःप्रमुच्यते ६२
वेदज्ञानांब्राह्मणानांशतस्येच्छासु भोजनात्
यत्फलंश्रवणादस्मान्महिम्नस्तत्प्रजायते ६३
गोविंदाराधनेसम्यग्यथावैसौख्यमिंद्रियम्
माहात्म्यश्रवणादस्याद्वारकायास्तथानृप ६४
सूर्येंदुग्रहणेदानात्सुवर्णपलविंशतेः
यत्फलंशृरावतैतस्यामाहात्म्यंतदवाप्यते ६५
विमलस्यसुतप्राप्तिंश्रुत्वासुतइहाप्यते
तत्सख्युर्भक्तिलाभंचलभ्यतेभक्तिरुत्तमा ६६
राक्षसीनांविमोक्षंयः शृणोतिश्रद्धयान्वितः
सयातिताइवश्रेष्ठंविमानेनसुरालयम् ६७
नृपवरमहिमातेवर्णितोद्वारकायास्त्रिभुवनजनसेव्याशक्रतीर्थस्थितायाः
किमपरमतिपुरायंवर्णयामित्वदग्रेकथयनहिविधेयः श्रेयसिस्वेविलंबः ६८
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्र्यांसंहितायामुत्तरखंडेकालिन्दी
माहात्म्येद्वारकायाख्यानंनामअष्टाधिकद्विशततमोऽध्यायः २०८

नवधिकद्विशततमोऽध्यायः

युधिष्ठिरउवाच–
सौभरेकस्यतीर्थस्यमाहात्म्यंनारदोमुनिः
वर्णयामासशिबयेशक्रतीर्थगतस्यच १
अतस्तुममशुश्रूषाजायतेमुनिपुगवः
शिविनारदसंवादब्रूहिपुण्यंनतायमे २
सौभरिरुवाच–
धर्मराजशिबीराजाश्रुत्वानारदवर्णितम्
द्वारकायास्तुमाहात्म्यंतमेवापृच्छदादरात् ३
शिबिरुवाच–
ब्रह्मांगजसुरश्रेष्ठश्रुतंमाहात्म्यमुत्तमम्
इंद्रप्रस्थतटस्थायाद्वारकायामयाद्भुतम् ४
अयोध्यायांयदिमुनेकिंचिदस्तिपवित्रकम्
चरितंममतद्ब्रूहिपिपासोस्त्वद्वचोऽमृतम् ५
नारदउवाच–
अस्त्यत्रचरितंपुण्यंमहापातकनाशनम्
नापितस्याद्ययुक्तस्यमुकुंदस्यद्विजस्यच ६
ब्रह्महानापितोराजन्नपमृत्युंगतोद्विजः
प्रसादात्कोशलायास्तुद्वावपिस्वर्गतिंगतौ ७
चंद्रभागानदीतीरेपुरीसाचनिवेशिता
तत्रास्तिनापितः पापश्चंडकोनामगर्हितः ८
चौर्येणपरवित्तानामपहर्तासपापकृत्
घातकःशस्त्रपाशाद्यैः पांथानामवलुंठकः ९
द्यूतमद्यरतोनित्यंपरस्त्रीलंपटेंद्रियः
भित्वादेवालयंभित्तिमिष्टिकाग्रावविक्रयी १०
सतस्योद्वसिताभ्यासेब्राह्मणोवसतिश्रिया
संयुक्तोब्रह्मकर्मज्ञोमुकुंदोनामतोनृप ११
सएकदासमालिग्यतरुणीमात्मयोषितम्
सुष्वापसुरतायासश्लथांगोनिशिनिर्भयम् १२
सचंडकोनिशीथेऽथप्रविवेशतदालयम्

मुकुंदस्यसमाहर्तुंहर्म्यैभूषादिवस्तुयत् १३
उपकार्याबहिस्थंयत्तद्गृहीत्वोऽगमद्गृहम्
स्वकीयंचपुनस्तस्यब्राह्मणस्याविशद्गृहम् १४
कपाटोत्पाटनार्थीतुयत्नेनमहताऽभवत्
लोहयंत्रावरुद्धश्चसनोद्धाटयितुंक्षमः १५
आरुरोहतदातस्यब्राह्मणस्याविशद्गृहम्
प्रविश्यतद्गृहंक्रूरःकृपणंपाणिनादधत् १६
अट्टालिकांसपापिष्ठोनापितस्तस्करक्रियः
तत्रापश्यत्प्रसुप्तौतौदंपतीरतिविह्वलौ १७
जगामचतयोःपार्श्वेहेमभूषाजिघृक्षया
शय्यायाएकदेशस्थंगृहीत्वाभूषणंबहु १८
हर्तुंतदंगतोहस्तंप्रससारस नापितः
तस्करस्पर्शतोविप्रोजजागारभयातुरः १९
नकिंचिदूचेसंमील्यनेत्रेतत्रैवसंस्थितः
यदासतस्करःपापोगृहीत्वादेहभूषणम् २०
चलितः सतदातेनदोर्भ्यामात्तोद्विजेनहि
पश्चादागत्यवित्तस्यासहमानेनसंक्षयम् २१
तेनापिनृपचौरेणकृपाणेनहतोद्विजः
विदीर्णोदरमध्यस्तुतातमातरितीरयन् २२
वदंतःकिंकिमेत्येतत्पार्श्वंतस्याययुर्जनाः
ददृशुस्तंनिः सृतांत्रंरुधिरालिप्तविग्रहम् २३
पप्रच्छुश्चमुकुंदेदंकर्मकेनेदृशंकृतम्
सोऽपिकृच्छ्रेणमहताप्रोवाचेदंस्वबांधवान् २४
मुकुंदउवाच-
ममैवपरिपाकोऽयपूर्वोपार्जितकर्मणाम्
नकश्चित्सुखदुःखस्यदाताकस्यापिदेहिनः २५
धर्मोऽधर्मश्चतावेवतेषांमूलंपुराकृतौ
नारदउवाच-
इत्युक्त्वासतुभूयस्यापीडयागाढपीडितः २६
तत्याजभूपतेप्राणान्पश्यतांसुहृदांतदा

विललापतदातस्यमाताद्विजसतीनृप २७
निधायतच्छिरःस्वांकेकुंडलाभ्यामलंकृतम्
मातोवाच-
हाहतास्मित्वयावत्सदशामंत्यांचगच्छता २८
दिंनश्रीरिवसूर्येणपश्चिमाचललंबिना
यदंगंचंदनालेपयोग्यंतवमहामते २९
मांमज्ञयार्तिशोकाब्धौतदिदंधुलिधूसरम् ३०
तांबूलचर्वणेभ्यासोयस्त्वयाविहितस्त्वसौ
सएवरुधिरोद्गारमिश्रेणक्रियतेध्रुवम्
तवयेलोचनेपूर्वंजिग्यतुः कमलश्रियम् ३१
तएवसांप्रतंजातेतिमिरौघावृतेइव
उत्तिष्ठोत्तिष्ठवत्सत्वंशिष्यानध्यापयात्मनः ३२
यथावद्वैश्वदेवांतेपूजयातिथिमागतम्
द्वारिस्थितावयस्यास्तेत्वाह्वयंतिप्रयाहितान् ३३
दातव्यंयद्ददस्वैभ्योगृहीतव्यंगृहाणतत्
हाहादेहिप्रतिवचः पतामितवपादयोः ३४
नोचेदहंविमोक्ष्यामिप्राणांस्तवसमीपतः
नारद उवाच-
इत्युक्त्वामूर्छितातस्यमुकुंदस्यप्रसूस्तदा ३५
भार्यातस्यशिरःस्वांकेविधायव्यलपच्चसा
भार्योवाच-
नाममार्गेण पाथोधेमदीयंवचनंशृणु ३६
रुष्टोऽसिचेत्समंमात्राकुतोवदममाग्रतः
नकदाचित्त्वयासाधोमौनमीदृक्कृतंपुरा
केनापिलघुनाभ्रात्राह्यपमानः कृतस्तव ३७
शुकोऽयपंजरस्थस्तेनान्नमत्तित्वया विना
भोजयैनंसुसिद्धान्नंकलवाचंचसारिकाम् ३८
रामरामहरेकृष्णविष्णोनामावलीमिति
पाठयोत्तिष्ठनिपुणौद्वावेतौसारिकाशुकौ ३९
अपराद्धंमयाकिंतेयत्वंमांनाभिभाषसे

यत्त्वयामेधनंदत्तंतन्मयासाधुरक्षिणम् ४०
अर्पितंयत्त्वयानाथनिजतेजोममोदरे
सूतिकालमहंतस्य नोपेक्षेत्वामनुव्रजे ४१
नारदउवाच-
एवंविलप्यसातस्यमुकुंदस्यप्रियातदा
नरुरोदस्वभर्तारमनुगंतुमनासती ४२
अथतस्यमुकुंदस्यगुरुर्वेदायनाभिधः
संन्यासीपर्यटन्पृथ्वद्यंतस्यवेश्मययौनृप ४३
मुकुंदःक्वगतोमाताभार्यातस्यचधीमतः
नदृश्यतेतदातेनपृष्टेत्याचष्टचेटिका ४४
चेटिकोवाच
स्वामिन्केनापिचौरेणममस्वामीहतोनिशि
स्नुषायाभूषणंनीतंदुकूलानिचसर्वशः ४५
समृतः पतितोभूमौहर्म्यस्योपरितिष्ठति
तस्यमातावधूश्चैवभ्रातरश्चतदंतिके ४६
विलपंतिमहाशोकसागरेपतितागुरो
नारदउवाच-
इत्याकर्ण्यपरिव्राट्सवचनंचेटिकोदितम् ४७
आरुह्यहर्म्यमद्राक्षीदात्मांतेवासिनंमृतम्
तदंतिकेसमालोक्यबंधूनांक्रंदतोभृशम् ४८
उद्धरिष्यन्निदंधीरः शोकाब्धेस्तानुवाचह
वेदायनउवाच-
देहमुद्दिश्यवात्मानंशोकोऽयक्रियतेत्वया ४९
मातःकथयसत्यंमेनोभयोर्युज्यतेहिसः
देहोऽयभूतसंघातः प्रारब्धेःसमुपार्जितः ५०
तेषुक्षीणेषुभूतानांपृथक्त्वमुपजायते
यदेकीभवनंतेषांकर्मभिर्जन्मतन्नृणाम् ५१
तन्नाशेतत्पृथक्त्वंचतदेवमरणंस्मृतम्
एक्यंपृथक्त्वंभूतानांकर्माधोनेयतोबुधैः ५२
अतोदेहेनकर्तव्यः शोकः परवशेजडे

अनाद्यविद्ययाजीवेदृष्टेमरणजन्मनी ५३
देहस्यात्मन्यहबुंद्ध्यामन्यतेनहितत्रते
तन्निवृत्तौसतद्ब्रह्मयच्छुद्धंरूपवर्जितम् ५४
स्वप्रकाशंजगद्धेतुहेत्वतीतंगुणोर्जितम्
नित्यंविज्ञानमानंदस्वभासाभासयज्ञगत् ५५
नजिह्वालेढितच्चक्षुर्नपश्यति शृणोतिन
श्रुतिर्जिघ्रतिनघ्राणंनत्वक्स्पृशतिकर्हिचित् ५६
अतीतमिंद्रियेभ्यस्तत्स्वप्रकाशकमात्मदृक्
अविषयंमनोदूरंबुद्धेरपिनगोचरम् ५७
तस्यावताररूपाणिशुद्धसत्वानिदेवताः
सेवंतेतन्नजानंतिरूपंयत्सदसत्परम् ५८
एवंस्वरूपमात्मायस्तंसमुद्दिश्यकःकुधीः
क्रोधंकुर्याद्यतस्तस्यनोत्पत्तिर्नैवसंक्षयः ५९
इतिश्रीपाद्मेमहापुराणेपचंपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेकालिदीमाहात्म्येनवाधिकद्विशततमोऽध्यायः २०९

दशाधिकद्विशततमोऽध्यायः

नारदउवाच-
एएवंप्रबोध्यतान्सर्वान्वचोभिः पारमार्थिकैः
सहंसः कारयामासक्रियास्तस्यात्मसंभवाः १
अंतर्वत्नीमुकुंदस्यनिर्बंधंकुर्वतीवधूः
अनुगंतुंस्वभर्तारंविदुषातेनवारिता २
तस्यास्थीनिसमादायतेनसन्यासिनासमम्
तद्भ्राताप्रययौगंगाजलेपातयितुंनृप ३
विप्रसन्यासिनौतौहिकतिभिर्वासरैर्नृप
सार्थलोकवशात्प्राप्तौइंद्रप्रस्थेऽत्रसत्पदे ४
इंद्रप्रस्थांतरावर्तिन्येषायाकोशलानृप
अत्रसुप्तौनिशायांतौयमुनातीरभूतले ५
आत्मनोरुभयोर्मध्येन्यस्यास्थिपटसंपुटम्
मार्गखेदपरिक्रांतौदशांसौषुप्तिकींगतौ ६

निशीथेऽथप्रसुप्तेषुसार्थलोकेषुकश्चन
एकःश्वातत्रसंप्राप्तः पक्वान्नादिजिहीर्षया ७
बभ्रामसर्वशिविरेजिघ्रन्पाकस्थलद्यंमुहुः
भाजनानिलिहन्मूर्ध्निक्वचदंडाहतिंसहन् ८
केनचित्ताडितोमूर्ध्निनिशब्दंविद्रुतस्ततः
प्रतिचक्रुमशक्तस्तुस्त्रीजितः स्वस्त्रियायथा ९
यत्रावकंडितः सश्वादंडग्रावेष्टकादिभिः
पुनर्विवेशतत्रैवसान्नपात्रलिलिप्सया १०
भोगेच्छयायथावेश्यास्नेहवान्निर्द्धनोजनः
भ्रमन्नेवंसचात्रापियत्रसुप्तौहिताबुभौ ११
सारमेयस्तयोर्मध्याज्ञह्लेसपटसंपुटम्
नीत्वासकियतींभूमिंदंतैस्तत्पटसंपुटम् १२
विदार्यास्थीनितत्स्थानिनिर्मांसान्यवलोक्यसः
एतस्याः कोशलायास्तुजलमध्येसमाक्षिपत् १३
क्षिप्तमात्रेषुतेनास्थिष्वेतदंबुनिभूपते
दिव्यंविमानमास्थाय मुकुंदोऽत्रसमागतः १४
दृष्ट्वागुर्वनुजौसुप्तौशनैः प्राबोधयत्तदा
उवाचचनमस्कृत्यगुरुंदिव्याकृतिर्नृप १५
मुकुंदउवाच
वेदायनगुरोतुभ्यंनमश्राशीस्तवानुज
प्रासादाद्वांममास्थीनितीर्थेऽत्रपतितानिवै १६
अयंमृत्युमहंगत्वानिरयंप्राप्यतत्फलम्
एतत्तीर्थप्रसादेनदैवीलब्धामयागतिः १७
त्वांगुरुंतीर्थभूतंतुनमस्कर्तुमिहागतः
अहंगच्छन्विमानेनदिव्येनत्रिदशालयम् १८
नमस्कृतोभवानेतत्तीर्थचायंसहो दरः
दृष्टोमामनुजानीहियामिस्वर्गंसुखोदयम् १९
नारदउवाच-
श्रुत्वैवंवचनंतस्यमुकुंदस्यगुरुस्तदा
वेदायनोविमानस्थंतमूचे गतविस्मयः २०

देवायनउवाच-
मुकुंदाख्याहिमेसत्यंलब्ध्वायन्मरणंभवान्
कस्मिंल्लोकेगतस्तातयतोयात्यधुनादिवम् २१
किंवृत्तंतत्रतेतातस्यलोकस्यकोऽधिपः
कीदृशीचप्रजाकीदृक्धर्मस्तत्राखिलंवद २२
मुकुंदउवाच-
कथयामिगुरोतुभ्यंयद्बृत्तंमरणादनु
तीर्थस्यास्यप्रसादेनस्मृतिर्मेजायतेऽधुना २३
यदाहंतेननिहतश्चंडकेनदुरात्मना
नापितेनतदाजग्मुर्यमभृत्याः सुदारुणाः २४
पिंगाक्षारक्तकेशाश्चश्यामदेहनखाधराः
वामनादीर्घचरणाह्रस्वनासाश्चदंतुराः २५
नीयतांनीयतामेषधर्मराजस्यशासनात्
पुरींसंयमनीमेवमूचिरेतेपरस्परम् २६
इत्युक्त्वायातनादेहेमांनिवेश्यमहारुषा
निबध्यदारुणैःपाशैर्जघ्नुर्लोहस्यमुद्गरैः २७
तैरहंनीयमानस्तुमार्गेह्युत्तप्तवालुके
अरुदंभृशदुःखार्तस्ताडितोऽहपुनश्चतैः २८
प्रोचुश्चतेध्रुवंकृत्वानिर्भत्स्येंतिचमांबहु
यमदूताऊचुः
त्वयालुप्तोगुरुर्यस्माद्वदताब्रह्मनिश्चलम् २९
किंकरोषियमस्याग्रेद्रष्टव्यंदारुणंमुखम्
तस्यपापस्यभोक्तव्यंदारुणस्यफलंत्वया ३०
तेनैवपाप्मनापापिन्नपमृत्युंगतोभवान्
इत्युक्त्वामांमुहूर्तेनबहुयोजनसंस्थिताम् ३१
पुरींसंयमनींनिन्युर्यत्रराजास्वयंयमः
प्रणम्यधर्मराजानंस्थापयित्वातुमांपुरः ३२
आनीतोऽयद्विजःपापइतिमांतेन्यवेदयन्
दृष्ट्वामांधर्मराजोऽथप्रोवाचस्वसभासदः ३३
यमउवाच-

भोसभ्यामामकींवाचंशृरवंतुसुसमाहिताः
यदाहंब्रह्मणाह्यस्मिन्नधिकारेनिवेशितः ३४
तदामामित्युवाचासौब्रह्मालोकपितामहः
ब्रह्मोवाच-
अधर्मिणांनराणांत्वंशास्तासंयमनीपतिः ३५
यथापराधमाधत्स्वदंडंचंडकरात्मज
पित्रोरपोषकोयस्तुसमर्थोगुरुध्रुक्तुयः
एतौमहापातकिनौनिपात्यौनिरयेषुते ३६
सर्वेषुयावद्वर्षाणांप्रत्येकमयुतंभवेत्
एतयोर्नत्वयाकार्यादयाजातुककुप्पते ३७
यमउवाच-
इत्यहंब्रह्मणोवाक्यात्स्वगुरुद्रुहिमानवे
नकरोमिक्रियांसभ्यास्तथापित्रोरपोषके ३८
ब्राह्मणोऽयगुरुद्रोहीतद्रोहादपमृत्युताम्
प्राप्तोमच्छासनाद्भृत्यैरानीतोदर्शनात्ममः ३९
भोभृत्याः प्रथमंघोरेरौरवेवत्सरायुते
पात्यतांचपुनस्तस्मान्निःसार्य्यान्यत्रपात्यताम् ४०
तावंतमेवकालंवैपापोऽयगुरुलोपकः
नरकेष्वितिसर्वेषुयथाकालंस्थितंद्रुतम् ४१
मुकुंदउवाच-
वेदायनगुरोस्वामिन्भृत्यास्तेयमशासनात्
नीत्वामांरौरवेघोरेपाशैर्बध्वान्यपातयन् ४२
तत्राहंतांव्यथांगुर्वीलब्धवानतिदारुणाम्
यथाकोऽपिक्षणस्तातनीतोमेयुगवत्तदा ४३
त्रिंशद्दिनानितन्नीतंदुःखंमेतत्रतिष्ठता
एकत्रिंशतमेह्यस्मिन्दिनेऽहनिर्गतस्तदा ४४
पतितेष्वस्थिखंडेषुतीर्थेऽस्मिन्नुतमोत्तमे
गुरुलोपोद्भवंपापंसद्योनष्टंममाभवत ४५
तीर्थस्यास्यप्रसादेनलब्धाचस्वर्गतिर्मया
सुखंस्वर्गेनिवत्स्यामियावदिंद्राश्चतुर्दश ४६

यमस्यनगरेतस्मिन्याःप्रजानिवसंतिवै
पापिनांभयदायिन्योधर्मिणांतामनोहराः ४७
सिंहास्यागजकोलास्यामहादंष्ट्रोन्नतोदरीः
बिडालास्याः पिंगकेश्योभामिन्योदीर्घपत्कराः ४८
तीर्थस्यास्यप्रसादेननिःपापोहंयदाभवम्
तदामयाप्रजादृष्टादिव्यरूपायमालये ४९
सर्वास्ताः सत्यवादिन्योविनयाचारसंचिताः
दिव्याभरणधारिण्योदिव्यांबरविभूषिताः ५०
इत्येतत्कथितंतातयत्पृष्टोऽहत्वयानघ
अनुजानीहिमांगंतुममरेशपुरींप्रति ५१
नारदउवाच–
इत्याकर्ण्यससन्यासीस्वशिष्योक्तंवचस्तदा
भूयःपप्रच्छधर्मात्मामुकुंदंतंद्विजंनृप ५२
वेदायनउवाच–
बाल्यावधिगुरुस्नेहंमत्तोऽधीतंत्वयाखिलम्
शब्दशास्त्रसमेतश्चवेदस्तुसपदक्रमः ५३
विहितामम शुश्रूषाभावेनभवतोत्तमा
त्वयिसंतिसतांसाधोगुणाःशमदमादयः ५४
गुरुलोपकृतंपापंकथंतेसमजायत
एतदाख्याहिमेतातयथाजानामितत्वतः ५५
मुकुंदउवाच–
जन्मोपवीतकन्यानांधातारोनिगमस्यच
यज्ञोपवीतदातुश्चनाज्ञाभंगःकृतोमया ५६
श्वश्रुश्वशुरयोःसेवाभृत्येनेवकृतामया
तवापिशास्त्रदातुश्चनाज्ञाभंगःकृतोमया ५७
पुरोधायःकुलाचार्योवेदवेदांतपारगः
तस्यापराद्धंकेचिन्मेतत्रत्वंश्रोतुमर्हसि ५८
यद्यस्माकंकुलेपुत्रोजायतेधर्मकोविद
तदापुरोधसेधेनुमेकांवातस्यदक्षिणाम् ५९
दत्त्वासंच्छिद्यतेनालमितिवंशस्यनः स्थितिः

पुराममैवपुत्रेतुजातमात्रेशुभेऽहनि ६०
कुलक्रियामयातातनकृतामूढबुद्धिना
तस्याश्चाकरणेनैवगुरुलोपकरोऽभवम् ६१
निवेदितमिदंसर्वंगुरुलोपाद्यथामम
पापमासीदनुज्ञामेदेहियामि सुरालयम् ६२
वेदायनउवाच-
इंद्रप्रस्थांतरावर्तिन्येषांयाकोशलाशुभा
स्मृतिरस्याःप्रसादेनदृश्यतेपूर्वजन्मनः ६३
केनपुरायेनतीर्थेऽस्मिन्नस्थीनिपतितानिते
मुकुंदाख्याहिचैतस्यस्मृतिरस्तितवानघ ६४
मुकंदउवाच-
एकस्तुब्राह्मणःकश्चित्सायंमद्गृहमागतः
तस्मैस्थानंमयादत्तंभोजनंचयथाविधि ६५
सोऽपिभुक्त्वायथाकामंसुष्वापशयनेशुभे
निशीथेतस्यसर्वांगेज्वरोऽभूदतिदारुणः ६६
तेनपीडितसर्वांगोनिद्रांलेभेनसद्विजः
प्रभातएवतत्याजप्राणान्मृत्यावुपस्थिते ६७
तस्यदाहादिकर्माणिविहितानिमयागुरो
तदस्थीनिचगंगायांपातितानिविधानतः ६८
तेनपुरायेनमेस्थीनिपतितानिशिवप्रदे
तीर्थेऽस्मिन्कोशलेनाम्निब्रह्मदेवविनिर्मिते ६९
नारदउवाच-
स्वचरितमितिराजन्सद्विजः प्रोच्यसद्यःसुरसुभगशरीरोद्यांययौयानगत्या
इदमकथितमयातंतस्करात्प्राप्यमृत्युंव्यलभतदिवमेतत्तीर्थराजप्रसादात् ७०
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्र्यांसंहितायामुत्तरखंडेकालिदी
माहात्म्येमुकुंदोपाख्यानेदशाधिकद्विशततमोऽध्यायः २१०

एकादशधिकद्विशततमोऽध्यायः

नारदउवाच-
शिवेतवपुरःसर्वंमुकंदाख्यानमुत्तमम्

कथितंचंडकस्यापिनापितस्य शृणुष्वमे १
यस्मिन्दिनेमुकुंदस्तुब्राह्मणस्तेनघातितः
चंडकेनतदाराजंस्तद्वृत्तंनागरैः श्रुतम् २
श्रुत्वातैस्तन्नृपस्याग्रेनिवेदितमितिस्फुटम्
नागराऊचुः
चंडकेनहतो राजन्मुकुंदोब्राह्मणोत्तमः ३
नीतंचतद्धनंभूरियद्युक्तंतद्विधीयताम्
त्वमस्माकंप्रजानांहिरक्षकःशासकोऽसताम् ४
नारदउवाच-
इत्याकर्ण्यसभूपालोमंत्रिणंपार्श्ववर्तिनम्
उवाचकोपरक्ताक्षःकिमेभिःकथ्यतेशृणु ५
शीघ्रमानयतंपापंनोचेत्त्वांघातयाम्यहम्
उत्तिष्ठोत्तिष्ठपापिष्ठसाधूनांशंबिधीयताम् ६
पीड्यंतेविषयेयस्यप्रजादस्युभिरुल्बणैः
सनृपोनरकंयातितेभ्यस्ताश्चेन्नरक्षति ७
नारदउवाच-
निशम्येतिवचोराज्ञःसचिवःसशिवेनृपः
वेगेनहयमारुह्यपदातिशतसंयुतः ८
ययौगृहेमुकुंदस्यतस्यबंधूनपृच्छत
मुकुंदःकेननिहतःसत्यंब्रूतममाग्रतः ९
तंपापंनिहनिष्यामिशासनाद्भूपतेरहम्
नारदउवाच-
श्रुत्वेतिमंत्रिणोवाक्यंप्रत्यूचुर्विप्रबांधवाः १०
विप्रबांधवाऊचुः -
चंडकेनहतोमंत्रिन्मुकुंदोनापितेनहि
इदंपलायमानस्यतस्योष्णीषंपपातवै ११
दृष्टःस्वचक्षुषावध्वामुकुंदस्यैव सोघकृत्
किंकुर्मस्तेनापापेनमज्जिताःशोकसागरे १२
नारदउवाच -
इत्याकर्ण्यवचस्तेषांबंधूनांब्राह्मणस्यहि

समंत्रीतस्यपापस्यनापितस्यगृहंययौ १३
अश्वादुत्तीर्यतरसातद्गृहंस्वयमाविशत्
कतिभिःपत्तिभिः सार्द्धंशयानचददर्शह १४
पत्तयस्तुतदाज्ञप्ताः केशेष्वाकृष्यतत्क्षणात्
तल्पादुत्थापयामासुस्तंपापंनापिताधमम् १५
किंकिमित्येवसंजल्पन्नेत्रेउन्मीलयत्यसौ
यावत्सनापितः पापस्तावत्तंददृशे पुरः १६
संस्मरंतंनिजंकर्मरात्रौयत्कृतवानघम्
अधोमुखःक्षणंतस्थौपश्यन्मूर्ध्निस्थितंयमम् १७
ग्राहयित्वाचसचिवस्तंपापंचस्वपत्तिभिः
निनायनृपतेःपार्श्वमितिचोवाचभूपतिम् १८
आनीतोब्रह्महारजन्नयंचंडकनापितः
यदाज्ञापयसिस्वामिंस्तरसातत्करोम्यहम् १९
राजोवाच-
धर्मज्ञसचिवश्रेष्ठंशृणुत्वंवचनंमम
इयंसरिद्वरायुष्मंश्चंद्रभागात्रनिर्मलाः २०
त्यजंतियेऽत्रवैप्राणाल्लँभंतेतेसुरास्पदम्
अतएषनहंतव्यः पापात्माह्यत्रनापितः २१
पंचकोशांतरेह्यस्यामर्यादायाबहिर्यदि
नरकान्दारुणान्ह्येषब्रह्महायातुमाचिरम् २२
नारदवाच-
इत्युक्तस्तेनवैराज्ञासराजन्मंत्रिसत्तमः
श्वपचान्प्रेरयामासहंतुंतंभूपशासनात् २३
श्वपचास्तेतमुन्नीयचंद्रभागापरेतटे
योजनद्वयभूभागंचिच्छिदुस्तस्यमस्तकम् २४
सपापोमारवेदेशेसर्पोऽभूत्कालविग्रहः
धवकोटरमध्यस्थोविषज्वालाकराननः २५
सशुष्कोधववृक्षस्तुतस्यफूत्कारवह्निना
तथातपनतापेनसरसोऽपियथाह्रदः २६
गमनात्तस्यपापस्यसर्वतोवृक्षमूषरम्

उच्छिद्यतृणजातादिजातंपश्वहितं तदा २७
तत्रजातुसमायातः सार्थोदक्षिणदेशतः
नारायणाश्रमंगच्छन्बदर्याख्यंसिवेनृप २८
तत्रैकोब्राह्मणः कश्चित्सार्थेसंमीलितः पथि
निश्छिद्रांकाष्ठमंजूषांपितृमात्रस्थिसंयुताम् २९
स्कंधेनधारयन्यातितानिपातयितुंनृप
गंगांभसिमहाभागपापिनामपिकामदे ३०
सोऽप्यागतस्तत्रवनेयत्रास्तिसभुजंगमः
विविक्तेक्षिप्यमंजूषांशलाकालोहनिर्मिताम् ३१
अथागत्यभुजंगोऽसौशलाकांफणयाघटत्
किंचिदुद्धाटितायांसमंजूषायांसमाविशत् ३२
पुनःशलाकास्वंस्थानमागताथसकुंडली
तत्रैवतस्थौनिश्चेष्टोमंजूषायांविषोल्बणः ३३
अथप्रभातेसर्वेतेचेलुः स्थानात्ततोनृप
ब्राह्मणःसोऽपिमंजूषांकंबलेनसमावृताम् ३४
कृत्वाशिरसिराजेंद्रचचालप्रतिजाह्नवीम्
कतिभिर्वासरैः सार्थःसंप्राप्तस्तीर्थगामिनाम् ३५
इहैवकोशलायांवैपुनीतायांमहीपते
अथशीतातुरोविप्रःकंबलंचोदघाटयत् ३६
मंजूषावरणंराजन्तत्रायोध्यातटेशुभे
सोऽपिसर्पोनिराहारोलब्ध्वामारुतभोजनम् ३७
निश्चक्रामबहिस्तस्मादुत्क्षेप्यसुशलाकिकाम्
तंनिःसृतंसमालोक्यसर्प्पसर्पइतिक्रुधा३८
व्याहरंतोजनाःसर्वेलोष्टहस्ताःसमभ्ययुः
यावत्पलायतेसर्पस्तावदेकेनघातितः ३९
तत्याजसतदाप्राणान्पश्यतांतीर्थगामिनाम्
त्यक्त्वाभुजंगदेहंसदेवत्वंप्रापदुर्लभम् ४०
दिव्यंविमानमारुह्यप्रोवाचेदंजनानिह
सर्पउवाच-
भोदाक्षिणात्याःशृणुतब्राह्मणावचनंमम ४१

पुराचंडकनमाहंनापितोब्रह्महाधमः
ब्रह्महत्याप्रदोषेणसर्पग्रासंमरुस्थले ४२
भुक्त्वानरकदुःखानिवर्षाणांलक्षपंचकम्
अतीतंसर्पयोनौमेवर्षाणामयुतद्वयम् ४३
तीर्थस्यास्यप्रसादेनप्राप्तंदेवत्वमुत्तमम्
तस्मादिदंनवैत्याज्यंतीर्थंवैकोशलाभिधम्
सर्वार्थदंयतोनाकःप्राप्तःपापीयसामया ४४
नारदउवाच–
एवंसनापितः पापोयोनिंप्राप्यविनिंदिताम्
जगामद्यांविमानस्थस्तीर्थस्यास्यप्रसादतः ४५
तेदाक्षिणात्यायतयोभुत्वातत्रैवतीर्थके
ऊषुर्गोविंदपादाब्जमानसादृष्टवैभवे ४६
माहात्म्यमस्यतीर्थस्यदृष्ट्वासब्राह्मणोत्तमः
तीर्थेऽत्रजातविश्रद्धः पित्रोरस्थीनिसोऽक्षिपत् ४७
पतितेष्वस्थिखंडेषुपितरौतस्यतत्क्षणात्
विमानवरमारूढौदिव्यौतत्रसमागतौ ४८
ऊचतुश्चस्वतनयंशृरावानेषुजनेषुवै
वत्सजीवचिरंलोकेधनधान्यसुखीभव ४९
आवयोर्मुक्तिदानाच्चमुक्तिंयास्यसिनोमृषा
गंगायांपिंडदानेनयत्फलंस्यात्सुतस्यवै
पितृणांयागतिश्चात्रद्वयंस्यादस्थिपाततः ५०
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
कालिदीमाहात्म्येमुकुंदोपाख्यानंनामैकादशाधिकद्विशतमोध्यायः २११

द्वादशाधिकद्विशततमोऽध्यायः

नारदउवाच–
इत्युक्त्वातस्यविप्रस्यपितरौदिव्यरूपिणौ
विमानवरमारुह्यगतौहरिपुरप्रति १
तयोः पुत्रस्तुतत्रैवकोशलायांदिनत्रयम्
उषित्वास्वगृहंप्रायात्चितयंस्तीर्थवैभवम् २

इयमेवतुकथ्यंते विबुधैः कोशलानृप
कथयिष्यामितत्तेऽहश्रवणोत्सुकचेतसे ३
तेदाक्षिणात्याबटवस्तस्यामूषुमुमूर्षवः
समर्थार्थप्रदायिन्यांकोशलायांविपद्यताम् ४
कश्चिदेकस्तदातेषुतामनादृत्यकोशलाम्
गच्छन्नारायणस्थानंविष्णुनावारितःपथि ५
बृद्धब्राह्मणरूपेणप्रोक्तंचेतिद्विजंप्रति
बृद्धब्राह्मणउवाच-
क्वयासिब्राह्मणश्रेष्ठत्यक्त्वेमांकोशलांशुभाम् ६
इंद्रप्रस्थमिदंतीर्थंसर्वतीर्थोत्तमंद्विज
कोशलाह्यत्रपुत्रेयंमुक्तिदाविष्णुवल्लभा ७
यत्रयासिविहायैनांनिष्कामपददायिनीम्
नसिद्धिर्भवितातत्रविष्णुस्तेचपराङ्मुखः ८
मुक्तिंचेदिच्छसेविप्रतीर्थेन्यासंप्रगृह्यच
यस्ययस्येच्छयास्नासितंतंवर्गंप्रदास्यति ९
तवदृष्टिपथेविप्रसर्पोऽपिसुरतामियात्
अस्याःप्रसादतोमुक्तौस्वर्गस्थौविप्रदंपती १०
संजातप्रत्ययोऽपित्वमेतन्माहात्म्यदर्शनात्
लब्ध्वाभाग्योदये नापिकथमेनांविमुंचसि ११
यथाकश्चित्तृषार्तोऽपिलब्ध्वाप्यमृतवारिधिम्
तंत्यक्त्वायातिपंकांभस्तद्वत्त्वंमूढदृश्यसे १२
यथाचिंतामणिंकश्चित्कूपेक्षिपतिमोहितः
हस्तस्थंयागतिस्तस्यदृश्यतेसागतिस्तव १३
आराध्यविष्णुंविश्वेशंयथाकश्चित्पुमान्कुधीः
सुखमैंद्रियकंतुच्छंयाचतेसागतिस्तव १४
नयातिकोशलामेनांत्यक्त्वासर्वार्थदायिनीम्
स्नातस्यात्रदिवप्राप्तिर्मृतस्यामृतसंस्थितिः १५
नारदउवाच-
राजन्नाकर्ण्यविप्रोऽसौद्विजश्रेयभृतोहरेः
वाक्यंप्रोवाचविप्रायश्रेष्ठंबदरिकाश्रमम् १६

विप्रउवाच-
भोभोविप्रवरश्रद्धातववाक्येनजायते
ममश्रुतवतः पूर्वमल्पग्रामस्यवैभवम् १७
इंद्रप्रस्थमिदंतीर्थंनकदाचिन्मयाश्रुतम्
कुतस्तुकोशलाबृद्धएतदंतरवर्तिनी १८
यत्रनारायणः साक्षान्मुक्तायत्रचयोगिनः
मुक्त्वातमाश्रमंपुरायंतिष्ठाम्यत्रकथंद्विज १९
यथागत्यस्वयंविष्णुरित्युक्त्वामां निवारयेत्
बदर्याश्चाधिकंक्षेत्रमिंद्रप्रस्थमिदंद्विज २०
तदाहंनप्रतिष्ठामिचालितोऽपितमाश्रमम्
मुक्तिकामःस्वसदनान्नान्यथास्थितिरत्रमे २१
नारदउवाच-
इत्युक्तेतेनविप्रेणप्रादुरासीच्चतुर्भुजः
विहायप्राकृतंरूपंदिव्यरूपधरोहरिः २२
उवाचचमहाभागंतंद्विजंमोक्षकामुकम्
विष्णुवाच-
इंद्रप्रस्थमिदंविप्रसर्वतीर्थोत्तमोत्तमम्
ब्रह्मज्ञेष्विवसर्वेषुशंभुर्गंगानदीष्विव २३
हिमवानिवशैलेषुपक्षिराडिवपक्षिषु
त्रिदशेषुयथाशक्रोवैष्णवेष्विवनारदः २४
तेजस्विषुयथासूर्यःक्षीराब्धिरिवचाब्धिषु
यथावर्णेषुभूदेवः सृष्टिष्विवपितामहः २५
विष्णोर्यथावतारेषुकौशल्याजनितोवरः
तथासमस्ततीर्थेषुशक्रप्रस्थमिदंवरम् २६
निष्कामोवासकामोवायातितीर्थेक्वचिन्नरः
तत्रतत्रसमस्तात्माफलदाताहमेववै २७
इंद्रप्रस्थांतरगतांत्यक्त्वायोयातिकोशलाम्
सनोफलमवाप्नोतिभक्तोवरदवृंदपात् २८
नारदउवाच-
एवंनिशम्यतद्वाक्यंदृष्ट्वातद्रूपमुत्तमम्

प्रणिपत्यरमाकांतंतस्यामेवागमद्द्विजः २९
भगवानपिविश्वात्मासपद्यंतर्दधेविभुः
तत्त्वमुद्दिश्यतंविप्रंतेनभावेनपूजितः ३०
तत्रागत्यसविप्रोऽसौकोशलायांनराधिप
कथयामासतद्वृत्तंसर्वंसर्वान्स्वंसंगिनः ३१
तेपिश्रुत्वा महाभागादाक्षिणात्याद्विजातयः
तस्यामनशनंकृत्वातत्यजुःप्राकृतंवपुः ३२
तदेवगरुडारूढः श्रीविष्णुंसमुपागतः
विमानैःस्वगणैःसार्द्धंतावद्भिर्दीप्तिभास्वरैः ३३
तेतंदृष्ट्वासमायांतंविमानंगणसंयुतम्
वपुषादिव्यरूपेणदंडवत्पतिताभुवि ३४
तुष्टवुश्चद्विजाःसर्वेदिव्यज्ञानवपुर्द्धराः
तंदिव्यरूपिणंदेवदेववंद्यपदांबुजम् ३५
ब्राह्मणाऊचुः –
नमस्तेऽतसीपुष्पसंकाशभासंतनुंबिभ्रतेपीतवासोवृताय
लसत्कुंडलप्रोतनानोपलायश्रुतौचंचलाव्यापिनीलांबुदाय ३६
भक्तिस्त्वदीयाकिलकल्पवल्लीसमाश्रितायच्छतिचित्तवांच्छितम्
यथातथैपातवकोशलाविभोजनैरुभेतेकृपयातवाप्यते ३७
वंदामहेतेचरणारविंदंवृदांरकैर्वृंदितमीश्वराद्यैः
विचिंत्यमानंहृदियोगिवृंदैःकंदंपरानंदभुवोविमुक्तेः ३८
प्राप्ताःकामंश्रीपतेत्वत्स्वरूपंश्रीवत्साद्यैर्लक्षितंचारुचिह्नैः
वांच्छामस्तेदासभावंतथापिप्राप्तंसर्वैरादृतंनारदाद्यैः ३९
यत्सौख्यंतेदासभावंगतानांतन्नोलक्ष्म्यावक्षसोंतर्वसंत्याः
तज्ञानातिश्रीपतेश्रीमहेशोनान्योलोकेयेनतच्चानुभूतम् ४०
मध्येऽस्माकंश्रीपतेसेवकानांनीरागाणामप्यसौमाननीयः
अस्मात्तंतेनारदाद्यामुनीशास्त्वद्भक्ताप्तैर्लोकनाथंभजंते ४१
कामंब्रह्मानंदमासोतरात्मात्वद्दास्येनोतृप्तिमायातिशंभुः
वारंवारंत्वद्गुणानाग्रहीतुंनृत्यत्युच्चैस्त्वत्परोभावयुक्तः ४२
हेतोरस्माद्देहिनःस्वस्यदास्यंयत्प्राप्तानांनोर्मयः संभवंति
त्वच्चिह्नांगौद्वारपालौतदीयौमोहाद्धामप्राप्यतौतत्स्वकीयम् ४३

लोकादस्मादंतरेणत्वदिच्छात्वल्लोकानांनोद्यतेचाशुपातः
कोजानीयात्तावकीमत्रमायांदुविज्ञेयांब्रह्मशर्वादिदेवैः ४४
नारदउवाच-
एवं तैः स्तूयमानः सप्रभुर्निजपदोन्मुखः
उवाचतान्दाक्षिणात्यान्मेघगंभीरयागिरा ४५
श्रीभगवानुवाच-
भोभोद्विजाभवंतोऽस्याकोशलायाःप्रसादतः
सारूप्यमपिमेप्राप्तादासभावंचयास्यथ ४६
अद्यप्रभृतिमेविप्रास्तीर्थमेतदनुत्तमम्
दक्षिणकोशलेत्युच्चैर्नाम्नाख्यातंभविष्यति ४७
यत्रदाशरथीभूत्वानिहनिष्यद्दशाननम्
साकथ्यतेमुनिवरैः सर्वैरुत्तरकोशला ४८
विपन्नोज्ञानवान्यस्यावैकुंठमधिरोहति
विनापितद्वसेद्योऽस्यासोऽपिस्वर्गंचगच्छति ४९
इमांततोदशगुणामाहुर्दक्षिणकोशलाम्
एकादशगुणामेकेसम्यगाहुर्मुनीश्वराः ५०
इयानेवविशेषोऽस्तितस्याअस्यामतिर्मम
तस्यांमृतंनयंत्येतेवैकुंठंमामकागणाः ५१
अस्यांमृतंस्वयमहमनन्यवदमानसम्
आरोप्यगरुडंदत्त्वासारूप्यंप्रापयामितत् ५२
नारदउवाच-
इत्युक्त्वातान्द्विजान्विष्णुर्नीत्वावैकुंठमभ्यगात्
महिमानंस्तुवन्नस्यस्वयंतीर्थस्यभूपते ५३
एतत्तेसर्वमाख्यातंकारणंजगतीपते
येनेयंकथ्यते विज्ञ्रिहदक्षिणकोशला ५४
कलिमलकुलहंताशृणवतांमानवानांकमलनयनपादप्राप्तयेवांच्छितश्च
नृपवरमहिमातेवर्णितः कोशलायामधुवनभववृत्तंशृणवतस्तेवदामि ५५
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेकालिदी
माहात्म्येकोशलामहिमावर्णनंनामद्वादशाधिकद्विशततमोऽध्यायः २१२

त्रयोदशाधिकद्विशततमोऽध्यायः

नारदउवाच-
एतन्मधुवनंतातशिवेपरमपावनम्
देवराजायतुष्टेनस्थापिताविष्णुनापुरी १
अत्रविश्रांतिनामेदंतीर्थंत्रिभुवनोत्तमम्
विविदांमुक्तिदंपुंसांपवनंसाधुसेवितम् २
नित्यंवसतिविश्वात्माविष्णुःश्रीकोलरूपधृक्
अत्रतीर्थोत्तमेपुण्येनृपविश्रांतिसंज्ञके ३
बहुभिर्जन्मभिर्येनविष्णुराराधितः सदा
मरणंतस्यतीर्थेऽस्मिन्जायतेकिलभूपते ४
कालिंद्याएवकूलेतुद्वितीयंहरिणाकृतम्
तीर्थंविश्रांतिसंज्ञंतुयत्रकंसोनिपातितः ५
एतद्द्वयंसमंराजन्गुणैर्वैकुंठदातृभिः
भाग्योदयेनकेनापिलभ्यते सकलार्थदम् ६
अथतीर्थस्यमाहात्म्यंकथयामितवाग्रतः
यच्छ्रुत्वासर्वतीर्थेषुमज्जनाल्लप्स्यसेफलम् ७
हिमाचलोपत्यकायांकिरातनगरेशुभे
ब्राह्मणोनामकुशलोराजन्नासीद्दरिद्रतः ८
तस्यपत्नीदुराचारादुराचारनरेरता
कर्मणामोहयामासपतिंसाबंधकीवरा ९
पतिस्तयामोहितस्तुननिबारयितुंक्षमः
तदाज्ञातत्परोदीनःक्रयक्रीतइवाभवत् १०
लोकाउपहरंतिस्मतंद्विजंकुलटापतिम्
उपहासभयात्सोऽपिनिर्ययौनगृहात् कुधीः ११
महार्हाणिदुकूलानिभूषणानिचसादधौ
जारैर्दत्तानिदुष्टात्माहसितापिनलज्जते १२
वस्त्रंपुरातनंदास्यादुत्तीर्णंयच्छरीरतः
अवज्ञापूर्वकंदुष्टास्वभर्त्रेसंप्रयच्छति १३
एवंतयाकुलटयासोऽवज्ञातंस्वकःपतिः
नितांतंदुःखमापन्नोविषमत्त्वामृतोनिशि १४

साभीताराजतः पापाह्यनयात्स्वैरिणीतदा
अनुयास्यामिभर्त्तारमित्युवाचमृषावचः १५
तयैवंशिक्षितासख्यःस्वकीयस्तांसमीपगाः
निवारयामासुरितिकथयित्वामहीपतेः १६
सख्यऊचुः -
भोमृगाक्षिकिमर्थंतेक्रियतेऽनर्थईदृश
यत्सुवर्णनिभंकायंत्वंनाशयितुमुद्यता १७
भवत्याकिंसुखंदृष्टंममुष्याव्यवसायिनः
दरिद्रस्यासमर्थस्यसखिस्वोदरपूरिणः १८
पालयैनंसुतंबालंत्वदृतेकोऽस्यपालकः
मरिष्यामोवयंसर्वामृतायांत्वयिसुंदरि १९
गृहमेतदवेक्षस्वसमुत्तिष्ठवरानने
जीयादयंतवसुतोयस्त्रीभाविसुखप्रदः २०
वांछंतिबांधवाः सर्वेत्वदीयास्तवजीवितम्
उत्तिष्ठनिजबंधुनांकुरुचित्तंसमीहितम् २१
रुदंतितवरागेणवयस्याःसकलाःसति
निजवाक्यप्रदानेनवारयैताः सुदुःखिताः २२
नारदउवाच-
इत्याकर्ण्यवचस्तासांदुष्टासाधर्मविश्रुतम्
उन्नमय्यमुखंप्राहश्रावयंतीस्वबांधवान् २३
सख्युवाच-
युष्माभिर्यद्वचोधर्मंप्रोक्तंजानेऋृतंननु
तथापिस्वपतिः स्त्रीभिर्मान्योलोकद्वयप्रदः २४
यदुच्यतेमयावाक्यंधर्मशास्त्रसमन्वितम्
तद्वचः श्रूयतांसख्योयुक्तंचेदनुमोदत २५
यास्त्रीनिधनमापन्नंपतिमन्वेतितत्परा
पापापिसहतेनैवस्वर्गेवसतिसाचिरम् २६
स्त्रीभिःपतिर्नहातव्योनिर्धनारोगवानपि
जीवन्मृतोऽनुगंतव्यः श्रुतिरेषासनातनी २७
विचिंत्येतिस्वमनसिसख्योन्वेमिस्वकंपतिम्

वर्तिष्यतेस्वभाग्येनकरिष्येऽहकिमस्यवै २८
नारदउवाच-
इत्युक्तास्तास्तयासख्योदुष्टादुष्टमतिप्रदाः
ऊचुस्तांधर्मवाक्येनसमस्त जनमोहिनीम् २९
सख्यऊचुः -
जहिपूर्वंहिनः सुभ्रुपश्चादन्वेहिवल्लभे
समस्तास्त्वद्वियोगंनवयंसोढुंक्षमामहे ३०
अस्मांस्तवविनिघ्नंत्याअनुयांत्याःस्वकंपतिम्
धर्मोऽल्पपापबाहुल्यंस्वर्गप्राप्तिस्तुकीदृशी ३१
जीवन्नयंपतिःस्वीयः साध्वयंप्रतिपालितः
यदुक्तंपतिपत्नीभ्यांतत्त्वयाविहितंसखी ३२
यावत्स्वजीवनोपायंविधातुमयमक्षमः
तावत्त्वदीयभाग्येनजीविष्यतिसुतस्तव ३३
नारदउवाच-
इत्युक्तासानिववृतेस्वभर्त्तुरनुयानतः
सुतेनकारयामासतदातद्विरतिक्रियाम् ३४
अथकालेनकियतासुतोपनयनेमतिम्
कारयामाससाविप्रैर्दत्त्वाजारार्पितंधनम् ३५
कृतोपनयनःकुंडःसतत्त्वज्ञानवान्शिशुः
गृहान्निर्गम्यसपदिनारायणपरोऽभवत् ३६
सतांसंगतिमासाद्यत्यक्त्वास्वंप्राकृतंवपुः
आरुरोहनिजंलोकमप्राप्यंयोगिभिश्चतत् ३७
अथसानिर्गतेपुत्रेमनोदुःखंचकारवै
तस्मिन्नेवदिनेराजन्भूयोजारैः सहारमत् ३८
इतितैरममाणायांतस्यांजारैःसमंनृप
समागताजराकालेलावण्यमदनाशिनी ३९
त्यक्तोपपतिभिर्दृष्टासाजराग्रस्तविग्रहा
बभूवदूतिकान्यासंकुलशीलविनाशिनी ४०
तदाह्येकस्यविप्रस्यसवत्सांगामपाहरत्
विक्रीताकियताराजन्द्रव्येणननुसातया ४१

तयेतिगमितः कालोदूतित्वेनकियान्नृप
पश्चाच्छुष्करशरीरोऽस्याविगुणःसमजायत ४२
तस्याःकुष्ठेसमुत्पन्नेगलितंह्यंगपंचकम्
हस्तौपादौचनृपतेपंचमानासिकतदा ४३
एवंभूतायदाहारंनलभेतकुतश्चन
तदातुतत्रोदितयादास्यासानीयतापणम् ४४
तत्रसापतितापापालोकान्संप्रार्थ्यदीनया
गिराधिगितिकुर्वाणाचक्रेस्वोदरपूरणम् ४५
तदिहाभ्यासवत्तर्यैकोद्विजः सर्वागमार्थवित्
तांविलोक्यमहावाग्मीप्रोवाचेदंवचोनृप ४६
जनानांदुःखदंपापमिहलोकेपरत्रच
तस्मात्पापंनकर्त्तव्यंमानवैर्दुःखभीरुभिः ४७
पापंकृत्वाजनोयस्तुप्रायश्चित्तंकरोतिवै
नतदाचरितेभूयोनतत्फलमवाप्नुयात् ४८
यः कृत्वामुहुरेनांसिप्रायश्चित्तंकरोतिन
तस्यास्याइवपापायागतिरत्रपरत्रच ४९
अनयापापसंघातोलोकेऽत्रसमुपार्जितः
इहैवतत्फलंभुंक्तेभोन्द्यतेनरकेऽप्यसौ ५०
सर्वशास्त्रेषुदृष्टंवैसर्वेषांपापकर्मणाम्
प्रायश्चित्तंनचस्त्रीणांविन्मुखानांतुकर्मणः ५१
नारदउवाच–
इत्युक्त्वासद्विजश्रेष्ठोनमस्कृत्यरविंययौ
विष्णुंसंस्मृत्यसंस्मृत्यभीतस्तदवलोकनात् ५२
एवंसादुःखमापन्नाभुंजानाकर्मणः फलम्
अर्जितस्यस्वयंराजन्मृताकतिपयैर्दिनैः ५३
नतस्याअग्निसंस्कारः संजातः पापकर्मणः
आकृष्यकेशेसानीताश्वपचैर्नगराद्बहिः ५४
मरणावसरेतस्यायमभृत्याः समागताः
प्रापप्ययातनादेहंतांनिन्युर्भास्करेःपुरीम् ५५
सौम्यःसधर्मिणांदेवःसाक्षाद्दुह्यस्तुपापिनाम्

तस्याविलोकनाद्भूयः सोप्यभुद्वैपराङ्मुखः ५६
भृत्यानाज्ञापयामासयमएवपराङ्मुखः
रौरवेनरकेघोरेपात्यतांसामयेरिता ५७
इत्युक्तास्तेतदाभृत्यानीत्वातांघोररौरवे
न्यपातयन्नधोववक्त्रांस्मरंतींकर्मयत्कृतम् ५८
एकमन्वंतरंयावत्सास्थित्वातत्ररौरवे
पश्चाद्गोधासमुत्पन्नाश्मशानेमृतमांसभुक् ५९
तत्रापिसावर्षशतंलेभेदुःखंस्वकर्मणः
फलंमृतकमांसेकुर्वत्याहारमुत्कटम् ६०
एकदासमुनेःपुत्रोयोऽस्याकुक्षौव्यजायत
विप्रयोनौसमायातः श्मशानेतत्रपर्यटन् ६१
मुनिपुत्रस्तुतांवीक्ष्यमृतानांक्रव्यमश्नतीम्
ध्यात्वाक्षणंस्वमनसिबुबुधेतांस्वमातरम् ६२
सउवाचात्मनात्मानं बुद्धातांनिजमातरम्
मुनिपुत्रउवाच-
एतांतुतारयाम्यद्यदुस्तराद्दुःखवारिधेः ६३
अहोनमुच्यतेजंतुर्जातपापेनकर्मणा
आत्मनोपार्जितेनैवभोगकालावधिंविना ६४
अस्याःकालोव्यतीयायनिरयेमानवाभिधः
सांप्रतंचजनैस्त्वत्रवत्सराणांशतंगतम् ६५
कियदग्रेचभोक्तव्यमेतयापापमुल्बणम्
नारदउवाच
इत्यालोच्यपुनर्दध्यौज्ञानेनामील्यचक्षुषी ६६
दृष्ट्वातस्यागतिंघोरांपापायादिव्यचक्षुषा
पुनरात्मानमादेहंसद्विजप्रवरोनृप ६७
मुनिपुत्रउवाच-
अहोकल्पशतेनापिनिस्तारोऽस्यानदृश्यते
विनासत्तीर्थमरणंशरणंवारमापतेः ६८
अथवापिंडदानेनगयायां मत्कृतेनच
विनास्याः सद्गतिंनैवकल्पकोटिशतैरपि ६९

नघटेतद्वयंचास्याश्रस्यांयोनौकदाचन
तत्तीर्थविषयेमृत्युःसेवायां श्रीपतेरतिः ७०
अस्याउद्धारहेतुर्वैमग्नायाः पापसागरे
भवितामत्कृतंश्राद्धंगयायांचहित्रकम् ७१
नारदउवाच–
इत्यालोच्यसधर्मात्माययौस्वपितुराश्रमम्
आचख्यौपितरंसर्वंस्वमातुर्दुःखकारणम् ७२
निशम्यपुत्रवचनंमातृदुःखनिवेदकम्
उवाचसमुनिश्रेष्ठःपुत्रंप्रणतकंधरम् ७३
मुनिरुवाच–
हेतातमातरंस्वीयांशीघ्रमुद्धरदुर्गतेः
नयविद्भूपतिःशत्रोर्जयलक्ष्मीमिवाहवे ७४
नतारयतियःपुत्रोमातरंपितरंस्वकम्
दुःखात्सयातिनरकंयदितारयितुंक्षमः ७५
स्वपुत्रात्प्राप्यपानीयंपिंडांश्चवरतीर्थके
पितरोनरकात्स्वर्गंस्वर्गाद्यांतिहरेः पदम् ७६
तस्मादाशुसमुत्तिष्ठगच्छखांडवकानने
तत्रास्तियमुनापुरयामुनिवर्यनिषेविता ७७
तत्तीरेऽस्तिहरिप्रस्थंसर्वतीर्थमयंततः
पुरयंमधुवनंतत्रविष्णुनास्थापितंस्वयम् ७८
तत्रस्नात्वातुविधिवत्कृत्वानित्यक्रियांनिजाम्
तामुद्दिश्यकुरुश्राद्धंस्वप्रसूंचकुरुक्रियाम् ७९
त्वयातत्रकृते श्राद्धेतस्याः सद्गतिमिच्छता
साप्राप्स्यतिहरेर्लोकंहित्वागोधांगमुल्बणम् ८०
गयायांपिंडदानेनयत्फलंतातजायते
ततःशतगुणंपुरयंसद्भिर्मधुवनेस्मृतम् ८१
इदानींवर्ततेतातकन्याराशिगतोरविः
पुत्रगत्वाकुरुश्राद्धंपूर्वानुद्दिश्यबांधवान् ८२

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेकालिदी
माहात्म्येत्रयोदशाधिकद्विशततमोऽध्यायः २१३

चतुर्दशाधिकद्विशततमोऽध्यायः

नारदउवाच-
इत्याकर्ण्यपितुर्वाक्यंसजगामत्वरान्वितः
पुण्यंमधुवनंराजन्गयाशतगुणाधिकम् १
तत्तीर्थवासिनोविप्रान्सायमामंत्र्यमंत्रवित्
कालेपुनःसमाहूयबभाषेस्वागतंवचः २
ततः प्रक्षाल्यतत्पादौगंधाद्यैरभिपूज्यच
पादार्घ्यमददात्प्रीत्यासमेनस्वयमाचमत् ३
ततस्तान्ब्राह्मणान्नीत्वाश्राद्धदेशेन्यवेशयत्
कुशांबुतुलसीपुष्पगंधाक्षततिलैःसह ४
पूरयित्वाकर्मपात्रंपुंडरीकाक्षमस्मरत्
देवताभ्यइतिश्लोकंत्रिःकृत्वासोऽपठद्द्विजः ५
सतिलंशोधितकुशैर्विदधेबंधनंततः
अग्निष्वात्तेतिमं त्रेणपूर्वादीनांदिशांक्रमात् ६
रक्षोभूतेतिमंत्रेणनीवीबंधंव्यधाच्चसः
ततः प्रतिज्ञामाधायददौद्विजकुशासनम् ७
पितॄन्समाह्वयामाससतदाब्राह्मणोत्तमः
दत्त्वाततस्तुहस्तार्घ्यंपात्रंन्युब्जीचकारवै ८
कृत्वागंधादिदानंचपुनःसव्येनचाचमत्
सव्यापसव्येनतदादत्वापात्राणिसद्विजः ९
तैर्ब्राह्मणैरनुज्ञातश्चक्रेऽग्नौकरणंततः
आज्यादिहविषाराजं स्तान्यमत्राण्यपूरयत् १०
अनुत्तानोत्तानपाणिः कुर्वन्पात्रावलंबनम्
पपाठपाठितोविप्रैः पृथ्वीत्वेतिद्विजन्मनाम् ११
असंस्कृतप्रणीतानामितिमंत्रेणसद्विजः
दर्भेषुदक्षिणाग्रेषुददौचविकिरासनम् १२
अग्निदग्धेतिमंत्रेणघृतमिश्रान्नमक्षिपत्
जलेनसहराजेंद्रविष्टरेकुशकल्पिते १३
सव्येनपुनराचम्यददौचुलकजीवनम्
तृप्ताःस्थेतिचसंपृच्छ्यातृप्तास्मप्रतिभाषिताः १४

शेषान्नभोजनेतेषांजग्राहाज्ञांद्विजन्मनाम्
पिंडार्थंवेदिकांकृत्वावितस्तिप्रमितांद्विजः १५
रेखांचकारदर्भेणदक्षिणाभिमुखींनृप
येरूपाणीतिमंत्रेणदधेऽग्निदिशिचोल्मुकम् १६
पूर्वजन्मनियामातापितायश्चमहीपते
तयोश्चपितरौयौहियौचराजन् पितामहौ १७
यःप्रमातामहश्चापिपितरौराजसत्तम
पित्रादीन्षट्सपत्नीकांस्तानुद्दिश्ययथाविधि १८
कुशासनानिदत्त्वावैददौपिंडान्षडैवहि
गंधादिभिश्चसंपूज्यमध्यपिंडविसर्जनम् १९
कृत्वाघ्रायचवामांसेपिंडपात्रंन्यवेशयेत्
जलपात्रंतदादायवाजेवाजेपठन्निति २०
पाद्यार्घंचपुनर्दत्त्वादक्षिणाद्यैरतूतुषत्
श्राद्वारंताननुव्रज्यतेभ्योलब्ध्वानुशासनम् २१
बुभुजेचस्वयंराजन्बांधवैः सहसद्विजः
एवंसमाप्यराजेंद्रश्राद्धंसद्विजसत्तमः २२
पूर्वसबंधिनांतत्रतीर्थेमधुवनेशुभे
यदाचचालशांतात्मापितुराश्रमकंप्रति २३
तदासंमिलितामार्गेसर्वेतेश्राद्धभोजिनः
विमानषट्कमारूढादिव्याभरणभूषिताः
दिव्यांबरधराराजन्नित्यूचुस्तंद्विजोत्तमम् २४
पितरऊचुः -
भोवत्सविप्रशार्दूलवृणीष्ववरमुत्तमम्
तीर्थेऽत्रकुर्वताश्राद्धंभवतातारितावयम् २५
वयंगणत्वमापन्नाःश्रीपतेस्त्वत्प्रसादतः
प्रार्थयस्वमहाबुद्धेयदिष्टंतवचेतसि २६
मुनिपुत्रउवाच-
केयूयंकुतआयातागणत्वंहिकुतोगताः
उपकारंविनाकस्माद्वरंयन्मेप्रयच्छत २७
नारदउवाच-

इत्याकर्ण्यवचस्तस्यपूर्वजन्मसुतस्यवै
पिताप्रोवाचयोदुःखाद्भक्षयित्वाविषंमृतः २८
पितोवाच -
अहंतवपिताविप्रपूर्वजन्मनिभूसुरः
भार्ययाव्यभिचारिण्यामात्रातेपीडिताभृशम् २९
अतीवदुःखमापन्नोभक्षयित्वाविषंनिशि
अपमृत्युंगतस्तस्मादभवंरजनीचरः ३०
एवंमन्वतरंतात शतंपंचदशाधिकम्
वर्षाणांचव्यतीतंतद्राक्षसत्वंगतेमयि ३१
इदानींषोडशाब्देतुत्वयाश्राद्धेकृतेऽत्रवै
पुण्येमधुवनेतीर्थेदेवत्वंप्राप्तवानहम् ३२
एतद्विमानमायांतंस्वर्गादिंद्रप्रणोदितम्
सगणंसाप्सरोवृंदंममारोहणहेतवे ३३
अत्रतुभ्यंवरंदातुंसगणः साप्सरोगणः
विमानवरमारुह्यगच्छन्स्वर्गेऽहमागमम् ३४
वरंवरयभद्रंतेनविलंबसहावयम्
एरावतगजारूढःसुरेशोमामवेक्षते ३५
नारदउवाच
इत्युक्त्वानिजवृत्तांतंदत्त्वाचनिजसूनवे
तत्प्रार्थितांहरेर्भक्तिंजगामसदिवंनृप ३६
अथप्रोवाचतन्मातापूर्वजन्मसुतंचतम्
मातोवाच-
त्वत्प्रसादादहंजातादेवीमुक्ताचपापतः ३७
प्राप्तंशच्याःसखीत्वंमेपापयापिद्विजोत्तम
त्वयात्रविहितेश्राद्धेतीर्थेविश्रांतिसंज्ञके ३८
प्रार्थयस्वमहाभागनिजचित्तसमीहितम्
ददामितेयतोऽस्माकंदेवीनांनवचोमृषा ३९
येनपापेनजाताहंगोधाचपितृकानने
नरकेचिरमास्थायतत्त्वंवेत्सिद्विजोत्तम ४०
अनुजानीहिमांपुत्रपुलोमतनयादिवि

मामपेद्मितमाकाशेवृतादेवांगनागणैः ४१
नारदउवाच-
इत्युक्त्वासापितन्मातानिष्कामायस्वसूनवे
ययौत्रिविष्टपंराजन्शिरसातेनवंदिता ४२
ततः पितामहस्तस्यस्वपौत्रंतंद्विजोत्तमम्
उवाचवचनंभूयःहरेर्बिभ्रत्स्वरूपताम् ४३
पितामहउवाच-
वत्सवत्सचिरंजीवलभस्वनिजवांच्छितम्
त्वत्प्रसादाद्वयंतीर्णादुस्तराद्भवसागरात् ४४
पितामहोऽहतेवत्सतवेयंचपितामही
मृतंमानुगतासाध्वीसालोक्यमचिरंगता ४५
अद्यत्वयात्रविश्रांतौविहितेश्राद्धकर्मणि
आवयोस्तुहरेर्लोकेलब्धातस्यस्वरूपता ४६
नारदउवाच-
एवमुक्त्वातयासार्द्धंस्वस्त्रियाभूपसत्तम
ब्रह्मलोकमतिक्रम्यवैकुंठंसययौद्विजः ४७
अथप्रोवाचराजेंद्रवचस्तत्प्रपितामहः
यत्तेतत्कथयाम्यद्यशृणुष्वैकमनाद्विज ४८
प्रपितामहउवाच-
भोभोवत्समहाभागतवाहंप्रपितामहः
भ्रूणहत्याफलेनाहंशौकरींयोनिमाप्तवान् ४९
ततोविनिर्गतस्तातश्चाभवंपापपीडितः
ततःस्थावरतांप्राप्तोविंध्येपर्वतसत्तमे ५०
तत्रापिचिरकालेनस्थितं स्थावरतांदधत्
हस्तिनाकेनचित्तातमूलादुत्पाटितोबलात् ५१
तस्मिन्नेवततः कालेत्वयाश्राद्धमकारिवै
अस्मिंस्तीर्थोत्तमेतातमुक्तोऽहस्थावरात्ततः ५२
प्राप्तोऽययक्षराजस्यनगर्य्यांवासउत्तमः
देह्यनुज्ञांद्विजश्रेष्ठयामितांत्वत्प्रसादतः ५३
त्वांदिदृक्षुरिहायातोदृष्टस्त्वंपुरायदर्शनः

तीर्थचसर्वतीर्थेषुश्रेष्ठंमधुवनंमया ५४
नारदउवाच-
इत्युक्तस्तेनराजेंद्रमुनिपुत्रःसधर्मवित्
पप्रच्छशिरसानम्यतंनिजंप्रपितामहम् ५५
ऋृषिरुवाच-
ब्राह्मणानांकुलेतातजातोऽसित्वंगरीयसि
कथंविहितवान्पापंभ्रूणहत्याभिधंगुरो ५६
येननिंद्यांसमापन्नोभवान्योनिपरंपराम्
समाचद्त्वमहाभागयदितत्स्मृतिरस्तिते ५७
प्रपितामहउवाच-
पुराहंद्विजशार्दूलब्राह्मणस्यैवजन्मनि
मंत्रयंत्रविधानेनकृतवान्वृत्तिमात्मनः ५८
धनलोभेननारीणांगर्भार्थमहमौषधम्
दत्तवांश्चैवनाशायदैवोपहतचेतनः ५९
लोभोहिधनहीनानांजनानांज्ञानमाहरेत्
शुचिकालेदिनाधीशःकुल्यानामिवजीवनम् ६०
ज्ञानेनष्टेजनस्तातपापमाचरतेध्रुवम्
पापान्नरकमाप्नोतिततोयातिकुयोनिताम् ६१
काचिदेकातदानारीगुर्विणीमामपृच्छत
किंजनिष्याम्यहंविप्रपुत्रंवेत्यथवास्त्रियम् ६२
तदाहमुक्तवांस्तांवैतवकन्याभविष्यति
पुत्रोत्पत्तिकृतेतुभ्यंप्रदास्यामिमहौषधम् ६३
इत्युक्ताचमयानारीदुर्बुद्धिस्त्रीसिरोमणिः
जग्राहममपादौतुदत्तंहेमपलंचमे ६४
इत्युवाचचसामह्यंषट्कन्याजनितामया
सप्तमीयंत्वयाचोक्ताजीविष्येस्यानजन्मनि ६५
तथाकुरुमहाबुद्धेयथाहंवैनकन्यकाम्
जनयिष्यामिविप्रान्यांनिजप्राणविनाशिनीम् ६६
इत्याकर्ण्यवचस्तस्यास्तामहंपुनरुक्तवान्
प्रसूतिकालेदास्यामिपुत्रोत्पाद्यहमौषधम् ६७

तथेतिसावचोमह्यंप्रतिश्रुत्यगतागृहम्
अपेक्षमाणातंकालंतस्थौवाक्यप्रतीतिकृत् ६८
तस्यांगतायांभोतातचिंतयाभवमातुरः
इत्यहंद्विजशार्दूलतच्छृणुष्ववदामिते ६९
पुत्रोत्पत्तिप्रतीतेयंमह्यंदत्तवतीपलम्
सुवर्णस्यनजानामिकिमस्याःसंभविष्यति ७०
किमत्रकरणीयंमेकथमेतत्सुवर्णकम्
पलप्रमाणंतिष्ठेद्वैदरिद्रस्यगृहेमम ७१
एवंविमृश्यतद्दास्यास्तस्यैहस्तेनदापितम्
गर्भपातकरंतातमयादारुणमौषधम् ७२
तेनौषधेनतस्यास्तुगर्भस्त्रावेऽभवत्तदा
मासेतृतीयेनज्ञातंचिह्नंपुरुषकन्ययोः ७३
तदासामद्गृहंप्राप्ताविषरणागर्भस्त्रावतः
अथार्थयत्सुवर्णंतन्निराशापुत्रजन्मनि ७४
तदाहमिष्टकाचूर्णंभस्मनाचसमन्वितम्
हरिद्राचूर्णसंयुक्तंसांबुतस्यैअदर्शयम् ७५
एतच्चूर्णंकृतंमातस्त्वत्पुत्रोत्पत्तयेमया
त्वद्दानाद्दिवगुणंद्रव्यंलग्नमेतस्यसाधने ७६
इत्युक्त्वासामयातातत्यक्त्वाचूर्णंगृहंययौ
मामुक्त्वेतिगृहीष्यामिकालेत्वत्तोद्विजोत्तम ७७
एवंमयाकृतातातभ्रूणहत्यातिदारुणा
ययातिकुत्सितेयोनित्रितये भ्रमितंमया ७८
त्वत्प्रसादादहंमुक्तः सांप्रतंस्थावरत्वतः
देह्यनुज्ञांमुनिश्रेष्ठयाम्यहंह्यलकांशुभाम् ७९
नारदउवाच-
एवमुक्त्वातु राजेंद्रतस्यतुप्रपितामहः
तेनाभिवंदितोमूर्ध्नाप्रययौदिशमुत्तराम् ८०
विमानेनविचित्रेणकिंकिणीजालमालिना
नृत्यद्गंधर्वजुष्टेनमणिप्राकारशोभिना ८१
अथतस्यमहाराजविप्रस्यप्रपितामही

उवाचस्वप्रपौत्रंतंविमानवरमास्थिता ८२
प्रपितामह्युवाच
नान्यत्रकुत्रगंतासिपुण्येनानेनसुब्रत
विनापद्मापतेःपादपद्मचिह्नितमंदिरम् ८३
अयंममपतिःपापोमुनेत्वत्प्रपितामहः
वारितोऽपिमयापापमाचचारसुदुष्टधीः ८४
सोऽपित्वयातिपापात्मातारितोदुःखसागरात्
शक्यतेकेनवैकर्तुंतावकंगुणवर्णनम् ८५
नारदउवाच-
इत्युक्त्वा सापिराजेंद्रपतिलोकंजगामह
अलकायांचिरंपत्यातेनैवमुमुदेसह ८६
अथतेमुनिपुत्रस्यसर्वेमातामहादयः
सपत्नीकाः समारुह्यविमानेषुययुर्दिवम् ८७
सोऽपिद्विजवरस्तस्मात्तीर्थात्स्वपितुराश्रमम्
गत्वातंसर्ववृत्तांतंस्वपित्रेसमवर्णयत् ८८
सोऽपितत्रगतः सार्द्धंकुटुंबेनवनेमधोः
चकारपर्णशालांबैविश्रांतेस्तुसमीपतः ८९
तत्रविश्रांततीर्थंतुत्रिकालंस्नानमाचरन्
नाकरोद्विष्णुलोकेऽपिस्पृहांसमुनिसत्तमः ९०
एकदाजलमध्येसस्नानंकुर्वन्मुनिर्नृप
आचकांक्षेचभवताकदामेहरिदर्शनम् ९१
एवंकामयमानस्यमुनिवर्यस्यभूपते
आजगामत्वरायुक्तोपद्मिराजासनोहरिः ९२
लक्ष्म्यावक्षःस्थयासार्द्धंचतुर्बाहुधरोहरिः
नवीनघनवर्णांगोविद्युद्वर्णांबरावृतः ९३
कौस्तुभोद्भासिसद्वक्षाः शंखचक्रगदाब्जभृत्
वनमालालसत्कंठोमकराकृतिकुंडलः ९४
फुल्लांबुजपलाशाक्षःस्वलकालंकृताननः
विद्रुमाकारकरजोरुणहस्तांघ्रिसत्तलः ९५
उवाचतंद्विजश्रेष्ठंदंतभासाविभासयन्

शरन्निशापतिस्तोमतिरस्कारकृतादिशः ९६
श्रीभगवानुवाच-
भोभोद्विजवरैतन्मेतीर्थमधुवनंशुभम्
विश्रांतसंज्ञकंस्नानात्सर्वकामोपपादकम् ९७
अत्रत्वयास्नानकालेवांछितंममदर्शनम्
तुभ्यंहितन्मयादत्तंब्रह्मादिसुरदुर्लभम् ९८
त्यजदेहमिमंविप्रमानुषंदिव्यमाप्नुहि
आयाहिमद्गृहंसार्द्धंमयारुह्यखगेश्वरम् ९९
नारदउवाच-
इत्याकरार्यवचस्तस्यश्रीपतेःसमुनीश्वरः
तुष्टावप्रणतोभूत्वाजलएवविशांपते १००
मुनिरुवाच-
श्रीपतेश्रीमदंभोजसंमर्दितपदांबुजम्
भवतोभवतापघ्नंवंदेत्रिदशवंदितम् १०१
त्वदीयमाय्यानाथमोहितायेऽत्रजंतवः
तेषांकदाचिन्निस्तारोनकृपामंतरेणते १०२
सत्तीर्थसेवनादीशतथासज्जनसंगमात्
पुसांभक्तिस्तुयेषांवैजायतेकृपयातव १०३
साधुभिर्बहुभिरीरितंहरेयोनिशम्यगुणकीर्त्तनंतव
कीर्तयत्यखिलपापनाशनंगातृगर्भकुहरेसनोपतेत् १०४
श्रीपतेतवजनस्यमानसंदैवतस्तुपतितंमहारणे
गुंठितंचरजसाजहातिनोनिर्मलत्वमिवरत्नमुत्तमम् १०५
यःपुमान्पतितितेपदांबुजेदंडवत्पुलकमंगकेदधत्
सोन्वयंनयतितावकंपदंस्वंचवांछितमशेषयोगिभिः १०६
जीवएवतवमाययाविभोमोहितोभ्रमतिविश्ववर्त्मसु
त्वत्कृपाललितलोचनां चलैस्तत्क्षणंतरतिविश्ववारिधिम् १०७
नारदउवाच-
इतिसंस्तुत्यगोबिंदंदंडवत्तस्यपादयोः
पपातसमुनिश्रेष्ठोजयेतिमुहुरीरयन् १०८
श्रीपतिस्तंमुनिश्रेष्ठंदंडवत्पतितंभुवि

उत्थाप्यबाहुभिस्तूर्णंसुपर्णेसमरोपयत् १०९
तत्कुटुंबंचविश्वात्मावैकुंठंचजगामह
इत्येतत्कथितंराजन्शिवेमधुवनस्यवै ११०
महात्म्यंसर्वपापघ्नंकिमन्यच्छ्रोतुमिच्छसि
यद्वदं श्रृणुयान्मर्त्यःसर्वपापैःप्रमुच्यते १११
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्र्यांसंहितायामुत्तरखंडेकालिदी माहात्म्येमधुवनमाहात्म्यंनामचतुर्दशाधिकद्विशततमोऽध्यायः २१४

पञ्चदशाधिकद्विशततमोऽध्यायः

सौभरिरुवाच-
युधिष्ठिरेदमाकर्ण्यनारदस्यवचःशुभम्
शिबिरौशीनरोराजाविनीतस्तमुवाचह १
शिबिरुवाच-
मुनेमयातुमाहात्म्यंश्रुतं मधुवनस्यवै
त्वन्मुखात्किंतुसंदेहोह्येकोस्तिमममानसे २
येनधर्मात्मनासर्वेतारितानिजबांधवाः
जन्मद्वयकृताह्यासीत्सकथंस्वैरिणीसुतः ३
एतदाचक्ष्वभगवन्सर्वस्त्वंवेत्सितत्त्वतः
अतीतंवर्त्तमानंचभविष्यमपिनारद ४
नारदउवाच-
एकदामुनयः सर्वेहरिद्वारेसमागताः
दशम्यांज्येष्ठशुक्लस्ययुक्तायांसर्वपर्वभिः ५
तत्रतेविधिवत्स्नात्वाकृत्वाचस्वक्रियांशुभाम्
हिमाचलस्यपृष्ठेतुस्वस्थचित्ताउपाविशन् ६
तारात्मजोबुधस्तत्रमुनिसंगेसमागतः
सौंदर्यभरसंयुक्तःस्मरोमूर्त्तइवापरः ७
तंसमागतमालोक्यसमुत्तस्थुर्मुनीश्वराः
तेनाभिवंदितामूर्ध्नापुनस्तेसमुपाविशन् ८
बुधस्यादरमालोक्यविहितंमुनिपुंगवैः
मुनिपुत्रःसपप्रच्छपितरंस्वमितिप्रभो ९

मुनिपुत्रउवाच–
कोऽयतातसमायातः सौंदर्येणापरःस्मरः
व्यासादिभिर्मुनिवरैर्भृशंतस्यादरःकृतः १०
नारदउवाच–
इत्याकर्ण्यसधर्मात्मास्वस्यपुत्रस्य भाषितम्
बभाषेमुनिशार्दूलःपुत्रंनिर्बंधसंयुतम् ११
पितोवाच–
बृहस्पतेःसुरगुरोःसुतस्तारोदरोदोद्भवः
बुद्धिमान्बुधनामायंशशिवंशकरः परः १२
पुत्रउवाच–
किंत्वयाकथितंनात निः संबंधपरंवचः
बृहस्पतेः सुतोयस्तुसकथंशशिवंशकृत् १३
जज्ञेनसूययातातविधुरत्रेर्मुनीश्वरात्
तस्यवंशस्यकर्त्तायंकथंसुरगुरोः सुतः १४
एषमेमानसेतातसंशयोवर्ततेमहान्
तमपाकुरुविप्रेंद्रसंदिहानस्यमेशिशोः १५
पितोवाच–
पुराबृहस्पतेर्भार्यातारानामयशस्विनी
चंद्रेणापहृतातातबलाद्बलवतातदा १६
अपहृत्यतदानीतास्वगृहंविधिनागुरोः
भार्यासातुतयासार्द्धरमितंतेनवैचिरम् १७
तस्मागर्भोऽभवत्तातकालेनकियतातदा
ततोबृहस्पतिर्भार्यानिजांतांसमयाचत १८
चंद्रमापिमदाविष्टोनददौ बलदर्पितः
ततोबृहस्पतिस्तातदेवैःशक्रादिभिःसह १९
सन्नद्धोयोद्धुमारेभेसमंबलवदिंदुना
सहायार्थंविधोःशुक्रःसमंदितिजदानवैः २०
समागतस्तदातातततस्मिन्रणसमुद्यमे
ततस्तारानिमित्तंवैयुद्धंप्रावर्त्ततोल्बणम् २१
करिष्यतेसर्वजनैः प्रधानंतारकामयम्

तस्मिन्युद्धे महाभीमेहतादेवाश्चदानवाः २२
नकस्यचिज्जयस्तातबभूवनपराजयः
ततःसमागतोब्रह्मासंनिवार्योल्बणंरणम् २३
ददौबृहस्पतेस्तारांबोधयित्वानिशापतिम्
बृहस्पतिस्तुतांवीक्ष्यतारांगर्भवतींतदा
क्रुद्धोविरिंचेःप्रत्यक्षंसमाजेदेवदैत्ययोः २४
बृहस्पतिरुवाच-
शृणुष्वमामकंवाक्यंतारेतरललोचने
कस्यायंध्रियतेगर्भोभवतेदोंर्ममाथवा २५
पितोवाच-
एवंमुहुर्मुहुःपृष्टासाचलज्जावतीशुभा
यदानकथयामासकिंचित्तातततदग्रतः २६
तदायंपश्यतांतेषांदेवानांचसुरद्विषाम्
उत्पन्नस्तामुवाचेदंजननींचरुषान्वितः २७
बुध उवाच-
कस्मान्नकथ्यतेदुष्टेमदीयोजनकस्त्वया
लज्जांविहायसंपश्यशापस्यममवैभवम् २८
पितोवाच-
इत्युक्त्वाजलमादाययदा शप्तुंसमुद्यतः
तदासामंदमाहेदंपितातवसुधाकरः २९
इत्युक्तेचतयासाध्व्याचंद्रःस्वतनयंबुधम्
अमुंगृहीत्वासानंदंजगामनिजमंदिरम् ३०
बृहस्पतिस्तुतांतारांगृहीत्वास्वगृहंययौ
ब्रह्मादेवाश्चदैत्याश्चतेपिस्वंस्वंगृहंययुः ३१
एतत्तेसर्वमाख्यातंयस्त्वंमांपरिपृष्टवान्
बृहस्पतिस्त्रियांजातोयथायंचंद्रवंशकृत् ३२
नारदउवाच-
इत्याकर्ण्यपितुर्वाक्यंजहासोच्चैर्मुनेःसुतः
उवाचचस्वपितरं कुंडोऽयस्वैरिणीसुतः ३३
उवाचचपितापुत्रंहापुत्रेदंनभण्यताम्

सर्वसत्वांतरज्ञोऽयशप्स्यतेत्वांत्वदुक्तवित् ३४
नारदउवाच-
इत्युक्तेतेनमुनिनाचांद्रिर्ज्ञात्वातदीरितम्
सर्वेषांशृण्वतांप्राहमुनीनामितिभूपते ३५
बुधउवाच-
शृण्वंतुमुनिशार्दूलाभवंतोममभाषितम्
यदिसाध्वथवासाधुविचारयतमाचिरम् ३६
भवतांतत्वबुद्धीनांदर्शनार्थमिहागतः
कृतवान्कस्यचिन्नाहमपराधंमनागपि ३७
असूययाकिमर्थंमामवजानंतिदुर्मदाः
स्वजन्मसफलत्वायभवद्दर्शनलालसः ३८
स्वभावएवदुष्टानांसाधूनपिनिरेनसः
उद्वेजयंतियत्क्वापिमिष्टवाचः पिकाइव ३९
दुःस्वभावंनमुंचंतिदुष्टाःसत्संगमादपि
गंगाबुसंगमेनापिक्षारतामिवनीरधिः ४०
अहोव्याधस्यदुष्टत्वंमुनिवृत्तीन्यतोमृगान्
वनेमृगचरान्हंतिनिजगानविदोऽपिसः ४१
मत्स्यैः किमपराद्धंहिधीवराणांदुरात्मनाम्
यज्जलेचरतस्तीर्थेघ्नंतितत्प्रकृतिर्हिसा ४२
साधवोऽपिनमुंचंतिस्वभावंदुष्टसंगताः
वृताविषाग्नियुक्सर्पैः श्रीखंडाइवशीतताम् ४३
परोदयेपिनृत्यंतिकिंस्वपक्षस्यसाधवः
यथोन्मनामुनिवरावारिवाहस्यबर्हिणः ४४
धारयंतिपरार्थेहिनिजांगमपिसाधवः
पितृदेवमनुष्याणामर्थेमत्पितृवत्कलाः ४५
निजोदयस्तुसाधूनांस्वच्छस्यानंदहेतवः
यथा कुमुदपुष्पाणांमत्पितुःशीतलत्विषः ४६
नारदउवाच-
इत्युदीर्यवचः क्रोधाद्बुधस्तंमुनिबालकम्
शशापेतित्वमप्याशुकुंडोभवमहीतले ४७

एवमाकर्ण्यतंशापंपिताबुधविसर्जितम्
स्वपुत्रंपातयामासतदंघ्र्योःक्षम्यतामिति ४८
उवाचचनजानातिबालोऽयतववैभवम्
नोचितंक्रोधकरणमस्मिन्बालेभवादृशैः ४९
कुतश्चित्कारणात्साधोःक्रुद्धस्यप्रकृतिक्षमा
हुताशनप्रतप्तस्यशीतत्वमिवचांबुनः ५०
अतः क्षमांविधायाशुविधेह्यस्मिन्ननुग्रहम्
बालेविवेकरहितेक्षमासाराहिसाधवः ५१
नारदउवाच-
इत्युक्तस्तेनमुनिनाशीतांशुतनयस्तदा
क्रोधंतत्याजशांतात्माचक्रेतस्मिन्ननुग्रहम् ५२
बुधउवाच-
अयंतवमुनेबालःकुंडत्वंप्राप्यभूतले
दत्तयज्ञोपवीतः सल्लँप्स्यसेहिनिजास्पदम् ५३
एवंसमुनिपुत्रोवैबुधशापान्नृपोत्तम
कुंडत्वंपाप्तवान्भूमौपितरोयेनतारिताः ५४
इदंपवित्रंमाहात्म्यंश्रुत्वामधुवनस्यवै
समस्तमश्वमेधस्यफलंप्राप्नोतिमानवः ५५
येनराधारयंत्यस्यमाहात्म्यस्यार्थमुत्तमम्
हृदयेयत्रतत्तेषांविषयैर्नाभिभूयते ५६
येपठिष्यंतिमाहात्म्यंश्रोष्यंतिचमहाधियः
देहांतेविष्णुसालोक्यंगमिष्यंतिनसंशयः ५७
इदमनिशपवित्रंतुभ्यमावर्णितंमेमधुवनसुचरित्रंश्रीपतेः प्रीतिकारि
कलिकलुषकलापच्छेदनेदक्षमक्षोत्पथगमननिरासेकारणंपुण्यमूर्तौ ५८
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेकालिदी
माहात्म्येमधुवनवर्णनोनामपंचदशाधिकद्विशततमोऽध्यायः २१५

षोडशाधिकद्विशततमोऽध्यायः

नारदउवाच-
अतोमधुवनाद्राजन्नयंबदरिकाश्रमः

एकादशधनुर्मा त्रेभूभागेव्यवतिष्ठति १
अस्यतीर्थवरस्याहंमहिमानंमहद्भुतम्
वर्णयामिपुरस्तात्तेयं श्रुत्वामुच्यते भयात् २
एकस्तुमगधेराजन्देवदासोहिनामतः
ब्राह्मणःसत्यवान्दांतः साक्षाद्धर्मइवापरः ३
निष्णातःसर्वविद्यासुबृहस्पतिरिवापरः
हरिसंतोषकोभक्त्याप्रह्लादइवदैत्यराट् ४
सस्त्रीकोऽपिस्मरंजेतापार्वत्याइववल्लभः
सदाचारपरोनित्यंविश्वामित्रोमुनिर्यथा ५
मगधेशगृहेमान्योद्रोणतत्कुरुवेश्मनि
दानशीलःसुपात्रेषुबलिर्दैत्याधिपोयथा ६
तस्यभार्योत्तमानामलक्ष्मीरिवगुणोत्तमा
पतिशुश्रूषणपरायजथानकनंदिनी ७
तस्यैकश्चसुतोराजन्नंगदो नामबुद्धिमान्
एकापुत्रीतुवलयानामसल्लक्षमणान्विता ८
तयोर्ज्यायान्सुतः कन्यातस्माद्रूपकनीयसी
तयोर्यथाक्रमंचक्रेविवाहंसद्विजोत्तमः ९
विवाहितातुसाकन्याययौश्वशुरवेश्मनि
शुभलक्षणसंपन्नाकालेनकियतानृप १०
अंगदस्तुमहाबुद्धिर्गृहभारंबभारह
पितृवत्सर्वशास्त्रज्ञोयौवनश्रीविभूषितः ११
एकदासतुविप्रेंद्रः पुत्रंतंगृहकर्मणि
क्षमंविज्ञायराजेंद्रनिजभार्यामुवाचह १२
देवदासउवाच
समाकर्णयमेसाध्विकालेऽस्मिन्नुचितंवचः
ततोयदुचितंभद्रेतदह्नायबिधीयताम् १३
एषाजरासमायाताशरीरंपातयिष्यति
अंगान्याकंपयंतीववात्यापक्वफलंयथा १४
अक्ष्णामपिद्युतिंमंदांनूनमेषाकरिष्यति
नक्षत्राणांसचंद्राणांप्रातर्वेलेवसुव्रते १५

स्वलितोपादयोर्मंदांगतिंप्रतिपदक्रमम्
करिष्यति जराह्येषायथानिगडशृंखला १६
तस्मादेषाजरायावन्नपौढाजायतेशुभे
आत्मनस्तावदावाभ्यांकरणीयंहि तंद्रुतम् १७
गृहपुत्रसुहृद्भ्रातृपितरोहिविनश्वराः
द्रव्यादिकंचसुभगेतेषुसज्ञेतनोबुधः १८
अतोऽहसर्वतीर्थेषुपयर्यटन्विजितेंद्रियः
वानप्रस्थेनविधिनावीक्षिष्येहरिमीश्वरम् १९
ततः संन्यासमादायक्वचित्तिर्थोत्तमेशुभे
प्रारब्धकर्मणामंतेत्यक्ष्यामिस्वंकलेवरम् २०
एवंचेत्प्राणमुक्तःस्यान्मुक्तिः स्यान्नात्रसंशयः
ममश्रीपतिपादाब्जसम्यक्स्थापितचेतसः २१
उत्तमोवाच–
पुमान्वास्त्रीजनोवापिकोरमेतविनश्वरे
संसारेमाधवंमुक्त्वानित्याश्रममचेतनः २२
तस्मान्मामपिजीवेशत्वत्पादांबुजसेविनीम्
नीत्वास्वसंगमेतावद्विश्वाब्धेराशुतारय २३
पुत्रोऽयमंगदः श्रीमान्गृहभारस्यधारणे
समर्थोऽभूत्स्नुषाचेयंकल्याणीतत्सहायिनी २४
पुत्रेसमर्थेयोमूढःपुरुषःस्त्रीजनोऽथवा
नविरज्येतयोर्मूढोवंचितः श्रेयसाहिसः २५
नारदउवाच–
एवमन्योन्यमामंत्र्यदंपतीतौरहस्तदा
पुत्रमाहूयकथयांचक्रतुस्त्विदमंगदम् २६
दंपत्यूचतुः–
जरागमश्लथद्गात्रावावांविद्धित्वमंगद
स्वश्रेयसेयतिष्यावः कुत्रचित्पुण्यभूतले २७
हरेराराधनंभक्त्याश्रेयः परममुच्यते
तदर्थमेवनिष्कामायतंतेसाधवोभुवि २८
विषयेषुनसंसक्तिः समत्वंसर्वजंतुषु

येषांहर्षविवादौचनजातुसुखदुःखयो २९
तएवसाधवोलोकेगोविंदपदसेविनः
तेषांदर्शनमात्रेणकृतार्थोजायतेनरः ३०
तीर्थानिपर्यटन्धीरस्तद्दर्शनसमुत्सुकः
भाग्योदयेनकेनापितद्दर्शनमवाप्नुयात् ३१
तस्माद्भारंकुटुंबस्यभुजयोर्युगदीर्घयोः
आरोप्यनौविसर्जस्वतीर्थयात्रार्थमंगद ३२
तीर्थयात्राप्रसंगेनकदाचित्साधुदर्शनम्
भवेद्यदितदापुत्रद्वयोर्नौस्यात्कृतार्थता ३३
नारदउवाच–
इत्युक्तः पितृभ्यांपुत्रःसाधुवादमवादयत्
नारदउवाच–
समस्तकुलनिस्तारोभवद्भ्यामयमीरितः ३४
आशुमामवजानीतंकिंकरोमिभवद्धितम्
अहमाज्ञाकरोनित्यंयुवयोः पूज्यपादयोः ३५
पुगयतीर्थेषुदानार्थंगृहीतंधनमुत्तमम्
नयतंमामपिप्रेष्यंसेवायैनिजसंगमम् ३६
नारदउवाच–
इत्युक्त्वाधनमादायगत्वाक्रोशद्वयंतयोः
संगेगृहमगात्ताभ्यांकथंचित्संनिवर्तितः ३७
तौगृहीत्वाधनंकिचिद्विष्णुर्नौसंयतामिति
कंदमूलफलाहारौतत्रोषित्वादिनत्रयम् ३८
यदातस्मात्प्रचलितौदंपतीजगतीपते
तदामार्गेमहान्कश्चित्सिद्धः संमीलितस्तयोः ३९
ताभ्यामुभाभ्यांशिरसावंदितः सउपाविशत्
उपविष्टस्तदाताभ्यामितिपृष्टः ससिद्धराट् ४०
कोभवान्कुतआयातोकिंचिकीर्षतितद्वद
सिद्धउवाच–
सिद्धोऽहतापसश्रेष्ठकल्पग्रामेगृहंमम ४१
इंद्रप्रस्थात्समायातोदृष्टंतत्रमहाद्भुतम्

तत्रास्तिकपिलः सिद्धोनारायणसमोगुणैः ४२
तस्मादहंपठन्सांख्यंनिवसामितदाश्रमे
एकदामद्गुरुःश्रीमान्स्वाश्रमात्कपिलोययौ ४३
बदर्याख्यंमहापुरयंस्नातुंसयमुनाजले
तत्रैकोररायमहिषस्तृषार्तोयमुनाजले ४४
प्रविष्टोजलमापीयपूर्वजन्मस्वमस्मरत्
स्मृत्वासपूर्वकर्माणिमहिषोऽररायसंभवः ४५
जलान्निसृत्यतरसाववंदेकपिलंगुरुम्
उवाचनरवाचाचमयिशृरावतितापसः
यतत्तेकथयाम्यद्यश्रृणत्वंपरमाद्भुतम् ४६
महिषउवाच-
भोभोविष्णुकलाभूत सिद्धानांकपिलेश्वर
किंनामेदंमहातीर्थंनतायकथयस्वमे ४७
अस्यतीर्थवरस्यांबुस्पर्शाद्विपूर्वजन्मनि
जाताममममहाभागपापस्यापिचकर्मणः ४८
सिद्धउवाच-
एवमाकरार्यतद्वाक्यंमहिषस्यमहामुनिः
जानन्नपिचतद्वृत्तंविहस्येदमुवाचह ४९
कपिलउवाच-
भवान्महिषशार्दूलकआसीत्पूर्वजन्मनि
तत्रकिंकृतवान्कर्मयोनिंयेनापमाहिषीम् ५०
महिषउवाच-
शृणुष्वमुनिशार्दूलवृत्तंवैपूर्वजन्मनः
अहमासंपुराराजाकलिगाधिपतिर्बली ५१
स्वांपरां नैवजानामियोषितंकाममोहितः
वणिजांसाधुवृत्तीनांधनहर्तानिरेनसाम् ५२
निशीथेनगरेराजन् गतभीः पर्यटाम्यहम्
सुंदरीभिः परस्त्रीभिः क्रीडितुंरतिलीलया ५३
यद्गृहेसुंदरींनारींपश्यामिस्मरमोहितः
वसामिनिशितत्राहंद्वंत्रेमध्येगजोयथा ५४

क्रीडित्वातत्रनिःशंकंधनंहृत्वाचतद्गृहात्
स्वगृहंपुनरायामिकियद्भिर्वासरैरहम् ५५
उपविष्टःसभामध्येदिवाद्वौपुरवालकौ
अनार्यबाहुयुद्धेनयोधयामिनिजाग्रतः ५६
नियोधयतियोबालस्तंमत्वाधनिनंबलात्
गृह्णामितत्पितुर्वित्तंस्वल्पंवाभूरिवामुने ५७
यः पराजयतेतत्रकातरत्वान्महामुने
नायमर्हःपुरेस्थातुंममेतिविनिहन्मितम् ५८
एवमप्यद्यमारेभेवर्त्तमानेमहीपतौ
पौरानगरमुत्सृज्यप्रययुर्विषयांतरम् ५९
एकदामुनिशार्दूलोदुर्वासापर्यटन्महीम्
पुरेममसमायातोदुर्वासारुद्रसंभवः ६०
मिंलित्वानागराःसर्वेतदाजग्मुस्तदंतिके
प्रणिपत्येदमाहुस्तंस्वदुःखज्ञापकंवचः ६१
पौराऊचुः
आत्रेयमुनिशार्दूलकृपांकुरुकृपानिधे
अधर्मनिरतंभूपमेनंधर्मेणयोजय ६२
भाग्योदये नकेनापिभवानस्माकमागतः
उद्वेलाद्भूपदुःखाब्धेरस्मांस्तारयपोतवत् ६३
धनंलोभयतातेनहृतंनोमुनिपुंगव
दूषिताश्चस्त्रियःसाध्व्यःसकामेननिरेनसा ६४
दशवत्सरदेशीयाबहवः शिशवोहताः
अगण्यवैगुण्यनिधिरेषभूपोमहामुने ६५
महिषउवाच-
एवमाकर्ण्यपौराणांवचःसमुनिरत्रिजः
दंड्योयमितिसंचित्यसभास्थंमामथाययौ ६६
दृष्ट्वाहितंसमायांतडवधूतंदिगंबरम्
आवारयमहंभृत्यैर्नेत्ययंदर्शनोचितः ६७
रेणुनासर्वलिप्तांगोमहिषाकृतिरेववै
वार्यतामितिपार्श्वस्थान्बहुशोऽहसमादिशम् ६८

ततस्तेतरसाभृत्यास्तंवारयितुमभ्यगुः
हुंकारेणैवतान्सर्वान्सचक्रेभस्मसान्मुनिः ६९
यज्ञाश्वंरक्षतः स्वस्यपितुस्त्वमिवसागरात्
सर्वशस्तानहंभृत्यान्भस्मीभूतांस्तुतेजसा ७०
आलक्ष्यसहसोत्थायगृहमावेष्टुमुद्यतः
रेरेपापेतिसंबोध्यततोमांमुनिसत्तमः ७१
शशापेतिमहारण्येमहिषोभवसांप्रतम्
तेनाहमितिशप्तोवैमुक्त्वाराजतनुंतदा ७२
मरुदेशेमहारण्येजातोऽहमहिषोमुने
चिरकालमहंतत्रन्यवसंमुनिपुंगवः ७३
अत्रागतस्तुकेनाहंपुण्येनतदपिशृणु
वापीकूपसरस्यस्तुबहबः कारितामया ७४
सहकारादिबृक्षाणामारोपोबिहितःपथि
पुण्येनानेनमेदेवपातोननरकेऽभवत् ७५
तीर्थस्यचमयाप्राप्तोह्यमुष्यजलसंगमः
एतत्तेकथितंसर्वंपूर्वजन्मशुभाशुभम् ७६
येनतीर्थंमयाप्राप्तमेतद्योनिश्चमाहिषी
अस्यतीर्थवरस्यांबुस्पर्शाज्ज्ञातिस्मरोभवम्
कथमस्याअसद्योनेर्मुक्तिः स्यात्तन्मुनेवद ७७
कपिलउवाच-
एतत्तीर्थंमहापुण्यंबदर्याख्यंरमापतेः
अत्रस्नाहिद्रुतंकामंस्वचित्तस्थंहिलप्स्यसे ७८
सिद्धउवाच-
एतच्छ्रुत्वावचस्तस्यमहिषस्यमहामुने
तत्रतीर्थेवरेस्नातुंप्राविशत्स्वर्गवांछया ७९
स्नात्वास्वर्गेच्छयातस्मिन्जलात्तटमुपागते
तत्क्षणंगजमारूह्यशक्रः स्वर्गात्समाययौ ८०
इंद्रउवाच-
हेकलिगपतेनैजंदेहंजहिहिमाहिषम्
प्रतिलभ्यवपुर्दिव्यंसममायाहिमेदिवम्

त्वयास्वर्गेच्छयास्नातंप्राप्तंतत्तेसुरास्पदम् ८१
सिद्धउवाच-
इत्युक्तःसतदातेनत्यक्त्वादेहंतुमाहिषम्
दिव्यंवपुःसमासाद्यगजराजंसमारुहत् ८२
गजराजंसमारुह्यस्थित्वाचगगनेक्षणम्
प्रणम्यशिरसादेवंतुष्टावकपिलंमुनिम् ८३
कलिङ्गउवाच
नमस्तेपरमेशानकेवलज्ञानहेतवे
सेतवेवेदविद्यानांरिपवेतद्विरोधिनाम् ८४
त्वत्तःप्रवृत्तिःसांख्यस्यजातातत्वावबोधिनी
देहिनांमाययाग्रस्तचेतसामपितेविभो ८५
येवेदविहितंत्यक्त्वावर्तंतेस्वेच्छयामुने
तान्दंडयसिदंड्यांस्त्वंमज्जयंस्तिर्यगादिषु ८६
इंद्रादयोलोकपालाःसर्वेत्वदधिकारिणः
त्वदिच्छामनुवर्तंतेभीतादंडकृतोहिते ८७
त्रयीधर्मविरोद्धारः पूर्वदेवायुगेयुगे
अवतीर्यविनाशायकृतासर्वात्मनात्वया ८८
येयेत्वयाहतानाथचक्रिणात्रिदशारयः
तेतेतमोमयींहित्वातनुंवैकुंठमभ्यगुः ८९
आज्ञापयजगन्नाथगंतुमांत्रिदशालयम्
अनुगृह्णीष्वशक्रंचनमंतंवीक्षणामृतैः ९०
प्रसादात्तवदेवेश बदर्याख्यस्यचप्रभो
तीर्थस्यस्वतनुंहित्वातामसींसात्विकींगतः ९१
इंद्रेणसहनागेंद्रमारुह्यत्रिदशालयम्
गच्छामिस्वेच्छयानाथकृपातस्तेकृपानिधेः ९२
सिद्धउवाच-
इत्यभिष्टूयदेवेशंकपिलंसकलिगपः
नमस्कृत्यचतत्पादौजगामत्रिदशालयम् ९३
एतन्मयाद्भुतंविप्रदृष्टंबदरिकामश्रमे
गुरुंशुश्रूषमाणेनपापस्यापिविमोक्षणम् ९४

नातः परंत्रिलोक्यांतुतीर्थंसर्वार्थदायकम्
याहितत्रैवसस्त्रीकः परंश्रेयोयदीच्छसि ९५
अहंयामिसमानेतुंबदर्याख्यंगृहान्द्विज
वृद्धंस्वकीयपितरंनिस्पृहंमोक्षकामुकम् ९६
नारदउवाच-
इतितीर्थवरस्यास्यबदर्याख्यस्यभूपते
महिमानंसमुत्कीर्त्यससिद्धः स्वगृहंययौ ९७
अथकालेनकियतासद्द्विजः सहभार्यया
तीर्थानपर्यटन्धीरः इंद्रप्रस्थेभ्यगादहम् ९८
तेनैववपुषाराजन्नीतवांस्तौनिजालयम्
ससिद्धोऽपिस्वपितरंगृहादानीयसत्वरः ९९
तत्रैवस्नापयामासतत्तीर्थेमोक्षकामुकम्
सोऽपिश्रीवासुदेवेनबृद्धःसिद्धपितातदा १००
ततोनीतोनिजगृहंवृंदारकविबंदितः
इंद्रप्रस्थांतरगतमिदंसद्बदर्याख्यमीशः
स्नानाद्दद्यादखिलजनितामानसेष्टंपदार्थम्
माहात्म्यंतेनृपनतिमतेवर्णितंतस्यपूतंयच्छ्रुत्वावैपततिनजनोमातृगर्भेकदाचित्
१०१

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेकालिदी
माहात्म्येबदरिकाश्रमवर्णननामषोडशाधिकद्विशततमोऽध्यायः२१६

सप्तदशाधिकद्विशततमोऽध्यायः

राजोवाच-
वर्णितंमेत्वयासाधोमाहात्म्यंवदरीभवम्
यंनिशम्यमनोयातिममनिर्मलतांमुने १
एतदद्भुतमाहात्म्यंशक्रप्रस्थाख्यमुत्तमम्
सकलंमुनिशार्दूलचतुवर्गप्रदायकम् २
भुविनातःपरंतीर्थंतिरश्चातमपिमुक्तिदम्
श्रेष्ठंसकलपापघ्नंदर्शनादेवनारद ३
एतदंतर्गतस्यास्यहरिद्वारस्यनारद

माहात्म्यंश्रोतुमिच्छामित्वत्तः संतोषकारकात् ४
मामुद्धरमुनेदीनमविद्याकामकर्म्मभिः
वर्णनेनास्यतीर्थस्यशक्रप्रस्थगतस्यवै ५
नारदउवाच-
स्राकर्णयमहाभागवर्णयामितवाग्रतः
हरिद्वारस्यमाहात्म्यमश्वमेधफलप्रदम् ६
स्रत्रैकः श्वपचःपापःयथास्वर्गतिमाप्तवान्
तत्तेऽहकथयाम्यद्यशृणुष्वैकमनाःप्रभो ७
धर्मक्षेत्रेकुरुक्षेत्रेकालिगइतिविश्रुतः
श्वपचःपापकर्म्मावैवसतिस्मपुराद्बहिः ८
पंचषड्वर्षदेशीयान्वालान्नगरवासिनाम्
प्रसह्यवंचयित्वाचवनेनीत्वाजघानसः ९
तेषामलंकारमयंरजतंहेमवन्नृपः
रत्नादिकंचकायस्थंहत्वातान्जगृहेऽधमः १०
विवेशसाधुनिलयेरात्रौधनजिहीर्षया
पथिकान्धनमालब्ध्यसजघ्नेनिर्जनंवने ११
कुरुक्षेत्रेसमायाताएकदारविपर्वणि
नानादिग्भ्योजनाराजन्नानादानजिहीर्षया १२
तस्मिन्यथाविधिस्नात्वारविपर्वणिभूपते
दानंदत्त्वायथावच्चलोकाःस्वान्स्वान्गृहान्ययुः १३
एकः कश्चिद्विशांश्रेष्ठोधनेनमहतायतः
पश्चात्सर्वजनेभ्यस्तुचचालस्वगृहंप्रति १४
स्रश्ववारः पदातीनांविंशतिंपुरतोदधत्
कालिगः समहापापस्तमनुप्रस्थितः श्रियै १५
कतिचिद्वसतीर्गत्वासहतेनविशाधमः
सोंऽत्यजस्तद्धनंहर्तुंनलेभेसमयंनृप १६
बलेनापिगृहीतुंनक्षमोऽभूत्तस्यसश्रियम्
वैश्यस्तुजनविंशत्यासंयुक्तस्तुसएकलः १७
स्रत्रागतः सपापात्मावैश्यस्यार्थेनपार्थिव
निशीथेशिबिरंतस्यधनंहर्त्तुंसमाविशत् १८

एकेनतस्यवैश्यस्यजनेनसतुलक्षितः
प्रविशन्नेवपापात्मादददताप्रहरंस्वकम् १९
तमालक्ष्यसमीपस्थंसजनः प्रहरप्रदः
उभयोःपादयोराजन्स्वपन्नेवगृहीतवान् २०
तौगृहीत्वाजनानन्यान्बोधयन्प्रहरप्रदः
हस्तेनैवतुपापेनचौरेणाघातितोहिसः २१
श्रुत्वापलायमानस्तुगृहीतोऽन्यैर्जनैस्तदा
गृहीतारंपुनर्हत्वासहसासपलायितः २२
एकेनकेनचिद्राजन्सेवकेनधनुर्भृता
दूरादेवशरेणाशुधावन्सनिहतोऽधमः २३
हतमात्रःशरेणाशुतत्याजसचजीवितम्
चौरेणनिहतौराजन्वैश्यस्यानुचरावुभौ २४
तेत्रयोवरयानानिगणानीतानिभूपते
समारुह्यदिविस्थित्वावैश्यमेतद्बभाषिरे २५
कालिंगवैश्यानुचराऊचुः
भोभोवैश्यपते साधोतीर्थमेतदनुत्तमम्
इंद्रप्रस्थेहरिद्वारंशिवकृत्पापिनामपि २६
वयंत्रयःसुतीर्थेऽस्मिन्नपमृत्युगताअपि
गच्छामस्त्रिदिवंवैश्यसांप्रतंशिवमस्तुते २७
श्रीनारद उवाच-
इत्युक्त्वातेययुः स्वर्गंशिवेशिवकृतांपदम्
यत्रेच्छयाहिलभ्यंतेभोग्यवस्तून्यनेकशः २८
अथरात्रौव्यतीतायांप्रातरत्रविशांवरः
स्वभृत्यदेहयोः कृत्वादाहमस्थीन्यपातयत् २९
तीर्थेऽत्रपात्यमानेषुभृत्यौतावस्थिषुप्रभो
स्वर्गात्पुनरिहायातौतंवैश्यमिदमूचतुः ३०
भृत्याऊचतुः
भोभोवैश्यपतेसाधोतीर्थेऽत्रमरणाद्भुवि
पापानामपिजंतूनांस्वर्गप्राप्तिर्नसंशयः ३१
स्थलेमृतस्यजंतोश्चेत्पतंत्यस्थीनिवारिणि

तीर्थस्यास्यतदावैश्यसत्यलोकेस्थितिर्भवेत् ३२
स्थलेमृताभ्यामावाभ्यामस्थिपातेनवारिणि
संप्राप्ताब्रह्मणोलोकेस्थितिराब्रह्मसंस्थिते ३३
स्थलेमृतस्यचौरस्यापेतुरस्थीनिनांबुनि
यतोऽत सविशांनाथतस्थौवृंदारकालये ३४
तस्यापिदेहमन्विष्यतीर्थेस्मिन्नाशुपातय
यथासोऽपिसुरश्रेष्ठप्राप्नुयान्नौगतिंपराम् ३५
उपकारः सदाकार्यः परेषामपिसाधुभिः
अपकारोनमंतव्यः कृतोभृशमसज्जनैः ३६
नारदउवाच-
इत्युक्त्वातौमहाभागौगतौहरिपुरंप्रति
हरिद्वारस्यतीर्थस्यसलिलेनास्थिपातनात् ३७
सवैश्यस्तुमहाभागस्तस्यचौरस्यविग्रहम्
दग्धुमन्वेषयामासनलब्धंतत्तुभूपते ३८
पुनराबृत्यतत्रैवसर्वतीर्थशिरोमणौ
हरिद्वारेमहाराजससस्नाविततिवांच्छया ३९
अहमुत्पाद्यसत्पुत्रान्धर्म्मार्जितधनेनच
संतोष्यविप्रान्बंधूंश्चविष्णुमाराध्यसेवया ४०
त्वय्येवमरणंप्राप्यगच्छामिहरिमंदिरम्
तीर्थराजनमस्तुभ्यमेतत्कर्तव्यमस्तिते ४१
इतिकामनयाराजन्सवैश्यस्तत्रकामदे
तीर्थेस्नात्वागतः सर्वैर्भृत्यैस्वंसमगाद्गृहम् ४२
तत्रगत्वासपत्न्यांतुपुत्रानुत्पाद्यबुद्धिमान्
धर्मोपार्जितवित्तेनतोषयामासबांधवान् ४३
भक्त्यापरमयाराजन्नाराध्यकमलापतिम्
तीर्थेऽस्मिन्मरणंप्राप्तोयतोवैकुंठमाप्नुयात् ४४
इतिवैवर्णितोराजंस्तीर्थस्यमहिमातव
हरिद्वारस्यपुरायस्यश्रवणेऽस्यफलंशृणु ४५
तिलद्रोणस्यदानेनमाघेयत्फलमाप्नुयात्
जनस्तत्फलमाप्नोति शृरावन्माहात्म्यमस्यतु ४६

गोपीचंदनदानेनब्रह्मपत्रेषुभोजनात्
यत्फलंतन्महिम्नोऽस्यश्रवणादेवकार्तिके ४७
जागरेचप्रबोधिन्यांप्रहरेपश्चिमेनृप
यत्फलंन्तन्महिम्नोऽस्यतीर्थस्याकर्णनाद्भवेत् ४८
हरिद्वारस्यसदृशंशक्रप्रस्थगतस्यवै
नतीर्थंपृथिवीलोकेचतुर्वर्गफलप्रदम् ४९
इतिं श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेइंद्रप्रस्थ
माहात्म्येहरिद्वारवर्णनंनामसप्तधिकद्विशततमोऽध्यायः २१७

अष्टादशाधिकद्विशततमोऽध्यायः

नारदउवाच–
भूयःशृणुमहाभागमाहात्म्यंपरमाद्भुतम्
अत्रस्थितस्यतीर्थस्यपुष्करस्यशिवप्रदम् १
प्रसादात्तस्यतीर्थस्यविष्णुःसर्वसुरेश्वरः
प्रसन्नंपुंडरीकस्यमासमेकंगृहेवसेत्
अत्रमुक्तिंतदनुजोलेभेपापरतोऽपिहि २
शिबिरुवाच–
कःपुंडरीकोधर्मात्माकृतंतेनचकर्म्मकिम्
येनप्रसन्नोभगवांस्तद्गृहेमासमावसत् ३
कथंतदनुजःप्रापपापात्माश्रीहरेःपदम्
तीर्थस्यास्यप्रसादेनसर्वमाख्याहिमेमुने ४
शृणवतोऽस्यनसंतोषोमाहात्म्यंममजायते ५
नारदउवाच–
विदर्भनगरेराजन्मालवाख्येमहायशाः
ब्राह्मणोब्रह्मविच्छांतोविद्वान्विष्णुपरायणः ६
देवर्षिपितृभूतानांमानुषाणांचपोषकः
विषयेषुनसंसक्तोलोभमोहादिवर्जितः ७
सएकदामहाभागसिंहंप्राप्तेबृहस्पतौ
गोदावरींमहापुण्यांस्नातुंप्रतिजगामह ८
दातुंतत्रसुवर्णस्यगृहान्निन्येपलायुतम्

गच्छन्पथिसधर्मात्मामनसैतदचिंतयत् ९
मालवउवाच-
गृहाद्दानार्थमानीतंमयाहेमपलायुतम्
यस्मैकस्मैनदातव्यंदातव्यंपूज्यसाधवे १०
निष्किंचनायविप्रायपात्रायानुपकारिणे
पूज्यायदेशेकालेचदत्तमक्षयतांव्रजेत् ११
उञ्छवृत्त्यासमानीतंदत्त्वादुर्वाससेमुनिः
शिलोंच्छवृत्तिर्धर्मात्मास्वंत्यक्त्वागात्परंपदम् १२
दानवेंद्रोबलीराजापात्रंविज्ञायवामनम्
विपद्मायाप्यदात्तस्मैत्रिलोकींस्वभुजार्जिताम् १३
तस्मात्पात्रायदातव्यंधनंधर्म्मार्जितंमया
गोविंदतुष्टयेसम्यक्वांच्छनीयंनतत्फलम् १४
पुंडरीकस्तुधर्मात्माभागिनेयोगजाह्वयात्
आयास्यतिमयाहूतः सर्वपात्रशिरोमणिः १५
आनीतस्यधनस्यार्द्धंतस्मैपात्राय सूनवे
स्वसुर्दास्यामिशेषंतुश्रोत्रियेभ्योयथाविधि १६
नारदउवाच-
एवंविचिंत्यधर्मात्मामालवं सद्विजोत्तमः
कतिचिद्वासरैःप्राप्तःपुरायांगोगदावरींनृप १७
मिलितस्तस्यधर्मात्मापुंडरीकःस्वसुःसुतः
तस्यवैपूर्वमायातोमालवस्यमहीपते १८
सतत्रविधिनास्नात्वा सिंहसंक्रमवासरे
पुंडरीकायवित्तार्द्धंददौमेप्रीयतांहरिः १९
पुंडरीकोऽपिधर्मात्मास्नात्वागोदावरीजले
स्ववित्तस्यचतुर्थांशंश्रोत्रियेभ्योददौमुदा २०
सतत्रविधिवत्स्नात्त्वादत्वादानंचशक्तितः
गच्छंतंस्वगृहान्राजन्नित्युवाचस्वसुः सुतम् २१
मालव उवाच-
गुरून्प्रतिनमस्कारोवाच्योआशीर्लघून्प्रति
यथावयोर्हिसंयोगः क्षणिकोऽयबभूवह २२

एवंहिसर्वजंतूनांपुत्रदारादिभिः सह
तस्मात्त्क्षणिकसंयोगात्संसाराद्यः सुधीर्नरः २३
विरज्येतकृपापात्रंसहरेस्याद्विनिश्चितम्
कृपातः श्रीहिरेः प्राणीसत्संगमरतोभवेत् २४
तस्तस्यहरेर्लीलाश्रवणेच्छाहिजायते
श्रुत्वाचकीर्तितासद्भिर्हरिलीलाश्रपिस्वयम् २५
सुस्पृहंकीर्त्तयत्येवततः स्मरतिकेवलम्
ततस्तस्यभवेत्प्रेमगोविंदपद सेवने २६
नरस्ततस्तरत्याशुपोतेनेवमहार्णवम्
एतदर्थंहिसाधूनांज्ञानिनांकर्मणांतथा
यत्नोभवतिधर्मात्मन्नपित्वंयत्नवान्भव २७
नारदउवाच–
एवमुक्त्वासवैदर्भःसुतंकथमपिस्वसुः
विसृज्याश्रुमुखोवाष्पपर्याकुलदृशंययौ २८
पुंडरीकोऽपिधर्मात्माचचालस्वगृहं प्रति
कतिभिर्वासरैराजन्नागतोऽत्रशुभास्पदे २९
भरताख्यंकनीयांसंभ्रातरंपतितंभुवि
श्वसंतंक्षतनिर्गच्छद्रुधिराक्तमवैक्षत ३०
पप्रच्छय रुदन्नुच्च्भ्रातः केनेदृशींदशाम्
गमितोसिकिमर्थंवागृहादिहसमागतः ३१
इतिपृच्छतिराजेंद्रपुंडरीकेसपीडया
महत्याभरतःसद्यःपीडितोसूनमुंचत ३२
अवातरत्तदायानमैकंसगणमद्भुतम्
आकाशात्पश्यतांभूपजनानांतद्गुरोरपि ३३
तदारुह्यसदिव्यांगोभरतः पापकार्यपि
उवाचवचनं ज्येष्ठंभ्रातरंविनमन्निदम् ३४
भरतोवाच–
पुंडरीकमहाबुद्धेतीर्थस्यास्यप्रसादतः
पुष्करस्यमयाप्राप्तापापिनापिदिविस्थितिः ३५
मदीयंदारुणंकर्मभ्रातर्जानासियद्यपि

तथापिकथयाम्यद्यकिंचिदज्ञातमस्तिते ३६
यथामयाप्रभावत्यावेश्ययारमितंसह
तद्गृहंव्ययितंभूरिधनंचमदिराकृते ३७
द्यूतेनहारितंयच्चचौरकर्मसमार्जितम्
शिवरात्र्यांमयाशंभुनिर्माल्यंयच्चभक्षितम् ३८
यत्कृतेभवताविप्रोजेबुकोनामदूषितः
एतन्मयाकृतंकर्म्मविदितंपुंडरीकते ३९
गोदावरींगतेभ्रातस्त्वयियत्कृतवानहं
नतत्तेविदितंकर्मकथयामितदप्यहो ४०
चलितेत्वय्यतिक्रांतोयदापक्षस्तदाह्यहम्
श्रुतवानितिलोकेभ्योवचनंहरिदुःसहम् ४१
पुंडरीकोधनंदातुमाहूतोमातुलेनहि
निजसोदरमाहत्यपुंडरीकंतदाहृतम् ४२
गृहीष्यामिधनंभूरिमालवेनसमर्पितम्
महतावसुनातेनतोषयामिप्रभावतीम् ४३
दुरोदरेणक्रीडामिस्वेच्छयातद्विदैःसह
इत्यालोच्यत्वदध्वानंनिरुध्याहमिहस्थितः ४४
हत्वात्वांचधनंभूरिगृहीतुंचमहामते
अतिक्रांतेधनेभ्रातः कुतश्चित्सार्थमागतः ४५
वणिजामत्रसुप्तोऽहरात्रौतत्रमहामते
अथकश्चिन्निशीथेतुतस्करोवणिजांधनम् ४६
हर्तुंतत्रसमाविष्टःसार्थेजनसमाकुले
नीत्वायदाधनंकिंचित्सचौरस्तुपलायितः
तमन्वधावन्सहसाक्रोशंतइवसेवकाः ४७
सेवकाऊचुः
गृह्यतांगृह्यतामेषचौरोऽययातिसत्वरम्
मध्याद्बहूनामस्माकमपहृत्यधनंबहु ४८
भरतउवाच-
इत्याकर्ण्यवचस्तेषांपुरतस्तुतमन्वहम्
अधावंसहसाभ्रातस्तद्गृहीतुंजिहीर्षया ४९

ततस्तेवणिजांभृत्याज्ञात्वामांतस्यरक्षकम्
प्रजहुस्तरसासर्वेसखड्गंखड्गपाणयः ५०
तेषुकश्चिद्द्विजश्रेष्ठोब्राह्मणोऽहमितिब्रुवन्
खड्गेनशितधारेणमया पापीयसाहतः ५१
वणिजांसेवकैस्तैस्तुखड्गधारैरहंहतः
गतास्तेवणिजः प्रातर्निजगंतव्यनीवृतम् ५२
ततोभवानिहप्राप्तः श्वसंतंमांददर्शह
चलद्रुधिरलिप्तांगंपीडामोहविचेतनम् ५३
इत्येतत्कथितंभ्रातर्यदर्थमहमागतः
अपमृत्युंयथाप्राप्तस्तच्चापिकथितंमया ५४

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडे
कालिदीमाहात्म्येऽष्टादशाधिकद्विशततमोऽध्यायः २१८

एकोनविंशाधिकद्विशततमोऽध्यायः

नारदउवाच-
इत्याकर्ण्यवचस्तस्यपुंडरीकोमहामनाः
उवाचनिजबंधुंतंशृण्वतांनिजसंगिनाम् १
पुंडरीकउवाच-
केनपुण्येनतीर्थेऽस्मिन्मृत्युर्भरततेऽभवत्
यदिजानासितद्ब्रूहिपापंविख्यातमेवते २
भरतउवाच-
पुंडरीकशृणुष्वेदंकथयामितवाग्रतः
एतत्तीर्थप्रदंपुण्यंकृतंयदिहजन्मनि ३
एकदातुधनंजित्वासमागच्छन्निजंगृहम्
अपश्यंमृतकंबालंमृतस्यानाथमापणे ४
निधायतमहंमूर्ध्निनीत्वागंगातटेशुभे
वस्त्रादिभिरलंकृत्यचक्रे दाहादिसत्क्रियाम् ५
द्यूतेनोपार्ज्जितंद्रव्यंतत्सर्वंव्ययितंमया
तेनपुण्येनप्राप्तंमेतीर्थमेतच्छुभावहम् ६
कुरुत्वंममदेहस्यसंस्कारंदाहपूर्वकम् ७

श्रीनारदउवाच-
संस्कारेविहिते राजन्भरतः पापवानपि
तीर्थस्यास्यप्रसादेनपुष्करस्यगतोदिवि
मासमेकंयथाविष्णुःपुंडरीकगृहेहरिः ८
उवासास्यप्रसादेनतीर्थस्य शृणुसांप्रतम्
अत्रतीर्थेसधर्मात्माभरतस्यापिसद्गतिम्
दृष्ट्वेतिहृदयेमेनेतीर्थमेतत्तुकामदम् ९
अत्रेतिवांच्छयासस्नौपुंडरीकः सपंडितः
माघमासंस्वरूपेणहरिर्वसतुमेगृहे १०
एवंस्नात्वासकामेनययौनिजगृहंप्रति
तीर्थेऽत्रनृपतिश्रेष्ठपुंडरीकोऽखिलार्थदे ११
बंधुभ्योमरणंभ्रातुर्भरतस्यजगादह
तेपिश्रुत्वाशुचंचक्रुर्मराययावृतबुद्धयः १२
पुंडरीकस्तदाकुर्वन्गृहेस्वस्मिन्निजक्रियाः
उवासेतिमहानंदस्तपस्यायास्यतेहरिः १३
पूर्णिमायामथोपौष्यांचक्रेसपरमोत्सवम्
मत्वेतिश्वोगृहेमह्यंहरिरायास्यतिध्रुवम् १४
श्रीखंडजलसेकेनगोमयालेपनेनच
मुक्ताचूर्णचतुष्केनसमस्कुरुतकेतनम् १५
शतद्वयंब्राह्मणानांनानाभोज्यैरभोजयत्
वह्नीभिर्दक्षिणाभिश्चतानेवसमतोषयत् १६
नानावादित्रकुशलैःकलकंठैश्चगायनैः
रजन्यांस्वजनैर्गायंश्चक्रेजागरणंतथा १७
अथप्रभातेतान्सर्वान्गायनादीन्विसृज्यसः
गोविंदागमनाकांक्षीगृहमध्येउपाविशत् १८
अथ तस्यगृहाभ्यासेनिवर्त्यनिजवाहनम्
प्राविशद्गृहमध्येतुकर्तुंस्वजनवांछितम् १९
सपुंडरीकस्तंदृष्ट्वामाधवंसमुपागतम्
उत्थायासनतस्तूर्णववंदेशिरसानृप २०
उवाचचसधर्म्मात्मागोविंदालोकनिर्वृतः

संपूज्यार्घादिदानेनविष्टरेतंनिवेशितम् २१
पुंडरीकउवाच-
भवताभवतापघ्नंसुस्पष्टंतदनुष्ठितम्
तावदत्रत्वयाविष्णोस्थ्यतांस्थितिकारिणा २२
यावदस्यपुनीतस्यसमाप्तिस्तपसोभवेत्
यत्रत्वंसेवकास्तेचवसंतिपरिचर्यया २३
तत्रैवखलुवैकुंठं सर्वदोषविवर्जितः
यद्गृहेतवकर्माणिवर्ण्यं तेसाधुभिर्विभो २४
हरिर्निवसतेतत्रसन्मुखादितिनः श्रुतम्
येषांवचसितेनामहृदिरूपंचसुंदरम् २५
कर्णयोश्चगुणारोपस्तएवखलुसाधवः
भवतोभवतेस्वांतंयेषांशुश्रूषणेविभो २६
उत्तमांगेचनिर्माल्यंत एवखलुसाधवः
येषांतुबुद्धिःशत्रौचमित्रेचकमलापते २७
चयापचययोश्चैवतएव खलुसाधवः
येषांविकुरुतेचेतोनविकारस्यकारणे २८
संतिलक्ष्मीपतेनूनंतएवखलुसाधवः
यत्रत्वंसाधवस्तत्रसंतोयत्रततो भवान्
भवान्अतोविज्ञायतांसाधुंमाघेममगृहेवस २९
नारदउवाच-
इत्याकर्ण्यवचस्तस्यपुंडरीकस्यमाधवः
उवाचवचनं भासादंतानांभासयन्दिशः ३०
श्रीभगवानुवाच-
साधूनामुत्तमःसाधुस्त्वंपृथिव्यांमहामते
यत्त्वयापुण्यतीर्थेतुस्नातंमत्संगवांछया ३१
उत्तिष्ठजाह्नवीतोयमाघेस्नानंकुरुद्विज
माघांतेस्नापयामित्वांपूर्णिमायांतुपुष्करे ३२
प्रयागेमाघमासे तुपूर्णंयत्स्नानजंफलम्
तत्सर्वंपुष्करेतीर्थेदिनैकस्नानतोभवेत् ३३
नारदउवाच-

एवमुक्तःसविप्रेंद्रःपुंडरीकोमुरारिणा
किंचिदभ्युदितेसूर्येस्नानंगंगाजलेऽकरोत् ३४
प्रत्यत्तपुंडरीकात्तपुंडरीकःसमर्चयत्
तुलसीविकसत्पुष्पयवकुंकुमचंदनैः ३५
धूपैरगरुजैरंगवासितांगंरमापतिम्
नीराजयतिकर्पूरदीपकैः पंचभिः स्मसः ३६
चतुर्विधमयैर्भोज्यैर्भोजयित्वाजगद्गुरुम्
सुप्तंसमणिपर्यंकेचामरैस्तमवीजयत् ३७
पादसंवाहनंजातुचक्रेतस्यरमापतेः
जातकर्पूरसंयुक्तंददौतांबूलवीटकम् ३८
उष्णीषंबध्नतस्तस्यश्रीपतेः पुरतस्तदा
तस्थौजातुसविप्रेंद्रः करेणानीयदर्पणम् ३९
एवंनिजगृहेतस्यवसतः सभवच्छिदः
सपर्यांविदधद्विप्रोमाघंनिन्येसमस्तकम् ४०
अथमाघावसानेतुपूर्णिमायांरमापतेः
स्मृतिमात्रागतंतात्तर्यमपश्यत्पुरतः स्थितम् ४१
तंदृष्ट्वापुंडरीकात्तः पुंडरीकमुवाचह
श्रीभगवानुवाच-
श्रूयतांभोद्विजश्रेष्ठयद्वचोऽहवदामिते ४२
इंद्रप्रस्थगतेतीर्थेपुष्करेतेयदृच्छया
स्नानायतेमयादत्तंयन्मासमुषितंमया ४३
अद्यपत्तींद्रमारुह्यमयासहमहामते
व्रजतीर्थशिरोरत्नंतदेवप्रतिपुष्करे ४४
चतुर्वर्गप्रदेतस्मिन्स्नानंकुर्वन्यदीच्छसि
तदहंतेप्रदास्यामियदहंतद्वशेद्विज ४५
पापोऽपिभरतस्तेवैभ्रातायत्रमृतोगतः
स्वर्गंस्वर्गसुखाकांत्तीकिमन्यत्तस्यवर्ण्यते ४६
नारदउवाच-
एवमुक्त्वासदेवेंद्रोब्राह्मणेंद्रंनरेंद्रतम्
पतगेंद्रंसमारोप्यसर्वतीर्थेंद्रमागमत् ४७

पुंडरीकस्यदेहात्तुतेनतत्प्राणवायुना
समंज्योतिः सनिर्गत्यगोविंदपदमाविशत् ४८
एवंपुष्करतीर्थेऽस्मिन्निंद्रप्रस्थगतेनृप
स्नानेनपुंडरीकस्तुलेभेसायुज्यमीश्वरे ४९
एवंतीर्थानुरोधेनगोविंदोऽपिचतद्गृहे
मासमेकंसुखंराजन्नुवासनिजबंधुवत् ५०
केनवर्णयितुंशक्योमहिमापुष्करस्यवै
शक्रप्रस्थगतस्यास्यकोटयंशोवर्णितोमया ५१
माहात्म्यश्रवणादस्यश्रद्धयालभतेनरः
अश्वमेधक्रतुफलंपठनादपिभूपते ५२

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेकालिंदी माहात्म्येपुष्करमहिमावर्णनोनामैकोनविंशाधिकद्विशततमोऽध्यायः २१९

विंशाधिकद्विशततमोऽध्यायः

नारदउवाच-
शिवस्यतीर्थराजस्यप्रयागस्यतवाग्रतः
महिमानंमहापुण्यंश्रद्धयावर्णयामिते १
विश्वावसुर्महीपालगंधर्वोलोकविश्रुतः
एकदासगतोगातुंसुमेरौब्रह्मणः सभाम् २
तत्रसर्वैः सुरश्रेष्ठमुपविष्टंसुविष्टरे
जुष्टंसुरगणैर्भूपविश्वावसुरवैक्षत ३
ब्रह्मासनसमीपेतुवरासनगतंनृप
द्वितीयमिवलोकेशमिंद्रप्रस्थंसएक्षत ४
सुरराजतीर्थराजौब्रह्मेंद्रप्रस्थयोर्नृप
चामरोद्धूननं मूर्ध्निकुर्वंतौसददर्शह ५
अन्यानिदेवतीर्थानितयोर्दूरेमहीपते
स्थितानितेनदृष्टानिबद्धांजलिपुटानितु ६
तयोरग्रेजगौराजन्गांधर्वंरागमुत्तमम्
तीर्थैःसममगात्सत्यलोकंदेवान्विसृज्यहि ७
अथविश्वावसुर्द्धीमान्दृष्ट्वातीर्थस्यवैभवम्

इंद्रप्रस्थस्यराजेंद्रहाहामेतदुवाचह ८
विश्वावसुरुवाच-
भोभोगंधर्वशार्दूलतीर्थमेतन्महाद्भुतम्
इंद्रप्रस्थाख्यमेतस्मिन्संसारेतीर्थराशिषु ९
चराचरगुरुर्ब्रह्मासुरवंद्यपदांबुजः
तस्यासनसमीपस्थंयदतिष्ठसमासनम् १०
तीर्थराजोऽपिपृष्ठस्थश्चामरंयस्यमस्तके
अधुनाभृत्यवज्ञातस्तीर्थेष्वन्येषुकाकथा ११
पृथिव्यांयानितीर्थानित्रिवर्गफलदानितु
इंद्रप्रस्थमिदंतीर्थंचतुर्वर्गफलप्रदम् १२
अत्रस्थितानितीर्थानितादृशानिगुणैर्ध्रुवः
शेषेनापिनशक्यंतेस्तोतुंतेषांमहागुणाः १३
नारदउवाच-
एवंविश्वावसुर्धीमान्दृष्ट्वेंद्रप्रस्थवैभवम्
गत्वातस्यगृहंराजन्पावनंसर्वकामदम् १४
यथादेवेषुसर्वेषुशक्रः श्रेष्ठःशचीपतिः
तस्माद्ब्रह्माचतीर्थेषुप्रयागोऽयतथावरः १५
तस्मादपिमहाराशक्रप्रस्थमिदंवरम्
अस्यांतरगतोयोऽयप्रयागोनृपदृश्यते १६
कथयाम्यत्रयद्वृत्तंमोहिन्याःपराययोषितः
नर्मदासरितस्तीरेपुरीमाहिष्मतीनृप १७
मोहिनीनामतत्रासीद्वेश्याबहुधनान्विता
रूपयौवनसंपन्नानिष्णातानृत्यगीतयोः १८
तयाबहूनिपापानिकृतानिधनलुब्धया
ब्रह्महत्याःकृताःसप्तदास्यश्चबहवोहताः १९
तासांचपातितागर्भाःबहुशःपापयातया
एवंतयासुतारुरायंगमितंपापकर्मभिः २०
ततोजराकियत्कालेतद्देहेसमपद्यत
जराग्रस्तशरीरासानिवृत्तविषयस्पृहा २१
नचक्रेमानसंयूनांतेचतांपतिभूपते

पापार्जितंधनंस्वीयंनविश्वसितिकस्यचित् २२
नदत्तेनस्वयंभुंक्तेननिद्विपतिवैक्वचित्
एकदासानिशीथेतुविबुध्येतिविचिंतयत् २३
मृतायांमयिकस्येदंधनंपापैरुपार्जितम्
तंनयिष्यतिमांघोरंनरकंभृशदारुणम् २४
दास्यस्तासांचभर्त्तारस्तद्बोद्यंतिधनंमम
मयैवसद्गतिस्तस्यकथंनक्रियतेऽधुना २५
एवंविचिंत्यसाधर्मेविधायमति मुत्तमाम्
चकारारामसरसिवापीकूपसुरालयान् २६
अभितःपुरमाधत्तेप्रपाःपथिकहेतवे
निदाघेचमहाराजतेभ्योऽन्नप्रददौचसा २७
धर्मशालांगृहाभ्याशेनिवासायविदेशिनाम्
विदधेसापुनस्तेभ्योददावाहारमुत्तमम् २८
एवंप्रवर्त्तमानाहिधर्मेसाभूपमोहिनी
ज्वरातुराभवत्काले क्वचिच्चेतिविचिंतयत् २९
धर्मार्थेहिमयावित्तंव्ययितंभूरियद्यपि
तथापिस्वर्णरूप्यादिप्रचुरंवर्त्ततेपरम् ३०
श्रोत्रियेभ्योददाम्येतज्ज्ञानेनेतिव्यचिंतयत्
विचिंत्येतिसमाहूतामोहिन्यानगरद्विजाः ३१
नागतास्तेमहीपालज्ञात्वाघोरंप्रतिग्रहम्
यदातदाद्विभागंचचक्रेतत्तुधनं स्वकम् ३२
एकोभागस्तुदासीनांदत्तोन्यश्चविदेशिनाम्
स्वयंतुनिर्द्धनाराजन्नभवत्सातुमोहिनी ३३
तथासमागतंमृत्युंविज्ञायांतिकमंतिके
मुक्त्वादास्योधनंनीत्वायथेष्टगतयोऽभवत् ३४
इतिमत्वायदाह्येषाज्वरमुक्ताभविष्यति
तदानींयद्धनंदत्तंनूनमादास्यतेहितत् ३५
अथसालंघनान्यष्टादशकृत्वामहीपते
निजायुषस्तुशेषेणज्वरमुक्तातदाभवत् ३६
एकाजरद्गवानामसखीतस्यामहीपते

सातामुपचचाराशुपथ्यादिभिरतंद्रिता ३७
कियद्भिर्वासरैः सातुपूर्णाहाराव्यजायत
तस्याजरद्गवायास्तुगृहेभुक्तंस्मलज्ञया ३८
मयास्थितंसुखेनात्रदुःखमद्यसमागतम्
दारिद्र्यान्नमयास्थेयंसचिंत्येतिगतान्यतः ३९
गच्छतीसावनेराजन्मोहिनीपुरतस्करैः
इति मत्वाविनिहतागृहीत्वायात्यसौधनम् ४०
धनमप्राप्यत्स्तस्याः सकाशात्पुरतस्करैः
श्वसतीसापरित्यक्तातस्मिन्नेववनेनृप ४१
अथवैखानसः कश्चित्प्रयागस्यास्यवैजलम्
बिभ्रत्कमंडलौराजन्नत्रारगयेसमाययौ ४२
अथतांपतितांवीक्ष्यशस्त्रविक्षतविग्रहाम्
याचमानामिदंराजन् जीवनंहस्तसंज्ञया ४३
वैखानसउवाच-
कात्वंकेनशितैः शस्त्रैःसक्षतीकृतविग्रहा
एकाकिनीकिमर्थंवानिर्जनारगयमागता ४४
इंद्रप्रस्थगतस्येदंप्रयागस्यजलेशुभे
भाग्योदयेनकेनापिप्रापितंप्रियकाम्यया ४५
इत्युक्तातेनसावक्तुमक्षमाव्याददेमुखम्
पातुंतद्वारिमहिषीभवेयमितिवांछया ४६
अथैतस्यप्रयागस्यपातितेंबुनितन्मुखे
तत्याजजीवितंसातुमोहिनीगणिकानृप ४७
प्राणप्रयाणकालेतुमहिषीत्वंचवांच्छयत्
अतःसामहिषीजाताद्राविडेवीरवर्मणः ४८
संभूयकेरलाधीशगृहेतीर्थांबुपानतः
कुलशीलधनैश्वर्यसंयुक्तस्यमहीपते ४९
हेमगौरंततः सांगंबभारकमलेक्षणा
अतस्तस्यपितानामहेमांगीतिचकारह ५०
एकदासातुहेमांगीहेमाभरणभूषिता
कलायाःस्ववयस्यायामंत्रिपुत्र्यागृहंययौ ५१

तत्रयावकतैलेन स्नापिताभोजिताचसा
विविधान्नैस्तदाराजन्निविष्टावरविष्टरे ५२
पुष्पोद्ग्रथितधमिल्लाद्धामद्धौमविभूषिता
कलांप्रोवाचदधतीमुखेतांबूलवीटिकाम् ५३
हेमांग्युवाच -
कलेकलयमेवाक्यंकोकिलाकलभाषिणि
गृहेयदद्भुतंवस्तुतवमामभिदर्शय ५४
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेकालिदी
माहात्म्येइंद्रप्रस्थवर्णनोनामविंशाधिकद्विशततमोऽध्यायः २२०

एकविंशाधिकद्विशततमोऽध्यायः

नारदउवाच-
इत्युक्तासाकलाराजंस्तयानृपतिभार्यया
स्वकोशात्स्वर्णमंजूषामानाय्यविदधेपुरः १
उवाचचमहाराजभार्येऽस्यामहदद्भुतम्
पुस्तकंवर्ततेदेवितत्रचित्राणिसंतिवै २
उद्घाटयदृश्यतांकिंचित्किंकिमस्त्यत्रपुस्तके
रंस्यतेतेमनोनूनंतत्रस्थालेख्यदर्शने ३
इत्युक्त्वाभूपपत्नीसादास्यातामुदघाटयत्
मंजूषांतत्रसंस्थंचपुस्तकंपाणिनाऽग्रहीत् ४
तत्रावलोकयामाससावतारान्समासतः
पूर्वंततस्तुभूगोलंपंचाशत्कोटियोजनम् ५
तत्रांधकारसंयुक्तारसंयुक्ताभूमिर्दृष्टाथकांचनी
एतयोरंतरेराजल्लोँकालोकश्चपर्वतः ६
सप्तद्वीपास्ततोदृष्ट्वासमुद्रैःसप्तभिर्वृताः
एतेषुनद्यःशैलाश्चखंडानितुमहामते ७
एतद्भारतखंडंसापश्यंतीभूपतिप्रिया
यमुनाजाह्नवीमुख्यासरितः समवैक्षत ८
यमुनातीरगंराजन्निंद्रप्रस्थमिदंशुभम्
ददर्शसामहाभागातीर्थंव्रजयुतंनृप ९

अत्रतीर्थमिदंदृष्ट्वाप्रयागंब्रह्मनिर्मितम्
पूर्वजन्मकृतंकर्मसासस्मारमनस्विनी १०
ततस्तूष्णींसमुत्थायतूर्णंसास्वगृहंययौ
निश्चित्येतिनभोक्ष्यामिततःप्रस्थायतीर्थकम् ११
तदैवसातुहेमांगीसहगंतुमसुप्रियम्
वीरवर्माणमाहेदंतीर्थराजंप्रियासती १२
हेमांग्युवाच-
भोभोप्राणपतेवाक्यंमदीयंशृणुधर्मदम्
विधेहिचमहाभागतूर्णंपूर्णोभविष्यति १३
पुराहंमोहिनीनामवेश्याचबहुपापकृत्
यौवनेवार्द्धकेकिंचिद्धर्मेजातामतिर्मम १४
पापेनोपार्जितांवित्तंधर्मेणव्ययितंमया
निर्द्धनाहंयदाराजन्निर्गतानिजपत्तनात् १५
तदामांनिर्जनेऽरण्येयांतीजघ्नुस्तुतस्कराः
बृथादारिद्र्यसंतप्तापापाधनजिघृक्षया १६
शितशस्त्रक्षतांगींमांश्वसंतींगतचेतनाम्
विसृज्यतस्करास्तत्रगताहतमनोरथाः १७
ततोवैखानसोह्येकः प्रयागस्यजलंवहन्
इंद्रप्रस्थगतस्यैववनेतत्रसमागतः १८
तत्रमांपतितांदृष्ट्वातदवस्थांसतापसः
कात्वंकुतःकिमर्थंवाहताकेनेतिपृष्टवान् १९
तदाकिमपिनोक्तंमेप्रार्थितंपुण्यमंबुतत्
तेनतन्मेमुखेक्षिप्तंततोऽहदेहमत्यजम् २०
प्राणप्रयाणकालेतुवारितत्सर्वकामदम्
श्रुत्वेतिवांच्छितवतीमहिषीस्यामितिप्रभो २१
तस्यतीर्थांभसोराजन्प्रसादात्तेगृहेश्वरी
जाताहंसत्कुलाचाराशीलयापरयोनिधेः २२
सांप्रतंद्रष्टुमिच्छामिशक्रप्रस्थगतंनृप
प्रयागंतीर्थराजंतंभवतासहकामदम् २३
प्रस्थास्येहंयदाराजन् तीर्थराजंप्रतिप्रभो

तदाहमन्नंभोक्ष्यामिमयेतिविहितःपणः २४
राजोवाच-
कथमेतद्विजानीयांत्वदुक्तंचललोचने
प्रतीतंकुरुमेभद्रेत्वदुक्तंकरवाण्यहम् २५
नारदउवाच-
इत्युक्तेतेनभूपेनखेवागित्यभवत्तदा
आकाशवागुवाच-
सत्यमुक्तंवचोराजन्ननयातवभार्यया २६
इंद्रप्रस्थेगतेपुण्येप्रयागेतीर्थपुंगवे
तत्रगत्वाकुरुस्नानंलप्स्यसेयद्यदिच्छसि २७
नारदउवाच-
निशम्येतिततोवाणींनृपोगगनसंभवाम्
दंडवत्पतितोभुमौतद्वक्तारंनमाम्यहम् २८
अथमंत्रिणमाहूयराज्यमारोप्यतत्रवै
तयासहसमारुह्यरथंतीर्थवरंययौ २९
कतिभिर्वासरैरत्रहेमांग्यासहआययौ
उपजह्तीर्थराजेक्षीरंभार्यायुतोनृपः ३०
सस्नतुस्तौशिवेतीर्थेदंपतीतत्रकामदे
प्रयागेतेनवपुषावैकुंठप्राप्तिरस्तुमे ३१
प्रतीच्छयास्नानमात्रेमिथुनेतत्रभूपते
आगतौसुरशार्दूलौहंसपक्षींद्रवाहनौ ३२
आगतौतौसमालोक्यवीरवर्मासभूपतिः
प्रणम्यशिरसादेवौतुष्टावैकाग्रमानसः ३३
राजोवाच-
नमोवांसुरशार्दूलौबिभ्रद्ध्यामसितारुणे
वपुषीक्षौमवासांसिहेमसिंदूरभानिच ३४
वंदेयुवांसत्वरजः प्रधानौचराचरस्यस्थितिसर्गहेतू
वैकुंठसत्याद्भुतलोकनाथौचतुर्द्विबाहूखगराजवाहौ ३५
वैराग्यसंरागवतांजनानांसन्मुक्तिभुक्तिप्रतिपादिकौच
वृंदारकेवंदितपादपद्मौसद्भावनम्रेणनमामिमूर्ध्ना ३६

गोविंदवृंदारकवंद्यपादनकोऽपिजानातितवस्वरूपम्
यतः परस्त्वंप्रकृतेश्चपुंसोमनोवचोभ्यामपिदूरवर्ती ३७
धन्यःसलोकेपुरुषःपरात्मन्योविश्वमेतत्त्वाणिकंविचिंत्य
अनन्यचेताभजतित्वदीयपादारविंदंमुनिवृंदवंद्यम् ३८
त्वत्पादसेवनंनामतीर्थमेतच्चदुर्लभम्
जनानांभजमानानांवांछितार्थफलप्रदम् ३९
तथाप्येतद्द्वयंसेव्यंमुक्तयेनान्यलब्धये
अन्यकामनयायस्तुसेवतेसतुवंचितः ४०
संतोभवंतमासेव्यतीर्थमेतच्चमुक्तिदम्
नान्यमिच्छंत्यतिक्रम्यसर्वलोकान्जिजीषवः ४१
नारदउवाच-
इत्यभिष्टूयदेवेशंलोकेशंसचभूपतिः
तस्थौयदातदाराजन्हेमांगीसाजगादह ४२
पद्मापतेपद्मपलाशलोचनब्रह्मन्करालासनभारतीगुरो
नमोयुवाभ्यांयदिदीनचेतसेप्रसीदतांतारयतांभवाब्धेः ४३
तीर्थस्यास्यप्रसादेनजाताहंमहिषीप्रभो
युवयोर्दर्शनंजातंदेवानामपिदुर्लभ् ४४
युवामखिलचित्तज्ञौदत्तंनौमानसेप्स्तिम्
स्नानकालेयदावाभ्यांविहितंपारमार्थिकम् ४५
एवंताभ्यामुभाभ्यांतौसंस्तुतौदेवपुंगवौ
प्रसन्नवदनौभूत्वाप्रोचतुर्दंपतीप्रति ४६
हरिब्रह्माणावूचतुः
धन्यात्वमसिहेमांगियतोऽयतारितः पतिः
त्वयाराज्यसुखासक्तचित्तोप्येतत्समागमात् ४७
राज्ञांविषयसक्तानांदुर्लभामुक्तिरीदृशी
त्वद्भर्तुर्यादृशीजातातीर्थस्यास्यप्रसादतः ४८
नारदउवाच-
इत्युक्त्वातौसमालोक्यगरुडंपक्षिपुंगवम्
जग्मतुस्तौसुरश्रेष्ठौसत्यलोकंनरेश्वर ४९
तत्रतेब्रह्मणासर्वेपूजिताविधिवन्नृप

तस्यचित्तानुरोधेनतस्थुरेकंमुहूर्तकम् ५०
अथताभ्यामुभाभ्यांसदंपतीभ्यांसमंहरिः
आरुह्यगरुडंश्रीमद्वैकुंठमगमन्नृप ५१
इत्येतत्कथितंतुभ्यंतीर्थराजस्यवैभवम्
पुण्यंसमस्तपापघ्नंयशस्यंसुतदंनृप ५२
यएतच्छृणुयान्नित्यंपठेदपिच मानवः
सगच्छेद्वांछितंस्थानंसत्यमेतन्मयोदितम् ५३

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेइंद्रप्रस्थ माहात्म्येप्रयागवर्णनंनामैकविंशत्यधिकद्विशततमोऽध्यायः २२१

द्विविंशत्यधिकद्विशततमोऽध्यायः

नारदउवाच–
आकर्णयशिबेराजन्वर्णयामितवाग्रतः
पुण्यंयशस्यमायुष्यंकाश्यामाहात्म्यमुत्तमम् १
इंद्रप्रस्थतटस्थायांकाश्यामेकस्तुपादपः
शिंशपाख्योभवेद्राजन् पुरापुण्ययुगेकृते २
तत्रैकोवायसोह्यासीत्कृतनीडोवनस्पतौ
तस्याधस्तान्महासर्पं कोटरेवसतिस्मह ३
एकदातस्यकाकस्यभार्याडद्वयमालये
प्रतिमुच्यगताक्वापिननीडेस्वेसमागता ४
स्वयमेवसकाकस्तुपालयन्नंडकद्वयम्
तामेवशिंशपामुच्चैरध्यतिष्ठन्महीपते ५
अथैकदानिशीथेतुमहावात्यासमागता
अभनक्शिंशपांराजन्मूलादपिदृढादपि ६
वात्ययापात्यमानायाशिंशपायास्तदातले
चूर्णितौकाकसर्पौतौगतप्राणौबभूवतुः ७
दिव्यांगास्तेत्रयोभूत्वाशिंशपावायसादयः
विमानत्रयमारूढाजग्मुःश्रीपतिकेतनम् ८
शिबिरुवाच–
देवर्षेकेनपुण्येनप्राप्तातैर्मुक्तिदापुरी

ग्र्रासंस्तेकेत्रयःपूर्वंसर्वंकथयनारद ९
नारदउवाच-
कुरुजांगलदेशीयोब्राह्मणः श्रवणाभिधः
तस्यभार्याकुडानामभ्राताभूच्चकुरंटकः १०
ग्र्रस्नातभोक्तानित्यंसकवलोमिष्टभुग्रहः
श्रवणस्तेनदोषेणबभूवग्रामवायसः ११
कुरंटकस्तुतद्भ्रातानास्तिकोऽभवदुल्बणः
श्रुतिस्मृतिपथोच्छेत्तादेवतानांचनिंदकः १२
तेनदोषेणसमृतोह्यभवत्कालकुंडली
साकुंडाश्रवणस्यस्त्रीवभूवोभयदोषभाक् १३
ग्र्रतःसास्थावरत्वंहिलब्ध्वासीदुभयाश्रया
एतत्तेकथितं भूपतद्वृत्तंपूर्वजन्मनि १४
ग्र्रतः परंप्रवक्ष्यामितेषांपुरायंयतस्त्रयः
प्रापुस्तेनपुरींरम्यांकाशींवैश्वेश्वरींनृप १५
ग्रामांतरादेकादातौप्रत्यायातौनिजालयम्
कस्यचित्पथिकस्याथकूपमग्नांपयस्विनीम् १६
ग्र्रवलोक्यतदुद्धारंचक्रतुस्तेननोदितौ
ताभ्यांगदितमाकरार्यकुंडासाध्वित्यभाषत १७
तेत्रयस्तेनपुरायेनमरणंप्राप्यदुर्लभम्
इंद्रप्रस्थतटस्थायांकाश्यांवैकुंठमारुहन् १८
इयंकाशीमहेशस्यपुरीयद्यपिभूपते
तथाप्यस्यांमृतंजंतुर्वैकुंठेस्यात्सुखीहरेः १९
एतत्तेकथितंराजन्काश्यामाहात्म्यमुत्तमम्
किमन्यच्छ्रोतुमिच्छातेविद्यतेतद्वदस्वमे २०
शिबिरुवाच-
मुनेत्वयामहेशस्यक्षेत्रत्रयमुदीरितम्
काशीचशिवकांची चगोकर्णंचतथापरम् २१
एकस्यमहिमाप्रोक्तोत्वयाकाश्यामहामुने
गो कर्णशिवकांच्योश्चकथ्यतांयदिविद्यते २२
नारदउवाच-

गोगकर्णेकेवलंशैवंक्षेत्रंपरमपावनम्
तस्मिन्मृतोनरोराजन्शिवः स्यान्नात्रसंशयः २३
स्थलेजलेंतरिक्षेचजंतुस्तत्रमृयेतचेत्
तदाकैलासशिखरेशिवः संभूयदीव्यति २४
अत्रगोकर्णतीर्थेस्यान्मृतस्यनपुनर्भवः
शिवेनससमंराजन्मुक्तिंयास्यतिकर्हिचित् २५
अस्यापितवमाहात्म्यंगोकर्णस्यमहामते
वर्णयामियदाकर्णिमयाब्रह्ममुखात्प्रभो २६
प्रयागादेकगव्यूतौगुरुतीर्थसमीपगः
मर्यादापर्वतोयोऽयदृश्यते पुण्यदर्शनः २७
तत्रैकः कर्कटोनामभिल्लआसीत्सुदारुणः
तस्यभार्याजरानामसाजघ्नेपतिपंचकम् २८
साजराविषसंयुक्तंषष्ठंकर्कटकंतदा
अकरोन्मोदकंहंतुंतदातेनस्वसुः श्रुतम् २९
निजायामुखतोराजन्भिल्लेनचमहात्मना
बालांतांहंतुमारेभेकर्कटोभृशदारुणः ३०
खड्गपाणिर्यदायातितद्वधायसभिल्लपः
यावत्तावत्तुसायायाज्ज्ञात्वानिजवधोद्यमम् ३१
वनमभ्यद्रवद्भीतानिजप्राणपरीप्सया
तामनुद्रवतातेनर्ककटेनमहीपते ३२
अत्रगोकर्णतीर्थेतुगृहीताखड्गपाणिना
शिरश्छित्वातुखड्गेनपातयित्वाजलेवपुः ३३
तस्यगोकर्णतीर्थस्यनिजस्थानमगाच्चसः
साजरातत्रगोकर्णेपापापिनिधनंगता ३४
कैलासशिखरेराजन्पार्वत्याअभवत्सखी
अहंकथितवानेतत्तवगोकर्णवैभवम् ३५
शिवकांच्याश्चमाहात्म्यंपवित्रंवर्णयामिते
इंद्रप्रस्थतटस्थायांशिवकांच्यामपिप्रभो ३६
गतिः सा परमापुंसांगोकर्णेयामयोदिता
अत्रश्रीमन्महादेवोविष्णुंसर्वसुरेश्वरम् ३७

आराध्यभक्तराजत्वंलेभेज्ञानंचतात्विकम्
अतःसर्वेवयंपुत्राब्रह्मणस्तंमहेश्वरम् ३८
आराधयामः सततंसद्भक्तिज्ञानलिप्सया
अत्रबाणासुरोराजन्नाराधमहेश्वरम् ३९
निराहारोवर्षशतंतद्गुणत्वबुभूषया
तस्मैप्रसन्नोभगवान्गणत्वंदत्तवान्निजम् ४०
स्वयंचसर्वदातस्यपुरपालोबभूवह
इयंपुरीपुराराजन्नासीद्विष्णोर्महात्मनः ४१
दत्ताशिवायतुष्टेनतपसातस्यविष्णुना
अस्यामेकंपुरावृत्तंमहदाश्चर्यकारकम् ४२
विप्रस्यशिवभक्तस्यवैकुंठाप्तिर्यथाभवत्
एकस्तुब्राह्मणोराजन् हेरंबोनामधार्मिकः ४३
कायेनमनसावाचाशिवपूजारतः सदा
एकदासमहाभागःशिवतीर्थानिपर्यटन् ४४
शिवभक्तः शिवेराजन्शिवकांच्यामिहागतः
एनांमनोहरांचैवनतत्याजसबुद्धिमान् ४५
पश्चात्तत्रैवतत्याजप्राणानस्याजलांतरे
तत्रैवश्रीमहादेवगणास्तंब्राह्मणोत्तमम् ४६
नीत्वाकैलासमचलंचेलुस्तदनुशासनात्
अथमध्येसमायातागणावैकुंठतोहरेः ४७
तेभ्योबलात्समादातुंतंद्विजश्रेष्ठमुद्यताः
आसीत्तेषांमहयुद्धंगणानांहरि शर्वयोः ४८
तत्रयुद्धेनवैकेषांविजयोनपराजयः
तत्रवैकुंठतोविष्णुरागतोगरुडासनः ४९
कैलासाद्वृषभारूढोमहेशश्चत्रिलोकधृक्
तावन्योन्यंमुखंदृष्ट्वाविहस्यजगदीश्वरौ ५०
पश्यतस्ममहद्युद्धंनभस्येवगणैः कृतम्
अथस्वीयान्गणान्विष्णुःशैवांश्चदिवियुद्धतः ५१
निवार्यतंद्विजंतार्क्ष्यमारोप्यागाच्छिवालयम्
शिवेनतद्गणैश्चापिस्वकीयैरपिमाधवः ५२

वृतोगछन्पथिश्रीमान्स्तुतस्त्रिदशवंदितः
गत्वाविवेशतंचागंमहादेवपुरःसरः ५३
तस्मैद्विजायवैतस्यदर्शयन्नमणीयताम्
अथतस्मात्तुकैलासान्महादेवेनवंदितः ५४
माधवःपरयाभक्त्यावैकुंठमगमत्तदा
द्विजःसोऽपिमहाभागस्तीर्थस्यास्यप्रसादतः ५५
गोविंददर्शनंप्राप्यमुमुदेहरसन्निधौ
एतत्तेकथितंराजन्शिवकांच्यास्तुवैभवम् ५६
तीर्थसप्तकनाम्नस्तुशृणुष्वसुसमाहितः
तीर्थमेतन्महाराजचतुर्वर्गफलप्रदम् ५७
दर्शनात्स्पदर्शनाद्ध्यानात्स्मरणादपिभूपते
वसिष्ठादिभिरेतस्मिन्महर्षिभिरनुष्ठितम् ५८
महत्तपस्तुसृष्ट्यर्थंतत्रासंस्तुत्तमानृप
मरीचिरपिधर्मात्मापुत्रार्थंस्नानमाचरन् ५९
अत्रलेभेमहाभागः कश्यपंसुतमुत्तमम्
अत्रिरत्रापितपसातोषयद्देवपुंगवान् ६०
सोमंदुर्वाससंदत्तंतेभ्योलेभेसुतत्रयम्
अंगिराअपिधर्मात्मातीर्थस्यास्यप्रसादतः ६१
लेभेसुतांस्तुतद्वंश्याजाताआंगिरसाद्विजाः
पुलहोऽपिसुतंलेभेदंभोलिगुणवत्तरम् ६२
योऽगस्त्योभूत्पुराराजंस्तीर्थेऽत्रैवनिमज्जनात्
पुलस्त्यस्यात्रतीर्थेवैपुत्रोलब्धोतपस्यतः ६३
कुबेरोभून्महाभागोयः सखासीदुमापतेः
क्रतोरपिसुताजातावालखिल्याः सहस्रशः ६४
तीर्थस्यास्यप्रसादेनतेसर्वेह्युर्ध्व रेतसः
रजआदीन्सुताँलेभेवसिष्ठोऽपिमहातपाः ६५
सप्तैवराजशार्दूलमहिमातस्यवर्णितः
अन्यान्यपिचतीर्थानिसंत्यनेकानिभूपते ६६
कपिलाश्रमकेदारप्रभासादीनिवैप्रभौ
नियुतैरपिवर्षाणांतेषांचमहिमानृप

अनंतेनापिनोवक्तुंशक्यतेकिमुमादृशैः ६७
सौभरिरुवाच–
एवमुक्त्वामुनि श्रेष्ठोनारदोमुनिपुंगवः
शिवंजगामनभसोनारायणगुणान्गृणन् ६८
शिबिरौशीनरोराजाशक्रप्रस्थस्यवैभवम्
श्रुत्वामुनिमुखाद्राजन्कृतार्थंस्वममन्यत ६९
तत्रस्नात्वाहिविधिवदिंद्रप्रस्थेसभूपतिः
विधायसत्क्रियाःसर्वाजगामनिजपत्तनम् ७०
इंद्रप्रस्थस्यमाहात्म्यमेतत्तवमयाविभो
यमुनातीरतीर्थस्यवर्णितंजनपावनम् ७१
नास्यादरंकरिष्यंतिकलौश्रद्धाविवर्जिताः
इंद्रप्रस्थस्यराजेंद्रसर्वतीर्थशिरोमणेः ७२
अष्टादशपुराणानां श्रवणाद्धारतस्यच
यत्फलंतन्महिम्नस्यशक्रप्रस्थस्यजायते ७३
अरुणोदयवेलायांमाघलक्षैकमज्ञनात्
यत्फलंतन्महिम्नोस्यश्रवणाच्छ्रद्धयाभवेत् ७४
श्रद्धयास्यतुमाहात्म्यंयः शृणोतिमहीपते
तर्पितास्तेनपितरोदेवाश्चमुनयस्तथा ७५
कृच्छ्रातिकृच्छ्रपाराकचांद्रायणव्रतादिभिः
यत्फलंतन्महिम्नोऽस्यश्रद्धयाश्रवणाद्भवेत् ७६
अश्वमेधादियज्ञानांसमस्तानांमहीपते
यत्फलंतन्महिम्नोऽस्यश्रद्धयाश्रवणाद्भवेत् ७७
सूतउवाच–
एवंयुधिष्ठिरोराजाश्रुत्वाशौनकसौभरेः
इंद्रप्रस्थस्यमाहात्म्यंसययौहस्तिनंपुरम् ७८
ततोविनीयसद्भ्रातॄन्दुर्योधनपुरः सरान्
इंद्रप्रस्थमगात्पुरायंराजसूयचिकीर्षया ७९
द्वारकायाः समागम्यगोविंदंकुलदैवतम्
राजसूयेनयज्ञेनसइयाजमहीपतिः ८०
मुक्तिदंतीर्थमेतत्तुशपतोस्याप्यजायत

इतिमत्वाहरिस्तत्रशिशुपालंजघानह ८१
शिशुपालोऽपितस्यैवतीर्थस्यमरणाद्धुवि
सायुज्यमगमत्कृष्णेनिखिलार्थप्रदायके ८२
शिशुपालोहतोयत्रविहितोयत्रचक्रतुः
गदयातत्रभीमेनकृतंकुंडंसुविस्तरम् ८३
भीमकुंडंतुविज्ञातंजातंतद्धुविपावनम्
कालिद्यादक्षिणेभागेगव्यूत्यर्धंमहीतले ८४
इंद्रप्रस्थगतायायत्कालिद्याः स्नानतः फलम्
तत्फलंतत्रकुंडेतुजायतेनात्रसंशयः ८५
सूतउवाच-
यस्मिन्क्षेत्रेस्थितोजंतुस्तंक्षेत्रमनुवत्सरम्
प्रदक्षिणादिभिर्धर्मैं स्वापराधान्क्षमापयतेत् ८६
प्रतिसंवत्सरंचैवपरिक्रामतियोनरः
क्षेत्रापराधदोषैश्चनसलिप्येत्तुपातकैः ८७
प्रदक्षिणमकुर्वाणः क्षेत्रसिद्धिंनविंदति
तस्मात्प्रदक्षिणातीर्थेदातव्याचफलार्थिभिः ८८
हरेर्नामनिसंजल्पन्प्रकरोतिप्रदक्षिणाम्
पदेपदेसलभतेकपिलादानजंफलम् ८९
चैत्रकृष्णाचतुर्दश्यांशक्रप्रस्थप्रदक्षिणाम्
यः करोतिनरोधन्यः सर्वपापैःप्रमुच्यते ९०

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेकालिदीमाहात्म्येइंद्रप्रस्थगतकाशीगोकर्णशिवकांचीतीर्थसप्तकभीमकुंडवर्णनोनामद्वाविंशत्यधिकद्विशततमोऽध्यायः २२२

त्रयोविंशत्यधिकद्विशततमोऽध्यायः

शौनकउवाच-
सूतसूतमहाभागधन्योसित्वंभवांबुधौ
यन्नोऽत्यर्थंनिमग्नानांपाययस्वमृतोत्करम् १
साधोऽत्रभवनिस्तारवांछतांनःसमादिश
मंत्ररत्नंभावशुद्धंयन्मयंसचराचरम् २

सूतउवाच-
शृणुशौनकवद्त्यामिमंत्ररत्नंमहाद्भुतम्
यद्दिलीपायगदितं वसिष्ठेनमहात्मना ३
एकदातुदिलीपेनपृष्टमेतद्गुरुंप्रति
वसिष्ठंद्विजशार्दूलंप्रणिपत्ययथात्वया ४
दिलीपउवाच-
भगवन्भवताप्रोक्तास्सर्वधर्माविशेषतः
वर्णाश्रमयुताधर्मानित्यनैमित्तिकाः क्रियाः ५
राजधर्म्माश्चयज्ञाश्चतीर्थदानव्रतादिकम्
श्रुतामयामुनिःश्रेष्ठञ्चद्त्यय्यस्वर्गभोगदाः ६
अधुनाश्रोतुमिच्छामिमोद्तमार्गंसनातनम्
दिष्ट्याहंयेनगच्छामितद्ब्रह्मन्वक्तुमर्हसि ७
कोमंत्रंसर्वमंत्राणांभवरोगैकभेषजम्
सर्वेषामेवदेहीनांकोहिमोद्तप्रदःपरः ८
तत्समाख्याहितत्त्वेनमयिवात्सल्यगौरवात् ९
वसिष्ठउवाच-
साधुपृष्टंत्वया राजन्सर्वलोकहितैषिणा
वद्त्यामिपरमंगुह्यमेकंसंसारतारकम् १०
पुरामहर्षयः सर्वेयज्ञदानपराःशुभाः
पप्रच्छुर्ब्रह्मणः पुत्रंनारदंमुनिसत्तमम् ११
महर्षयऊचुः -
भगवन्केनमंत्रेणगच्छामः परमंपदम्
तन्नोब्रूहिमहाभागप्रसादंकर्तुमर्हसि १२
नारदउवाच-
पितामहंपुरासर्वेयोगिनः सनकादयः
पप्रच्छुरेकमेकांतेमोद्तमार्गंसुदुर्ल्लभम् १३
ब्रह्मोवाच-
शृणुध्वंयोगिनःसर्वेरहस्यमिदमद्भुतम् १४
न जानंतिसुराःसर्वेऋषयश्चतपोधनाः
सर्गादौप्रोक्तवान्देवोमह्यंनारायणोऽव्ययः १५

ईश्वर्यासहदेव्याचसम्यक्संपूजितोमया
ततः प्रसन्नोभगवान्ममनारायणोऽव्ययः १६
प्राजापत्यंददौमह्यंश्रुतिजंसर्ववाङ्मयम्
प्रकाशकानिमंत्राणिव्यापकाव्यापकानिच १७
ततस्तमब्रुवेंदेवंपुराणपुरुषोत्तमम्
भगवन्केनमंत्रेणसंसारोत्तारणंनृणाम् १८
तन्ममाचक्ष्वतत्त्वेनसर्वलोकहितायवै
कोमन्त्रःसर्वमन्त्राणांपुरश्चरणवर्जितः १९
सकृदुच्चारणान्नृणांददातिपरमंपदम्
श्रीभगवानुउवाच-
साधुपृष्टंमहाभागसर्वलोकहितैषिणा २०
तस्माद्वक्ष्यामितेगुह्यंयेनमामाप्नुयुर्नराः २१
सर्वेषामेवमंत्राणांमंत्ररत्नंशुभावहम्
सकृत्स्मरणमात्रेणददातिपरमंपदम् २२
मंत्ररत्नद्वयंन्यासंप्रयतिःशरणागतिः
लक्ष्मीनारायणमितिमन्त्रःसर्वफलप्रदः २३
नामानिमंत्ररत्नस्यपर्य्यायेणनिबोधतः
तस्योच्चारणमात्रेणपरितुष्टोस्मिनित्यशः २४
कुलजोवातपस्वीवावेदवेदांगपारगः
यज्ञदानपरोवापिसर्वतीर्थोपसेवकः २५
व्रतीवासत्यवादीवायतिर्वाज्ञानवानपि
मन्त्राधिकारीनभवेत्तंप्रयत्नेनवर्जयेत् २६
ब्राह्मणाःक्षत्रियावैश्यास्त्रियः शूद्रास्तथेतराः
तस्याधिकारिणः सर्वेममभक्तास्तुतेयदि २७
अनन्यशरणानांचतथैवानन्यसेविनाम्
अनन्यसाधकानांचवक्तव्योमन्त्रउत्तमः २८
आर्तानामाशुफलदस्सकृदेवकृतोह्यसौ
दृप्तानामपिजन्तूनांदेहान्तरनिवारणः २९
आर्त्तोजिज्ञासुरर्थार्थीज्ञानीवापिप्रजापतिः
सकृन्मांशरणंयातिततःकामानवाप्नुयात् ३०

नादीक्षितायवक्तव्यंनाभक्तायचमानिने
नास्तिकायनलुब्धायनश्रद्धाविमुखायच ३१
नचाशुश्रूषवेवाच्यंनासंवत्सरवासिने
कामक्रोधविमुक्तस्तुदंभलोभविवर्जितः ३२
मांचयोव्यंभिचारेणभक्तियोगेनसेवते
वक्तव्यतस्यविधिवन्मंत्ररत्नमनुत्तमम् ३३
देशकालादिनियमानरिमित्रादिशोधनम्
न्यासमुद्रादिकंतस्यपुरश्चरणसंयुतम् ३४
मच्चक्रांकितदेहत्वंमदीयाराधनंतथा
मयिसन्यस्तकर्मत्वंमदनन्यशरण्यतता ३५
मयिसर्वफलन्यासोमहाविश्वासपूर्वकम्
अनन्यसाधनोयत्नस्त्वकिंचनत्वमात्मनः ३६
अवैष्णवानांसंभाषावंदनादिविवर्जनम्
अनन्यदेवतानांचवन्दनंपूजनंतथा ३७
एवमाद्यादिनियमांप्रपन्नस्यप्रकीर्तिताः
इत्यादिगुणयुक्तस्यवक्तव्यंमंत्रमुत्तमम् ३८
तस्यनारायणश्चाहमृषिर्विष्णुःसनातनः
देवताचश्रियासार्द्धमहंवात्सल्यसागरः ३९
सर्वलोकेश्वरः श्रीमान्सुशीलः सुभगस्तथा
सर्वज्ञःसर्वशक्तिश्चसदापूर्णमनोरथः ४०
सर्वगःसर्वबधुश्चकृपापीयूषसागरः
श्रीमन्नारायणश्चाहंदेवतासमुदाहृतः ४१
छंदस्तुदेवीगायत्रीपंचविंशाक्षरात्मिका
द्विस्सप्तषट्त्रिपंचद्विषडंगानिनियोजयेत् ४२
लक्ष्म्यामदनपायिन्यामांध्यायेद्विश्वरूपिणम्
चक्रशंखगदापद्मपाणिनंदिव्यरूपिणम् ४३
वामांकस्थश्रियासार्द्धंपूजयेत्प्रयतं शुचिः
अनेनमंत्ररत्नेनगंधपुष्पनिवेदनैः
सकृत्संपूज्यमानोऽपिसंतुष्टोस्मिप्रजापते ४४
ब्रह्मोवाच–

सम्यगुक्तंत्वयानाथरहस्यमिदमुत्तमम्
मंत्ररत्नप्रभावश्चसर्वसिद्धिप्रदोनृणाम् ४५
पितात्वंसर्वलोकानांमातात्वं गुरुरेवच
त्वंचस्वामीसखाभ्रातागतिस्त्वंशरणंसुहृत् ४६
अहंतुतवदेवेशदासश्शिष्यस्तथासुहृत्
तस्मान्ममदयासिंधोप्रोक्तवानिदमुत्तमम् ४७
अधुनामंत्ररत्नस्यदीक्षांसम्यग्विधानतः
ब्रूहिसर्वत्रतत्वेनलोकानांहितकाम्यया ४८
श्रीभगवानुवाच –
शृणुवत्सप्रवक्ष्यामिमंत्रदीक्षाविधिंपरम्
आचार्यंसंश्रयेत्पूर्वंमदाश्रयणसिद्धये ४९
आचार्योवेदसंपन्नोविष्णुभक्तोविमत्सरः
मंत्रज्ञोमन्त्रभक्तश्चसदामंत्राश्रयःशुचिः ५०
सत्संप्रदायसंयुक्तोब्रह्मविद्याविशारदः
अनन्यसाधनश्चैवतथानन्यप्रयोजनः ५१
ब्राह्मणोवीतरागश्चक्रोधलोभविवर्जितः
सद्वृत्तौशासिताचैवमुमुक्षुःपरमात्मवित् ५२
एएवमादिगुणेपेतआचार्यः समुदासुहृत्
आचाराञ्शासयेद्यस्तुसआचार्यइतीरितः ५३
यस्त्वाचार्यपराधीनस्सद्वृत्तौशास्यतेयदि
शासनेस्थिरवृत्तश्चशिष्यः सद्भिरुदाहृतः ५४
एवंलक्षणसंयुक्तंशिष्यंसर्वगुणान्वितम्
अध्यापयेद्विधानेनमन्त्ररत्नमनुत्तमम् ५५
द्वादश्यांश्रवणेवापिकर्हिचिद्वैष्णवेदिने
सदाचार्योपसंप्रीतौतत्रदीक्षांसमाचेत् ५६
सुदर्शनंपांचजन्यंसुवर्णेनप्रकारयेत्
रौप्येणवापिताम्रेणकांस्येनापिप्रकारयेत् ५७
स्नाप्यपंचामृतैः शुद्धैरर्चयेत्पुरतोमम
अर्च्चयेद्गंधपुष्पाद्यैस्तन्मंत्रेणविधानतः ५८
तत्रसंस्थापयेदग्निस्वगृह्योक्तविधानतः

ग्राचार्योजुहुयादाज्यंमंत्रेणाथद्विजोत्तमः ५९
ग्रष्टोत्तरससहस्त्रंवाशतमष्टोत्तरंतुवा
जुहुयान्मंत्ररत्नेनतथान्यैर्वैष्णवैः शुभैः ६०
मंत्रैःपुरुषसूक्ताद्यैर्जुहुयाघृतपायसम्
तस्मिन्नग्नौक्षिपेच्चक्रंशंखंचेद्विजत्तमः ६१
षडक्षरेणजुहुयादाज्यं विंशतिसंख्यया
प्रतप्तंचक्रमादायमं त्रेणैवतथागुरुः ६२
शंखेनैवांकनंकुर्याद्बाह्वोर्दक्षिणसव्ययोः
होमशेषंसमाप्याथपुनः पूजांसमाचरेत् ६३
ततः कलशमादायपवित्रोदकपूरितम्
मंत्रेणैवाभिमंत्र्याथतस्यमूर्ध्न्यभिषेचयेत् ६४
सितवस्त्रधरंसम्यगाचांतंविनयान्वितम्
ऊर्द्ध्वपुण्ड्रधरंशिष्यंमंत्रमध्यापयेद्गुरुः ६५
मंत्रार्थश्चप्रवक्तव्योवृत्तिश्चैवविशेषतः
लब्धमंत्रस्तदाचार्यंपूजयेद्भूषणादिभिः ६६
ग्रनेनविधिनामंत्रंयोऽधीतेवैष्णवाद्गुरोः
ततः सवैष्णवंयातिनान्यथासुरसत्तम ६७
नारद उवाच-
एवमुक्त्वाविधातारंदेवदेवोहरिः पिता
स्वचक्रेणांकयित्वातुतस्मैमंत्रंददौस्वयम् ६८ग्रं
सर्वलोकेश्वरोदेवोब्रह्मामपिताप्रभुः
ममापिविधिवन्मंत्रंसददौमुनिसत्तमाः ६९
तस्माद्यूयंमुनिश्रेष्ठाधारयित्वासुदर्शनम्
नारायणपदंद्वंद्वंगच्छध्वंशरणंद्विजाः ७०
वसिष्ठउवाच-
इत्युक्त्वामुनयः सर्वेनारदेनसुरर्षिणा
द्वयाधिकारिणः सर्वेयाताविष्णोः परंपदम् ७१
तस्मात्त्वमपिराजर्षेविष्णुसायुज्यमिच्छसि
दीक्षामार्गविधानेनधारयित्वासुदर्शनम् ७२
नारायणपदद्वंद्वंतदेकंशरणंव्रज

सर्वलोकेश्वरः साक्षाद्ब्रह्मात्रिभुवनेश्वरः ७३
ममापिनारदस्यापिप्रोक्तवान्मंत्रमुत्तमम्
शौनकादिमहर्षीणांनैमिषारण्यवासिनाम् ७४
नारदः प्रददौ मंत्रंप्रपत्तिंशरणागतिम्
एतद्गुह्यतमंराजन्नजानंतिमहर्षयः ७५
देवाताश्चनजानंतिसिद्धासाध्याश्चदानवाः
मयापिप्रापितोमंत्रंशक्तिपुत्रः पराशरः ७६
इहंरहस्यंपरमंलक्ष्मीनारायणंद्वयम्
राजंस्तवापिवक्ष्यामिप्रपत्तिशरणागतिम् ७७
द्वयात्परतरंमन्त्रंनास्तिसत्यंब्रवीमिते
अस्मात्परतरंधर्म्मंनास्तिलोकेषुकिंचन ७८
सत्यंसत्यंपुनःसत्यंब्रह्मणाकथितंपुरा
नारायणात्परोदेवोनास्तिमुक्तिप्रदोनृणाम् ७९
तत्सेवैवभवेन्मोक्षःसर्वकर्म निकृंतनः ८०
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्र्यांसंहितायामुत्तरखंडेवसिष्ठदिलीप संवादेविद्योपदेशोनामत्रयोविंशत्यधिकद्विशततमोऽध्यायः २२३

चतुर्विंशत्यधिक द्विशततमोऽध्यायः

दिलीपउवाच-
भगवन्सर्वमाचक्ष्वहरिभक्तिसुधामयम्
शृण्वतोनैवतृप्तिर्मेविष्णुभक्तिंसुखावहाम् १
तापत्रयमहाज्वालावह्निभिःसततंनृणाम्
संतप्तानांमुनिश्रेष्ठविष्णुभक्तिसुधार्णवम् २
विनाकिमन्यच्छरणंभवारण्येभयानके
आचक्ष्वविस्तरेणाथभक्तिभेदान्महामुने
उपास्यमानान्सततंमुनिभिः परमात्मनः ३
वसिष्ठउवाच-
साधुपृच्छसिराजेंद्रसंसारोत्तारणंनृणां
वैकुंठस्यपरेशस्यभक्तिंनित्यसुखावहाम् ४
इममेवंमहाप्रश्नंकैलासशिखरेपुरा

पप्रच्छगिरिजादेवीशंकरंलोकपूजितम् ५
पार्वत्युवाच-
देवदेवमहादेवत्रिपुरघ्नसुरेश्वर
विष्णुभक्तिंममाचक्ष्वमुक्तिदांसर्वदेहिनाम् ६
उपास्यभेदान्मंत्रांश्चतस्यपूजाविधींस्तथा
तस्यविष्णोःस्वरूपंचतद्विभूतिर्गुणादिकम् ७
तस्यलोकस्वरूपंचयंप्राप्यननिवर्तते
सर्गस्थितिलयंयेनकरोति भगवान्हरिः ८
यद्गत्वाननिवर्तं तेतद्धामपरमंहरेः
येनकेनचकृत्येनसाधनेनपरंपदम् ९
प्राप्नुवंतिनराःपापाविषयासक्तचेतसः
विस्तरेणमयिप्रीत्याब्रूहिसर्वमशेषतः १०
वसिष्ठउवाच-
इतिपृष्टोमहादेव्याहरस्त्रिपुरहातदा
उवाचपरमप्रीत्यानमस्कृत्यजनार्दनम् ११
रुद्रउवाच-
साधुसाधुमहादेविसर्वलोकहितैषिणि
साधुपृच्छसिमांदेविश्रीशमाहात्म्यमुत्तमम् १२
धन्यासिकृतपुण्यासि विष्णुभक्तासिपार्वति
परितुष्टोऽस्मितेभद्रेशीलरूपगुण् सदा १३
अथवक्ष्यामिगिरिजेभगवद्भक्तिमुत्तमाम्
तन्मंत्राणांविधानंचस्वरूपंतस्यशार्ङ्गिणः १४
तत्वंनारायणोविष्णुर्वासुदेवस्सनातनः
परमात्मापरंब्रह्मपरंज्योतिः परात्परः १५
अच्युतः पुरुषःकृष्णः शाश्वतः शिवईश्वरः
नित्यः सर्वगतः स्थाणूरुद्रस्साक्षीप्रजापतिः १६
यज्ञोयज्ञपतिः साक्षाद्ब्रह्मणः पतिरेवच
हिरण्यगर्भंसवितालोककृल्लोकभृद्विभुः १७
अकारवाच्योभगवान् श्रीभूनीलापतिः प्रभुः
उतामृतत्वस्येशानो यदन्नेनातिरोहति १८

सहस्रमूर्द्धाविश्वात्मासहस्राक्षः सहस्रपात्
सभूमिंसर्वतः स्पृत्वाह्यत्यतिष्ठद्दशांगुलम् १९
अनंतः श्रीपतीरामोगुणभृन्निर्गुणोमहान्
सर्वलोकेश्वरः श्रीमान्सर्वज्ञः सर्वतोमुखः २०
तस्यलोकप्रधानस्यजगन्नाथस्यपार्वति
माहात्म्यंवासुदेवस्ययच्छक्यंतद्ब्रवीमिते २१
अशक्यंतन्मयावक्तुंब्रह्मणासहदैवतैः
सर्वोपनिषदामर्थंवेदांतेपरिनिश्चितम् २२
तस्योपासनभेदांश्चशृणुवच्मिपुनः पृथक्
आद्यंतुवैष्णवंप्रोक्तंशंखचक्रांकनंहरेः २३
धारणं चोर्ध्वपुंड्राणांतन्मंत्राणांपरिग्रहः
अर्चनंचजपोध्यानंतन्नामस्मरणंतथा २४
कीर्तनंश्रवणंचैववंदनंपादसेवनम्
तत्पादोदकसेवाचतन्निवेदितभोजनम् २५
तदीयानांचसेवाञ्चद्वादशीव्रतनिष्ठितम्
तुलसीरोपणंविष्णोर्देवदेवस्यशार्ङ्गिणः २६
भक्तिः षोडशधाप्रोक्ताभवबंधविमुक्तये
सर्वेषामेवदेवानांममापिपुरुषोत्तमः २७
पूजनीयोहरिर्नित्यंब्राह्मणानांविशेषतः
तस्मात्तुब्राह्मणोनित्यंविधिवत्पूजयेद्धरिम् २८
तच्चिह्नैरंकितः श्रीशपदंप्राप्नोत्यसंशयम्
शंखचक्रांकनंकुर्याद्ब्राह्मणोबाहुमूलयोः २९
हुताग्निनैवसंतप्यसर्वपापापनुत्तये
चक्रंवाशंखचक्रेवातथापंचायुधानिवा ३०
धारयित्वैवविधिवद्व्रह्मकर्मसमारभेत्
अग्नितप्तंपवित्रंचधृत्वावैभुजमूलयोः ३१
त्यक्त्वायमपुरंघोरंयातिविष्णोःपरंपदम्
चक्रचिह्नविहीनस्तुयः पूजयतिकेशवम् ३२
तत्सर्वंविफलंयातिपूजामंत्रजपादिकम्
अग्नितप्तेनचक्रेणब्राह्मणोबाहुमूलयोः ३३

अंकयित्वाजपन्मंत्रंसंसारान्मोत्तमाप्नुयात्
सुदर्शनंधारयित्वावह्नितप्तंद्विजोत्तमः ३४
उपनीयविधानेनपश्चात्कर्मसुयोजयेत्
विष्णुचक्रविहीनंतुयश्राद्धेभोजयिष्यति ३५
व्यर्थंभवतितत्सर्वंनिराशाःपितरोगताः
विष्णुचक्रांकितंविप्रंपूजयेच्छ्राद्धकर्मणि ३६
विष्णुचक्रविहीनंतुप्रयत्नेनविवर्जयेत्
दद्याद्गोभूहिरण्यादिचक्रांकितभुजायवै ३७
यद्दत्तंचक्रहीनायतत्सर्वमसुरायवै
अग्नितप्तेनचक्रेणबाहुमूलेतुलांछिताः ३८
सर्वपापविनिर्मुक्तायांतिविष्णोः परंपदम्
हुताग्नितप्तचक्रेणशरीरंयस्यचिह्नितम् ३९
तस्यतीर्थानियज्ञाश्चसंप्राप्तानात्रसंशयः
अधृत्वाविधिनाचक्रंब्राह्मणः प्राकृतोभवेत् ४०
नतस्यकिंचिदश्नीयादपिक्रतुसहस्त्रिणः
अधृत्वाविधिना चक्रंब्राह्मणोज्ञानदुर्लभः ४१
गर्हितस्सर्वलोकेषुब्राह्मण्यात्प्रच्युतोभवेत्
शङ्खचक्रधरोदेवोहरिःपूज्योयथात्मभिः ४२
तथैवसर्वैस्संपूज्योवि प्रश्चक्रादिचिह्नितः
सर्ववेदविदोवापिसर्वशास्त्रविशारदः ४३
अधृत्वाविधिनाचक्रंब्राह्मणःपतितोभवेत्
ऊर्द्ध्वपुंड्रविहीनस्तु शंख चक्रविवर्जितः ४४
तंगर्दभेसमारोप्यबहिःकुर्यात्स्वपत्तनात्
प्रकृतिस्पर्शरहितोवासुदेवोजनार्दनः ४५
तथैवब्राह्मणोदेविविष्णुचक्रेणचिह्नितः
तस्मात्प्रकृतिसंसर्गपापौघदहनंहरेः ४६
प्रतप्तंबिभृयाच्चक्रंशंखंचभुजमूलयोः
स्त्रीशूद्राणांसदाधार्य्येचंदनेनसुगंधिना ४७
बाहुमूलेलिखेच्चक्रंतप्तंतुब्राह्मणस्यवै
तप्तेनैवांकनंकुर्याद्ब्राह्मणस्यविधानतः ४८

श्रौतस्मार्त्तादिसिध्यर्थंमंत्रसिध्द्यैतथैवच
हरेःपूजाधिकारार्थंचक्रंधार्यांविधानतः ४९
वैष्णवत्वस्यसिद्ध्यर्थंज्ञानसिद्ध्यर्थमेवच
प्रतपेच्चक्रशंखाभ्यांहुत्वाहोमंविधानतः ५०
अन्यैर्नदाहयेद्गात्रंब्राह्मणोहरिलांछनात्
शंखचक्रगदा खड्गशार्ङ्गादन्यैर्ह रेरपि ५१
लक्षणेनदहेद्देहंनान्यदग्धोऽहतिक्रियाम्
अचक्रधारिणंविप्रंदूरतः परिवर्जयेत् ५२
श्वपाकमिवनेक्षेतलोकेविप्रमवैष्णवम्
वैष्णवोवर्णबाह्योऽपिपुनातिभुवनत्रयम् ५३
तस्मात्तुविधिनाचक्रंधार्यंविप्रैःशुभानने
ब्राह्मणामंत्रसिद्ध्यैचज्ञानसिद्ध्यैचमुक्तये ५४
अप्राकृतामहात्मानोविष्णुचक्रेणलांच्छिताः
विष्णुचक्रविहीनास्तुब्राह्मणाः प्राकृताः स्मृताः ५५
सर्वाश्रमेषुवसतांब्राह्मणानांविशेषतः
विधिनावैष्णवंचक्रंधार्यंहिश्रुतिनोदनात् ५६
दक्षिणेतुभुजोविप्रोबिभृयाद्वैसुदर्शनम्
वामेतुशंखंबिभृयादितिब्रह्मविदोविदुः ५७
एवम्महोपनिषदिप्रोक्तंचक्रादिधारणम्
तथैवसाम्नियजुषिऋचिप्रोक्तंशुभानने ५८
प्रतेविष्णोअब्जचक्रेपवित्रेजन्माम्भोधिंतर्तवेचर्षणीन्द्राः
मूलेबाह्वोर्दधतेऽन्येपुराणालिङ्गान्येन्येतावकान्यर्पयन्ति ५९
चरणंपवित्रंविततंपुराणंवाङ्मयंशुभम्
तेनचक्रेणसन्तप्तास्तरेयुः पातकाम्बुधिम् ६०
पवित्रंब्राह्मणस्पत्यंजगद्व्याप्तंहरेस्सदा
ते नातप्ततनूर्येषांनतेयान्तिपरंपदम् ६१
तेनतप्तातनूर्येषांतेप्रयांति परंपरदम्
पवित्रचरणंनेमिर्हरेश्चक्रंसुदर्शनम् ६२
सहस्त्रारंप्राकृतघ्नंलोकद्वारंमहौजसम्
नामानिविष्णुचक्रस्यपर्यायेणनिबोधमे ६३

शुद्धेनवह्नितप्तेनब्रह्मत्वेन पुनीहिनः
यत्तेपवित्रमचिवदग्नेतेनपुनीहिनः ६४
येनदेवाः पवित्रेणआत्मानंपुनतेसदा
तेनसहस्रधारेणपावमान्यः पुनंतुमाम् ६५
प्रजापत्यंपवित्रंतुशतोद्यामंहिरणमयम्
वयंब्रह्मविदस्तेनपूतंब्रह्मपुनीमहे ६६
सनेमिचक्रमजरंचक्षुरस्यमहात्मनः
अस्मिन्हिविधृतेदेवामहोन्नतपदययौ ६७
तस्माद्वैविधिवद्धार्याः शंखचक्रादिहेतयः
ब्राह्मणानांविशेषेणवैष्णवानांविशेषतः ६८
धृतोद्धर्वपुंड्रःकृतचक्रधारीविष्णोः पदंध्यायतियोमहात्मा
स्वरेणमं त्रैणसदाहृदिस्थंपरात्परंयातिविशुद्धचेताः ६९
येकंठलग्नतुलसीनलिनाक्षमालायेबाहुमूलपरिचिह्नितशंखचक्राः
येवाललाटफलकेलसदूर्ध्वपुंड्रास्तेवैष्णवाभुवनमाशुपवित्रयंति ७०
दिवस्पतेः सुविततंपवित्रंयेतुरक्षिणः
नवहंतिभुजेसम्यक्नहिशोचंतिजन्तवः ७१
येवहंतिभुजेचक्रंसस्थिरंविधिनाद्भुतम्
परंव्योम्नितुते स्थानमधितिष्ठन्तितेजसा ७२
होमाग्निसंतप्तपवित्रलांछितामूलेतुबाह्वोः परमात्मनोहरेः
संतारयित्वा भवसागरंमहच्छुद्धंपरंयातिपरेशलोकम् ७३
अङ्कयेत्तप्तचक्राद्यैरात्मनोबाहुमूलयोः
कलत्रापत्यभृत्येषुपश्वादिषुचअङ्कयेत् ७४
इत्येवंश्रुतयस्सर्वाःकथयंतिवरानने
तथैवसेतिहासेषुपुराणेष्वपिकथ्यते ७५
द्विविधंवैष्णवंप्रौक्तंबाह्यमाभ्यंतरंतथा
शंखचक्रादिभिर्बाह्यमांतरंवीतरागता ७६
बाह्याभ्यंतरसाम्यंयत्तद्वैष्णवमुदाहृतम्
तस्माच्चक्रादिचिह्नंतुप्रथमंवैष्णवंस्मृतम् ७७
आंतरंस्मरदोषादिविमुक्तंस्वात्मदर्शनम्
सर्वभूतदयाशांतिरिंद्रियार्थेष्वलोलता ७८

पुत्रदाराद्यसंगत्वंयोगाभ्यासरतिस्तथा
अनन्यभक्तियोगेनपरेशस्याभिषेवणम् ७९
तस्माच्चक्रादिहेतीनामंकनंवैष्णवंस्मृतम्
चक्रादिचिह्नहीनत्वाद्वैष्णवत्वंनलभ्यते ८०
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वर संवादेसुदर्शनादिमाहात्म्यंनामचतुर्विंशत्यधिकद्विशततमोऽध्यायः २२४

पञ्चविंशत्यधिक द्विशततमोऽध्यायः

शंकरउवाच-
ऊर्द्ध्वपुंड्रस्यमाहात्म्यंवक्ष्यामिशुभदर्शने
धारणादेवमुच्येतभवबंधाद्द्विजोत्तमः १
ऊर्द्ध्वपुंड्रस्यमध्येतुविशालेसुमनोहरे
लक्ष्म्यासार्द्धंसमासीनोदेवदेवोजनार्दनः २
तस्माद्यस्यशरीरेतुऊर्द्ध्वपुंड्रंधृतोभवेत्
तस्येदेहंभगवतोविमलंमंदिरंशुभम् ३
सस्नातः सर्वतीर्थेषुसर्वयज्ञेषुदीक्षितः
धारयेद्वर्द्ध्वपुंड्रंयोमृदाशुभ्रेणवैष्णवः ४
ऊर्द्ध्वपुड्रंधरोविप्रःसर्वलोकेषुपूजितः
विमानवरमारुह्ययातिविष्णोःपरंपदम् ५
धारयेदूर्द्ध्वपुंड्रंतुत्रिसंध्यंतुद्विजोत्तमः
सर्वपापविशुद्ध्यर्थमिष्टापूर्तफलाप्तये ६
ऊर्द्ध्वपुड्रंधरंदृष्ट्वासर्वपापैःप्रमुच्यते
नमस्कृत्वाथवाभक्त्यासर्वदानफलंलभेत् ७
ऊर्द्ध्वपुंड्रधरंविप्रंयः श्राद्धेभोजयिष्यति
आकल्पकोटिपितरस्तस्यतृप्तानसंशयः ८
ऊर्द्ध्वपुंड्रंधरोयस्तुकुर्याछ्रांद्धंशुभानने
कल्पकोटिसहस्त्राणिगयाश्राद्धफलंलभेत् ९
यज्ञदानतपश्चर्याजपहोमादिकंचयत्
ऊर्द्ध्वपुंड्रधरः कुर्यात्तस्यपुण्यमनंतकम् १०
ऊर्द्ध्वपुंड्रविहीनस्तुकिंचित्कर्मकरोतियः

इष्टापूर्तादिकंसर्वनिष्फलंस्यान्नसंशयः ११
यच्छरीरंमनुष्याणामूर्द्ध्वपुंड्रंविवर्जितम्
द्रष्टव्यं नैवतत्किंचित्श्मशानसदृशंभवेत् १२
ऊर्द्ध्वपुंड्रंविहीनस्तुसन्ध्याकर्मादिकंचरेत्
तत्सर्वंराक्षसैर्नीतंनरकंचावगच्छति १३
ऊर्द्ध्वपुड्रधरोद्विप्रोमृदाशुभ्रेणवैदिकः
नतिर्यग्धारयेद्विद्वानापद्यपिकदाचन १४
विप्राणामूर्द्ध्वपुंड्रंस्यात्तिलकंतुमहीभृतः
पट्टाकारंतुवैश्यानांशूद्राणांवैत्रिपुंड्रकम् १५
ऊर्द्ध्वपुंड्रंमृदाकार्यंकस्तूर्य्यास्तिलकंतथा
पट्टाकारंतुगंधेनभस्मनैवत्रिपुंड्रकम् १६
ऊर्द्ध्वपुंड्रंतुसर्वेषांननिषिद्धंकदाचन
धारयेत्क्षत्रियाद्योऽपिविष्णुभक्तोभवेद्यदि १७
विप्राणां नैवकार्य्यस्यात्तिर्य्यक्पट्टादिधारणम्
नारायणात्परेशानादन्येषामर्चनंनतु १८
ब्राह्मणःकुलजोविद्वान्भस्मधारीभवेद्यदि
वर्जयेत्तादृशंदेविमद्योच्छिष्टंघटंयथा १९
त्रिपुंड्रंशूद्रकल्पानांशूद्राणांचविधिस्तथा
त्रिपुंड्रधारणाद्विप्रःपतितः स्यान्नसंशयः २०
एकांतिनोमहाभागाः सर्वभूतहितेरताः
सांतरालंप्रकुर्वीरन्पुंड्रंहरिपदाकृतिम् २१
हरेःपादाकृतिंकुर्यादूर्द्ध्वपुंड्रंविधानतः
मध्यछिद्रेणसंयुक्तंतद्धिवैमंदिरंहरेः २२
ऊर्द्ध्वपुड्रमृजुंसौम्यंसुपार्श्वंसुमनोहरम्
दंडाकारंसुशोभाढ्यंमध्येछिद्रंप्रकल्पयेत् २३
तस्माच्छिद्रान्वितंपुंड्रंदण्डाकारंसुशोभनम्
विप्राणांसततंकार्यंस्त्रीणांचशुभदर्शने २४
ऊर्ध्वपुण्ड्रस्यमध्येतुविशालेसुमनोहरे
सान्तरालेसमासीनोहरिरस्तिश्रियासह २५
निरन्तरालंयः कुर्यादूर्द्ध्वपुंड्रंद्विजाधमः

सहितत्रस्थितंविष्णुंश्रियंचैवव्यपोहति २६
अच्छिद्रमूर्द्धवपुंड्रंतुयेकुर्वंतिद्विजाधमाः
तेषांललाटेसततंशुनः पादोनसंशयः २७
तस्माच्छिद्रान्वितंपुंड्रंसहरिद्रंशुभान्वितम्
धारयेद्ब्राह्मणोनित्यंहरिसालोक्यसिद्धये २८
आदायपरयाभक्त्यावेङ्कटाद्रौहृदेमृदम्
धारयेदूर्ध्वपुण्ड्राणिहरिसायुज्यसिद्धये २९
श्रीकृष्णतुलसीमूलेमृदमादायभक्तिमान्
धारयेदूर्द्धवपुंड्राणिहरिस्तत्रप्रसीदति ३०
द्वारवत्यांशुभेरम्येवासुदेवहृदेतथा
तत्रोद्भवांमृदंरम्यामादायद्विजसत्तमः ३१
धारयेदूर्द्धवपुंड्राणिसर्वकामफलाप्तये
आदायपरयाभक्त्यागंगातीरोद्भवांमृदम् ३२
तथाधृतोर्द्धवपुंड्राणिसर्वयज्ञफलोलभेत्
चंदनंचहरिद्राचतथाभस्माग्निहोत्रजम् ३३
सर्ववश्यकरंप्रोक्तमूर्द्धवपुंड्रस्यधारणात्
यत्रपुण्यंहरिक्षेत्रंतत्रवैमृदमाहरेत् ३४
पर्वताग्रेनदीतीरेबिल्वमूलेजलाशये
सिंधुतीरेचवल्मीकेहरिक्षेत्रेविशेषतः ३५
विष्णोःस्नानोदकंयत्रप्रवाहयतिनित्यशः
पुंड्राणांधारणार्थायगृह्णीयात्तत्रमृत्तिकाम् ३६
श्रीरङ्गेवेङ्कटाद्रौचश्रीकूर्मेद्वारकेशुभे
प्रयागेनारसिंहाद्रौवाराहेतुलसीवने ३७
गृहीत्वामृत्तिकांभक्त्याविष्णुपादजलैःसह
धृत्वापुंड्राणिचांगेषुविष्णुसायुज्यमाप्नुयात् ३८
यस्मिन्कस्मिन्महाभागावैष्णवाधारयंतिवै
तस्मिन्वैमृत्तिकाग्राह्याऊर्द्धवपुंड्रस्यधारणे ३९
श्यामंशांतिकरंप्रोक्तंरक्तंवश्यकरंतथा
श्रीकरंपीतमित्याहुःश्वेतंमोक्षकरंशुभम् ४०
वर्तुलंतिर्यगछिद्रंह्रस्वंदीर्घंततंतनुम्

वक्रंविरूपंबद्धाग्रंछिन्नमूलंपदच्युतम् ४१
अशुभंरूक्षमासक्तंतथानंगुलिकल्पितम्
विगंधमवसह्यंचपुंड्रमाहुरनर्थकम् ४२
आरभ्यनासिकामूलंललाटंतंलिखेन्मृदा
समारभ्यभ्रुवोर्मध्यमंतरालंप्रकल्पयेत् ४३
अंतरालंद्व्यंगुलंस्यात्पार्श्वावंगुलिमात्रकौ
मृदाशुभ्रेणविलिखेतपुराड्रंऋजुतरंशुभम् ४४
ललाटेकेशवंध्यायेन्नारायणमथोदरे
वक्षस्थलेमाधवंचगोविंदंकंठकूवरे ४५
विष्णुंचदक्षिणेकुक्षौबाहौचमधुसूदनम्
त्रिविक्रमंकंधरेतुवामनंवामपार्श्वके ४६
श्रीधरंबाहुकेवामेहृषीकेशंतुकंधरे
पृष्ठेवैपद्मनाभंतुत्रिकेदामोदरंन्यसेत् ४७
तत्प्रक्षालनतोयेनवासुदेवंतुमूर्द्धनि
ललाटेभुजयुग्मेतुपृष्ठयोः कंठकूबरे ४८
धारयेदूर्द्ध्वपुंड्रंतुचतुरंगुलमात्रतः
कुक्षौतत्पार्श्वयोः प्रोक्तमायतंतुदशांगुलम् ४९
बाह्वोर्वक्षस्थलेपुंड्रमष्टांगुलमुदाहृतम्
एवंद्वादशपुंड्राणिब्राह्मणःसततंधरेत् ५०
तत्तत्पुराड्राणितन्मूर्तीर्ध्यात्वामंत्रेणधारयेत्
अंतरालेषुसर्वेषुहरिद्रांधारयेच्छ्रियाम् ५१
चत्वारिभूभृतामाहुः पुंड्राणिद्वेविशांस्मृते
एकपुंड्रंतुनारीणांशूद्राणांचविधीयते ५२
ललाटेहृदिबाह्वोश्चचतुःपुंड्राणिधारयेत्
ललाटेहृदयेद्वेतुफालेत्वेकंविधीयते ५३
ऊर्द्ध्वपुंड्रंललाटेतुसर्वेषांप्रथमंस्मृतम्
ललाटादिक्रमेणैवधारणंतुविधीयते ५४
मूर्तीस्तुवासुदेवाद्याश्चतुःपुंड्रेषुधारयेत्
द्वयोर्गोविंदकृष्णौतुएकंनारायणंधरेत् ५५
एवंपुंड्रविधिः प्रोक्तः सर्वेषांगिरिजेमया

अश्वत्थपत्रसंकाशोवेणुपत्राकृतिस्तथा ५६
पद्मकुड्मलसंकाशोमोहनंत्रितयंस्मृतम्
महाभागवतःशुद्धःपुंड्रंहरिपदाकृतिम् ५७
दंडाकारंतुवादेविधारयेदूर्द्ध्वपुंड्रकम्
सुदर्शनेनांकितबाहुमूलास्तथोर्द्ध्वपुंड्रांकितसर्वगात्राः ५८
मालारविंदाक्षधराविशुद्धारक्षंतिलोकान्दुरितौघसंगात् ५९
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वरसंवादेऊर्द्ध्वपुंड्रमाहात्म्यंनामपंचविंशत्यधिकद्विशततमोऽध्यायः २२५

षड्विंशत्यधिकद्विशततमोऽध्यायः

शंकर उवाच -
न्यासेवाप्यर्चनेवापिमंत्रमेकांतिनः श्रयेत्
अवैष्णवोपदिष्टेनमंत्रेणनपरागतिः १
अवैष्णवोपदिष्टंचेत्पूर्वमंत्रवरंद्वयम्
पुनश्चविधिनासम्यक्वैष्णवाद्ग्राहयेद्गुरोः २
सहस्रशाखाध्यायीवासर्वयज्ञेषुदीक्षितः
कुलेमहतिजातोऽपिनगुरुःस्यादवैष्णवः ३
यस्तुमंत्रद्वयंसम्यगध्यापयतिवैष्णवः
सआचार्यस्तुविज्ञेयोभवबंधविदारकः ४
आचार्यंसंश्रयित्वाथवत्सरंसेवयेद्विजः
तस्यवृत्तिपरिज्ञात्वामंत्रमध्यापयेद्गुरुः ५
कृत्वातापादिसंस्कारान्पश्चान्मंत्रमुदीरयेत्
तापंपुंड्रंतथानामकृत्वावैविधिनागुरुः ६
पश्चादध्यापयेन्मंत्रंशिष्यंनिर्मलचेतसम्
चक्रेणविधिनातप्तंतापइत्यभिधीयते ७
पुंड्रमूर्द्ध्वंतथाप्रोक्तंनामवैष्णवमुच्यते
ततोमंत्रंविधानेनशिष्यमध्यापयेद्गुरुः ८
न्यासमष्टाक्षरंमंत्रमन्यंवावैष्णवंमनुम्
न्यासमेवात्रपरमंवैष्णवानांशुभानने ९
तस्मात्तुन्यासमेवैषामतिरिक्तमिहोच्यते

न्यासविद्यापरोयस्तुब्राह्मणः श्रेष्ठउच्यते १०
न्यासात्परतरंनास्तिमन्त्रंसत्यंब्रवीमिते
न्यासंद्वयंप्रपत्तिःस्यात्पर्यायेणनिबोधमे ११
द्वयोपदेशपूर्वंतुसर्वकर्मसमाचरेत्
द्वयाधिकारीनभवेत्सर्वकर्मसुनार्हति १२
तस्माद्वयमधीत्येवपश्चान्मंत्रमनुत्तमम्
श्रीमदष्टाक्षरंसम्यगभ्यसेद्द्विजसत्तमः १३
मंत्रमष्टाक्षरंप्रोक्तंप्रणवस्यैवसंग्रहात्
नैसर्गप्रणवाद्यन्तुमंत्रेमित्युच्यतेबुधैः १४
नान्यत्रसर्वमत्रेषुप्रणवस्वस्वभावतः
पूर्वंतुसर्वमंत्राणांयोजयेत्प्रणवंशुभम् १५
ॐकारः प्रणवंब्रह्मसर्वमंत्रेषुनायकः
आदौसर्वत्रयुंजीतमंत्राणांतुशुभानने १६
स्वभावात्प्रणवन्तस्मिन्मूलमंत्रेप्रतिष्ठितम्
ओमित्येकाक्षरंपूर्वंद्व्यक्षरंनमइत्यथ १७
ततोनारायणायेतिपंचार्णानियथाक्रमम्
एवमष्टाक्षरोमंत्रोज्ञेयः सर्वार्थसाधकः १८
सर्वदुःखहरः श्रीमान्सर्वमंत्रात्मकः शुभः
ऋषिर्नारायणस्तस्यदेवताश्रीशएवच १९
छंदस्तुदेवीगायत्रीप्रणवोवीजमुच्यते
नित्यानपायिनीदेवीशक्तिः श्रीरुच्यतेमनोः २०
प्रथमंपदमोङ्कारद्वितीयंनमउच्यते
तृतीयंनारायणायेतिपदत्रयमुदाहृतम् २१
अकारश्चाप्युकारश्चमकारश्चततः परम्
वेदत्रयात्मकंप्रोक्तंप्रणवंब्रह्मणःपदम् २२
अकारेणोच्यतेविष्णुः श्रीरुकारेणचोच्यते
मकारस्त्वनयोर्दासः पंचविंशःप्रकीर्तितः २३
वासुदेवस्वरूपंतदकारेणोच्यतैबुधैः
उकारेणश्रियोदेव्यारूपंमुनिभिरुच्यते २४
मकारेणोच्यतेजीवः पंचविंशोदितः पुमान्

भूतानिचकवर्गेणचवर्गेणेन्द्रियाणिच २५
टबर्गेणतवर्गेणज्ञानंधादयस्तथा
मनः पकारेणैवोक्तंफकारेणत्वहंकृतिः २६
बकारेणभकारेणमहान्प्रकृतिरुच्यते
आत्मातुसमकारः स्यात्पंचविंशःप्रकीर्तितः २७
देहेंद्रियमनः प्राणादिभ्योन्योऽनन्यसाधनः
भगवच्छेषभूतोऽसौमकाराख्यःसचेतनः २८
अवधारणवाच्येवमुकारः कैश्चिदुच्यते
श्रीतत्वमपितत्पक्षेवकारेणैवचोच्यते २९
भास्करस्यप्रभायद्वत्तस्यनित्यानपायिनी
आकारेणोच्यतेविष्णुः कल्याणगुणसागरः ३०
श्रीशःसर्वात्मनांशेषोजगद्बीजंपरः पुमान्
जगत्कर्त्ताजगद्भर्त्ताईश्वरोलोकबांधवः ३१
जगतामीश्वरीनित्याविष्णोरनपगामिनी
मातासर्वस्यजगतः पत्नीविष्णोर्मनोरमा ३२
जगदाधारभूताश्रीरुकारेणात्रचोच्यते
मकारेणतयोर्दासः क्षेत्रज्ञः प्रोच्यतेबुधैः ३३
ज्ञानाश्रमोज्ञानगुणश्चेतनः प्रकृतेःपरः
नजडोनिर्विकारश्चएकरूपस्वरूपभाक् ३४
अणुर्नित्योव्याप्तिशीलश्चिदानंदात्मकस्तथा
अहमर्थोऽव्ययः क्षेत्रीभिन्नरूपं सनातनः ३५
अदाह्योच्छेद्योह्यक्लेद्यस्त्वशोष्योक्षरएवच
एवमादिगुणोपेतश्शेषभूतः परस्यवै ३६
मकारेणोच्यतेजीवः क्षेत्रज्ञः परवान्सदा
दासभूतोहरेरेवनान्यस्यतुकदाचन ३७
एवंदासत्वमेवास्यमध्यमेवावधार्यते
इत्येवंप्रणवस्यार्थोज्ञातव्योक्तोमयानघे ३८
विवृतिः प्रणवस्यार्थमन्त्रशेषेणवैशुभे
परस्यदासभूतस्यस्वातन्त्र्यंनेहविद्यते ३९
तस्मान्महदहंकारौमनसाविनिवर्त्तयेत्

स्वोपायबुद्ध्यायत्कृत्यंतदपिप्रतिषिध्यते ४०
अहंकृतिर्मकारः स्यान्नकारस्तन्निषेधकः
तस्मात्तुमनसैवास्यअहंकारविमोचनम् ४१
मनसासर्वसिद्धिः स्यादन्यथानाशमाप्नुयात्
नमसासहितंकिंचित्तदहंकारउच्यते ४२
अहंकारेणयुक्तस्यसुखंकिंचिन्नविद्यते
अहंकारविमूढात्माअंधेतमसिमज्जति ४३
तस्मान्नमनसाचात्रस्वातंत्र्यंप्रतिषिध्यते
भगवत्परतंत्रोऽसौतदायत्तश्चजीवति ४४
तस्मात्साधनकर्तृत्वंचेतनस्यनविद्यते
ईश्वरस्यैवसंकल्पाद्वर्त्ततेस्वचराचरम् ४५
तस्मात्स्वसामर्थ्यविधिंत्यजेत्सर्वमशेषतः
ईश्वरस्यतुसामर्थ्यान्नालभ्यंतस्यविद्यते ४६
तस्मिन्यस्तभरः श्रीशेतत्कर्मैवसमाचरेत्
परमात्माहरिस्स्वामीस्वमहंतस्यसर्वदा ४७
इच्छायाविनियोक्तव्यस्तस्यैवात्मेश्वरस्यहि
इत्येवंमनसात्यक्तमहंताममतोर्जितम् ४८
देहेष्वहंमतिर्मूलंसंसृतौकर्मबंधने
तस्मान्महदहंकारौमनसावर्जयेद्बुधः ४९
अथनारायणपदंवक्ष्यामिगिरजेशुभे
नाराइत्यात्मनांसंघास्तेषांगतिरसौपुमान् ५०
तएवचायनंतस्यतस्मान्नारायणः स्मृतः
सर्वंहिचिदचिद्वस्तुश्रूयतेदृश्यतेजगत् ५१
योऽसौव्याप्यस्थितो नित्यंसवैनारायणः स्मृतः
नाराश्चेतिसर्वपुंसांसमूहाः परिकीर्तिताः ५२
गतिरालंबनं तेषांतस्मान्नारयणः स्मृतः
नराज्जातानितत्वानिनाराणीतिविदुर्बुधाः ५३
तान्येवचायनंतस्यतेननारायणस्स्मृतः
कल्पांतेपिजगत्कृत्स्नंग्रसित्वायेनधार्यते ५४
पुनः संसृज्यतेयेनसवैनारायणः स्मृतः

चराचरंजगत्कृत्स्नंनारइत्यभि धीयते ५५
तस्यवासंगतिर्येनतेननारायणः स्मृतः
नारोनराणांसंघातस्तस्यासावयनंगतिः ५६
तेनासौमुनिभिर्नित्यंनारायणइतीरितः
प्रभवन्तियतोलोकामहाब्धौपृथुफेनवत् ५७
पुनर्यस्मात्प्रलीयन्तेतस्मान्नारायणः स्मृतः
योवैनित्यपदेनित्योनित्यमुक्तैकभोगवान् ५८
ईशः सर्वस्यजगतः सवैनारायणः स्मृतः
नारायणः परंब्रह्मतत्वंनारायणः परम् ५९
यच्चकिंचिज्जगत्यस्मिन्दृश्यतेश्रूयतेऽपिवा
अंतर्बहिश्चतत्सर्वंव्याप्य नारायणःस्थितः ६०
अपहतपाप्मापुरुषः सर्वभूतांतरस्थितः
दिव्यएकस्सदानित्योहरिर्नारायणोऽच्युतः ६१
यस्तुद्रष्टाचद्रष्टव्यंश्रोताश्रोतव्यमेवच
स्प्रष्टाचस्पर्शितव्यश्चध्याताध्यातव्यमेवच ६२
वक्ताचवाच्यंज्ञाताचज्ञातव्यंचिदचिज्जगत्
तच्चसर्वंहरिःश्रीशोनारायणउदाहृतः ६३
सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात्
सलोकान्सर्वतोव्याप्यअत्यतिष्ठद्दशांगुलम् ६४
यद्भूतंयच्चभव्यंतत्सर्वंनारायणोहरिः
उतामृतत्वस्येशानोयदन्नेनविराट्पुमान् ६५
सएवपुरुषोविष्णुर्वासुदेवोऽच्युतोहरिः
हिरण्मयोऽथभगवान्सोऽमृतः शाश्वतः शिवः ६६
पतिर्विश्वस्यजगतः सर्वलोकेश्वरंप्रभुः
हिरण्यगर्भाःसविताअनंतोऽसौमहेश्वरः ६७
भगवानितिशब्दोऽयतथापुरुषइत्यपि
वर्त्ततेनिरुपाधिश्चवासुदेवोऽखिलात्मनि ६८
ईश्वरोभगवान्विष्णुःपरमात्माजगत्सुहृत्
शास्ताचराचरस्यैकोयतीनांपरमागतिः ६९
योवेदादौस्वरःप्रोक्तोवेदांतेचप्रतिष्ठितः

तस्यप्रकृतिलीनस्ययः परः समहेश्वरः ७०
योसावकारोवैविष्णुर्योऽसौनारायणोहरिः
सएवपुरुषोनित्यःपरमात्मामहेश्वरः ७१
यस्मादुद्भूतमैश्वर्यंयस्मिन्कस्मिंश्चवर्तते
तस्मिन्नीश्वरशब्दोऽपिप्रोच्यते मुनिभिस्तथा
निरुपाधीश्वरत्वंहिवासुंदेवेप्रतिष्ठितम् ७२
आत्मेश्वरइति प्रोक्तोवेदवादैःसनातनैः
तस्मान्महेश्वरत्वंतुवासुदेवेप्रतिष्ठितम् ७३
असौत्रिपाद्विभूतेस्तुलीलयाअपिचेश्वरः
विभूतिद्वयमैश्वर्यंतस्यैवसकलात्मनः ७४
श्रीभूनीलापतिर्योसावीश्वरस्सउदाहृतः
तस्मात्सर्वेश्वरत्वंतुवासुदेवेप्रतिष्ठितम् ७५
असौयज्ञेश्वरोयज्ञोयज्ञभुक्यज्ञकृद्विभुः
यज्ञभुग्यज्ञपुरुषःसएवपरमेश्वरः ७६
यज्ञेश्वरोहव्यसमस्तकव्यभोक्ताव्ययात्माहरिरीश्वरोऽत्र
तत्संनिधानादपयांतिसद्योरक्षांस्यशेषाण्यसुराश्चसर्वे ७७
योऽसौविराट्त्वमापन्नोहरिर्भूतोजनार्दनः
संतर्पयतिलोकांस्त्रीन्सएवपरमेश्वरः ७८
येनपूर्णेनहविषादेवायज्ञमतन्वत
तस्माद्यज्ञात्समुत्पन्नायेकेचोभयादतः ७९
तस्माद्यज्ञात्सर्वहुतऋचः सामानिजज्ञिरे
तस्मादश्वाअजायंतगावश्चपुरुषादयः ८०
पुरुषस्यतनोरस्यसर्वयज्ञमयस्यवै
हरेःसर्वंसमुद्भूतंजगत्स्थावरजंगमम् ८१
मुखबाहूरुपादाः स्युस्तस्यवर्णायथाक्रमम्
पद्भ्यांतुपृथिवीतस्यशिरसाद्यौरजायत ८२
मनसश्चंद्रमाजातश्चक्षुषश्चप्रभाकरः
मुखादग्निः सहस्राक्षोवायुः प्राणात्सदागतिः ८३
नाभेर्विरिंचिर्गगनंजगत्सर्वंचराचरम्
यस्मात्सर्वंसमुद्भूतंजगद्विष्णोः सनातनात् ८४

तस्मात्सर्वमयोविष्णुर्नारायणइतीरितः
एवंसृष्ट्वाजगत्सर्वंपुनः संग्रसतेहरिः ८५
निजलीलासमुद्भूतंतान्तवंचोर्णनाभिवत्
ब्रह्माणमिंद्रंरुद्रंचयमंवरुणमेवच ८६
निगृह्यहरतेयस्मात्तस्माद्धरिरिहोच्यते
असावेकार्णवीभूतेमायावटतलेपुमान् ८७
जगत्स्वजठरेकृत्वाशेतेतस्मिन्सनातनः
आसीदेकोहिबैचात्रविष्णुर्नारायणोऽच्युतः ८८
नब्रह्मानचरुद्रश्चनदेवानमहर्षयः
नेमेद्यावापृथिव्यौचनसोमोनचभास्करः ८९
ननक्षत्राणिलोकाश्चनचांडंमहदावृतम्
यस्माज्जगद्भूतंतेनसकलंहरिणाशुभे ९०
सृष्टंपुनस्तथासर्गेतस्मान्नारायणस्स्मृतः
तस्यदास्यंचतुर्थ्यानुमंत्रेप्रोक्तंतुपार्वति ९१
दासभूतमिदंतस्यब्रह्माद्यंसकलंजगत्
एवमर्थंविदित्वावैपश्चान्मंत्रंप्रयोजयेत् ९२
अविदित्वा तुमन्त्रार्थंसिद्धिंनैवाधिगच्छति
नतुभुक्तिंचभक्तिंचनचमुक्तिंवरानने ९३
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वर संवादेमंत्रार्थोपदेशोनामषड्विंशत्यधिकद्विशततमोऽध्यायः २२६

सप्तविंशत्यधिकद्विशततमोऽध्यायः

पार्वत्युवाच-
विस्तरेणमयाचक्ष्वमंत्रार्थपदगौरवम्
ईश्वरस्यस्वरूपंचतद्विभूतिगुणांस्तथा १
तद्विष्णोःपरमंधामव्यूहभेदांस्तथाहरेः
सर्वमाख्याहितत्त्वेनममसर्वसुरेश्वर २
ईश्वरउवाच-
शृणुदेविप्रवक्ष्यामिस्वरूपंपरमात्मनः
विभूतिगुणसंघातंतदवस्थात्मकंहरेः ३

यःपरःपुरुषोविष्णुर्नारायणउदाहृतः
सईश्वरश्च जगतांपरमात्मासनातनः ४
विश्वतःपाणिपादश्चचक्षुष्मान्विश्वतःप्रभुः
विश्वानिभुवनान्यस्मिन्धामानिपरमाणिवै ५
धारयन्सोऽप्यत्यतिष्ठेन्मनांसिचमनीषिणाम्
एवंबहुस्वरूपःसञ्छ्रीपतिः पुरुषोत्तमः
ईश्वर्य्यासहभोगार्थंदिव्यमंगलरूपवान् ६
बृहच्छरीरोऽग्निसमानरूपोयुवाकुमारत्व मुपेयिवान्हरिः
रेमेश्रियासौजगतांजनन्यास्वज्योत्स्नयाचंद्रइवामृतांशुः ७
अयंचजगदीश्वर्य्याकुमारोनित्ययौवनः
कंदर्प्पकोटिलावरायः सतस्थेपरमेपदे ८
भोगार्थंपरमंव्योमलीलार्थमखिलंजगत्
भोगेनक्रीडयाविष्णोर्विभूतिद्वयसंस्थितिः ९
भोगेनित्यस्थितिस्तस्यलीलांसंहरतेकदा
भोगोलीलाउभौस्तस्यधार्य्येतेशक्तिमत्तया १०
त्रिपाद्व्याप्तिः परेधाम्निपादोस्येहाभवत्पुनः
त्रिपाद्विभूतिर्नित्यास्यादनित्यंपादमैश्वरम् ११
नित्यंतद्रूपमीशस्यपरेधाम्निस्थितंशुभम्
अच्युतंशाश्वतंदिव्यंसदायौवनमाश्रितम् १२
नित्यंसंभोगमीश्वर्याश्रियाभूम्याचसंवृतम्
नित्यैवेषाजगन्माताविष्णोःश्रीरनपायिनी १३
यथासर्वगतोविष्णुस्तथालक्ष्मीश्शुभानने
ईशानासर्वजगतोविष्णुपत्नीसदा शिवा १४
सर्वतः पाणिपादांतासर्वतोऽक्षिशिरोमुखी
नारायणीजगन्मातासमस्तजगदाश्रया १५
यदपाङ्गाश्रितंसर्वंजगत्स्थावरजङ्गमम्
जगत्स्थितिलयौयस्याउन्मीलननिमीलनात् १६
सर्वस्याद्यामहालक्ष्मीस्त्रिगुणापरमेश्वरी
लक्ष्यालक्ष्यस्वरूपासाव्याप्यकृत्स्नंव्यवस्थिता १७
शून्यंतदखिलंविश्वंविलोक्यपरमेश्वरी

शून्यंतदखिलंस्वेनपूरयामासतेजसा १८
सालक्ष्मीर्धरणीचैवनीलादेवीतिविश्रुता
आधारभूता जगतः पृथिवीरूपमाश्रिता १९
तोयादिरसरूपेणसैवनीलावपुर्भवेत्
लक्ष्मीरूपत्वमापन्नाधनवाग्रूपिणीहिसा २०
एवंदेवीस्वरूपासाजगतः श्रीःश्रीताहरिम्
समस्तविद्याभेदास्युर्लक्ष्मीरूपावरानने २१
श्रीरूपमखिलंसर्वंतस्याहिवपुरुच्यते
सौंदर्यंशीलवृत्तंचसौभाग्यंस्त्रीषुसंस्थितम्
तस्यारूपंचगिरिजेसर्वासांमूर्ध्नियोषिताम् २२
यस्याःकटाक्षायतमोग्रदृष्ट्याब्रह्माशिवस्स्वर्गपतिर्महेंद्रः
चंद्रश्चसूर्योधनदोपमोग्निः प्रभूतमैश्वर्यमवाप्नुवंति २३
लक्ष्मीःश्रीःकमलाविद्यामाताविष्णुप्रियासती
पद्मालयापद्महस्तापद्माक्षीलोकसुंदरी २४
भुतानामीश्वरीनित्यासह्यासर्वगताशुभा
विष्णुपत्नीमहादेवीक्षीरोदतनयारमा २५
अनंतालोकमाताभूर्नीलासर्वसुखप्रदा
रुक्मिणीचतथासीतासर्ववेदवतीशुभा २६
सतीसरस्वतीगौरीशांतिः स्वाहास्वधारतिः
नारायणीवरारोहाविष्णोर्नित्यानपायिनी २७
एतानिपुण्यनामानिप्रातरुत्थाययः पठेत्
समहाश्रियमाप्नोतिधनधान्यमकल्मषम् २८
हिरण्यवर्णांहरिणींसुवर्णरजतः स्रजाम्
चंद्रांहिरण्मयींलक्ष्मींविष्णोरनपगामिनीम् २९
गन्धद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम्
ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् ३०
एवंऋक्संहितायांतुस्तूयमानामहेश्वरी
सर्वैश्वर्यसुखंप्रादाच्छिवादीनांदिवौकसाम् ३१
अस्येशानाहिजगतोविष्णुपत्नीसनातनी
यदपाङ्गाश्रितंसर्वंजगत्स्थावरजंगमम् ३२

यस्यवक्षसिसादेवीप्रभाम्नाविवतिष्ठति
सवैसर्वेश्वरः साक्षादक्षरः पुरुषोऽव्ययः ३३
सवैनारायणः श्रीमान्वात्सल्यगुणसागरः
स्वामीसुशीलःसुभगःसर्वज्ञः सर्वशक्तिमान् ३४
नित्यंसंपूर्णकामश्चनैसर्गिकसुहृत्सखा
कृपापीयूषजलधिःशरणंसर्वदेहिनाम् ३५
स्वर्गापवर्गसुखदोभक्तानांकरुणाकरः
श्रीमतेविष्णवेतस्मैदास्यंसर्वंकरोम्यहम् ३६
देशकालाद्यवस्थातुसर्वासुकमलापतेः
इतिस्वरूपंसंसिद्धंसुखंदास्यमवाप्नुयात् ३७
एवंविदित्वामंत्रार्थंतद्भक्तिंसम्यगाचरेत्
दासभूतमिदंतस्यजगत्स्थावरजंगमम् ३८
श्रीमन्नारायणःस्वामीजगतांप्रभुरीश्वरः
मातापितासुतोबंधुर्निवासः शरणंगतिः ३९
कल्याणगुणवान्श्रीशःसर्वकामफलप्रदः
योऽसौनिर्गुणइत्युक्तःशास्त्रेषुजगदीश्वरः ४०
प्राकृतैर्हेयसंयुक्तैर्गुणैर्हीनत्वमुच्यते
यत्रमिथ्याप्रपञ्चत्वंवाक्यैर्वेदांतगोचरैः ४१
दृश्यमानमिदंसर्वमनित्यमितिचोच्यते
अत्रापिप्राकृतंरूपमण्डस्यैवविनाशनम् ४२
प्राकृतानांहिरूपाणामनित्यत्वंतथोच्यते
इममर्थंमहादेविप्रकृतेरुद्भवंहरेः ४३
कीडार्थंदेवदेवस्यविष्णोर्लीलाधिकारिणः
लोकैश्चतुर्भिर्दशभिः सागरैर्द्वीपसंयुतैः ४४
भूतैश्चतुर्विधैश्चापिभूधरैश्चमहोच्छ्रयैः
परिपूर्णमिदंरम्यमंडंप्रकृतिसंभवम् ४५
दशोत्तरगुणोपेतंसप्तावरणसंवृतम्
कलाकाष्ठादिरूपेणयः कालं परिवर्तते ४६
कालेनैवजगत्सर्गस्थितिसंहरणंभवेत्
चतुर्युगसहस्त्रंवैब्रह्मणोदिवसोभवेत् ४७

तावंतिरात्रिवर्षाणिब्रह्मणोऽव्यक्तजन्मनः
क्षयेतुब्रह्मणः प्राप्तेसर्वसंहारकोभवेत् ४८
अंडमंडगतालोकादह्यंतेकालवह्निना
सर्वात्मानस्तथाविष्णोः प्रकृतौविनिवेशिताः ४९
अंडावरणभूतानिप्रकृतौलयमाप्नुयुः
सासर्वजगदाधाराप्रकृतिर्हरिसंश्रिता ५०
तयाजगत्सर्गलयौकरोतिभगवान्सदा
क्रीडार्थंदेवदेवेनसृष्टामायाजगन्मयी ५१
अविद्याप्रकृतिर्मायागुणत्रयमयीसदा
सर्गस्थितिलयानांसाहेतुभूतासनातनी ५२
योगनिद्रामहामायाप्रकृतिस्त्रिगुणान्विता
अव्यक्ताचप्रधानंचविष्णोर्लीलाविकारिणः ५३
जगत्सर्गलयौस्यातांप्रकृतेरेवसर्वदा
असंख्यप्रकृतेःस्थानंनिबिडध्वान्तमव्ययम् ५४
ऊर्ध्वंतुसीम्निविरजानिस्सीमाधस्सनातनी
तयावृतंजगत्सर्वंस्थूलसूक्ष्माद्यवस्थया ५५
विकाससंकोचावस्थेतस्यांसर्गलयौस्मृतौ
एवंसर्वाणिभूतानिप्रकृत्यंतर्गतानिवै ५६
ततः शून्यमिदंसर्वंप्रकृत्यंतर्गतंमहत्
एवंप्रकृतिरूपायाविभूतेरूपमुत्तमम् ५७
त्रिपाद्विभूतिरूपंतुशृणुभूधरनंदिनि
प्रधानपरमव्योम्नोरंतरेविरजानदी ५८
वेदांगस्वेदजनिततोयैः प्रस्राविताशुभा
तस्याः पारेपरेव्योम्नित्रिपाद्भूतिस्सनातनी ५९
अमृतंशाश्वतंनित्यमनन्तंपरमंपदम्
शुद्धंसत्वमयंदिव्यमक्षरंब्रह्मणः पदम् ६०
अनेककोटिसूर्याग्नितुल्यवर्चसमव्ययम्
सर्ववेदमयंशुद्धंसर्गप्रलयवर्जितम् ६१
असंख्यमजरंनित्यंजाग्रत्स्वप्नादिवर्जितम्
हिरण्मयंमोक्षपदं ब्रह्मानंदसुखावहम् ६२

समानाधिक्यरहितमाद्यंतरहितंशुभम्
तेजसात्यद्भुतंरम्यंनित्यमानंदसागरम् ६३
एवमादिगुणोपेतंतद्विष्णोः परमंपदम्
नतद्भासयतेसूर्योनशशांकोनपावकः ६४
यद्गत्वाननिवर्तंतेतद्धामपरमंहरेः
तद्विष्णोः परमंधामशाश्वतंनित्यमच्युतम्
नहिवर्णयितुंशक्यं कल्पकोटिशतैरपि ६५
हरेःपदंवर्णयितुंनशक्यंमयाचधात्राचमुनींद्रसङ्घैः
यस्मिन्पदेह्यच्युतईश्वरोयःसोअङ्गवेदयदिवानवेद ६६
यदक्षरंवेदगुह्यंयस्मिन्देवाअधिविश्वेनिषेदुः
यस्तन्नोवेदकिमृचाकरिष्यतियेतद्विदुस्तइमेसमासते ६७
तद्विष्णोः परमंधामसदापश्यंतिसूरयः
अक्षरंशाश्वतंदिव्यंदेवि चक्षुरिवाततम् ६८
तत्प्रवेष्टुमशक्यंचब्रह्मरुद्रादिदैवतैः
ज्ञानेनशास्त्रमार्गेणवीक्ष्यतेयोगिपुंगवैः ६९
अहंब्रह्माचदेवाश्चनजानंतिमहर्षयः
सर्वोपनिषदामर्थंदृष्ट्वावक्ष्यामिसुव्रते ७०
विष्णोःपदेहिपरमेपदेतत्सशुभाह्वयेः
यत्रगावोभूरि शृगाअासतेसुसुखाः प्रजाः ७१
अत्राहतत्परंधामगोपवेषस्यशार्ङ्गिणः
तद्भातिपरमंधामगोभिर्गोपैस्सुखाह्वयैः ७२
आदित्यवर्णंतमसः परस्ताज्ज्योतिरच्युतम्
आधारोब्रह्मणोलोकश्शुद्धसत्त्वस्सनातनः ७३
सामान्याविभितेभूमिन्तेऽस्मिन्शाश्वतेपदे
तस्थतुर्जागरूकेस्मिन्युवानौश्रीसनातनौ ७४
यतः स्वसारौयुवतीभूनीलेविष्णुवल्लभे
अत्रपूर्वेयेचसाध्याविश्वेदेवास्सनातनाः ७५
तेहनाकंमहिमानस्सचन्तेशुभदर्शनाः
तत्रविज्ञानिनोविप्राजागृवांसस्समिन्धते ७६
तत्पदंज्ञानिनोविप्रायांतिसंवासमिच्छवः

तद्विष्णोःपरमंधाममोक्षइत्यभिधीयते ७७
तस्मिन्बंधविनिर्मुक्ताः प्राप्नुवन्तिसुखंपदम्
तत्प्राप्यननिवर्त्ततेतस्मान्मोक्षउदाहृतः ७८
मोक्षंपरंपदंदिव्यममृतंविष्णुमंदिरम्
अक्षरंपरमंधामवैकुण्ठंशाश्वतंपदम् ७९
नित्यञ्चपरमंव्योमसर्वोत्कृष्टंसनातनम्
पर्य्यायवाचकान्यस्यपरधाम्नोच्युतस्यच
तस्यत्रिपाद्विभूतेस्तुरूपंवक्ष्यामिविस्तरात् ८०
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वर संवादेत्रिपाद्विभूतिकथनंनामसप्तविंशत्यधिकद्विशततमोऽध्यायः २२७

अष्टाविंशत्यधिक द्विशततमोऽध्यायः

श्रीमहादेवउवाच-
त्रिपाद्विभूतेर्लोकास्तुअसंख्याताः प्रकीर्तिताः
शुद्धसत्वमयाः सर्वेब्रह्मानंदसुखाह्वयाः १
सर्वेनित्यानिर्विकाराहेयरागादिवर्जिताः
सर्वेहिरण्मयाश्शुद्धाः कोटिसूर्य्यसमप्रभाः २
सर्वेवेदमयार्दिव्याः काम क्रोधविवर्जिताः
नारायणपदांभोजभक्त्येकरससेविताः ३
निरंतरंसामगानपरिपूर्णसुखंश्रिताः
सर्वेपंचोपनिषद स्वरूपावेदवर्चसः ४
सर्वेवेदमयैर्दिव्यैःपुरुषैः स्त्रीभिरावृताः
वेदैकरसतोयाढ्यैस्सरोभिरुपशोभिताः ५
श्रुतिस्मृतिपुराणादिरूपस्थावरसंयुताः
सर्वंवर्णयितुंशक्यंनमयालोकविस्तृतम् ६
विरजापरमव्योम्नोरंतरंकेवलंस्मृतम्
तत्स्थानमुपभोक्तव्यमव्यक्तब्रह्मसेविनाम् ७
स्वात्मानुभवजानंदसुखदंकेवलंपदम्
निःश्रेयसंचनिर्वाणंकैवल्यंमोक्षउच्यते ८
श्रीशांघ्रिभक्तिसेवैकरसभोगविवर्धिताः तम्

तदिच्छन्त्यल्पमतयोमोत्तंसुखविवर्जितम्
महात्मानोमहाभागाभगवत्पादसेवकाः ९
तद्विष्णोः परमंधामयांतिब्रह्मसुखप्रदम्
नानाजनपदाकीर्णंवैकुंठंतद्धरेःपदम् १०
प्राकारैश्चविमानैश्चसौधैरत्नमयैर्वृतम्
तन्मध्येनगरीदिव्यासाऽयोध्येतिप्रकीर्तिता ११
मणिकांचनचित्राढ्यप्राकारैस्तोरणैर्वृता
चतुर्द्वारसमायुक्तारत्नगोपुरसंवृता १२
चंडादिद्वारपालैश्चकुमुदाद्यैश्चरक्षिता
चंडप्रचंडौप्राग्द्वारयाम्येभद्रसुभद्रकौ १३
वारुण्यांजयविजयौसौम्येधातृविधातरौ
कुमुदःकुमुदाक्षश्चपुंडरीकोऽथवामनः १४
शंकुकर्णःसर्वनेत्रः सुमुखः सुप्रतिष्ठितः
एतेदिक्पतयः प्रोक्ताःपुर्य्यामत्रशुभानने १५
कोटिवैश्वानरप्रख्यगृहपंक्तिभिरावृता
आरूढयौवनैर्नित्यैर्दिव्यनारीनरैर्युता १६
अन्तःपुरंतुदेवस्यमध्येपुर्याम्मनोहरम्
मणिप्राकारसंयुक्तंरत्नतोरणशोभितम् १७

विमानैर्गृहमुख्यैश्चप्रासादैर्बहुभिर्युतम्
दिव्याप्सरोगणैः स्त्रीभिस्सर्वतस्समलंकृतम् १८
मध्येतुमंडपंदिव्यंराजस्थानंमहोच्छ्रयम्
माणिक्यस्तंभसाहस्त्रजुष्टंरत्नमयंशुभम् १९
दिव्यैर्मुक्तैः समाकीर्णंसामगानोपशोभितम्
मध्येसिंहासनंरम्यंसर्ववेदमयंशुभम् २०
धर्मादिदैवतैर्नित्यैर्वृतंवेदमयात्मकैः
धर्म्मज्ञानमहैश्वर्यवैराग्यैः पादविग्रहैः २१
ऋग्यजुःसामचाथर्वैरूपैर्नित्यंवृतंक्रमात्
शक्तिराधारशक्तिश्चचिच्छक्तिश्चसदाशिवा २२
धर्मादिदेवतानांचशक्तयः परिकीर्तिताः

वसंतिमध्यमेतत्रवह्निसूर्यसुधांशवः २३
कूर्मश्चनागराजश्चवैनतेयस्त्रयीश्वरः
छंदासिसर्वमंत्राश्चपीठरूपत्वमास्थिताः २४
सर्वाक्षरमयंदिव्यंयोगपीठमितिस्मृतम्
तन्मध्येऽष्टदलंपद्ममुदयार्कसमप्रभम् २५
तन्मध्येकर्णिकायांतुसावित्र्यांशुभदर्शने
ईश्वर्य्यासहदेवेशस्तत्रासीनः परः पुमान् २६
इंदीवरदलश्यामः कोटिसूर्यप्रकाशवान्
युवाकुमारः स्निग्धश्चकोमलावयवैर्वृतः २७
फुल्लरक्तांबुजनिभः कोमलांघ्रिसरोजवान्
प्रबुद्धःपुंडरीकाक्षःसुभ्रूलतायुगाङ्कितः २८
सुनासस्सुकपोलाढ्यस्सुश्रोत्रमुखपंकजः
मुक्ताफलाभदन्ताढ्यः सस्मिताधरविद्रुमः २९
परिपूर्णेदुसंकाशः सुस्मिताननपंकजः
तरुणादित्यवर्णाभ्यांकुंडलाभ्यांविराजितः ३०
सस्निग्धनीलकुटिलकुन्तलैरुपशोभितः
मन्दारपारिजाताढ्यकबरीकृतकेशवान् ३१
प्रातरुद्यत्सहस्रांशुनिभकौस्तुभशोभितः
हारस्वर्णस्रगासक्तकम्बुग्रीवोविराजितः ३२
सिंहस्कंधनिभैःप्रोच्चैः पीनैरंसैर्विराजितः
पीनवृत्ताय तभुजैश्चतुर्भिरुपशोभितः ३३
अङ्गुलीयैश्चकटकैःकेयूरैः परिमण्डितः
बालार्ककोटिसंकाशैः कौस्तुभाद्यैःसुभूषणैः ३४
विराजितमहावक्षोवनमालाविभूषितः
विधातृजननस्थाननाभिपङ्कजशोभितः ३५
बालातपनिभश्लक्ष्णपीतवस्त्रसमन्वितः
नानारत्नविचित्रांघ्रिःकटकाभ्यांविराजितः ३६
सज्योत्स्नचंद्रप्रतिमनखपंक्तिसमन्वितः
कोटिकंदर्पलावण्यसौंदर्य्यनिधिरच्युतः ३७
दिव्यचंदनलिप्तांगोदिव्य मालाविभूषितः

गृहीतशंखचक्राभ्यामुद्बाहुभ्यांविराजितः ३८
वरदाभयहस्ताभ्यामितराभ्यांतथैवच
वामाङ्केसंस्थितादेवीमहालद्मीर्महेश्वरी ३६
हिरगयवर्णाहरिणीसुवर्णरजतस्त्रजा
सर्वलद्मणसंपन्नायौवनारंभविग्रहा ४०
रत्नकुंडलसंयुक्तानीलाकुंचितशीर्षजा
दिव्यचंदनलिप्तांगीदिव्यपुष्पोपशोभिता ४१
मंदारकेतकीजातीपुष्पाञ्चितसुकुंतला
सुभ्रूस्सुनासासुश्रोणीपीनोन्नतपयोधरा ४२
परिपूर्णेंदुसंकाशासुस्मिताननपंकजा
तरुणादित्यवर्णाभ्यांकुंडलाभ्यांविराजिता ४३
तप्तकांचनवर्णाभातप्तकांचनभूषणा
हस्तैश्चतुर्भिःसंयुक्ताकनकांबुजभूषिता ४४
नानाविचित्ररत्नाढ्याकनकांबुजमालया
हारकेयूरकटकैरंगुलीयैश्चशोभिता ४५
भुजद्वयधृतोदग्रपद्मयुग्मोपशोभिता
गृहीतमातुलुंगाख्यजांबूनदकराञ्चिता ४६
एएवंनित्यानपायिन्यामहालद्म्यामहेश्वरः
मोदतेपरमेव्योम्निशाश्वतेसर्वदाप्रभुः ४७
पार्श्वयोर्धरणीनीलेसमासीनेशुभासने
अष्टदिद्मुदलाग्रेषुविमलाद्याश्चशक्तयः ४८
विमलोत्कर्षिणीज्ञानाक्रियायोगातथैवच
प्रह्वीसत्यातथेशानाशक्तयःपरमात्मनः ४६
गृहीत्वाचामरान्दिव्यान्सुधाकरसमप्रभान्
सर्वलद्मणसंपन्नामोदंतेपतिमच्युतम् ५०
दिव्याप्सरोगणाः पंचशतसंख्याश्चयोषितः
अंतःपुरनिवासिन्यः सर्वाभरणभूषिताः ५१
पद्महस्ताश्चताः सर्वाः कोटिवैश्वानरप्रभाः
सर्वलद्मणसंपन्नाःशीतांशुसदृशाननाः ५२
ताभिःपरिवृतोराजाशुशुभेपरमः पुमान्

अनंतविहगाधीशसेनान्याद्यैस्सुरेश्वरे ५३
अन्यैःपरिजनैर्नित्यैर्मुक्तैश्चपरिसंवृतः
मोदतेरमयासार्द्धंभोगैश्वर्यरतः पुमान् ५४
एवंवैकुंठनाथोऽसौराजतेपरमेपदे
तद्व्यूहभेदाँल्लोकांश्चवक्ष्यामिगिरिजेशुभे ५५
प्राच्यांवैकुंठलोकस्यवासुदेवस्य मंदिरम्
आग्नेय्यांलक्ष्म्यालोकस्तुयाम्यांसंकर्षणालयः ५६
सारस्वतस्तुनैर्ऋत्याप्राद्युम्नः पश्चिमेतथा
रतिलोकस्तुवायव्यामुदीच्यामनिरुद्धभूः ५७
एशान्यांशांतिलोकःस्यात्प्रथमावरणंस्मृतम्
केशवादिचतुर्विंशत्यमीलोकास्ततः क्रमात् ५८
द्वितीयावरणंप्रोक्तंवैकुंठस्यशुभाह्वयम्
मत्स्यकूर्मादिलोकास्तुतृतीयावरणंशुभम् ५९
सत्याच्युतानंतदुर्गाविष्वक्सेनगजाननाः
शंखपद्मनिधीलोकाश्चतुर्थावरणंशुभम् ६०
ऋग्यजुःसामाथर्वाणोलोकादिक्षुमहत्सुच
सावित्र्याविहगेशस्यधर्मस्यचमखस्यच ६१
पंचमावरणंप्रोक्तमक्षयंसर्ववाङ्मयम्
शंखचक्रगदापद्मखड्गशार्ङ्गहलंतथा ६२
मौशलंचतथालोकाः सर्वशस्त्रास्त्रसंयुताः
षष्ठमावरणंप्रोक्तंमंत्रास्त्रमयमक्षरम् ६३
एंद्रपावकयाम्यानिनैर्ऋतंवारुणंतथा
वायव्यंसौम्यमैशानंसप्तमंमुनिभिः स्मृतम् ६४
साध्यामरुद्गणाश्चैवविश्वेदेवास्तथैवच
नित्याःसर्वेपरेधाम्नियेचान्येचदिवौकसः ६५
तेवैप्राकृतलोकेस्मिन्ननित्यास्त्रिदशेश्वराः
तेहनाकंमहिमानः सचंतइतिवैश्रुतिः ६६
एवंपरंपदंनित्यैर्मुक्तैर्भोगपरायणैः
दिव्याभिर्महिषीभिश्चराजतेविभुरीश्वरः ६७
नतद्भासयतेसूर्योनशंशांकोनपावकः

यद्गत्वाननिवर्त्तंतेयोगिनः संशितव्रताः ६८
द्वयैकमंत्रनिष्ठायेतेवैयांतितदव्ययम्
नवेदयज्ञाध्ययनैर्नदानैर्नव्रतैः शुभैः ६९
नतपोभिर्निराहारैर्नचसाधनकर्मभिः
एकेनद्वयमंत्रेणतथाभक्त्यात्वनन्यथा ७०
तद्गम्यंशाश्वतंस्थानंप्रपत्त्यावैसनातनम्
पार्वत्युवाच-
साधूक्तंपरमंस्वर्गस्वरूपंभवताप्रभो ७१
परव्योम्निस्थितोनित्यंकथंप्रकृतिमराडले
स्थितवान्किंनिमित्तेनलीलयाकिंप्रयोजनम् ७२
शुद्धसत्वमयेलोकेसंस्थितः परमेश्वरः
कथंरजस्तमोमिश्रविभूत्यास्थिवान्प्रभुः ७३
रुद्रउवाच-
त्रिपाद्विभूतौभगवानीश्वर्य्यापरमेश्वरः
नित्यमुक्त्यैकभोग्योऽसौमोदतेसततंविभुः ७४
तमीश्वरंमहामायाप्रकृतिर्जगदाश्रया
कृतांजलिपुटाभूत्वातुष्टावपरमेश्वरम् ७५
महामायोवाच-
नमस्तेत्रिजगद्धाम्नेनमस्तेविश्वरूपिणे
पुराणायनमस्तुभ्यंजगदुत्पत्तिहेतवे ७६
श्रीभूलीलाधिपतयेनमोनारायणायच
नमोभगवतेतूभ्यंवासुदेवायशार्ङ्गिणे ७७
सर्वदेवस्वरूपायविष्णवेजिष्णवेनमः
सहस्रमूर्तयेतुभ्यमनंतायनमोस्तुते ७८
अच्युतायविकारायशुद्धसत्त्वस्वरूपिणे
अदिमध्यांतरहितस्वरूपायनमोनमः ७९
नमोहिरगयगर्भायज्ञानायपरमात्मने
सर्वभूतात्मनेतुभ्यंसर्वभूताश्रयायच ८०
ब्रह्मणेज्योतिषेतुभ्यंनमस्ते विश्वरूपिणे
नमः शुचिषदेतुभ्यंहंसायपरमायच ८१

संकर्षणायरुद्रायसर्वभूतधरायच
हयग्रीवायदीप्तायकालायहरयेनमः
नमस्तेयज्ञपुरुषहव्यकव्यस्वरूपिणे ८२
नमः प्रजापतयेतस्मैसूर्यायशुभवर्चसे
अग्नयेहव्यभोक्त्रेचतस्मैयज्ञात्मनेनमः ८३
नमस्तेप्रसवित्रेचसर्गस्थित्यंतहेतवे
नमोवेदांतवेद्यायचतुरात्मस्वरूपिणे ८४
ब्रह्मणेविष्णवेतुभ्यंनमस्तेशंकारायच
त्रिगुणायनमस्तुभ्यंसर्गस्थित्यंतहेतवे ८५
निर्गुणायनमस्तुभ्यंसर्वात्मान्तरवर्तिने
अव्यक्तायनमस्तस्मैविष्णवेलोकसाक्षिणे ८६
नारायणायश्रीशायपूर्णषाड्गुणयमूर्त्तये
अनंतगुणपूर्णायनमः सर्वार्थदायिने ८७
नमस्तेवासुदेवायपंचावस्थस्वरूपिणे
नमः पंचनवव्यूहभेदरूपायतेनमः ८८
नमोयज्ञवराहायगोविंदायनमोनमः
अविकारायशुद्धायहेयप्रतिभटायच ८९
नमोरामायकृष्णायनरसिंहायतेनमः
केशवायनमस्तुभ्यंजगतांक्लेशहारिणे ९०
त्वमेवसर्वलोकनामाश्रयः पुरुषोत्तमः
प्रसीददेवदेवेशसर्वलोकहितायवै ९१
मत्संस्थाश्चेतनास्सर्वेनिराधारानिराश्रयाः
हीनदेहानिराकाराः सर्वेन्द्रियविवर्जिताः ९२
सर्वानुष्ठानरहिताः सततंदुःखभोगिनः
तेषांलोकांश्चदेहांश्चदातुमर्हसिकेशव ९३
लीलाविभूतिंसर्वज्ञयथापूर्वंप्रकल्पय
चेतनाचेतनंकृत्स्नंजगत्स्थावरजंगमम् ९४
मयासंमोहितंपश्यलीलार्थंपरमेश्वर
प्राकृताण्डंमयासार्धंसृजस्वपुरुषोत्तम ९५
धर्म्माधर्म्मौसुखंदुःखंतस्मिन्नक्षिप्यसंसृतौ

मामधिष्ठायलीलांवैकर्तुमर्हसिमाचिरम् ९६
श्रीमहादेवउवाच-
एवमुक्तस्तयादेव्यामाययापरमेश्वरः
तस्यांनिवेश्यमायायां जगत्स्रष्टुंप्रचक्रमे ९७
योऽसौप्रकृतिपुरुषःप्रोच्यतेसइहाच्युतः
सएवभगवान्विष्णुः प्रकृत्यांप्रविवेशह ९८
अ्रसृजत्प्रकृतौब्रह्मभूतादिमहदाश्रयम्
महतः पुरुषादस्मादहंकारोऽभ्यजायत ९९
अ्रहंकारात्तुवैतस्माद्गुणत्रयमजायत
त्रिभ्योगुणेभ्यस्तन्मात्रामसृजद्विश्वभावनः १००
तन्मात्रेभ्योऽभ्यजायंतमहाभूतानितत्त्वणात्
अ्रोंकारःप्रथमंजातोब्रह्मणस्त्रिगुणात्मनः १०१
अ्राकाशादभवद्वायुर्वायोरग्निरजायत
अ्रग्नेरापः समुद्भूताअ्रद्भ्यश्चपृथिवीमता १०२
अ्राकाशादीनिभूतानिसृष्टान्येकोत्तराणिवै
शब्दस्पर्शश्चरूपंचरसोगंधश्चतद्गुणाः १०३
एकोत्तरगुणान्सृष्ट्वातानादायमहाप्रभुः
तेषांविमिश्रणंकृत्वाजगदंडंमहत्तरम्
अ्रसृजत्तत्रलान्वैसंख्ययायेचतुर्दश १०४
ब्रह्मादित्रिदशांस्तस्मिन्नसृजत्पुरुषोत्तमः
दैवतिर्य्यक्तथामर्त्यंस्थावरंचचतुर्व्विधम् १०५
तथासृष्टोमहासर्गन्तेनवैजलजेद्त्तणे
तत्रकर्मानुरूपेणत्रिदशादिषुयोनिषु १०६
संस्थिताः प्रकृतौपूर्वअ्रात्मनः प्रभवंतिहि १०७
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेपरमव्योमादि वर्णनंनामअ्रष्टाविंशत्यधिकद्विशततमोऽध्यायः २२८

एकोनत्रिंशदधिकद्विशततमोऽध्यायः

पार्वत्युवाच-
विस्तरेणममाख्याहिदेवसर्गमनुत्तमम्

ब्रह्मादित्रिदिवश्रेष्ठाःकथंजाताः सनातनाः
ईश्वरस्यावतारांश्चविस्तरेणतदस्वमे १
रुद्रउवाच-
आकाशानिलतेजोंबुभुवः सृष्टायथाक्रमम्
तासांमध्येऽसृजद्ब्रह्माअगाधजलमर्णवम् २
अस्मिन्नेकार्णवीभूतेजलमायावटच्छदे
आदायसर्व्वभूतानियोगनिद्रांययौहरिः ३
सजगत्स्रष्टुकामस्तुयोगनिद्रामुपेयिवान्
तयारेमेचिरंकालंमायया मधुसूदनः ४
तस्यांतुजनयामासकालात्मानमनुत्तमम्
कलाकाष्ठादिभूतायेपक्षमासादिरूपिणः ५
तस्मिन्कालेहरेर्न्नाभिपंकजंमुकुलाकृति
विकसत्सर्वजगतोबीजभूतंसुवर्चसम् ६
उदस्थादुदभूत्तत्रब्रह्माचसुमहामतिः
सजगत्स्रष्टुकामस्तुरजोगुणविचोदितः
तुष्टावयोगनिद्रायांशयानंपरमेश्वरम् ७
ब्रह्मोवाच-
नमोस्तुविष्णवेतुभ्यंसर्गस्थित्यंतहेतवे
जगद्भूषणभूषायश्रीमतेविश्वरूपिणे ८
नमोब्रह्मण्यदेवायगोब्राह्मणहितायच
जगद्धितायकृष्णायगोविंदायनमोनमः ९
प्रधानकालरूपायपुरुषायेश्वरायच
नमःप्रपंचरूपायनिष्प्रपंचस्वरूपिणे १०
नारायणायविश्वायविश्वेशायनमोनमः
श्रीभूलीलाधिपतयेब्रह्मणेपरमात्मने ११
नमोस्तुवासुदेवायविश्वरूपायशार्ङ्गिणे
त्रयीनाथायहरयेविश्वनाथस्वरूपिणे १२
अनंतकल्याणगुणपरिपूर्णायतेनमः
जगच्चसर्व्वंस्वपितित्वयिसुप्तेजगन्मये १३
वृतंसर्वंजगन्नाथप्रपंचेसचराचरम्

त्वमेवकारणंकर्त्ताकार्य्यंचत्रिगुणोद्भवम् १४
स्त्रष्टाध्याताविधाताचत्वमेवपरमेश्वरः
जागर्षिशुद्धसत्वस्थस्तवनिद्राकुतःप्रभो
देवत्वयि स्थितालोकाः समाधिष्ठाः सनातनाः १५
शिवउवाच-
एवमुक्तोहृषीकेशोब्रह्मणापरमेश्वरः
उत्तस्थौशयनात्तस्माद्विमुक्तोयोगनिद्रया १६
नियम्ययोगनिद्रांतांजगत्स्त्रष्टुंप्रचक्रमे
अचिंत्यस्तत्क्षणाद्देवोजगतांप्रभुरच्युतः १७
चिंतयित्वाजगत्सर्वमसृजत्सपुमांस्ततः
लोकान्सर्व्वांस्तदाह्यप्सुगतमंडंहिरगमयम् १८
सप्तद्वीपान्समुद्रांतान्मेदिनीभूधरैर्युतान्
सहैकागडकटाहेननाभिपद्मेऽसृजत्प्रभुः १९
तदगडमध्येचास्थानमीश्वरः कृतवान्हरिः
अथनारायणंकस्तुदध्यावध्यात्मचेतसा २०
ध्यानांतेतस्यभालात्तुस्वेदबिंदुरजायत
सबिंदुर्बुद्बुदाकारःपृथिव्यामपतत्क्षणात् २१
तस्मात्तुबुद्बुदात्सोऽहमुत्पन्नोस्मिवरानने
त्र्यक्षस्त्रिशूलहस्तोऽहजटामुकुटमंडितः २२
किंकरोमीतिदेवेशमवोचंविनयान्वितः
ततोनारायणोदेवोमामित्याहमुदान्वितः २३
कर्त्तासिजगतोरुद्रसंहारंभीमदर्शनम्
साक्षात्संकर्षणांशेनसंहारार्थेवरानने २४
तस्मान्नारायणाद्देविउत्पन्नोस्मिभयंकरः
नियोज्यमांतुसंहारेपुनरेवजनार्दनः २५
नेत्राभ्यामसृजच्चंद्रसूर्य्यौध्वांतापहारिणौ
वायुंदिशश्चश्रोत्राभ्यामिंद्राग्नीमुखतोऽसृजत् २६
नासाभ्यांवरुणंमित्रमसृजत्पंकजेक्षणः
बाहुभ्यामखिलान्देवान्ससाध्यान्समरुद्गणान् २७
समस्तरोमकूपेभ्योरक्षान्योषधयस्तथा

त्वचिशैलान्समुद्रांश्चगवाद्याः पशवस्तथा २८
मुखतोब्राह्मणः सृष्टोबाहुभ्यांक्षत्रियस्तथा
ऊर्व्वोर्वैश्यस्ततः पद्भ्यांशूद्रश्चैवमजायत २९
एवंसृष्ट्वाजगत्सर्व्वमचेतनमवस्थितम्
विश्वरूपेणदेवेशोयस्यांतरमधिष्ठितः ३०
शक्तयाविनाहरेस्तस्यनोन्मेषोविद्यतेयतः
तस्मात्सर्वजगत्प्राणोविष्णुरेवसनातनः ३१
सएवाव्यक्तरूपःसन्परमात्माव्यवस्थितः
सर्गस्थितिलयंब्रह्मास्वयमेवप्रवर्त्तते ३२
षाड्गुण्यपरिपूर्णोऽसौवासुदेवः सनातनः
त्रिगुणादात्मनोरूपंचतुर्द्धाकुरुतेजगत् ३३
प्रद्युम्नमूर्त्तिर्भगवान्सर्वैश्वर्य्यसमन्वितः
विधेःप्रजापतीनांचकालस्य चजनस्यच ३४
अंतर्य्यामित्वमापन्नोसर्गंसम्यक्करोतिहि
सेतिहासांस्ततोवेदान्ददौतस्मैमहात्मने ३५
प्रद्युम्नस्यांशभागोऽसौब्रह्मालोकपितामहः
जगत्सर्गस्थितिंसर्व्वंप्रकरोत्यंशसंभवः ३६
अनिरुद्धश्चभगवाञ्छक्तितेजःसमन्वितः
मनूनांपार्थिवानांचकालस्यचजनस्यच ३७
स्थितिंकरोतिभगवानंतर्य्यामित्वमास्थितः
संकर्षणोमहाविष्णुर्विद्याबलसमन्वितः ३८
कालस्यसर्वभूतानांरुद्रस्यचयमस्यच
अंतर्य्यामित्वमास्थायजगत्संहरतेप्रभुः ३९
इत्यंतर्य्याम्यवस्थायामंतर्य्यामित्वमात्मनः
मत्स्यःकूर्म्मोवराहश्चनरसिंहोऽथवामनः ४०
रामोरामश्चकृष्णश्चबुद्धःकल्कीचतेदश
एतेतुविभवावस्थाब्रह्मणः परमात्मनः ४१
नृसिंहारामकृष्णेषुषाड्गुण्यंपरिकीर्तितम्
परावस्थातुदेवस्यदीपादुत्पन्नदीपवत् ४२
साह्यवस्थाहरेरस्यशृणुष्वगिरिजेशुभे

वैकुंठंपरमंलोकंविष्णुलोकमनुत्तमम् ४३
श्वेतदीपंस्वरूपंतुक्षीरसागरमुत्तमम्
एवंचतुर्द्धाव्यूहंतुसम्यगुक्तंमहर्षिभिः ४४
जलावरणमध्येतुवैकुंठंकारणंशुभम्
कोटिवैश्वानरप्रख्यंसर्वंधर्म्मवदव्ययम् ४५
आमोदमंदारकरैर्बृंदैर्वह्निभिरास्थितम्
नानामणिमयंदिव्यंविमानकोटिभिर्य्युतम् ४६
यदुक्तंपरमंधामतादृक्लक्षणसंस्थितम्
तस्मिन्वैकुंठनगरेनानारत्नसमुज्ज्वले ४७
मध्येदेवजयारामंपुरंरम्यमनुत्तमम्
चतुर्द्वारसमायुक्तंहेमप्राकारतोरणम् ४८
चंडादिद्वारपालाद्यैःकुमुदाद्यैश्चरक्षितम्
नानामणिमयैर्दिव्यैर्गृहैः पंक्तिभिरावृतम् ४९
विततंपंचपद्माभिर्योजनैश्चसमंततः
सहस्त्रयोजनोत्तुंगैःप्रासादैःकोटिभिर्वृतम् ५०
आरूढयौवनैर्द्दिव्यैः पुंभिस्त्रीभिश्चशोभितम्
स्त्रियश्चपुरुषाश्चास्मिन्सर्वलक्षणशोभिताः ५१
समरूपाश्चश्रीविष्णोःसर्व्वालंकारभूषिताः
दिव्यस्त्रग्वस्त्रसंछन्नादिव्यचंदनभूषिताः ५२
मोदंतेतत्रदेवेशभक्त्यात्वात्ममनोरमे
मंत्राष्टाक्षरसंसिद्धाभक्त्याषोडशरूपया ५३
वृतास्तत्पदमाविश्यमोदंतेमनसीप्सितम्
गत्वांस्मिन्ननिवर्तं तेविष्णुनासहसंस्थिताः ५४
अविच्छिन्नात्मनातेवैविष्णुनासंगताः शुभाः
तत्समानसुखंनित्यंप्राप्नुवंतिमनीषिणः ५५
यत्रतत्रहरेर्लोकानाविश्यशुभचेतसः
प्राप्नुवंतिपुनःस्वर्गंस्वर्गस्थाइवजंतवः ५६
यथासौमित्रिभरतौयथासंकर्षणादयः
तथातेपिचजायंतेसत्यलोकेयथेच्छया ५७
पुनस्तेनैवयास्यंतितत्पदंशाश्वतंपरम्

नकर्म्मबंधनंजन्मवैष्णवानांचविद्यते ५८
विष्णोरनुचरत्वंहिमोक्षयाहुर्मनीषिणः
नदास्यममरेशस्यबंधनंपरिकीर्तितम् ५९
सर्वबंधननिर्मुक्ताहरिदासानिरामयाः
आब्रह्मभुवनाँलोकाःपुनरावृत्तिलक्षणाः ६०
कर्मबंधमयादुःखमित्रासख्यभयप्रदाः
बह्वायासफलादेविजनिनाशकहेतवः ६१
सुखभोगस्तुयन्नृणांविषमिश्राशनंयथा
स्वर्गसंस्थान्नरान्दृष्ट्वाक्षीणेकर्म्मणिदेवताः ६२
कुपिताः पातयन्त्येवसंसृतौकार्य्यबंधने
तस्मात्स्वर्गसुखंदेविबहुधायाससाधनम् ६३
अनित्यंकुटिलंदुःखमिश्रंयोगीपरित्यजेत्
सततंसंस्मरेद्विष्णुंसर्वदुःखौघनाशनम् ६४
नामोच्चारणमात्रेणप्राप्नुवंतिपरंपदम्
तस्मात्तुवैष्णवंलोकंगौरिसंप्रार्थयेत्सुधीः ६५
भक्त्यात्वनन्ययादेवं भजेतकरुणांबुधिम्
ससर्वज्ञानगुणवान्रक्षत्येवनसंशयः ६६
तस्मादष्टाक्षरंमन्त्रंजप्त्वासुखतरंशुभम्
संप्राप्नोतिपरंलोकंवैष्णवंसर्वकामदम् ६७
तस्मिन्मणिमयेतल्पेसहस्रसूर्य्यरश्मिनि
विमानेशुशुभेदिव्येसंस्थितोभगवान्हरिः ६८
तत्रचाधारशक्त्यादिधृतेपीठेहिरण्मये
नानारत्नमयेदिव्ये नानावर्णसमन्विते ६९
तस्मिन्नष्टदलेपद्मेमंत्राक्षरपदेशुभे
कर्णिकायांसुरम्यायांलक्ष्मीबीजशुभाक्षरे ७०
तस्मिन्वालार्कसाहस्रकोटितुल्य समप्रभे
दिव्येनारायणः श्रीमानासीनः पंकजासने ७१
तस्यदक्षिणकेपार्श्वेजगन्माताहिरण्मयी
गृहीत्वाचामरान्दिव्यान् दिव्यमाल्यविभूषणा ७२
वसुपात्रंमातुलुंगंस्वर्णपद्मंधृतंकरैः

वामतःपृथिवीदेवीनीलोत्पलदलद्युतिः ७३
नानाभरणसंयुक्ताविचित्रांबरभूषिता
साधृत्वाचोर्द्ध्वबाहुभ्यांरम्यंरक्तोत्पलद्वयम् ७४
इतराभ्यांधृतं देव्याधान्यपात्रयुगंतथा
गृहीत्वाचामरान्दिव्यान्शक्तयोविमलादिकाः ७५
दलाग्रेषुसमासीनाः सर्वलक्षणशोभिताः
तासांमध्येसमासीनोभगवानच्युतोहरिः ७६
शंखचक्रगदापद्मपाणिभिर्दिव्यभूषणैः
केयूरांगदहाराद्यैर्भूषणैरूपशोभितः ७७
प्रातरुद्यत्सहस्रांशुकुराडलाभ्यांविराजितः
पूर्वोक्तैस्त्रिदशैर्न्नित्यैः सेवितः परमेश्वरः ७८
आस्तेवैकुराठनगरेनित्येसत्येचभोगवान्
श्रीमदष्टाक्षरंमंत्रंसिद्धानांवैमनीषिणाम् ७९
गम्यंतद्वैष्णवंलोकंनेतरेषांकथंचन
इत्येवंप्रथमंव्यूहंकथितंतेवरानने ८०
द्वितीयंवैष्णवंलोकंशृणुवक्ष्यामिसुव्रते
योऽयनित्यइतिख्यातोलोकाग्र्योवैष्णवः स्मृतः ८१
तंलोकंविपुलंपुरायंशुद्धंसत्वमयंशुभम्
मध्याह्नसूर्य्यसाहस्रयुगपद्भासितंतदा ८२
कल्पांतेऽपिनलीयेततत्वलोकंमहत्तरम्
ममब्रह्मादिदेवानांनद्रष्टुमपिशक्यते ८३
सर्वंकल्पद्रुमवनैः परिपूर्णंसमंततः
सुधाम्बुपरिपूर्णाभिर्दिर्घिकाभिःसमन्वितम् ८४
स्वर्णरत्नमयैर्दिव्यैःपंकजैरुपशोभितम्
जलदग्निनिभैर्दिव्यैर्भूषणैः कोटिभिर्वृतम् ८५
निरंतरंसामभिश्चकूजितैःकोकिलादिभिः
ऊह्यमानैर्गन्धर्वृक्षैःपुष्पकैरपिशोभितम् ८६
ऊनषोडशवर्षाब्दैर्दिव्यनारीनरैर्वृतम्
सर्वलक्षणशोभाढ्यैर्दिव्यकल्पविभूषणैः ८७
तत्रप्रदेशेरम्येषुदेशेषुकमलापतिम्

मुदितैःपतिभिःसार्द्धमर्चयंतिस्मयोषितः ८८
तत्प्रसादोपलभ्यंवैसुखमश्नन्तिसर्वदा
गायंतिपरमानंदंकृष्णस्यचरितंमहत् ८९
पद्मेक्षणाः पद्महस्ताः पद्मयासदृशःशुभाः
दिव्यस्रग्वसनोपेताः क्रीडंतिस्मसुयोषितः ९०
शंखचक्रगदापद्मधराभूषणभूषिताः
स्रग्विणः पीतवसनाःपुरुषास्तत्रसंस्थिताः ९१
अनन्यस्पर्शनात्तत्रस्त्रीपुंसोःक्रीडमानयोः
भवत्यनुदिनंवृद्धंहरिभक्तिसुखंरसम् ९२
तन्मध्येंतः पुरंरम्यंवासुदेवस्यशोभितम्
चंदनागुरुकर्प्पूरकुंकुमोदकसंयुतम् ९३
नानापुष्पविमानाद्यैः सर्वतः समलंकृतम्
तन्मध्येकल्पवृक्षस्य च्छायायांकमलासने ९४
विचित्रश्लक्ष्णपर्यंकेशुभास्तरणसंवृते
दिव्यगंधसुशोभाढ्यैर्नानापुष्पपरिच्छदैः ९५
तस्मिन्मनोरमेदिव्येसमासीनः श्रियासह
ईश्वर्य्यासहदेवेशोवासुदेवः सनातनः ९६
सुधांशुकोटिसंकाशोदिव्याभरणभूषितः
सुवर्णशुभ्रयुगलश्लक्ष्णनासांचिताननः ९७
स्निग्धायतसुलावण्यकपोलाभ्यांविराजितः
नीलकुंचितकेशाढ्योरक्ताब्जदललोचनः ९८
मंदारकेतकीजातीकैरवीकृतशेखरः
स्निग्धबिम्बफलाभौष्ठः सुस्मिताननपंकजः ९९
अनर्घ्यमौक्तिकाभासदंतावलिविराजितः
हरिचंदनलिप्तांगःकस्तूरीतिलकांकितः १००
उन्नतांसभुजैर्दीर्घैश्चतुर्भिरुपशोभितः
जपाकुसुमसंकाशकरपल्लवशोभितः १०१
श्रीवत्सकौस्तुभाभ्यांचशोभितः पृथुवक्षसा १०२
मुक्तामयैःसुशोभाढ्यैर्दिव्यस्रग्भिरलंकृतः
बालार्कसदृशज्योत्स्नापीतवस्त्रेणवेष्टितः १०३

माणिक्ययनूपुरोपेतपद्मपत्रविराजितः
अकलंकितचंद्राभनखपंक्तिविराजितः १०४
रक्तोत्पलनिभश्लक्ष्णशुभ्रांघ्रिकरपंकजः
पांचजन्यरथांगाभ्यांबाहुयुग्मविराजितः १०५
इतराभ्यांश्रियोगात्रमाश्लिष्यन्निजवक्षसि
श्लिष्यद्विद्युल्लतोद्गीथशिताभ्रइवराजते १०६
सप्तजांबूनदश्लक्ष्णशुभांघ्रियुगपंजकः
अत्रक्रीडतिदेवेशोवासुदेवः सनातनः १०७
तप्तकांचनसंकाशासर्वाभरणभूषिता
सुस्निग्धनीलकुटिलचंद्राविविराजिता १०८
मंदारपारिजातादिदिव्यपुष्पविराजिता
कर्णावतंसशोभाढ्याचिकुरांतालिसन्निभा १०९
पीनोन्नतस्तनाभ्यांचपीडंतिहरिवक्षसि
केयूरांगदहाराद्यैर्भूषणैरुपशोभिता ११०
आरूढयौवनानित्यंसर्वलोकेशसुंदरी
तत्रक्रीडतिलोकेशपत्यासहनिरंतरम् १११
सएववासुदेवोऽत्रसर्वभूतमनोहरः
क्रीडतेसर्वलोकेस्मिन्सर्वकामप्रदोनृणाम् ११२
अत्राष्टशक्तयोलक्ष्म्यास्तनवःपरितः स्थिताः
रमाचरुक्मिणीसीतापद्मापद्मालयाशिवा ११३
सुलक्षणासुशीलाचरतिकामप्रदाश्चताः
शंखचक्रगदापद्मशार्ङ्गाद्यैर्हेतिभिस्तथा ११४
परितः पुष्कराकारैस्तंलोकंपरिरक्षते
एवंद्वितीयंरूपंचसम्यक्तेशुभदर्शने ११५
संक्षेपतोमयाप्रोक्तंनशक्यंविस्तरेणहि
द्वादशाक्षरमंत्रंवैयेजपंतिसुखाह्वयम् ११६
तेप्राप्नुवंतिसततंशाश्वतंशुभमक्षयम्
नवेदाध्ययनैर्यज्ञैर्नव्रतैर्नोपवासतः ११७
नप्राप्यं वैष्णवंलोकंविनादास्येनकुत्रचित्
तस्माद्दास्यंहरेर्भक्तंभजेतानन्यमानसः ११८

प्राप्नोतिपरमांसिद्धिंकर्मबंधविमोचनीम्
एवंसंप्रोच्यतेदेविद्वितीयंव्यूहमव्ययम् ११९
तृतीयंतुपरंव्यूहंशृणुवक्ष्यामिपार्वति
तोयाब्धेरुत्तरंकूलंश्वेतद्वीपेमहामते १२०
संदर्शनाययोगानांसनकादिमहात्मनाम्
सनकश्चसनंदश्चतृतीयश्चसनातनः १२१
सनत्कुमारजाताश्चवोढुःपंचशिखस्तथा
सप्तैतेब्रह्मणः पुत्रायोगिनः सुमहौजसः १२२
विरक्ताः सर्वभोगेषुशुद्धाःसत्वगुणाःसदा
भगवद्दर्शनोद्भूतसुखैकरससेविनः १२३
नरनारायणाद्याश्चश्वेतद्वीपेवसंतिये
तेषांसंदर्शनार्थायतत्रसंनिहितोहरिः १२४
शुभ्रांशुकोटिसंकाशेनानारत्नमयोज्ज्वले
श्वेतद्वीपेमहायोगिसेवितेभयवर्जिते १२५
तत्रोद्यानानिरम्याणिपारिजातसमानिवै
संतानकलताकीर्णंचन्दनद्रुममंडितम् १२६
फुल्लपद्मोत्पलोपेतंनानातोयालयैर्युतम्
तन्मध्येनगरीरम्यानाम्नाचैरावतीशुभा १२७
नानारत्नमयैर्दिव्यैर्विमानैरुपशोभिता
दिव्यस्त्रीपुंभिराक्रांताबहुप्रासादसंकुला १२८
तन्मध्येऽन्तपुरंरम्यंरत्नद्रुमसमाकुलम्
बालसूर्यनिभैस्तुंगैःप्रासादैर्बहुभिर्वृतम् १२९
तन्मध्येमंडपंदिव्यंमणिकांचनशोभितम्
चंदनागुरुकर्पूरकुंकुमामोदवाशितम् १३०
नानाकुसुमशोभाढ्यैर्वितानैः समलंकृतम्
दिव्याप्सरःसमाकीर्णंसामगानोपशोभितम् १३१
मध्येसिंहासनंतत्रसूर्यवैश्वानरप्रभम्
तन्मध्येऽष्टदलंपद्मंचंद्रबिंबमिवापरम् १३२
तन्मध्येकर्णिकायांतुसमासीनोजनार्दनः
शुद्धजांबूनदप्रख्योमुक्ताहारविभूषितः १३३

शंखचक्रगदापद्मशक्तिहस्तचतुष्टयः
हारकेयूरकटकैरंगुलीयैश्चशोभितः १३४
सुवर्णपंकजप्रख्यःपदयुग्मविराजितः
संतानकनिभैःशुभ्रैर्नखपंक्तिविराजितः १३५
षोडशाब्दवयोरूपयौवनेनविराजितः
विशालभालदेशेतुकुंकुमेनसुगंधिना १३६
रचितेनोर्ध्वपुंड्रेणसीमंतेनोपशोभितः
मथितामृतफेनाभशुक्लवस्त्रसुवेष्टितः १३७
मुक्तामयाभ्यांशुभ्राभ्यांकुंडलाभ्यांविराजितः
पद्मासनसमासीनोजगन्मोहनविग्रहः १३८
वामांकेसंस्थितादेवीतस्यदिव्यस्वरूपिणी
तस्यैवसदृशीलक्ष्मीःशीलसुष्टुगुणादिभिः १३९
पद्मकिंजल्कसंकाशायौवनारंभशोभिता
सर्वलक्षणसंपन्नातप्तकांचनभूषणा १४०
दिव्यस्त्रग्वसनोपेतानीलकुंचितमूर्धजा
चतुर्भुजैर्विराजंतीकेयूराङ्गदभूषिता १४१
मुक्ताहार्[विराजंतीमंदारांचितशीर्षजा
श्लक्ष्णनासापुटयुतालसद्दंतिवराजिता १४२
कस्तूरीतिलकोपेतानासाग्रांचित मौक्तिका
स्वर्णकुंभसमप्रख्यपीनोन्नतपयोधरा १४३
दिव्यकुंकुमलिप्तांगीपद्ममालोपशोभिता
वस्त्रपात्रंमातुलिङ्गंदर्पणंहेमपंकजम् १४४
करपद्मधृतादेवीचेतसाभीष्टदायिनी
तस्यैताः सदृशास्तत्रशक्तयः परितोहरेः १४५
ईशावास्यामहादेवीजाह्नवीकमलालया
सावित्रीसर्वगापद्माशक्तयः परिकीर्तिताः १४६
श्रद्धामेधाधृतिःप्रज्ञाधारणाशांतिरेवच
श्रुतिस्मृतिर्धृतिर्मेधावृद्धिर्बुद्धिर्मनीषिणी १४७
दास्यस्तेताःश्रियःप्रोक्ताः सर्वकार्यस्यकारिकाः
अनंतवैनतेयादिदेवतानित्यकिंकराः १४८

साध्यामरुद्गणाश्चैवसेवंतेनित्यदेवताः
प्रासादेषुविमानेषुवनेषुनगरेषुच १४९
तत्प्रसादोपलब्धेषुभोगेष्वत्रानुरंजिताः
क्रीडंतीसततंनित्याहेयनिष्फलवर्जिताः १५०
येविष्णुमंत्रजप्तारःसततंश्रद्धयान्विताः
येद्वादशीव्रतेयुक्तास्तत्पदंयांतितेऽव्ययम् १५१
नवेदैर्नचदानैश्चनयज्ञैर्नव्रतैरपि
प्राप्तुंचशक्यंगिरिजेविष्णुलोकंसनातनम् १५२
भक्त्याचानन्ययाप्राप्तुंशक्यंविष्णुपदंनृणाम्
तस्मात्संपूजयेन्नित्यंभक्त्यादेवंजनार्दनम् १५३
कीर्तनंनाममात्रंचध्यायन्मंत्रंजपेत्सदा
जुहुयात्तर्पयेद्भक्त्यासर्वगंसर्वकामदम् १५४
एवमुक्तंतृतीयंतुव्यूहंतुपरमात्मनः
स्वरूपंतवसुश्रोणियथाप्रोक्तंपुरातनैः १५५
अतः परंप्रवक्ष्यामिचतुर्थव्यूहमुत्तमम्
दिवौकसारंक्षणार्थंदुग्धाब्धौपरमेश्वरः १५६
सुधांशुकोटिशंकाशः सहस्राक्षेणशोभिते
पुरंदरसयूथैस्तुच्छादितेदुग्धवारिधौ १५७
तस्मिन्ननंतपर्यंकेशेतेऽसौविस्तृतेशुभे
दिव्यासनसमासीनः पद्मनाभोऽच्युतोहरिः १५८
नीलजीमूतसंकाशः पद्मपत्रायतेक्षणः
विवस्वत्कोटिसंकाशकिरीटेनविराजितः १५९
नानारत्नोज्ज्वलद्दिव्यंकुंडलाभ्यांविराजितः
बालार्कसदृशज्योत्स्नापीतवस्त्रेणवेष्टितः १६०
स्फुरद्रक्तारविंदाभहस्तांघ्रितलशोभितः
हारकेयूरकटकैरंगुलीयैर्विराजितः १६१
शंखचक्रगदाशार्ङ्गखड्गहस्तैर्विभूषितः
सुपुष्पफलशाखाढ्यकल्पवृक्षैर्विराजितः १६२
विश्वस्यजन्ममरणनाभिपंकजशोभितः
हरिचंदनलिप्तांगःसर्वाभरणभूषितः १६३

मंदारपारिजातादिदिव्यपुष्पैर्मनोरमैः
सुस्निग्धनीलकुटिलकवरीकृतकेशवान् १६४
श्लच्णोन्नतसुनासांसजानुयुग्मविराजितः
मणिविद्रुमशाखाढ्यनूपुराङ्घ्रिविराजितः १६५
अकलंकितचंद्राभनखपंक्तिविराजितः
अशोकपुष्पसंकाशरक्तोष्ठमुखपंकजः १६६
अनर्घ्यमुक्तिकाभासदंतपंक्तिविराजितः
संपूर्णचंद्रप्रतिमस्मितवक्त्रसुशोभितः १६७
आरूढयौवनः श्रीमान्कोमलावयवोज्ज्वलः
शरणयःसर्वलोकानांसर्वलोकफलप्रदः १६८
सदृशीतस्यदेवीतुरूपशीलगुणादिभिः
तप्तकांचनसंकाशातप्तकांचनभूषणा १६९
तरुणीरूपलावरायाकान्तिशीलगुणान्विता
दुग्धाब्धिफेनसंकाशशुभवस्त्रेणवेष्टिता १७०
मंदारकेतकीजातीपुष्पार्चितशिरोरुहा
कस्तूरीतिलकोपेतारत्नसीमंतशोभिता १७१
नानावर्णसुशोभाढ्याकर्णभूषणभूषिता
प्रवालसदृशज्योत्स्नारक्तधारसुविस्मिता १७२
मत्तभृङ्गोपमैः स्निग्धैरलकैःसुविराजिता
तनुमध्याविशालाक्षीपीनोन्नतपयोधरा १७३
चतुर्हस्तैर्विराजंतीसर्वाभरणभूषिता
उद्बाहुभ्यांधृतादेवीहेमपद्मयुगंशुभम् १७४
इतराभ्यांसमाश्लिष्यभर्तारंनिबिडंस्थिता
आलोकयंतीसततंत्रिदशांश्चकटाक्षकै १७५
निरीक्षितास्तयादेव्याधन्यास्तेसततंशिवे
तत्रेदेवाविमानस्थाः सिद्धचारणकिन्नराः १७६
गायंतिसततंदेवीमानंदाश्रुपरिप्लुताः
दैतेयैर्बाधयमानैस्तुब्रह्मरुद्रादिभिःसुरैः १७७
संस्तूयमानस्तत्रेशोदेवानामभयंददौ
देवानामभयंदत्त्वासर्वदेवेश्वरोहरिः १७८

राक्षसान्हंतुमारेभेजगत्संरक्षणायवै
एवंचतुर्थंव्यूहंतुहरेः प्रोक्तंतवानघे १७९
किमन्यच्छ्रोतुकामासीत्तद्ब्रवीमिवरानने
धन्यासिकृतकृत्यासिभक्तासिपुरुषोत्तमे १८०
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेविष्णुव्यूहभेद वर्णनंनामएकोनत्रिंशदधिकद्विशततमोऽध्यायः २२९

त्रिंशदधिक द्विशततमोऽध्यायः

पार्वत्युवाच-
भगवन्यत्रदेवेशोराक्षसान्मधुसूदनः
जघानकेनरूपेणयथावद्वक्तुमर्हसि १
वैभवंचस्थवीयस्यमत्स्यकूर्म्मादिरूपकम्
विस्तरेणसमाख्याहिममप्रीत्यामहेश्वर २
महादेव उवाच-
शृणुदेविप्रवक्ष्यामिवैभवंस्वस्थमानसा
मत्स्यकूर्म्मादियद्रूपमवतारात्मकंहरेः ३
दीपादुत्पाद्यतेदीपोयथावत्तद्भविष्यति
परावस्थापरेशस्यसव्यूहाविभवादयः ४
उक्तादेवावतारास्तुविविधाकारकाःशुभाः
अर्च्चावतारादेवस्यवैभवाः परमात्मनः ५
प्राजापत्येनवैब्रह्मासम्राट्परमोत्सवः
भृगुंमरीचिमत्रिंचदक्षंकर्द्दममेवच ६
पुलस्त्यंपुलहंचैवगिरिशंचतथाक्रतुम्
नवप्रजानांपतयइमेप्रोक्तायथाक्रमम् ७
मरीचिर्भगवांस्तत्रजनयामासकश्यपम्
कश्यपस्याभवञ्जायाश्चतस्रःशुभदर्शने ८
अदितिश्चदितिश्चैवकद्रुश्चविनतातथा
अदितिर्जनयामासदेवांस्तुशुभदर्शनान् ९
दितिश्चराक्षसान्पुत्रांस्तामसान्सुमहासुरान्
शंबूकस्तुहयग्रीवोहिरण्याक्षोमहाबलः १०

हिररायकशिपुर्जंभोमयाद्याः सुमहातपाः
मकरस्तुमहावीर्योब्रह्मलोकमुपागतः ११
ब्रह्माणंमोहयित्वाऽसौवेदाञ्जग्राहवीर्यवान्
ग्रसित्वाचश्रुतिं सोऽथप्रविवेशमहार्णवम् १२
ततः सर्वंजगच्छून्यमभवद्धर्मसंकरः
नाधीतंनवषट्कारंवर्णाश्रमविवर्जितम् १३
ततः प्रजापतिर्देवः सर्वदेवगणैर्वृतः
गत्वादुग्धांबुधिंदेवंतुष्टावशरणंगतः १४
ब्रह्मोवाच-
प्रसीददेवमेनाथनागपर्यंकसंस्थित
सर्वेशसर्वदेवात्मन्सर्ववेदमयाच्युत १५
आद्यंजगद्भवोबीजंमध्येत्वंसर्वतोऽधिकः
अंतेचपशुनाथस्त्वंस्वेच्छयातस्तमेवच १६
त्वमेवधत्सेचिद्रूपंजगत्सर्वंसनातनम्
त्वमव्यक्तोहिभूतादिःप्रधानपुरुषोऽव्ययः १७
त्वमादिमध्यांतवपुर्जगतः परमेश्वरः
त्वमेवसर्वलोकानामाश्रयः पुरुषोत्तमः १८
भूतादिस्त्वंमहद्भूतंभूतसंघस्यकारणम्
त्वमेवकारणमाश्रित्यरमतेधामआत्मवान् १९
त्वमादिभूतश्चांतस्त्वंत्वंवायुःसर्व्वगोमहान्
त्वमादिस्त्वमनादिश्चत्वमग्निस्तेजसाः निधिः २०
त्वमापःसर्व्वजगतांजीवनं परमेश्वरः
त्वंभूमिर्जगदाधारोभूधरस्त्वंमहामते २१
सरितं सागरस्त्वंवैसर्व्वस्यादिस्त्वमेवच
देवर्षिःसर्वभूतानित्वमेवपुरुषोत्तम २२
त्वयैवप्रेरितालोकाश्चेष्टंतेसाध्वसाधुषु
दैत्येनोपद्रुतावेदाः प्रविष्टामहदर्णवम् २३
वेदाधारमिदंसर्व्वंजगत्स्थावरजंगमम्
वेदाश्चैवहिसर्व्वेषांधर्माणांपरितः स्थितिः २४
वेदेषुसर्वदेवानांनित्यतृप्तिर्भविष्यति

तस्माद्वेदान्समानेतुंत्वमेवार्हसिकेशव २५
श्रीमहादेवउवाच-
एवमुक्तोहृषीकेशोब्रह्मणापरमेश्वरः
मत्स्यरूपंसमास्थायप्रविवेशमहोदधिम् २६
तं दैत्यंसुमहाघोरंमाकररूपमास्थितः
तुण्डाग्रेणविदार्याथजघानामरपूजितं २७
तंहत्वासर्ववेदांश्चसाङ्गोपाङ्गसमन्वितान्
गृहीत्वाप्रददौतस्मैब्रह्मणेसमहाद्युतिः २८
अन्योन्यमिश्रितावेदाग्रसितास्तेनरक्षसा
व्यक्ताभगवतातेनव्यासरूपेणधीमता २९
पृथग्भूतासमंवेदाव्यासेनैवमहात्मना
एवंमत्स्यावतारेणरक्षिताःसर्व्वदेवताः ३०
श्रुतिप्रदानेनजगत्त्रयंतदाकृत्वानिरातंकमहोरमाधवः
संस्तूयमानः सुरसिद्धसंघैरंतर्दधेयोगिभिरर्च्चितांघ्रिः
वासुदेवोहिभवगान्सर्वदेवमयोहरिः ३१
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्सहस्रसंहितायामुत्तरखंडेउमामहेश्वर
संवादेमत्स्यावतारवर्णनंनामत्रिंशदधिकद्विशततमोऽध्यायः २३०

एकत्रिंशदधिक द्विशततमोऽध्यायः

श्रीरुद्रउवाच-
यत्कौर्म्यवैभवंविष्णोः सर्वलोकनमस्कृतम्
तद्वक्ष्यामिप्रियेसम्यक्शृणुष्वेकाग्रचेतसा १
अत्रिपुत्रोमहातेजादुर्वासाइतिविश्रुतः
प्रचण्डः सर्वलोकानांक्षोभकारीमहातपाः २
सययौहिमवत्पृष्ठंब्रह्मर्षिस्तपसोनिधिः
ममांशभूतोब्रह्मर्षिःसर्वेषांभयदस्सदा ३
उषितस्तत्रवर्षंतुकिन्नरीभिः सपूजितः
महेंद्रंद्रष्टुकामोऽसौस्वर्लोकंप्रययौमुनिः ४
तस्मिन्कालेमहातेजागजारूढंमहेश्वरम्
ददर्शसर्वदेवैस्तंपूज्यमानंशचीपतिम् ५

तच्चदृष्ट्वासहृष्टात्मादुर्वासासुमहातपाः
पारिजातस्त्रजंतस्मैप्रददौविनयान्वितः ६
आदायदेवताधीशस्तांस्त्रजंगजमूर्द्धनि
विन्यस्यतत्रदेवेशःप्रययौनंदनंप्रति ७
करेणादायतांमालांमदोद्रिक्तस्ततोगजः
पीडयित्वाथचिक्षेपसंस्थितांधरणीतले ८
ततः क्रुद्धोमहातेजादुर्वासारक्तलोचनः
प्रशप्तवान्महेंद्रंतंसंतप्तक्रोधवह्निना ९
दुर्वासाउवाच–
त्रैलोक्यैकश्रियायुक्तोयस्मान्मामवमन्यते
तस्मात्त्रैलोक्यश्रीर्नष्टाभवत्वेवनसंशयः १०
रुद्रउवाच–
इतिशप्तस्ततः शक्रोजगामस्वपुरंपुनः
ततः श्रीर्जगतांधात्रीक्षणादंतर्दधेस्वयम् ११
अंतर्द्धानंगतालक्ष्मीस्तदानष्टंजगत्त्रयम्
यदपांगाश्रितंसर्वंजगत्स्थावरजंगमम् १२
तस्यामंतर्द्धानवत्यांसर्वंनष्टतरंभवत्
ब्रह्मादित्रिदशाः सर्वेगंधर्वायक्षकिन्नराः १३
दैत्याश्चदानावानागामनुष्याराक्षसास्तथा
पशवः पक्षिणः कीटाःसर्वेस्थावरजंगमाः १४
तयालक्ष्म्याजगन्मात्रातेसर्वेनावलोकिताः
दारिद्र्येनैवविहितास्तेसर्वेदुःखभागिनः १५
क्षुत्पिपासार्दितादेवाश्चुक्रुशुर्गतचेतसः
नववर्षजलधरः सर्वेशुष्काजलाशयाः १६
सर्वेतेपादपाशुष्काःफलपुष्पविवर्जिताः
तदादेवाः सगंधर्वा दैत्यदानवराक्षसाः १७
क्षुत्पिपासार्द्दिताजग्मुः ब्रह्माणममितौजसम्
ऊचुस्तंदेवदेवेशमब्जयोनिंपितामहम् १८
देवाऊचुः –
भगवन्क्षुत्पिपासाभ्यांपीडितंहिजगत्त्रयम्

नहुतंनवषट्कारः सर्वधर्म्मविवर्जितम् १९
क्षुत्पिपासार्द्दिताः सर्वेदेवदानवमानवाः
त्रातारंसर्वलोकेशंभवंतंशरणंगताः २०
त्रातुमर्हसिदेवेशक्षुत्पिपासार्दिताञ्जनान्
रुद्रउवाच-
इतितेषांवचः श्रुत्वासर्वलोकपितामहः २१
उवाचपरमप्रीतस्तान्सर्वान्प्रतिमानदः
ब्रह्मोवाच-
शृणुध्वंदेवताःसर्वे दैत्यगंधर्वमानवाः २२
महेंद्रस्यापचारेणसर्वमेतदुपस्थितम्
समुद्भूतमिदंघोरंजगत्संवर्त्तकंमहत् २३
दुर्वासाः सुमहात्मातुयतः क्रोधमवाप्तवान्
तस्मात्क्रोधेनतेनेदंनष्टंलोकत्रयंसुराः २४
असौरोषपरीतात्माक्रोधेनकलुषीकृतः
जगत्त्रयंचश्रीनष्टंभवत्वित्याहदुर्मतिः २५
तच्छापाज्जगतांधात्रीलक्ष्मीर्न्नारायणप्रिया
अंतर्द्धानंगतादेवीजगन्मातामहेश्वरी २६
यदपाङ्गेक्षितालोकाभवंतिसुखितास्तथा
नालोकिताजगन्मात्रादुःखभागिनएवहि २७
तस्मात्सर्वेवयंगत्वादुग्धाब्धौस्थितमुत्तमम्
तत्रनारायणंदेवमर्च्चयामः सनातनम् २८
तस्मिन्प्रसन्नेदेवेशेशिवमेतद्भवेज्जगत्
इति निश्चित्यमनसाब्रह्मादेवगणैर्युतः २९
भृग्वादिमुनिभिः सार्द्धंप्रययौक्षीरसागरम्
क्षीराब्धावुत्तरतटेब्रह्मरुद्रादिदेवताः ३०
विष्णुंसमर्च्चयामासुः पौरुषेणविधानतः
जपन्नष्टाक्षरंमंत्रंपौरुषंसूक्तमेवच ३१
ध्यायंतोऽनन्यमनसोजुहुवुःपरमेश्वरम्
तुष्टुवुःस्तवनैर्दिव्यैर्नमश्चक्रुर्विचित्रधा ३२
ततःप्रसन्नोभगवान्सर्वेषांचदिवौकसाम्

तेषांसंदर्शनेतस्थौस्तूयमानोमहर्षिभिः ३३
वैनतेयंसमारुह्यसर्वदेवमयंविभुम्
तंदृष्ट्वाजगतामीशंशंखचक्रगदाधरम् ३४
पीतवस्त्रंचतुर्बाहुंपुंडरीकनिभेक्षणम्
श्रीवत्सकौस्तुभोरस्कंवनमालाविभूषितम् ३५
किरीटहारकेयूरनूपुरैरुपशोभितम्
तुष्टुवुर्जयशब्देननमश्चक्रुर्निरंतरम् ३६
ततः प्रोवाचभगवान्कृपयासर्वदेवताः
वरदोस्मिवरंदेवावृणीध्वमितिचाब्रवीत् ३७
इति श्रुत्वातदासर्वेदेवाब्रह्मपुरोगमाः
ऊचुःप्रांजलयोदेवमिदंवचमीश्वरम् ३८
देवाऊचः
भगवन्मुनिशापेनसंप्रतीदंजगत्त्रयम्
क्षुत्पिपासार्दितंसर्वंसदेवासुरमानुषम् ३९
तस्माद्भवंतंशरणंयाताः स्मपुरुषोत्तम
त्राहिसर्वमिमंलोकंनान्यः शक्तोभवेत्क्वचित् ४०
रुद्रउवाच–
इत्युक्तोदेवतैःसर्वैरच्युतः परमेश्वरः
विचार्य्यैतदुवाच्तान्देवान्ब्रह्मपुरोगमान् ४१
श्रीभगवानुवाच–
अत्रिसूनोर्मुनेः शापादंतर्द्धानंगतारमा
कटाक्षदर्शनात्तस्याजगदैश्वर्य्यसंयुतम् ४२
तस्माद्यूयंसुराः सर्वेशिवब्रह्मपुरोगमाः
उत्पाट्यमंदरंशैलंनिधायक्षीरसागरम् ४३
मंदरंघर्घरंकृत्वासर्प्पराजेनवेष्टितम्
कुरुध्वंमथनंदेवादैत्यगंधर्वदानवैः ४४
उत्पद्यते चसालक्ष्मीर्जगत्संरक्षणायवै
तयाहृष्टामहाभागाभविष्यथनसंशयः ४५
धारयाम्यहमेवाद्रिंकूर्मरूपेणसंवृतः
ममशक्त्यासुरान्सर्वान्प्रविश्यचबलीयसः ४६

रुद्रउवाच-
इत्युक्तादेवताः सर्वाहरिणाकामलक्षणे
साधुसाध्विविदेवेशमूचुर्ब्रह्मपुरोगमाः ४७
संस्तूयमानोभगवानच्युतःसुरसत्तमैः
अंतर्दधेततः श्रीमान्सर्वलोकनमस्कृतः
सर्वाधारःसर्वदेवः सर्वत्रसमदर्शनः ४८
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
उमामहेश्वरसंवादे दुर्वाससःशापकथनंनाम
एकत्रिंशदधिकद्विशततमोऽध्यायः २३१

द्वात्रिंशदधि द्विशततमोऽध्यायः

शंकरउवाच-
ततःसुरगणाःसर्वेदानवाद्यामहाबलाः
उत्पाट्यमंदरंशैलंचिक्षिपुःपयसांनिधौ १
ततोनारायणः श्रीमान्भगवान्भूतभावनः
कूर्मरूपेणतंशैलंदधारामितविक्रमः २
अनादिमध्यांतवपुर्विश्वरूपःसनातनः
अधारयद्गिरिवरंसंपूज्योजगदीश्वरः ३
तथैकेनभुजेनैवईश्वरः सर्वगोऽव्ययः
ततोदेवासुराःसर्वेममंथुःक्षीरसागरम् ४
सर्प्पराजेनसंवेष्ट्यघर्घरंमंदराचलम्
मथ्यमानेऽथदुग्धाब्धौदैवतैः सुमहाबलैः ५
उत्पादनार्थंलक्ष्म्याश्चसर्वएवमहर्षयः
उपोष्यनियमंकृत्वाजेपुःश्रीसूक्तमेवच ६
सहस्रनामपठनंचक्रुर्दिव्याद्विजोत्तमाः
एकादश्यांतुशुद्धायांमथ्यमानेमहांबुधौ ७
उपोष्यऋषयःसर्वेजप्तंश्रीमंत्रमुत्तमम्
कांक्षमाणाश्चयेजप्तुंलक्ष्मीनारायणंहरिम् ८
ध्यात्वा समर्च्चयामासुर्द्विजाग्र्यामुनिसत्तमाः
ततस्तस्मिन्मुहूर्तेतुमथ्यमानेमहांबुधौ ९

समभूत्तत्रप्रथमंकालकूटंमहाविषम्
महापीडंमहाघोरंसंवर्ताग्निसमप्रभम् १०
दृष्ट्वाप्रदुद्रुवुःसर्वेभयार्तादेवदानवाः
ततस्तान्विद्रुतान्दृष्ट्वाभयार्त्तान्सुरसत्तमान् ११
ततस्तानब्रुवंवाक्यमहं तत्रशुभेक्षणे
भोभोदेवगणाःसर्वैर्नभेतव्यंविषंप्रति १२
अहमाहारयिष्यामिकालकूटंमहाविषम्
इत्युक्तास्तेमयासर्वेदेवाइंद्रपुरोगमाः १३
साधुसाध्विितिवाक्यैर्मातुष्टबुःप्रणताभृशम्
तदृष्ट्वामेघसंकाशंप्रादुर्भूतंमहाविषम् १४
ध्यात्वानारायणंदेवंहृदयेगरुडध्वजम्
उदयादित्यसंकाशंशंखचक्रगदाधरम् १५
श्रीभूमिसहितंदेवंतप्तकांचनकुराडलम्
एकाग्रमनसाध्यात्वासर्वदुःखहरंप्रभुम् १६
नामरूपंमहामंत्रंजप्त्वालक्ष्म्यासमन्वितम्
तद्विषंतुमहाघोरमाद्यंसर्वभयंकरम् १७
नामत्रयप्रभावाच्चविष्णोःसर्वगतस्यवै
विषंतदभवज्जीर्णंलोकसंहारकारकम् १८
अच्युतानंतगोविन्दइतिनामत्रयंहरेः
योजपेत्प्रयतोभक्त्याप्रणवाद्यंनमोंतकम् १९
तस्यमृत्युभयंनास्तिविषरोगाग्निजंमहत्
नामत्रयंमहामंत्रजपेद्यःप्रयतात्मवान् २०
कालमृत्युभयंचापितस्यनास्तिकिमन्यतः
इतिनामत्रयेणैवपीतंदेविमयाविषम् २१
ततः प्रहृष्टास्त्रिदशास्तुष्टुवुर्मांसुविस्मिताः
मांप्रणम्यपुनर्देवाममंथुःक्षीरसागरम्
तस्मिन्प्रमथ्यमानेतुमयादेवैश्चभामिनि २२
ज्येष्ठादेवीसमुत्पन्नारक्तस्रग्वाससावृता
उत्पन्नासाऽब्रवीद्देवान्किंकर्त्तव्यंमयेतिवै २३
तामब्रुवंस्तुतेदेवींसर्वदेवगणाभृशम्

देवाऊचुः
येषांगृहांतरेरम्येकलहःसंप्रवर्त्तते २४
तत्तेस्थानंप्रयच्छामोवस तत्राशुभान्विता
परुषंभाषणन्नित्यंवदंत्यनृतवादिनः २५
संध्याकालेतुयेपापाःस्वपंतिमलचेतसः
तेषांवेश्मनिसंतिष्ठदुःखदारिद्र्यदायिनी २६
कपालकेशभस्मास्थितुषांगारानियत्रतु
तत्रतेसततंस्थानंभविष्यतिनसंशयः २७
यस्यवेश्मकपालास्थिभस्मकेशादिचिह्नितम्
तत्रवसाशुभेनित्यंकलिनासहनित्यशः २८
अकृत्वापादयोः शौचंयस्त्वाचामतिदुर्म्मतिः
तंभजस्वमहादेविकलुषेणभृशंवृतम् २९
तुषांगारक पालाश्मवालुकावस्त्रचर्म्मभिः
दंतधावनकर्तारोभविष्यंतिनराधमाः ३०
रमस्वकलिनादेवितेषांवेश्मसुनित्यशः
तिलपिष्टंकलंजंचकलिगंशिग्रुगृंजनम् ३१
छत्राकंविड्वराहंचबिल्वंकोशातकीफलम्
अलाबुंचपलांडुंचयेखादंतिनराधमाः
तेषांगेहेह्यवस्थानंदेवीदारिद्र्यदेसदा ३२
रुद्रउवाच-
इत्यादिश्यसुराः सर्वेज्येष्ठांचकलिवल्लभाम्
पुनश्चमंथनंचक्रुःक्षीराब्धिंसुसमाहिताः ३३
ततश्चवारुणीदेवीसमुत्पन्नाशुभानने
अनंतोनागराजोऽथतां जग्राहसुलोचनाम् ३४
ततः सुरासमुत्पन्नासर्वाभरणभूषिता
वैनतेयस्यभार्याभूत्सर्वलक्षणशोभिता ३५
ततोऽप्सरोगणादिव्यागंधर्वाश्चमहौजसः
जज्ञिरेरूपसंपन्नामधुगायनतत्पराः ३६
एरावतस्ततोजज्ञेतथैवोच्चैःश्रवाहयः
धन्वंतरिःपारिजातं सुरभिःसर्वकामधुक् ३७

एतान्सर्वान्सहस्राक्षोजग्राहप्रीतमानसः
ततः प्रभातसमयेद्वादश्यामुदितेरवौ ३८
मथ्यमानेपुनस्तस्मिन्देवैरिंद्रपुरोगमैः
ततः प्रहृष्टवदनैस्तूयमानामहर्षिभिः ३९
उत्पन्नाश्रीर्महालक्ष्मीसर्वलोकेश्वरीशुभा
बालार्ककोटिसंकाशाकनकांगदभूषिता ४०
हेमांबुजसमासीनासर्वलक्षणशोभिता
पद्मपत्रविशालाक्षीनीलकुंचितमूर्द्धजा ४१
दिव्यचंदनलिप्तांगीदित्यपुष्पैरलंकृता
नानारत्नमयैर्दिव्यैः सर्वैराभरणैर्युता ४२
तनुमध्याजगद्धात्रीपीनोन्नतपयोधरा
चतुर्हस्ताविशालाक्षीपूर्णेंदुसदृशानना ४३
वसुपात्रंमातुलुंगंस्वर्णपद्मयुगंशुभम्
बिभ्राणाहस्तकमलैः सर्वाभरणभूषितैः ४४
अम्लानपंकजांमालांधारयंतीह्युरः स्थले
ददृशुस्तांमहादेवींसर्वलोकहितैषिणीम् ४५
ईश्वरींसर्वभूतानांमातरंपद्ममालिनीम्
नारायणींजगद्धात्रींनारायणहृदालयाम् ४६
तांविलोक्यमहालक्ष्मींप्रहृष्टाःसर्वदेवताः
अवादयंतःपटहान् दिविदेवगणाभृशम् ४७
ववर्षुःपुष्पवर्षाणिवनदेव्योनिरंतरम्
जगुर्गंधर्वपतयोननृतुश्चाप्सरोगणाः ४८
ववुःपुण्यास्तथावाताः सुप्रभोऽभूद्दिवाकरः
जज्वलुश्चाग्नयः शांताःप्रसन्नाश्चदिशोदश ४९
अनंतरंशीतरश्मिरुदभूत्क्षीरसागरे
सुधामय्खवान्सोमोमातुर्भ्रातासुखावहः ५०
नक्षत्राधिपतिश्चाभूच्चंद्रोवैलोकमातुलः
ततोजायाहरेः पुण्यातुलसीलोकपावनी ५१
समुत्पन्नाजगद्धात्रीपूजार्थंशार्ङ्गिणोहरेः
ततः प्रहृष्टमनसः सर्वेदेवादिवौकसः ५२

तंशैलंपूर्ववत्स्थाप्यपरिपूर्णमनोरथाः
समेत्यमातरंसर्वेशिवब्रह्मपुरोगमाः ५३
स्तुत्वानामसहस्रेणजेपुः श्रीसूक्तसंहिताः
ततःप्रसन्नासादेविसर्वान्देवानुवाचह ५४
श्रीरुवाच-
वरंवृणीध्वंभद्रंवोवरदाहंसुरोत्तमाः
रुद्रउवाच-
ऊचुःप्रांजलयोदेवाः श्रियंनम्रात्ममूर्तयः ५५
देवाऊचुः -
प्रसीदकमलेदेविसर्वलोकेश्वरप्रिये
विष्णोर्वक्षस्थलेदेविभवनित्यानपायिनी ५६
त्रैलोक्यंपालयादेवीनित्यात्वंपरमेश्वरी
यदपांगाश्रितंसर्वंजगत्स्थावरजंगमम् ५७
त्वयाविलोकिताः सर्वेप्रभवंतिदिवौकसः
मातारुद्रादिदेवानामैश्वर्यंत्वत्कटाक्षतः ५८
एतदिच्छामहेदेविजगन्मातर्नमोस्तुते
रुद्रउवाच-
इत्युक्तादैवतैःसर्वैर्लोकमातामहेश्वरी ५९
एवमस्त्वितितान्देवान्प्राहनारायणप्रिया
ततोनारायणः श्रीशःशंखचक्रगदाधरः ६०
तथैवाविरभूद्ब्रह्मापूर्ववत्क्षीरसागरे
ततः प्रतुष्टुवुर्देवानमस्कृत्वाजनार्दनम् ६१
ऊचुः प्रांजलयः सर्वेप्रहृष्टवदनाः शुभाः
देवाऊचुः-
गृहाणदेवींसर्व्वेशमहिर्षीतववल्लभाम् ६२
जगत्संरक्षणार्थायलक्ष्मीमनपगामिनीम्
रुद्रउवाच-
इत्युक्त्वामुनिभिः सर्वेदेवाब्रह्मपुरोगमाः ६३
नानारत्नमयेदिव्येपीठेबालार्कसंनिभे
निवेश्यदेवींदेवंचआनंदाश्रुपरिप्लुताः ६४

दिव्याम्बरैर्दिव्यमाल्यैर्नानारत्नविभूषितैः
लक्ष्म्यासहसमासीनमर्चयामासुरच्युतम् ६५
गंधैर्धूपैश्चदीपैश्चनैवेद्यैश्चसुधामयैः
अप्राकृतैःफलैर्दिव्यैरर्चयामासुरीश्वरीम् ६६
अमृतादुत्थितादेवीतुलसीकोमलाशुभा
तयाश्रीपादयुगलमर्च्चयामासुरंजसा ६७
प्रदक्षिणत्रयंकृत्वानमस्कृत्वामुहुर्मुहुः
तष्टुवुस्तुतिभिर्द्देवाहर्षपूर्णाश्रुविक्लवाः ६८
ततःप्रसन्नोभगवान्सर्वदेवेश्वरोहरिः
अभीष्टान्प्रददौतेभ्योवरान्देव्यासहप्रभुः ६९
ततः सुहृष्टाःसुरमानुषाद्यालक्ष्मीकटाक्षार्प्पितदृष्टिपूताः
प्रभूतधान्यार्थयुतानिरंतरंसुखंपरंप्रापुरनामयाभृशम् ७०

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमा
महेश्वरसंवादेलक्ष्म्युत्पत्तिर्नामद्वात्रिंशदधिकद्विशततमोऽध्यायः २३२

त्रयस्त्रिंशदधिक द्विशततमोऽध्यायः

शंकरउवाच–
ततःप्रोवाचभगवान्सुरांश्चैवमहामुनीन्
देव्यासहप्रहृष्टात्मासर्वलोकहितायवै १
श्रीभगवानुवाच–
शृणुध्वंमुनयःसर्वेदेवताश्चमहावलाः
एकादशीमहापुण्यासर्वोपद्रवनाशिनी २
लक्ष्मीसंदर्शनार्थायभवद्भिःसमुपोषिता
तस्मात्तुसर्वदापुण्याद्वादशीममवल्लभा ३
अद्यप्रभृतियेलोकाउषिताःपूर्ववासरे
द्वादश्यामुदितेभानौश्रद्धयापरयायुताः ४
येपूजयंतिमांभक्त्यातुलस्याचश्रियासह
सर्वेतेबन्धनिर्मुक्ताः प्राप्नुवंतिपदंमम ५
नार्च्चयंतिचयेवैमांद्वादश्यांपुरुषोत्तमम्
तेनराःपापकर्माणोममायाविमोहिताः ६

येनार्चयंतिपापिष्ठानरानरकगामिनः
तान्पापान्विषयैर्बद्धान्ममपूजापराङ्मुखान् ७
क्षिपत्यजस्त्रंसंसारेमायाममदुरत्यया
रुद्रउवाच-
एवमुक्त्वातुभगवान्परमात्मासनातनः ८
संस्तूयमानोमुनिभिः प्रययौकमलालयम्
क्षीराब्धौशेषपर्य्यंङ्केविमानेसूर्य्यसन्निभे ९
देव्यासहविशालाक्ष्यारमयापरमेश्वरः
दर्शनार्थंसुराणांचतत्रसन्निहितोऽभवत् १०
ततःसुरगणाःसर्व्वेकूर्म्मरूपंसनातनम्
भक्त्यासंपूजयित्वाथतुष्टुवुर्हृष्टमानसाः ११
ततः प्रसन्नोभवगान्कूर्म्मरूपीजनार्द्दनः
भगवानुवाच-
वरंवृणीध्वंदेवेशायद्वोमनसिवर्त्तते
रुद्रउवाच-
ततोदेवगणाःसर्वेकूर्म्मरूपंजनार्दनम् १२
उचुःप्रांजलयः सर्व्वेहर्षनिर्भरमानसाः
देवाऊचुः-
शेषस्यदिग्गजानांचसहायार्थंमहाबल १३
धर्तुमर्हसिदेवेशसप्तद्वीपवतींमहीम्
रुद्रउवाच-
एवमस्त्वितिहृष्टात्माभगवाल्लोँकभावनः १४
धारयामासधरणींसप्तद्वीपसमावृताम्
ततोदेवाःसगंधर्वादैत्यदानवमानुषाः १५
महर्षिभिरनुज्ञाताःस्वर्लोकान्प्रतिपेदिरे
तदाप्रभृतितेसर्व्वेदेवाब्रह्मपुरोगमाः १६
सिद्धायेमानुषाश्चैवयोगिनोमुनिसत्तमाः
विष्णोराज्ञांपुरस्कृत्यभक्त्यापरमया युताः १७
एकादश्यामुपोष्याथभक्त्याचैवजनार्दनम्
द्वादश्यामर्च्चनंचक्रुर्विधिनावरवर्णिनि १८

एतत्तुसर्वमाख्यातंदेव्याजन्मवरानने
कौर्म्यंचवैभवंविष्णोःकिमन्यच्छ्रोतुमिच्छसि १९

इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंड
ेउमामहेश्वरसंवादे एकादश्युपवासकथनंनाम
त्रयस्त्रिंशदधिकद्विशततमोऽध्यायः २३३

चतुस्त्रिंशदधिकद्विशततमोऽध्यायः

पार्वत्युवाच-
भगवञ्छ्रोतुमिच्छामिद्वादश्याश्चविधानकम्
विष्णोःपूजाविधानंचकर्त्तव्यंतत्रवैप्रभो १
एकादश्याः प्रभावंचसर्वपापहरंनृणाम्
आचक्ष्वविस्तरेणैवमयिप्रीत्यामहेश्वर २
महादेवउवाच-
शृणुदेविप्रवक्ष्यामिद्वादश्याश्चविधानकम्
तस्याःस्मरणमात्रेणसंतुष्टः स्याज्जनार्दनः ३
एकादश्यांतुप्राप्तायांसमुपोष्येहमानवः
सर्वपापविनिर्मुक्तायांतिविष्णोः परम्पदम् ४
सप्तजन्मार्जितंपापज्ञानतोऽज्ञानतः कृतम्
क्षणादेवलयंयातिद्वादश्यांहरिपूजनात् ५
अश्वमेधसहस्राणिवाजपेयशतानिच
एकादश्युपवासस्यकलांनार्हंतिषोडशीम् ६
धर्म्मदाह्यर्थदाचैवकामदामोक्षदाकिल
सर्व्वकामदुघानृणांद्वादशीवरवर्णिनी ७
एकादशीसमंकिंचित्पापत्राणंनविद्यते
एकादशीसमंकिचिद्व्रतंनास्तिशुभेक्षणे ८
एकादशींपरित्यज्ययोह्यन्यद्व्रतमाचरेत्
सकरस्थंमहाराज्यंत्यक्त्वाभैक्ष्यंतुयाचते ९
एकादशेंद्रियैःपापंयत्कृतंभवतिप्रिये
एकादश्युपवासेनतत्सर्वंविलयंव्रजेत् १०
रटंतीहपुराणानिभूयोभूयोवरानने

नभोक्तव्यंनभोक्तव्यंसंप्राप्तेहरिवासरे ११
अभक्ष्यंसर्वदाप्रोक्तंकिंपुनःशुक्लकृष्णयोः
वर्णानामाश्रमाणांचसर्वेषांवरवर्णिनी १२
एकादश्युपवासस्तुकर्त्तव्योनात्रसंशयः
एकादश्यांचप्राप्तायांमातापित्रोमृतेऽहनि १३
द्वादश्यांतुप्रदातव्यंनोपवासदिनेक्वचित्
गर्हितान्नंनवाश्नंतिपितरश्चदिवौकसः १४
एकादश्यांनभोक्तव्यंसुरांवानपिबेत्क्वचित्
ब्राह्मणं नैवहन्यात्तुसम मेतत्त्रयंमतम् १५
तस्मादेकादशींशुद्धामुपवासंसमाचरेत्
अवस्थात्रितयेयस्तुयत्नोवाक्कायकर्म्मभिः १६
दशमीमिश्रितांतांतुप्रयत्नेनविवर्ज्जयेत्
अरुणोदयवेलायां दशमीमिश्रिताभवेत् १७
तांत्यक्त्वाद्वादशींशुद्धामुपोष्येहाविचारयन्
कलायांविद्यमानायांसूर्य्यस्योदयनंप्रति १८
त्रयोदश्यांतथादेविद्वादशीपरिविद्यते
तथाचद्वादशीशुद्धाह्युपवासेविधीयते १९
अरुणोदयवेलायांकृत्यंसर्वंसमाचरेत्
कलायामपिद्वादश्यांपारणंतत्रचोदितम् २०
शुद्धामेकादशींचापित्यजेदत्रनसंशयः
कलाप्येकादशीयत्रद्वादश्यामुदितेरवौ २१
सर्वामेकादशींत्यक्त्वातत्रैवोपवसेद्द्विजः
एवंविधिंविनिश्चित्यसमुपोष्यंहरेर्द्दिनम् २२
सायमाद्यंतयोरह्नोःसायंप्रातस्तुमध्यमे
तत्रोपवासंकुर्वीतत्यक्त्वा भुक्तिचतुष्टयम् २३
दशम्यामेकभक्तस्तुनारीसंगमवर्जितः
अवनीतल्पशायीचपरेऽहनिवसेच्छुचिः २४
धात्रीफलानुलिप्तांगःस्नानंसंध्यांसमाचरेत्
उपवासपरोभूत्वारात्रौसंपूजयेद्धरिम् २५
पाखंडिनंविकर्मस्थंपतितंश्वपचंतथा

नावलोकेन्नसंभाषेन्नस्पृशेत्तत्रवैष्णवः २६
अवैष्णवस्तुयोविप्रःसपाषराडःप्रकीर्तितः
शिखोपवीतत्यागीचविकर्मस्थइतीरितः २७
महापापोपपापाभ्यांयुक्तःपतितउच्यते
अंत्यजःश्वपचःप्रोक्तोवेदैस्तत्रसुनिर्णयः २८
रात्रौसंपूज्यदेवेशंजागरंचसमाचरेत्
गंधैःपुष्पैस्तथादीपैर्वस्त्रैराभरणैःशुभैः २९
जपैस्तोत्रैर्नमस्कारैःपूजयेन्निशिभक्तितः
ततः प्रभातसमयेतुलसीमिश्रितैर्जलैः ३०
स्नात्वासम्यग्विधानेनसंतर्प्यपितृदेवताः
पूजयेज्जगतामीशंलक्ष्म्यासहजनार्दनम् ३१
कोमलैस्तुलसीपत्रैःपुष्पैश्चैवसुगंधिभिः
दीपान्नीराजयेत्तत्रवारमष्टोत्तरंशतम् ३२
शतपत्रकृतांमालांताभ्यांसम्यङ्निवेदयेत्
धूपंदीपंचनैवेद्यंतांबूलंचसमर्प्पयेत् ३३
शर्करासहितंदिव्यंपायसान्नंसमर्पयेत्
कर्पूरेणचसंयुक्तंतांबूलंचनिवेदयेत् ३४
प्रदक्षिणेनमस्कारंकृत्वा भक्त्यासमन्वितः
आज्येनजुहुयाद्वह्नौशतमष्टोत्तरंतथा ३५
प्रत्यृचंपुरुषसूक्तेनलक्ष्मीसूक्तेनपायसम्
ब्राह्मणान्भोजयेद्भक्त्यास्वयंभुंजीतवाग्यतः ३६
पुराणादिप्रपाठेनक्षपयेत्तद्दिनंमहत् अं
क्षितिशायीब्रह्मचारीतस्यामेवनिशिस्वपेत् ३७
एवंसंपूज्यमानं सद्वादश्यांकमलापतिः
क्षणात्प्रसन्नोभगवान्सर्वाभीष्टप्रदोध्रुवम् ३८
इत्येतत्कथितंदेविद्वादशीव्रतमुत्तमम्
किमन्यच्छ्रोतुकामासितद्वक्तव्यंब्रवीम्यहम् ३९

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहयांसंहितायामुत्तरखंडेउमामहेश्वर
संवादेद्वादशीमाहात्म्यंनामचतुस्त्रिंशदधिकद्विशततमोऽध्यायः २३४

पंञ्चत्रिंशदधिकद्विशततमध्यायः

श्रीपार्वत्युवाच-
पाषंडानांचसंवादंवर्जयेदितियत्त्वया १
उक्तंममेहभगवान्श्वपचादपिगर्हितम्
तेयादृशाः समाख्याताःकैर्लिङ्गैश्चिह्निताभुवि
रुद्रउवाच-
येऽन्यदेवंपरत्वेनवदंत्यज्ञानमोहिताः २
नारायणाञ्जगन्नाथात्तेवैपाषंडिनःस्मृताः
कपालभस्मास्थिधरायेह्यवैदिकलिङ्गिनः ३
ऋृतेवनस्थाश्रमाच्चजटावल्कलधारिणः
अवैदिकक्रियोपेतास्तैवैपाषंडिनस्तथा ४
शंखचक्रोर्ध्वपुंड्रादिचिह्नैःप्रियतमैर्हरेः
रहितायेद्विजादेवितेवैपाषंडिनः स्मृताः ५
श्रुतिस्मृत्युदिताचारंयस्तुनाचरतिद्विजः
सपाषंडीतिविज्ञेयः सर्वलोकेषुगर्हितः ६
विनावैभगवत्प्रीत्याते वैपाषंडिनःस्मृताः
समस्तयज्ञभोक्तारंविष्णुंवैब्रह्मदैवतम् ७
उदिश्यदेवताएवजुहोतिचददातिच
सपाषण्डीतिविज्ञेयः स्वतंत्रःसर्वकर्मसु ८
स्वातंत्र्यात्कुरुतेयस्तुकर्मवेदोदितंमहत्
यस्तुनारायणंदेवंब्रह्मरुद्रादिदैवतैः ९
सममन्यैर्निरीक्षेतसपाषंडीभवेत्सदा
अवस्थात्रितयेयस्तुमनोवाक्कायकर्म्मभिः १०
वासुदेवंनजानातिसपाषंडीभवेद्द्विजः
किमत्रबहुनोक्तेनब्राह्मणायेप्यवैष्णवाः ११
नस्प्रष्टव्यानवक्तव्यानद्रष्टव्याःकदाचन
पार्वत्युवाच-
भगवन्परमंगुह्यंपृच्छामिसुरसत्तम १२
मयिप्रीत्यासमाचक्ष्वसंशयोवर्त्ततेभृशम्
कपालभस्मचर्म्मास्थिधारणंश्रुतिगर्हितम् १३

तत्त्वयाधार्य्यतेदेवगर्हितंकेनहेतुना
स्त्रीचापल्येनदेवेशपृच्छामित्वांमहामते १४
महाप्रभावात्कथितंनकर्त्तव्यं क्वचिद्भवेत्
त्वयेतिनपुराप्रोक्तंविस्तरेणमहाप्रभो १५
अकर्त्तव्यमितिप्रश्नंवक्तुंतुमर्हसिमेप्रभो
वसिष्ठउवाच-
इतिदेव्याहरः पृष्टोरहस्ये जनवर्जिते १६
उवाचपरमंगुह्यंयद्यदाचरितंस्वकम्
शिवउवाच-
शृणुदेविप्रवक्ष्यामियद्गुह्यंपरमाद्भुतम् १७
नवक्तव्यंत्वयादेविजनेषुकथितंमया
अपृथक्त्वाच्छरीरस्यवक्ष्यामितवसुव्रते १८
नमुच्याद्यामहादैत्याः पुरास्वायंभुवेंतरे
महाबलामहावीर्यामहावीरामहौजसः १९
सर्वेविष्णुरताः शुद्धाः सर्वपापविवर्जिताः
त्रयीधर्मवृताः सर्वेभग्नाइंद्रपुरोगमाः २०
विष्णोः समीपमागम्यभयार्त्ता शरणंगताः
देवाऊचुः
अजेयान्सर्वदेवानांतपोनिर्द्धूतकल्मषान् २१
त्वमेवैतान्महादैत्याञ्जेतुमर्हसिकेशव
महादेवउवाच-
इत्याकर्ण्यहरिर्वाक्यंदेवानांचभयानकम् २२
तान्समाश्वास्यदिक्पालान्मामाहपुरुषोत्तमः
श्रीभगवानुवाच-
त्वंहिरुद्रमहाबाहोमोहनार्थेसुरद्विषाम् २३
पाषंडाचरणंधर्मंकुरुष्वसुरसत्तम
तामसानिपुराणानिकथयस्वचतान्प्रति २४
मोहनानिचशास्त्राणिकुरुष्वचमहामते
मयिमुक्ताश्चविप्रश्चभविष्यंतिमहर्षयः २५
मद्भक्त्यातान्समाविश्यकथयस्वचतामसान्

काणादंगौतमंशक्तिमुपमन्युंचजैमिनिम् २६
कपिलंचैवदुर्वासंमृकंडुंचबृहस्पतिम्
भार्गवंजामदग्न्यंचदशैतांस्तामसानृषीन् २७
भावशक्त्यासमाविश्यकुर्वताजगतोशिवम्
त्वच्छक्त्याचनिविष्टास्तेतमसोद्रिक्तयाभृशम् २८
तामसास्तेभविष्यंतिक्षणादेवनसंशयः
कथयिष्यंतितेविप्रास्तामसानिजगत्त्रये २९
पुराणानिचशास्त्रणित्वयासत्वेनबृंहिताः
कपालचर्म्मभस्मास्थिचिह्नान्यमरसर्वशः ३०
त्वमेवधृतवान्लोकान्मोहयस्वजगत्त्रये
तथापाशुपतंशास्त्रंत्वमेवकुरुसत्कृतः ३१
कंकालशैवपाषंडमहाशैवादिभेदतः
अलक्ष्यंचमतंसम्यग्वेदबाह्यंनराधमाः ३२
भस्मास्थिधारिणःसर्वेभविष्यंतिह्यचेतसः
त्वांपरत्वेनवक्ष्यंतिसर्वशास्त्रेषुतामसाः ३३
तेषांमतमधिष्ठायसर्वेदैत्याःसनातनाः
भवेयुस्तेमद्विमुखाःक्षणादेवनसंशयः ३४
अहमप्यवतारेषुत्वांचरुद्रमहाबल
तामसानां मोहनार्थंपूजयामियुगेयुगे ३५
मतमेतदवष्टभ्यपतंत्येवनसंशयः
महादेवउवाच-
तच्छ्रुत्वाहंयथोक्तंतुवासुदेवेनभामिनि ३६
सुमहद्वदनोदीनोबभूवात्रवरानने
नमस्कृत्वाथतंदेवमब्रवंपरमेश्वरम् ३७
त्वयोदितमिदंदेवकरोमियदिभूतले
तस्मान्नाशायमेनाथभविष्यतिनसंशयः ३८
तत्रशक्यंमयाकर्तुमेतत्कृत्यंहरेऽधुना
त्वदाज्ञापिचनोल्लंघ्याएतद्दुःखतरंमहत् ३९
एवमुक्तेततोदेविसमाश्वास्यचमांपुनः
आत्मनाशायतेनात्रभवत्वित्याहमांहरिः ४०

देवतानांहितार्थायकुरुष्ववचनंमम
तवापिजीवनोपायंकथयामिसुरोत्तम ४१
दत्तवान्कृपयामह्यमात्मनामसहस्रकम्
हृदयेमांसमाधायजपमंत्रंममाव्ययम् ४२
षडक्षरंमहामंत्रंतारकंब्रह्मउच्यते
येजपंतिहिमांभक्तयातेषांमुक्तिर्नसंशयः ४३
इंदीवरदलश्यामंपद्मपत्रविलोचनम्
शंखांगशार्ङ्गेषुधरंसर्वाभरणभूषितम् ४४
पीतवस्त्रंचतुर्बाहुंजानकीप्रियवल्लभम्
श्रीरामायनमइत्येवमुच्चार्य्यमन्त्रमुत्तमम् ४५
सर्वदुःखहरंचैतत्पापिनामपिमुक्तिदम्
इमंमंत्रंजपन्नित्यममलस्त्वंभविष्यसि ४६
भस्मास्थिधारणाद्यत्तुसंभूतंकिल्बिषंत्वयि
मंगलंतदभूत्सर्वंमन्मंत्रोच्चारणाच्छुभात् ४७
तर्पितोनाशयिष्यामिपापंसर्वंसुरोत्तम
मदन्यदेवताभक्तिर्जायते नतुसुव्रत ४८
मनसैवार्च्चयहृदिमांनाथंपुरुषोत्तमम्
मदाज्ञांकुरुमत्प्रीत्यासर्वमेतच्छुभंतव ४९
इतिसंदिश्यमांदेविविससर्जमरुद्गणान्
विसृष्टास्तेततोदेवानिवृत्ताः स्वाश्रमंययुः ५०
ततोमांप्रार्थयामासुर्देवाइंद्रपुरोगमाः
इन्द्रादयऊचुः
शीघ्रंकुरुहितंदेवयथोक्तंहरिणाधुना ५१
महादेवउवाच–
देवतानांहितार्थायवृत्तिंपाखंडिनांशुभे
कपालचर्मभस्मास्थिधारणंतत्कृतंमया ५२
तामसानिपुराणानियथोक्तंविष्णुनाशुभे
पाषंडशैवशास्त्राणियथोक्तंकृतवानहम् ५३
मच्छक्तयापिसमाविश्यगौतमादिद्विजानपि
वेदबाह्यानिशास्त्राणिसम्यगुक्तंमयानघे ५४

इमंमतमवष्टभ्यदुष्टाः सर्वेचराक्षसाः
भगवद्विमुखाःसर्वेबभूवुस्तामसावृताः ५५
भस्मादिधारणंकृत्वामहोग्रतपसावृताः
मामेवपूजयांचक्रुर्म्मांसासृक्चंदनादिभिः ५६
मत्तोवरप्रदानानिलब्ध्वामदबलोद्धताः
अत्यंतविषयासक्ताःकामक्रोधसमन्विताः ५७
सत्वहीनास्तुनिर्वीर्य्याजितादेवगणैस्तदा
सर्वधर्म्मपरिभ्रष्टाःकालेयांत्यधमांगतिम् ५८
येमेमतमवष्टभ्यचरंतिपृथिवीतले
सर्वधर्मैश्चरहिताः पश्यंतिनिरयंसदा ५९
एवंदेवहितार्थायवृत्तिर्मेदेविगर्हिता
विष्णोराज्ञांपुरस्कृत्यकृतं भस्मास्थिधारणम् ६०
बाह्यचिह्नमिदंदेविमोहनार्थायविद्विषाम्
अथांतर्हृदयेनित्यं ध्यात्वादेवंजनार्दनम् ६१
जपन्नेवचतन्मंत्रंतारकंब्रह्मवाचकम्
सहस्रनामसदृशंविष्णोर्नारायणस्यतु ६२
षडक्षरंमहामंत्रंरघूणांकुलबर्द्धनम्
जपन्वैसततंदेविसदानंदसुधाप्लुतम्
सुखमात्यंतिकंब्रह्मह्यश्नामसततंशुभे ६३
एतत्तेसर्वमाख्यातंत्वयापृष्टंशुभानने
किमन्यच्छ्रोतुकामासिप्रीत्यातत्परिपृच्छमाम् ६४

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे पाषंडोत्पत्तिवर्णनंनामपंचत्रिंशदधिकद्विशततमोऽध्यायः २३५

षट्त्रिंशदधिकद्विशततमोऽध्यायः

पार्वत्युवाच-
तामसानिचशास्त्राणिसमाचक्ष्वममानघ
संप्रोक्तानिचतैर्व्विप्रैर्भगवद्भक्तिवर्जितैः
तेषांनामानिक्रमशः समाचक्ष्वसुरेश्वर १
रुद्रउवाच-

शृणुदेविप्रवक्ष्यामितामसानियथाक्रमम् २
तेषांस्मरणमात्रेणमोहःस्याज्ज्ञानिनामपि
प्रथमंहिमयैवोक्तंशैवंपाशुपतादिकम् ३
मच्छक्त्यावेशितैर्व्विप्रैःप्रोक्तानिचततःशृणु
कणादेनतुसंप्रोक्तंशास्त्रंवैशेषिकंमहत् ४
गौतमेनतथान्यायंसांख्यंतुकपिलेनवै
धिषणेनतथाप्रोक्तंचार्व्वाकमतिगर्हितम् ५
दैत्यानांनाशनार्थायविष्णुनाबुद्धरूपिणा
बौद्धशास्त्रमसत्प्रोक्तंनग्ननीलपटादिकम् ६
मायावादमसच्छास्त्रंप्रच्छन्नंबद्धउच्यते
मयैवकथितंदेविकलौब्राह्मणरूपिणा ७
अपार्थंश्रुतिवाक्यानांदर्शयन्लोकगर्हितम्
स्वकर्म्मरूपंत्याज्यत्वमत्रैवप्रतिपाद्यते ८
सर्वकर्म्मपरिभ्रष्टैर्वैधर्म्मत्वंतदुच्यते
परेशजीवपारैक्यंमयातुप्रतिपाद्यते ९
ब्रह्मणोस्यस्वयंरूपंनिर्गुणंवक्ष्यते मया
सर्वस्यजगतोऽप्यत्रमोहनार्थंकलौयुगे १०
वेदार्थवन्महाशास्त्रंमाययायदवैदिकम्
मयैवकल्पितंदेविजगतांनाशकारणात् ११
मदाज्ञयाजैमिनिनापूर्वंवेदमपार्थकम्
निरीश्वरेणवादेनकृतंशास्त्रंमहत्तरम् १२
शास्त्राणिचैवगिरिजेतामसानिनिबोधमे
पुराणानिचवक्ष्यामितामसानियथाक्रमात् १३
ब्राह्मंपाद्मंवैष्णवंचशैवंभागवतंतथा
तथैवनारदीयंतुमार्कण्डेयन्तुसप्तमम् १४
आग्नेयमष्टमंप्रोक्तंभविष्यंनवमंतथा
दशमंब्रह्मवैवर्तंलिङ्गमेकादशंस्मृतम् १५
द्वादशंचवराहंचवामनंचत्रयोदशम्
कौर्म्मंचतुर्दशंप्रोक्तंमात्स्यंपंचदशंस्मृतम् १६
षोडशंगारुडंप्रोक्तंस्कंदंसप्तदशंस्मृतम्

अष्टादशंतुब्रह्मांडंपुराणानियथाक्रमम् १७
मात्स्यंकौर्मंतथालैङ्गंशैवंस्कांदंतथैवच
आग्नेयंचषडेतानितामसानिनिबोधमे १८
वैष्णवंनारदीयंचतथाभागवतंशुभम्
गारुडंचतथापाद्मंवाराहंशुभदर्शने १९
सात्विकानिपुराणानिविज्ञेयानिशुभानिवै
ब्रह्मांडब्रह्मवैवर्त्तंमार्कंडेयंतथैवच २०
भविष्यंवामनंब्राह्मंराजसानिनिबोधमे
सात्विकामोक्षदाः प्रोक्ताराजसाः सर्वदाशुभाः २१
तथैवतामसादेविनिरयप्राप्तिहेतवः
तथैवस्मृतयःप्रोक्ता ऋषिभिस्त्रिगुणान्विताः २२
सात्विकाराजसाश्चैवतामसा शुभदर्शने
वासिष्ठंचैवहारीतंव्यासंपाराशरंतथा २३
भारद्वाजंकाश्यपंचसात्विकामुक्तिदाःशुभाः
याज्ञवल्क्यंतथात्रेयं तैत्तिरंदाक्षमे वच २४
कात्यायनंवैष्णवंचराजसां स्वर्गदाःशुभाः
गौतमंबार्हस्पत्यंचसांवर्त्तंचयमंस्मृतम् २५
साख्यंचौशनसंचेतितामसा निरयप्रदाः
किमत्रबहुनोक्तेनपुराणेषुस्मृतिष्वपि २६
तामसानरकायैववर्जयेत्तान्विचक्षणः
एतत्तेसर्वमाख्यातंप्रसंगाच्छुभदर्शनम्
शेषांचप्रभवावस्थांहरेर्वक्ष्यामितेशृणु २७

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्र्यांसंहितायामुत्तरखंडेतामसशास्त्र कथनंनामषट्त्रिंशदधिकद्विशततमोऽध्यायः २३६

सप्तत्रिंशदधिक द्विशततमोऽध्यायः

श्रीरुद्रउवाच-
हिरण्यकहिरण्याक्षौकाश्यपेयौमहाबलौ
दितिपुत्रौमहावीर्य्यौसर्व्वदैत्यपतीउभौ १
नाम्नातौजयविजयौश्वेतद्वीपेहरिंगतौ

तस्मिन्प्रविष्टयोगीन्द्रान्सनकादीन्महाबलौ २
वारयामासतुर्देविहरिसंदर्शनोत्सुकान्
तैःप्रशप्तौमहावीर्य्यौद्वारपालौसुरोत्तमौ ३
सनकादयऊचुः-
उत्सृज्यतत्पृथिव्यांचयातौदेवस्यकिंकरौ
रुद्रउवाच-
इति शापंतयोर्दत्त्वातत्रतस्थुर्मुनीश्वराः ४
देवस्तमर्थंज्ञात्वाचतानाहूयचतावपि ५
तौचोत्थायाब्रवीत्तत्रभगवान्भूतभावनः
भगवानुवाच-
कृतवंतौमहावीर्य्यावपराधंमहात्मनाम् ६
नातिक्रमणीयमिदंभवद्ध्यांद्वारपालकौ
दासत्वंसप्तजन्मानियुवांभक्तौममानघौ ७
अमित्रतस्तथात्रीणिजन्मानिभजतोऽपिवा
रुद्रउवाच-
इत्युक्तौतौमहावीर्य्यावब्रूतांपरमेश्वरम् ८
जयविजयावूचतुः
चिरकालंमहींगंतुंनसमर्थौस्व मानद
तस्माद्वैरायजन्मानिविद्धिवांचव्रजावहे ९
देवत्वयैवनिहतोप्राप्स्यावोभवदंतिकम्
रुद्रउवाच-
इत्युक्त्वाद्वारपालौ तौपूर्वंजातौमहाबलौ १०
कश्यपस्यमहावीर्य्यौदितिगर्भेमहासुरौ
हिरगयकशिपुर्ज्येष्ठोहिरगयाक्षःकनिष्ठकः ११
उभौतौलोकविख्यातौमहावीर्य्यवलोद्धतौ
अप्रमाणशरीरःसहिरगयाक्षोमहोद्धतः १२
उत्पाटचबाहुसाहस्रैःपृथिवींसमहीधराम्
ससागरांद्वीपयुतांसर्व्वप्राणिसमन्विताम् १३
उत्पाटचशिरसाकृत्वाप्रविवेशरसातलम्
ततोदेवगणाःसर्वेचुक्रुशुर्भयपीडिताः १४

शरणंप्रययुर्देवंनारायणमनामयम्
ततस्तदद्भुतंज्ञात्वाशंखचक्रगदाधरः १५
वाराहरूपमास्थायविश्वरूपंजनार्दनः
अनादिमध्यांतवपुःसर्वदेवमयोविभुः १६
विश्वतः पाणिपच्चत्तुर्महादंष्ट्रोमहाभुजः
दंष्ट्रैकयातुतंदैत्यंजघानपरमेश्वरः १७
संचूर्णितमहागात्रोममारदितिजाधमः
पतितांधरणींदृष्ट्वादंष्ट्रयोद्धृत्यपूर्ववत् १८
संस्थाप्यधारयामासशेषेकूर्म्मवपुस्तदा
तंदृष्ट्वादेवताःसर्व्वेक्रोडरूपंमहाहरिम्
तुष्टवुर्म्मुनयश्चैवभक्तिनम्रात्ममूर्त्तयः १९
देवाऊचुः-
नमोयज्ञवराहायनमस्तेशतबाहवे
नमस्तेदेवदेवायनमस्तेविश्वरूपिणे २०
नमः स्थितिस्वरूपायसर्वयज्ञस्वरूपिणे
कलाकाष्ठानिमेषायनमस्तेकालरूपिणे २१
भूतात्मनेनमस्तुभ्यमृग्वेदवपुषेतथा
सुरात्मनेनमस्तुभ्यंसामवेदायतेनमः २२
ॐकारायनमस्तुभ्यंयजुर्वेदस्वरूपिणे
ऋचःस्वरूपिणेचैवचतुर्वेदमयायच २३
नमस्तेवेदवेदाङ्गसांगोपांगायतेनमः
गोविंदायनमस्तुभ्यमनादिनिधनायच २४
नमस्तेवेदविदुषेविशिष्टैकस्वरूपिणे
श्रीभूलीलाधिपतयेजगत्पित्रेनमोनमः २५
रुद्रउवाच-
इत्यादिस्तुतिभिःस्तुत्वादेवंवाराहरूपिणम्
अर्च्चयामासुरात्मेशंगंधपुष्पादिभिर्हरिम् २६
समर्च्यमानस्तैर्देवैस्तेषामिष्टंवरंददौ
गंधर्वैरप्सरोभिश्चगायमानोमुदाहरिः २७
महर्षिभिःस्तूयमानस्तत्रैवांतरधीयत

एभिःस्तुत्वानरोभक्त्याप्रातरुत्थायभक्तिमान् २८
ईप्सितांलभते भूमिंचिरंसस्यफलान्विताम्
एतत्तेसर्वमाख्यातंवाराहवैभवंहरैः
नारसिंहंतथावक्ष्येशृणुदेविवरानने २९
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
वराहावतारकथनंनामसप्तत्रिंशदधिकद्विशततमोऽध्यायः २३७

अष्टत्रिंशदद्विक द्विशततमोऽध्यायः

रुद्रउवाच-
भ्रातरंनिहतंज्ञात्वाहिरगयकशिपुस्ततः
तपस्तेपेमहादैत्योमेरोःपार्श्वेचमांप्रति १
दिव्यवर्षसहस्राणिवायुभक्षोमहाबलः
जपन्पंचाक्षरंमंत्रंपूजयामासमांशुभे २
ततः प्रहृष्टमनसातमवोचंमहासुरम्
वरंवृणीष्वदैतेययत्तेमनसिवर्त्तते
ततः प्रोवाचदैतेयोमांप्रसन्नंशुभानने ३
हिरगयकशिपुरुवाच-
देवासुरमनुष्याणांगंधर्वोरगरक्षसाम्
पशुपक्षिमृगाणांचसिद्धानांवैमहात्मनाम् ४
यक्षविद्याधराणांचकिन्नराणांतथैवच
सर्वेषामेवरोगाणामायुधानांतथैवच
सर्वेषामृषिमुख्यानामवध्यत्वंप्रयच्छमे ५
रुद्र उवाच-
एवमस्त्विवतितद्रक्षस्त्वब्रुवंप्रियदर्शने
मत्तोमहद्वरंप्राप्यसदैतेयोमहाबलः ६
जित्वामहेंद्रंदेवांश्चसत्रैलोक्येश्वरोऽभवत्
सर्वांश्चयज्ञभागांश्चस्वयमेवाग्रहीद्बलात् ७
त्रातारंनाधिगच्छंतिदेवतास्तेननिर्जिताः
तस्यैवकिंकराः सर्वेगंधर्वादेवदानवाः ८
यक्षाश्चनागाःसिद्धाश्चसाध्याश्चवशवर्तिनः

उत्तानपादस्यसुतांकल्याणींनामकन्यकाम् ९
उपयेमेविधानेनदैत्यराजोमहाबलः
तस्यांजातोमहातेजाः प्रह्लादोदैत्यराट्शुभे १०
अनुरक्तोहृषीकेशेगर्भवासेऽपियोहरौ
सर्वावस्थासुकृत्येषुमनोवाक्कायकर्म्मभिः ११
नान्यंजानातिदेवेशात्प्रसन्नात्मासनातनात्
सकालेऽपिविनीतः सन्गुरुगेहेवसत्सुधीः १२
अधीत्यसर्ववेदांश्चशास्त्राणिविविधानिच
कस्यचित्त्वथकालस्यगुरुणासहदैत्यजः १३
पितुःसमीपमागत्यववंदेविनयान्वितः
तंपरिष्वज्यबाहुभ्यांतनयंशुभलक्षणम्
अंकेनिधायदैत्येंद्रःप्रोवाचेदंसुविस्मितम् १४
हिरण्यकशिपुरुवाच-
प्रह्लादचिरकालंत्वंगुरुगेहेनिवेशितः
यदुक्तागुरुणाविद्यातन्ममाचक्ष्वसुव्रत १५
रुद्रउवाच-
इति पृष्टःस्वपित्रावैप्रह्लादोजन्मवैष्णवः
प्राहदैत्येश्वरंप्रीत्यावचनंकलुषापहम् १६
प्रह्लादउवाच-
योवैसर्वोपनिषदामर्थःपुरुषईश्वरः
तंवैसर्वगतंविष्णुंनमस्कृत्वाब्रवीमिते १७
रुद्रउवाच-
इति विष्णुस्तुतिंश्रुत्वादैत्यराडिवस्मयान्वितः
उवाचतंगुरुंरोषात्किंत्वयोक्तंममात्मजे १८
ममात्मजस्यदुर्बुद्धेहरिसंस्तवमीदृशम्
किमर्थमुक्तवान्जाड्यमकार्य्यंब्राह्मणोचितम् १९
अश्राव्यंमदमित्रस्यस्तवमेतंममाग्रतः
बालेनापिकृतंत्वेतत्त्वत्प्रसादाद्द्विजाधम २०
इत्युक्त्वापरितोवीक्ष्यदैत्यराट्क्रोधमूर्च्छितः
उवाचदैत्यमेकंतुबंधयैनंद्विजाधमम् २१

इतिराजवचः श्रुत्वासबबंधभृगोःसुतम्
बध्यमानंगुरुंदृष्ट्वाप्रह्लादोब्राह्मणप्रियः
उवाचपितरंतातइदंमेनोक्तवान्गुरुः २२
कृपयादेवदेवस्यशिक्षितोस्मिहरेःप्रभो
नान्योगुरुर्मेभवतिसएवप्रेरकोहरिः २३
श्रोतामंतातथावक्ताद्रष्टासर्वगईश्वरः
हरिरेवाव्ययःकर्त्तानियंतासर्वदेहिनाम्
तस्मादनागसोविप्रोमोक्तव्योऽयगुरुःप्रभो २४
रुद्रउवाच-
इतिपुत्रवचः श्रुत्वाहिरण्यकशिपुस्ततः
तंब्राह्मणंमोचयित्वास्वसुतंप्राहविस्मयात् २५
किंवत्सत्वंभ्रमस्येवंमिथ्यावाक्यैर्द्विजन्मनः
कोविष्णुः किंतुतद्रूपंकुत्रासौसंस्थितोहरिः २६
अहमेवेश्वरोलोके त्रैलोक्याधिपतिर्यतः
मामेवार्च्चयगोविंदंत्यजशत्रुंदुरासदम् २७
अथवाशंकरंदेवंरुद्रंलोकगुरुंप्रभुम्
अर्च्चयस्वासुराध्यक्षंसर्वैश्वर्य्यप्रदंशिवम् २८
त्रिपुंड्रधारणंकृत्वाभस्मनादैत्यपूजितम्
पूजयित्वामहादेवंपाशुपत्योक्तमार्गतः २९
रुद्रउवाच-
इतिदैत्यपतेर्वाक्यंश्रुत्वादैत्यपुरोहिताः ३०
पुरोहिताऊचुः-
एवमेवमहाभागकुरुष्ववचनंपितुः
त्यजशत्रुंकैटभारिंपूजयस्वत्रिलोचनम् ३१
रुद्रात्परतरोदेवोनास्तिसर्वप्रदोनृणाम्
पितातवापितस्यैवप्रसादादीश्वरोऽभवत् ३२
रुद्रउवाच-
इतितेषांवचःश्रुत्वाप्रह्लादोजन्मवैष्णवं ३३
प्रह्लादउवाच-
अहोभगवतः श्रेष्ठायन्मायामोहितंजगत्

अहोवेदांतविदुषःसर्वलोकेषुपूजिताः ३४
ब्राह्मणाअपिचापल्याद्वदंत्येवंमदान्विताः
नारायणःपरंब्रह्मतत्वंनारायणःपरम् ३५
नारायणः परोध्याताध्यानंनारयणःपरम्
गतिर्विश्वस्यजगतः शाश्वतंशिवमच्युतः ३६
धाताविधाताजगतोवासुदेवःसनातनः
विश्वमेवेदंपुरुषस्तद्विश्वमुपजीवति ३७
हिरण्मयवपुर्नित्यःपुंडरीकनिभेक्षणः
श्रीभूलीलापतिः सौम्योनिर्म्मलः शुभविग्रहः ३८
तेनैवसृष्टौब्रह्मेशौसर्गेदेवोत्तमौविभू
तस्यैवाज्ञांपुरस्कृत्यवर्त्तेतेब्रह्मशंकरौ ३९
भीषास्माद्वातिपवनोभीषोदेतिदिवाकरः
भीषास्मादग्निश्चंद्रोऽथमृत्युर्धावतिपंचमः ४०
आसीदेकोहरिर्दिव्योदेवोनारायणःपरः
ब्रह्मानेंद्रोनचेशानोनचचंद्रदिवाकरौ ४१
नवाद्यावापृथिव्यौचनक्षत्राणिदिवौकसः
तस्यविष्णोःपरंधामसदापश्यंतिसूरयः ४२
एवंसर्वोपनिषदामर्थंहित्वाद्विजोत्तमाः
रागाल्लोभाद्भयाद्वापिकिंब्रवीथममाग्रतः ४३
तंसर्वरक्षकंदेवंत्यक्त्वासर्वेश्वरंहरिम्
कथंपाषंडमाश्रित्यपूजयामिचशंकरम् ४४
लक्ष्मीपतिंदेवदेवमनंतंपुरुषोत्तमम्
इंदीवरदलश्यामंपद्मपत्रायतेक्षणम् ४५
श्रीवत्सलक्षितोरस्कंसर्व्वाभरणभूषितम्
सदाकुमारंसर्व्वेशंनित्यानन्दसुखप्रदम् ४६
कृष्णंदध्युर्महात्मानोयोगिनः सनकादयः
यमर्चयंतिब्रह्मेशशक्राद्यादेवतागणाः ४७
यस्यपत्न्याः कटाक्षार्द्धदृष्ट्यादृष्टादिवौकसः
ब्रह्मेंद्ररुद्रवरुणयमसोमधनाधिपाः ४८
यन्नामस्मरणादेवपापिनामपिसत्वरम्

मुक्तिर्भवतिजंतूनांब्रह्मादीनांसुदुर्लभा ४९
सएवंरक्षकःश्रीशोदेवानामपिसर्वदा
तमेवपूजयिष्यामिलक्ष्म्यासंयुतमच्युतम् ५०
प्राप्स्यामिसुसुखेनैवतद्विष्णोःपरमंपदम्
रुद्रउवाच-
इतितस्यवचः श्रुत्वाहिरण्यकशिपुस्ततः ५१
क्रोधेनमहताविष्टोजज्वालाग्निरिवापरः
परितोवीक्ष्यदैतेयानित्याहक्रोधमूर्छितः ५२
हिरण्यकशिपुरुवाच -
भीषणैः शस्त्रसंघातैःप्रह्लादंपापकारिणम्
ममाज्ञयाघातयध्वंशत्रुपूजनतत्परम् ५३
रक्षिताहरिरेवेतिरक्षतेतेनवात्सलात्
अद्यैवसफलंतस्यपश्येयंहरिरक्षणम् ५४
रुद्रउवाच-
तदोद्यतास्त्रादैतेयाहंतुं दैत्येश्वरात्मजम्
परिवार्यमहात्मानंतस्थुर्दैत्येश्वराज्ञया ५५
प्रह्लादोऽपितथाविष्णुंध्यात्वाहृदयपंकजे
जपन्नष्टाक्षरंमंत्रंतस्थौगिरिरिवापरः ५६
तंजघ्नुःपरितोवीराःशूलतोमरशक्तिभिः
प्रह्लादस्यवपुस्तत्रहरिसंस्मरणाच्छुभे ५७
विष्णोःप्रभावाद्दुद्धर्षाद्वज्रभूतमभूद्दृशम्
ततः संप्राप्यतद्गात्रंमहास्त्राणिसुरद्विषाम् ५८
नीलोत्पलदलानीवपेतुश्छिन्नाःक्षितौशुभे
अल्पमप्यस्यतद्गात्रंभेत्तुं दैत्यानचक्षमाः ५९
विस्मितावाङ्मुखास्तस्थुर्दैत्यराजांतिकेभटाः
तादृग्विधंमहात्मानंदृष्ट्वापुत्रंमहाबलम् ६०
विस्मयंपरमंगत्वादैत्यराट्क्रोधमूर्छितः
आदिदेशततःसर्वान्दंदशूकान्महाविषान् ६१
वासुकिप्रभृतीन्भीमान्खादयध्वमितिक्रुधा
आदिष्टास्तेनराज्ञाथतेनागाःसुमहाबलाः ६२

ज्वलितास्यामहाभीमास्तंचखादुर्महाबलम्
गरुडध्वजभक्तंतंविदश्यगरलायुधाः ६३
निर्विषाश्चिछन्नदशनाबभूबुरनिलाशनाः
वैनतेयसहस्रेणछिन्नगात्राःसुविह्वलाः ६४
प्रदुद्रुवुर्दिशःसर्वावमंतोरुधिरंभृशम्
तादृग्विधान्महासर्पान्दृष्ट्वादैत्यपतिस्तदा ६५
आदिदेशततः क्रुद्धोदिग्गजान्सुमदान्वितान्
निर्दिष्टास्तेनराज्ञाथदिग्गजाश्चमदोद्धताः ६६
परिवार्याथतंजघ्नुर्दंतैः पृथुतरैर्भृशम्
अथदिग्गजदंताश्चछिन्नमूलाःपतन्भुवि ६७
दंतैर्विनाकृतानागाभयार्तावैप्रदुद्रुवुः
तान्दृष्ट्वाथमहानागान्दैत्येंद्रःकुपितोबली ६८
प्रज्वाल्यचमहावह्निंचिक्षेपसुतमात्मनः
जलशायिप्रियंदृष्ट्वाप्रह्लादंहव्यवाहनः ६९
नददाहचतंधीरंसुशीतः समभूच्छिखी
अदह्यमानंतंबालंदृष्ट्वाराजासुविस्मितः ७०
प्रादात्तस्मैविषंघोरंसर्वभूतहितंतदा
तस्यविष्णोःप्रभावाच्चविषमस्यामृतंभवेत् ७१
अर्पणात्तस्यदेवस्यविषंचामृतमश्नुते
एवमाद्यैर्वधोपायैर्घोररूपैःसुदारुणैः ७२
मोहयित्वात्मजंराजातस्यावध्यत्वमीक्ष्यच
ततः साम्नासुतंप्राहदैत्यराड्विस्मयाकुलः ७३
हिरण्यकशिपुरुवाच-
त्वयाविष्णोःपरत्वंचसम्यगुक्तंममाग्रतः
व्यापित्वात्सर्वभूतानांविष्णुरित्यभिधीयते ७४
योऽसौसर्वगतोदेवःसएवपरमेश्वरः
तस्यसर्वगतत्वंवैप्रत्यक्षंदर्शयस्वमे ७५
एश्वर्यशक्तितेजांसिज्ञानवीर्यबलानिच
परस्यतस्यपरमंरूपंगुणविभूतयः ७६
सम्यग्दृष्ट्वाप्रयत्नेनविष्णुंमन्येदिवौकसाम्

ममप्रतिबलोलोकेनास्तिदेवेषुकश्चन ७७
ईशानवरदानेनसर्वभूतेष्वबध्यताम्
प्राप्तवान्सर्वभूतानांदुर्जयत्वंचमानद
ईश्वरत्वंलभेद्विष्णुर्मांजित्वाबलवीर्यतः ७८
रुद्रउवाच-
इतितस्यवचः श्रुत्वाप्रह्लादःप्राहविस्मितः
हरेःप्रभावं दैन्यस्यकथयामाससुव्रतः ७९
प्रह्लादउवाच-
योऽसौनारायणः श्रीमान्परमात्मासनातनः
वसनात्सर्वभूतेषुवासुदेवःसउच्यते ८०
सर्वस्यापिजगद्धाताविष्णुरित्यभिधीयते
नकिंचिदस्मादन्यंतुजगत्स्थावर जंगमम् ८१
सर्वत्रचिदचिद्वस्तुरूपंतस्यैवनान्यथा
त्रिपाद्व्याप्तिः परंव्योम्निपादव्याप्तिकलाद्भुता ८२
योऽसौचक्रगदापाणिःपीतवासाजनार्दनः
योगिभिर्दृश्यतेभक्त्यानाभक्त्यादृश्यतेक्वचित् ८३
द्रष्टुंनशक्योरोषाच्चमत्सराद्वाजनार्दनः
देवतिर्यङ्मनुष्येषुस्थावरेष्वपिजंतुषु
व्याप्यतिष्ठतिसर्व्वेषुक्षुद्रेष्वपिमहत्सुच ८४
रुद्रउवाच-
इतिप्रह्लादवचनंश्रुत्वादैत्यवरस्तदा
उवाचरोषताम्राक्षोभर्त्सयंश्चसुतंमुहुः ८५
हिरगयकशिपुरुवाच-
असौसर्वगतोविष्णुरपिचेत्परमः पुमान्
प्रत्ययंदर्शयस्वाद्यबहुभिःकिंचलापितैः ८६
महादेवउवाच-
इत्युक्त्वासहसादैत्यःप्रासादस्तंभमात्मनः
ताडयामासहस्तेनप्रह्लादमिदमब्रवीत् ८७
हिरगयकशिपुरुवाच-
अस्मिन्दर्शयतंविष्णुंयदिसर्वगतोभवेत्

अन्यथात्वांवधिष्यामिमिथ्यावाक्यप्रलापिनम् ८८
रुद्रउवाच-
इत्युक्त्वासहसाखङ्गमाकृष्यदितिजेश्वरः
प्रह्लादोरसिचिक्षेपहंतुंखङ्गेनतंरुषा ८९
तस्मिन्क्षणेमहाशब्दःस्तंभेसंश्रूयतेभृशम्
संवर्ताशनिसंरावैःखमिवस्फुटितांतरम् ९०
तेनशब्देनमहतादैत्यश्रोत्रविघातिना
सर्वेनिपातिताभूमौछिन्नमूलाइवद्रुमाः ९१
बिभ्यंतःसंप्लुतं दैत्यामेनिरेवैजगत्त्रयम्
ततः स्तंभेमहातेजानिष्क्रांतोवैमहाहरिः ९२
चकारसमहाघोरंजगत्क्षयनिभंस्वनम्
तेननादेनमहतातारकाः पतिताभुवि ९३
नृसिंहवपुरास्थायतत्रैवाविरभूद्धरिः
अनेककोटिसूर्य्याग्नितेजसाससमावृतः ९४
मुखेपंचाननप्रख्यः शरीरेमानुषाकृतिः
दंष्ट्राकरालवदनः स्फुरज्जिह्वाम्बरोद्धतः ९५
ज्वालावलितकेशांतस्तप्तालातेक्षणोविभुः
सहस्रबाहुभिर्दीर्घैःसर्वायुधसमन्वितैः ९६
वृतोमेरुरिवाभातिबहुशाखानगान्वितः
दिव्यमाल्यांवरधरोदिव्याभरणभूषितः ९७
तस्थौनृकेसरीरूपःसंहर्त्तुंसर्वदानवान्
तंदृष्ट्वाघोरसंकाशंनरसिंहंमहाबलम् ९८
दग्धाक्षिपक्ष्मोदैत्येंद्रोविह्वलांगःपपातह
प्रह्लादोऽथतदादृष्ट्वानारसिंहोपमंहरिम् ९९
जयशब्देनदेवेशंनमश्चक्रेजनार्दनम्
ददर्शतस्यगात्रेषुनृसिंहस्यमहात्मनः १००
लोकान्समुद्रान्सद्वीपान्सुरगंधर्वमानुषान्
अजांडानांसहस्रंतुसटाग्रेतस्यदृश्यते १०१
दृश्यंते तस्यनेत्रेषुसोमसूर्य्यादयस्तथा
कर्णयोरश्विनौदेवौदिशश्चविदिशस्तथा १०२

ललाटेब्रह्मरुद्रौचनभोवायुश्चनासिके
इंद्राग्नीतस्यवक्त्रांतेजिह्वायांतुसरस्वती १०३
दंष्ट्रासुसिंहशार्दूलाः शरभाश्चमहोरगाः
कंठेचदृश्यतेमेरुःस्कंधेष्वपिमहाद्रयः १०४
देवतिर्य्यङ्मनुष्याश्चबाहुष्वपिमहात्मनः
नाभौचास्यांतरिक्षंचपादयोःपृथिवीतथा १०५
रोमस्वोषधयः सर्वाःपादपानखपंक्तिषु
निःश्वासेषुचवेदाश्चसाङ्गोपाङ्गसमन्विताः १०६
आदित्यावसवोरुद्राविश्वेदेवामरुद्गणाः
सर्वाङ्गेषुप्रदृश्यंततेगंधर्वाप्सरसश्चये १०७
इत्थंविभूतयस्तस्यदृश्यंतेपरमात्मनः
श्रीवत्सकौस्तुभोरस्कंवनमालाविभूषितम् १०८
शंखचक्रगदाखङ्गशार्ङ्गाद्यैर्हेतिभिर्युतम्
सर्वोपनिषदामर्थंदृष्ट्वादैत्येश्वरात्मजः १०९
हर्षाश्रुजलसिक्तांगःप्रणाममुहुर्मुहुः
दैत्येंद्रस्तुहरिंदृष्ट्वाक्रोधान्मृत्युवशेस्थितः ११०
योद्धुंखङ्गंसमुद्यम्यनृसिंहंतमभिद्रवत्
अथदैत्यगणाःसर्व्वेलब्धसंज्ञामहाबलाः १११
स्वान्यायुधानिचादायहरिंजघ्नुस्त्वरान्विताः
पलालकाराडानियथावन्हौक्षिप्तान्यनेकशः ११२
तथैवभस्मतांयांतिमहास्त्राणिहरेस्तनौ
तान्यनीकानिदैत्यानांदृष्ट्वानरहरिस्तदा ११३
सटैर्ददाहचज्वालामालाविरचित स्फुटैः
नृकेसरिसटोद्भूतवह्निनादानवा भृशम् ११४
निर्भस्मितागणाः सर्वेनिःशेषंतदभूद्बलम्
प्रह्लादंसानुगंहित्वाभस्मितेवीक्ष्यतद्बले ११५
क्रोधाद्दैत्यपतिः खङ्गमाकृष्याभिप्रपद्यत
खङ्गहस्तंतुदैत्येंद्रंजग्राहैकेनबाहुना ११६
पातयामासदेवेशोयथाशाखांमहानिलः
गृहीत्वापतितंभूमौमहाकायंनृकेसरी ११७

स्वोत्संगेस्थापयामासददर्शासौमुखंहरेः
विष्णुनिंदाकृतंपापंतथावैष्णवदोषजम् ११८
नृसिंहस्पर्शनादेवनिर्भस्मितमभूत्तदा
अथदैत्येश्वरस्याथमहद्गात्रंनृकेसरी ११९
नखेर्विदारयामासतीक्ष्णैर्वज्रनिभैर्घनैः
सनिर्म्मलात्मादैत्येंद्रःपश्यन्साक्षान्मुखंहरेः १२०
नखनिर्भिन्नहृदयःकृतार्थोविजहावसून्
तद्गात्रंशतधाभित्त्वानखैस्तीक्ष्णैर्महाहरिः १२१
आकृष्यांत्राणिदीर्घाणिकंठेसंसक्तवान्प्रियान्
अथदेवगणाःसर्व्वेमुनयश्चतपोधनाः १२२
ब्रह्मरुद्रौपुरस्कृत्यशनैःस्तोतुंसमाययुः
तेप्रसादयितुंभीताज्वलंतंविश्वतोमुखम् १२३
मातरंजगतांधात्रींचिंतयामासुरीश्वरीम्
हिरण्यवर्णांहरिणींसर्व्वोपद्रवनाशिनीम् १२४
विष्णोर्नित्यानवद्यांगींध्यात्वानारायणींशुभाम्
देवीसूक्तजपैर्भक्त्यानमश्चक्रुःसनातनीम् १२५
तैश्चिंत्यमानासादेवीतत्रैवाविरभूत्तदा
चतुर्भुजाविशालाक्षीसर्वाभरणभूषिता १२६
दुकूलवस्त्रसहितांदिव्यमालानुलेपनाम्
तांदृष्ट्वादेवदेवस्यप्रियांसर्वेदिवौकसः १२७
ऊचुःप्रांजलयोदेवींप्रसन्नंकुरुतेप्रियम्
त्रैलोक्यस्याभयंस्वामीयथादद्यात्तथाकुरु १२८
रुद्रउवाच-
इत्युक्तासहसादेवीप्रियंप्राप्यजनार्दनम्
प्रणिपत्यनमस्कृत्यप्रसीदेतिउवाचतम् १२९
तांदृष्ट्वामहिषींस्वस्यप्रियांसर्व्वेश्वरोहरिः
रक्षःशरीरजंक्रोधंतत्याजप्रीतवत्क्षणात् १३०
अंकमादायतांदेवींसमाश्लिष्यदयानिधिः
कृपासुधार्द्रदृष्ट्यावैनिरैक्षत सुरान्हरिः १३१
ततोजयजयेत्युच्चैःस्तुवतांनमतांतदा

तद्दयादृष्टिदृष्टानांसानंदःसंभ्रमोऽभवत् १३२
ततोदेवगणाःसर्वेहर्षनिर्भरमानसाः
ऊचुःप्रांजलयोदेवं नमस्कृत्यजगत्पतिम् १३३
देवगणाऊचुः -
द्रष्टुमत्यद्भुतंतेजोनशक्तास्तेजगत्पते
अत्यद्भुतमिदंरूपंबहुवाहुपदांकितम् १३४
जगत्त्रयसमाक्रांतंतेजस्तीक्ष्णतरंतव
द्रष्टुंस्थातुंनशक्ताःस्मः सर्व्वएवदिवौकसः १३५
महादेवउवाच-
इत्यर्थितस्तुविबुधैस्तेजस्तदतिभीषणम्
उपसंहृत्यदेवेशोबभूवसुखदर्शनः १३६
शरत्कोटींदुसंकाशः पुंडरीकनिभेक्षणः
सुधामयसटापुंजविद्युत्कोटिनिभःशुभः १३७
नानारत्नमयैर्दिव्यैःकेयूरैःकटकान्वितैः
बाहुभिःकल्पवृक्षस्यशाखौघैरिवसत्फलैः १३८
चतुर्भिःकोमलैर्दिव्यैरन्वितः परमेश्वरः
जपाकुसुमसंकाशैः शोभितः करपंकजैः १३९
शंखचक्रगृहीताभ्यामुद्बाहुभ्यांविराजितः
वरदाभयहस्ताभ्यामितराभ्यांनृकेसरी १४०
श्रीवत्सकौस्तुभोरस्कोवनमालाविभूषितः
उद्यद्दिनकाराभ्यांचकुराडलाभ्यांविराजितः १४१
हारकेयूरकटकैर्भूषणैःसमलंकृतः
सव्यांगस्थश्रियायुक्तोराजतेनरकेसरी १४२
लक्ष्मीनृसिंहंतंदृष्ट्वादेवताः समहर्षयः
आनन्दाश्रुजलैःसिक्ताहर्षनिर्भरचेतसः १४३
आनंदसिंधुमग्नास्तेनमश्चक्रुर्निरंतरम्
अर्चयामासुरात्मेशंदिव्यपुष्पसमर्पणैः १४४
रत्नकुंभैः सुधापूर्णैरभिषिच्यसनातनम्
वस्त्रैराभरणैर्गंधैः पुष्पैधूपैर्म्मनोरमैः १४५
दिव्यैर्निवेदितैर्दीपैरर्च्चयित्वानृकेसरिम्

तुष्टुवुः स्तवनैर्दिव्यैर्नमश्चक्रुर्म्मुहुर्म्मुहुः १४६
ततः प्रसन्नोलक्ष्मीशस्तेषामिष्टान्वरान्ददौ
ततोदेवगणैः सार्धंसर्व्वेशोभक्तवत्सलः १४७
प्रह्लादंसर्वदैत्यानांचक्रेराजानमव्ययम्
आश्वास्यभक्तंप्रह्लादमभिषिच्यसुरोत्तमैः १४८
ददौतस्मैवरानिष्टान्भक्तिंचाव्यभिचारिणीम्
ततोदेवगणैःसर्वैःस्तूयमानोनृकेसरी १४९
विकीर्णपुष्पवपुभिस्तत्रैवांतरधीयत
ततः सुरगणाःसर्वेस्वंस्वंस्थानंप्रपेदिरे १५०
पुनश्चयज्ञभागान्स्वान्बुभुजुःप्रीतमानसाः
ततोदेवाः सगंधर्वानिरातंकाभवंस्तदा १५१
तस्मिन्हतेमहादैत्येसर्वएवप्रहर्षिताः
प्रह्लादस्तुतदाचक्रेराज्यंधर्मेणवैष्णवः १५२
हरेः प्रसादाल्लब्धंतुराज्यंवैष्णवसत्तमः
बहुभिर्यज्ञदानाद्यैरर्चयित्वानृकेसरिम् १५३
कालेहरिपदंप्रापयोगिगम्यंसनातनम्
एतत्प्रह्लादचरितंयेतुशृण्वंतिनित्यशः १५४
तेसर्वेपापनिर्मुक्तायास्यंतिपरमांगतिम्
एतत्तेकथितंदेविनृसिंहंवैभवंहरेः
शेषांचवैभवावस्थांशृणुदेवियथाक्रमम् १५५
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसहिंतायामुत्तरखंडेउमामहेश्वर
संवादेनृसिंहप्रादुर्भावोनामाष्टत्रिंशदधिकद्विशततमोऽध्यायः २३८

एकोन चत्वारिंशदधिक द्विशततमोऽध्यायः

रुद्रउवाच-
प्रह्लादस्यसुतोजज्ञेविरोचनइतीरितः
तस्यपुत्रोमहाबाहुर्वलिर्वैश्वानरः प्रभुः १
सतुधर्मविदांश्रेष्ठःसत्यसंधोजितेंद्रियः
हरेःप्रियतमोभक्तोनित्यंधर्मरतः शुचिः २
सजित्वासकालान्देवान्सेंद्रांश्चसमरुद्गणान्

त्रील्लोँकान्स्ववशेस्थाप्यराज्यंचक्रेमहाबलः ३
अकृष्टपच्यापृथिवीबहुसस्यफलप्रदा
गावःपूर्णदुघाःसर्वाः पादपाः फलपुष्पिताः ४
स्वधर्म्मनिरताः सर्वेनराः पापविवर्जिताः
अर्चयंति हृषीकेशंसततंविगतज्वराः ५
एवंचकारधर्मेणराज्यंदैत्यपतिर्बली
इंद्रादित्रिदशास्तस्यकिंकराःसमुपस्थिताः ६
एश्वर्यंत्रिषुलोकेषुबुभुजेबलदर्प्पहृत्
भ्रष्टराज्यंसुतंदृष्ट्वातस्यापिहितकाम्यया ७
कश्यपोभार्ययासार्द्धंतपस्तेपेहरिंप्रति
अदित्यासहधर्मात्मापयोव्रतसमन्वितः ८
अर्चयामासदेवेशंपद्मनाभंजनार्दनम्
ततोवर्षसहस्राणितेनसंपूजितोहरिः ९
तत्रैवाविरभूत्तस्यदेव्यासहसनातनः
तंदृष्ट्वापुंडरीकाक्षंशंखचक्रगदाधरम् १०
इंद्रनीलमणिश्यामंसर्वाभरणभूषितम्
स्फुरत्किरीटकेयूरहारकुंडलशोभितम् ११
कौस्तुभोद्भासितोरस्कंपीतवस्त्रेणवेष्टितम्
श्रियासहसमासीनंमंडलेंद्रेमहात्मनि १२
तंदृष्ट्वाजगतामीशंहर्षनिर्भरचेतसा
पत्न्यासहनमस्कृत्वातुष्टावद्विजसत्तमः १३
कश्यपउवाच–
नमोनमस्तेलक्ष्मीशसर्वज्ञजगदीश्वर
सर्वात्मन्सर्वदेवेशसृष्टिसंहारकारकः १४
अनादिनिधनानंतवपुषेविश्वधारिणे
नमस्तेवेदवेदांगवपुषेसर्वचक्षुषे १५
सर्वात्मनेनमस्तुभ्यंनमः सूक्ष्मतरायच
कल्याणगुणपूर्णाययोगिध्येयात्मनेनमः १६
नमोयुवकुमारायश्रीभूलीलाधिपायच
नित्यमुक्तैकभोगायपरधाम्निस्थितायच १७

चतुरात्मन्नमस्तुभ्यंचतुर्व्यूहनमोस्तुते
पंचावस्थायतेतुभ्यंनमस्तेपंचमात्मकम् १८
पंचमात्मकनिष्ठैस्तुयोगिभिःपूज्यसेसदा
पंचार्थतत्वविदुषांपंचसंस्कारसंस्थितः १९
पंचापरंस्वरूपंतेविज्ञेयंसततंहरे
चतुर्धापरिपूर्णात्मन्नियतंकवयोविदुः २०
त्वत्प्रसूतिंजगत्सर्वंपुनंतितबकिंकराः
त्रयीमयाःकर्म्मनिष्ठायेद्विजाभक्तवत्सलाः २१
तेषांदयेत्त्वणादेवभवबंधविमुक्तये
नमोस्तुत्रिजगद्धात्रेस्वयंधात्रेऽखिलात्मने २२
धात्रेविधात्रेविश्वायविश्वरूपायतेनमः
नारायणायकृष्णायवासुदेवाय शार्ङ्गिणे
विष्णवेजिष्णवेतुभ्यंशुद्धसत्वायतेनमः २३
महादेवउवाच-
इत्यादिस्तुतिभिःसम्यक्स्तूयमानोमहर्षिणा
प्राहगंभीरयावाचापरितुष्टोजनार्दनः २४
श्रीभगवानुवाच-
संतुष्टोऽहद्विजश्रेष्ठत्वयाभक्तयासमर्च्चितः
वरंवृणीष्वभद्रंतेकरोमितववांछितम् २५
महादेवउवाच-
ततः प्राहहृषीकेशंभार्य्ययासहकश्यपः २६
कश्यपउवाच-
पुत्रत्वंममदेवेशसंप्राप्यत्रिदशांहितम्
कुरुष्वबलिनादेवत्रैलोक्यंनिर्जितंबलात् २७
इंद्रस्यावरजोभूत्वाउपेंद्रइतिविश्रुतः
येनकेनचमार्गेणबलिनिर्जित्यमायया
त्रैलोक्यंममपुत्रायदहिशक्रायशाश्वतम् २८
महादेवउवाच-
इत्युक्तस्तेनविप्रेणतथेत्याहजनार्द्दनः
संस्तूयमानस्त्रिदशैस्तत्रैवांतरधीयत २९

एतस्मिन्नेवकालेतुकश्यपस्यमहात्मनः
अदित्यागर्भमागच्छद्भगवान्भूतभावनः ३०
तस्मिन्कालेबलिर्यागंदीर्घसत्रंमहातपाः
अष्टमहर्षिभिं सार्द्धमारेभेतद्विधानतः ३१
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वर
संवादेवामनप्रादुर्भावोनामैकोनचत्वारिंशदधिकद्विशततमोऽध्यायः २३९

चत्वारिंशदधिकद्विशततमोऽध्यायः

श्रीमहादेवउवाच-
अथवर्षसहस्रांतेसर्वलोकमहेश्वरम्
अदितिर्जनयामासवामनं विष्णुमच्युतम् १
श्रीवत्सकौस्तुभोरस्कंपूर्णेंदुसदृशद्युतिम्
सुन्दरंपुंडरीकाक्षमतिखर्वतनुंहरिम् २
वटुवेषधरंदेवंसर्ववेदांगगोचरम्
मेखलाजिनदराडादिचिह्नैरंकितमीश्वरम् ३
तंदृष्ट्वादेवताःसर्वेशतक्रतुपुरोगमाः
स्तुत्वामहर्षिभिःसार्द्धंनमश्चक्रुर्महौजसम् ४
ततः प्रसन्नोभगवान्प्रोवाचसुरसत्तमान्
वामनउवाच-
किंकर्तव्यंमयाचाद्यतद्ब्रवीथसुरोत्तमाः ५
श्रीशंकरउवाच-
ततःप्रहृष्टास्त्रिदशास्तमूचुः परमेश्वरम्
देवाऊचुः
अस्मिन्कालेबलेर्यज्ञोवर्त्ततेमधुसूदन ६
अप्रत्याख्यानकालोऽयतस्यदैत्यपतेःप्रभो
याचित्वात्रिदिवंलोकंतन्नस्त्वंदातुमर्हसि ७
शंकरउवाच-
इत्युक्तास्त्रिदशैस्सर्वैराजगामबलिहरिः
यागदेशेसमासीनमृषिभिस्सार्द्धमष्टभिः ८
अभ्यागतंतुतंदृष्ट्वासहसोत्थायदैत्यराट्

अभ्यागतः स्वयंविष्णुरितिहाससमन्वितः ९
पूजयामासविधिनानिवेश्यकुसुमासने
प्रणिपत्यनमस्कृत्यप्राहगद्गदयागिरा १०
बलिरुवाच-
धन्योऽस्मिकृतकृत्योस्मिसफलंममजीवितम्
त्वामर्च्चयित्वाविप्रेंद्रकिंकरोमितवप्रियम् ११
आगतोऽसियदर्थंत्वंमामुद्दिश्यद्विजोत्तमः
तत्प्रयच्छामितेशीघ्रंब्रूहिवेदविदांवर १२
शंकरउवाच-
ततःप्रहृष्टमनसातमुवाचमहीपतिम्
वामनउवाच-
शृणुराजेंद्रवक्ष्यामिममागमनकारणम् १३
अग्निकुण्डस्यपृथिवींदेहिदैत्यपतेमम
ममत्रिविक्रमपदांनान्यदिच्छामिमानद १४
सर्वेषामेवदानानांभूमिदानमनुत्तमम्
योददातिमहींराजाविप्रायाकिंचनायवै १५
अंगुष्ठमात्रामपिवासभवेत्पृथिवीपतिः
नभूमिदानसदृशंपवित्रमिहविद्यते १६
भूमिंयःप्रतिगृह्णातिभूमिंयश्चप्रयच्छति
उभौतौपुण्यकर्म्माणौनिधनेस्वर्गगामिनौ १७
तस्माद्भूमिं महाराजप्रयच्छत्रिपदींमम
एतदल्पांमहींदातुंमाविशंकमहीपते
जगत्त्रयप्रदानंतन्नामभूपभविष्यति १८
शंकरउवाच-
ततः प्रहृष्टवदनस्तथेत्याहमहीपतिः
तस्मैमहीप्रदानंतुकर्तुंमेनेविधानतः १९
तंदृष्ट्वादैत्यराजानंतदातस्यपुरोहितः
उशनाह्यब्रवीद्वाक्यंमाराजन्दीयतांमहीम् २०
शुक्रउवाच-
एषविष्णुःपरेशोऽथदेवैःसंप्रार्थितोनृप

वंचयित्वामहींसर्वांत्वत्तःप्राप्तुमिहागतः २१
तस्मान्महीनदातव्यातस्मैराजन्महात्मने
अन्यमर्थंप्रयच्छस्ववचनान्ममभूपते २२
श्रीशंकरउवाच-
ततः प्रहस्यराजासौतंगुरुंप्राहधैर्य्यतः
बलिरुवाच-
प्रीतयेवासुदेवस्यसर्वंपुगयंकृतंमया २३
अद्यधन्योस्म्यहंविष्णुःस्वयमेवागतोयदि
तस्यप्रदेयमेवाद्यजीवितंचमहत्सुखम् २४
तस्मादस्मैप्रयच्छामित्रिलोकीमपिमाचिरम्
श्रीशंकरउवाच-
इत्युक्त्वाभूपतिस्तस्यपादौप्रद्माल्यभक्तितः २५
वांच्छितांप्रददौभूमिंवारि पूर्वंविधानतः
परिणीयनमस्कृत्यदत्वावैदद्मिणांवसु २६
प्रोवाचतंपुनर्विप्रंप्रहृष्टेनांतरात्मना
बलिरुवाच-
धन्योस्मिकृत कृत्योस्मितवदत्वामहींद्विज २७
यथेष्टातवविप्रेंद्रतद्गृहाणमहीमिमाम्
श्रीशंकरउवाच-
तमुवाचनृपंविष्णूराजंस्तवसमीपतः २८
मापयामिपदेनाद्यपृथिवींतवपश्यतः
इत्युक्त्वाखर्वरूपंतद्विहायपरमेश्वरः २९
त्रिविक्रमवपुर्भूत्वाजग्राहपृथिवीमिमाम्
पंचाशत्कोटिविस्तीर्णससमुद्रमहीधराम् ३०
ससागरांचसद्वीपांसदेवासुरमानुषाम्
पादेनैकेनवपुषोव्यक्रांतमधुसूदनः ३१
उवाचदैत्यराजेंद्रकिंकरोमीतिशाश्वतः
तद्वैत्रिविक्रमंरूपमीश्वरस्यमहौजसम् ३२
हितार्थमपिदेवानामृषीणांचमहात्मनाम्
नदृष्टमपिशक्यंस्याद्ब्रह्मणःशंकरस्यच ३३

तत्पदंपृथिवींसर्वामाक्रम्यगिरिजेशुभे
अतिरिक्तंसमभवच्छतयोजनमायतम् ३४
दिव्यचक्षुर्ददौतस्मैदैत्यराज्ञेसनातनः
तस्मैसंदर्शयामासस्वकंरूपंजनार्दनम् ३५
तद्विश्वरूपंदेवस्यदृष्ट्वादैत्येश्वरोबलि
प्रहर्षमतुलंलेभेसानंदाश्रुपरिप्लुतः ३६
दृष्ट्वादेवंनमस्कृत्यस्तुत्वास्तुतिभिरेवच
प्राहगद्गदयावाचाप्रहृष्टेनांतरात्मना ३७
बलिरुवाच-
धन्योस्मिकृतकृत्योस्मित्वांदृष्ट्वापरमेश्वरम्
लोकत्रयंत्वमेवैतद्गृहाणपरमेश्वर ३८
श्रीशंकरउवाच-
अथसर्वेश्वरोविष्णुर्द्वितीयंपदमव्ययम्
ऊर्ध्वंप्रसारयामासब्रह्मलोकांतमच्युतः ३९
सनक्षत्रग्रहोपेतंसर्वदेवसमावृतम्
पदेनपरिपूर्णोऽभूदच्युतस्यशुभानने ४०
ततःपितामहोब्रह्मचक्रपद्मादिचिह्नितम्
पादंतद्देवदेस्यहर्षसंकुलचेतसा ४१
धन्योस्मीतिवदन्ब्रह्मागृहीत्वास्वकमंडलुम्
भक्त्याप्रक्षालयामास तत्रसंस्थितवारिणा ४२
अक्षय्यमभवत्तोऽयतस्यविष्णोःप्रभावतः
तत्तीर्थंमेरुशिखरेपपातविमलंजलम् ४३
जगतः पावनार्थंवैचतुर्दिक्षुप्रवाहितम्
सिताचालकनन्दाचचक्षुर्भद्रायथाक्रमम् ४४
ततश्चालकनन्दाचमेरोर्दक्षिणतः स्मृता
त्रिधानाम्नात्रिपथगात्रिस्रोतालोकपावनी ४५
स्वर्गेमंदाकिनीप्रोक्तात्वधोभोगवतीतथा
मध्येवेगवतीगंगापावनार्थं नृणांशिवा ४६
तांदृष्ट्वामेरुमध्येतुप्रस्रवंतींशुभानने
आत्मनःपावनार्थायशिरसाहमधारयम् ४७

दिव्यंवर्षसहस्रंतुधृत्वागंगाजलंशुभम्
शिवत्वमगमंदेविसर्वलोकेषुपूजितः ४८
योवहेच्छिरसागंगातोऽयविष्णुपदोद्भवम्
प्राशयेद्वाजगत्पूज्योभविष्यतिनसंशयः ४९
गंगागंगेतियोब्रूयाद्योजनानांशतैरपि
मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति ५०
ततो भगीरथोराजागौतमश्चमहातपाः
तपसापूजयित्वामांगंगार्थंसमयाचत ५१
सर्वलोकहितार्थायतांगंगांवैष्णवींशिवाम्
तयोरहंतामददांप्रीत्यादेविसरिद्वराम् ५२
गौतमेनसमानीतागौतमीतेनकीर्त्तिता
भागीरथीतिविख्यातातेनराज्ञावृतायतः ५३
प्रसंगात्तेसमाख्यातंगंगाजन्मात्यनुत्तमम्
ततोनारायणः श्रीमान्बलि दैत्यपतिंप्रभुः ५४
रसातलंशुभंलोकंप्रददौभक्तवत्सलः
सर्वेषांदानवानांतुनागानांयादसामपि ५५
राजानंतुबलिचक्रेयावदाभूतसंप्लवम्
प्रतिगृह्यबलेर्लोकान्बटुवेषेणदैत्यहा ५६
महेंद्रायददौप्रीत्याकाश्यपोविष्णुरव्ययः
ततोदेवाः सगंधर्वाऋृषयश्चमहौजसः ५७
तुष्टुवुःस्तुतिभिर्द्दिव्यैःपूजयामासुरच्युतम्
संक्षिप्यतन्महद्रूपंतेषांसंदर्शनायवै ५८
संपूज्यमानास्त्रिदशैरंतर्द्धानंययौहरिः
इत्थंसुरक्षितः शक्रोविष्णुनाप्रभविष्णुना ५९
त्रैलोक्यंमहदैश्वर्य्यमवापत्रिदिवेश्वरः
एतत्तेसर्वमाख्यातंवामनंवैभवंशुभम्
शेषंयद्वैभवंदेवितद्वक्ष्यामियथाक्रमात् ६०

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वर
संवादेवामनप्रादुर्भावोनामचत्वारिंशदधिकद्विशततमोऽध्यायः २४०

एकचत्वारिंशदधिक द्विशततमोऽध्यायः

ईश्वरउवाच-
भृगुपुत्रोमहानासीज्जमदग्निर्द्विजोत्तमः
समस्तवेदवेदांगपारगश्चमहातपाः १
तपस्तेपेसुधर्मात्मामहेंद्रंप्रतिभामिनि
सहस्रवर्षपर्य्यंतंगंगायाः पुलिनेशुभे २
ततः प्रसन्नःप्राहेद्रंभगवान्पाकशासनः
इंद्रउवाच-
वरंवृणीष्वविप्रेंद्रयत्तेमनसिवर्त्तते ३
ईश्वरउवाच-
ततःप्रोवाचविप्रर्षिः परितुष्टंशतक्रतुम्
जमदग्निरुवाच-
सुरभिंदेहिमेदेवसर्वकामदुघांसदा ४
ईश्वरउवाच-
ततः प्रसन्नोदेवेशस्तस्मैविप्रायगोत्रभित्
प्रददौसुरभिंदेवींसर्वकामदुघांतदा ५
सलब्ध्वासुरभींदेवींजमदग्निर्महातपाः
उवासमहदैश्वर्यःशतक्रतुरिवापरः ६
रेणुकस्यसुतांरम्यां रेणुकांनामनामतः
उपयेमेविधानेनजमदग्निर्महातपाः ७
तयासहसधर्मात्मारेमेवर्षाण्यनेकशः
पौलोम्याशुभयादेव्यायथासंक्रन्दनोविभुः ८
ततः सपुत्रकामत्वादिष्टिंचक्रेसुधार्म्मिकः
इष्ट्यासंतोषयामासपाकशासनमीश्वरम् ९
परितुष्टःशचीभर्त्तातस्मैपुत्रंमहाबलम्
महौजसंमाहबाहुंसर्वशत्रुप्रतापनम् १०
अथकालेनविप्रेंद्रोरेणुकायांशुचिस्मिते
पुत्रमुत्पादयामासमहावीर्य्यबलान्वितम् ११
विष्णोरंशांशभागेनसर्वलक्षणलक्षिणम्
तस्मिन्सुतेमहावीर्य्येभृगुस्तस्यपितामहः १२

नामचास्मैददौहर्षाद्विष्णोरंशोपलक्षितम्
चक्रेऽथनामधेयंतुरामइत्यस्यशोभनम् १३
जमदग्नेःसमुत्पन्नोजामदग्न्यइतीरितः
तद्भार्गवान्वयःसोऽपिववृधेद्विजपुंगवः १४
उपनीतंस्तुतोयेनसर्वविद्याविशारदः
तपस्तप्तुंजगामाथशालग्रामाचलंप्रति १५
ददर्शकश्यपंतत्रब्रह्मर्षिममितौजसम्
हर्षेणपूरितस्तस्मिन्मरीचितनयोद्विजः १६
विधिनाप्रददौतस्मैमंत्रंवैष्णवमव्ययम्
लब्धमंत्रस्तदारामं कश्यपात्तुमहात्मनः १७
पूजयामासविधिनासतदाकमलापतिम्
षडक्षरंमहामंत्रंजपन्नेवदिवानिशम् १८
ध्यायन्कमलपत्राक्षंविष्णुंसर्वगतंहरिम्
तपस्तेपेसधर्मात्माबहुवर्षाणिभार्गवः १९
जितेंद्रियस्तुयतवाकृतदातस्थौमहातपाः
जमदग्निस्तुविप्रर्षिःस्थितोगंगातटेशुभे २०
चकारविधिवद्धर्म्यंयज्ञदानादिकंमहत्
धेन्वाःप्रसादादिंद्रस्यसंपूर्णास्तस्यसम्पदः २१
कस्यचित्त्वथकालस्यहैहयाधिपतिः प्रभुः
विजित्वासर्वराष्ट्राणिसर्वसैन्यसमावृतः २२
भार्गवस्याश्रमंप्राप्य जमदग्नेर्महीपतिः
समीक्ष्यतंमहाभागं ववंदेमुनिसत्तमम् २३
पृष्ट्वातुकुशलंतस्यमहर्षेर्भावितात्मनः
प्रददौनृपतिस्तस्मैवस्त्राण्याभरणानिच २४
सचसंपूजयामासराजानंगृहमागतम्
मधुपर्केणविधिनापूजयित्वानृपोत्तमम् २५
ससैन्यायनृपेंद्रायभोजनंप्रददौमुनिः
प्रार्थितासुरभिस्तेनभार्गवेणसुधीमता २६
संपूर्णमन्नपानादिससर्जशबलातदा
अक्षय्यमन्नपानादितयासृष्टंमहातपाः २७

ससैन्यायनृपेंद्रायप्रददौमुनिसत्तमः
तांदृष्ट्वाशबलांराजाकुतूहलसमन्वितः २८
स्पृहांचकारयामासतस्यांगविसुदुर्म्मतिः
अयाचत्सुरभिंतत्रजमदग्निंनृपोत्तमः २९
कार्त्तवीर्यउवाच-
शबलांदेहिमे विप्रकपिलांसर्वकामदाम्
अन्यधेनुसहस्राणिदास्यामितवसुव्रत ३०
ईश्वरउवाच-
इत्युक्तस्तेनराज्ञाथजमदग्निर्महातपाः
जमदग्निरुवाच-
नदेयाशबलाराजन्मयातवमहीपते ३१
इयंचदेवदेवेनशक्रेणपरिपालिता
देवतानांधनंराजन्दातव्यंस्यात्कथंमया ३२
ईश्वरउवाच-
इत्युक्तःसतदाराजाक्रोधेनकलुषीकृतः
बलाज्जग्राहशबलांसर्वसैन्यसमावृतः ३३
ततःक्रुद्धामहाभागाशबलावरवर्णिनि
जघानतस्यसैन्यानिशृंगैःखुरतलैरपि ३४
घातयित्वामुहूर्त्तेनतत्सैन्यंशबलाबलात्
अंतर्द्धानंगतादेवीययौशक्रांतिकंक्षणात् ३५
स्वसैन्यं निहतंदृष्ट्वासोऽजुनः क्रोधमूर्च्छितः
मुष्टिनाताडयामासभार्गवंद्विजसत्तमम् ३६
ताडितस्तेनबहुशोविकलांगःप्रकल्पितः
पपातसहसाभूमौममारद्विजसत्तमः ३७
हत्वामुनिवरंतत्रपापत्माहैहयाधिपः
महासैन्यपरीवारोविवेशनगरंस्वकम् ३८
रामस्तुदेवदेवेशंपूजयामासभार्गवः
तेनसंपूजितोदेवः प्रसन्नः प्राहकेशवः ३९
श्रीभगवानुवाच-
प्रीतोस्मितपसावत्सभवतोनियतात्मनः

संप्रदास्यामितेविप्रमच्छक्तिंपरमांशुभाम् ४०
आवेशितोऽथमच्छक्त्याजहिदुष्टान्नृपोत्तमान्
भूभारकविनाशायदेवतानांहितायवै ४१
ईश्वरउवाच-
इत्युक्त्वाप्रददौदेवः परशुंशत्रुधर्षणम्
वैष्णवंचमहच्चापंदिव्यान्यस्त्राण्यनेकशः
दत्वाप्रोवाचभगवाञ्जामदग्निंजनार्द्दनः ४२
श्रीभगवानुवाच-
मदोत्कटान्नृपान्हत्वाबहुशः परवीरहा
गृहाणपृथिवींसर्वांसागरान्तांद्विजोत्तम ४३
पालयस्वचधर्मेणवीर्य्येणमहतावृतः
कालेनमत्पदंचापिमत्प्रसादाद्गमिष्यसि ४४
ईश्वरउवाच-
इत्युक्त्वांतर्हितोदेवोवरंदत्वाद्विजन्मने
रामोऽपिचाथसहसाप्रययौपितुराश्रमम् ४५
पितरंनिहतंदृष्ट्वाभार्गवः क्रोधमूर्च्छितः
निष्क्षत्रांकर्तुमन्विच्छन्महींनृपसमाकुलाम् ४६
जगामहैहयपतेर्नगरंनृपसंवृतम्
क्रोधावेशज्वलद्गात्रोद्वार्य्यतिष्ठदुदायुधः ४७
तंदृष्ट्वातत्पुरजनाजामदग्न्यंमहौजसम्
जाज्वल्यमानंवपुषाकालाग्निमिवमेनिरे ४८
भयार्ताविद्रुताः सर्वेराजानंहैहयाधिपम्
शशंसुस्तंमहासत्वंसर्वायुधसमन्वितम् ४९
श्रुत्वासराजातद्वाक्यंप्राहविस्मितचेतसा
हैहयाधिपउवाच-
कोऽसौममपुरद्वारिसायुधः संस्थितोबलात् ५०
महेंद्रोवायमोवापिरुद्रोवाधनदोऽपिवा
सायुधोमत्पुरद्वारिस्थातुंशक्तोनकर्हिचित् ५१
महादेवउवाच-
इत्युक्त्वापार्थिवेंद्रोऽसौकिंकरान्सुमहाबलान्

प्रेरयामासतंद्रष्टुंगृह्णीतेत्याहदुर्मतिः ५२
तेगत्वाददृशुर्वीरंपुरद्वारिमहाबलम्
ज्वलंतमिवकालाग्निंदुर्निरीक्ष्यंस्वतेजसा ५३
तस्यसंदर्शनेऽप्यत्रनशक्तास्तेमहाबलाः
ग्रहीतुकामस्तंवीरंसमंतात्प्रययुर्भृशम् ५४
तान्दृष्ट्वासायुधान्सर्वान्पार्थिवेन्द्रस्यकिंकरान्
प्रहसन्प्राहविप्रेन्द्रोजामदग्निर्महाबलः ५५
परशुरामउवाच-
भार्गवस्यसुतोरामःसंप्राप्तोऽहनराधमाः
स्वपितुर्निधनात्सर्वान्हनिष्यामिनृपोत्तमान् ५६
कार्तवीर्यस्यरुधिरंमत्पित्रेतिलसंयुतम्
दास्यामिपिण्डदानंचतच्छिरःकमलेनवै ५७
महादेवउवाच-
इत्युक्तास्तेमहावीर्य्याः किंकरास्तस्यभूपतेः
शरैःस्मताडयामासुः पलालैरिबपावकम् ५८
ततः क्रुद्धोमहावीर्योरामस्सत्यपराक्रमः
वैष्णवंचापमाकृष्यज्यानिनादमथाकरोत् ५९
तेननादेनमहतापूरितंभुवनत्रयम्
देवानामपिसंत्रासोबभूवमहदद्भुतम् ६०
ततः पावकसंकाशैराशुगैः सुमहाबलः
ताडयामासतान्वीरान्किंकरान्वैमहाबलान् ६१
हत्वातुकिंकरास्तस्यपार्थिवस्यमहात्मनः
कालाग्निरिव संतस्थौसर्वभूतभयंकरः ६२
श्रुत्वातुकिंकरान्स्वस्यहतान्रामेणधीमता
हैहयाधिपतिर्वीरःक्रोधसंरक्तलोचनः ६३
निर्य्ययौसहसैन्येनयत्रास्तेभागवोऽव्ययः
तंदृष्ट्वाघोरसंकाशंज्वलंतंस्वेनतेजसा ६४
त्रस्ताः सर्वेजनास्तत्रशंकमानाजनक्षयम्
ततोयुद्धंमहाघोरंरामस्यनृपतेस्तदा ६५
शस्त्रास्त्रपातनैभीमैर्मेघयोरिववर्षतोः

ततोरामोमहातेजास्तत्सैन्यंनृपतेस्तदा ६६
निर्ददाहक्षणात्सर्वंवैष्णवास्त्रेणलीलया
ततः परशुनारामस्तीक्ष्णेनामितविक्रमः ६७
चिच्छेदवाहुसाहस्त्रंकार्त्तवीर्यस्यदुर्मतेः
नशशाकमहावीर्योयोद्धुंरामेणभूपतिः ६८
नष्टवीर्य्योबभूवात्रपापेनस्वेनदुर्म्मतिः
चिच्छेदतच्छिरः क्रुद्धोरेणुकातनयोबली ६९
महाद्रिशृङ्गंवज्रेणयथादेवपतिर्बली
हत्वासहस्त्रबाहुंतंजामदग्न्यः प्रतापवान् ७०
जघानपार्थिवान्सर्वान्क्रुद्धःपरशुनामृधे
रामंदृष्ट्वामहारौद्रंपार्थिवाः पृथिवीतले ७१
भयार्त्ताविद्रुताःसर्वेमातंगाइवकेसरिम्
विद्रुतानपिभूपालान्पितुर्निधनमन्युना ७२
जघानभार्गवः क्रुद्धोनागानिवखगेश्वरः
निःक्षत्रंकृतवान्सर्वंजामदग्निःप्रतापवान् ७३
ररक्षभगवानेकमिक्ष्वाकोःसुमहत्कुलम्
मातामहस्यान्वयत्वाद्रेणुकावचनादथ ७४
तान्भ्रष्टराज्यान्कृत्वावैमातामहकुलोद्भवान्
नहत्वामनुवंशांस्तान्रामोनृपकुलांतकः ७५
सर्वंतुभूभृतांवंशंनाशयामासवीर्य्यवान्
कृत्वाचोवींतुनिःक्षत्रांजमदग्निसुतोबली ७६
अश्वमेधंमहायज्ञंचकारविधिवद्द्विजः
प्रददौविप्रमुख्येभ्यःसप्तद्वीपवतींमहीम् ७७
दत्वामहींसविप्रेभ्योजामदग्न्यःप्रतापवान्
तपस्तप्तुंययौसोऽथनरनारायणाश्रमम् ७८
एतत्तेकथितंदेविजामदग्नेर्महात्मनः
शक्त्यावेशावतारस्यचरितंशार्ङ्गिणःप्रभोः ७९
नोपास्यंहिभवेत्तस्यशक्त्यावेशान्महात्मनः
उपास्यौभगवद्भक्तैर्विप्रमुख्यैर्महात्मभिः ८०
रामकृष्णावतारौतुपरिपूर्णौहिसद्गुणैः

उपास्यमानावृषिभिरपवर्गप्रदौनृणाम् ८१
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वर
संवादेपरशुरामचरितंनामैकचत्वारिंशदधिकद्विशततमोऽध्यायः २४१

द्विचत्वारिंशदधिक द्विशततमोऽध्यायः

रुद्रउवाच-
स्वायम्भुवोमनुःपूर्वंद्वाशार्णंमहामनुम्
जजापगोमतीतीरेनैमिषेविमलेशुभे १
तेनवर्षसहस्रेणपूजितः कमलापतिः
मत्तोवरंवृणीष्वेतितंप्राहभगवान्हरिः २
ततः प्रोवाचहर्षेणमनुःस्वायम्भुवोहरिम्
मनुरुवाच-
पुत्रत्वंभजदेवेशत्रीणिजन्मानिचाच्युत ३
त्वांपुत्रलालसत्वेनभजामिपुरुषोत्तमम्
रुद्रउवाच-
इत्युक्तस्तेनलक्ष्मीशः प्रोवाचसुमहागिरा ४
विष्णुरुवाच-
भविष्यतिनृपश्रेष्ठयत्तेमनसिकांक्षितम्
ममैवचमहत्प्रीतिस्तव पुत्रत्वहेतवे ५
स्थितिप्रयोजनेकालेतत्रतत्रनृपोत्तम
त्वयिजातेत्वहमपिजातोस्मितवसुव्रत ६
परित्राणायसाधूनांविनाशायचदुष्कृताम्
धर्म्मसंस्थापनार्थायसंभवामितवानघ ७
रुद्रउवाच-
एवंदत्वावरंतस्मैतत्रैवांतर्दधेहरिः
अस्याभूत्प्रथमंजन्ममनोःस्वायंभुवस्य च ८
रघूणामन्वयेपूर्वंराजादशरथोह्यभूत्
द्वितीयोवसुदेवोऽभूद्वृष्णीनामन्वयेविभुः ९
कलेर्दिव्यसहस्राब्दप्रमाणस्यांत्यपादयोः
शंभलग्रामकंप्राप्यब्राह्मणः संजनिष्यति १०

कौशल्यासमभूत्पत्नीराज्ञोदशरथस्यहि
यदोर्वंशस्यसेवार्थंदेवकीनामविश्रुता ११
हरिव्रतस्यविप्रस्य भार्य्यादेवप्रभापुनः
एवंमातृत्वमापन्नात्रीणिजन्मानिशार्ङ्गिणः १२
पूर्वंरामस्यचरितंवक्ष्यामितवसुव्रते
यस्यस्मरणमात्रेणविमुक्तिः पापिनामपि १३
हिरण्यकहिरण्याक्षौद्वितीयंजन्मसंश्रितौ
कुंभकर्णदशग्रीवावजायेतांमहाबलौ १४
पुलस्त्यस्यसुतोविप्रोविश्रवानामधार्मिकः
तस्यपत्नीविशालाक्षीराक्षसेंद्रसुताऽनघे १५
सुकेशितनयासास्यात्सुमालीदानवस्यच
केकसीनामकन्यासीत्तस्यभार्यादृढव्रता १६
कामोद्रिक्तातुसादेवीसंध्याकालेमहामुनिम्
रमयामासतन्वंगीयथेष्टंशुभदर्शना १७
कामात्संध्याभवाद्यत्वात्तस्यांजातौमहाबलौ
रावणःकुंभकर्णश्चराक्षसौलोकविश्रुतौ १८
कन्याशूर्पणखानामजाताऽतिविकृतानना
कस्यचित्त्वथकालस्यतस्यांजातोविभीषणः १९
सुशीलोभगवद्भक्तःसत्यवाग्धर्म्मवाञ्शुचिः
रावणःकुंभकर्णश्चहिमवत्पर्वतोत्तमे २०
महोग्रतपसामांवैपूजयामासतुर्भृशम्
रावणस्त्वथदुष्टात्मास्वशिरः कमलैःशुभैः २१
पूजयामासमांदेविदारुणेनैवकर्म्मणा
ततस्तमब्रुवंसुभ्रूःप्रहृष्टेनांतरात्मना २२
वरंवृणीष्वमेवत्सयत्तेमनसिवर्त्तते
ततः प्रोवाचदुष्टात्मादेवदानव रक्षसाम् २३
अवध्यत्वंप्रदेहीतिसर्वलोकजिगीषया
ततोऽहदत्तवांस्तस्मैराक्षसायदुरात्मने २४
देवदानवयक्षाणामवध्यत्वंवरानने
राक्षसोऽसौमहावीर्योवरदानात्तुगर्वितः २५

त्रील्लोँकान्पीडयामासदेवदानवमानुषान्
तेनसंबाध्यमानाश्चदेवाब्रह्मपुरोगमाः २६
भयार्त्ताःशरणंजग्मुरीश्वरंकमलापतिम्
ज्ञात्वाथवेदनांतेषामभयायसनातनः २७
उवाचत्रिदशान्सर्वान्ब्रह्मरुद्रपुरोगमान्
श्रीभगवानुवाच-
राज्ञोदशरथस्याहमुत्पतस्यामिरघोःकुले २८
वधिष्यामिदुरात्मानंरावणंसहबांधवम्
मानुषंवपुरास्थायहन्मिद्वतकंटकम् २९
नंदिशापाद्भवंतोऽपि वानरत्वमुपागताः
कुरुध्वंममसाहाय्यंगंधर्वाप्सरसोत्तमाः ३०
रुद्रउवाच-
इत्युक्तादेवतास्सर्वादेवदेवेनविष्णुना
वानरत्वमुपागम्यजज्ञिरेपृथिवीतले ३१
भार्गवेणप्रदत्तातुमहीसागरमेखला
दत्तामहर्षिभिःपूर्वरघूणांसुमहात्मनाम् ३२
वैवस्वतमनोःपुत्रोराज्ञां श्रेष्ठोमहाबलः
इक्ष्वाकुरितिविख्यातस्सर्वधर्म्मविदांवरः ३३
तदन्वयेमहातेजाराजादशरथोबली
अजस्यनृपतेःपुत्रःसत्यवान्शीलवान्शुचिः ३४
सराजापृथिवींसर्वांपालयामासवीर्य्यतः
राज्येषुस्थापयामाससर्वान्पार्थिवसत्तमान् ३५
कोशलस्यनृपस्याथपुत्रीसर्वांगशोभना
कौशल्यानामतांकन्यामुपयेमेसपार्थिवः ३६
मागधस्यनृपस्याथतनयाचशुचिस्मिता
सुमित्रानामनाम्नाचद्वितीयातस्यभामिनी ३७
तृतीयाकेकयस्याथनृपतेर्दुहितातथा
भार्य्याभूत्पद्मपत्राक्षीकेकयीनामनामतः ३८
ताभिस्मराजाभार्याभिस्तिसृभिर्धर्मसंयुतः
रमयामासकाकुत्स्थः पृथिवींचानुपालयन् ३९

अयोध्यानामनगरीसरयूतीरसंस्थिता
सर्वरत्नसुसंपूर्णाधनधान्यसमाकुला ४०
प्राकारगोपुरैर्जुष्टाहेमप्राकारसंकुला
उत्तमैर्नागतुरगैर्महेंद्रस्ययथापुरी ४१
तस्यांराजासधर्मात्माउवासमुनिसत्तमैः
पुरोहितेनविप्रेणवसिष्ठेनमहात्मना ४२
राज्यंचकारयामाससर्वंनिहतकंटकम्
यस्मादुत्पत्स्यतेतस्यांभगवान्पुरुषोत्तमः ४३
तस्मात्तुनगरीपुण्यासाप्ययोध्येतिकीर्तिता
नगरस्यपरंधाम्नोनामतस्याप्यभूच्छुभे ४४
यत्रास्तेभगवान्विष्णुस्तदेवपरमंपदम्
तत्रसद्योभवेन्मोक्षःसर्वकर्म्मनिकृंतनः ४५
जातेतत्रमहाविष्णौनराः सर्वेमुदंययुः
सराजापृथिवींसर्वांपालयित्वाशुभानने ४६
अयजद्वैष्णवेष्ट्याचपुत्रार्थीहरिमच्युतम्
तेनसंपूजितः श्रीशोराजासर्वगतोहरिः ४७
वैष्णवेनतुयज्ञेनवरदःप्राहकेशवः
तस्मिन्नाविरभूदग्नौयज्ञरूपोहरिस्तदा ४८
शुद्धजाम्बूनदप्रख्यःशंखचक्रगदाधरः
शुक्लांबरधरः श्रीमान्सर्वभूषणभूषितः ४९
श्रीवत्सकौस्तुभोरस्कोवनमालाविभूषितः
पद्मपत्रविशालाक्षश्चतुर्बाहुरुदाधीः ५०
सव्यांकस्थश्रियासार्द्धमाविरासीद्रमेश्वरः
वरदोस्मीतितंप्राहराजानंभक्तवत्सलः ५१
तंदृष्ट्वासर्वलोकेशंराजाहर्षसमाकुलः
ववंदेभार्य्ययासार्द्धंप्रहृष्टेनांतरात्मना ५२
प्रांजलिप्रणतोभूत्वाहर्षगद्गदया गिरा
पुत्रत्वंमेभजेत्याहदेवदेवंजनार्दनम् ५३
ततः प्रसन्नोभगवान्प्राहराजानमच्युतः
विष्णुरुवाच–

उत्पत्स्येऽहनृपश्रेष्ठदेवलोकहितायवै ५४
परित्राणायसाधूनांराक्षसानांवधायच
मुक्तिंप्रदातुंलोकानांधर्म्मसंस्थापनायच ५५
महादेवउवाच-
इत्युक्त्वापायसंदिव्यंहेमपात्रस्थितंशृतम्
लक्ष्म्याहस्तस्थितंशुभ्रंपार्थिवायददौहरिः ५६
विष्णुरुवाच-
इदंवैपायसंराजन्पत्नीभ्यस्तवसुव्रत
देहितेतनयास्तासुउत्पत्स्यन्तेमदंगजाः ५७
महादेवउवाच-
इत्युक्त्वामुनिभिः सर्वैःस्तूयमानोजनार्दनः
स्वात्मानंदर्शयित्वाथतथैवांतरधीयत ५८
सराजातत्रदृष्ट्वाचपत्नींज्येष्ठांकनीयसीम्
विभज्यपायसंदिव्यंप्रददौसुसमाहितः ५९
एतस्मिन्नन्तरेपत्नीसुमित्रातस्यमध्यमा
तत्समीपंप्रयातासापुत्रकामासुलोचना ६०
तांदृष्ट्वातत्रकौशल्याकैकेयीचसुमध्यमा
अर्द्धमर्द्धंप्रददतुस्तेतस्यैपायसंस्वकम् ६१
तत्प्राश्यपायसंदिव्यंराजपत्न्यःसुमध्यमाः
संपन्नगर्भाःसर्वास्ताविरेजुःशुभ्रवर्च्चसः ६२
तासांस्वप्नेषुदेवेशः पीतवासाजनार्दनः
शंखचक्रगदापाणिराविर्भूतस्तदाहरिः ६३
अस्मिन्कालेमनोरम्येमधुमासिशुचिस्मिते
शुक्लेनवम्यांविमलेनक्षत्रेऽदितिदैवते ६४
मध्याह्नसमयेलग्नेसर्वग्रहशुभान्विते
कौसल्याजनयामासपुत्रंलोकेश्वरंहरिम् ६५
इंदीवरदलश्यामंकोटिकंदर्प्पसन्निभम्
पद्मपत्रविशालाक्षंसर्वाभरणशोभितम् ६६
श्रीवत्सकौस्तुभोरस्कंसर्वाभरणभूषितम्
उद्यद्दिनकरप्रख्यकुण्डलाभ्यांविराजितम् ६७

अनेकसूर्य्यसंकाशंतेजसामहतावृतम्
परेशस्यतनोरम्यंदीपादुत्पन्नदीपवत् ६८
ईशानंसर्वलोकानायोगिध्येयंसनातनम्
सर्वोपनिषदामर्थमनंतंपरमेश्वरम् ६९
जगत्सर्गस्थितिलयेहेतुभूतमनामयम्
शरगयंसर्वभूतानांसर्वभूतमयंविभुम् ७०
समुत्पन्नेजगन्नाथेदेवदुंदुभयोदिवि
विनेदुःपुष्पवर्षाणिववर्षुःसुरसत्तमाः ७१
प्रजापतिमुखादेवाविमानस्थानभस्तले
तुष्टवुर्मुनिभिःसार्द्धंहर्षपूर्णांगविह्वलाः ७२
जगुर्गंधर्वपतयोननृतुश्चाप्सरोगणाः
वबुःपुगयशिवावाताः सुप्रभोभूद्दिवाकरः ७३
जज्वलुश्चाग्नयः शांताविमलाश्चदिशोदश
ततस्सराजाहर्षेणपुत्रंदृष्ट्वासनातनम् ७४
पुरोधसावसिष्ठेनजातकर्म्मतदाऽकरोत्
नामचास्मैददौरम्यंवसिष्ठोभगवांस्तदा ७५
श्रियःकमलवासिन्यारमणोऽयमहान्प्रभुः
तस्माच्छ्रीरामइत्यस्यनामसिद्धंपुरातनम् ७६
सहस्रनाम्नांश्रीशस्यतुल्यंमुक्तिप्रदंनृणाम्
विष्णुनाससमुत्पन्नोविष्णुरित्यभिधीयते ७७
एवं नामास्यदत्वाथवसिष्ठोभगवानृषिः
परिणीयनमस्कृत्यस्तुत्वास्तुतिभिरेवच ७८
संकीर्त्यनामसाहस्रंमंगलार्थंमहात्मनः
विनिर्ययौमहातेजास्तस्मात्पुगयतमाद्गृहात् ७९
राजाथविप्रमुख्येभ्योददौबहुधनंमुदा
गवामयुतदानंचकारयामासधर्म्मतः ८०
ग्रामाणांशतसाहस्रंददौरघुकुलोत्तमः
वस्त्रैराभरणैर्दिव्यैरसंख्येयैर्धनैरपि ८१
विष्णोस्संतुष्टयेतत्रतर्प्पयामासभूसुरान्
कौसल्याचसुतंदृष्ट्वारामंराजीवलोचनम् ८२

फुल्लहस्तारविंदाभंपद्महस्ताम्बुजान्वितम्
तस्यश्रीपादकमलेपद्माब्जेचवरानने ८३
शंखचक्रगदापद्मध्वजवस्त्रादिचिह्निते
दृष्ट्वावक्षसिश्रीवत्संकौस्तुभंवनमालया ८४
तस्यांगेसाजगत्सर्वंसदेवासुरमानुषम्
स्मितवक्त्रेविशालाक्षीभुवनानिचतुर्दश ८५
निश्वासेतस्यवेदांश्चसेतिहासान्महात्मनः
द्वीपानब्धीन्गिरींस्तस्यजघनेवरवर्णिनि ८६
नाभ्यांब्रह्मशिवौतस्यकर्णयोश्चदिशःशुभाः
नेत्रयोर्वह्निसूर्यौचघ्राणेवायुंमहाजवम् ८७
सर्वोपनिषदामर्थंदृष्ट्वातस्यविभूतयः
कृत्स्नाभीतावरारोहाप्रणम्यचपुनः पुनः
हर्षाश्रुपूर्णनयनाप्रांजलिर्वाक्यमब्रवीत् ८८
कौशल्योवाच-
धन्यास्मिदेवदेवेशलब्ध्वात्वांतनयंप्रभो
प्रसीदमेजगन्नाथपुत्रस्नेहंप्रदर्शय ८९
ईश्वरउवाच-
एवमुक्तोहृषीकेशोमात्रासर्वगतो हरिः
मायामानुषतांप्राप्यशिशुभावाद्रुरोदसः ९०
अथप्रमुदितादेवीकौशल्याशुभलक्षणा
पुत्रमालिंग्यहर्षेणस्तन्यंप्रादात्सुमध्यमा ९१
तस्याःस्तन्यंपपौदेवोबालभावात्सनातनः
उवासमातुरुत्संगेजगद्भर्तामहाविभुः ९२
देशेतस्मिञ्छुशुभेरम्येसर्वकामप्रदेनृणाम्
उत्सवंचक्रिरेपौराहृष्टाजनपदानराः ९३
कैकेय्यांभरतोजज्ञेपांचजन्यांशचोदितः
सुमित्राजनयामासलक्ष्मणंशुभलक्षणम् ९४
शत्रुघ्नंचमहाभागादेवशत्रुप्रतापनम्
अनंतांशेनसंभूतोलक्ष्मणः परवीरहा ९५
सुदर्शनांशाच्छत्रुघ्नः संजज्ञेऽमितविक्रमः

तेसर्वेववृधुस्तत्रवैवस्वतमनोःकुले ९६
संस्कृतास्तेसुताः सम्यग्वसिष्ठेनमहौजसा
अधीतवेदास्तेसर्वेश्रुतवंतस्तथानृपाः ९७
सर्वशास्त्रार्थतत्वज्ञाधनुर्वेदेचनिष्ठिताः
बभूवुःपरमोदारालोकानांहर्षवर्द्धनाः ९८
युग्मंबभूवतुस्तत्रराजानौरामलक्ष्मणौ
तथाभरतशत्रुघ्नौतयोर्युग्मंबभूवह ९९
अथलोकेश्वरीलक्ष्मीर्जनकस्यनिवेशने
शुभक्षेत्रेहलोद्धातेसुनासीरेशुभेक्षणे १००
बालार्ककोटिसंकाशारक्तोत्पलकराम्बुजा
सर्वलक्षणसंपन्नासर्वाभरणभूषिता १०१
धृत्वावक्षसिचार्वङ्गीमालामम्लानपङ्कजाम्
सीतामुखेसमुत्पन्नाबालभावेनसुंदरी १०२
तांदृष्ट्वाजनकोराजाकन्यांवेदमयींशुभाम्
उद्धृत्यापत्यभावेनपुपोषमिथिलापतिः १०३
जनकस्यगृहेरम्येसर्वलोकेश्वरप्रिया
ववृधेसर्वलोकस्यरक्षणार्थंसुरेश्वरी १०४
एतस्मिन्नंतरेदेविकौशिकोलोकविश्रुतः
सिद्धाश्रमेमहापुरयेभागीरथ्यास्तटेशुभे १०५
क्रतुप्रवरमारेभेयष्टुंतत्रमहामुनिः
वर्त्तमानस्यतस्यास्ययज्ञस्याथ द्विजन्मनः १०६
क्रतुविध्वंसिनोऽभूवन्रावणस्यनिशाचराः
कौशिकश्चिंतयित्वाथरघुवंशोद्भवंहरिम् १०७
आनेतुमैच्छद्धर्मात्मालोकानांहितकाम्यया
सगत्वानगरींरम्यामयोध्यांरघुपालिताम् १०८
नृपश्रेष्ठंदशरथंददर्शमुनिसत्तमः
राजापिकौशिकंदृष्ट्वाप्रत्युत्थायकृतांजलि १०९
पुत्रैःसहमहातेजाववंदेमुनिसत्तमम्
धन्योऽहमस्मीतिवदन्हर्षेणरघुनंदनं ११०
अर्चयामासविधिनानिवेश्यपरमासने

परिणीयनमस्कृत्यकिंकरोमीत्युवाचतम् १११
ततः प्रोवाचहृष्टात्माविश्वामित्रोमहातपाः
विश्वामित्रउवाच–
देहिमेराघवंराजन्रक्षणार्थंक्रतोर्मम ११२
साफल्यमस्तुमेयज्ञेराघवस्यसमीपतः
तस्माद्रामंरक्षणार्थंदातुमर्हसिभूषते ११३
ईश्वरउवाच–
तच्छ्रुत्वामुनिवर्य्यस्यवाक्यंसर्वविदांवरः
प्रददौमुनिवर्य्यायराघवंसहलक्ष्मणम् ११४
आदायराघवंतत्रविश्वामित्रोमहातपाः
स्वमाश्रममभिप्रीतः प्रययौद्विजसत्तमः ११५
ततः प्रहृष्टास्त्रिदशाःप्रयातेरघुसत्तमे
ववृषुःपुष्पवर्षाणितुष्टुवुश्चमहौजसः ११६
अथाजगामहृष्टात्मावैनतेयोमहाबलः
अदृश्यभूतोभूतानांसंप्राप्यरघुसत्तमम् ११७
ताभ्यांदिव्येचधनुषीतूणौचाक्षयसायकौ
दिव्यान्यस्त्राणिशस्त्राणिदत्वाचप्रययौद्विजः ११८
तौरामलक्ष्मणौवीरौकौशिकेनमहात्मना
गच्छंतीज्ञापितारण्येराक्षसीघोरदर्शना ११९
नाम्नातुताडकादेविभार्यासुंदस्यरक्षसः
जघ्नतुस्तांमहावीरौबाणैर्दिव्यधनुश्च्युतैः १२०
निहताराघवेणाथराक्षसीघोरदर्शना
त्यक्त्वातनुंघोररूपांदिव्यरूपाबभूवसा १२१
जाज्वल्यमानावपुषासर्वाभरणविभूषिता अं
प्रययौवैष्णवंलोकंप्रणम्यचरघूत्तमौ १२२
तांहत्वाराघवः श्रीमान्कौशिकस्याश्रमंशुभम्
प्रविवेशमहातेजालक्ष्मणेनमहात्मना १२३
ततः प्रहृष्टामुनयः प्रत्युद्गम्यरघूत्तमम्
निवेश्यपूजयामासुरर्घाद्यैः परमात्मने १२४
कौशिकःकृतदीक्षस्तुयंष्टुंयज्ञमनुत्तमम्

ग्रारेभेमुनिभिःसार्द्धंविधिनामुनिसत्तमः १२५
वर्त्तमानेमहायज्ञेमारीचोनामराज्ञसः
भ्रात्रासुबाहुनातत्रविघ्नंकर्तुमवस्थितः १२६
दृष्ट्वातौराज्ञसौघोरौराघवः परवीरहा
जघानैकेनबाणेनसुबाहुंराज्ञसेश्वरम् १२७
पवनास्त्रेणमहतामारीचंसनिशाचरम्
सागरेपातयामासशुष्कपर्णमिवानिलः १२८
सरामस्यमहावीर्य्यंदृष्ट्वाराज्ञससत्तमः
न्यस्तशस्त्रस्तपस्तप्तुंप्रययौमहादाश्रमम् १२९
विश्वामित्रोमहातेजाःसमाप्तेमहतिक्रतौ
प्रहृष्टमनसातत्रपूजयामासराघवम् १३०
समाश्लिष्यमहात्मानंकाकपज्ञधरंहरिम्
नीलोत्पलदलश्यामंपद्मपत्रायतेज्ञणम् १३१
उपाघ्रायतदामूर्ध्निंतुष्टावमुनिसत्तमः
एतस्मिन्नंतरेराजामिथिलायाग्रधीश्वरः १३२
वाजपेयंक्रतुंयष्टमारेभेमुनिसत्तमैः
तंद्रष्टुंप्रययुस्सर्वेविश्वामित्रपुरोगमाः १३३
मुनयोरघुशार्दूलसहिताः पुण्यचेतसः
गच्छतस्तस्यरामस्यपदाब्जेनमहात्मनः १३४
ग्रभूत्सापावनीभूमिःसमाक्रांतामहाशिला
सापिशप्तापुराभर्त्रागौतमेनद्विजन्मना १३५
ग्रहल्यारघुनाथस्यपादस्पर्शाच्छुभाऽभवत्
ग्रथसंप्राप्यनगरींमिथिलांमुनिसत्तमाः १३६
राघवाभ्यांतुसहिताबभूवुः प्रीतमानसाः
समागतान्महाभागान्दृष्ट्वाराजामहाबलः १३७
प्रत्युद्गम्यप्रणम्याथपूजयामासमैथिलः
रामंपद्मविशालाज्ञमिंदीवरदलप्रभम् १३८
पीताम्बरधरंश्लद्द्णंकोमलावयवोज्ज्वलम्
ग्रवधीरितकंदर्प्पकोटिलावण्यमुत्तमम् १३९
सर्वलज्ञणसम्पन्नंसर्वाभरणभूषितम्

स्वस्यहृत्पद्ममध्येयः परेशस्यतनुर्हरिः १४०
उत्पन्नोदीपवद्दीपात्सौशील्यादिगुणैःपरैः
तंदृष्ट्वारघुनाथंसजनकोहृष्टमानसः १४१
परेशमेवतंमेनेरामंदशरथात्मजम्
पूजयामासकाकुत्स्थंधन्योस्मीतिब्रुवन्नृपः १४२
प्रसादंवासुदेवस्यविष्णोर्मेनेनरेश्वरः
प्रदातुंदुहितांतस्मैमनसाचिंतयन्प्रभुः १४३
आत्मजौरघुवंशस्यज्ञात्वातत्रनृपोत्तमः
पूजयामासधर्मेणवस्त्रैराभरणैः शुभैः १४४
ऋषीन्समर्चयामासमधुपर्कादिपूजनैः
ततोऽवसानेयज्ञस्यरामोराजीवलोचनः १४५
भंक्त्वाशैवंधनुर्दिव्यंजितवान्जनकात्मजाम्
अथासौवीर्यशुल्केनमहतापरितोषितः १४६
मुदाधरणिजांतस्मैप्रददौमिथिलाधिपः
केशवायश्रियमिवयथापूर्वंमहार्णवः १४७
सदूतंप्रेषयामासराघवंमिथिलाधिपः
पुत्राभ्यांसहधर्मात्मामिथिलायांविवेशह १४८
वसिष्ठवामदेवाद्यैःप्रीतैःसहमहीपतिः
उवासनगरेरम्येजनकस्यरधूत्तमः १४९
तस्मिन्नेवशुभेकालेरामस्यधरणीसुताम्
विवाहमकरोद्राजामिथिलेनसमर्चितः १५०
लक्ष्मणस्योर्मिलांनामकन्यांजनकसंभवाम्
जनकस्यानुजस्याथतनयेशुभवर्चसी १५१
मांडवीश्रुतकीर्त्तिश्चसर्वलक्षणलक्षिते
भरतस्यचसौमित्रेर्विवाहमकरोन्नृपः १५२
निर्वर्त्यौद्वाहिकंतत्रराजादशरथोबली
अयोध्यांप्रस्थितः श्रीमान्पौरैर्जनपदैर्वृतः १५३
पारिबर्हंसमादायमैथिलेनचपूजितः
ससुतःसस्नुषःसाश्वःसगजःसबलानुगः १५४
तदध्वनिमहावीर्य्योजामदग्निःप्रतापवान्

गृहीत्वापरशुंचापंसंक्रुद्धइवकेसरी १५५
अभ्यधावच्चकाकुत्स्थंयोद्धुकामोनृपांतकः
संप्राप्यराघवंदृष्ट्वावचनंप्राहभार्गवः १५६
परशुरामउवाच-
रामराममहाबाहोशृणुष्ववचनंमम
बहुशःपार्थिवान्हत्वासंयुगेभूरिविक्रमान् १५७
ब्राह्मणेभ्योमहींदत्वातपस्तप्तुमहंगतः
तववीर्यबलंश्रुत्वात्वयायोद्धुमिहागतः १५८
इक्ष्वाकवोनवध्यामेमातामहकुलोद्भवाः
वीर्य्यंक्षत्रबलंश्रुत्वानशक्यंसहितुंमम १५९
रौद्रंचापंदुराधर्षंभज्यमानांत्वयानृप
तस्माद्ददान्ययुद्धंमेदीयतांरघुसत्तम १६०
इदंतुवैष्णवंचापंतेनतुल्यमरिंदम
आरोपयस्ववीर्येणनिर्जितोस्मित्वयैवहि १६१
अथवा त्यजशस्त्राणिपुरस्ताद्बलिनोमम
शरणंभजकाकुत्स्थकातरोस्यथचेतसी १६२
ईश्वरउवाच-
एवमुक्तस्तुकाकुत्स्थोभार्गवेणप्रतापवान्
तच्चापंतस्यजग्राहतच्छक्तिंवैष्णवीमपि १६३
शक्त्यावियुक्तस्सतदाजामदग्निःप्रतापवान्
निर्वीर्योनष्टतेजाभूत्कर्म्महीनोयथाद्विजः १६४
विनष्टतेजसंदृष्ट्वाभार्गवंनृपसत्तमाः
साधुसध्वितिकाकुत्स्थंप्रशशंसुर्मुहुर्मुहुः १६५
काकुत्स्थस्तन्महच्चापंगृहीत्वारोप्यलीलया
संधायबाणंतच्चापेभार्गवंप्राहविस्मितम् १६६
रामउवाच-
अनेनशरमुख्येनकिंकर्त्तव्यंतवद्विज
छेद्मिलोकमिमंचाधःस्वर्गंवाहन्मितेतपः १६७
ईश्वरउवाच-
तन्दृष्ट्वाघोरसंकाशंबाणंरामस्यभार्गवः

ज्ञात्वातंपरमात्मानंप्रहृष्टोराममब्रवीत् १६८
परशुरामउवाच–
रामराममहाबाहोनवेद्मित्वांसनातनम्
जानाम्यद्यैवकाकुत्स्थतववीर्य्यगुणादिभिः १६९
त्वमादिपुरुषःसाक्षात्परब्रह्मपरोऽव्ययः
त्वमनंतोमहाविष्णुर्वासुदेवःपरात्परः १७०
नारायणस्त्वंश्रीशस्त्वमीश्वरस्त्वंत्रयीमयः
त्वंकालस्त्वंजगत्सर्वमकाराख्यस्त्वमेवच १७१
स्त्रष्टाधाताचसंहर्त्तात्वमेव परमेश्वरः
त्वमचिंत्योमहद्भूतरूपस्त्वंतुमनुर्महान् १७२
चतुःषट्पंचगुणवांस्त्वमेवपुरुषोत्तमः
त्वंयज्ञस्त्वंवषट्कारस्त्वमोंकारस्त्रयीमयः १७३
व्यक्ताव्यक्तस्वरूपस्त्वंगुणभृन्निर्गुणःपरः
स्तोतुंत्वाहमशक्तश्चवेदानामप्यगोचरम् १७४
यच्चापलत्वंकृतवांस्त्वांयुयुत्सुतयाप्रभो
तत्क्षंतव्यंत्वयानाथकृपयाकेवलेनतु १७५
तवशक्त्यानृपान्सर्वाञ्जित्वादत्वामहींद्विजान्
त्वत्प्रसादवशादेवशांतिमाप्नोतिनैष्ठिकीम् १७६
ईश्वरउवाच–
एवमुक्त्वातुकाकुत्स्थंजामदग्निर्महातपाः
परिणीयनमस्कृत्वाराघवंलोकरक्षकम् १७७
शतक्रतुकृतंस्वर्गंतदस्त्रायन्यवेदयत्
राघवोऽथमहातेजाववंदेतंमहामुनिम् १७८
विधिवत्पूजयामासपाद्यार्घाचमनादिभिः
तेनसंपूजितस्तत्रजामदग्निर्महातपाः १७९
तपस्तप्तुंययौरम्यंनरनारायणाश्रमम्
राजादशरथःसोऽथपुत्रैर्दारसमन्वितैः १८०
स्वांपुरींसुमुहूर्त्तेनप्रविवेशमहाबलः
राघवोलक्ष्मणश्चैवशत्रुघ्नोभरतस्तथा १८१
स्वान्स्वान्दारानुपागम्यरेमिरेहृष्टमानसाः

तत्रद्वादशवर्षाणिसीतयासहराघवः १८२
रमयामासधर्मात्मानारायणइवश्रिया
तस्मिन्नेवतुराजाथकालेदशरथःसुतम् १८३
ज्येष्ठंराज्येनसंयोक्तुमैच्छत्प्रीत्यामहीपतिः
तस्यभार्याथकैकेयीपुरादत्तवराप्रिया १८४
अयाचतनृपश्रेष्ठंभरतस्याभिषेचनम्
विवासनंचरामस्यवत्सराणिचतुर्दश १८५
सराजासत्यवचनाद्रामंराज्यादथोः सुतम्
विवासयामासतदादुःखेनहतचेतनः १८६
शक्तोऽपिराघवस्तस्मिन्राज्यंसंत्यज्यधर्मतः
दशग्रीववधार्थायपितुर्वचनहेतुना १८७
वनंजगामकाकुत्स्थोलक्ष्मणेनचसीतया
राजापुत्रवियोगार्त्तःशोकेनचममारसः १८८
नियुज्यमानोभरतस्तस्मिन्राज्येसमंत्रिभिः
नैच्छद्राज्यंसधर्म्मात्मासौभ्रात्रमनुदर्शयन् १८९
वनमागम्यकाकुत्स्थमयाचद्भ्रातरंततः
रामस्तुपितुरादेशान्नैच्छद्राज्यमरिंदमः १९०
स्वपादुकेददौतस्मैभक्त्यासोऽप्यग्रहीत्तथा
रामस्यपादुकेराज्यमवाप्यभरतः शुभे १९१
प्रत्यहंगंधपुष्पैश्चपूजयन्कैकयीसुतः
तपश्चरणयुक्तेनतस्मिंस्तस्थौनृपोत्तमः १९२
यावदागमनंतस्यराघवस्यमहात्मनः
तावद्व्रतपराः सर्वेबभूवुःपुरवासिनः १९३
राघवश्चित्रकूटाद्रौभरद्वाजाश्रमेशुभे
रमयामासवैदेह्यामन्दाकिन्याजलेशुभे १९४
कदाचिदंकेवैदेह्याःशेतेरामोमहामनाः
एंद्रिःकाकस्समागम्यतस्मिन्नेव चचारह १९५
सदृष्ट्वाजानकींतत्रकंदर्प्पशरपीडितः
विददारनखैस्तीक्ष्णैःपीनोन्नतपयोधरम् १९६
तंदृष्ट्वावायसंरामःकुशंजग्राहपाणिना

ब्रह्मणास्त्रेणसंयोज्यचिक्षेपधरणीधरः १९७
तंतृणंघोरसंकाशंज्वालारचितविग्रहम्
दृष्ट्वाकाकःप्रदुद्राववविमुंचन्कातरंस्वरम् १९८
तंकाकंप्रत्यनुययौरामस्यास्त्रंसुदारुणम्
वायसस्त्रिषुलोकेषुबभ्रामभयपीडितः १९९
यत्रयत्रययौकाकः शरणार्थीसवायसः
तत्रतत्रतदस्त्रंतुप्रविवेशभया वहम् २००
ब्रह्माणमिंद्रंरुद्रंचयमंवरुणमेवच
शरणार्थीजगामाशुवायसः शस्त्रपीडितः २०१
तंदृष्ट्वावायसंसर्वैरुद्राद्यादेवदानवाः
नशक्ताःस्मवयंत्रातुमितिप्राहुर्मनीषिणः
अथप्रोवाचभगवान्ब्रह्मात्रिभुवनेश्वरः २०२
ब्रह्मोवाच-
भोभोबलिभुजांश्रेष्ठतमेवशरणंव्रज
सएवरक्षकः श्रीमान्सर्वेषांकरुणानिधिः २०३
रक्षत्येवक्षमासारोवत्सलंशरणागतान्
ईश्वरःसर्वभूतानांसौशील्यादिगुणान्वितः २०४
रक्षिताजीवलोकस्यपितामातासखासुहृत्
शरणंव्रजदेवेशंनान्यत्रशरणंद्विज २०५
महादेवउवाच-
इत्युक्तस्तेनबलिभुग्ब्रह्मणारघुनंदनम्
उपेत्यसहसाभूमौनिपपातभयातुरः २०६
प्राणसंशयमापन्नंदृष्ट्वासीताथवायसम्
त्राहित्राहीतिभर्तारमुवाचविनयाद्विभुम् २०७
पुरतःपतितंदेवीधरण्यांवायसंतदा
तच्छिरःपादयोस्तस्ययोजयामासजानकी २०८
समुत्थाप्यकरेणाथकृपापीयूषसागरः
ररक्षरामोगुणवान् वायसंदययार्दितः २०९
तमाहवायसंरामोमाभैरितिदयानिधिः
अभयंतेप्रदास्यामिगच्छगच्छयथासुखम् २१०

प्रणम्यराघवायाथसीतायैचमुहुर्मुहुः
स्वर्ल्लोकंप्रययावाशुराघवेणचरन्नितः २११
ततोरामस्तुवैदेह्यालन्दमणेनचधीमता
उवासचित्रकूटाद्रौस्तूयमानोमहर्षिभिः २१२
तस्मिन्संपूज्यमानस्तुभरद्वाजेनराघवः
जगामात्रेस्सुविपुलमाश्रमंरघुसत्तमः २१३
समागतंरघुवरंदृष्ट्वामुनिवरोत्तमः
भार्ययासहधर्म्मात्माप्रत्युद्गम्यमुदायुतः २१४
आसनेसुशुभेमुख्येनिवेश्यसहसीतया
अर्घ्यपाद्याचमनीयंचवस्त्राणिविविधानिच २१५
मधुपर्कन्ददौप्रीत्याभूषणंचानुलेपनम्
तस्यपत्न्यनसूयातुदिव्यांबरमनुत्तमम् २१६
सीतायैप्रददौप्रीत्याभूषणानिद्युमंतिच
दिव्यान्नपानभन्नाद्यैर्भोजयामासराघवम् २१७
तेनसंपूजितस्तत्रभक्तयापरमयानृपः
उवासदिवसंतत्रप्रीत्यारामस्सलन्दमणः २१८
प्रभातेविमलेरामः समुत्थायमहामुनिम्
परिणीयप्रणम्याथगमनायोपचक्रमे २१९
अनुज्ञातस्ततस्तेनरामोराजीवलोचनः
प्रययौदंडकारण्यंमहर्षिकुलसंकुलम् २२०
तत्रातिभीषणंघोरंविराधंनामरान्नसम्
हत्वाथशरभंगस्यप्रविवेशाश्रमंशुभम् २२१
सतुदृष्ट्वाथकाकुत्स्थंसद्यःसंन्नीणकल्मषः
प्रययौब्रह्मलोकंतुगंधर्वाप्सरसान्वितम् २२२
सुतीन्दणस्याप्यगस्त्यस्यह्यगस्त्यभ्रातुरेवच
क्रमेणप्रययौरामस्तैश्चसंपूजितस्तथा २२३
पचंवटयांततोरामोगोदावर्यास्तटेशुभे
उवाचसुचिरंकालंसुखेनपरमेणच २२४
तत्रगत्वामुनिश्रेष्ठास्तापसाधर्मचारिणः
पूजयामासुरात्मेशंरामंराजीवलोचनम् २२५

भयंविज्ञापयामासुस्तंचरक्षोगणेरितम्
तानाश्वास्यतुकाकुस्थोददौचाभयदक्षिणाम् २२६
तेतुसंपूजितास्तेन स्वाश्रमान्संप्रपेदिरे
तस्मिंस्त्रयोदशाब्दानिरामस्यपरिनिर्य्ययुः २२७
गोदावर्य्यास्तटेरम्येपंचवट्यांमनोरमे
कस्यचित्त्वथकालस्यराक्षसीघोररूपिणी २२८
रावणस्यस्वसातत्रप्रविवेशदुरासदा
सातुदृष्ट्वारघुवरंकोटिकंदर्प्पसन्निभम् २२९
इंदीवरदलश्यामंपद्मपत्रायतेक्षणम्
प्रोन्नतांसंमहाबाहुंकम्बुग्रीवंमहाहनुम् २३०
संपूर्णचंद्रसदृशंसस्मिताननपंकजम्
भृंगावलिनिभैःस्निग्धैःकुटिलैःशीर्षजैर्वृतम् २३१
रक्तारविंदसदृशंपद्महस्ततलांकितम्
निष्कलंकेन्दुसदृशंनखपंक्तिविराजितम् २३२
स्निग्धकोमलदूर्वाभंसौकुमार्य्यनिधिंशुभम्
पीतकौशेयवसनंसर्वाभरणभूषितम् २३३
युवाकुमारवयसंजगन्मोहनविग्रहम्
दृष्ट्वातंराक्षसीरामंकंदर्प्पशरपीडिता २३४
अब्रवीत्समुपेत्याथरामंकमललोचनम्
राक्षस्युवाच–
कस्त्वंतापसवेषेणवर्त्तसेदंडकेवने २३५
आगतोऽसिकिमर्थंचराक्षसानांदुरासदे
शीघ्रमाचक्ष्वतत्त्वेननानृतंवक्तुमर्हसि २३६
महेश्वरउवाच–
इत्युक्तःसतदारामःसंप्रहस्याब्रवीद्वचः
रामउवाच–
राज्ञोदशरथस्याहंपुत्रोरामइतीरितः
असौममानुजोधन्वीलक्ष्मणोनामचानघः २३७
पत्नीचेयंचमेसीताजनकस्यात्मजाप्रिया
पितुर्वचननिर्देशादहंवनमिहागतः २३८

विचरामोमहाररायमृषीणांहितकाम्यया
आगतासिकिमर्थंत्वमाश्रमंममसुंदरि २३९
कात्वंकस्यकुलेजातासर्वंसत्यंवदस्वमे
महेश्वरउवाच-
इत्युक्तासातुरामेणप्राहवाक्यमशंकिता २४०
राक्षस्युवाच-
अहंविश्रवसः पुत्रीरावणस्यस्वसानृप
नाम्नाशुर्पणखानामत्रिषुलोकेषुविश्रुता २४१
इदंचदंडकाररायंभ्रात्रादत्तंममप्रभो
भक्षयन्नृषिसंघान्वैविचरामिमहावने २४२
त्वांतुदृष्ट्वामुनिवरंकंदर्पशर पीडिता
रंतुकामात्वयासार्द्धमागतास्मिसुनिर्भया २४३
ममत्वंनृपशार्दूलभर्ताभवितुमर्हसि
इमांतवसतींसीतांग्रसितुंभूपकामये २४४
वनेषुगिरिमुख्येषुरमयामित्वयासह
महेश्वरउवाच-
इत्युक्त्वाराक्षसीसीतांग्रसितुंवीक्ष्यचोद्यताम् २४५
श्रीरामःखड्गमुद्यम्यनासाकर्णौप्रचिच्छिदे २४६
रुदंतीसभयंशीघ्रंराक्षसीविकृतानना
खरालयंप्रविश्याहतस्यरामस्यचेष्टितम् २४७
सतुराक्षससाहस्रैर्दूषणत्रिशिरोवृतः
आजगामभृशंयोद्धुंराघवंशत्रुसूदनः २४८
तान्रामःकाननेघोरेबाणःकालांतकोपमैः
निजघानमहाकायान्राक्षसांस्तत्रलीलया २४९
खरंत्रिशिरसंचैवदूषणंतुमहाबलम्
रणेनिपातयामासबाणैराशीविषोपमैः २५०
निहत्यराक्षसान्सर्वान्दंडकाररायवासिनः
पूजितःसुरसंघैश्चस्तूयमानोमहर्षिभिः २५१
उवासदंडकाररायेसीतयालक्ष्मणेनच
राक्षसानांवधंश्रुत्वारावणः क्रोधमूर्च्छितः २५२

आजगामजनस्थानंमारीचेनदुरात्मना
संप्राप्यपंचवट्यांतुदशग्रीवः सराक्षसः २५३
मायाविनामरीचेनमृगरूपेणरक्षसः
अपहृत्याश्रमाद्दूरेतौतुदशरथात्मजौ २५४
जहारसीतांरामस्यभार्यांस्ववधकांक्षया
ह्रियमाणांतुतांदृष्ट्वाजटायुर्गृध्रराड्बली २५५
रामस्यसौहृदात्तत्रयुयुधेतेनरक्षसा
तंहत्वाबाहुवीर्येणरावणंशत्रुवारणः २५६
प्रविवेशपुरींलंकांराक्षसैर्बहुभिर्वृताम्
अशोकवनिकामध्येनिःक्षिप्यजनकात्मजाम् २५७
निधनंरामबाणेनकांक्षयन्स्वगृहंविशत्
रामस्तुराक्षसंहत्वामारीचंमृगरूपिणम् २५८
पुनराविश्यतत्राथभ्रात्रासौमित्रिणाततः
राक्षसापहृतांभार्यांज्ञात्वादशरथात्मजः २५९
प्रभूतशोकसंतप्तोबिललापमहामतिः
मार्गमाणोवनेसीतांपथिगृध्रंमहाबलम् २६०
विच्छिन्नपादपक्षंचपतितंधरणीतले
रुधिरापूर्णसर्वांगंदृष्ट्वाविस्मयमागतः २६१
पप्रच्छराघवं श्रीमान्केनकिंत्वंजिघांसितः
गृध्रस्तुराघवंदृष्ट्वामंदमंदमुवाचह २६२
गृध्रउवाच-
रावणेनहृतारामतवभार्याबलीयसा
तेनराक्षसमुख्येनसंग्रामेनिहतोस्म्यहम् २६३
महेश्वरउवाच-
इत्युक्त्वाराघवस्याग्रेसहसात्यक्तजीवितः
संस्कारमकरोद्रामस्तस्यब्रह्मविधानतः २६४
स्वपदंचददौतस्मैयोगिगम्यंसनातनम्
राघवस्यप्रसादेनसगृध्रःपरमंपदम् २६५
हरेःसामान्यरूपेणमुक्तिंप्रापखगोत्तमः
माल्यवंतंततोगत्वामतंगस्याश्रमेशुभे २६६

अभिगम्यमहाभागांशबरींधर्मचारिणीम्
सातुभागवतश्रेष्ठादृष्ट्वातौरामलक्ष्मणौ २६७
प्रत्युद्गम्यनमस्कृत्वानिवेश्यकुशविष्टरे
पादप्रक्षालनंकृत्वावन्यैःपुष्पैःसुगंधिभिः २६८
अर्चयामासभक्तयावैहर्षनिर्भरमानसा
फलानिचसुगंधीनिमूलानिमधुराणिच २६९
निवेदयामासतदाराघवाभ्यांदृढव्रता
फलान्यास्वाद्यकाकुत्स्थस्तस्यैमुक्तिंददौपराम् २७०
ततः पंपासरोगत्वाराघवः शत्रुसूदनः
जघानराक्षसंतत्रकबंधंघोररूपिणम् २७१
तंनिहत्यमहावीर्योददाहस्वर्गतश्चसः
ततोगोदावरींगत्वारामोराजीवलोचनः २७२
पप्रच्छसीतांगंगेत्वंकिंतांजानासिमे प्रियाम्
नशशंसतदातस्मैसागंगातमसावृता २७३
शशापराघवः क्रोधाद्रक्ततोयाभवेतिताम्
ततोभयात्समुद्विग्नापुरस्कृत्यमहामुनीन् २७४
कृतांजलिपुटादीनाराघवंशरणंगता
ततोमहर्षयस्सर्वेरामंप्राहुस्सनातनम् २७५
ऋषयऊचुः-
त्वत्पादकमलोद्भूतागंगात्रैलोक्यपावनी
त्वमेवहिजगन्नाथतांशापान्मोक्तुमर्हसि २७६
महेश्वरउवाच-
ततः प्रोवाचधर्मात्मारामः शरणवत्सलः
रामउवाच-
शवर्याः स्नानमात्रेणसंगताशुभवारिणा
मुक्ताभवतुमच्छापाद्गंगेयंपापनाशिनी २७७
एवमुक्त्वातुकाकुत्स्थः शबरीतीर्थमुत्तमम्
गंगागयासमंचक्रेशार्ङ्गकोट्यामहाबलः २७८
महाभागवतानांचतीर्थंयस्योदकेऽभवत्
तच्छरीरंजगद्वंद्यंभविष्यतिनसंशयः २७९

एवमुक्त्वातुकाकुत्स्थऋष्यमूकंगिरिंययौ
ततः पंपासरस्तीरेवानरेणहनूमता २८०
संगतस्तस्यवचनात्सुग्रीवेणसमागतः
सुग्रीववचनाद्धत्वावालिनंवानरेश्वरम् २८१
सुग्रीवमेवतद्राज्येरामोसावभ्यषेचयत्
सतुसंप्रेषयामासदिदृक्षुर्जनकात्मजाम् २८२
हनुमत्प्रमुखान्वीरान्वानरान्वानराधिपः
सलंघयित्वाजलधिंहनूमान्मारुतात्मजः २८३
प्रविश्यनगरींलंकांदृष्ट्वासीतांदृढव्रताम्
उपवासकृशांदीनांभृशंशोकपरायणाम् २८४
मलपंकेनदिग्धांगींमलिनाम्बरधारिणीम्
निवेदयित्वाऽभिज्ञानंप्रवृत्तिंचनिवेद्यताम् २८५
सप्तमंत्रिसुतांस्तत्ररावणस्यसुतंतथा
तोरणस्तंभमुत्पाट्यनिजघानस्वयंकपिः २८६
समाश्वास्यचवैदेहींबभंजोपबनंतदा
वनपालान्किंकरांश्चपंचसेनाग्रनायकान् २८७
रावणस्यसुतेनाथनिगृहीतोयदृच्छया
दृष्ट्वाचराक्षसेंद्रंतुसंभाषित्वातथैवच २८८
ददाहनगरींलंकांस्वलांगूलाग्निनाकपिः
तयादत्तमभिज्ञानंगृहीत्वापुनरागमत् २८९
सोऽभिगम्यमहातेजारामंकमललोचनम्
न्यवेदयद्वानरेंद्रोदृष्टासीतेतितत्वतः २९०
सुग्रीवसहितोरामोवानरैर्बहुभिर्वृतः
महोदधेस्तटंगत्वातत्रानीकंन्यवेशयत् २९१
रावणस्यानुजोभ्राताविभीषणइतीरितः
धर्मात्मासत्यसंधश्चमहाभागवतोत्तमः२९२
ज्ञात्वासमागतंरामंपरित्यज्यस्वपूर्वजम्
राज्यंसुतांश्चदारांश्चराघवंशरणंययौ २९३
परिगृह्यचतंरामोमारुतेर्वचनात्प्रभुः
तस्मैदत्वाऽभयंसौम्यंरक्षोराज्येऽभ्यषेचयत् २९४

ततस्समुद्रंकाकुत्स्थस्तर्तुकामः प्रपद्यवै
सुप्रसन्नजलंतंतुदृष्ट्वारामोमहाबलः २९५
शार्ङ्गमादायबाणौघैः शोषयामासवारिधिम्
ततस्तुसरितामीशःकाकुत्स्थंकरुणानिधिम् २९६
प्रपद्यशरणंदेवमर्चयामासवारिधिः
पुनरापूर्यजलधिंवरुणास्त्रेणराघवः २९७
उदधेर्वचनात्सेतुंसागरेमकरालये
गिरिभिर्वानरानीतैर्नलःसेतुमकारयत् २९८
ततो गत्वापुरींलंकांसन्निवेश्यमहाबलम्
सम्यगायोधनंचक्रेवानराणांचरक्षसाम् २९९
ततोदशास्यतनयःशक्रजिद्राक्षसोबली
वबंधनागपाशैश्चतावुभौरामलक्ष्मणौ ३००
वेनतेयःसमागत्यतान्यस्त्राणिप्रमोचयत्
राक्षसानिहतास्सर्वेवानरैश्चमहाबलैः ३०१
रावणस्यानुजंवीरंकुंभकर्णमहाबलम्
निजघानरणेरामोबाणैरग्निशिखोपमैः ३०२
ब्रह्मास्त्रेणेन्द्रजित्क्रुद्धःपातयामासवानरान्
हनूमतासमानीतोमहौषधिमहीधरः ३०३
तस्यानीतस्यचस्पर्शात्सर्वएवसमुत्थिताः
ततोरामानुजोवीरःशक्रजेतारमाहवे ३०४
निपातयामासशरैर्वृत्रंवज्रधरोयथा
निर्ययावथपौलस्त्योयोद्धुंरामेणसंयुगे ३०५
चतुरंगबलैःसार्द्धंमंत्रिभिश्चमहाबलः
समंततोभवद्युद्धंवानराणांचरक्षसाम् ३०६
रामरावणयोश्चैवतथासौमित्रिणासह
शक्तयानिपातयामासलक्ष्मणंराक्षसेश्वरः ३०७
ततः क्रुद्धोमहातेजाराघवोराक्षसांतकः
जघानराक्षसान्वीराञ्शरैःकालांतकोपमैः ३०८
प्रदीप्तैर्बाणसाहस्त्रैःकालदंडोपमैर्भृशम्
छादयामासकाकुत्स्थोदशग्रीवंचराक्षसम् ३०९

सतुनिर्भिन्नसर्वांगोराघवास्त्रैर्निशाचरः
भयात्प्रदुद्रावरणाल्लंकांप्रतिनिशाचरः ३१०
जगद्राममयंपश्यन्निर्वेदाद्गृहमाविशत्
ततोहनूमतानीतोमहौषधिमहागिरिः ३११
तेनरामानुजस्तूर्णंलब्धसंज्ञोऽभवत्तदा
दशग्रीवस्ततोहोममारेभेजयकांक्षया ३१२
ध्वंसितंवानरेंद्रैस्तदभिचारात्मकंरिपोः
पुनर्युद्धायपौलस्त्योरामेणसह निर्ययौ ३१३
दिव्यस्यन्दनमारुह्यराक्षसैर्बहुभिर्युतः
ततः शतमखोदिव्यंरथंहर्यश्वसंयुतम् ३१४
राघवायससूतंहिप्रेषयामासबुद्धिमान्
रथंमातलिनानीतंसमारुह्यरघूत्तमः ३१५
स्तूयमानं सुरगणैर्युयुधेतेनरक्षसा
ततोयुद्धमभूद्घोरंरामरावणयोर्महत् ३१६
सप्ताह्निकमहोरात्रंशस्त्रास्त्रैरतिभीषणम्
विमानस्थाःसुरास्सर्वेददृशुस्तत्रसंयुगम् ३१७
दशग्रीवस्यचिच्छेदशिरांसिरघुसत्तमः
समुत्थितानिबहुशोवरदानात्कपर्दिनः ३१८
ब्राह्ममस्त्रंमहारौद्रंवधायास्यदुरात्मनः
ससर्जराघवस्तूर्णंकालाग्निसदृशप्रभम् ३१९
तदस्त्रंराघवोत्सृष्टंरावणस्यस्तनांतरम्
विदार्यधरणींभित्त्वारसातलतलेगतम् ३२०
संपूज्यमानंभुजगैराघवस्यकरंययौ
सगतासुर्महादैत्यःपपातचममारच ३२१
ततो देवगणास्सर्वेहर्षनिर्भरमानसाः
ववृषुःपुष्पवर्षाणिमहात्मनिजगद्गुरौ ३२२
जगुर्गंधर्वपतयोननृतुश्चाप्सरोगणाः
ववुःपुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ३२३
तुष्टुवुर्मुनयःसिद्धादेवगंधर्वकिन्नराः
लंकायांराक्षसश्रेष्ठमभिषिच्यविभीषणम् ३२४

कृतकृत्यमिवात्मानंमेनेरघुकुलोत्तमः
रामस्तत्राब्रवीद्वाक्यमभिषिच्यविभीषणम् ३२५
रामउवाच-
यावच्चंद्रश्चसूर्यश्चयावत्तिष्ठतिमेदिनी
यावन्ममकथालोकेतावद्राज्यंविभीषणे ३२६
गत्वाममपदंदिव्यंयोगिगम्यंसनातनम्
सपुत्रपौत्रःसगणःसंप्राप्नुहिमहाबलः ३२७
ईश्वरउवाच-
एवंदत्वावरंतस्मैराक्षसायमहाबलः
संप्राप्यमैथिलद्यंतत्रपरुषंजनसंसदि ३२८
उवाचराघवः सीतांगर्हितंवचनंबहु
सातेनगर्हितासाध्वीविवेशचानलंमहत् ३२९
ततोदेवगणास्सर्वेशिवब्रह्मपुरोगमाः
दृष्ट्वातुमातरंवह्नौप्रविशंतींभयातुराः
समागम्यरघुश्रेष्ठंसर्वेप्रांजलयोऽब्रुवन् ३३०
देवाऊचुः-
रामराममहाबाहोशृणुत्वंचातिविक्रम
सीतातिविमलासाध्वीतवनीत्यानपायिनी ३३१
अत्याज्यातुवृथासाहि भास्करेणप्रभायथा
सेयंलोकहितार्थायसमुत्पन्नामहीतले ३३२
मातासर्वस्यजगतः समस्तजगदाश्रया
रावणःकुंभकर्णश्चभृत्यौपूर्वपरायणौ ३३३
शापात्तौसनकादीनांसमुत्पन्नौमहीतले
तयोर्विमुक्त्यैवैदेहीगृहीतादण्डकेवने ३३४
तावुभौवैवधंप्राप्तौत्वयाराक्षसपुंगवौ
तौविमुक्तौदिवंयातौपुत्रपौत्रसहानुगौ ३३५
त्वंविष्णुस्त्वंपरंब्रह्मयोगिध्येयःसनातनः
त्वमेवसर्वदेवानामनादिनिधनोऽव्ययः ३३६
त्वंहिनारायणः श्रीमान्सीतालक्ष्मीःसनातनी
मातासासर्वलोकानांपितात्वंपरमेश्वर ३३७

नित्यैवैषजगन्मातातवनित्यानपायिनी
यथासर्वगतस्त्वंहितथा चेयंरघूत्तम ३३८
तस्माच्छुद्धसमाचारांसीतांसाध्वींदृढव्रताम्
गृहाणसौम्यकाकुत्स्थत्क्षीराब्धेरिवमाचिरम् ३३९
ईश्वरउवाच-
एतस्मिन्नंतरेतत्रलोकसाक्षीसपावकः
आदायसीतांरामायप्रददौसुरसन्निधौ
अब्रवीत्तत्रकाकुत्स्थंवह्निःसर्वशरीरगः ३४०
वह्निरुवाच-
इयंशुद्धसमाचारासीतानिष्कल्मषाविभो
गृहाणमाचिरंरामसत्यंसत्यंतवाब्रुवन् ३४१
ईश्वरउवाच-
ततोऽग्निवचनात्सीतांपरिगृह्यरघूद्वहः
बभूवरामःसंहृष्टःपूज्यमानः सुरोत्तमैः ३४२
राक्षसैर्निहतायेतुसंग्रामेवानरोत्तमाः
पितामहवरात्तूर्णंजीवमानाः समुत्थिताः ३४३
ततस्तुपुष्पकंनामविमानंसूर्यसन्निभम्
भ्रात्रागृहीतंसंग्रामेकौबेरंराक्षसेश्वरः ३४४
तद्राघवायप्रददौवस्त्राण्याभरणानिच
तेनसंपूजितः श्रीमान्रामचंद्रःप्रतापवान् ३४५
आरुरोहविमानाग्र्यंवैदेह्याभार्ययासह
लक्ष्मणेनचशूरेणभ्रात्रादशरथात्मजः ३४६
ऋक्षवानरसंघातैः सुग्रीवेण महात्मना
विभीषणेनशूरेणराक्षसैश्चमहाबलैः ३४७
यथाविमानेवैकुंठेनित्यमुक्तैर्महात्मभिः
तथासर्वेसमारुह्यऋक्षवानरराक्षसाः ३४८
अयोध्यांप्रस्थितोरामःस्तूयमानः सुरोत्तमैः
भरद्वाजाश्रमंगत्वारामः सत्यपराक्रमः ३४९
भरतस्यांतिकेतत्रहनूमंतंव्यसर्जयत्
सनिषादालयं गत्वागुहंदृष्ट्वाऽथवैष्णवम् ३५०

राघवागमनंतस्मैप्राहवानरपुंगवः
नंदिग्रामंततोगत्वादृष्ट्वातंराघवानुजम् ३५१
न्यवेदयत्तथातस्मैरामस्यागमनोत्सवम्
भरतश्चागतंश्रुत्वावानरेणरघूत्तमम् ३५२
प्रहर्षमतुलंलेभेसानुजःससुहृज्जनः
पुनरागत्यकाकुत्स्थंहनूमान्मारुतात्मजः ३५३
सर्वंशशंसरामायभरतस्यचवर्तितम्
राघवस्तुविमानाग्र्यादवरुह्यसहानुजः ३५४
ववंदेभार्ययासार्द्धंभारद्वाजंतपोनिधिम्
सतुसंपूजयामासकाकुत्स्थंसानुजंमुनिः ३५५
पक्वान्नैःफलमूलाद्यैर्वस्त्रैरामभरणैरपि
तेनसंपूजितस्तत्रप्रणम्यमुनिसत्तमम् ३५६
अनुज्ञातः समारुह्यपुष्पकंसानुगस्तदा
नंदिग्रामंययौरामःपुष्पकेणसुहृद्वृतः ३५७
मंत्रिभिःपौरमुख्यैश्चसानुजः केकयीसुतः
प्रत्युद्ययौनृपवरैः सबलैःपूर्वजंमुदा ३५८
संप्राप्यरघुशार्दूलंववंदेसानुगैर्वृतः
पुष्पकादवरुह्याथराघवःशत्रुतापनः ३५९
भरतंचैवशत्रुघ्नमुपसंपरिषस्वजे
पुरोहितंवसिष्ठंचमातृबृद्धांश्चबांधवान् ३६०
प्रणनाममहातेजाःसीतयालक्ष्मणेनच
बिभीषणंचसुग्रीवंजाम्बवंतंतथांगदम् ३६१
हनुमंतंसुषेणंचभरतः परिषस्वजे
भ्रातृभिःसानुगैस्तत्रमंगलस्नानपूर्वकम् ३६२
दिव्यमाल्यांबरधरोदिव्यगंधानुलेपनः
आरुरोहरथंदिव्यंसुमंत्राधिष्ठितंशुभम् ३६३
संस्तूयमानस्त्रिदशैर्वैदेह्यालक्ष्मणेनच
भरतश्चैवसुग्रीवः शत्रुघ्नश्चविभीषणः ३६४
अङ्गदश्चसुषेणश्चजाम्बवान्मारुतात्मजः
नीलोनलश्चसुभगः शरभोगंधमादनः ३६५

अन्येचकपयःशूरानिषादाधिपतिर्गुहः
राक्षसाश्चमहावीर्याःपार्थिवेंद्रामहाबलाः ३६६
गजानश्वानथोसम्यगारुह्यबहुशःशुभान्
नानामंगलवादित्रैःस्तुतिभिःपुष्कलैस्तथा ३६७
ऋक्षवानररक्षोभिर्निषादवरसैनिकैः
प्रविवेशमहातेजाःसाकेतंपुरमव्ययम् ३६८
आलोक्यराजनगरींपथिराजपुत्रोराजानमेवपितरंपरिचिंतयानः
सुग्रीवमारुतिबिभीषणपुण्यपादसंचारपूतभवनंप्रविवेशरामः ३६९
इतिश्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्र्यांसंहितायामुत्तरखंडेउमामहेश्वरसंवादेरामस्यायोध्याप्रवेशोनामद्विचत्वारिंशदधिकद्विशततमोऽध्यायः २४२

त्रिचत्वारिंशदधिक द्विशततमोऽध्यायः

शंकरउवाच-
अथतस्मिन्दिनेपुण्येशुभलग्नेशुभान्विते
मंगलस्याभिषेकार्यमंगलंचक्रिरेजनाः १
वसिष्ठोवामदेवश्चजाबालिरथकश्यपः
मार्कंडेयश्चमौद्गल्यःपर्वतोनारदस्तथा २
एतेमहर्षयस्तत्रजपहोमपुरस्सरम्
अभिषेकंशुभंचक्रुर्मुनयोराजसत्तमम् ३
नानारत्नमयेदिव्येहेमपीठेशुभान्विते
निवेश्यसीतयासार्द्धंश्रियाइवजनार्दनम् ४
सौवर्णकलशैर्दिव्यैर्नानारत्नमयैःशुभैः
सर्वतीर्थोदकैःपुण्यैर्माङ्गल्यद्रव्यसंयुतैः ५
दूर्वाग्रतुलसीपत्रपुष्पगंधसमन्वितैः
मंत्रपूतजलैःशुद्धैर्मुनयःसंशितव्रताः ६
अजपन्वैष्णवान्सूक्तान्चतुर्वेदमयान्शुभान्
अभिषेकंशुभंचक्रुःकाकुत्स्थंजगतःपतिम् ७
तस्मिन्शुभतमेलग्नेदेवदुंदुभयोदिवि
विनेदुःपुष्पवर्षाणिववृषुश्चसमंततः ८
दिव्यांबरैर्भूषणैश्चदिव्यगंधानुलेपनैः

पुष्पैर्नानाविधैर्दिव्यैर्देव्यासहरघूद्वहः ९
अलंकृतश्चशुशुभेमुनिभिर्वेदपारगैः
छत्रंचचामरंदिव्यंधृतवान्लक्ष्मणस्तदा १०
पार्श्वेभरतशत्रुघ्नौतालवृंतौविरेजतुः
दर्पणंप्रददौश्रीमान्राक्षसेंद्रोविभीषणः ११
दधारपूर्णकलशंसुग्रीवोवानरेश्वरः
जाम्बवांश्चमहातेजाःपुष्पमालांमनोहराम् १२
वालिपुत्रस्तुतांबूलंसकर्पूरंददौहरेः
हनुमान्दीपकांदिव्यांसुषेणश्चध्वजंशुभम् १३
परिवार्यमहात्मानंमंत्रिणः समुपासिरे
सृष्टिर्जयंतोविजयःसौराष्ट्रोराष्ट्रवर्द्धनः १४
अकोपोधर्मपालश्चसुमंत्रोमंत्रिणः स्मृताः
राजानश्चनरव्याघ्रानानाजनपदेश्वराः १५
पौराश्चनैगमावृद्धाराजानंपर्युपासत
ऋक्षैश्चवानरेंद्रैश्चमंत्रिभिःपृथिवीश्वरैः १६
राक्षसैर्द्विजमुख्यैश्चकिंकरैश्चसमावृतः
परेव्योम्नियथालीनोदैवतैः कमलापतिः १७
तथानृपवरःश्रीमान्साकेतेशुशुभेतदा
इंदीवरदलश्यामंपद्मपत्रनिभेक्षणम् १८
आजानुबाहुंकाकुत्स्थंपीतवस्त्रधरंहरिम्
कंबुग्रीवंमहोरस्कंविचित्राभरणैर्युतम् १९
देव्यासहसमासीनमभिषिक्तंरघूत्तमम्
विमानस्थाःसुरगणाहर्षनिर्भरमानसाः २०
तुष्टुवुर्जयशब्देनगंधर्वाप्सरसांगणाः
अभिषिक्तस्ततोरामोवसिष्ठाद्यैर्महर्षिभिः २१
शुशुभेसीतयादेव्यानारायणइवश्रिया
अतिमर्त्यतयाभीतउपासितुंपदांबुजम् २२
दृष्ट्वातुष्टावहृष्टात्माशंकरोहृष्टमागतः
कृतांजलिपुटोभूत्वासानंदोगद्गदाकुलः
हर्षयन्सकलान्देवान्मुनीनपिचवानरान् २३

महादेवउवाच-
नमोमूलप्रकृतयेनित्यायपरमात्मने
सच्चिदानंदरूपायविश्वरूपायवेधसे २४
नमोनिरंतरानंदकन्दमूलायविष्णवे
जगत्त्रयकृतानंदमूर्त्तयेदिव्यमूर्त्तये २५
नमो ब्रह्मेंद्रपूज्यायशंकराभयदायच
नमोविष्णुस्वरूपायसर्वरूपनमोनमः २६
उत्पत्तिस्थितिसंहारकारिणेत्रिगुणात्मने
नमोस्तुनिर्गतोपाधिस्वरूपायमहात्मने २७
अनयाविद्यायादेव्यासीतयोपाधिकारिणे
नमःपुंप्रकृतिभ्यांचयुवाभ्यांजगतांकृते २८
जगन्मातापितृभ्यांचजनन्यैराघवायच
नमःप्रपंचरूपिण्यैनिष्प्रपंचस्वरूपिणे २९
नमोध्यानस्वरूपिण्यैयोगिध्येयात्ममूर्त्तये
परिणामापरीणामरिक्ताभ्यांचनमोनमः ३०
कूटस्थबीजरूपिण्यैसीतायैराघवायच
सीतालक्ष्मीर्भवान्विष्णुःसीतागौरीभवान्शिवः ३१
सीतास्वयंहिसावित्रिभवान्ब्रह्माचतुर्मुखः
सीताशचीभवान्शक्रःसीतास्वाहानलोभवान् ३२
सीतासंहारिणीदेवीयमरूपधरोभवान्
सीताहिसर्वसम्पत्तिःकुबेरस्त्वंरघूत्तम ३३
सीतादेवीचरुद्राणीभवान्रुद्रोमहाबलः
सीतातुरोहिणीदेवीचंद्रस्त्वंलोकसौख्यदः ३४
सीतासंज्ञाभवान्सूर्यःसीतारात्रिर्दिवाभवान्
सीतादेवीमहाकालीमहाकालोभवान्सदा ३५
स्त्रीलिङ्गेषुत्रिलोकेषुयत्तत्सर्वंहिजानकी
पुन्नामलांछितंयत्तुतत्सर्वंहिभवान्प्रभो ३६
सर्वत्रसर्वदेवेशसीतासर्वत्रधारिणी
तदात्वमपिचत्रातुंतच्छक्तिर्विश्वधारिणी ३७
तस्मात्कोटिगुणंपुण्यंयुवाभ्यांपरिचिह्नितम्

चिह्नितंशिवशक्तिभ्यांचरितं तवशांतिदम् ३८
आवांरामजगत्पूज्यौममपूज्यौसदायुवाम्
त्वन्नामजापिनीगौरीत्वन्मंत्रजपवानहम् ३९
मुमूर्षोर्मणिकरार्यांतुअर्द्धोदकनिवासिनः
अहंदिशामितेमंत्रंतारकंब्रह्मदायकम् ४०
अतस्त्वंजानकीनाथपरब्रह्मासिनिश्चितम्
त्वन्मायामोहितास्सर्वेनत्वांजानंतितत्वतः ४१
ईश्वरउवाच–
इत्युक्तःशंभुनारामः प्रसादप्रवणोऽभवत्
दिव्यरूपधरः श्रीमानद्भुताद्भुतदर्शनः ४२
तथातंरूपमालोक्यनरवानरदेवताः
नद्रष्टमपिशक्तास्तेतेजसंमहदद्भुतम् ४३
भयाद्वैत्रिदशश्रेष्ठाः प्रणेमुश्चातिभक्तितः
भीताविज्ञायरामोऽपिनरवानरदेवताः
मायामानुषतांप्राप्य सदेवानब्रवीत्पुनः ४४
रामचंद्रउवाच–
शृणुध्वंदेवतायोमांप्रत्यहंसंस्तुविष्यति
स्तवेनशंभुनोक्तेनदेवतुल्योभवेन्नरः ४५
विमुक्तःसर्वपापेभ्योमत्स्वरूपंसमश्नुते
रणेजयमवाप्नोतिनक्वचित्प्रतिहन्यते ४६
भूतवेतालकृत्याभिर्ग्रहैश्चापिनबाध्यते
अपुत्रोलभतेपुत्रंपतिं विंदतिकन्यका ४७
दरिद्रःश्रियमाप्नोतिसत्ववान्शीलवान्भवेत्
आत्मतुल्यबलः श्रीमाञ्जायतेनात्रसंशयः ४८
निर्विघ्नंसर्वकार्येषुसर्वारंभेषुवैनृणाम्
यंयंकामयतेमर्त्यःसुदुर्लभमनोरथम् ४९
षरामासात्सिद्धिमाप्नोतिस्तवस्यास्यप्रसादतः
यत्पुरायंसर्वतीर्थेषुसर्वयज्ञेषुयत्फलम्
तत्फलंकोटिगुणितंस्तवेनानेनलभ्यते ५०
ईश्वरउवाच–

इत्युक्त्वारामचंद्रोऽसौविससर्जमहेश्वरम्
ब्रह्मादित्रिदशान्सर्वान्विससर्जसमागतान् ५१
अर्चितामानवाःसर्वेनरवानरदेवताः
विसृष्टारामचंद्रेणप्रीत्यापरमयायुताः ५२
इत्थंविसृष्टाःखलुतेचसर्वेसुखंतदाजग्मुरतीवहृष्टाः
परंपठंतः स्तवमीश्वरोक्तंरामंस्मरंतोवरविश्वरूपम् ५३
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वर संवादेविश्वदर्शनंनामत्रिचत्वारिंशदधिकद्विशततमोऽध्यायः २४३

चतुश्चत्वारिंशदधिक द्विशततमोऽध्यायः

शंकरउवाच-
अथरामस्तुवैदेह्याराज्यभोगान्मनोरमान्
बुभुजेवर्षसाहस्रंपालयन्सर्वतोदिशः १
अंतःपुरजनास्सर्वेराक्षसस्यगृहेस्थिताम्
गर्हयंतिस्मवैदेहींतथाजानपदाजनाः २
लोकापवादभीत्याचरामः शत्रुनिवारकः
दर्शयन्मानुषंधर्ममंतर्वत्नींनृपात्मजाम् ३
वाल्मीकेराश्रमेपुण्येगंगातीरेमहावने
विससर्जमहातेजागर्भिणींमुनिसंसदि ४
साभर्तुःपरतंत्राहिउवासमुनिवेश्मनि
अर्चितामुनिपत्नीभिर्वाल्मीकमुनिरक्षिता ५
तत्रैवासूतयमलौनाम्नाकुशलवौसुतौ
तौचतत्रैवमुनिनासंस्कृतौचववर्धतुः ६
रामोऽपिभ्रातृभिस्सार्द्धंपालयामासमेदिनीम्
यमादिगुणसम्पन्नस्सर्वभोगविवर्जितः ७
अर्चयन्सततंविष्णुमनादिनिधनंहरिम्
ब्रह्मचर्यपरोनित्यंशशासपृथिवींनृपः ८
शत्रुघ्नोलवणंहत्वामथुरांदेवनिर्मिताम्
पालयामासधर्मात्मापुत्राभ्यांसहराघवः ९
गंधर्वान्भरतोहत्वासिंधोरुभयपार्श्वतः

स्वात्मजौस्थापयामासतस्मिन्देशेमहाबलौ १०
पश्चिमेमद्रदेशेतुमद्रान्हत्वाचलक्ष्मणः
स्वसुतौचमहावीर्यौअभिषिच्यमहाबलः ११
गत्वापुनरयोध्यांतुरामपादावुपस्पृशत्
ब्राह्मणस्यमृतंबालंकालधर्ममुपागतम् १२
जीवयामासकाकुत्स्थः शूद्रंहत्वाचतापसम्
ततस्तुगौतमीतीरेनैमिषेजनसंसदि १३
इयाजवाजिमेधंचराघवः परवीरहा
कांचनींजानकींकृत्वातयासार्द्धंमहाबलः १४
चकारयज्ञान्बहुशोराघवः परमार्थवित्
अयुतान्यश्वमेधानिवाजपेयानिचप्रभुः १५
अग्निष्टोमंविश्वजितंगोमेधंचशतक्रतुम्
चकारविविधान्यज्ञान्परिपूर्णसदक्षिणान् १६
एतस्मिन्नंतरेतत्रवाल्मीकिः सुमहातपाः
सीतामानीयकाकुत्स्थमिदंवचनमब्रवीत् १७
वाल्मीकिरुवाच-
अपापांमथिलक्षंरामत्यक्तुंनार्हसिसुव्रत
इयंतुविरजासाध्वीभास्करस्यप्रभायथा
अनन्यातवकाकुत्स्थकस्मात्त्यक्तात्वयानघ १८
रामउवाच-
अपापांमैथिलक्षंब्रह्मन्जानामिवचनात्तव
रावणेनहृतासाध्वीदराडकेविजनेपुरा १९
तंहत्वासमरेसीतांशुद्धामग्निमुखागताम्
पुनर्यातोस्म्ययोध्यायांसीतामादायधर्मतः २०
लोकापवादः सुमहानभूत्पौरजनेषुच
त्यक्तामयाशुभाचारातद्भयात्तवसन्निधौ २१
तस्माल्लोकस्यसंतुष्ट्यैसीताममपरायणा
पार्थिवानांमहर्षीणांप्रत्ययंकर्तुमर्हति २२
महेश्वरउवाच-
एवमुक्तातदासीतामुनिपार्थिवसंसदि

चकारप्रत्ययंदेवीलोकाश्चर्यकरंसती २३
दर्शयंस्तस्यलोकस्यरामस्यानन्यतांसती
अब्रवीत्प्रांजलिसीतासर्वेषांजनसंसदि २४
सीतोवाच-
यथाऽहराघवादन्यंमनसापिनचिंतये
तथामेधरणीदेवीविवरन्दातुमर्हति २५
यथैवसत्यमुक्तंमेवेद्मिरामात्परंनच
तथास्वपुत्र्यांवैदेह्यांधरणीसहसाइयात् २६
महेश्वरउवाच-
ततोरत्नमयंपीठंपृष्ठेधृत्वाखगेश्वरः
रसातलात्तदावीरोविज्ञायजननींतदा २७
ततस्तुधरणीदेवीहस्ताभ्यांगृह्यमैथिलीम्
स्वागतेनाभिनंद्यैनामासनेसंन्यवेशयत् २८
सीतांसमागतांदृष्ट्वादिविदेवगणाभृशम्
पुष्पवृष्टिमविच्छिन्नांदिव्यांसीतामवाकिरन् २९
सापिदिव्याप्सरोभिस्तुपूज्यमानासनातनी
वैनतेयंसमारुह्यतस्मान्मार्गाद्दिवंययौ ३०
दासीगणैः पूर्वभागेसंवृताजगदीश्वरी
संप्राप्यपरमंधामयोगिगम्यंसनातनम् ३१
रसातलप्रविष्टांतुतांदृष्ट्वासर्वमानुषाः
साधुसाध्वितिसीतेयमुच्चैःसर्वेप्रचुक्रुशुः ३२
रामःशोकसमाविष्टःसंगृह्यतनयावुभौ
मुनिभिःपार्थिवेंद्रैश्चसाकेतंप्रविवेशह ३३
अथकालेनमहतामातरः संशितव्रताः
कालधर्मंसमापन्नाभर्तुःस्वर्गंप्रपेदिरे ३४
दशवर्षसहस्राणिदशवर्षशतानिच
चकारराज्यंधर्मेणराघवःसंशितव्रतः ३५
कस्यचित्त्वथकालस्यराघवस्यनिवेशनम्
कालस्तापसरूपेणसंप्राप्तोवाक्यमब्रवीत् ३६
कालउवाच-

रामराममहाबाहोधात्रासंप्रेषितोऽस्म्यहम्
यद्ब्रवीमिरघुश्रेष्ठतच्छृणुष्वमहामते ३७
द्वन्द्वमेवहिकार्यंस्यादावयोः परिभाषितम्
तदंतरेप्रविष्टोयस्सवद्ध्योहिभविष्यति ३८
महेश्वरउवाच-
तथेतिचप्रतिश्रुत्यरामोराजीवलोचनः
द्वास्थंकृत्वातुसौमित्रिंकालोवाक्यमभाषत
वैवस्वतोऽब्रवीद्वाक्यंरामंदशरथात्मजम् ३९
कालउवाच-
शृणुरामयथावृत्तंसमागमनकारणात्
दशवर्षसहस्राणिदशवर्षशतानिच ४०
वसामिमानुषेलोकेहत्वाराक्षसपुंगवौ
एवमुक्तःसुरगणैरवतीर्णोसिभूतले ४१
तदयंसमयः प्राप्तःस्वर्लोकंगमितुंत्वया
सनाथाहिसुरास्सर्वेभवंत्वद्यत्वयानघ ४२
महेश्वरउवाच-
एवमस्त्वितिकाकुत्स्थोरामः प्राहमहामुनिम्
एतस्मिन्नंतरेतत्रदुर्वासास्तुमहातपाः ४३
राजद्वारमुपागम्यलक्ष्मणंवाक्यमब्रवीत्
दुर्वासाउवाच-
मांनिवेदयकाकुत्स्थंशीघ्रंगत्वानृपात्मज ४४
महेश्वरउवाच-
तमब्रवील्लक्ष्मणस्तुअसांनिध्यमितिद्विज
ततःक्रोधसमाविष्टःप्राहतंमुनिसत्तमः ४५
दुर्वासाउवाच-
शापंदास्यामिकाकुत्स्थंराममंनयदिदर्शये
महेश्वरउवाच-
तस्माच्छापभयाद्विप्रंराघवायन्यवेदयत्
तत्रैवांतर्दधेकालः सर्वभूतभयावहः ४६
पूजयामासतंप्राप्तमृषिंदुर्वाससंनृपः

अग्रजस्यप्रतिज्ञातंविज्ञायरघुसत्तमः ४७
तत्याजमानुषंरूपंलक्ष्मणःसरयूजले
विसृज्यमानुषंरूपंप्रविवेशस्वकांतनुम् ४८
फणासहस्रसंयुक्तः कोटींदुसमवर्चसः
दिव्यमाल्यांबरधरोदिव्यगंधानुलेपनः ४९
नागकन्यासहस्रैस्तुसंवृतःसमलंकृतः
विमानंदिव्यमारुह्यप्रययौवैष्णवंपदम् ५०
लक्ष्मणस्यगतिंसर्वांविदित्वारघुसत्तमः
स्वयमप्यथकाकुत्स्थःस्वर्गंगंतुमभीप्सितः ५१
अभिषिच्याथकाकुत्स्थःस्वात्मजौचकुशीलवौ
विभज्यरथनागाश्वंसधनंप्रददौतयोः ५२
कुशवत्यांकुशंतंचशरवत्यांलवंतथा
स्थापयामासधर्मेणराज्येस्वेरघुसत्तमः ५३
अभिप्रायंतुविज्ञायरामस्यविदितात्मनः
आजग्मुर्वानराः सर्वेराक्षसाः सुमहाबलाः ५४
विभीषणोऽथसुग्रीवोजाम्बवान्मारुतात्मजः
नीलोनलःसुषेणश्चनिषादाधिपतिर्गुहः ५५
अभिषिच्यसुतौवीरौशत्रुघ्नश्चमहामनाः
सर्वएतेसमाजग्मुरयोध्यांरामपालिताम् ५६
तेप्रणम्यमहात्मानमूचुःप्रांजलयस्तथा
वानरप्रभृतयऊचुः -
स्वर्लोकंगंतुमुद्युक्तंज्ञात्वात्वांरघुसत्तम ५७
आगताःस्मवयंसर्वेतवानुगमनंप्रति
नशक्ताःस्मक्षणंरामजीवितुंत्वांविनाप्रभो
तस्मात्त्वयाविशालाक्षगच्छामस्त्रिदशालयम् ५८
महेश्वरउवाच-
तैरेवमुक्तःकाकुत्स्थोबाढमित्यब्रवीत्ततः
अथोवाचमहातेजाराक्षसेंद्रंविभीषणम् ५९
रामउवाच-
राज्यंप्रशासधर्मेणमाप्रतिज्ञांवृथाकृथाः

यावच्चंद्रश्चसूर्यश्चयावत्तिष्ठतिमेदिनी
तावद्रमस्वसुप्रीतोकालेममपदंव्रज ६०
महेश्वरउवाच-
इत्युक्त्वाथसकाकुत्स्थःस्वाङ्गंविष्णुंसनातनम्
श्रीरंगशायिनंसौम्यमिक्ष्वाकुकुलदैवतम् ६१
संप्रीत्याप्रददौतस्मैरामोराजीवलोचनः
हनुमंतमथोवाचराघवः शत्रुसूदनः ६२
रामउवाच-
मत्कथाःप्रचरिष्यंतियावल्लोकेहरीश्वर
तावत्त्वमासमेदिन्यांकालेमांव्रजसुव्रत ६३
महेश्वरउवाच-
तमेवमुक्त्वाकाकुत्स्थोजांबवंतमथाब्रवीत्
रामउवाच-
द्वापरेसमनुप्राप्तेयदूनामन्वयेपुनः ६४
भूभारस्यविनाशायसमुत्पत्स्याम्यहंभुवि
करिष्येतत्रसंग्रामंस्वयंभल्लूकसत्तम ६५
महेश्वरउवाच-
तमेवमुक्त्वाकाकुत्स्थःसर्वांस्तानृक्षवानरान्
उवाचवाचागच्छध्वमितिरामोमहाबलः ६६
मंत्रिणोनैगमाश्चैवभरतः कैकयीसुतः
राघवस्यानुगमनेनिश्चितास्तेसमाययुः ६७
ततःशुक्लांबरधरोब्रह्मचारीययौपरम्
कुशान्गृहीत्वापाणिभ्यांसंसक्तः प्रययौपरम् ६८
रामस्यदक्षिणेपार्श्वेपद्महस्तारमागता
तथैवधरणीदेवीदक्षिणेतरगातथा ६९
वेदाःसांगाःपुराणानिसेतिहासानिसर्वतः
ॐकारोऽथवषट्कारःसावित्रीलोकपावनी ७०
अस्त्रशस्त्राणिचतदाधनुराद्यानिपार्वति
अनुजग्मुस्तथारामंसर्वेपुरुषविग्रहाः ७१
भरतश्चैवशत्रुघ्नःसर्वेपुरनिवासिनः

सपुत्रदाराः काकुत्स्थमनुजग्मुःसहानुगाः ७२
मंत्रिणोभृत्यवर्गाश्चकिंकरानैगमास्तथा
वानराश्चैवऋक्षाश्चसुग्रीवसहितास्तदा ७३
सपुत्रदाराःकाकुत्स्थमन्वगच्छन्महामतिम्
पशवःपक्षिणश्चैवसर्वेस्थावरजंगमाः ७४
अनुजग्मुर्महात्मानंसमीपस्थानरोत्तमाः
येचपश्यंतिकाकुत्स्थंस्वपथांतर्गतंप्रभुम् ७५
तेतथानुगतारामंनिवर्त्तंतेनकेचन
अथत्रियोजनंगत्वानदींपश्चान्मुखींस्थिताम् ७६
सरयूंपुण्यसलिलांप्रविवेशसहानुगः
ततःपितामहोब्रह्मासर्वदेवगणावृतः ७७
तुष्टावरघुशार्दूलमृषिभिःसार्द्धमक्षरैः
अब्रवीत्तत्रकाकुत्स्थंप्रविष्टंसरयूजले ७८
ब्रह्मोवाच-
आगच्छविष्णोभद्रंतेदिष्ट्याप्राप्तोऽसिमानद
भ्रातृभिस्सहदेवाभैःप्रविशस्वनिजांतनुम् ७९
वैष्णवींतांमहातेजांदेवाकारांसनातनीम्
त्वंहिलोकगतिर्देवनत्वांकेचित्तुजानते ८०
त्वामचिंत्यंमहात्मानमक्षरंसर्वसंग्रहम्
यमिच्छसिमहातेजस्तांतनुंप्रविशस्वभोः ८१
महेश्वरउवाच-
तस्मिन्सूर्यकराकीर्णेपुष्पवृष्टिनिपातिते
उत्सृज्यमानुषंरूपंस्वांतनुंप्रविवेशह ८२
अंशाभ्यांशंखचक्राभ्यांशत्रुघ्नभरतावुभौ
तदातेनमहात्मानौदिव्यतेजस्समन्वितौ ८३
शंखचक्रगदाशार्ङ्गपद्महस्तश्चतुर्भुजः
दिव्याभरणसम्पन्नोदिव्यगंधानुलेपनः ८४
दिव्यपीतांबरधरःपद्मपत्रनिभेक्षणः
युवाकुमारःसौम्यांगःकोमलावयवोज्ज्वलः ८५
सुस्निग्धनीलकुटिलकुंतलःशुभलक्षणः

नवदूर्वांकुरः श्यामः पूर्णचंद्रनिभाननः ८६
देवीभ्यांसहितःश्रीमान्विमानमधिरुह्यच
तस्मिन्सिंहासनेदिव्येमूलेकल्पतरोःप्रभुः ८७
निषसादमहातेजाः सर्वदेवैरभिष्टुतः
राघवानुगतायेचऋृक्षवानरमानुषाः ८८
स्पृष्ट्वैवसरयूतोयंसुखेनत्यक्तजीविताः
रामप्रसादात्तेसर्वेदिव्यरूपधराःशुभाः ८९
दिव्यमाल्यांबरधरादिव्यमंगलवर्चसः
आरुरोहविमानंतदसंख्यास्तत्रदेहिनः ९०
सर्वैःपरिवृतः श्रीमान्रामोराजीवलोचनः
पूजितःसुरसिद्धौघैर्मुनिभिस्तुमहात्मभिः ९१
आययौशाश्वतंदिव्यमक्षरंस्वपदंविभुः
यःपठेद्रामचरितंश्लोकंश्लोकार्धमेववा ९२
शृणुयाद्वातथाभक्त्यास्मरेद्वाशुभदर्शने
कोटिजन्मार्जितात्पापाज्ज्ञानतोऽज्ञानतःकृतात् ९३
विमुक्तोवैष्णवंलोकंपुत्रदारसबांधवैः
समाप्नुयाद्योगगम्यमनायासेनवैनरः ९४
एतत्तेकथितंदेविरामस्यचरितंमहत्
धन्योऽस्म्यहंत्वयादेविरामचंद्रस्यकीर्त्तनात्
किमन्यच्छ्रोतुकामासितद्ब्रवीमिवरानने ९५
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडेउमामहेश्वर संवादेश्रीरामचरितकथनंनामचतुश्चत्वारिंशदधिकद्विशततमोऽध्यायः२४४

पञ्चचत्वारिंशदधिक द्विशततमोऽध्यायः

श्रीपार्वत्युवाच-
रघुनाथस्यचरितंसाधूक्तंहित्वयाविभो
श्रुत्वाधन्यास्मिदेवेशत्वत्प्रसादान्महेश्वर १
वसुदेवसुतस्यास्यकृष्णस्यचरितंमहत्
श्रोतुमिच्छामिदेवेशचरितंकल्मषापहम् २
रुद्रउवाच-

शृणुदेविप्रवद्त्यामिकृष्णस्यास्यमहात्मनः
चरितंवासुदेवस्यसर्वेषांफलदंनृणाम् ३
यदूनामन्वयेदेविवसुदेवइतीरितः
देवमीढस्यपुत्रोऽभूत्सर्वधर्मविदांबरः ४
देवकस्यैवदुहितांदेवकींदेववर्णिनीम्
उपयेमेविधानेनमथुरायांनृपात्मजः ५
उग्रसेनस्यपुत्रोऽभूत्कंसःशूरोमहाबलः
तयोरथवरंतत्रचोदयामाससारथिः ६
समागतेषुतेष्वेवंपथिरम्येशुभावहे
अंतरिद्तेऽशरीरावाक्प्राहगंभीरयागिरा ७
आकाशवागुवाच–
अस्यास्तवाष्टमोगर्भःकंसप्राणान्हरिष्यति ८
रुद्रउवाच–
तच्छ्रुत्वाहंतुमारेभेकंसोऽपिभगिनींतदा
तमब्रवीत्सुसंरब्धंवसुदेवः स्वबुद्धिना ९
वसुदेवउवाच–
नहंतव्यामहाभागभगिनीधर्मतस्त्वया
गर्भानेवसमुत्पन्नाञ्जहिराजन्महाबल १०
रुद्रउवाच–
तथेत्याहतदाकंसोवसुदेवंचदेवकीम्
निबध्यस्वगृहेरम्येसर्वभोगेन्यवेशयत् ११
एतस्मिन्नंतरेदेविपापिभारप्रपीडिता
जगामधरणीदेवीसहसाब्रह्मणोंतिकम् १२
समेत्यजगतामीशंब्रह्माणंपरमेष्ठिनम्
प्राहगंभीरयावाचाधरणीलोकधारिणी १३
धरण्युवाच–
प्रजापतेनशक्तास्मिधर्तुंलोकानिमान्प्रभो
राद्तसाःपापकर्माणःसंस्थितामयिसुव्रत १४
जगतः सकलान्धर्मान्विध्वंशसंतोमहाबलाः
अधर्मवर्च्चसःसर्वेनराःपापविमोहिताः १५

स्वल्पमल्पतरंधर्मंलोकेऽस्मिन्नचदृश्यते
धर्मेणैवधृतादेवसत्यशौचदमेनच
तस्मादधर्मसंभूतंनलोकंधर्तुमुत्सहे १६
रुद्रउवाच–
इत्युक्त्वाधरणीदेवीतत्रैवांतरधीयत
ततःसुरगणाःसर्वेब्रह्मरुद्रपुरोगमाः १७
क्षीराब्धेरुत्तरंकूलमधिगम्यजगत्पतिम्
तुष्टुवुःस्तुतिभिर्दिव्यैर्मुनयश्चमहातपाः
ततः प्रसन्नःप्राहेशः सर्वांस्तान्मुनिसत्तमान् १८
श्रीभगवानुवाच–
भोभोदेवगणास्सर्वेकिन्निमित्तमिहागताः
रुद्रउवाच–
ततःपितामहःप्राहदेवदेवंजनार्दनम् १९
ब्रह्मोवाच–
देवदेवजगन्नाथपृथिवीभारपीडिता
राक्षसाबहवोलोकेसमुत्पन्नादुरासदाः २०
जरासंधश्चकंसश्चप्रलम्बोधेनुकादयः
दुरात्मानः प्रबाधंतेसर्वलोकान्सनातनान् २१
भारावतरणं कर्तुंपृथिव्यास्त्वमिहार्हसि
रुद्रउवाच–
एवमुक्तोहृषीकेशोब्रह्मणापरमेष्ठिना
प्राहगंभीरयावाचाजगतीपतिरव्ययः २२
श्रीभगवानुवाच–
अवतीर्याथलोकेस्मिन्यदूनामन्वयेसुराः
अवनीभारमव्यग्रमपास्यामिमहाबलाः २३
रुद्रउवाच–
एवमुक्ताःसुरास्सर्वेनमस्कृत्वाजनार्दनम्
स्वान्स्वान्लोकान्समासाद्यपरेशंतेन्वचिंतयन्
ततोनारायणींमायांपरमेशःसमब्रवीत् २४
श्रीभगवानुवाच–

हिरण्याक्षस्यषट्पुत्रान्समानीयावनीतले
वसुदेवस्यपत्न्यांतुदेवक्यांसन्निवेशय २५
अनंतांशः सप्तमोऽत्रसंप्रविष्टस्तुमाचिरम्
तस्याःसपत्न्यांरोहिण्यांददस्वशुभदर्शने २६
ततोऽष्टमेममांशस्तुदेवक्यांसंभविष्यति
नंदगोपस्यपत्न्यांतुयशोदायांसनातनी २७
तवांशभूतामहानिद्राविंध्यंगत्वामहाचलम्
तत्रसंपूज्यमानाहिदेवैरिंद्रपुरोगमैः
हन्यादैत्यान्महावीर्याञ्शुंभासुरपुरोगमान् २८
रुद्रउवाच-
तथेत्युक्त्वामहामायाहिरण्याक्षसुतांस्तदा
पर्यायेणचदेवक्यांषड्ग र्भान्संन्यवेशयत् २९
ताञ्जघानतदाकंसोजातमात्रान्महाबलः
ततस्तुसप्तमोगर्भोह्यनंतांशेनचोदितः ३०
वर्धमानंतुगर्भंतंरोहिण्यांसमुपानयत्
गर्भसंकर्षणात्तस्यांजातः संकर्षणोऽव्ययः ३१
कृष्णाष्टम्यांतुरोहिण्यांप्रौष्ठपद्यांशुभोदये
रोहिणीजनयामासपुत्रंसंकर्षणंप्रभुम् ३२
ततस्तुदेवकीगर्भमापेदेभगवान्हरिः
आपन्नगर्भांतांदृष्ट्वाकंसोभयनिपीडितः ३३
ततः सुरगणाःसर्वेहर्षनिर्भरमानसाः
तुष्टवुर्देवकींतत्रविमानस्थानभस्तले ३४
ततस्तुदशमेमासिकृष्णेनभसिपार्वति
अष्टम्यामर्द्धरात्रेचतस्यांजातोजनार्दनः ३५
इंदीवरदलश्यामः पद्मपत्रायतेक्षणः
चतुर्भुजः सुंदरांगोदिव्याभरणभूषितः ३६
श्रीवत्सकौस्तुभोरस्कोवनमालाविभूषितः
वसुदेवस्यजातोऽसौवासुदेवः सनातनः ३७
तंदृष्ट्वाजगतांनाथंकृष्णमानकदुंदुभिः
उवाचप्रांजलिर्भुत्वानमस्कृत्यजगन्मयम् ३८

वसुदेवउवाच-
जातोऽसिमेजगन्नाथभक्त कल्पतरोप्रभो
त्वमेवसर्वदेवानामनादिः पुरुषोत्तमः ३९
त्वमचिन्त्यमहद्भूतोयोगिध्येयःसनातनः
ममपुत्रत्वमापन्नोधररयांधरणीधर ४०
दृष्ट्वैतदद्भुतंरूपमैश्वरंपुरुषोत्तम
दानवाःपापकर्माणोनसहंतेमहौजसः ४१
रुद्रउवाच-
इत्यर्थितः स्तुतस्तेनपद्मनाभःसनातनः
उपसंहृतवान्रुपंचतुर्भुजसमन्वितम् ४२
मानुषेणैवभावेनद्विभुजेनव्यरोचत
येचांगरक्षकाःसर्वेदानवास्तत्रसंस्थिताः ४३
तेचापिमाययातस्यामोहितास्तमसावृताः
एतस्मिन्नंतरेदेवमादायानकदुंदुभिः ४४
प्रययौनगरात्तूर्णंसर्वदेवैरभिष्टुतः
पयोधरेवर्षमाणेनागराजोमहाबलः ४५
फणासहस्त्रेणाच्छाद्यभक्त्यादेवंसमन्वगात्
तौगोपुरकपाटौतुतत्पादस्पर्शनात्तदा ४६
भिद्यमानौसुविवृतौतत्रस्थाश्चविमोहिताः
स्त्रोतस्विनीसुपूर्णायायमुनापिमहात्मनः ४७
प्रवेशाज्ञानुमात्रंतुजलंसाचाप्युपावहत्
उत्तीर्ययमुनांसोथाव्रजत्तत्तीरसंस्थितम् ४८
संस्तूयमानस्त्रिदशैःप्रविवेशयदूत्तमः
तत्रनंदस्यपत्नीसाप्रसूतागोव्रजेशुभे ४९
विमोहितामाययैवसुषुप्तातमसावृता
तस्यास्तुशयनेदेवंविनिक्षिप्यसयादवः ५०
तांकन्यांसमुपादायप्रययौमथुरांपुनः
पत्न्यैदत्वाऽथतांबालामुवाससुसमाहितः ५१
रुरोदबालभावात्सादेवकीशयनंगता
अथबालाध्वनिंश्रुत्वातद्गृहंसाङ्गरक्षकाः ५२

कंसायावेदयामासुर्देवकीप्रसवंशुभम्
कंसस्तूर्णमुपेत्यैनांजग्राहबालिकांतदा ५३
चिक्षेपचशिलापृष्ठेसापितूर्णंवियत्स्थिता
तस्योत्तमांगेस्वपदंदत्वापूर्णमुखास्थिता ५४
उवाचाष्टभुजादेवीतदाराक्षसपुंगवम्
देव्युवाच-
किंमयाक्षिप्तयामंदजातोयस्त्वांवधिष्यति ५५
सर्वस्यजगतः स्रष्टाधर्ताहर्ताचयः प्रभुः
अस्मिन्लोकेसमुत्पन्नः सतेप्राणान्हरष्यिति ५६
रुद्रउवाच-
इत्युक्त्वातेजसादेवीसहसापूरयन्नभः
जगामदेवगंधर्वैःस्तूयमानाहिमाचलम् ५७
कंसस्तदोद्विग्नमनाःसमाहूयस्वदानवान्
प्रलंवचाणूरमुखानुवाचभयपीडितः ५८
कंसउवाच-
अस्माद्भयात्सुरगणाउपेत्यक्षीरसागरम्
आचचक्षुर्हरेः सर्वंरक्षोविध्वंसनंप्रति ५९
तेषांतुवचनंश्रुत्वाधरण्यांधरणीधरः
मानुषेणैवभावेनसमुत्पन्नोहिसोऽव्ययः ६०
तदद्यसर्वेयूयंवैराक्षसाः कामरूपिणः
समुद्रिक्तबलान्बालान्मारयध्वमशंकिताः ६१
रुद्रउवाच-
इत्यादिश्यततःकंसोवसुदेवंचदेवकीम्
आश्वास्यमोचयित्वाथस्ववेश्मांतर्विवेशह
वसुदेवस्ततोगत्वानंदव्रजमनुत्तमम् ६२
तेनसंपूजितस्तत्रनिक्षिप्यतनयंमुदा
उवाचनंदपत्नींतांयशोदांयदुनंदनः ६३
वसुदेवउवाच-
सुभगेमत्सुतमिमंरोहिणीजठरोद्भवम्
स्वपुत्रमिवरक्षस्वभियाकंसादिहागतम् ६४

रुद्रउवाच-
तथेत्याहतदातन्वीनंदपत्नीदृढव्रता
लब्ध्वैवयुगलंपुत्रमुत्पुपोषमुदान्विता ६५
निक्षिप्यतनयौगेहंनंदगोपस्ययादवः
विश्रब्धःप्रययौतूर्णंमथुरांकंसपालिताम् ६६
ततोगर्गःशुभदिनेवसुदेवेननोदितः
नंदगोपव्रजंगत्वातत्रस्थैःपूजितोद्विजः ६७
विधिनाजातकंकर्मकृत्वादेवस्यगोकुले
नामचात्राकरोद्दिव्यंपुत्रयोर्वासुदेवयोः ६८
संकर्षणोरौहिणेयोबलभद्रोमहाबलः
रामइत्यादिनामानिपूर्वजस्याकरोद्द्विजः ६९
श्रीधरः श्रीकरः श्रीमान्कृष्णोऽनतोजगत्पतिः
वासुदेवोहृषीकेशइत्याद्यवरजस्यच ७०
रामकृष्णावितिख्यातिमस्मिँल्लोकेगमिष्यतः
एवमुक्त्वाद्विजश्रेष्ठःसंपूज्यपितृदेवताः ७१
संपूज्यमानोगोपालैराययौमथुरांपुनः
कंसेनप्रेषितारात्रौपूतनाबालघातिनी ७२
विषलिप्तंस्तनंदत्वाकृष्णायामिततेजसे
कृष्णस्तुराक्षसींज्ञात्वापपौगाढंस्तनंभृशम् ७३
प्राणैःसहमहातेजाराक्षस्यायदुपुंगवः
साविह्वलांगीसहसाविच्छिन्नस्नायुबंधना ७४
पपातवेपमानासाममारचमहास्वना
तस्याःशब्देनमहतापूरितंचनभस्तलम् ७५
त्रस्ताःसर्वेततोगोपादृष्ट्वातांपतितांभुवि
कृष्णंचक्रीडमानंतंराक्षस्यामहतोरसि ७६
समुद्विग्नास्ततस्तूर्णमादायतनयंतदा
रक्षोभियातदातस्मिन्गोपुरीषेणमूर्द्धनि ७७
संमार्जयामासतदागोवालेनतदाननम्
नंदगोपःसमभ्येत्यसुतमादायभामिनि ७८
भगवन्नामभिस्तस्यसर्वांगेषुप्रमार्जनम्

कृत्वातांतामसींभीमांबहिर्विन्यस्यगोव्रजात् ७९
ददाहगोपवृंदैश्चत्रासितैस्तत्रगोव्रजे
कदाच्छिकटस्याधःशयानोभगवान्हरिः ८०
प्रसार्यचरणौतत्ररुरोदमधुसूदनः
तस्यपादप्रहारेणशकटंपरिवर्तितम् ८१
विध्वस्तकुंभभाडंतद्विपरीतंपपातवै
ततोगोप्यश्चगोपाश्चदृष्ट्वातच्छकटंमहत् ८२
विस्मयंपरमंजग्मुः किमेतदितिशंकिताः
यशोदाचतदातूर्णंबालंजग्राहविस्मिता ८३
अल्पेनैवहिकालेनबालकौतौयदूत्तमौ
वर्द्धमानौयशोदायाःस्तनपानेनपोषितौ ८४
जानुभ्यामथहस्ताभ्यांरिंगमाणौविरेजतुः
मायावीराक्षसस्तत्रकृतश्चबटुवेषधृक् ८५
कृष्णंहंतुंसमारब्धोविचचारमहीतले
ज्ञात्वाकृष्णस्तुतंरक्षोनिजघानतलेनवै ८६
राक्षसेनैवरूपेणनिपपातममारच
विचचारततःसर्वंगोव्रजंमधुसूदनः ८७
नवनीतंजहाराशुगोपीनांचगृहेगृहे
तदायशोदाकुपितादाम्नामध्येउलूखले ८८
निबध्यकृष्णंप्रययौविक्रेतुंगोरसादिकम्
कर्षमाणस्ततः कृष्णोदाम्नावद्धउलूखले ८९
यमलार्जुनयोर्मध्येजगामधरणीधरः
उलूखलेनगोविंदः पातयामासतौद्रुमौ ९०
भग्नस्कंधौनिपतितौस्वरेणधरणीतले
तेनशब्देनमहताजग्मुस्तत्रमहौजसः ९१
गोपवृद्धास्ततोदृष्ट्वाविस्मयंपरमंगताः
यशोदापिसमुद्विग्नाविमुच्यधरणीधरम् ९२
तंविस्मितंसमादायस्तनंप्रादान्महात्मने
यस्मिन्निवध्यमानस्तुदाम्नामात्राजगत्पतिः ९३
तस्मिन्महर्षिभिःसर्वैर्दामोदरइतीरितः

तौतुकिंनरतांप्राप्तौविमुक्तौयमलार्जुनौ ९४
गोपवृद्धास्ततःसर्वेनंदगोपपुरोगमाः
महोत्पातमिमंज्ञात्वास्थानांतरमुपाययुः ९५
वृंदावनेमनोरम्येयमुनायास्तटेशुभे
निवासंचक्रिरेरम्यंगवांगोपीजनस्य च ९६
तत्रतौरामकृष्णौतुवर्द्धमानौमहाबलौ
वत्सपालयुतौवत्सान्पालयामासतुस्तदा ९७
गोवत्समध्यगंकृष्णंबकोनाममहासुरः
बकरूपेणतंहंतुमुद्युक्तोऽत्रयदूत्तमम् ९८
तंदृष्ट्वावासुदेवोऽपिलोष्टमुद्यम्यलीलया
ताडयामासपद्मांतेपपातोर्व्यांमहासुरः ९९
ततः कतिपयाहस्तु गोवत्सान्पालयन्वने
छायायांजंबुवृक्षस्यप्रसुप्तौपल्लवेमृदौ १००
एतस्मिन्नंतरेदेवोब्रह्मादेवगणैर्वृतः
द्रष्टुंकृष्णंसमागम्यसुप्तौदृष्ट्वायदूत्तमौ १०१
वत्सान्गोपशिशून्हृत्वाजगामत्रिदिवंपुनः
प्रबुद्धौतौसमालोक्यविनष्टाञ्शिशुवत्सकान् १०२
गोवत्सागोपबालाश्चक्वगताइतिविस्मितौ
ज्ञात्वाकृष्णस्तुतत्कर्मप्रजापतिकृतंतदा १०३
तथैवससृजेबालान्गोवत्सांश्चसनातनः
यथातूर्णंयथारूपंतथैवमधुसूदनः १०४
ससर्जवत्सान्गोपालानविताजगतांप्रभुः
दृष्ट्वासायाह्नसमयेगावस्त्वेषांचमातरः १०५
स्वान्स्वान्वत्सानुपागम्ययथापूर्वंप्रवर्तिताः
एवंसंवत्सरेकालेगतेतत्रमहात्मनः १०६
प्रजापतिःपुनस्तस्मैददौवत्सान्सबालकान्
कृतांजलिपुटोभूत्वापरिणीयप्रणम्यच
भयादुवाचगोबिंदंब्रह्मात्रिभुवनेश्वरः १०७
ब्रह्मोवाच-
नमोनमस्तेसर्वात्मंस्तत्वज्ञानस्वरूपिणे

नित्यानंदस्वरूपायप्रियतात्मन्महात्मने १०८
अणुर्बृहत्स्थूलतररूपःसर्वगतोऽव्ययः
अनादिमध्यांतरूपस्वरूपात्मन्नमोस्तुते १०९
नित्यज्ञानबलैश्वर्यवीर्यतेजोमयस्यच
महाशक्तेनमस्तुभ्यं पूर्णषाड्गुरायमूर्तये ११०
त्वंवेदपुरुषोब्रह्मन्महापुरुषएवच
शरीरपुरुषत्वस्यछंदःपुरुषएवच १११
चत्वारःपुरुषास्त्वंचपुराणः पुरुषोत्तम
विभूतयस्तवब्रह्मन्पृथिव्यग्न्यनिलादयः ११२
तववाचासमुद्भूतौह्मावह्नीजगदीश्वर
अंतरिक्षंचवायुश्चसृष्टौप्राणेनतेविभो ११३
चक्षुषातवसंसृष्टौद्यौश्चादित्यस्तथाव्यय
दिशश्चचंद्रमाः सृष्टाः श्रोत्रेणतवचानघ ११४
अपांस्त्रावश्चवरुणोमनसातेमहेश्वर
उक्तेमहतिमीमांसे यत्तद्ब्रह्मप्रकाशते ११५
तथैवचाध्वरेष्वेतदेतदेवमहाव्रते
छंदोगेयेनभस्येतद्दिव्येतद्वायुरेवतत् ११६
आकशएतदेवेदमोषधीष्वेवमेवच
नक्षत्रेषुचसर्वेषुग्रहेष्वेतद्दिवाकरे ११७
एवंभूतेष्वेवमेवब्रह्मेत्याचक्षतेश्रुतिः
तदेवपरमंब्रह्मप्रज्ञातंपरितोमृतम् ११८
हिरण्मयोऽव्ययोयज्ञः शुचिः शुचिषदित्यपि
वैदिकान्यभिधेयानितथैतान्यस्यनक्वचित् ११९
चक्षुर्मयंश्रोत्रमयंछंदोमयमनोमयम्
वाङ्मयंपरमात्मानंपरेशंशंसतिश्रुतिः १२०
इतिसर्वोपनिषदामर्थस्त्वंकमलेक्षण
स्तोतुंनशक्तोऽयत्वांतुसर्ववेदांतपारगम् १२१
महापराधमेतत्तेवत्सापहरणंमया
कृतंतत्क्षम्यतांनाथशरणागतवत्सल १२२
महेश्वरउवाच-

एवंस्तुत्वाहरिंवेधाः प्रणम्यचपुनः पुनः
वत्सान्दत्वापुनस्तस्मैप्रययौस्वयमालयम् १२३
हृदिकृत्वासदादेविबालरूपंहरिंविधिः
उवासत्रिदशैःसार्द्धंहृष्टपुष्टोमहातपाः १२४
कृष्णेनसृष्टावत्सावैपूर्ववत्सास्तथार्भकाः
अवापुरैक्यतांतत्रपश्यतांत्रिदिवौकसाम् १२५
कृष्णस्तुवत्सपालैर्वैप्रययौनंदगोकुलम्
ततःकतिपयाहस्सुगोपालैर्यदुपुंगवः १२६
ह्रदंगत्वाऽथकालिंद्यास्तत्रस्थंसुमहाविषम्
सहस्रशीर्षबलिनंनागराजानमच्युतः १२७
निष्पिष्यफलसाहस्रंपादेनैकेनलीलया
प्राणसंशयमापन्नंचकारमधुसूदनः १२८
सकालियोलब्धसंज्ञस्तमेवशरणंययौ
ररक्षभगवान्कृष्णोनागंत्यक्तविषंतदा १२९
वैनतेयभयाद्भीतंस्वपदेनांक्यमूर्द्धसु
ह्रदाद्विवासयामासकालिंद्यायदुपुंगवः १३०
त्यक्त्वासतंह्रदंतूर्णंपुत्रदारसमन्वितः
नमस्कृत्वाथगोविंदंप्रययौकालियस्तदा १३१
विषदग्धास्तुयेपूर्वंतत्तीरस्थाश्चशाखिनः
कृष्णेनवीक्षितास्तूर्णंफलिनः पुष्पिणोऽभवन् १३२
अथकालेनकौमारमवाप्यमधुसूदनः
गोवृंदंपालयामाससर्वदेवमयः प्रभुः १३३
स्वसमानवयोभिस्तुगोपालैस्तुयदूत्तमः
वृंदावनेमनोरम्येसरामोविचचारह १३४
तत्रहत्वामहाघोरंसर्परूपंमहासुरम्
अपहत्यमहाकायंमेरुमंदारगौरवम् १३५
धेनुकस्यवनंप्राप्यतालहिंतालगह्वरम्
प्रविश्यतद्वनंरम्यंफलितंतालगह्वरम्
धेनुकंपर्वताकारंखररूपधरंसदा १३६
पादौगृह्यसमुत्क्षिप्यतालेनविजघानह

तत्त्वणादेवतत्पालास्तदंतेरेमिरेतदा १३७
निष्क्रम्यतद्वनात्तूर्णंभांडीरंवटमागताः
तत्रतेरामकृष्णाभ्यांचिक्रीडुर्बाललीलया १३८
गोपवेषेणतत्रागात्प्रलंबोनामराक्षसः
रामंस्वपृष्ठमारोप्यययौतूर्णंनभस्तलम् १३९
मत्वातंराक्षसंरामोमुष्टिनातस्यमूर्द्धनि
ताडयामासरोषेणविह्वलांगस्ततोऽपतत् १४०
राक्षसेनैवरूपेणविनदन्भैरवंस्वनम्
भिन्नशीर्षतनुस्तत्रममाररुधिरोक्षितः १४१
ततः प्रदोषसमयेगोब्रजेनंदनंदनः
उवासगोपकन्याभिःक्रीडन्कौमोदवर्चसे १४२
अरिष्टनामादैत्येशोगत्वातत्रवृषाकृतिः
कृष्णंहंतुंसमागत्यजगर्जचमहास्वनम् १४३
तंदृष्ट्वाविद्रुताःसर्वेगोपालाभयपीडिताः
कृष्णोऽपिदृष्ट्वातंरौद्रमागतंदनुजाधिपम् १४४
तालवृक्षंसमुत्पाटय्शृंगमध्येव्यपीडयत्
सतुभग्नशिरः शृगोवमन्वैरुधिरंबहु १४५
पपातभीमवेगेननिनदंस्त्यक्तजीवितः
इत्थंहत्वामहाकायमरिष्टंदनुजाधिपम् १४६
आहूयगोपबालांश्चतत्रैवोवासगोव्रजे
ततः कतिपयाहस्सुकेशीनाममहासुरः १४७
हयकायेनगोविंदंहंतुंव्रजमुपाययौ
सगत्वागोव्रजंरम्यमुच्चैर्हेषामथाकरोत् १४८
तेनशब्देनमहतापूरितंभुवनत्रयम्
भीताः सर्वेसुरगणाः शंकमानायुगक्षयम् १४९
तत्रस्थामोहिताः सर्वेगोपागोप्यश्चविह्वलाः
लब्धसंज्ञास्तुतेसर्वेविद्रुताश्चसमंततः १५०
गोप्यस्तुशरणंजग्मुःकृष्णंत्राहीतिचाब्रुवन्
नभेतव्यंनभेतव्यमित्याहभक्तवत्सलः १५१
समाश्वास्यततस्तूर्णंमुष्टिनावासवानुजः

ताडयामासशिरसितस्यदैत्यस्यलीलया १५२
विभिन्नदंतनेत्रोऽसौविननादमहास्वनम्
महाशिलांसमुत्क्षिप्यतस्यांगेवैन्यपातयत् १५३
सतुचूर्णितसर्वांगोनिनदन्भैरवंस्वनम्
पपातसहसाभूमौममारचमहासुरः १५४
केशिनंनिहतंदृष्ट्वादिविदेवगणाभृशम्
मुमुचुः पुष्पवर्षाणिसाधुसाध्वितिचाब्रुवन् १५५
इत्थंशिशुत्वेवैदैत्यान्हरिर्हत्वाबलोत्कटान्
समुमोदसुखेनैवबलरामसमन्वितः १५६
इंदीवरदलश्यामःपद्मपत्रनिभेक्षणः
पीतांबरधरःस्रग्वीवनमालाविभूषितः १५७
कौस्तुभोद्भासितोरस्कश्चित्रमाल्यानुलेपनः
विचित्राभरणैर्युक्तः कुंडलाभ्यांविराजितः १५८
आमुक्ततुलसीमालः कस्तूरीतिलकांचितः
सुस्निग्धनीलकुटिलकबरीकृतकेशवान् १५९
बद्धैर्नानाविधैःपुष्पैर्बर्हिबर्हावतंसकः
रक्तारविंदसदृशहस्तपादतलाधरः १६०
पक्षमध्यगशीतांशुकलंकभ्रूलताननः
हारनूपुरकेयूरैः कटकाभ्यांविराजितः १६१
वृंदावनेमहारम्येफलपुष्पविराजिते
रम्यंनिनादयन्वेणुंतत्रास्तेयदुनंदनः १६२
अवधीरित कंदर्पकोटिलावरायमच्युतम्
सर्वागोपस्त्रियोदृष्ट्वामन्मथास्त्रेणपीडिताः १६३
पुरामहर्षयः सर्वेदंडकाररायवासिनः
दृष्ट्वारामंहरिंतत्रभोक्तुमैच्छत्सुविग्रहम् १६४
तेसर्वेस्त्रीत्वमापन्नाः समुद्भूतास्तुगोकुले
हरिंसंप्राप्यकामेनततोमुक्ताभवार्णवात् १६५
क्रोधेनैवयथादैत्याःसमेत्यमधुसूदनम्
निधनंप्राप्यसंग्रामेहतामुक्तिमवाप्नुयुः १६६
कामक्रोधौनृणांलोकेनिरयस्यैवकारणम्

हरिंसमेत्यभावेनमुक्तागोप्यःसुरद्विषः १६७
कामाद्भयाद्वाद्वेषाद्वायेभजंतिजनार्दनम्
तेप्राप्नुवंतिवैकुंठंकिंपुनर्भक्तियोगतः १६८
तस्यवेणुध्वनिंश्रुत्वारजन्यांबल्लवांगनाः
शयनादुत्थिताः सर्वाविकीर्णांबरमूर्द्धजाः १६९
त्यक्त्वापतीन्सुतान्बधूंस्त्यक्त्वालज्ञांकुलंस्वकम्
जगत्पतिंसमाजग्मुःकंदर्पशरपीडिताः १७०
समेत्यगोप्यःसर्वास्तुभुजैरालिग्यकेशवम्
बुभुजुश्चाधरंदेव्यःसुधामृतमिवामराः १७१
ताभिःसर्वाभिरात्मेशः क्रीडयामासगोव्रजे
तेनापिताः स्त्रियः सर्वा रेमिरेनिर्भयाव्रजे १७२
इत्येवंरमयामासुरहन्यहनिकेशवम्
वृंदावनेमनोरम्येकालिदीपुलिनेतथा १७३
पार्वत्युवाच-
धर्मसंरक्षणार्थायजगत्यामवतीर्यसः
परदाराभिगमनंकथंकुर्याज्ञनार्दनः १७४
रुद्रउवाच-
स्वशरीरेपरेष्वंगभेदोनास्तिशुभानने
सर्वंजगच्चतस्यांगंपृथगत्रनविद्यते १७५
स्त्रीपुंभेदोनवैतस्यपुरुषस्यमहात्मनः
नैसर्गिकस्यभर्तृत्वादात्मेशत्वाज्ञगत्पतेः १७६
तथापहृतपाप्मत्वसामर्थ्याद्व्यापिनःप्रभोः
दोषोऽत्रनास्तिसुभगेदेवस्यपरमात्मनः १७७
वसिष्ठउवाच-
एवमुक्त्वातुगिरिजांरुद्रः श्रीत्रिपुरान्तकः
कृष्णस्यशेषंचरितमाख्यातुंसंप्रचक्रमे १७८
रुद्रउवाच-
शरत्कालेतुसंप्राप्तेनंदगोपपुरोगमाः
गोपामहोत्सवंकर्तुमारब्धास्त्रिदशांपतेः १७९
तदुत्सवंतुगोविंदोनिवार्याथशतक्रतोः

गोवर्द्धनाद्रिराजस्यकारयामासवीर्यवान् १८०
ततः क्रुद्धःसहस्राद्मोनंदगोपस्यगोव्रजे
ववर्षचमहावृष्टिंसप्तरात्रंनिरंतरम् १८१
गोवर्द्धनंसमुत्पाटयमहाशैलंजनार्दनः
गवांसंरद्मणार्थायधारयामासलीलया १८२
तस्यच्छायांगिरेः प्राप्यगोपागोप्यश्चसुव्रते
अवसंश्चसुखेनैवहर्म्यांतरगताइव १८३
ततः शक्रःसहस्राद्मोभीतःसंभ्रांतचेतसा
वारयामासतद्वर्षंययौनंदस्यतद्व्रजम् १८४
कृष्णोऽपितंमहाशैलंयथापूर्वंनिवेशयत्
गोपवृद्धाश्चतेसर्वेनंदगोपपुरोगमाः १८५
परिपूज्यचगोविंदंपरंविस्मयमाययुः
ततः शतक्रतुर्देवः समेत्यमधुसूदनम्
तुष्टावप्रांजलिर्भूत्वाहर्षगद्गदयागिरा १८६
इन्द्रउवाच–
नमस्तेपुंडरीकाद्मसर्वज्ञातित्रिविक्रम
त्रिगुणातीतसर्वेशविश्वस्यात्मन्नमोस्तुते १८७
त्वंयज्ञस्त्वंवषट्कारस्त्वमोङ्कारःक्रतुर्हविः
त्वमेवसर्वदेवानांपितामाताचकेशव १८८
अग्रेहिरगयगर्भस्त्वंभूतस्यसमवर्त्तत
त्वमेवैकःपतिरसिपुरुषस्त्वंहिरगमयः १८९
पृथिवींद्यामिमांदेवत्वमेवधृतवानसि
आत्मदःफलदोयश्चस्यादेवंजगदीश्वर १९०
अवाप्तंतञ्चत्रिदशैःप्रकाशंजगतांपतेः
अमृतंचैवमृत्युश्चछायातवसनातन १९१
तस्मैदेवायभवतेविधेमहविषावयम्
हेमवंतइमेयस्यसमुद्भूताहिरगमयाः १९२
समुद्रारसनायस्यवाहस्तस्यैवकेशव
इमादिशःप्रतिदिशोवायुर्यस्यतवाव्यय १९३
तस्मैदेवायभवतेविधेमहविषावयम्

येनत्वयासमारूढापृथिवीवर्द्धतापुनः १९४
स्वर्लोकः स्तंभितोयेनत्वयाब्रह्मन्महेश्वर
त्वमंतरिक्षेरजसोवसानः सर्वगोव्ययः १९५
तस्मैदेवायभवतेविधेमहविषावयम्
यंक्रंदसिराजमानेतप्तभासेगुणान्विते १९६
अभ्यैक्षेतांचमनसाअवश्यंश्रीश्चसर्वदा
यत्रास्तिसूरउदितोविभातिपरमेपदे १९७
तस्मैदेवायभवतेविधेमहविषावयम्
यदापोबृहतीर्विश्वब्रह्ममायंजनार्दनाः १९८
गर्भंदधानाः सर्गेऽत्रजनयंतीरघौघकृत्
समवर्ततदेवानामसुरेकोऽव्ययोविभुः १९९
तस्मैदेवायभवतेविधेमहविषावयम्
याआपोमहिनादक्षंपर्यपश्यत्प्रजापतिम् २००
यज्ञंदधानास्तत्रादौजनयंतीर्हविः पुमान्
योदेवेष्वेकएवासीदधिदेवः परात्परः २०१
तस्मैदेवायभवतेविधेमहविषावयम्
मानोहिंसीज्जनितायःपृथिव्याअव्ययः पुमान् २०२
योवादिवंसत्यधर्माजजानाव्ययईश्वरः
यश्चंद्रोबृहतीरपोजजानसकलंजगत् २०३
तस्मैदेवायभवतेविधेमहविषावयम्
एतानिविश्वजातानिबभूवपरिताप्रभो २०४
त्वदुत्पन्नप्रजाध्यक्षभविष्यद्भूतमच्युतः
यजामस्त्वांचयत्कामास्तन्नोअस्तुसमासतः २०५
त्रयाणांपतयःस्यामतवकारुण्यवीक्षणात्
हिरण्मयाख्यःपुरुषोहिरण्यश्मश्रुकेशवान् २०६
आप्रणखात्सर्वंहिरण्यंसवितातुहिरण्यभाक्
असौसर्वगतोब्रह्मायस्त्वादित्येव्यवस्थितः २०७
तद्वैदेवस्यसवितुर्वरेण्यंभर्गउत्तमम्
सदाधीमहितेरूपंधियोयोनः प्रभातिहि २०८
नमस्ते पुंडरीकाक्षश्रीशसर्वेशकेशव

वेदांतवेद्ययज्ञेशयज्ञरूपनमोस्तुते २०९
नमस्तेवासुदेवायगोपवेषायतेनमः
तत्सर्वध्वंसनादेवअपराधंमयाकृतम् २१०
तत्क्षम्यतांजगन्नाथघृणाब्धेपुरुषोत्तम
अल्पेनैवहिकालेनजहिकंसंदुरासदम्
देवानांहिहितंकृत्वासुखेवस्थायमेदिनीम् २११
महादेवउवाच–
इतिसंस्तुत्यगोविंदंसर्वदेवेश्वरोहरिः
सुधामृतेनाभ्यषिंचद्दिव्यांबरविभूषणैः २१२
अर्चयित्वातुदेवेशंजगामत्रिदिवंपुनः
गोपवृद्धाश्चगोप्यश्चदृष्ट्वातत्रशतक्रतुम् २१३
तेनतेपूजिताश्चैवप्रहर्षमतुलंययुः
रामकृष्णौमहावीर्यौदिव्याभरणभूषितौ २१४
नंदस्य गोव्रजेरम्येसुसुखेनैवतस्थतुः
एतस्मिन्नंतरेदेविनारदोमुनिसत्तमः २१५
सहसामथुरांगत्वाकंसस्यांतिकमाविशत्
राज्ञासंपूजितास्तत्रसमासीनःशुभासने २१६
सर्वंविज्ञापयामासचेष्टितंशार्ङ्गिणस्तदा
देवतानांसमुद्योगंजन्मवैकेशवस्यच २१७
तथाचवसुदेवेनपुत्रनिक्षेपणंव्रजे
निधनंराक्षसानांचसर्पराजविवासनम् २१८
धारणंगिरिवर्यस्यशतक्रतुसमागमम्
निवेदयित्वाकंसस्यसर्वंनिरवशेषतः २१९
प्रययौब्रह्मभवनंपूजितस्तेनरक्षसा
कंसः समुद्विग्नमनामंत्रिभिः परिवेष्टितः २२०
मंत्रयामासतैः साकमात्मनोनिधनंप्रति
तत्रबुद्धिमतांश्रेष्ठमक्रूरंधर्मवत्सलम्
उवाचात्महितं कार्यंदानवेंद्रोमहाबलः २२१
कंसउवाच–
मद्भयात्त्रिदशाः सर्वेशतक्रतुपुरोगमाः

विष्णोःसमीपमागत्यभयार्त्ताः शरणंगताः २२२
सतेषामभयंदत्वाभगवान्भूतभावनः
उत्पन्नोदेवकीगर्भेमांहंतुंमधुसूदनः २२३
वसुदेवोऽपिदुष्टात्मावंचयित्वातुमांनिशि
पुत्रंनिक्षिप्तवान्गेहेनंदस्यसुदुरात्मनः २२४
बालेनैवदुराधर्षोविजघानमहासुरान्
मांहंतुमपिसंनद्धोभवेदेवनसंशयः २२५
सतुहंतुंनवैशक्तः सेंद्रैरपिसुरासुरैः
उपायेनैवहंतव्यः समानीयमयातदा २२६
मदोत्कटैस्तुमातंगैर्मल्लैश्चवरवाजिभिः
येनकेनाप्युपायेनहंतुंशक्यमिहैवतु २२७
तस्मात्त्वंगोव्रजंगत्वाकृष्णंरामंचयादव
सर्वान्गोपालवृद्धांश्चनंदगोपपुरोगमान्
उपभोक्तुंधनुर्यागामिहानययदूत्तम २२८
महादेवउवाच-
तथेत्युक्त्वायदुश्रेष्ठोरथमारुह्यवीर्यवान्
प्रययौगोकुलंरम्यंकृष्णंसंदर्शनोत्सुकः २२९
महाभागवतश्रेष्ठोगवांमध्येव्यवस्थितम्
ददर्शकृष्णमक्लिष्टमक्रूरोविनयान्वितः २३०
नीलनीरदसंकाशंसर्वाभरणभूषितम्
पद्मपत्रविशालाक्षंदीर्घबाहुमनामयम् २३१
पीतवस्त्रेणसंवीतंसर्वावयवसुंदरम्
कौस्तुभोद्भासितोरस्कंरत्नकुंडलशोभितम् २३२
तुलसीवनमालाढ्यंवन्यपुष्पावतंसकम्
गोपकन्यापरिवृतंदृष्ट्वातत्रजनार्दनम् २३३
पुलकांकितसर्वांगोहर्षाश्रुप्लुतलोचनः
अवरुह्यरथात्तस्मात्प्रणनामयदूद्वहः २३४
हर्षात्समेत्यगोपालंपरिणीयप्रणम्यच
रक्तारविंदसदृशौवज्रचक्राङ्कचिह्नितौ २३५
स्वमूर्ध्निधृत्वापादाब्जौप्रणनामपुनः पुनः

कैलासशिखराभासंनीलांबरधरंप्रभुम् २३६
शरत्पूर्णेंदुसदृशंमुक्तादामविभूषितम्
बलरामंततोदृष्ट्वाप्रणनामसयादवः २३७
हर्षेणोत्थाप्यतौवीरौपरिगृह्ययदूत्तमौ
गृहमाजग्मतुर्वीरौतेनाक्रूरेणवृष्णिना २३८
नंदगोपस्तुतंदृष्ट्वायदुश्रेष्ठंसमागतम्
अभिगम्यमहातेजानिवेश्यपरमासने २३९
अर्चयामासविधिवदर्घ्यपाद्यादिभिर्मुदा
वस्त्रैः समर्हणैर्दिव्यैरर्चयामासभक्तितः २४०
अक्रूरोरामकृष्णाभ्यांवस्त्राणयाभरणानिच
प्रददौनंदगोपाययशोदायैचयादवः २४१
पृष्ट्वाकुशलमव्यग्रमासीनस्तुकुशासने
राजकार्याणिसर्वाणिसंपृष्टोवाचबुद्धिमान् २४२
अक्रूरउवाच-
एषकृष्णोमहातेजास्साक्षान्नारायणोऽव्ययः
देवतानांहितार्थायसाधूनांरक्षणायच २४३
भूभारकविनाशायधर्मसंस्थापनायच
कंसादीनांतुदैत्यानांसर्वेषांनिधनायच २४४
संप्रार्थितः सुरगणैर्मुनिभिश्चमहात्मभिः
देवकीजठरेजातःप्रावृट्कालेमहानिशि २४५
भयात्कंसस्यदेवेशमानीयानकदुंदुभिः
तवगेहेतदारात्रौपुत्रंनिःक्षिप्तवान्हरिम् २४६
तस्मिन्नेवतुकालेऽपियशोदातुयशस्विनी
कन्यां मायांशसंभूतांप्रसूतातुशुभाननाम् २४७
तयासंमोहितंसर्वमिदंव्रजकुलंशुभम्
मूर्च्छितायायशोदायाः शयनेयदुपुङ्गवम् २४८
कृष्णंनिक्षिप्यतां कन्यामादायस्वगृहंययौ
तांतुनिक्षिप्यदेवक्याः शयनेबहिरागमत् २४९
सारुरोदततः क्षिप्रदेवकीशयनेस्थिता
तच्छ्रुत्वासहसाकंसःकन्यामादायसुव्रत २५०

भ्रामयित्वाशिलापृष्ठेचिक्षेपोत्पत्यवीर्यवान्
समुत्थायचसाकन्यासायुधाष्टभुजान्विता
गगनस्थारुषाकंसंप्राहगंभीरया गिरा २५१
कन्योवाच-
योऽनतःसर्वदेवानामीश्वरः पुरुषोत्तमः
यातस्तववधार्थायगोव्रजेदानवाधम २५२
अक्रूर उवाच-
इत्युक्त्वासामहामायाहिमवंतंसमाययौ
तदाप्रभृतिदुष्टात्माभयादुद्विग्नमानसः २५३
दानवान्प्रेषयामासनिधनायमहात्मनः
बालेनैवहताः सर्वेलीलयानेनधीमता २५४
अत्यद्भुतानिकर्माणिकृतवान्परमेश्वरः
गोवर्द्धनादिधरणंनागराजविवासनम् २५५
समागमंमहेंद्रस्यनिधनंसर्वरक्षसाम्
श्रुत्वादेवर्षिणाख्यातमतीवभयपीडितः २५६
इतोनीत्वामहाबाहूरामकृष्णौदुरासदौ
मदोत्कटैर्महानागैर्मल्लैर्वाहंतुमुद्यतः २५७
कृष्णस्यानयनार्थायप्रेरयामासमामिह
वसुदेवस्यदुष्टात्मानिग्रहंकृतवानसौ २५८
एतत्सर्वंसमाख्यातंचेष्टितंसुदुरात्मनः
उपभोक्तुंधनुर्यागंयूयंसर्वेव्रजौकसः २५९
दध्याज्यादिगृहीत्वावैश्वोभूतेगंतुमर्हथ
सहितारामकृष्णाभ्यांगोपाःसर्वेतदंतिकम् २६०
कृष्णेननिहतः कंसोभविष्यतिनंसशयः
परित्यज्यभयंतस्माद्गमिष्यध्वंनृपाज्ञया २६१
ईश्वरउवाच-
इत्युक्त्वासतदाक्रूरस्तूष्णीमासीत्सुबुद्धिमान्
तस्यतद्वचनंश्रुत्वादारुणंरोमहर्षणम् २६२
नंदगोपमुखाः सर्वेगोपवृद्धाभयातुराः
अभाषिरेमहादुःखसागरेशोकमोहिताः २६३

तानाश्वास्यहरिस्तत्रदृष्ट्वाकमललोचनः
नभीःकार्येतिसंप्राहराक्षसंप्रतिवीर्यवान् २६४
विनाशायप्रयास्यामिकंसस्यास्यदुरात्मनः
मथुरांसहरामेणभवद्भिःसहसंगतः २६५
तत्रहत्वादुरात्मानंकंसंदानवपुंगवम्
सर्वांश्चराक्षसान्हत्वापालयिष्यामिमेदिनीम् २६६
तस्माच्छोकंपरित्यज्यगच्छध्वंमथुरांपुरीम्
एवमुक्तास्तुहरिणागोपानंदपुरोगमाः २६७
मुहुर्मुहुःपरिष्वज्यमूर्द्धघ्राणंप्रचक्रिरे
अप्रमेयानिकर्माणिविचार्यसुमहात्मनः २६८
अक्रूरवचनाच्चैवगोपाःसर्वेगतव्यथाः
दुग्धदध्याज्ययुक्तानिशुचीनिविविधानिच २६९
पक्वान्नानिसुहृद्यानिस्वादूनिमधुराणिच
अक्रूरायददौसौम्यंयशोदाभोजनंबहु २७०
सहितोरामकृष्णाभ्यांनंदाद्यैर्गोपसत्तमैः
सुहृद्भिर्बालवृद्धैश्चभवनेसमलंकृते २७१
दत्तंयशोदयासौम्यंभोजनंकलुषापहम्
बुभुजेयादवश्रेष्ठोह्यन्नंरोगापहंशुभम् २७२
भोजयित्वायथान्यायंदत्त्वाचमनमंभसा
सकर्पूरंसतांबूलंददौतस्मैदृढव्रता २७३
अस्तंयातेदिनकरेसंध्यामन्वास्ययादवः
सहितोरामकृष्णाभ्यांभुक्त्वाक्षीरान्नमुत्तमम् २७४
ताभ्यामेवतदाक्रूरःशयनंसमुपाविशत्
तस्मिंस्तुभवनेश्रेष्ठेरम्येदीपविराजिते २७५
श्लक्ष्णेविचित्रपर्यंकेनानापुष्पविराजिते
तस्मिन्शेतेहरिःकृष्णः शेषेनारायणोयथा २७६
तंदृष्ट्वासहसाऽक्रूरोहर्षाश्रुपुलकांकितः
विहायतामसींनिद्रांसुश्रेयः समुदीक्ष्यवै २७७
पादसंवाहनं विष्णोश्चक्रेभागवतोत्तमः
एतावतामेसाफल्यंजीवितंचसुजीवितम् २७८

इदं त्रैलोक्यमैश्वर्यमिदंवैसुखमुत्तमम्
इदंराज्यमिदंधर्म्यमिदंमोक्षसुखंपरम् २७९
नशक्यंमनसास्मर्तुंशिवब्रह्मादिदैवतैः
सनकाद्यैर्मुनींद्रैस्तुवसिष्ठाद्यैर्महर्षिभिः २८०
तच्छ्रीशस्यपदद्वंद्वंशरदंबुरुहोज्ज्वलम्
संस्पृष्टमिंदिरालक्ष्म्याकराभ्यांसुसुखंपरम् २८१
दिष्ट्यालब्धंमयाविष्णोः श्रीपादाब्जयुगंशुभम्
व्यतीतासाक्षणाद्रात्रिस्तब्रह्मानंदगौरवात् २८२
ततः प्रभाते विमलेदिविदेवगणोत्तमैः
संस्तूयमानोबुबुधेतस्मात्तुशयनाद्धरिः २८३
उपस्पृश्ययथान्यायंसहरामेणधीमता
पपातपादयोर्मातुःप्रयाणंचाभ्यरोचयत् २८४
समुत्थाप्ययशोदातुदुःखहर्षसमान्विता
अश्रुपूर्णमुखीपुत्रौप्रेम्णासंपरिषस्वजे २८५
आशिषंप्रददौदेवीतनयाभ्यांदृढव्रता
विससर्जमहावीरौसमालिङ्ग्यमुहुर्मुहुः २८६
अक्रूरोऽपियशोदायैप्रणम्यप्राहसांजलि २८७
अक्रूरउवाच–
प्रयास्यामिमहाभागेप्रसादंकुरुमेऽनघे
एषकृष्णोमहाबाहुः कंसंहत्वामहाबलम् २८८
सर्वस्यजगतोराजाभविष्यतिनसंशयः
तस्माच्छोकंपरित्यज्यसुखीभववरानने २८९
ईश्वरउवाच–
इत्युक्तयातयाऽक्रूरोविसृष्टोयदुसत्तमः
सहितोरामकृष्णाभ्यामारुरोहरथोत्तमम् २९०
प्रययौमथुरांशीघ्रंस्तूयमानोऽप्सरोगणैः
नंदगोपमुखाःसर्वेगोपवृद्धास्तमन्वयुः २९१
पुनर्गृहीत्वादध्याज्यंफलानिविविधानिच
तंप्रयांतंहरिंदृष्ट्वागोकुलाद्गोपयोषितः २९२
अनुजग्मुर्विनिष्क्रांतंरथस्थंमधुसूदनम्

निवर्त्तयामासहरिस्ताः सर्वागोपयोषितः २९३
शोकसंतप्तहृदयाविलेपुःकमलेक्षणम्
हाकृष्णकृष्णकृष्णेतिगोविंदेत्यरुदन्मुहुः २९४
अश्रुपूर्णेक्षणादीनारुदंत्यस्तत्रसंस्थिताः
अथाक्रूरोरथंदिव्यंचोदयामासगोव्रजात् २९५
सहितोरामकृष्णाभ्यांमथुरांप्रतियादवः
उत्तीर्ययमुनांशीघ्रंकूलेस्थाप्यरथोत्तमम् २९६
अवरुह्यरथात्तस्मात्स्नातुंतत्रोपचक्रमे
तथा चावश्यकंकर्तुंनिमज्ज्याथजलेशुभे २९७
तत्राघमर्षणंसम्यग्जपन्भागवतोत्तमः
ददर्शतौजले तत्ररामकृष्णौशुभान्वितौ २९८
शरत्कोटींदुसंकाशंनीलांबरधरंप्रभुम्
दिव्यचंदनदिग्धांगंमौक्तिकाभरणच्छविम् २९९
रक्तारविंदनयनंपुडंरीकावतंसकम्
रामंददर्श कृष्णंचनीलनीरदसन्निभम् ३००
दिव्यपीतांबरधरंपुंडरीकायतेक्षणम्
हरिचंदनलिप्तांगंनानारत्नविभूषितम् ३०१
दृष्ट्वातत्रयदुश्रेष्ठोविस्मयं परमंगतः
उत्थायस्यंदनेतत्रतौददर्शमहाबलौ ३०२
पुनरप्यत्रनिर्मज्ज्यजपन्मंत्रद्वयंहरिम्
सुधाब्धौशेषपर्यंकेरमयासहितंहरिम् ३०३
सनकाद्यैस्तूयमानंसर्वैर्देवैरुपासितम्
दृष्ट्वातस्मिन्जलेदेवंविस्मयंपरमंययौ
तुष्टावाथयदुश्रेष्ठोहरिंसर्वगमीश्वरम् ३०४
अक्रूरउवाच–
कालात्मनेनमस्तुभ्यमनादिनिधनायच
अव्यक्तायनमस्तुभ्यमविकारायतेनमः ३०५
भूतभर्त्रेनमस्तुभ्यंभूतव्याघ्रनमोनमः
नमस्तेसर्वभूतानांनियन्त्रेपरमात्मने ३०६
विकारायाविकारायप्रत्यक्षपुरुषायच

गुणभर्त्रेनमस्तुभ्यंनियमायनमोनमः ३०७
देशकालादिनिर्भेदरहिताय परात्मने
अनंतायनमस्तुभ्यमच्युतायनमोनमः ३०८
गोविंदायनमस्तुभ्यंत्रयीनाथायशार्ङ्गिणे
नारायणायविश्वायवासुदेवायतेनमः ३०९
विष्णवेपुरुरूपायशाश्वतायनमोनमः
पद्मनेत्रायनित्यायशंखचक्रधरायच ३१०
उद्यत्कोटिरविप्रख्यभूषणांचितवर्चसे
हरयेसर्वलोकानामीश्वरायनमोनमः ३११
सवित्रेसर्वजगतांबीजायपरमात्मने
संकर्षणायकृष्णायप्रद्युम्नायनमोनमः ३१२
अनिरुद्धायधात्रेचविधात्रेविश्वयोनये
सहस्रमूर्त्तयेतुभ्यं बहुमूर्द्धांघ्रिबाहवे ३१३
सहस्रनाम्नेनित्याय पुरुषायनमोनमः
नमस्तेनागपर्यंकशायिनेसौम्यरूपिणे ३१४
केशवायनमस्तुभ्यं पीतवस्त्रधरायच
लक्ष्मीघनकुचाश्लेषविमर्दोज्ज्वलवर्चसे
श्रीधरायनमस्तुभ्यंश्रीशायानंतरूपिणे ३१५
ईश्वरउवाच-
स्नानकाले पठेद्यस्तुदेवंध्यायन्सनातनम्
इमंस्तवंनरोभक्त्यामहद्भिर्मुच्यतेह्यघैः ३१६
सर्वतीर्थफलंप्राप्यविष्णुसायुज्यमाप्नुयात्
एवमंतर्जलेदेवंस्तुत्वाभागवतोत्तमः ३१७
अर्चयामाससजलैःकुसुमैश्चसुगंधिभिः
कृतकृत्यस्तदाक्रूरोनिर्गत्ययमुनाजलात् ३१८
समेत्यरामकृष्णौतुप्रणनामशुभान्वितः
तंदृष्ट्वाप्राहगोविंदोविनीतंविस्मितंहरिः ३१९
श्रीकृष्णउवाच-
किमाश्चर्यंजलेतस्मिन्दृष्टवानसियादव
ईश्वरउवाच-

अक्रूरस्तुयदुश्रेष्ठंप्राहकृष्णंसुतेजसम् ३२०
अक्रूरउवाच-
तवसर्वगतस्येशमहिम्नोजगतः प्रभो
किमाश्चर्यंहृषीकेशजगत्सर्वंत्वमेवहि ३२१
त्वमापस्त्वंनभोवह्निस्त्वंभूमिरनिलस्तथा
चतुर्विधमिमंसर्वंजगत्स्थावरजंगमम् ३२२
त्वत्तोनान्यद्वासुदेवजीमूतादमृतंयथा
त्वंयज्ञस्त्वंवषट्कारस्त्वमोंकारोहविस्तथा ३२३
त्वमेवसर्वदेवानामीश्वरः शाश्वतोऽव्ययः
नाकारणात्कारणाद्वाकरणाकारणात्परः ३२४
धर्मत्राणायदेवेशशरीरग्रहणंतव
मत्स्यकूर्मवराहादिवैभवत्वमुपागतः ३२५
पासिसर्वमिमंलोकंत्वमेवत्वन्मयंबिभो ३२६
ईश्वरउवाच-
इतिसंस्तुत्य गोविंदंप्रणम्यजगतांपतिम्
आरुरोहरथंदिव्यंताभ्यांसहयदूत्तमः ३२७
ततस्तूर्णंसमासाद्यमथुरांदेवनिर्मिताम्
रामकृष्णौपुरद्वारिनिवेश्यांतःपुरंययौ ३२८
तयोरागमनंतस्यनिवेद्यनृपतेस्तदा
राज्ञासंपूजितस्तेनततःस्वगृहमाविशत् ३२९
अथसायाह्नसमये रामकृष्णौमहाबलौ
परस्परंकरौगृह्यमथुरायांसमागतौ ३३०
गछन्तौचमहावीर्यौराजमार्गेयदूत्तमौ
ददृशतुर्महात्मानौरजकंवस्त्ररंजकम् ३३१
दिव्यवस्त्रवृतंराजगेहमायांतमच्युतः
ययाचेतानिवस्त्राणिसहरामेणवीर्यवान् ३३२
नदत्तवांस्तदातस्मैरुषावैवस्त्ररंजकः
बहूनिकटुवाक्यानिप्राहतत्राध्वनिस्थितः ३३३
ताडयामासतंकृष्णस्तलेनैवमहाबलः
तत्रैवनिहतोमार्गेवमन्वैरुधिरंबहु ३३४

तानिवस्त्राणिरम्याणिगोपालैःसहबांधवैः
धारयामासतुर्वीरौयथाहंरामकेशवौ ३३५
मालाकारगृहंप्राप्यतेनदृष्टौनमस्कृतौ
सुगंधिभिर्दिव्यपुष्पैः पूज्यमानौमुदान्वितौ ३३६
ददतुस्तौबरंतस्मैवांछितंयदुपुंगवौ
समागतौपुनर्वीथ्यामायांतींचशुभाननाम् ३३७
कुब्जांस्त्रियंमहाभागौधृतचंदनभाजनाम्
वक्रांगपृष्ठांवनितांदृष्ट्वागंधमयाचतम् ऋं३३८
प्रहसंतीतदाताभ्यांददौचंदनमुत्तमम्
ऋादायचंदनंदिव्यमुपलिप्ययथेच्छया ३३९
तस्यैकांततरंरूपंदत्त्वाऽध्वनिसमागतौ
निरीक्ष्यमाणौयोषिद्भिःसुकुमारौशुभाननौ ३४०
विवेशतुर्महात्मानौयज्ञशालांसहानुगैः
दृष्ट्वासमर्चितंदिव्यंकार्मुकंतत्रकेशवः ३४१
लीलयैवगृहीत्वाऽथबभंजमधुसूदनः
बिभज्यमानंतच्चापंश्रुत्वाकंसःसुविह्वलः ३४२
ऋाहूयमल्लान्सूतांस्तुप्रमुखान्दैत्यपुंगवान्
विमृश्यमंत्रिभिःप्राहचाणूरं दैत्यपुंगवः ३४३
कंसउवाच-
रामकृष्णौसमायातौसर्व दैत्यविनाशकौ
प्रभातेमल्लयुद्धेनहन्यतामविशंकया ३४४
येनकेनाप्युपायेनहंतव्यौबलदर्पितौ
मदोत्कटैर्गजैर्वापिमल्लमुख्यैश्चयत्नतः ३४५
ईश्वरउवाच-
इत्यादिश्यततोराजासानुजःसचिवैःसह
ऋारुरोहभयात्तूर्णंदिव्यप्रासादमूर्द्धनि ३४६
द्वारेषुसर्वमार्गेषुगजान्मत्तानयोजयत्
मल्लान्मदोत्कटान्नागान्स्थापयामाससर्वतः ३४७
ज्ञात्वाकृष्णोऽपितत्सर्वंसहरामेणधीमता
उवासरजनींतत्रयज्ञगेहेसहानुगैः ३४८

ततोरजन्यांव्युष्टायांप्रभातेविमलेसति
शयनादुत्थितौवीरौरामकृष्णौकृतोदकौ ३४९
स्वलंकृतौचतौभुक्त्वासंग्रामाभिमुखोत्सुकौ
विनिर्गतौगृहात्तस्मात्सिंहाविवमहागुहात् ३५०
राजद्वारिस्थितंनागंहिमाद्रिशिखरोपमम्
नाम्नाकुवलयापीडंकंसस्य जयवर्द्धनम् ३५१
देवकुंजरदर्पघ्नंमहाकायंमदोत्कटम्
दृष्ट्वातंचमहानागंपंचास्यइवकेशवः ३५२
करेणैवकरंगृह्यसम्यगुत्प्लुत्यलीलया
भ्रामयित्वाथचिक्षेपधरणयांधरणीधरः ३५३
सतुचूर्णिसतसर्वांगोनिनदन्भैरवंस्वनम्
पपातसहसाभूमौममारचमहागजः ३५४
हत्वा दंतौसमुत्पाटयगृहीत्वारामकेशवौ
मल्लैरायोधनंकर्तुंरंगंविविशतुस्तदा ३५५
तत्रस्थादानवादृष्ट्वागोविंदस्यपराक्रमम्
भीताः प्रविद्रुताःसर्वेराज्ञोंतःपुरमाययुः ३५६
कपाटौसुदृढौबध्वातत्रतस्थुःसहस्त्रशः
दृढबंधकपाटांस्तुदृष्ट्वाकृष्णस्तुलीलया ३५७
ताडयित्वापदेनैवपातयामासवीर्यवान्
तौभग्नौपातितौतत्रसेनानीकेव्यवस्थिते ३५८
तत्रस्थानिहताःसर्वेचूर्णितांगशिरोधराः
ततः प्रविश्यभवनंकंसस्यास्यमहाबलौ ३५९
भ्रामयंतौमहाभागश्रृंगौपीनौरणोत्सुकौ
ददृशातेमहात्मानौमल्लौचाणूरमुष्टिकौ ३६०
कंसोऽपिदृष्ट्वागोविंदंरामंचसुमहाबलम्
भयमाविश्यचाणूरंप्राहमल्लवरंतदा ३६१
कंसउवाच–
अस्मिन्नवसरेमल्लजहिगोपालबालकौ
विभज्यतवराज्यार्द्धमहंदास्याम्ययत्नतः ३६२
ईश्वरउवाच–

तस्मिन्नवसरेकृष्णोमल्लाभ्यांदृश्यतेमहान्
मध्येवनेचसंग्रामेमहामेरुरिवापरः ३६३
कंसस्यदृष्टिविषयेसंवर्त्ताग्निरिवाच्युतः
स्त्रीणांचसाक्षान्मदनः पित्रोःशिशुरिवापरः ३६४
त्रिदशानांहरिरिवगोपालानांसखायथा
बहुरूपेणददृशुस्तत्रसर्वगतंहरिम् ३६५
वसुदेवस्तथाऽक्रूरोनंदगोपोमहामतिः
अन्यंप्रासादमारुह्यददृशुःकदनंमहत् ३६६
स्त्रीभिरंतःपुरस्थाभिर्देवकीतत्रसंस्थिता
मुखंपुत्रस्यददृशे साश्रुपूर्णेक्षणाशुभा ३६७
ताभिराश्वासितादेवीभवनांतरमाविशत्
ततोदेवगणाः सर्वेविमानस्थानभस्तले ३६८
तुष्टवुर्जयशब्देनपुंडरीकाक्षमच्युतम्
जहिकंसमितिप्राहुरुच्चैर्देवामरुद्गणाः ३६९
एतस्मिन्नंतरेतत्रतूर्यघोषनिनादिते
आसेदतुर्महामल्लौयदुसिंहौमहाबलौ ३७०
चाणूरेण तुगोविंदोमुष्टिकेनहलायुधः
युयुधातेमहात्मानौनीलश्वेताद्रिसन्निभौ ३७१
मल्लयुद्धविधानेनमुष्टिभिःपादताडनैः
बभूवकदनंघोरंदेवानांचभयावहम् ३७२
चाणूरेणचिरंकालंक्रीडित्वाऽथजनार्दनः
निष्पिष्यगात्रंमल्लस्यपातयामासलीलया ३७३
सपपातमहीपृष्ठेसंवमन्रुधिरंबहु
ममारचमहामल्लोदेवदानवदुःखदः ३७४
मुष्टिकेनतथारामश्चिरकालमयुध्यत
मुष्टिभिस्ताडयामासतस्यवक्षसिवीर्यवान् ३७५
भिन्नास्थिस्नायुबंधोऽसौपपातधरणीतले
ततस्तुदुद्रुवुःसर्वेमल्लादृष्ट्वापराक्रमम् ३७६
कंसोमहद्भयंतीव्रमाविशद्वेदनातुरः
एतस्मिन्नंतरेवीरौरामकृष्णौदुरासदौ ३७७

आरोहतुर्महात्मानौचैत्यप्रासादमूर्जितम्
ताडयित्वातलेनैवकंसंमूर्ध्निजनार्दनः ३७८
अपातयद्धरापृष्ठेप्रासादशिखराद्धरिः
स तुनिर्भिन्नसर्वांगोधरगयांत्यक्तजीवितः ३७९
कृष्णेननिहतेकंसेरामोऽपिसुमहाबलः
तस्यानुजंसुनामानंमुष्टिनैवजघानह ३८०
धरगयांपातयामासानुजंचधरणीधरः
हत्वाकंसंदुरात्मानंसानुजंरामकेशवौ ३८१
पित्रोःसमीपमागम्यभक्त्याचैवप्रणेमतुः
देवकीवसुदेवश्चपरिष्वज्यमुहुर्मुहुः ३८२
स्नेहेनमूर्ध्न्युपाघ्राणंचक्रतुःपुत्रलालसौ
तयोरुपरिदेवक्याः स्तनौक्षीरंववर्षतुः ३८३
ततआश्वास्यपितरौरामकृष्णौबहिर्गतौ
एतस्मिन्नंतरेदेविदेवदुंदुभयोदिवि ३८४
विनेदुःपुष्पवर्षाणिववृषुस्त्रिदशेश्वराः
स्तुत्वामरुद्गणैर्दिव्यैर्नमस्कृत्यजनार्दनम् ३८५
परंहर्षमनुप्राप्यलोकान्स्वान्स्वान् प्रपेदिरे
नंदगोपंनमस्कृत्यगोपवृद्धांश्चकेशवः ३८६
रामेणसहधर्मात्मामुदासंपरिषस्वजे
बहुरत्नधनंतस्मैददौप्रीत्याजनार्दनः ३८७
सर्वांस्तान्गोपवृद्धांश्चवस्त्रैराभरणादिभिः
बहुभिर्धनधान्यैश्चपूजयामासकेशवः ३८८
विसृष्टास्तेनकृष्णेननंदगोपपुरोगमाः
प्रययुर्गोव्रजंदिव्यंहर्षशोकसमन्विताः ३८९
मातामहंसमासाद्यरामकृष्णौदुरासदौ
बंधाद्विमोचयित्वाथसमाश्वास्यमुहुर्मुहुः ३९०
चक्रेतस्याभिषेकंतुतद्राज्येमधुसूदनः
अकारयद्द्विजश्रेष्ठैः सकंसस्योर्ध्वदैहिकम् ३९१
अक्रूरप्रमुखान्राज्येसंस्थाप्ययदुपुंगवान्
राजानमुग्रसेनंतुकृत्वाधर्मेणमेदिनीम्

पालयामासधर्मात्मावसुदेवसुतोहरिः ३९२
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
उमामहेश्वरसंवादे श्रीकृष्णचरितेकंसवधोनाम
पंचत्वारिंशदधिकद्विशततमोऽध्यायः २४५

षट्चत्वारिंशधिक द्विशततमोऽध्यायः

श्रीमहेश्वरउवाच-
अथोपनयनंनामचकारानकदुंदुभिः
पुत्रयोर्वेदविधिनातस्मिन्वैरामकृष्णयोः १
आचार्येणहिगर्गेणसंस्कृतौरामकेशवौ
पंडितैर्वैष्णवैर्दिव्यैःस्नापनैर्विमलैः शुभैः २
कृतसंस्कारकर्माणौरामकृष्णौमहाबलौ
सांदीपनेर्गृहंगत्वानमस्कृत्यमहात्मनः ३
अधीत्यवेदशास्त्राणितस्मात्तौद्विजपुंगवात्
मृतंपुत्रंसमानीयददतुस्तस्यदक्षिणाम् ४
आशिषोवचनंलबध्वागुरोस्तस्मान्महात्मनः
तस्मैप्रणम्यमथुरांजग्मतुर्यदुपुंगवौ ५
अथकृष्णेननिहतंश्रुत्वाकंसंदुरासदम्
श्वशुरस्तस्यनृपतेर्जरासंधोमहाबलः ६
अक्षौहिणीसहस्रैस्तुसेनानीकैर्महाबलैः
कृष्णंहंतुंसमागत्यरुरोधमथुरांपुरीम् ७
रामकृष्णौमहावीर्यौविनिर्गत्यपुरोत्तमात्
गजवाजिसमाकीर्णंतद्बलौघमपश्यताम् ८
सस्मारवासुदेवस्तुपूर्वंरूपंसनातनम्
तस्यस्मरणमात्रेणदारुकोविष्णुसारथिः ९
सुग्रीवपुष्पकंनामसमानीयमहारथम्
वाजिभिर्दिव्यपुष्पाद्यैरुह्यमानंसनातनम् १०
दिव्यायुधैरुपेतंतंशंखचक्रगदादिभिः
वैनतेयपताकेनशोभितंदेवदुर्जयम् ११
अवनींप्राप्यगोविंदंप्रणम्यहरिसारथिः

प्रददौस्यंदनंशुभ्रंसायुधाश्वसमन्वितम् १२
दृष्ट्वाहर्षेणकृष्णोऽपिपरिणीयमहारथम्
आरुरोहाग्रजेनैवस्तूयमानोमरुद्गणैः १३
चतुर्भुजंवपुर्भूत्वाशंखचक्रगदासिभृत्
किरीटीकुंडलीस्रग्वीसंग्रामाभिमुखंययौ १४
बलदेवोऽपिमुशलंलांगलंगृह्यवीर्यवान्
तत्सैन्यंहंतुमारेभेमहेश्वरइवापरः १५
दारुकश्चरथंशीघ्रंनोदयामासतद्रणे
तृणगुल्मलताक्रांतेकाननेऽग्निमिवानिलः १६
ततोगदाभिः परिघैःशक्तिभिर्मुद्गरैस्तथा
तद्रथंछादयामासुर्जरासंधस्यसैनिकाः १७
चक्रेणैवहरिस्तूर्णंतानिचिच्छेदलीलया
बहूनितृणकाष्ठानिमहावह्निरिवार्चिषा १८
ततः शार्ङ्गंसमादायसायकैरक्षयैःशितैः
चिच्छेदतानिसैन्यानिनप्राज्ञायतकिंचन १९
चक्रच्छिन्नास्यकमलाःकेचित्तत्रमहाबलाः
गदयाचूर्णिताः केचित्केचिदन्यैर्महारणे २०
केचिच्चैवासिनाछिन्नास्तथान्येशरताडिताः
लांगलाग्रहतग्रीवामुशलाहतमस्तकाः २१
क्षणेनतद्बलंसर्वंनिहत्यमधुसूदनः
शंखंदध्मौयदुश्रेष्ठोलयाशनिनिभस्वनम् २२
शंखरावविनिर्भिन्नहृदयास्तेमहाबलाः
योधाःसाश्वाःसनागाश्चपतितास्त्यक्तजीविताः २३
अक्षौहिणीसहस्रंतुसाश्वंसरथकुंजरम्
कृष्णेनैकेननिहतंनिःशेषंतदभूद्बलम् २४
निहतंवासुदेवेनप्रहरार्द्धेनशार्ङ्गिणा
ततोदेवगणाः सर्वेहर्षनिर्भरचेतसः २५
ववृषुःपुष्पवर्षाणिसाधुसाध्वितिचाब्रुवन्
सर्वमप्यवनीभारंविमुच्यधरणीधरः २६
संस्तूयमानस्त्रिदशैर्बभौसंग्राममूर्द्धनि

निहतंस्वबलंदृष्ट्वाजरासंधोऽतिवीर्यवान् २७
योद्धुमभ्याययौतूर्णंबलदेवेनदुर्मतिः
तयोर्युद्धमभूद्धोरंसंग्रामेष्वनिवर्तिनोः २८
रामोलांगलमादायरथंतस्यससारथिम्
विनिपात्यरणेशूरोगृहीत्वातंमहाबलम् २९
उद्यम्यमुशलंतूर्णंतंहंतुमुपचक्रमे
प्राणसंशयमापन्नंजरासंधंनृपोत्तमम् ३०
कृतंरामेणबलिनासिंहेनेवमहागजम्
दृष्ट्वाकृष्णोग्रजंप्राहनहंतव्यइतिप्रभुः ३१
मोचयामासधर्मात्माजरासंधंमहामतिः
विमुच्यकृष्णवाक्येनशत्रुंसंकर्षणोऽव्ययः ३२
सानुजोरथमारुह्यमथुरांप्रविवेशह
सकालयवनंप्राप्यमहावीर्यंबलान्वितम् ३३
पुत्रयोर्वसुदेवस्यसमाचष्टपराक्रमम्
दानवानांवधंचैवकंसस्यनिधनंतथा ३४
अक्षौहिणीनांचवधंतथास्वस्यपराजयम्
सर्वंनिवेदयामासकृष्णस्यचरितंमहत् ३५
तच्छ्रुत्वायवनः क्रुद्धोमहाबलपराक्रमैः
म्लेच्छकोटिसहस्रैस्तुसंवृतोमदसंयुतैः ३६
मगधाधिपतेस्तस्यसहायार्थंमहाबलः
तेनैवसहितस्तूर्णंजगाममथुरांपुरीम् ३७
बलैराच्छाद्यपृथिवींनानाजनपदान्विताम्
संनिवेश्यमहासैन्यंरुरोधमथुरांपुरीम् ३८
कृष्णोऽपिचिंतयित्वाऽथपौराणांकुशलंतदा
ययाचेसागरंभूमिंनिवासार्थंजनस्यच ३९
त्रिंशद्योजनविस्तीर्णांददौकृष्णस्यसागरः
असृजत्पयसांमध्येतत्रद्वारवतींपुरीम् ४०
बहुप्रासादसंयुक्तांहेमप्राकारतोरणाम्
नानामणिमयैर्दिव्यैर्गृहपंक्तिभिरावृताम् ४१
उद्यानैश्चतथारम्यैस्तडागैर्बहुभिर्युताम्

अ्रसृजत्पुंडरीकाक्षोयथेंद्रस्यामरावतीम् ४२
सुषुप्तान्मथुरायांतुपौरांस्तत्रजनार्दनः
उद्धृत्यसहसारात्रौद्वारावत्यांनिवेशयत् ४३
प्रबुद्धास्तेजनाःसर्वेपुत्रदारसमन्विताः
हेमहर्म्यतलेविष्टाविस्मयंपरमंययुः ४४
बहुभिर्धनधान्यैश्चदिव्यवस्त्रविभूषणैः
परिपूर्णैरिवाभोगैर्गृहमुख्यैःसमावृताः ४५
तस्मिन्प्रहृष्टाःसंतस्थुर्दिविदेवगणाइव
यवनेनतदायोद्धुंरामकृष्णौमहाबलौ ४६
विनिर्ययतुरात्मेशौमथुरायाबहिस्तदा
रामोलांगलमादायमुशलंचमहारथः ४७
जघानसमरेक्रुद्धोयवनानांमहद्बलम्
कृष्णस्तुशार्ङ्गमासज्यवाणैरग्निशिखोपमैः ४८
निर्ददाहबलंसर्वंम्लेच्छानांदेवकीसुतः
निहतंस्वबलंदृष्ट्वासकालयवनोबली ४९
युयुधेवासुदेवेनगदयायवनेश्वरः
कृष्णोऽपिकदनंतेनकृत्वाचिरमनामयः ५०
विमुखःप्राद्रवत्तस्मात्संग्रामात्कमलेक्षणः
सोनुयातोऽतिवेगेनतिष्ठतिष्ठेतिचाब्रुवन् ५१
वेगात्कृष्णोगिरिगुहांप्रविवेशमहामतिः
तत्रप्रसुप्तोराजाऽसौमुचुकुंदोमहामुनिः ५२
अ्रदृश्यस्तस्यनृपतेःसंस्थितोभगवान्हरिः
यवनोऽपिमहावीरोगदामुद्यम्यपाणिना ५३
कृष्णंहंतुसमारब्धोगुहांतांप्रविवेशह
दृष्ट्वाशयानंराजानंमत्वाकृष्णंजनार्दनम् ५४
पादेनताडयामासमुचुकुंदंमहामुनिम्
ततःप्रबुद्धोभगवान्मुचुकुंदोमहामुनिः ५५
क्रोधात्संरक्तनयनोहुंकारंकृतवानसौ
तस्यहुंकारशब्देनतथाक्रोधनिरीक्षणात् ५६
निर्दग्धोभस्मतांप्रापयवनस्त्यक्तजीवितः

ततस्तुकृष्णोददृशेराजर्षेःपुरतःप्रभुः ५७
नीलोत्पलदलश्यामः पुंडरीकनिभेक्षणः
शंखचक्रगदापाणिः पीतवासाजनार्दनः ५८
दृष्ट्वातंसहसोत्थायराजर्षिरमितौजसम्
अहोभाग्यमहोभाग्यमित्युवाचमहामुनिः ५९
पुलकांकितसर्वांगःसानंदाश्रुजलाकुलः
स्तुवन्वैजयशब्देनप्रणनाममुहुर्मुहुः ६०
मुचुकुंदउवाच-
धन्योस्मिकृतकृत्योस्मिदर्शनात्परमेश्वर
अद्यमेसफलंजन्मजीवितंसफलंमम ६१
नमस्तेवासुदेवायजगन्नाथायशार्ङ्गिणे
दामोदरायदेवायतेजसांनिधयेनमः ६२
अधोक्षजायहरयेनृसिंहवपुषेनमः
राघवायनमस्तुभ्यंपुंडरीकेक्षणायच ६३
अच्युतायाविकारायतथानंतायतेनमः
गोविंदायनमस्तुभ्यंविष्णवेजिष्णवेनमः ६४
नारायणाय श्रीशायकृष्णायपरमात्मने
मुकुंदायनमस्तुभ्यंचतुर्व्यूहायतेनमः ६५
नमः परमकल्याणनमस्तेपरमात्मने
वासुदेवायशांताययदूनांपतयेनमः ६६
महेश्वरउवाच-
एवंस्तुत्वातुगोविंद्रंप्रणनामपुनः पुनः
संतुष्टोभगवान्प्राहमुचुकुंदंमहामुनिम् ६७
श्रीभगवानुवाच-
वरंवृणीष्वराजर्षेयत्तेमनसिवर्त्तते
महेश्वरउवाच-
सोऽपिमुक्तिंययाचाथपुनरावृत्तिवर्जिताम् ६८
तस्मैददौतदाकृष्णोदिव्यंलोकंसनातनम्
राजातुमानुषंरूपंविहायाथमहामतिः ६९
समानंरूपमास्थायदेवस्यपरमात्मनः

वैनतेयंसमारुह्यशाश्वतंपदमाविशत् ७०
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
उमाहेश्वरसंवादे श्रीकृष्णचरितेमुचुकुंदमोक्षोनाम
षट्चत्वारिंशदधिकद्विशततमोऽध्यायः २४६

सप्तचत्वारिंशदधिक द्विशततमोऽध्यायः

रुद्रउवाच-
हत्वाथयवनंतत्रमुचुकुंदेनधीमता
दत्त्वातस्मैवरंमुक्तिंनिष्क्रांतोयदुनंदनः १
हतंचयवनंश्रुत्वाजरासंधःसुदुर्मतिः
ययुधेरामकृष्णाभ्यांस्वबलेनसमावृतः २
कृष्णेननिहतंसैन्यंसर्वंतस्यदुरात्मनः
सपपातमहीपृष्ठेमूर्च्छितोमगधाधिपः ३
चिरेणलब्ध्वासंज्ञांतुविह्वलांगोभयातुरः
नशशाकरणेयोद्धुंरामेणमगधेश्वरः ४
विमुखःप्राद्रवत्तूर्णंहतशेषबलानुगः
अजेयावितितौमत्वारामकृष्णौमहाबलौ ५
तयोर्विरोधंत्यक्त्वाथनगरींस्वांविवेशह
अथतौवसुदेवस्यतनयौसहसेनया ६
मथुरांत्यज्यनगरींप्रविष्टौद्वारिकांपुरीम्
इंद्रेणप्रेषितोवायुःसभांतत्रदिवौकसाम् ७
कृष्णायप्रददौप्रीत्यानिर्मितां विश्वकर्मणा
वज्रवैडूर्यरचितांब्रह्मासनविचित्रिताम् ८
नानारत्नमयैर्दिव्यैः स्वर्णच्छत्रैर्विराजिताम्
तांप्राप्यरम्यांतुसभामुग्रसेनादयोनृपाः ९
मोदंतेनैगमैः सार्द्धंदिविदेवगणाइव
इक्ष्वाकुवंशसंभूतोरैवतोनामपार्थिवः १०
कन्यांदुहितरंस्वस्यसर्वलक्षणसंयुताम्
रामायप्रददौप्रीत्यारेवतीनामनामतः ११
उपयेमेविधानेनसरामस्तांचरेवतीम्

रमयामासचतयाशच्याइवसुरेश्वरः १२
विदर्भराजोधर्मात्माभीष्मकोनामधार्मिकः
वभूवुस्तस्यपुत्रास्तुरुक्मप्रभृतयः शुभाः १३
तेषामवरजाकन्यारुक्मिणीवरवर्णिनी
कमलांशेनसंभूतासर्वलक्षणसंयुता १४
राघवत्वेभवत्सीतारुक्मिणीकृष्णजन्मनि
अन्येष्वेवावतारेषुविष्णोरेषासहायिनी १५
हिरण्यकहिरण्याक्षौसंभूतौद्वापरेपुनः
शिशुपालोदंतवक्त्रइतिनामसमन्वितौ १६
चैद्यान्वये समुद्भूतौ महाबलपराक्रमौ
रुक्मिणीशिशुपालायदातुमैच्छत्तदात्मजः १७
तंनेच्छतीपतिंसातुशिशुपालंशुभानना
बाल्यात्प्रभृतिवैविष्णुमनुरक्तादृढव्रता १८
उद्दिश्यकृष्णंभर्त्तारंसुराणामर्चनंसदा
चकाररुक्मिणीकन्यादानानिविविधानिच १९
व्रतचर्यापराभूत्वाध्यायंतीपुरुषोत्तमम्
आत्मेशंस्वस्यभर्तारमुवासपितृमंदिरे २०
कर्त्तुंतांशिशुपालायविवाहंपार्थिवोत्तमः
चकारयत्नंपुत्रेणरुक्मिणासविधीमता २१
पुरोहितसुतंविप्रंप्रेषयामासरुक्मिणी
उद्दिश्यकृष्णंभर्त्तारंसतूर्णंद्वारकांययौ २२
समेत्यकृष्णंरामंचताभ्यांविधिवदर्चितः
एकांतेसर्वमाचष्टरुक्मिणीभाषितं तयोः २३
तच्छ्रुत्वारामकृष्णौतुतेनविप्रेणधीमता
सर्वशस्त्रास्त्रसंपूर्णंरथमाकाशगंप्रभुः २४
आरुह्यसूतमुख्येनदारुकेणमहात्मना
विदर्भनगरींतूर्णंजग्मतुः पुरुषोत्तमौ २५
राजानः सर्वराष्ट्रेभ्योविवाहंद्रष्टुमागताः
जरासंधमुखाः सर्वेशिशुपालस्यधीमतः २६
तस्मिन्नुद्वाहसमयेरुक्मिणीरुक्मभूषणा

दुर्गांनिःसृतार्चयितुंसखीभिर्नगराद्बहिः २७
एतस्मिन्नेवकालेतुसंप्राप्तोदेवकीसुतः
रथस्थांतांचजग्राहबलावान्मधुसूदनः २८
सहसारथमारोप्यययौतूर्णंस्वमालयम्
ततः क्रोधसमाविष्टाजरासंधमुखानृपाः २९
रुक्मिणाराजपुत्रेणयुद्धायसमुपस्थिताः
अनुयाताहरिंक्रुद्धाश्चतुरंगबलान्विताः ३०
बलभद्रोमहावाहुरवरुह्यरथोत्तमात्
लांगलंमुशलंगृह्यनिजघानक्षणादरीन् ३१
रथानश्वान्महानागांस्तथापादचरानपि
लांगलमुशलाभ्यांवैनिजघानबलाद्रणे ३२
तस्यलांगलपातेनचूर्णितारथपंक्तयः
नागाश्चपतिताभुमौवज्रेणेवमहीधराः ३३
निर्भिन्नमस्तकाः सर्वेवमंतोरुधिरंवहु
क्षणेनैवहतंसैन्यंबलरामेणवैतदा ३४
साश्वंसनागंसरथंसपदातिंमहारणे
समंतात्समरेतत्रसुस्त्रुवुः शोणितापगाः ३५
प्रभग्नाः पार्थिवाःसर्वेदुद्रुवुर्भयपीडिताः
कृष्णेनकदनंचक्रेरुक्मीक्रोधवशाद्बली ३६
धनुरुद्यम्यबाणौघैस्ताडयामासाशार्ङ्गिणम्
ततः प्रहस्यगोविंदः शार्ङ्गमादायलीलया ३७
जघानैकेनबाणेनरथाश्वांस्तस्यसारथिम्
रथंध्वजंपताकांचचिच्छेदधरणीधरः ३८
विरथः खड्गमादायधरगयांसउपस्थितः
कृष्णस्तुखड्गंचिच्छेदबाणेनैकेनवीर्यवान् ३९
ततः समुष्टिमुद्यम्यकृष्णंवक्षस्यताडयत्
तंजग्राहरणेवीरंनिबध्यनिबिडंहरिः ४०
तीक्ष्णंक्षुरप्रमादायप्रहसन्मधुसूदनः
शिरसोमुंडनंकृत्वामुमोचचजनार्दनः ४१
सतुशोकसमाविष्टोनिःश्वसन्नुरगोयथा

आविवेशपुरंस्वीयंसतुतत्रैवचावसत् ४२
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
उमामहेश्वरसंवादे श्रीकृष्णचरितेविदर्भसेनाविध्वंसनंनाम
सप्तचत्वारिंशदधिकद्विशततमोऽध्यायः २४७

अष्टचत्वारिंशदधिकद्विशततमोऽध्यायः

रुद्रउवाच-
अथकृष्णस्तुरामेणरुक्मिरायादारुकेणच
दिव्यंस्यंदनमारुह्ययौतूर्णंस्वमालयम् १
ततः प्रविश्यनगरींद्वारकांदेवकीसुतः
शुभेह्निशुभलग्नेवैवेदोक्तविधिनाहरिः २
उपयेमेनृपसुतांरुक्मिणींरुक्मभूषिताम्
तस्मिन्नुद्वाहसमयेदेवदुंदुभयोदिवि ३
विनेदुःपुष्पवर्षाणिववृषुः सुरसत्तमाः
वसुदेवोग्रसेनौचतथाक्रूरोयदूत्तमः ४
बलभद्रोमहातेजायेचान्येयदुपुंगवाः
चक्रुःकृष्णस्यरुक्मिरायाविवाहंसुसुखंयथा ५
नंदगोपोथगोपालैर्गोपवृंदैःसमागतः
स्वलंकृताभिर्योषाभिर्यशोदाचसमागता ६
वसुदेवस्त्रियःसर्वादेवकीप्रमुखास्तथा
रेवतीरोहिणीदेवीयाश्चान्याः पुरयोषितः ७
सर्वारयुद्वाहकर्माणिचक्रुर्हर्षसमन्विताः
सुराणामर्चनंप्रीत्याकर्त्तव्यंतत्रदेवकी ८
वृद्धाभिर्नृपयोषिद्भिश्चकारविधिनातदा
सर्वमौद्वाहिकंकर्मउत्सवंहिद्विजोत्तमैः ९
ब्राह्मणान्भोजयामासवस्त्रैराभरणैःशुभैः
उग्रसेनादयस्तत्रराजानश्चसुपूजिताः १०
नंदगोपादयोगोपायशोदाद्याश्चयोषितः
बहुभिःस्वर्णरत्नाद्यैर्वासोभिः सविभूषणैः ११
पूजिताः संप्रहृष्टास्तेतद्विवाहमहोत्सवे

तौदंपतीसमाश्लिष्यप्रणतौजातवेदसम् १२
वेदविद्भिर्विप्रमुख्यैराशीर्भिरभिनंदितौ
तस्यांविवाहवेद्यांतुशुशुभाते वधूवरौ १३
ब्राह्मणेभ्योऽथवृद्धेभ्योराजन्यः सहभार्य्यया
ववंदेदेवकीपुत्रोज्येष्ठस्यभ्रातुरेवच १४
एवमौद्वाहिकंसर्वंनिर्वर्त्यमधुसूदनः
व्यसर्जयन्नृपान्सर्वान्येचतत्रसमागताः १५
प्रस्थिताहरिणातत्रपूजितानृपपुंगवाः
ब्राह्मणाःसुमहात्मानोनिर्ययुः स्वकमालयम् १६
रुक्मिगयासहधर्मात्मादेवकीनंदनोऽव्ययः
उवाससुसुखेनैवदिव्यहर्म्यतलेशुभे १७
तयावैरमयामासनारायणइवश्रिया
संस्तूयमानोमुनिभिर्दिविदेवगणैरपि १८
अहन्यहनिहृष्टात्मासुखेनैवजनार्दनः
अथोवाससुशोभायांद्वारवत्यांसनातनः १९

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
उमामहेश्वरसंवादे श्रीकृष्णचरितेरुक्मिणीविवाहकथनंनाम
अष्टाचत्वारिंशदधिकद्विशततमोऽध्यायः २४८

एकोनपञ्चाशदधिक द्विशततमोऽध्यायः

श्रीरुद्रउवाच-
सत्राजितस्यतनयानाम्नासत्यायशस्विनी
पृथिव्यंशेनसंभूताभार्याकृष्णस्यवापरा १
वैवस्वतीमहाभागाकालिंदीनामनामतः
तृतीयातस्यभार्यासालीलांशासमुपस्थिता २
विंदानुविंदस्यसुतांमित्रविंदांशुचिस्मिताम्
स्वयंवरस्थितांकन्यामुपयेमेजनार्दनः ३
पाशेनैकेनबद्धातान्वृषभान्सप्तदुर्मदान्
तांवीर्यशुल्कांजग्राहपद्मपत्रायतेक्षणः ४
सत्राजितोमहारत्नंस्यमंताख्यंमहीपतिः

अनुजायददौसोऽयप्रसेनायमहात्मने ५
ययाचेतंमणिवरंकदाचिन्मधुसूदनः
उवाचवासुदेवंतंप्रसेनः प्रसभंतदा ६
प्रसेनउवाच-
भारानष्टसुवर्णानित्यंप्रसवतेमणिः
तस्मात्कस्यनदातव्यंस्यमंताख्यमिदंमया ७
महादेवउवाच-
कृष्णस्तुतदभिप्रायंज्ञात्वातूष्णीमुवासह
कदाचिन्मृगयांकर्त्तुंकृष्णःसर्वैर्यदूत्तमैः ८
प्रविवेशमहारण्यंप्रसेनाद्यैर्महाबलैः
प्रत्येकंवैमृगान्हंतुमनुयाताः सहस्रशः ९
एकएवमहारण्येप्रसेनोदूरमागतः
तंसिंहोदृष्टमासाद्यहत्वारत्नंजहारसः १०
तंसिंहंजांबबान्हत्वामणिंगृह्यमहाबलः
प्रविवेशबिलंतूर्णंदिव्यस्त्रीभिर्निषेवितम् ११
तस्मिन्नस्तंगतेसूर्येवासुदेवं सहानुगः
चतुर्थ्यामुदितंचंद्रंदृष्ट्वास्वंपुरमाविशत् १२
ततः सर्वेपुरजनाःकृष्णंप्रोचुःपरस्परम्
हत्वाप्रसेनंगोविंदोमृगव्याजेनकानने १३
स्यमंतकंमणिवरमग्रहीदविशंकया
तदाकर्ण्यहरिस्तस्मिन्द्वारकाजनभाषितम् १४
अज्ञलोकभयात्सर्वैर्यदुभिर्गहनंययौ
दर्शयामासतान्सर्वान्सिंहेननिहतंवने १५
लब्धात्मशुद्धिस्तत्रैवसंस्थाप्यमहतींचमूम्
एकःशार्ङ्गगदापाणिर्जगामगहनंवनम् १६
दृष्ट्वामहाबिलंकृष्णःप्रविवेशविशंकितः
तत्रनानामणिवरद्योतितेविमलेगृहे १७
सुतंजांबवतोधात्रीदोलामारोप्यलीलया
दोलामुखेमणिंधृत्वादोलयन्गायतीमुदा १८
सिंहःप्रसेनमवधीत्सिंहोजांबवताहतः

सुकुमारकमारोदीस्तवह्येषस्यमंतकः १९
तच्छ्रुत्वावासुदेवोऽथशंखंदध्मौप्रतापवान्
तेननादेनमहतानिर्जगामात्रजांबवान् २०
तयोर्युद्धमभूद्धोरंदशरात्रंनिरंतरम्
मुष्टिभिर्वज्रकल्पैश्चसर्वभूतभयावहम् २१
कृष्णस्यबलवृद्धिंचतथात्मबलसंक्षयम्
अवेक्ष्यपूर्ववचनंबुबुधेपरमात्मनः २२
सोऽयरामोऽवतीर्णोऽत्रधर्मत्राणायवैपुनः
सआगतोममस्वामीदातुंममनोरथम् २३
एवंज्ञात्वाथऋक्षेशोनिर्बर्त्यरणकर्मतत्
प्रांजलिप्राहगोविंदंकोभवानितिविस्मयात् २४
निवर्त्यकदनंशौरिःप्रोचेगंभीरयागिरा
श्रीकृष्णउवाच–
पुत्रोऽहवसुदेवस्यवासुदेवइतीरितः २५
ममरत्नंस्यमंताख्यंहृतवांस्त्वंसुनिर्भयः
तद्दीयतांचशीघ्रंमेअन्यथावधमेष्यसि २६
महादेवउवाच–
तच्छ्रुत्वाजांबवान्हृष्टः प्रणनामाथदंडवत्
परिणीयनमस्कृत्यविनयात्प्राहकेशवम् २७
जांबवानुवाच–
धन्योस्मिकृतकृत्योस्मितवसंदर्शनात्प्रभो
दासोऽह पूर्वभावेनतवदेवकिनंदन २८
दत्तवानसिगोविंदकदनंपूर्वकांक्षितम्
मयेदंकदनंमोहाद्यत्कृतंस्वामिनात्वया
तत्क्षम्यतांजगन्नाथकरुणाकरशाश्वत २९
महादेवउवाच–
इत्युक्त्वाप्रणतोभूत्वानमस्कृत्यपुनः पुनः
नानारत्नमयेपीठेनिवेश्यविनयात्प्रभुम् ३०
शारदाब्जनिभौपादौप्रक्षाल्यशुभवारिणा
मधुपर्कविधानेनपूजयित्वायदूद्वहम् ३१

वस्त्रैराभरणैर्दिव्यैःपूजयित्वाविधानतः
पुत्रींजांबवतींनामकन्यांलावरायसंयुताम् ३२
कन्यारत्नंददौतस्मैभार्यार्थममितौजसे
अन्यैश्चमणिमुख्यैश्चस्यमंताख्यंददौमणिम् ३३
तत्रैवोद्वाह्यतांकन्यांप्रहृष्टपरवीरहा
ददौतस्मैपरांमुक्तिंप्रीत्याजांबवतेहरिः ३४
गृहीत्वातनयांतस्यकन्यांजांबवतींमुदा
विनिर्गत्यबिलात्तस्मात्प्रययौद्वारकांपुरीम् ३५
सत्राजितेददौरत्नंस्यमंताख्यंयदूत्तमः
दुहित्रेप्रददौसोऽपिकन्यायैमणिमुत्तमम् ३६
मासिभाद्रपदेशुक्लेचतुर्थ्यांचंद्रदर्शनम्
मिथ्याभिदूषणंप्राहुस्तस्मात्तत्परिवर्जयेत् ३७
प्राप्यतेदर्शनंतत्रचतुर्थ्यांशीतगोर्नरः
स्यमंतस्यकथांश्रुत्वामिथ्यावादात्प्रमुच्यते ३८
सुलक्ष्मणांनाग्नजितींसुशीलांचयशस्विनीम्
मद्रराजसुतास्तिस्त्रःकन्यकास्ताःशुभाननाः ३९
स्वयंवरस्थास्ताःकृष्णंवरयामासुरुज्ज्वलाः
एकस्मिन्दिवसेतास्तुउपयेमेयदूद्वहः ४०
अष्टौमहिष्यस्ताः सर्वारुक्मिरयाद्यामहात्मनः
रुक्मिणीसत्यभामाचकालिदीचशुचिस्मिता ४१
मित्रविंदाजांबवतीनाग्नजित्यःसुलक्ष्मणा
सुशीलानामतन्वंगीमहिषीचाष्टमीस्मृता ४२
भूमिपुत्रोमहावीर्योनरकोनामराक्षसः
जित्वादेवपतिंशक्रंसर्वांश्चैवसुरान्रणे ४३
अदित्यादेवमातुश्चकुंडलेचसुवर्चसी
बलाज्जग्राहदेवानांरत्नानिविविधानिच ४४
एरावतंमहेंद्रस्यतथैवोच्चैःश्रवंहयम्
माणिक्यादिधनेशस्यशंखपद्मनिधिंतथा ४५
स्त्रियश्चाप्सरसश्चैवहृतवान्दितिनदंनः
वज्रादिहेतीस्तेषांचबलाद्धृत्वादिवौकसाम् ४६

तैरेवससुरान्हत्वासभांमयविनिर्मिताम्
उवासव्योमगोदिव्योनगर्यांविमलेंबरे ४७
ततोदेवगणाः सर्वेपुरस्कृत्यशचीपतिम्
भयार्ताःशरणंजग्मुः कृष्णमक्लिष्टकारिणम् ४८
कृष्णोऽपितदुपश्रुत्यसर्वंनरकचेष्टितम्
देवानामभयंदत्वावैनतेयंव्यचिंतयत् ४९
तस्मिन्क्षणेहरेस्तस्यवैनतेयोमहाबलः
प्रांजलि पुरतस्तस्थौसर्वदेवनमस्कृतः ५०
तमारुह्यद्विजश्रेष्ठंसत्ययासहकेशवः
संस्तूयमानोमुनिभिः प्रययौराक्षसालयम् ५१
प्रदीप्यमानमाकाशेयथासूर्यस्यमंडलम्
राक्षसैर्बहुभिर्युक्तंदिव्यैराभरणैर्युतम् ५२
ददर्शतत्पुरंकृष्णोदुर्भेद्यंत्रिदशैरपि
तदावरणानिभगवान्वीक्ष्यचक्रेणवीर्यवान् ५३
चिच्छेदतेजसादीप्त्यातमांसिचदिवाकरः
ततस्तेराक्षसाःसर्वेशतशोऽथसहस्रशः ५४
उद्यम्यशूलानितदायुद्धायाभिमुखंययुः
ततस्तुतोमरैर्दिव्यैर्भिण्डपालैःसुपट्टिशैः ५५
केशवंताडयामासुः पलालैरिवपावकम्
ततस्तु शार्ङ्गमादायभगवान्गारुडध्वजः ५६
दिव्यशस्त्राणिचिच्छेदबाणैरग्निशिखोपमैः
तेषांशिरोधरानागानश्वांश्चैवतरस्विनः ५७
चक्रेणैवप्रचिच्छेदवीर्यवान्पुरुषोत्तमः
केचिच्चक्रेणसंछिन्नास्तथान्येशरताडिताः ५८
गदयानिहताः केचिद्राक्षसास्तद्रणाजिरे
एवंतेराक्षसाःसर्वेपातिताधरणीतले ५९
शक्रोत्सृष्टेनवज्रेणनिर्भिन्नाइवभूधराः
निहत्यदानवान्सर्वान्पुंडरीकायतेक्षणः ६०
पाञ्चजन्यंमहाशंखंप्रदध्मौपुरुषोत्तमः
ततःसनरकोदैत्योधनुरादायवीर्यवान् ६१

दिव्यंस्यंदनमारुह्ययौयुद्धायकेशवम्
तयोर्युद्धमभूद्धोरंतुमुलंलोमहर्षणम् ६२
बहुभिर्बाणसाहस्रैर्मेघयोरिववर्षतोः
ततोऽर्द्धचंद्रबाणेनवासुदेवःसनातनः ६३
तस्यराक्षसमुख्यस्यधनुश्चिच्छेदवीर्यवान्
ससर्जास्त्रंमहादिव्यंनरकस्यमहोरसि ६४
सतेनभिन्नहृदयःपपातोर्व्यांमहासुरः
शक्रवज्रेणनिर्भिन्नोमहाचलइवोन्नदन् ६५
उपगम्यततः कृष्णःसमीपंतस्यरक्षसः
भूम्यासंप्रार्थितः प्राहवरंवृणिवतिराक्षसम्
सचाहराक्षसःकृष्णंगरुडोपरिसंस्थितम् ६६
नमेकृत्यंवरेणास्तिनरकोऽहतथापिच
अन्यलोकहितार्थायवृणेऽहवरमुत्तमम् ६७
मृताहनितुमेकृष्णसर्वभूतेश्वरेश्वर
येनरामंगलस्नानंकुर्वंतिमधुसूदन
नतेषांनिरयप्राप्तिर्भवत्वेवंभयापह ६८
महादेवउवाच-
एवमस्त्वितिगोविंदोददौतस्मैवरंप्रभुः
ततः पश्यन्हरेः साक्षाच्छरदंबुजसन्निभौ ६९
चरणौवज्रवैडूर्य्यनूपुराभ्यांविराजितौ
अर्चितौविधिरुद्राद्यैस्त्रिदशैर्मुनिभिस्तथा ७०
त्यक्त्वाप्राणान्महीपुत्रःसारूप्यमगमद्धरेः
ततोदेवगणाःसर्वेहर्षनिर्भरमानसाः ७१
ववृषुःपुष्पवर्षाणितुष्टुवुश्चमहर्षयः
प्रविश्यनगरंतस्यकृष्णःकमललोचनः ७२
बलात्तेनगृहीतानिरत्नानित्रिदिवौकसाम्
कुंडलेदेवमातुश्चतथैवोच्चैःश्रवोहयम् ७३
एरावतंगजश्रेष्ठंप्रदीप्तंमणिपर्वतम्
सर्वमेतद्यदुश्रेष्ठोददौशक्रायवज्रिणे ७४
पार्थिवान्सर्वराष्ट्रेभ्योजित्वाऽसौ नरकोवली

कन्याषोडशसाहस्त्रंहृतवान्नरकस्तदा ७५
सन्निरुद्धास्तुताःसर्वानरकांतःपुरेतदा
दृष्ट्वाकृष्णंमहावीर्यंकंदर्पशतसंनिभम् ७६
भर्तारंवव्रिरेसर्वा पतिंविश्वस्यसर्वगम्
एतस्मिन्नेवकालेतुगोविंदोऽनतरूपवान् ७७
तासांकरग्रहंचक्रेविधिनापुरुषोत्तमः
नरकस्यसुताः सर्वेपुरस्कृत्यमहींतदा ७८
गोविंदंशरणंजग्मुस्तानरक्षद्घृणानिधिः
तद्राज्येस्थाप्यतान्सर्वान्पृथिव्यावाक्यगौरवात् ७९
एंद्रंविमानमारोप्यताश्चसर्वावरस्त्रियः
देवदूतैर्महाभागैर्द्वारवत्यांन्यवेशयत् ८०
वैनतेयंसमारुह्यसत्ययासहकेशवः
स्वर्लोकंप्रययौतूर्णंद्रष्टुंतांदेवमातरम् ८१
प्रविश्यनगरींतत्रदेवराज्ञोजनार्दनः
अवरुह्यद्विजश्रेष्ठात्पत्न्यासहमहाबलः ८२
ववंदेमातरंतत्रवंद्यांतांत्रिदिवौकसाम्
संपरिष्वज्यबाहुभ्यामदितिः पुत्रवत्सला ८३
निवेश्यासनमुख्येतुपूजयामासभक्तितः
आदित्यावसवोरुद्राःशतक्रतुपुरोगमाः ८४
तत्रसंपूजयामासुर्यथार्हंपरमेश्वरम्
शचीगृहंसमागम्यसत्यभामायशस्विनी ८५
तयासमर्चितादेव्यासमासीनासुखासने
तस्मिन्कालेसुपुष्पाणिपारिजातस्यकिंकराः ८६
शच्यैदेव्यैददुःप्रीत्यासहस्त्राक्षेणचोदिताः
प्रगृह्यतानिपुष्पाणिशचीदेवीसुमध्यमा ८७
नीलनिर्मलकेशेचबबंधस्वस्यमूर्धनि
अवमान्यशचीतत्रसत्यभामांयशस्विनीम् ८८
अनर्हामानुषीचेयंदेवार्हंकुसुमंशुभम्
इतिकृत्वामतिंतस्यैनददौकुसुमानिसा ८९
विनिष्क्रम्यपुरात्तस्मात्सत्याकोपसमन्विता

समेत्यकृष्णंभर्त्तारमुवाचकमलेक्षणा ९०
सत्योवाच-
एषाशचीयदुश्रेष्ठपारिजातेनगर्विता
अदत्त्वाममगोविंदबबंधस्वस्यमूर्द्धनि ९१
महादेवउवाच-
सत्ययाभाषितंश्रुत्वावासुदेवोमहाबलः
उत्पाट्यपारिजातंतुनिवेश्यगरुडोपरि ९२
आरुह्यसत्ययातूर्णंवैनतेयंमहाबलम्
प्रययौद्वारकांरम्यांनगरींदेवकीसुतः ९३
ततःकोपसमाविष्टोदेवराजःशतक्रतुः
रुद्रैर्वसुभिरादित्यैःसाध्यैश्चमरुतांगणैः ९४
एरावतंसमारुह्ययययौयुद्धायकेशवम्
ततोदेवगणाः सर्वेपरविर्य्यजनार्दनम् ९५
ववृषुःशस्त्रवर्षाणिमेघाइवमहाचलम्
कृष्णश्चिच्छेदचक्रेणतान्यस्त्राणिदिवौकसाम् ९६
वैनतयस्तुसंक्रुद्धःपक्षपातेनवीर्यवान्
पातयामासतान्देवान्पलालानीवमारुतः ९७
ततः क्रुद्धःसहस्राक्षोदेवानामीश्वरःप्रभुः
मुमोचसहसादीप्तंवज्रंकृष्णजिघांसया ९८
जग्राहकृष्णस्तंवज्रंहस्तेनैकेनलीलया
ततोभीतः सहस्राक्षोनागेंद्रादवरुह्यसः ९९
प्रांजलिपुरतः स्थित्वानमस्कृत्वाजनार्दनम्
प्राहगद्गदयावाचास्तुत्वास्तुतिभिरेवच १००
इंद्रउवाच-
देवयोग्यमिदंकृष्णपारिजातंत्वयापुरा
दत्तोममसुराणांचकथंस्थास्यतिमानुषे १०१
महादेवउवाच-
ततः प्रोवाचभगवान्सहस्राक्षमुपस्थितम्
शच्यावमानितासत्यातवगेहेसुरेश्वर १०२
अदत्त्वापारिजातानिसत्यायैसापुलोमजा

स्वयमेवस्वशिरसिधारयामासतेप्रिया १०३
अस्यानिमित्तंदेवेंद्रपारिजातोहृतोमया
अस्यैप्रतिश्रुतंदातुंमयासुरगरोश्वर १०४
तवगेहेपारिजातंस्थापयामीतिवासव
तस्माद्द्यनदातव्यःपारिजातः सुरेश्वर १०५
देवतानांहितार्थायप्रापयिष्यामिभूतले
तावत्तिष्ठतुदेवेंद्रपारिजातोममालये १०६
मयिस्वर्गंगतेशक्रगृहाणत्वंयथेच्छया
महादेवउवाच-
एवमुक्त्वायदुश्रेष्ठस्तस्मैवज्रंददौस्वयम् १०७
एवमस्त्वितिगोविंदंनमस्कृत्यसवज्रभृत्
प्रययौस्वपुरंदिव्यंसहदेवगरौर्वृतः १०८
कृष्णोऽपिसत्ययादेव्यागरुडोपरिसंस्थितः
संस्तूयमानोमुनिभिर्द्वारवत्यांविवेशह १०९
सत्ययानिकटेस्थाप्यपारिजातंसुरद्रुमम्
रमयामासभार्याभिःसर्वाभिःसर्वगोहरिः ११०
निशासुतासांसर्वासांगृहेषुमधुसूदनः
विश्वरूपधरः श्रीमानुवाससुखप्रदः १११

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
उमामहेश्वरसंवादे श्रीकृष्णचरितेश्रीवासुदेवविवाहकथनं
नामैकोनपंचाशदधिकद्विशततमोऽध्यायः २४९

पञ्चाशदधिक द्विशततमोऽध्यायः

श्रीरुद्रउवाच-
रुक्मिरायांकृष्णस्यप्रद्युम्नोमदनांशेनजज्ञे १
असौ मदनशंभूतोमहाबलः शंबरंजघ्निवान् २
तस्यरुक्मिराःसुतायामनिरुद्धोजज्ञे ३
सोऽपिबारापुत्रीमुषांनामकन्यामुपयेमे ४
सातुस्वप्नेनीलोत्पलदलश्यामंपुंडरीकनिभेक्षणं
महाबाहुंविचित्राभरणोपेतंषोडशसमायथावदुपभुज्यप्रबुध्यतंपुरतोनदृष्ट्वा

मदनेनपीडिताभ्रांत
चित्तामांतुत्यक्त्वावयस्कंरक्तारविंदवक्त्रंक्वासिक्वयासीतिबहुधाविललाप ५
ततस्तस्याः सखीचित्रलेखेतिनाम कन्यांतादृशीम
वस्थांगतांविलोक्यकिंनिमित्तविभ्रांतचित्तासीतिपप्रच्छ ६
सापिस्वप्रलब्धंपतिंयथावदाचष्ट ७
सापिसकलदेवमानुषादिश्रेष्ठान्पटेविलिख्यतस्यैदर्शयामास ८
यदुवंशसंभूतान्कृष्णसंकर्षणप्रद्युम्नानिरुद्धादीनपिसम्यङिनवेदयामास ९
सातेषांकृष्णमनुमान्यप्रद्युम्नानंतरमनिरुद्धंदृष्ट्वासइत्येषइत्यालिलिग १०
अथचित्रलेखाबह्वीभिर्मायावतीभिर्दैत्यस्त्रीभिर्द्वारवतींगत्वारात्रावंतःपुरेसुप्तमनिरुद्धं
दृष्ट्वागृहीत्वामोहयित्वामाहिष्मत्यांबाणस्यांतः
पुरेचैत्यप्रासादादियुक्तेतस्याबाणपुत्र्याः
शय्यायांचिक्षेप ११
सोऽपिप्रबुद्धोतिरम्येऽनगपावकेसंस्थितामुषांसर्वलक्षणलक्षितांविचित्राभरणवसनगंध
माल्यालंकृतांकांचनवर्णांसुकेशींसुजातस्तनींदृष्ट्वागाढमालिग्यकरिण्या
गंधहस्तीवतयातिप्रीतिसंयुक्तयायथासुखंरमयामास १२
एवंमासमात्रंनिरंतरतयानिरुद्धंरममाणंकदाचिदंतःपुरनिवासिन्योवृद्धादैत्यस्त्रियोज्ञात्वारा
ज्ञेनिवेदयामासुः १३
सराजाक्रोधताम्राक्षः परंविस्मयंगत्वातमिहानयतेतिपुरः किंकरान्प्रेषयामास १४
तेऽपितूर्णंनृपप्रासादमारुह्यराजपुत्र्याःशयनेसंस्थितमनिरुद्धंग्रहीतुमाजग्मुः १५
सतान्समारब्धान्दृष्ट्वाप्रासादस्तंभमेकंहेलयोत्पाट्यनियुतसंख्याकान् किंकरान्मु
हूर्तमात्रणैवस्तंभेनचूर्णितमात्रंचकार १६
अथदैत्यपतिर्निहतान्किंकरान्दृष्ट्वाकौतूहलंगत्वाअसौश्रीकृष्णपौत्रइतिदेवर्षिणाप्रोक्तो
धनुरादायस्वयमेवानिरुद्धंग्रहीतुंतत्समीपमाजगाम १७
अनिरुद्धोऽपियोद्धुमायांतंसहस्रबाहुंराजानंदृष्ट्वातत्परिघं

भ्रामयित्वाबाणस्योपरिचिक्षेप १८
स्वचापनिर्मुक्तेनबाणेनतंपरिघंचिच्छेद १९
अनंतरमुरगास्त्रेणअनिरुद्धंनिबिडंबद्ध्वास्वांतःपुरेनिवेशयामास २०
अथकृष्णोप्येवंविधमेवदेवर्षिणाज्ञात्वाबलदेवप्रद्युम्नसहितःस्वसेनयाविहंगमें
द्रमारुह्यत
स्यबाणस्यभुजवनंछेत्तुमाजगाम २१
बलिपुत्रेणपुराशंकरोऽचितःप्रसन्नोवरंवृणीष्वेत्युवाच २२
तमीश्वरंबाणोममपुरद्वारिरक्षार्थंसर्वदोपविश्यसमागतंपरसैन्यंजहीत्येवंवरमया
चत२३
तंतथेत्युक्त्वाशंकरोऽपितस्यपुरद्वारिसायुधःसपुत्रः
सगणःसमासीनस्तमिन्नेवकालेरुषा
स्वसेनयासमागतंवासुदेवंदृष्ट्वावृषमारुह्यसर्वायुधोपेतः
स्वपुत्रगणसंवृतोयोद्धुंनिश्चक्राम २४
कृष्णोऽपितंभूतपतिंगजचर्मकपालभस्मधरंज्वलितोरगाकल्पंपिंगलंत्रिलोच-
नंत्रिशूलधरं
सर्वभूतगणसंहृतिकर्त्तारंसर्वभूतभयावहं
संवर्त्ताग्निप्रभंपुत्रद्वयसमन्वितंसमस्तगणावृतं
त्रिपुरांतकंदृष्ट्वासेनांसुदूरेपृष्ठतोनिवेश्यबलभद्रप्रद्युम्नसहितस्तेनरुद्रेणसहप्रहसन्न
वयोद्धुमारेभे २५
प्रथमंतदभूद्घोरं कृष्णशंकरयोस्तदा
पिनाकशार्ङ्गनिर्मुक्तैर्बाणैःसंवर्त्तकोपमैः २६
रामोऽपिचक्रेबाणेनप्रद्युम्नः षणमुखेनच
युयुधातेमहावीर्यौसिंहाविवबलोत्कटौ २७
विनायकःस्वदंतेनजघानोरसियादवम्
रामोमुशलमादायतस्यदंतमताडयत् २८
निर्भिन्नदंतः सहसाप्रदुद्रावाखुवाहनः
तदाप्रभृतिलोकेऽस्मिन्हतदंतोगणेश्वरः २९
देवदानवगंधर्वै रेकदंतइतीरितः
प्रद्युम्नेनसमंयुद्धंचकारशिखिवाहनः ३०

गणान्विद्रावया मासमुशलेनहलायुधः
कृष्णेनसुचिरंकालंयुद्धासौनीललोहितः ३१
तापज्वरंमहादीप्तमस्मिन्संयोज्यसायके
कोपान्मुमोचतदसौभृशंसंरक्तलोचनः ३२
तदस्त्रंवारयामासकृष्णः शीतज्वरेणतु
ताभ्यांहरिहराभ्यांतुविसृष्टौताविमौज्वरौ ३३
विशतुर्मानुषेलोकेतयोरेवाज्ञयाभृशम्
हरिशंकरयोर्युद्धंयेतुशृणवंतिमानवाः ३४
तेसर्वेज्वरनिर्मुक्ताः प्राप्नुवंतिनिरामयम्
ततः सतुहृषीकेशोमोहनास्त्रंदुरासदम् ३५
नियुज्यबाणं भूतेशेमुमोचमधुसूदनः
मुहुर्मुहुर्व्यजृंभद्वैतेनास्त्रेणविमोहितः ३६
पपातमूर्च्छितोभूमौशंकरस्त्रिदशेश्वरः
पितरंमोहितंदृष्ट्वाशक्तिमुद्यम्यवीर्यवान् ३७
योद्धुमभ्याययौकृष्णंषरामुखःशिखिवाहनः
हुंकारेणैवतंकृष्णश्चकारात्रपराङ्मुखम् ३८
एवंजित्वायदुश्रेष्ठः शूलपाणिंत्रिलोचनम्
महास्वनंपांचजन्यंशंखंदध्मौप्रतापवान् ३९
कृष्णेननिर्जितंश्रुत्वासात्मजंशंकरंतदा
बाणः स्यंदनमास्थाययौयुद्धायकेशवम् ४०
सदृष्ट्वासहसाकृष्णंगरुडोपरिसंस्थितम्
छादयामासगोविंदंबहुशस्त्रास्त्रवृष्टिभिः ४१
गदाभिः परिघैः शूलैः शक्तिभिस्तोमरैरपि
भिंडिपालैश्चखड्गैश्चचक्रैर्बाणैर्निरंतरम् ४२
तानिसर्वाणिचिच्छेदचक्रेणैवजनार्दनः
ससर्जतस्यबाहूनांछेदनार्थंसुदर्शनम् ४३
मुक्तंदनुजराजस्यसहस्रारंसुदर्शनम्
तद्बाहुकाननंतूर्णंछिन्नंचक्रेसहस्रधा ४४
एतस्मिन्नंतरेदेविपार्वतीसंशितव्रता
हरेःसमीपमागत्यकृतांजलिरभाषत ४५

पार्वत्युवाच-
कृष्णकृष्णजगन्नाथनारायणदयानिधे
दास्यस्मितवदेवेशपूर्वभावेयदूत्तम ४६
त्वयादत्तंवरंमह्यंतदाकौशलपर्वते
सौभाग्यंशाश्वतंसौम्यप्रसन्नेनमहात्मना ४७
तवमुख्यंसहस्रस्यनाम्नामन्यतमंविभो
गौरीसौभाग्यदातेतिमुनिभिः परिकीर्तितम् ४८
तत्सत्यंकुरुगोविंदगरुडारूढशाश्वत
तस्मान्ममपतिंदेवत्वंजीवयितुमर्हसि ४९
रुद्रउवाच-
एवमुक्तस्ततोदेव्याकृष्णः कमललोचनः
अस्त्रंसंहारयामासयेनासौमोहितः पतिः ५०
कृष्णास्त्रेणविनिर्मुक्तः सर्वभूतपतिः शिवः
उत्थायप्रांजलिर्भूत्वातुष्टावजगतांपतिम् ५१
शंकरउवाच-
कृष्णकृष्णजगन्नाथभवगन्पुरुषोत्तम
परेशपरमेशानअनादिनिधनाव्यय ५२
तीव्रवीर्यंमनुष्येषुशरीरग्रहणात्मिका
सर्वस्यतवचेष्टेयंमानलक्षणमेवतत् ५३
प्रसीदमेनमस्तुभ्यंप्रसीदममशाश्वत
प्रसीदमेजगत्स्वामिन्प्रसीदाच्युतकेशव ५४
त्वमेवजगतांस्रष्टाधाताहर्त्ताजगद्गुरुः
त्वमेवचिदचिद्वस्तुरूपंब्रह्मसुरेश्वर ५५
त्वमादिस्त्वमनादिस्त्वमीश्वरः शेषएवच
त्वंमहत्त्वंपरंब्रह्मप्रत्यगात्मात्वमेवहि ५६
समस्तामरवर्य्यस्त्वममर्त्यस्त्वंसुरेश्वर
त्वंमत्तर्येशःसयोनिस्त्वंसौशील्येनतवप्रभो ५७
तव श्वाससमुत्पन्नौपरजीवौसनातनौ
ततश्चपाल्यतेचैवतववात्सल्यगौरवात् ५८
क्षराक्षरेपरेधाम्निरुचोनित्यंसुराश्रये

अधिविश्वेनिधेषित्वांदास्यकर्मणिनान्यथा ५९
यस्त्वांनवेदलोकेऽस्मिन्समूढः सर्वभावनः
परावरेश्वरंधामविदुर्दास्ये मनीषिणः ६०
तेवैसमासतेयुक्तास्तत्पदंत्रिदशैःसमम्
सामान्योभजतेदूरेनंतुंनित्यंपदंतव ६१
तस्यतुर्याचारुकेशीचावस्थाघटतेतव
मिथुनानितवाध्यद्मब्रुवतेयदुशाश्वत ६२
तवनामानिकर्माणिगुणानिशाश्वतानिच
एश्वर्याणिगुणातीतब्रुवतेचोत्तमेइमे ६३
कर्मज्ञानमयेरूपेइमे पुर्वोत्तरेश्रुते
ससुतौयुवतीशस्यस्तोतारौतवकेशव ६४
त्वंप्रज्ञानंपरंब्रह्मत्वयाप्राज्ञेनशाश्वत
जीवयैतेनप्रज्ञेनपरेणैवात्मनात्वया ६५
तस्माच्छरीरादुत्क्रम्यकृपयातवकेवलम्
आमुष्मिकेपरेस्वर्गेत्वयादत्तात्मबोधवान् ६६
प्रज्ञानंचैवविज्ञानंमेधांदृष्टिंतथाधृतिम्
सर्वान्कामानवाप्नोति अमृतंसभवेत्तदा ६७
एतत्संज्ञानमात्मानंयदेतद्धृदियन्मनः
मनीषाच्वयुक्तिश्चस्मृतिः संकल्पएवच ६८
तपश्चक्रतवःकामोदशइत्यादितेप्रभो
भवंतिनामधेयानिप्रज्ञानस्यघृणानिधेः ६९
एषत्वंपरमंब्रह्मएषत्वंवैप्रजापतिः
एषत्वमिंद्रोरुद्रश्चएषत्वंसर्वदेवताः ७०
एतानिसर्वभूतानित्वमेवपरमेश्वर
सुतमित्राणिजीवायुस्तथान्यानिसनातन ७१
जरायुजाण्डजातानिस्वेदजोद्भिद्यजानिच
अश्वागावश्चपुरुषाहस्तिनश्चेतराणिच ७२
यत्किंचित्प्राणिजातंचजंगमाश्चैवजंतवः
स्थावरायेचवैनाथसर्वेत्वत्तोभवंतिच ७३
त्वांहिसवंगतंचेत्थंवदंतिश्रुतयोहरिम्

त्वयैवप्रेरितालोकाश्चेष्टंतेसाध्वसाधुषु ७४
तस्मान्मयाकृतंयच्चअपराधमिदंप्रभो
क्षमस्वकरुणासिंधोगुणैः शुभतमैस्तव ७५
नमस्तेपुंडरीकाक्षगोविंदाच्युतमाधव
वासुदेवजगद्वंद्यनारायणनमोस्तुते ७६
नमस्यामिजगत्स्वामिन्नृसिंहकरुणाकर
श्रीशसर्वगतश्रीमन्परमात्मन्नमोस्तुते ७७
निजावसथवैकुंठनित्यमुक्तार्चितप्रभो
त्रयीनाथनमस्तुभ्यंरामराजीवलोचन ७८
भूभारकविनाशायकृष्णानंदस्वरूपिणे
विष्णवेजिष्णवे तुभ्यंनमस्तेयदुनंदन ७९
एवंस्तुत्वाथगोविंदंप्रणिपत्यउमापतिः
प्रांजलि प्राहभूतेशोवाक्यंगंभीरयागिरा ८०
रुद्रउवाच-
मया दत्तवरोह्येषबाणोबलिसुतः प्रभो
अहंचदत्तवांस्तस्मैपुरानेनार्थितोवरम् ८१
अमरत्वंयदुश्रेष्ठसर्वंकर्तुंत्वमर्हसि
तस्मादेनंबलिसुतंत्रातुमर्हसि मेप्रियम् ८२
तथेत्युक्त्वाचभगवान्बाणंबलिसुतंतदा
प्राणसंशयमापन्नंच्छिन्नबाहुमसृक्चितम् ८३
संहृत्यचक्रंगोविंदोमुमोचकरुणानिधिः
मोचयित्वाबलिसुतंशंकरः संशितव्रतः ८४
वृषभेंद्रंसमारुह्यपार्वत्यासहितःप्रभुः
ययौचवसतिस्थानंकैलासंधरणीधरम् ८५
सतुबाणोनमस्कृत्यरामकृष्णौमहाबलौ
ताभ्यांवैनगरींगत्वामुमोचमदनात्मजम् ८६
वस्त्रैराभरणैर्दिव्यैः पूजयित्वायथार्हतः
उषांसंप्रददौतस्मै कृष्णपौत्रायशौरये ८७
उद्वाह्यरामकृष्णौतमनिरुद्धंयथाविधि
बाणेनपूजितौतत्रप्रद्युम्नसहितौतदा ८८

उषयासहितंतत्रानिरुद्धंवैजनार्दनः
आरोप्यस्यंदनेदिव्येययौद्वारवतींतदा ८९
रामप्रद्युम्नसहितःसेनयासहितोहरिः
प्रविवेशपुरींरम्यांत्रिदशैर्मघवानिव ९०
अनिरुद्धोबाणपुत्र्यानानारत्नमयेगृहे
अनिशंरमयामासनानाभोगैर्मुदान्वितः ९१
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्त्र्यांसंहितायामुत्तरखंडेउमा महेश्वरसंवादेबाणासुरसंग्रामकथनंनामपंचाशदधिकद्विशततमोऽध्यायः२५०

एकपंचाशदधिकद्विशततमोऽध्यायः

श्रीरुद्रउवाच-
अथपौंड्रकवासुदेवः
काशिराजोवाराणस्यांविविक्तेद्वादशवर्षंमहेशमर्च्चयन्निराहारः
पंचाक्षरंजजाप १
पौरश्चरणकालेशंकरंस्वनेत्रकमलेनपूजयामास २
ततःशूलपाणिरुमापतिः प्रसन्नोवरंवृणीष्वेतितमाह ३
असौपंचवक्त्रंसर्वभूतपतिंशिवंप्रसन्नंवरदममवासुदेवसमानरूपंप्रयच्छेत्युवाच
४
शिवस्तस्मैशंखचक्रगदापद्मयुतचतुर्भुजंपुंडरीकदलनिभलोचनं वासुदे-
वसंमानकिरीट
ललितकुंतलंपीतवस्त्रकौस्तुभाभरणादिचिह्नान्यपिमह्यंदेहीतियाचितः शिवः
सर्व
मपितस्मैप्रददौ ५
सतुवासुदेवोऽहमितिसर्वलोकान्मोहयामास ६
कदाचित्स्वर्गतःमदबलोत्कटंतंकाशिपतिंनारदोऽभ्येत्यवसुदेवसुतमजित्वाव
ासुदेवत्वंन विद्यतेइत्युवाच ७
सतुतस्मिन्नेवक्षणेगरुडपताकायुतरूपंरथमारोप्यचतुरंगाक्षौहिणीबलेनद्वारका
मवाप
८
तत्रपुरद्वारिस्वर्णयानेसंस्थितोवासुदेवोऽहयुद्धार्थंसंप्राप्तोस्मि

मामजित्वातववासुदेवत्वंनास्तीतिदूतंप्रेषयामास ९
विष्णुरपितच्छ्रुत्वावैनतेयमारुह्यपौड्रकेणयोद्धुंपुरद्वारिविनिष्क्रम्याक्षौहिणीब
लेनस्यंदनेस
मासीनंशंखचक्रगदापद्महस्तंपौंड्रकंददर्श १०
कृष्णोऽथशार्ङ्गमादायसंवर्ताग्निप्रभैर्बाणैस्तथाश्वगजपदातियुक्तंमहदक्षौहिणीब
लंमुहूर्त
मात्रेणनिःशेषंददाह ११
शरेणैकेनतस्यहस्तावसक्तशंखचक्रगदादिहेतीरपिलीलयैवचिच्छेद १२
पवित्रेणसुदर्शनेनकिरीटकुंडलयुतंतस्यशिरःकमलंछित्त्वावाराणस्यामंतः
पुरेनिपातयामास १३
तद्दृष्ट्वासर्वेकाशीनिवासिनः किमेतदित्याशंक्यविस्मिताबभूवुः १४
तस्यपौंड्रकस्यसुतोदंडपाणिरितिवासुदेवेनभगवतानिहतंस्वपितरं
श्रुत्वामात्रामृत्युनास
मादिष्टः स्वपुरोहितेनाभियुक्तोमाहेश्वरेणक्रतुनाशंकरमियाज १५
सतुप्रसन्नः कृष्णजिघांसयासमर्थांमाहेश्वरींकृत्यांतस्मैसंप्रीत्याचदत्तवान् १६
सकाशिराजस्तांमहोश्वरींज्वालाकुलोपचितविग्रहांसंदीप्तसटाकलापांपिंगलने
त्रांज्वलत्क
रालवदनांत्रिशूलहस्तांभस्मांगरागलिप्तांनरमुंडमालाविभूषितांसर्वदेवभयंकरीं
रुद्रदत्तांस
मीद्दयसपुत्रदारबांधवसहितंकृष्णंजहीतिप्रेरयामास १७
सातुसर्वलोकभयावहासर्वांपृथ्वद्यंस्वतेजसानिर्दहंतीप्रलयाशनिनिर्भरस्वनंन
वदंतीद्वारका मवाप १८
तत्रत्याः सर्वेजनास्तांदृष्ट्वामहाप्रलयमितिमत्वाहाहाकारंकुर्वंतः
कृष्णंनिवेदयामासुः
१९
कृष्णोऽपितान्सर्वान्नभेतव्यमित्युक्त्वाप्राकारतोरणेस्थितांमहारौद्रांकृत्यांतथावि
धांदृष्ट्वा
सकलशस्त्रास्त्रानिवारणसमर्थंसहस्रारंसुदर्शनंतस्याकृत्यायांसहसामुमोच
२०
सातुकल्पान्तार्ककोटिसमवर्चसाशतयोजनोद्गतंसकलदीप्तास्त्रयुतंहिरणमयंप्रभ

ापूर्णांस
कलजगत्प्रलयस्थितिसमर्थंसहस्रारंसर्वदेवनमस्कृतंजगच्छरणभूतंमहासुदर्श
नंविलोक्य
विनष्टतेजाभयार्ताक्रोशंतीवाराणसींप्रतिदुद्राव २१
सुदर्शनमपितांकृत्यांभृशमन्वगात् २२
सापिभयार्ताक्रोशंतीकाशिपतेस्तस्यांतःपुरंप्रविवेश २३
सुदर्शनोऽपितांवाराणसींपुरींप्राप्यसभृत्यबलवाहनंपौंड्रकसुतंदंडपाणिंनामका
शिराजंबहु
प्रासादहर्म्यमालिनींपुरींमाहेश्वरीमपिभस्मावशेषांकृत्वासकलदेवमहर्षिभिः
पूज्यमानः
पुनरेवद्वारवत्यांकृष्णहस्तंसुसौम्यंकल्पमिवआविवेश २४
अत्रचश्लोकागीयंते
शस्त्रास्त्रमोक्षमजरंदग्ध्वातद्बलमोजसा
कृत्यांभस्मावशेषंतांततोवाराणसींपुरीम् २५
प्रभूतरथमातंगांसाश्वांपुंस्त्रीसमन्विताम्
साशेषकोषकोष्ठांतांदुर्निरीक्ष्यांसुरैरपि २६
द्वारोपलक्षिताशेषगृहप्राकारचत्वराम्
प्रददाहहरेश्चक्रंसकलामेवतांपुरीम् २७
अक्षीणगतिसामर्थ्यमसाध्यकृतसाधनम्
तच्चक्रंप्रज्वलद्भासंविष्णोरभ्याययौकरम् २८

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
उमामहेश्वरसंवादेश्रीकृष्णचरितेपौंड्रकपुत्रकृत्याविध्वंसनं
नामैकपंचाशदधिकद्विशततमोऽध्यायः २५१

द्विपञ्चाशदधिक द्विशततमोऽध्यायः

श्रीरुद्रउवाच-
अथमगधाधिपः कंसवधानंतरंद्विषन्नेवयादवान्सदापीडयामासतेदुः खिताः
कृष्णमूचुः १
सचभीमार्जुनावाहूयसंमंत्रयामासकृष्णः
अनेनरुद्रःपूजितस्तत्प्रसादाच्छस्त्रैरवध्यःपरंके

नापिप्रकारेणहंतव्यइति २
अथविचार्यभीममाहएनंप्रतिमल्लयुद्धं कुरुतत्तेनप्रतिज्ञातम् ३
अथसकलचराचरजगद्वंद्योवासुदेवोभीमार्जुनसहितोजरासंधस्यपुरींगत्वाविप्र
वेषेण
तस्यांतःपुरमवाप ४
सोऽपिमहावीर्यान्क्षत्रियान्युद्धेनिर्जित्यबलाद्गृहीत्वास्ववेश्मनिनिरुध्यमा
समासिकृ
ष्णाचतुर्दश्यामेकैकंहत्वातद्रक्तेनैवबलिभैरवायाकरोत् ५
एवंविधंसकलजनपार्थिववधंकुर्वतोजरासंधस्यसमुद्यमानोभीमार्जुनसहितस्त
स्यगृहे
विप्रवेषेणैवप्रविवेश ६
सतुतान्दृष्ट्वादंडवत्प्रणतोभूत्वायथोचितासनेषुनिवेश्यमधुपर्कविधानेनसंपूज्य
धन्योस्मि
कृतकृत्योस्मिकिमर्थंभवन्तोमेसमीपआगतास्तद्वक्तव्यमहंतत्सर्वंभवद्भ्योदास्या
मीत्युवाच
७
तेषांवासुदेवःप्रहसन्पार्थिवंतमुवाचकृष्णभीमार्जुनायुद्धार्थमागताःस्मअस्माक
मन्यतमं
द्वंद्वयुद्धार्थंवृणीष्वेत्यवदत् ८
सोऽपितथेत्यवदत्ततोद्वंद्वयुद्धार्थंमारुतिंवरयामास ९
ततोभीमजरासंधयोरभितोभयंकरंमल्लयुद्धंनिरंतरंपंचविंशतिवासरमभूत् १०
ततः कृष्णेनैवसंचोदितोवायुपुत्रस्तस्यशरीरंद्विधाकृत्यभूमौनिपातयामास
एवं
जरासंधंपांडुपुत्रेणहत्वातान्जरासंधनिरोधितान्वासुदेवोऽपिपार्थिवान्मोचया
मास
११
निहत्यवायुपुत्रेणजरासंधंयदूद्वहः
तद्गृहेसन्निरुद्धांस्तुमोचयामासपार्थिवान् १२
तेचतत्रनमस्कृत्यस्तुत्वाचमधुसूदनम्
स्वान्स्वान्जनपदान्सर्वेजग्मुःकृष्णेनरक्षिताः १३

अथताभ्यामिंद्रप्रस्थंगत्वावासुदेवस्तत्रमहाक्रतुंराजसूयंयुधिष्ठिरंकारयामास
१४
तत्रसमाप्तेक्रतौअग्रपूजांभीष्मानुमतेनकृष्णायदत्तवान् १५
तत्रशिशुपालःकृष्णंबहून्याक्षेपवाक्यान्युक्तवान् १६
कृष्णोऽपिसुदर्शनेनतस्यशिरश्चिच्छेद १७
असौजन्मत्रयावसानेहरेःसारूप्यमगमत् १८
अथ शिशुपालंनिहतंश्रुत्वादंतवक्त्रःकृष्णेनयोद्धुंमथुरामाजगाम १९
कृष्णस्तुतच्छ्रुत्वारथमारुह्यतेनयोद्धुंमथुरामाययौ २०
दंतवक्त्रवासुदेवयोरहोरात्रंमथुरापुरद्वारियमुनातीरेसंग्रामःसमवर्त्ततकृष्णस्तुग
दयातंजघान
२१
सतुचूर्णितसर्वांगोवज्रनिर्भिन्नमहीधरइवगतासुरवनितलेपपात २२
सोऽपिहरेःसायुज्यंयोगिगम्यंनित्यानंदसुखंशाश्वतंपरमंपदमवाप २३
इत्थंजयविजयौसनकादिशापव्याजेनकेवलंभगवतोलीलार्थंसंसृतावववतीर्यज
न्मत्रये
ऽपितेनैवनिहतौजन्मत्रयावसानेमुक्तिमवाप्तौ २४
कृष्णोऽपितंहत्वायमुनामुत्तीर्यनंदव्रजंगत्वा
प्राक्तनौपितरावभिवाद्यआश्वास्यताभ्यांसाश्रुकंठमालिगितः
सकलगोपवृद्धान्प्रणम्याश्वास्यरत्नाभरणादिभिस्तत्रस्थान्संतर्पयामास २५
कालिद्याःपुलिनेरम्येपुण्यवृक्षसमावृते
गोपनारीभिरनिशंक्रीडयामासकेशवः २६
रम्यकेलिसुखेनैवगोपवेषधरोहरिः
बद्धप्रेमरसेनात्रमासद्वयमुवासह २७
अथतत्रस्थानंदगोपादयः सर्वेजनाः पुत्रदारसहिताः
पशुपक्षिमृगादयश्चवासुदेवप्रसादे
नदिव्यरूपधराविमानमारूढाःपरमंवैकुंठलोकमवापुः २८
कृष्णस्तुनंदगोपव्रजौकसांसर्वेषांपरमंनिरामयंस्वपदंदत्वादिविदेवगणैः
संस्तूयमानोद्वा
रवतींश्रीमतींविवेश २९
तत्रवसुदेवोग्रसेनसंकर्षणप्रद्युम्नानिरुद्धाक्रूरादिभिःप्रत्यहंसंपूजितषोडशसहस्र

भार्याभिरष्टा
भिर्दिव्यमहिषीभिश्चविश्वरूपधरोदिव्यरत्नमयनानागृहांतरेषुसुतकुसुमांचितश्ल
क्ष्णतर
पर्यंकेषुरमयामास ३०
अथरामकृष्णसतीर्थ्योविप्रोबालसखासदात्यंतदारिद्र्यपीडितोमुष्टिमात्रान्याच
नाप्तपृथु-
काञ्जीर्णवाससिनिबध्यवासुदेवंद्रष्टुंश्रीमतींद्वारकानगरीमाजगाम ३१
सतुरुक्मिरायंतःपुरद्वारिक्षणंतूष्णींतस्थौ ३२
कृष्णोऽपिसमागतंब्राह्मणंज्ञात्वाप्रद्युम्नेननमस्कृत्वावामकरंगृहीत्वागृहांतरेस्वा
सनेनिवेश्य
भयाद्वेपमानंतंरुक्मिणीहस्तगतसुवर्णकलशजलेनपादौप्रक्षाल्यमधुपर्केणपूजया
मास
३३
सुधामृतोपमैरन्नपानाद्यैस्तर्पयित्वातस्य
जीर्णवस्त्रांतरेयाचनाप्तपृथुकान्स्वयमेवहस्तेन
गृहीत्वाप्रहसन्जग्रास ३४
कृष्णेनपृथुकेभक्षितेतस्मिन्नेवक्षणेतस्यबहुधनधान्यवस्त्राभरणसंभूतंमहदैश्वर्यम
भूत्
३५
सतुकृष्णेनविसृष्टोममकिंचिद्वस्त्रंवाधनंवाकृष्णेननदत्तमितिमन्यमानः
स्वपुरंविवेश
३६
अथबहुधनधान्ययुतंस्वगृहंदृष्ट्वातत्प्रसादादिदंलब्धमितिवदन्प्रहृष्टेनांतरात्मनादिव्य
वस्त्राभरणादिनाभार्ययासहसर्वान्कामान्भुक्त्वाहरिसंतुष्टचैबहुयज्ञानिष्ट्वातत्प्रस
ादेनपरमं
नित्यंस्वर्गसुखमवाप ३७
अथधृतराष्ट्रतनयोदुर्योधनः-
पांडुतनयान्कपटद्यूतव्याजेनराज्यमपहृत्यस्वराष्ट्राद्विवासयामास ३८
तेतुयुधिष्ठिरभीमार्जुननकुलसहदेवाःसुपत्न्याद्रौपद्यासहमहाररायंगत्वातत्रद्वाद

शाब्दा
न्स्थित्वासंवत्सरपर्यंतमज्ञाताः सर्वेमत्स्यदेशाधिपतेर्विराटस्यनिवेशनेस्थित्वा
वासु
देवेनसहायेनधार्तराष्ट्रान्योद्धुमाजग्मुः ३९
तेषांधार्तराष्ट्रपांडुपुत्राणांनानादेशाधिपनृपैः कुरुक्षेत्रमहापुण्येदेवानामपिभयंकरो
महासं
ग्रामोऽभवत् ४०
अथश्रीकृष्णोऽप्यर्जुनसारथ्यंकुर्वन्नर्जुनेस्वशक्तिमावेश्यतेनदुर्योधनभीष्मद्रोणप्र
मुखान्सर्वा
न्पार्थिवानेकादशाक्षौहिणीबलसहितान्कुरुक्षेत्रेहत्वापांडवान्राज्येस्थापयित्वा
निःशेषेण
सर्वभूभारमपास्यस्वांपुरींप्रविवेश ४१
कस्यचित्त्वथकालस्यकतिपयाहनिवैदिकोब्राह्मणोमृतंपंचवार्षिकंबालमादाय
राजद्वा
रिनिधायबहुशोविलपन्बहून्याक्रोशवाक्यानिकृष्णंजगाद ४२
कृष्णस्तमाक्रोशंश्रुत्वातुष्णीमुवास ४३
सतुममपंचपुत्राः पूर्वंहताअयंतुषष्ठः एनंकृष्णोनजीवयिष्यतितर्हिराजद्वारिमरिष्य
ामीत्युवाच
४४
तस्मिन्कालेअर्जुनः कृष्णंद्रष्टुमागतस्तथाविधंतंपुत्रशोकेनविलपंतंददर्श ४५
अर्जुनोऽपिकालधर्ममुपागतंपंचवार्षिकंबालकंदृष्ट्वाकृपयाविष्टस्तवपुत्रमहंजी
वयिष्या
मीतिब्राह्मणायाभयंदत्वाप्रतिश्रुतवान् ४६
ब्राह्मणस्तुतेनाश्वासितोहृष्टवान् ४७
अथैतंब्राह्मणशिशुंबहुभिः
संजीविनास्त्रैरभिमंत्र्यअलब्धजीवितंदृष्ट्वावृथाप्रतिज्ञामवाप्यबहुशोकसमन्वि
तस्तेनैवप्रा
णांस्त्यंक्तुमैच्छत् ४८
कृष्णस्तुतत्सर्वंज्ञात्वांतःपुराद्विनिष्क्रम्यतंवैदिकंप्राहतवपुत्रान्सर्वानहंदास्यामीत
युक्त्वा

श्वास्यवैनतेयमारुह्यार्जुनसहितोवैष्णवंलोकमाजगाम ४९
तत्रदिव्यमणिमंडपोद्देशेदेव्यासहसमासीनंनारायणंदृष्ट्वाकृष्णार्जुनौनमश्चक्रतुः
५०
सतौबाहुभ्यांपरिष्वज्यकिमर्थमागतावित्युवाच ५१
कृष्णश्चभगवन्वैदिकस्यतनयान्ममदेहीत्युवाच ५२
सतुनारायणस्तादृग्वयसिसंस्थितान्ब्राह्मणपुत्रान्कृष्णायसंददौ ५३
श्रीकृष्णोऽपितान्वैनतेयस्कंधेसमारोप्यहर्षसमन्वितोऽजुनसहितःस्वयमप्यारु
ह्यदिविदेवग
णैःसंस्तूयमानोद्वारवतीमाविवेश ५४
तस्मैब्राह्मणायपंचवर्षवयःस्थान्षट्पुत्रान्ददौसोऽप्यत्यंतर्हषसमन्वितः
कृष्णंवर्द्धयस्वेत्याशिषंप्रायच्छत् ५५
अर्जुनस्तुसफलांप्रतिज्ञामवाप्यकृष्णंनमस्कृत्ययुधिष्ठिरपालितांस्वांपुरीमाजगा
म ५६
कृष्णस्यषोडशसहस्रभार्यास्वयुतसाहस्रपुत्राजज्ञिरे
तेषांपुत्रपौत्रसंख्यांवक्तुंनशक्यते
५७
अत्रापि श्लोकः
अष्टौशतानिपुत्राणांसहस्राण्ययुतंतथा
प्रद्युम्नःप्रथमस्तेषांसर्वेषांरुक्मिणीसुतः ५८
असंख्यैस्तैर्यादवैरियंपृथिवीसंवृताऽभवत् ५९
पुनरप्यवनीभारशंकयाकृष्णस्तुतानृषिशापव्याजेनसंहर्तुमैच्छत् ६०
कदाचित्सर्वेकुमारानर्मदायांविहर्तुमाजग्मुः ६१
तत्रतपंतंकण्वंमहर्षिंदृष्ट्वाजांबवत्याः
पुत्रंयोषिद्वेषंकृत्वातस्योदरेकात्वायसंमुसलंबद्ध्वात्रृषेः
समीपमागत्यसर्वेनमस्कृत्वापत्नीरूपंसांबंकुमारंतस्यपुरतोनिधाय
अस्यागर्भेस्त्रीवापुरुषोवाभविष्तीतिब्रूहीत्यूचुः ६२
सतुमनसातद्विज्ञायतानमर्षमाणः
सर्वाननेनमुसलेनयूयंसर्वेनिहताभवतेत्युवाच ६३
सर्वेसमुद्विग्नमनसःकृष्णंसमेत्यमहर्षिणोक्तंतत्कर्मनिवेदयामासुः ६४
कृष्णोऽपितदायसंमुसलंचूर्णीभूतंह्रदेनिपातयामास ६५

तदयश्चूर्णीभूतबीजसमुद्भूतावज्रसन्निभामहाकाशाः संबभूवुः ६६
तत्रतंमुसलावशिष्टंकनिष्ठांगुलिमात्रंमत्स्योजग्रासतंमत्स्यंनिषादोगृहीत्वातदुद
रस्थंमुशल
खराडमादायबाणाग्रेफलकमकरोत् ६७
कदाचित्सर्वेयादवारामकृष्णप्रद्युम्नादयोमघवताप्रेषितांवारुणींपीत्वामत्ताबभू
वुः६८
परस्परंवीरणांनीत्वाबहून्याक्रोशवाक्यानिवदंतोयुद्धंचक्रुःक्षयंचगताः ६९
कृष्णस्तुयुद्धश्रांतःकल्पतरुच्छायायांशयनंचकारसनिषादोधनुर्बाणंगृहीत्वाखे
टकवृत्तिंज
गाम ७०
एवंनिःशेषंत्यक्तजीविताबभूवुस्तेसर्वेस्वान्स्वांस्त्रिदशान्प्रपेदिरे ७१
एवंमुशलेनसंहृत्यसर्वंस्वयमेकोदेवोबहुगुल्मसमाकीर्णमहाद्रुमछायायांसुप्तश्च
तुर्विधव्यूह
गतंवासुदेवात्मकमात्मानंचिंतयञ्जानूपरिपदंनिधायात्मनोमानुषंवपुस्त्यक्तुमनुनि
नषसाद
७२
एतस्मिनन्तरेमृगयाजीविकोहरेः
सतदाकालप्रभावेनचक्रवज्रध्वजांकुशादिचिह्नितमतिरक्ततमंहरेःपादकम-
लंदृष्ट्वा
विव्याध ७३
तदनंतरंश्रीकृष्णंज्ञात्वा सुमहाभयार्तः प्रवेपमानः कृतांजलिपुटोमहदपराधः
सकलोपह्नियतामितितंप्रणनाम ७४
श्रीकृष्णस्तथाभूतंदृष्ट्वासुधामयकराभ्यांतमुत्थाप्यभ
वतानापराद्धंकृतमितिवदन्महाभयपीडितमाश्वासयन्नुवाच ७५
ततोयोगिगम्यमपुनरावृत्तिशाश्वतंसर्वोपनिषदमयंवैष्णवंलोकंप्रददौ ७६
असौतस्मिन्नेवमुहूर्तेमानुषंरूपंविहायपंचोपनिषन्मयंसकलपुत्रदारसहितोदीप्ति
मयंवैष्णवं
लोकंदिव्यंविमानमास्थायसहस्त्रार्कद्युतिसदृशंदिव्याप्सरोगणाकीर्णंहि
रणमयंवासुदेवेत्येकंजगाम ७७
तस्मिन्कालेदारुकोरथमारुह्यविष्णोःसमीपंविवेश ७८

कृष्णोऽपिमत्स्वरूपमर्जुनंपूर्वमानयस्वेतिप्रेषयामास ७९
सतुमनोजवस्यंदनमारुह्यार्जुनसमीपमाजगाम ८०
एतस्मिन्नंतरेदेव्यर्जुनस्तदारुह्यपरिणीयनमस्कृत्वाकिंकरोमीतिपुटांजलिरुवाच
८१
कृष्णस्तुतमाहपार्थाहंस्वलोकंयास्यामित्वंतुद्वारवतींगत्वातत्रस्थारुक्मिरायाद्य
ष्टभार्या
आनीयममशरीरेप्रेषय ८२
सदारुकेणसहितोनगरीमाजगाम ८३
एतस्मिन्नंतरेदेवाविमानस्थानभसिसंस्थिताःस्वर्लोकंयियान्तंकृष्णंदृष्ट्वाऋषिभि
ःसार्द्धंस्तु
त्वापुष्पवर्षाणिववृषुः ८४
कृष्णोऽपिमानुषदेहं-
संन्यस्यसकलजगत्स्थितिसंहारहेतुभूतंसकलक्षेत्रज्ञमंतर्यामियोगिध्ये
यमनामयंवासुदेवात्मकंदेहंधृत्वावैनतेयमारुह्यमहर्षिभिस्तूयमानोजगाम ८५
अर्जुनोवसुदेवोग्रसेनाभ्यांरुक्मिरायादिमहिषीभ्यस्तत्सर्वंकथयामास ८६
तच्छ्रुत्वासर्वेपौरजनाःस्त्रियश्चद्वारवतीमुत्सृज्यांतःपुराद्बहिर्निष्क्रम्यसर्वास्ताः
कृष्णवल्लभावसुदेवोग्रसेनसहिताः शीघ्रमेवहरेः समीपंजग्मुः ८७
तेसर्वेवसुदेवोग्रसेनाक्रूराः
सर्वेयदुवृद्धावपुस्त्यक्त्वासनातनवासुदेवंसमाजग्मुः८८
रेवतीचबलभद्रशरीरंपरिष्वज्याग्निंप्रविश्यतस्मिन्देहंप्राप्यदिव्यविमानारूढाभ
र्तुः
स्थानंसंकर्षणलोकंदिव्यमवाप ८९
तथैवप्रद्युम्नेनसहरुक्मपुत्रीतथानिरुद्धेनोषापिसर्वाश्चयादवस्त्रियः स्वस्वभर्तुः
शरीराणिसंपूज्याग्निप्रवेशंचक्रुः ९०
तेषांसर्वेषामर्जुनश्चौर्द्ध्वदैहिकंकृतवान् ९१
तस्मिन्कालेदिव्यवाजिसमायुक्तंसुग्रीवाख्यकंसर्वरत्नोपेतंदिव्यंस्यंदनमारुह्यद
ारुकोप्या
जगाम ९२
पारिजाततरुर्देवसभासुधर्मात्रिदशेंद्रलोकमयाताम् ९३
तस्मिन्समयेद्वारवतीपुरीमहोदधौनिमग्नाभूत् ९४

ततःसर्वाषोडशसहस्त्रभार्य्याअर्जुनेनसहेंद्रप्रस्थंगच्छंतीर्दस्यवोजगृहुः ९५
पूर्वंदेवगंधर्वयोषितोह्यष्टावक्रंमहामुनिंदृष्ट्वाजहसुस्ततस्तेनशप्तावेश्याभविष्य
थततस्ता
भिप्रसादितःपूजितश्चतत्प्रसादात्सर्वलोकैश्चनमस्कृतंवासुदेवंभर्तारमवाप्यापिते
नैवदस्यु हस्तंगताअभवन् ९६
अर्जुनोऽपिदस्युभिर्निर्जितः-
शोकसमाविष्टोममभुजबलंसवीर्यंकृष्णेनैवसहसर्वमैश्वर्यंनिर्यातमितिमत्वाअ
द्यममभाग्य
क्षयइतिवदन्सायंसंध्यारविरिवनिःशेषविनष्टतेजाः स्वांपुरींसमाजगाम ९७
एवंहितार्थायसर्वदेवानांसमस्तभूभारविनाशाययदुवंशेऽवतीर्यसकलराक्षसवि
वनाशंकृ
त्वामहांतमपिचोर्वीभारंनाशयित्वानंदव्रजद्वारकामथुरानिवासिनः
सर्वान्स्थावर
जंगमान्कालभवबंधैर्मोचयित्वापरमैश्वर्गेशाश्वतेयोगिगम्येहिरण्मयेरम्येसात्वि
केसंस्था
प्यनित्यंदिव्यमहिष्यादिसंसेव्यमानोवासुदेवउवास ९८
अत्रश्लोकाः -
अन्येसर्वेऽवताराःस्युःकृष्णस्यचरितंमहत्
भूभारकविनाशायप्रादुर्भूतोरमापतिः ९९
एतत्कृष्णस्यचरितंदुष्टानांनाशहेतवे
श्रीकृष्णः करुणासिंधुर्वैकुंठेमोदतेसदा १००
अत्यद्भुतमिदंदेविकृष्णस्यचरितंशुभम्
संग्रहेणमयैवोक्तंतवसर्वफलप्रदम् १०१
वासुदेवस्यचरितंयःपठेद्धरिसन्निधौ
स्मरेद्वाशृणुयाद्भक्त्यासयातिपरमंपदम् १०२
महापातकयुक्तोवातथोपपातकसंयुतः
बालकृष्णस्यचरितं श्रुत्वापापैः प्रमुच्यते १०३
द्वारवत्यांसमासीनंरुक्मिणीसहितंहरिम्
स्मरन्वैमहदैश्वर्यमनेनाप्नोत्यसंशयः १०४
संग्रामेसंकटेदुर्गेशत्रुभिः परिवेष्टिते

नेतारंसर्वदेवानांध्यात्वासुविजयीभवेत् १०५
यःस्मरेद्गोपकन्याभिः क्रीडंतंगोव्रजेशुभे
सर्वकामानवाप्नोतिसौभाग्यंचैवविंदति १०६
महोपसर्गरोगाद्यैर्युक्तोयस्तुसनातनम्
जेतारंचमहारौद्रींकृत्यांकाशीपुरेस्थिताम् १०७
किमत्रबहुनोक्तेनसर्वकालेषुचाप्सुभे
कृष्णायनमइत्येवंमंत्रमुच्चारयेद्बुधः १०८
कृष्णायवासुदेवायहरयेपरमात्मने
प्रणतः क्लेशनाशायगोविंदायनमोनमः १०९
इमंमंत्रंजपन्देविभक्त्याप्रतिदिनंनरः
सर्वपापविनिर्मुक्तोविष्णुलोकमवाप्नुयात् ११०
सवेषामेवदेवानामीश्वरोऽसौजनार्दनः
रक्षणायचलोकानामवस्थांतरमेतिवै १११
त्रिपुरंहंतुकामेनमयासंपूजितोहरिः
बुद्धरूपधरः श्रीमान्मोहयामासतद्रिपून् ११२
मोहितास्तेनशास्त्रेणसर्वधर्मविवर्जिताः
नारायणास्त्रेणमयानिहतादेवशत्रवः ११३
अवतीर्यकलावंतेब्राह्मणस्यनिवेशने
हनिष्यतितथारौद्रान्म्लेछान्सर्वाञ्जनार्दनः ११४
तैस्तैर्भावैर्मयावस्थाः सर्वाः प्रोक्ताजगत्पतेः
किमन्यच्छ्रोतुकामासितद्ब्रवीमिशुभानने ११५

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
उमामहेश्वरसंवादे श्रीकृष्णचरितेश्रीकृष्णस्वधामगमननिरूपणंनाम
द्विपंचाशदधिकद्विशततमोऽध्यायः २५२

त्रिपञ्चाशदधिकद्विशततमोऽध्यायः

श्रीपार्वत्युवाच-
भगवन्सर्वमाख्यातंबैभवावस्थितंहरेः
एतस्मिन्रामकृष्णाभ्यांचरित्रमतिविस्मितम् १
अहोरामस्यचरितंकृष्णस्यचमहात्मनः

शृणवत्याममदेवेशकल्पांतरशतैरपि २
तृप्तिंनैवेतिभूतेशचेतोहरिकथामृतम्
अधुनाश्रोतुमिच्छामिविष्णोर्माहात्म्यमुत्तमम्
तत्पूजनविधिंदेवश्रोतुमिच्छाम्यहंतथा ३
श्रीरुद्रउवाच–
शृणुदेविप्रवक्ष्यामिहरेश्चसुमहात्मनः
स्थापनंचस्वयंव्यक्तंद्विविधंतत्प्रकीर्तितम् ४
शिलामृद्दारुलोहाद्यैः कृत्वाप्रतिकृतिंहरेः
श्रौतस्मार्तागमप्रोक्तक्रियासंस्थापनंहियत् ५
तत्स्थापनमितिप्रोक्तंस्वयंव्यक्तंहिमेशृणु
यस्मिन्संनिहितोविष्णुः स्वयमेवनृणांभुवि ६
पाषाणदार्वोरात्मेशः स्वयंव्यक्तंहितत्स्मृतम्
स्वयंव्यक्तंस्थापितंवापूजयेन्मधुसूदनम् ७
देवतानांमर्हषीणामर्चनार्थेसनातनः
स्वयमेवजगन्नाथःसान्निध्यंयातिकेशवः ८
यस्ययद्विग्रहेभोग्यंतदेवाविरभूद्भुवि
तदेवपूजयेन्नित्यंतस्मिन्नेवरमेत्सदा ९
श्रीरङ्गशायीदेवेशोविधिनार्च्यः सुरोत्तमः
सएवेक्ष्वाकुनाथानांतपसाविरभूद्भुवि १०
ममापिकाश्यांसंपूज्योमाधवः कलुषापहः
यत्रयत्रगृहेरम्येस्वयंव्यक्तः सनातनः ११
तत्रतत्रसमागम्यरमेऽहसंव्यवस्थितः
नाष्टांगयोगेयज्ञेशस्त्वर्चायांविंदतेनृणाम् १२
चक्षुषोर्विषयंप्राप्यददातिवरमीप्सितम्
सर्वावस्थासुसौलभ्यमर्चायांलभ्यतेजनैः १३
अज्ञानामपिसान्निध्यंसर्वदापृथिवीतले
जंबूद्वीपेमहापुण्येवर्षेवैभारतेशुभे १४
अर्चायांसंनिधौविष्णुर्नेतरेषुकदाचन
तत्तस्माद्भारतेवर्षेमुनिभिस्त्रिदशैरपि १५
सेवितः सततंदेवितपोयज्ञक्रियादिभिः

भारतेऽस्मिन्महावर्षेनित्यंसंनिहितोहरिः १६
एंद्रद्युम्नेतथाकौर्मेसिंहाद्रौकरवीरके
काश्यांप्रयागेसौम्येचशालग्रामाचलेतथा १७
द्वारवत्यांनैमिषेचतथाबदरिकाश्रमे
कृतशौचेहरेत्पापंपौंडरीकेचदंडके १८
माथुरेवेङ्कटाद्रौचश्वेताद्रौगरुडाचले
कांच्यामनंतशयनेश्रींरंगेवासवाचले १९
नारायणाचलेसौम्येवाराहेवामनाश्रमे
एवमाद्याःस्वयं व्यक्ताः सर्वकामफलप्रदाः २०
स्वयमेवहिसान्निध्यंयस्मिन्यातिजनार्दनः
तस्मिन्नेवस्वयंव्यंक्तंवदंतिमुनयःशुभाः २१
महाभागवतश्रेष्ठोविधिनास्थाप्यकेशवम्
मंत्रेणकुर्यात्सांनिध्यंस्थापनंतद्विशिष्यते २२
तस्मिन्संपूजयेद्देवंग्रामेषुचगृहेषुच
शालग्रामशिलायांतुगृहार्चासद्भिरिष्यते २३
अर्चनंमंत्रपठनंयागयोगोमहात्मनः
नामसंकीर्तनंसेवातच्चिह्नैरंकनंतथा २४
तदीयाराधनंचस्यान्नवधाभिद्यतेशुभे
तत्तत्कर्मविधानंचविप्रस्यसततंस्मृतम् २५
महाभागवतः श्रेष्ठोब्राह्मणोवैगुरुर्नृणाम्
सर्वेषामेवलोकानामसौपूज्योयथाहरिः २६
तापादिपं चसंस्कारिनवेज्याकर्मकारकः
अर्थपंचकविद्विप्रोमहाभागवतःस्मृतः २७
तत्तत्कर्मविधानेज्याद्मत्रियस्यविधीयते
तच्चिह्नैरंकनेसेवातदीयानांचपूजनम् २८
मंत्रवर्णस्यजपनंनामसंकीर्तनंहरेः
वंदनंचविशांप्रोक्तंषट्कर्मेज्याविधानतः २९
नामसंकीर्तनंसेवापूजनंवंदनं तथा
अर्चनंचतदीयानांपंचेज्याशूद्रजन्मनः ३०
साधारणेनसर्वेषांमानसेज्यानृणांप्रिये

स्वाधिकारानुरूपंचकार्याचेज्याजगत्पतेः ३१
अनन्यदेवताभक्तैरनन्यफलसाधकैः
वेदविद्ब्रह्मतत्त्वज्ञैर्वीतरागैर्मुमुक्षुभिः ३२
गुरुभक्तिसमायुक्तैःसुप्रसन्नैः सुसाधुभिः
ब्राह्मणैरितरैश्चापिपूजनीयोहरिःसदा ३३
यथोचिताचवर्णस्यकार्याइज्याहरेर्नृणाम्
वर्णाश्रमानुरूपंचकर्त्तव्यंवैष्णवैःशुभैः ३४
श्रुतिस्मृत्युदितंसंम्यङ्नित्यमत्रसमाचरेत्
श्रुतिस्मृत्युक्तकर्माणिनातिक्रामेतबुद्धिमान् ३५
श्रुतिस्मृत्युक्तमाचारंयोनसेवेतवैष्णवः
सचपाखंडमापन्नोरौरवेनरकेवसेत् ३६
तस्माद्वर्णानुरूपांवैकुर्यादिज्यांजगत्पतेः
तस्मात्स्मृत्युक्तमाचारंकुर्याद्वैमानवः सदा ३७
साधारणाहिसर्वेषांमानसेज्याशुभेनृणाम्
स्वाधिकारंनिरीक्ष्यैवकर्मकुर्यादतंद्रितः ३८
शमोदमस्तपः शौचंसत्यमामिषवर्जनम्
अस्तेयमेवाहिंसाचसर्वेषांधर्मसाधनम् ३९
तस्माद्वर्णानुरूपेणपूजयेन्मधुसूदनम्
रात्रावंतेसमुत्थायउपस्पृश्ययथाविधि ४०
नमस्कृत्यगुरून्स्वस्यसंस्मरेदच्युतंहृदि
सहस्रनामभिर्भक्त्याकीर्तयेद्वाग्यतः शुचिः ४१
बहिर्ग्रामात्समुसृज्यमूलमंत्रंयथाविधि
शौचंकृत्वायथान्यायमाचम्यप्रयतःशुचिः ४२
दंतधावनपूर्वंतुस्नानंकुर्याद्यथाविधि
आदायतुलसीमूलमृदंतत्पत्रसंयुताम् ४३
मूलमंत्रेणाभिमंत्र्यगायत्र्याचशुभानने
मंत्रेणैवानुलिप्तांगः स्नायात्कृत्वाघमर्षणम् ४४
हरिपादोद्भवांगंगांतत्रावाह्यसुनिर्मले
निमज्ज्याशुजपेत्सूक्तमघमर्षणमुत्तमम् ४५
आचम्यमार्जनंकुर्यात्पौरुषोक्तक्रमादथ

पश्चादाशुनिमज्ज्याथमूलमंत्रंजपेद्बुधः ४६
अष्टाविंशतिवारंवाशतमष्टोत्तरंचवा
प्रार्थयेदभिमंत्र्याथजलमंत्रेणवैष्णवः ४७
आचम्यतर्पयेद्देवान्नृषींश्चैवपितॄंस्तथा
निपीड्य वस्त्रमाचम्यधौतवस्त्रेणवेष्टितः ४८
विमलांमृत्तिकांरम्यामादायद्विजसत्तमः
मंत्रेणैवाभिमंत्र्याथललाटादिषुवैष्णवः ४९
धारयेदूर्द्ध्वपुंड्रानियथासंख्यमतंद्रितः
उपास्यविधिवत्संध्यांसावित्रींचजपेद्बुधः ५०
संयतात्मागृहंगत्वापादौप्रक्षाल्यवाग्यतः
आचम्यैकाग्रमनसापूजामंडपमाविशेत् ५१
रम्येशुभ्रतरेपीठेपुष्पोपचयशोभिते
तस्मिन्निवेश्यदेवंतंलक्ष्मीनारायणंप्रभुम् ५२
पूजयेद्विधिनासम्यग्गंधपुष्पाक्षतादिभिः
स्थापनेवास्वयंव्यक्तेगृहार्चायांबिधानतः ५३
श्रौतस्मार्तागमोक्तानामर्चनंविधिनाद्विजः
कुर्याद्भक्त्यायथार्हंच विष्णोःप्रयतमानसः ५४
यथोपदिष्टंगुरुणातथाकुर्वीतवैष्णवः
श्रौतंवैखानसंप्रोक्तंवासिष्ठंस्मार्तमुच्यते ५५
पंचरात्रविधानंचदिव्यागममितीरितम्
क्रियालोपंनकर्त्तव्यंविष्णोराराधनंपरम् ५६
आवाहनासनार्घ्याद्यैर्गंधपुष्पाक्षतादिभिः
धूपैर्दीपैश्चनैवेद्यैस्तांबुलाद्यैर्नमस्कृतैः ५७
कुर्यादाराधनंविष्णोर्यथाशक्त्यामुदान्वितः
प्रत्यृचंपुरुषसूक्तेनमूलमंत्रेणवैष्णवः ५८
मंत्रद्वयेनकुर्वीतषोडशैरुपचारकैः
भूयःप्रत्युपचारेषुदद्यात्पुष्पाञ्जलिततः ५९
आवाहयेज्जगन्नाथंमुद्रयाचैववैष्णवः
आसनंतुयथादद्यात्पुष्पकेणचमुद्रया ६०
दीपार्घ्याचमनंस्नानंपात्रस्थैर्विमलैर्जलैः

मंगलद्रव्यसंयुक्तैस्तुलसीदलमिश्रितैः ६१
दद्यात्प्रत्युपचारंतुमूलमंत्रद्वयेनच
सुवासितेनतैलेनकुर्यादभ्यंजनंततः ६२
कस्तूर्याचंदेनेनापिकुर्यादुद्वर्त्तनादिकम्
सुगंधवासितैस्तोयैः स्नाप्यमंत्रयुतैः शुभैः ६३
वस्त्रैराभरणैर्दिव्यैरलंकृत्ययथाविधि
मधुपर्कंततोदद्याद्गंधंदद्यात्सुवासितम् ६४
सुरभीणिसुपुष्पाणिभक्त्यासम्यङ्निवेदयेत्
धूपंदशांगमष्टांगंदीपंचसुमनोहरम् ६५
नैवेद्यंविविधंदद्यात्पायसापूपमिश्रितम्
कर्पूरंतुसतांबूलंभक्त्याचैवनिवेदयेत् ६६
दीपैर्नीराजनंकृत्वापुष्पमालांसमर्चयेत्
परिणीयप्रणम्याथस्तुत्वास्तोत्रैरनुत्तमैः ६७
गरुडाङ्केशाययित्वामङ्गलार्घ्यंनिवेदयेत्
संकीर्त्यनामभिःपुण्यैःपश्चाद्धोमंसमाचरेत् ६८
हरेर्नैवैद्यशेषेणजहुयाद्वह्निमंडले
प्रत्यृचंपौरुषंसूक्तंश्रीसूक्तंमंगलाह्वयम् ६९
होतव्यमाज्यसंमिश्रंहविषावैदिकानले
प्रोक्तेनमंत्ररत्नेनजुहुयाद्भक्तिसंयुतम् ७०
अष्टोत्तरशतवारमष्टाविंशतिमेव च
यज्ञरूपंमहाविष्णुंध्यायन्वैजुहुयाद्धविः ७१
शुद्धजांबूनदनिभंशंखचक्रगदाधरम्
समस्तवेदवेदांतसांगोपांगयुतंप्रभुम् ७२
देव्याश्रियासमासीनंध्यात्वाहोमंसमाचरेत्
एकैकामाहुतिंपश्चान्नामभिर्जुहुयाद्धविः ७३
नित्यान्भक्तान्समुदिदश्यमहाभागवतोत्तमः
भूलीलाविमलाद्याश्चशक्तयः प्रथमंक्रमात् ७४
अनंतंविहगेंद्रादिदेवतास्तदनंतरम्
वासुदेवादयः पश्चात्तथाशक्त्यादिदेवताः ७५
मूर्त्तयःकेशवाद्याश्चतथासंकर्षणादयः

मत्स्यकूर्मादयश्चैवतथाचक्रादिहेतयः ७६
कुमुदादयश्चत्रिदशास्तथाचंद्रादिदेवताः
इंद्रादिलोकपालाश्चतथाधर्मादिदेवताः ७७
होतव्याः क्रमशस्तस्मिन्संपूज्याश्चविशेषतः
एतद्वैकुंठहोमंतुमहाभागवतोत्तमः ७८
नित्यार्चनविधौनित्यंकुर्वीतसुसमाहितः
गृहार्चनेगृहद्वारिपंचयज्ञविधानतः ७९
दत्त्वाबलिविधानेनपश्चादाचमनंचरेत्
उपविश्यासनेशुभ्रेकृष्णाजिनकुशोत्तरे ८०
मंत्रयोगेप्रकुर्वीतभोगार्थंसुखमात्मनः
सम्यक्पद्मासनासीनोभूतशुद्धिंसमाचरेत् ८१
प्राणायामत्रयंकुर्यान्मन्त्रेणविजितेंद्रियः
उदङ्मुखंततः कृत्वाहृत्पङ्कजमनुत्तमम् ८२
विकासंतस्यकुर्वीतविज्ञानरविणाहृदि
तत्कर्णिकायांवह्न्यर्कशशिबिंबान्यनुक्रमात् ८३
त्रयंत्रयीमयेतस्मिंश्चिंतयेद्वैष्णवोत्तमः
नानारत्नमयंपीठंतेषामुपरिचिंतयेत् ८४
तस्मिन्हृत्पद्ममूलांतेबालार्कसदृशद्युतिम्
अष्टैश्वर्यदलंपद्मंमंत्राक्षरमयंचरेत् ८५
तस्मिन्देव्यासमासीनंकोटिशीतांशुसंनिभम्
चतुर्भुजंसुंदरांगंशंखचक्रगदाधरम् ८६
पद्मपत्रविशालाक्षंसर्वलक्षणलक्षितम्
श्रीवत्सकौस्तुभोरस्कंपीतवस्त्रधरंप्रभुम् ८७
विचित्राभरणैर्युक्तंदिव्यमंडनमंडितम्
दिव्यचंदनलिप्तांगंदिव्यपुष्पोपशोभितम् ८८
तुलसीकोमलदलवनमालाविभूषितम्
बालार्ककोटिसदृशंकांत्यादेव्याश्रियासह ८९
सर्वलक्षणलक्षण्यासमाश्लिष्टतनुःशिवम्
एवंध्यात्वाजपेन्मंत्रंसमाहितमनाःशुचिः ९०
सहस्रंशतवारंवायथाशक्त्याऽथवापिच

मनसैवार्चनंकृत्वाविरमेत्तत्रभक्तितः ९१
तदीयानर्च्चयेद्भक्त्यातस्मिन्कालेसमागतान्
तर्पयित्वान्नपानाद्यैरनुव्रज्यविसर्जयेत् ९२
अर्च्चयित्वापितृन्देवांस्तर्पयेच्चविधानतः
संपूज्यातिथिभृत्यांश्चभुंजीयातांचदम्पती ९३
यक्षराक्षस भूतानामर्चनंवर्जयेत्सदा
योमोहात्कुरुतेविप्रःसचांडालोभवेद्ध्रुवम् ९४
यक्षाणांचपिशाचानांमद्यमांसभुजांतथा
दिवौकसांतुभजनंसुरापानसमंस्मृतम् ९५
ब्रह्मराक्षसवेतालयक्षभूतार्चनंनृणाम्
कुंभीपाकमहाघोरनरकप्राप्तिसाधनम् ९६
कोटिजन्मकृतंपुण्यंयज्ञदानक्रियादिकम्
सद्यःसर्वंलयंयातियक्षभूतादिपूजनात् ९७
स्त्रियोवापुरुषोवापियक्षभूतादिकार्च्चनात्
कल्पकोटिसहस्राणिकल्पकोटिशतानिच ९८
क्रिमिर्भूत्वाथविष्ठायांपितृभिः सहमज्जति
यक्षाणांचपिशाचानांतामसानांदिवौकसाम् ९९
निवेदितान्नंयोऽश्नातिपूयशोणितभुग्भवेत्
यक्षान्भूतगणांश्चान्यान्क्रूरान्वैब्रह्मराक्षसान् १००
उद्दिश्यभुङ्क्तेयोविप्रःसद्यश्चाण्डालएवसः
यानारीपूजयेद्यक्षान्पिशाचोरगराक्षसान् १०१
सायातिनरकंघोरंकालसूत्रमधोमुखी
पितृभिःसहकल्पांतमुषित्वातत्रदारुणे १०२
लिहन्मूत्रपुरीषंवैकृच्छ्रात्सूचिमुखैस्तथा
कृमिभिर्भक्षमाणांगोयावदाभूतसंप्लवम् १०३
पश्चाद्भूमौदशाहेषुजायतेशतसंख्यया
तस्माद्यक्षादिकानांचदेवानामर्च्चनंत्यजेत् १०४
स्वतंत्रपूजनं यत्रवैदिकानामपित्यजेत्
अर्च्चयित्वाजगद्वंद्यंदेवंनारायणंहरिम् १०५
तदावरणसंस्थानंदेवस्यपरितोऽर्च्चयेत्

हरेर्भुक्तावशेषेणबलितेभ्योविनिःक्षिपेत् १०६
होमंचैवप्रकुर्वीततच्छेषेणैववैष्णवः
हरेर्निवेदितुंसम्यग्देवेभ्योजुहुयाद्धविः १०७
पितृभ्यश्चापितद्दद्यात्सर्वमानंत्यमाप्नुयात्
प्राणिनांपीडनंयत्तद्विदुषांनिरयायवै १०८
अदत्तंचैवयत्किंचित्परस्वंगृह्यतेनरैः
स्तेयंतद्विद्धिगिरिजेनरकस्यैवकारणम् १०९
लशुनंमद्यपानादिमूलकंगृंजनंतथा
तिलपिष्टंशिग्रुबिल्वंतथाकोशातकींतथा ११०
अलाबुंचैववार्ताकंबीजालद्यंकवचानिच
एवमन्यान्यभक्ष्याणिशास्त्रदृष्टानिवैनरः १११
खादन्नरकमाप्नोतिविचित्रमशिवंतथा
अवैष्णवानांयच्चान्नंपतितानांतथैवच ११२
अनर्पितंतथाविष्णोःश्वमांससदृशंभवेत्
यक्षराक्षसभूतान्नंसुरामद्यंचगृञ्जनम् ११३
योऽश्नातिनिरयंयातिपूयशोणितभोजनम्
एतैः संस्थापनस्पर्शसहवासादिभिर्नरः ११४
तेपियान्त्येवनिरयंविरामूत्रकृमिभोजनम्
पतितानांचसंसर्गात्पाखंडानांतथैवच ११५
सर्वयज्ञस्यभोक्तारंपुराणंपुरुषोत्तमम्
ज्ञात्वासर्वंप्रकुर्वीतनित्यनैमित्तिकाः क्रियाः ११६
यक्षराक्षसभूताश्चकूष्माराडगणभैरवाः
नार्च्चनीयाःसदादेविस्वर्गलोकमभीप्सुभिः ११७
यक्षराक्षसभूतानामर्च्चनंवर्जयेद्द्विजः
पैशाचत्वमवाप्नोतिकल्पकोटिशतत्रयम् ११८
तस्माद्राक्षसभूतानामर्चनंप्रतिषिध्यते
कल्पकोटिसहस्राणिकल्पकोटिशतानिच ११९
रौरवंनरकंयातियक्षभूतगणार्चनात्
शंखचक्रादिभिश्चिह्नैरन्यैः प्रियतमैर्हरेः १२०
रहितःसर्वधर्मेभ्यः प्रच्युतोनरकंव्रजेत्

अगम्यागमनाद्धिंसापरद्रव्यापहारणात् १२१
अभक्ष्यभक्षणात्सद्योनरकंसमवाप्नुयात्
यस्तुपाणिगृहीतांचहित्वाऽन्यायोस्त्रियंव्रजेत् १२२
अगम्यागमनंतद्धिसद्योनरककारकम्
पतितानांचसंसर्गात्पाखंडानांतथैवच १२३
विकर्मस्थानांचतथायात्येवनिरयंनरः
संसर्गिणांचसंसर्गंतत्संसर्गमपित्यजेत् १२४
वैष्णवःकुलमेकंतुवर्जयेत्पापसंयुतम्
एकांतीसंत्यजेद्ग्रामंमहापातकमिश्रितम् १२५
तथैवपरमेकान्तीतद्देशमपिवर्जयेत्
स्वकर्म्मज्ञानभक्त्यादिसाधनंवैष्णवंस्मृतम् १२६
हरेराज्ञानुरूपेणकर्मज्ञानादियश्चरेत्
सएकांतीभवेद्विप्रोवासुदेवपरायणः १२७
अकृत्यंवैष्णवः पापबुद्ध्यासम्यक्परित्यजेत्
एकांतीसंत्यजेच्छास्त्रंदूषणान्मनसापिच १२८
तथैवपरमैकांतीहेयबुद्ध्यापरित्यजेत्
नित्यंनैमित्तिकंकाम्यंकृत्यंतुत्रिविधंस्मृतम् १२९
ज्ञानंतथैवलोकेऽस्मिन्मुनिभिःसंप्रकीर्तितम्
कृत्याकृत्यविवेकंचपरलोकस्यचिंतनम् १३०
तत्प्राप्तिसाधनंविष्णोःस्वरूपज्ञानमेवच
भक्तियुक्तोभवेद्भक्तोनवधासाप्रकीर्तिता १३१
सुदर्शनोद्धर्वपुंड्रादितच्चिह्नैरंकनंशुभम्
सद्गुरोमंत्रपठनमर्चनंविधिनाहरेः १३२
स्मरणंकीर्तनंविष्णोःसेवाचपरमात्मनः
प्रणामस्तस्यपुरतस्तदीयानांचपूजनम् १३३
प्रसादतीर्थसेवाचभक्तिर्नवविधास्मृता
यस्मात्प्रपद्यतेदेवंशरणंवैष्णवोहरिम् १३४
प्रपत्तिःसातुविज्ञेयात्रिविधासंप्रकीर्तिता
तामसीराजसीचैवसात्विकीत्रिविधास्मृता १३५
सापित्रिधाकृतासिद्धिःसामान्यासर्वदेहिनाम्

एतच्चतुष्टयंदेविहेयंसंत्यज्यवैष्णवः १३६
उपायभूतंब्रह्मैवमवलंबेतवैष्णवम्
उपायभावात्संत्यज्यकर्मज्ञानादिकंनरः १३७
कुर्वीतभगवत्प्रीत्यैमहाभागवतोत्तमः
त्रिकालमर्चयेद्विष्णुंभक्त्यावैपुरुषोत्तमम् १३८
नैमित्तिकेविशेषेणपूजयेद्विधिनाशुभे
प्रत्यहंकार्तिकेमासिजातीपुष्पैःसमर्चयेत् १३९
दद्यादखंडंदीपंचनियतात्माद‍ृढव्रतः
ब्राह्मणान्भोजयित्वांतेहरिसायुज्यमाप्नुयात् १४०
धनुष्युषसिदेवेशंमासमेकंनिरंतरम्
अर्चयेदुत्पलैर्देविकरवीरैः सितासितैः १४१
धूपदीपैश्चनैवेद्यैर्यथाशक्त्यानिवेदयेत्
समाप्तौभोजयेद्विप्रान्महाभागवतोत्तमान् १४२
अश्वमेधसहस्रस्यफलमाप्नोत्यसंशयम्
तपोमास्युदितेभानौस्नात्वानद्यांविशेषतः १४३
अर्च्चयेन्माधवंपुष्पैरुत्पलैश्चशुभानने
पायसंसघृतंदिव्यंभक्त्यातत्रनिवेदयेत् १४४
स्नात्वा संपूजयेद्विष्णुंमासमेकंनिरंतरम्
शर्करांबुयुतंनित्यमुद्यानंविनिवेदयेत् १४५
वैष्णवान्पूजयेद्भक्त्यामासान्तेशुभदर्शने
मधुमासितथानित्यंबकुलैश्चंपकैरपि १४६
पूजयेज्जगतामीशंगुडान्नंचनिवेदयेत्
मासांतेवैष्णवान्विप्रान्भोजयेत्सुसमाहितः १४७
सहस्रवार्षिकींपूजांप्रतिनित्यमवाप्नुयात्
माधवेपूजयेद्देवंशतपत्रैर्महोत्पलैः १४८
पूजयित्वाविधानेनदध्यन्नंफलसंयुतम्
गुडोदकंचभक्त्यावैतस्मिन्देविनिवेदयेत् १४९
लक्ष्म्यायुक्तोजगन्नाथः प्रीतोभवतिपार्वति
शुक्रेतुशुक्लकमलैःपाटलैःकुमुदोत्पलैः १५०
अर्चयित्वाहृषीकेशमन्नंचूतफलैर्युतम्

निवेदयित्वाभक्त्यावैगवांकोटिप्रदोभवेत् १५१
वैष्णवान्भोजयित्वाथसर्वमानंत्यमाप्नुयात्
आषाढेदेवदेवेशंलक्ष्मीभर्तारमच्युतम् १५२
श्रीपुष्पैरर्चयेन्नित्यंपायसान्नंनिवेदयेत्
मासान्तेभोजयेद्विप्रान्महाभागवतोत्तमान् १५३
षष्टिवर्षसहस्रस्यपूजांप्राप्नोत्यसंशयः
नभोमास्यर्चयेद्विष्णुंपुन्नागैःकेतकीदलैः १५४
अर्चयित्वाच्युतंभक्त्यानभूयोजन्मभाग्भवेत्
दद्यादपूपान्भक्त्याथशर्कराघृतमिश्रितान् १५५
ब्राह्मणान्भोजयेत्तद्वत्सर्वमानंत्यमाप्नुयात्
नभस्येऽप्यर्चयेदीशंकुंदैःकुरबकैरपि १५६
क्षीरान्नंगुडसंमिश्रंभक्त्यातत्रनिवेदयेत्
गवांकोटिप्रदानस्यप्रत्यहंफलमाप्नुयात् १५७
नीलोत्पलैरिषेमासिपूजयेन्मधुसूदनम्
भक्त्यानिवेदयेत्तस्मिन्क्षीरमापूपमिश्रितम् १५८
कल्पकोटिसहस्राणिकल्पकोटिशतानिच
वैष्णवंलोकमाप्नोतिमुदितः स्वजनैर्वृतः १५९
ऊर्जेमासितथादेविकोमलैस्तुलसीदलैः
पूजयित्वाच्युतंभक्त्यातत्सायुज्यमवाप्नुयात् १६०
क्षीराज्यशर्करोपेतमन्नंवैपायसंतथा
अपूपंचक्रमेणैवभक्त्यासम्यङ्निवेदयेत् १६१
अमायांमंदवारेचवैष्णवर्क्षेतथैवच
रविसंक्रमेव्यतीपातेग्रहणंचंद्रसूर्ययोः १६२
विशेषेणार्चयेद्विष्णुंयथाशक्त्यावरानने
गुरोरुत्क्रांतदिवसेजन्मर्क्षेषुतथाहरेः १६३
इष्टिंचवैष्णवींकुर्याच्छक्त्यावैद्विजसत्तमः
दद्यात्पुष्पांजलितत्रप्रत्यर्चंवेदसंमितम् १६४
पारणंचापिकुर्वीतचरुणापायसेनवा
वैष्णवान्भोजयेद्विप्राञ्छक्त्यादद्याच्चदक्षिणाम् १६५
कुलकोटिंसमुधृत्यवैष्णवंपदमाप्नुयात्

सर्ववेदैरशक्तश्चेद्यष्टुंभागवतोत्तमम् १६६
वैष्णवैरनुवाकैर्वासप्तरात्रंनिरंतरम्
पुष्पांजलिसहस्रंतुहोमंचप्रत्यहंचरेत् १६७
प्रीतयेवाभगवतः प्रतिश्लोकंयजेदबुधः
अथवामंत्ररत्नंहिसप्तरात्रंनिरंतरम् १६८
अष्टोत्तरसहस्रंतुजुहुयाद्धविषायजेत्
विशेषेणार्चयेद्विद्वान्महाभागवतोत्तमान् १६९
अंतेचावभृथंकुर्याद्यथाविभवसारतः
वैष्णवैरनुवाकैश्चकुर्यादवभृथंद्विजः १७०
अत्रस्नात्वाविधानेनयथाशक्त्याद्विजोत्तमः
शुभेपात्रांतरेरम्येपादौप्रक्षाल्यभक्तितः १७१
अर्चयेद्गंधपुष्पाद्यैर्वस्त्रैराभरणादिभिः
तांबूलेनफलैर्वापियथाशक्त्यासमर्चयेत् १७२
भोजयित्वान्नपानाद्यैःप्रणम्यचपुनःपुनः
आसीमांतमनुव्रज्यनमस्कृत्यविसर्जितम् १७३
पुनः प्रणम्यभक्त्याथशनैस्तत्रनिवर्त्तितः
गृहंप्रविश्यदेवेशंपूजयेत्प्रयतात्मवान् १७४
एवमभ्यर्चयेद्विष्णुंयावज्जीवमतंद्रितः
तदीयांश्चविशेषेणपूजयेत्सर्वदाशुभे १७५
आराधनानांसर्वेषांविष्णोराराधनंपरम्
तस्मात्परतरंदेवितदीयानांसमर्चनम् १७६
अर्चयित्वापिगोविंदंतदीयान्नार्चयेत्पुनः
नसभागवतोज्ञेयःकेवलंदांभिकःस्मृतः १७७
पुमांस्तस्मात्प्रयत्नेनवैष्णवान्पूजयेत्सदा
सर्वंतरतिदुःखौघंमहाभागवतार्चनात् १७८
एवमुक्तंमयादेविविष्णोराराधनंपरम्
नित्यनैमित्तिकंचैवतदीयानांचपूजनम् १७९
पौरुषंतस्ययाथात्म्यंफलसाधनमेवच
तस्यावसथदेहंचकर्माद्यपिचतुष्टयम्
तवप्रोक्तंमयादेविकिमन्यच्छ्रोतुमिच्छसि १८०

इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहितायामुत्तरखंडे
उमामहेश्वरसंवादेविष्णुपूजाविधानवैष्णवाचारकथनंनाम
त्रिपंचाशदधिकद्विशततमोऽध्यायः २५३

चतुःपञ्चाशदधिकद्विशततमोऽध्यायः

वसिष्ठउवाच-
एवमुक्तातुसादेविपतिनाशूलपाणिना
प्रणिपत्यमहात्मानमुवाचप्रांजलिस्तदा १
पार्वत्युवाच-
साधूक्तंहित्वयानाथवैष्णवंधर्ममुत्तमम्
गुह्याद्गुह्यतमंविष्णोःस्वरूपंपरमात्मनः २
धन्यास्मिकृतकृत्यास्मिसर्वदेवनमस्कृत
तवप्रसादाद्देवेशमर्चयामिसनातनम् ३
वसिष्ठउवाच-
ततस्तद्वचनं श्रुत्वासभवस्त्रिपुरांतकः
समाश्लिष्यावदद्देवींप्रहृष्टेनांतरात्मनाः ४
रुद्रउवाच-
साधुसाधुमहादेविसाधुसाधुवरानने
अर्चयस्वहृषीकेशंलक्ष्मीभर्त्तारमच्युतम् ५
कृतकृत्योऽस्म्यहंभद्रेवैष्णव्याभार्ययात्वया
गुरुणातवचार्वंगिवामदेवेन धीमता ६
अनुज्ञातार्चयस्वेशंपुराणंपुरुषोत्तमम्
गुरूपदेशमार्गेणपूजयित्वैवकेशवम्
प्राप्नोतिवाछितंसर्वंनान्यथाभूधरात्मजे ७
वसिष्ठउवाच-
एवमुक्तातदादेविवामदेवांतिकंनृप
जगामसहसाहृष्टाविष्णुपूजनलालसा ८
समेत्यतंगुरुंदेविपूजयित्वाप्रणम्यच
विनीताप्रांजलिर्भूत्वाउवाचमुनिसत्तमम् ९
पार्वत्युवाच-

भगवंस्त्वत्प्रसादेनसम्यगाराधनंहरेः
करिष्यामिद्विजश्रेष्ठत्वमनुज्ञातुमर्हसि १०
वसिष्ठउवाच-
इत्युक्तस्तुतयादेव्यावामदेवोमहामुनिः
तस्यैमंत्रवरंश्रेष्ठंददौसविधिनागुरुः ११
नाम्नांसहस्रंविष्णोश्चप्रोक्तवान्मुनिसत्तमः
निवेदयित्वापूजायाविधानमपिदेशिकः
उवाचपरमप्रीत्यापार्वतींसंशितव्रताम् १२
वामदेवउवाच-
अर्चयित्वाहृषीकेशंप्रातर्नित्यंवरानने
सहस्रनामपठनंकुरुष्वतदनंतरम् १३
वसिष्ठउवाच-
इत्युक्तातेनगुरुणाप्रहृष्टेनांतरात्मना
पूजयित्वानमस्कृत्यपुनरायात्स्वमालयम् १४
शिक्षितागुरुणातेनवामदेवेनपार्वती
ततः कतिपयाहस्तुद्वादश्यांवृषभध्वजः १५
कैलासशिखरेरम्येविष्णुमाराध्यशंकरः
उपविष्टस्ततोभोक्तुंपार्वतींशंकरोऽब्रवीत् १६
शंकरउवाच-
पार्वत्येहिमयासार्द्धंभोक्तुंभुवनवंदिते
वसिष्ठउवाच-
तमाहपार्वतीदेवीजप्त्वानामसहस्रकम् १७
ततोभोक्ष्याम्यहंदेवभुज्यतांभवताप्रभो
ततस्तांपार्वतींप्राहप्रहसन्परमेश्वरः १८
शंकरउवाच-
धन्यासिकृतकृत्यासिविष्णुभक्तासिपार्वति
दुर्लभावैष्णवीभक्तिर्भागधेयंविनेश्वरि १९
रामरामेतिरामेतिरमेरामेमनोरमे
सहस्रनामतत्तुल्यंरामनामवरानने २०
रकारादीनिनामानिशृण्वतोममपार्वति

मनःप्रसन्नतांयातिरामनामाभिशंकया २१
रामेत्युक्त्वामहादेविभुंद्वसार्धमयाधुना
वसिष्ठउवाच-
ततोरामेतिनामोक्त्वासहभुंक्त्वाऽथपार्वती २२
रामेत्युक्तामहादेवीशंभुनासहसंस्थिता
पप्रच्छशंकरंदेवंप्रीतिप्रणवमानसा २३
पार्वत्युवाच-
सहस्रनामभिस्तुल्यंरामनामत्वयोदितम्
तस्यापराणिनामानिसंतिचेद्रावणद्विषः
कथ्यतांममदेवेशतत्रमेभक्तिरुत्थिता २४
श्रीमहादेवउवाच-
शृणुनामानिवद्म्यामिरामचंद्रस्यपार्वति
लौकिकावैदिकाः शब्दाःयेकेचित्संतिपार्वति २५
नामानिरामचंद्रस्यसहस्रंतेषुचाधिकम्
तेषुचात्यंतमुख्यंहिनाम्नामष्टोत्तरंशतम् २६
विष्णोरेकैकनामैवसर्ववेदाधिकंमतम्
तादृङ्नामसहस्राणिरामनामसमानिच २७
यत्फलंसर्ववेदानांमंत्राणांजपतःप्रिये
तत्फलंकोटिगुणितंरामनाम्नैवलभ्यते २८
नामानिशृणुरामस्यमुख्यानिशुभदर्शने
ऋषिभिःपरिगीतानितानिवद्म्यामितेप्रिये २९
ॐश्रीरामोरामचंद्रश्चरामभद्रश्चशाश्वतः
राजीवलोचनः श्रीमान्राजेंद्रोरघुपुंगवः ३०
जानकीवल्लभोजैत्रोजितामित्रोजनार्दनः
विश्वामित्रप्रियोदांतःशरण्यत्राणतत्परः ३१
वालिप्रमथनोवाग्मीसत्यवाक्सत्यविक्रमः
सत्यव्रतोव्रतफलःसदाहनुमदाश्रयः ३२
कौशलेयःखरध्वंसीविराधवधपंडितः
विभीषणपरित्राताादशग्रीवशिरोहरः ३३
सप्ततालप्रभेत्ताचहरकोदंडखंडनः

जामदग्निमहादर्प्पदलनस्ताडकांतकृत् ३४
वेदांतपारोवेदात्माभवबंधैकभेषजम्
दूषणत्रिशिरोरिश्चत्रिमूर्त्तिस्त्रिगुणस्त्रयी ३५
त्रिविक्रमस्त्रिलोकात्मापुरायचारित्रकीर्त्तनः
त्रिलोकरक्षकोधन्वीदंडकाररायवासकृत् ३६
अहल्यापावनश्चैवपितृभक्तोवरप्रदः
जितेंद्रियोजितक्रोधोजितलोभोजगद्गुरुः ३७
ऋक्षवानरसंघातीचित्रकूटसमाश्रयः
जयंतत्राणवरदःसुमित्रापुत्रसेवितः ३८
सर्वदेवाधिदेवश्चमृतवानरजीवनः
मायामारीचहंताचमहाभागोमहाभुजः ३९
सर्वदेवस्तुतः सौम्योब्रह्मरायोमुनिसत्तमः
महायोगीमहोदारः सुग्रीवस्थिरराज्यदः ४०
सर्वपुरायाधिकफलःस्मृतः सर्वाघनाशनः
आदिपुरुषोमहापुरुषःपरमः पुरुषस्तथा ४१
पुरायोदयोमहासारःपुराणपुरुषोत्तमः
स्मितवक्त्रोमितभाषीपूर्वभाषीचराघवः ४२
अनंतगुणगंभीरोधीरोदांतगुणोत्तरः
मायामानुषचारित्रोमहादेवाधिपूजितः ४३
सेतुकृज्जितवारीशःसर्वतीर्थमयोहरिः
श्यामांगःसुंदरःशूरःपीतवासाधनुर्द्धरः ४४
सर्वयज्ञाधिपोयज्ञोजरामरणवर्जितः
शिवलिगप्रतिष्ठातासर्वाद्यगुणवर्जितः ४५
परमात्मापरब्रह्मसच्चिदानंदविग्रहः
परंज्योतिःपरंधामपराकाशःपरात्परः ४६
परेशःपारगःपारःसर्वभूतात्मकःशिवः
इति श्रीरामचन्द्रस्यनाम्नामष्टोत्तरंशतम् ४७
गुह्याद्गुह्यतरंदेवितवस्नेहात्प्रकीर्तितम्
यःपठेच्छृणुयाद्वापिभक्तियुक्तेनचेतसा ४८
सर्वैःप्रमुच्यतेपापैः कल्पकोटिशतोद्भवैः

जलानिस्थलतांयांतिशत्रवोयांतिमित्रताम् ४९
राजानोदासतांयांतिवह्नयोयांतिसौम्यताम्
आनुकूल्यंचभूतानिस्थैर्यंयांतिचलाःश्रियः ५०
अनुग्रहंग्रहायांतिशांतिमायांत्युपद्रवाः
पठतोभक्तिभावेननरस्यगिरिसंभवे ५१
पठेत्परमयाभक्त्यातस्यवश्यंजगत्त्रयम्
यंयंकामंप्रकुरुतेतंतमाप्नोतिकीर्त्तनात् ५२
कल्पकोटिसहस्राणिकल्पकोटिशतानिच
वैकुंठेमोदतेनित्यंदशपूर्वैर्दशापरैः ५३
रामंदूर्वादलश्यामंपद्माक्षंपीतवाससम्
स्तुवंतिनामभिर्द्दिव्यैर्नतेसंसारिणोजनाः ५४
रामायरामभद्रायरामचंद्रायवेधसे
रघुनाथायनाथायसीतायाः पतयेनमः ५५
इमंमंत्रंमहादेवि जपन्नेवदिवानिशम्
सर्वपापविनिर्मुक्तोविष्णुसायुज्यमाप्नुयात् ५६
इतितेरामचंद्रस्यमाहात्म्यंवेदसंमितम्
कथितंवैमयासुभ्रूस्तवप्रीत्याशुभाह्वयम् ५७
वसिष्ठउवाच-
तच्छ्रुत्वाशंकरेणोक्तंमाहात्म्यंपरमात्मनः
प्रहर्षमतुलंलेभेआनंदाश्रुजलाप्लुता ५८
प्रणम्यप्राहदेवेशंभर्तारंवृषभध्वजम्
पार्वत्युवाच-
अहोमाहात्म्यमतुलंरामस्यपरमात्मनः
श्रोत्रतृप्तिर्हिमेनस्यात्कल्पायुतशतैरपि ५९
धन्याहंकृतकृत्यास्मिसर्वमुक्तंत्वयानघ
त्वत्प्रसादाद्धरेर्भक्तिर्जन्मजन्मनिचास्तुमे ६०
वसिष्ठउवाच-
एवमुक्त्वास्वभर्तारंगौरीभागवतोत्तमा
रामायरामभद्रायरामचंद्रायवेधसे
रघुनाथायनाथायसीतायाः पतयेनमः ६१

इममेव जपन्मंत्रंसर्वावस्थासुपार्वती
उवासचसुखेनैवकैलासेपतिनासह ६२
एतत्तेसर्वमाख्यातंगुह्याद्गुह्यतमंनृप
रुद्रप्रोक्तानिशास्त्राणितामसान्येवपार्थिव ६३
संमोहनार्थंलोकानांप्रोक्तवान्वृषभध्वजः
रहसिप्रोक्तवान्देव्याइदमेकंहरःप्रभुः ६४
यथार्थमर्थंगुह्यंचसारंमंत्रस्यभूपते
देव्याप्रीत्यैमहादेवःकथयामासतत्परः ६५
उमामहेश्वरंराजन्संवादमिमम‌द्भुतम्
यःपठेच्छृणुयाद्वापिभक्तियुक्तेनचेतसा ६६
ससर्ववंद्यःसर्वज्ञोमहाभागवतोभवेत्
सर्वधर्मविनिमुक्तःप्राप्नोतिपरमंपदम् ६७
धन्यःखलुभवान्लोकेपार्थिवेंद्रमहाबल
त्वदन्वयेहरिः श्रीमान्पुराणःपुरुषोत्तमः ६८
उत्पत्स्यतेदाशरथिः सर्वलोकहितायवै
तस्मादिक्ष्वाकवःपूज्याः सुराणामपिपार्थिव ६९
येषांजातोहिभगवान्रामोराजीवलोचनः

इति श्रीपाद्मेमहापुराणेपंचपचाशत्साहस्र्यांसंहितायामुत्तरखंडे
उमामहेश्वरसंवादे रामचंद्राष्टोत्तरशतनामकथनंनाम
चतुःपंचाशदधिकद्विशततमोऽध्यायः २५४

पञ्चपञ्चाशदधिक द्विशततमोऽध्यायः

दिलीपउवाच-
कथितंभवताब्रह्मन्सर्वधर्ममशेषतः
सामान्यंचविशिष्टंचस्वरूपंपरजीवयोः १
स्वर्गापवर्गौकथितौसाधनंचतयोरपि
धन्योऽस्म्यहंद्विजश्रेष्ठत्वत्प्रसादात्सदागुरो २
एकमन्यंद्विजश्रेष्ठपृच्छामित्वांकुतूहलात्
कथयस्वयथातथ्यमपि वात्सल्यगौरवात् ३
महाभागवतश्रेष्ठोरुद्रस्त्रिपुरहंतकः

कस्माद्विगर्हितंरूपंप्राप्तवान्सहभार्य्यया ४
योनिलिंगस्वरूपंचकथंस्यात्सुमहात्मनः
पंचवक्त्रश्चतुर्बाहुःशूलपाणिस्त्रिलोचनः ५
कथंविगर्हितंरूपंप्राप्तवान्द्विजपुंगव
एवंसर्वंसमाचक्ष्वमित्रावरुणनंदन ६
वसिष्ठउवाच-
शृणुराजन्प्रवक्ष्यामियन्मांपृच्छसिगौरवात्
विशुद्धहृदयेपुंसांबुद्धिः श्रेयसिजायते ७
स्वायंभुवोमनुः पूर्वंमंदरेपर्वतोत्तमे
जगाममुनिभिःसार्द्धंदीर्घसत्रमनुत्तमम् ८
तस्मिन्समागताः सर्वेमुनयः शंसितव्रताः
नानाशास्त्रविदः श्रेष्ठाबालसूर्य्यानलप्रभाः ९
सर्ववेदविदोविप्राः सर्वधर्मपरायणाः
वर्तमानेमहासत्रेमुनयः क्षीणकल्मषाः १०
अन्वेष्टुंदेवतातत्वंमिथः प्रोचुस्तपोधनाः
विप्राणांवेदविदुषांकः पूज्योदेवतावरः ११
ब्रह्मविष्णुमहेशानांकःस्तुतोमुक्तिदोनृणाम्
कस्यपादोदकंसेव्यंभुक्तोच्छिष्टंचपावनम् १२
कोऽव्ययःपरमंधामपरमात्मासनातनः
कस्यप्रसादंतीर्थंचपितृणांतृप्तिदंभवेत् १३
तेषांसमुपविष्टानांइतिवादोमहानभूत्
रुद्रमेकमितिप्रोचुःकेचिदत्रमहर्षयः १४
ब्रह्मैवपूज्यइत्यन्येवदंतिमुनिसत्तमाः
सूर्यएवात्मनांपूज्यइत्यन्येप्राहुरुत्तमाः १५
योऽसोसर्वगतः श्रीमाञ्छ्रीपतिः पुरुषोत्तमः
अव्ययःपुंडरीकाक्षोवासुदेवः परात्परः १६
अनादिनिधनो विष्णुःसएवपरमेश्वरः
संपूज्योदेवताश्रेष्ठइत्यन्येचोचिरेद्विजाः १७
तेषांविवदतांतत्रमनुःस्वायंभुवोऽब्रवीत्
शुद्धसत्वमयोयोऽसौकल्याणगुणवान्प्रभुः १८

पुंडरीकेक्षणः श्रीमाञ्छ्रीपतिः पुरुषोत्तमः
विप्राणांवेदविदुषांएकएवार्चितःप्रभुः १९
विप्राणांनेतरेपूज्यारजस्तमविमिश्रिताः
इतितस्यवचः श्रुत्वासर्वएवमहर्षयः
भृगुंतपोनिधिंविप्रंप्रोचुःप्रांजलयस्तथा २०
ऋषयऊचुः-
अस्माकंसंशयंछेत्तुंत्वंसमर्थोऽसिसुव्रत
ब्रह्मविष्णुमहेशानामंतिकंब्रजसुव्रत २१
गत्वातेषांसमीपंतुतथादृष्ट्वातुविग्रहान्
शुद्धसत्वगुणंतेषांयस्मिन्संविद्यतेमुने २२
सएवपूज्यो विप्राणांनेतरस्तुकदाचन
शुद्धसत्वमयःसाक्षाद्ब्रह्मरायःसभविष्यति २३
तीर्थप्रसादवाँल्लोकेविप्राणांसभविष्यति
देवतानांपितॄणांचतस्योच्छिष्टंसुपावनम् २४
तस्माद्याहिमुनिश्रेष्ठविबुधानांनिवासनम्
क्षिप्रंकुरुमुनिश्रेष्ठसर्वलोकहितंप्रभो २५
एवमुक्तस्ततस्तूर्णंकैलासंमुनिसत्तमः
जगामवामदेवेनयत्रास्तेवृषभध्वजः २६
गृहद्वारमुपागम्यशंकरस्यमहात्मनः
शूलहस्तंमहारौद्रंनंदिंदृष्ट्वाब्रवीद्द्विजः २७
संप्राप्तोऽहभृगुर्विप्रोहरंद्रष्टुंसुरोत्तमम्
निवेदयस्वमांशीघ्रंशंकरायमहात्मने २८
तस्यतद्वचनंश्रुत्वानंदीसर्वगणेश्वरः
उवाचपरुषंवाक्यंमहर्षिममितौजसम् २९
असांनिध्यंप्रभोस्तस्यदेव्याक्रीडतिशंकरः
निवर्त्तस्वमुनिश्रेष्ठयदिजीवितुमिच्छसि ३०
एवंनिराकृतस्तेनतत्रातिष्ठन्महातपाः
बहूनिदिवसान्यस्मिन्गृहद्वारिमहेशितुः ३१
नारीसंगममत्तोऽसौयस्मान्मामवमन्यते
योनिलिगस्वरूपंवैतस्मात्तस्यभविष्यति ३२

ब्राह्मणंमावजानातितमसासमुपागतः
अब्रह्मण्यत्वमापन्नोह्यपूज्योऽसौद्विजन्मनाम् ३३
तस्मादन्नंजलंपुष्पंतस्मैदत्तंहविस्तथा
निर्माल्यमस्यतत्सर्वंभविष्यतिनसंशयः ३४
एवंशप्त्वामहातेजाःशंकरंलोकपूजितम्
उवाचगणमत्युग्रंनंदिंशूलधरंनृप ३५
रुद्रभक्ताश्चये लोकेभस्मलिंगास्थिधारिणः
तेपाखंडत्वमापन्नावेदबाह्याभवंतुवै ३६
एवंशप्त्वामुनिस्तत्ररुद्रंत्रिपुरहंतकम्
जगामब्रह्मलोकंवैसर्वलोकनमस्कृतम् ३७
तत्रदैवैःसहासीनंब्रह्माणंपरमेष्ठिनम्
दृष्ट्वाप्रांजलिनादेवंप्रणनाममहामतिः ३८
प्रणम्यपुरतस्तस्यतूष्णीमासमहातपाः
तंदृष्ट्वामुनिशार्दूलंरजोगुणसमावृतः ३९
नार्चयामासधाताऽसौमहर्षिंसमुपागतम्
प्रत्युत्थानंप्रियंवाक्यंनकृतंतस्यवेधसा ४०
एश्वर्येणैवमहतातस्थौ तत्रांबुजासनः
तंदृष्ट्वारजसोद्रिक्तंमहर्षिः पंकजासनम् ४१
व्याजहारमहातेजावाक्यंलोकपितामहः
रजसामहतोद्रिक्तोयस्मान्मामवमन्यसे ४२
तस्मात्त्वंसर्वलोकानामपूज्यत्वंसमाप्नुहि
एवंशप्त्वामहात्मानंब्रह्माणंलोकपूजितम् ४३
जगामसहसाविप्रोभगवन्मंदिरंभृगुः
प्रविश्यवैष्णवंलोकंक्षीराब्धेरुत्तरेतटे ४४
तत्रस्थितैर्महाभागैः पूज्यमानोयथार्हतः
तत्रानिवार्य्यमाणस्तुप्रविष्टोंतःपुरंद्विजः ४५
प्रविश्यतस्मिन्विमलेविमानेरविसन्निभे
शयानंनागपर्यंकेददर्शकमलापतिम् ४६
लक्ष्मीकरसरोजाभ्यांमृज्यमानपदद्वयम्
तंदृष्ट्वामुनिशार्दूलोभृगुःकोपसमन्वितः ४७

सव्यंपादंप्रचिक्षेपविष्णोर्वक्षसिशोभने
तूर्णमुत्थायभगवान्धन्योस्मीतिवदन्मुदा ४८
हस्ताभ्यांचरणंतस्यपीडयामासहर्षितः
शनैर्मृदित्वातत्पादंमधुरंवाक्यमब्रवीत् ४९
धन्योस्म्यद्यैवविप्रर्षेकृतकृत्योस्मिसर्वदा
त्वत्पादस्पर्शनाद्देहेमंगलंमेभविष्यति ५०
समस्तसंपत्समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः
अपारसंसारसमुद्रसेतवः पुनंतुमांब्राह्मणपादपांसवः ५१
विप्रपादरजोयस्यदेहेतिष्ठतिसर्वदा
गंगादिसर्वतीर्थानितस्यतिष्ठंत्यसंशयम् ५२
इत्युक्त्वासहसोत्थायदेव्यासार्द्धंजनार्दनः
भक्त्यासमर्चयामासदिव्यस्रक्चंदनादिभिः ५३
तंदृष्ट्वामुनिशार्दूलोहर्षपूर्णोऽश्रुलोचनः
उत्थायासनमुख्यात्तंप्रणनामदयानिधिम्
कृतांजलिपुटोभूत्वाहर्षात्प्राहमहातपाः ५४
श्रीभृगुरुवाच–
अहोरूपमहोशांतिरहोज्ञानमहोदया
अहोसुनिर्मलाक्षांतिरहोसत्वगुणंहरेः ५५
नैसर्गिकंशुभंसत्वंतथैवगुणवारिधेः
नान्येषांविद्यतेकिंचित्सर्वेषांत्रिदिवौकसाम् ५६
ब्रह्मरायश्चशररायश्चत्वमेवपुरुषोत्तमः
ब्राह्मणानांत्वमेवेशोनान्यःपूज्यः सुरःक्वचित् ५७
येऽचयंतिसुरानन्यांस्त्वांविनापुरुषोत्तम
तेपाखंडत्वमापन्नाः सर्वलोकविगर्हिताः ५८
विप्राणांवेदविदुषांत्वमेवेज्योजनार्दनः
नान्यः कश्चित्सुराणांतुपूजनीयः कदाचन ५९
अनर्च्याब्रह्मरुद्राद्यारजस्तमोविमिश्रिताः
त्वंशुद्धसत्वगुणवान्पूजनीयोऽग्रजन्मनाम् ६०
त्वत्पादसलिलंसेव्यंपितृणांचदिवौकसाम्
सर्वेषांभूसुराणांचमुक्तिदंकल्मषापहम् ६१

त्वद्भुक्तोच्छिष्टशेषंवैपितॄणांचदिवौकसाम्
भूसुराणांचसेव्यंस्यान्नान्येषांतुकदाचन ६२
इतरेषांतुदेवानामन्नंपुष्पंजलंतथा
अस्पृश्यंतुभवेत्सर्वंनिर्माल्यंसुरयासमम् ६३
तस्माद्वैब्राह्मणोनित्यंपूजयित्वासनातनम्
त्वत्तीर्थंभुक्तमन्नंचभजेतैवानिशंबुधः ६४
नान्यंदेवं तुवीक्षेतब्राह्मणोनचपूजयेत्
नान्यप्रसादंभुंजीतनान्यदायतनंविशेत् ६५
नददातीहयोविप्रः पितॄणांश्राद्धकर्मणि
त्वद्भुक्तमन्नंतीर्थंचतत्सर्वंनिष्फलंभवेत् ६६
कल्पकोटिसहस्राणिकल्पकोटिशतानिच
पतंतिपितरस्तस्यनरकेपूयशोणिते ६७
निवेदितंतवविभोयोजुहोतिददातिवा
देवतानांपितॄणांचतृप्तिरानंत्यमश्नुते ६८
तस्मात्त्वमेवविप्राणांपूज्योनान्योस्तिकश्चन
मोहाद्यः पूजयेदन्यान्सपाखंडीभविष्यति ६९
त्वंहिनारायणः श्रीमान्वासुदेवः सनातनः
विष्णुःसर्वगतोनित्यः परमात्मामहेश्वरः ७०
त्वमेवसेव्योविप्राणांब्रह्मण्यः शुद्धसत्ववान्
पूज्यत्वाद्ब्राह्मणानांवैशुद्धसत्वगुणादपि ७१
सर्वेषामेवदेवानांब्राह्मणत्वमवाप्नुहि
त्वामेवहिसदाविप्राभजंतिपुरुषोत्तमम् ७२
ब्राह्मणास्तेबभूवुस्तुनान्यास्तत्रनसंशयः
ब्रह्मण्योदेवकीपुत्रोब्रह्मण्योमधुसूदनः ७३
ब्रह्मण्यःपुंडरीकाक्षोब्रह्मण्योविष्णुरच्युतः
ब्रह्मण्योभगवान्कृष्णोवासुदेवोऽच्युतोहरिः ७४
ब्रह्मण्योनारसिंहः स्यात्तथा नारायणोऽव्ययः
ब्रह्मण्यः श्रीधरः श्रीशोगोविंदोवामनस्तथा ७५
ब्रह्मण्योयज्ञवाराहः केशवः पुरुषोत्तमः
ब्रह्मण्योराघवः श्रीमान्रामोराजीवलोचनः ७६

ब्रह्मरायःपद्मनाभः स्यात्तथादामोदरः प्रभुः
ब्रह्मरायोमाधवोयज्ञस्तथात्रिविक्रमः प्रभुः ७७
ब्रह्मरायश्चहृषीकेशःपीतवासाजनार्दनः
नमोब्रह्मरायदेवायवासुदेवायशार्ङ्गिणे ७८
नारायणायश्रीशायपुंडरीकेक्षणायच
नमोब्रह्मरायदेवायवासुदेवायविष्णवे ७९
कल्याणगुणपूर्णायनमस्तेपरमात्मने
नमोब्रह्मरायदेवायसर्वदेवस्वरूपिणे ८०
वाराहवपुषेनित्यंत्रयीनाथायतेनमः
नमोब्रह्मरायेदवायनागपर्य्यंकशायिने ८१
राजीवदलनेत्रायराघवायनमोनमः
माययामोहिताः सर्वेदेवाश्चऋषयस्तव ८२
नजानंतिमहात्मानंसर्वलोकेश्वरंप्रभो
त्वांनजानंतिभगवन्सर्ववेदविदोऽपिहि ८३
नामरूपगुणैः श्रीशचारित्रैरपिदुष्कृतैः
परत्वसूचकंसत्वंतववेदितुमीश्वरः ८४
महर्षिभिः प्रेषितोऽहमागतोस्मितवांतिकम्
तवशीलगुणाञ्ज्ञातुंचरणंममकेशव ८५
दत्तंवक्षसिगोविंदतत्क्षंतव्यंकृपानिधे
एवमुक्त्वाभृगुर्देवंप्रणम्यचमुहुर्मुहुः ८६
दिव्यैर्महर्षिभिस्तत्रपूज्यमानोमहात्मभिः
पुनर्जगामहृष्टात्मायज्ञभूमिंशुभाह्वयाम् ८७
समागतंमहात्मानंतत्रदृष्ट्वामहर्षयः
प्रत्युत्थायनमस्कृत्वापूजांचक्रुर्विधानतः ८८
तेषांविज्ञापयामासतत्सर्वंमुनिपुंगवः
रजस्तमगुणोद्रिक्तोविधीशानौसुरोत्तमौ ८९
शप्तौमयानपूज्यौतौविप्राणामृषिसत्तमाः
अब्रह्मरायत्वमापन्नोगर्हितंरूपमास्थितः ९०
शप्तःकैलासशिखरेशंकरस्तमसावृतः
शुद्धसत्वमयोविष्णुःकल्याणगुणसागरः ९१

नारायणः परंब्रह्मविप्राणांदैवतंहरिः
ब्रह्मण्यः श्रीपतिर्विष्णुर्वासुदेवोजनार्दनः ९२
ब्रह्मण्यःपुंडरीकाक्षोगोविंदोहरिरच्युतः
सएवपूज्योविप्राणांनेतरः पुरुषर्षभाः ९३
मोहाद्यःपूजयेदन्यंसपाखंडीभविष्यति
स्मरणादेवकृष्णस्यविमुक्तिः पापिनामपि ९४
तस्यपादोदकंसेव्यंभुक्तोच्छिष्टंचपावनम्
स्वर्गापवर्गदंनृणांब्राह्मणानांविशेषतः ९५
विष्णोर्निवेदितंनित्यंदेवेभ्योजुहुयाद्धविः
पितृभ्यश्चैवतद्दद्यात्सर्वमानंत्यमश्नुते ९६
योनदद्याद्धरेर्भुक्तंपितृणांश्राद्धकर्मणि
अश्नंतिपितरस्तस्यविण्मूत्रंसततंद्विजाः ९७
तस्माद्विष्णोःप्रसादोवैसेवितव्योद्विजन्मनाम्
इतरेषांतुदेवानांनिर्माल्यंगर्हितंभवेत् ९८
सकृदेवहियोश्नातिब्राह्मणोज्ञानदुर्बलः
निर्माल्यंशंकरादीनांसचांडालोभवेद्ध्रुवम् ९९
कल्पकोटिसहस्राणिपच्यतेनरकाग्निना
निर्माल्यंभोद्विजश्रेष्ठारुद्रादीनांदिवौकसाम् १००
रक्षोयक्षपिशाचान्नंमद्यमांससमंस्मृतम्
तद्ब्राह्मणैर्नभोक्तव्यंदेवानांभुंजितंहविः १०१
तस्मादन्यंपरित्यज्यविष्णुमेवसनातनम्
पूजयध्वंद्विजश्रेष्ठायावज्जीवमतंद्रिताः १०२
तद्विष्णोःपरमंधाममन्यंतोगतसंशयाः
तापादिपंचसंस्कारैरन्विष्टाः शुभचेतसः १०३
अप्राकृतंहरिंसम्यगर्चयध्वंद्विजर्षभाः
चक्रांकितभुजाविप्राभवंत्यप्राकृताः शुभाः १०४
चक्रलांछनहीनास्तुप्राकृतास्तामसास्मृताः
तस्मात्प्राकृतसंसर्गपापौघदहनंहरेः १०५
प्रतप्तंबिभृयाच्चक्रंशंखंचभुजमूलयोः
उद्धर्वपुंड्राणिचांगेषुधृत्वाशास्त्रोक्तमार्गतः १०६

अर्चयेन्मंत्ररत्नेनविधिनापुरुषोत्तमम्
तस्यप्रसादसेवांचकुर्य्यान्नित्यमतंद्रितः १०७
तस्यावरणपूजायांत्रिदशानर्चयेत्सदा
तमेवसर्वयज्ञानांभोक्तारंपरमेश्वरम् १०८
ज्ञात्वावैजुहुयाद्दद्याज्जपेद्वैसततंद्विजाः १०९
वसिष्ठउवाच-
एवमुक्तास्तुतेसर्वेऋषयः क्षीणकल्मषाः
नमस्कृत्यभृगुंसम्यगूचुःप्रांजलयस्तदा ११०
ऋषयऊचुः
भगवन्संशयछेत्तात्वमेवद्विजसत्तम
त्वंवैलोकगतिर्ब्रह्मंस्त्वमेवपरमागतिः १११
त्वमेवपरमोधर्मस्त्वमेवपरमंतपः
त्वत्प्रसादाद्वयंविप्रभविष्यामोहिनान्यथा ११२
वसिष्ठउवाच-
एवंस्तुत्वाभृगुंविप्रंसर्वएवमहर्षयः
तस्मात्संप्राप्तमंत्रावैपूजयामासुरच्युतम् ११३
एतत्तेसर्वमाख्यातंप्रसंगात्पार्थिवोत्तम
रामस्यहस्तकमलस्पर्शनाद्वैनृपोत्तम ११४
भविष्यत्यमलंतच्चरूपंलोकविगर्हितम्
राघवः सर्वदेवानांपावनः पुरुषोत्तमः ११५
स्पृष्टादृष्टाश्चतेनैवविमलाःशंकरादयः
सर्वेषामपिदेवानांपितामाताजनार्दनः ११६
त्राताचसर्वलोकानांवात्सल्यगुणसागरः
तमेवशरणंगच्छयदीच्छेत्परमंपदम् ११७
एतत्तेसर्वमाख्यातंपुराणंवेदसंमितम्
ब्रह्मणाकथितंराजन्मनुस्वायंभुवोंतरे ११८
विष्णुभक्तिविनीतस्यशुद्धसत्वस्यनान्यथा
तस्यसंश्रावयेन्नित्यंविमुक्तासाहरेःकथा ११९
शंखचक्रोद्ध्वर्वपुंड्रादिविहितोवाचकः पुमान्
तन्मुखाच्छ्रूयतांनित्यंपुत्रीभवसिनान्यथा १२०

यस्त्विदंश्रावयेन्नित्यंपठेद्वासुसमाहितः
अनन्यभक्तिःश्रीशस्यजायतेतस्यसर्वदा १२१
विद्यार्थीलभतेविद्यांधर्मार्थीधर्ममाप्नुयात्
मोक्षार्थीलभतेमोक्षंकामार्थीलभतेसुखम् १२२
द्वादश्यांश्रवणार्केचसंक्रांतौग्रहणेतथा
अमावस्यांपौर्णमास्यांपठेद्भक्तिसमन्वितः १२३
श्लोकार्द्धंश्लोकपादंवापठेद्यस्तुसमाहितः
अश्वमेधसहस्रस्यफलंप्राप्नोत्यसंशयः १२४
इत्येतत्कथितंगुह्यंपुराणंसंहितात्मकम्
अर्चयस्वहृषीकेशंयदीच्छसिपरमंपदम् १२५
सूतउवाच-
एवमुक्तोवसिष्ठेनगुरुणानृपसत्तमः
प्रणम्यचगुरुंराजापूजयित्वायथार्हतः १२६
तस्मात्संप्राप्तमंत्रोऽसौविधिनाद्विजसत्तमात्
अर्चयित्वाहृषीकेशंयावज्जीवमतंद्रितः
कालेहरिपदंप्रापयोगिगम्यंसनातनम् १२७
इति श्रीपाद्मेमहापुराणेपंचपंचाशत्साहस्र्यांसंहतियांवैयासिक्यांमुत्तरखंडे
भृगुपरीक्षाकथनंनाम पंचपंचाशदधिकद्विशततमोऽध्यायः २५५
इति श्रीपाद्मेमहापुराणेषष्ठमुत्तरखण्डं समाप्तम्